रसं विषं गन्धकञ्च हरितालं फलत्रयम् । जयपालं त्रिवृत् स्वर्णं ताम्रसीसाभ्रलौहकम् ॥ ६१८ ॥ अर्कक्षीरं लाङ्गलीं च स्वर्णमाक्षिकमेव च । समं कृत्वा रसेनैषां त्रिसप्तधारञ्च मर्दयेत् ॥ ६१९ ॥ अर्कश्वेतालम्बुषा च सूर्य्यावर्त्तश्च कारवी । काकजङ्घा शोणकश्च कुष्ठं व्योषं विकङ्कतम् ॥ ६२० ॥ सूर्य्यमणिश्चन्द्रकान्ता निर्गुण्डीशजटाऽपि च । धुस्तूरदन्तीपिप्पल्यो दशाष्टाङ्गमिदं शुभम् ॥ ६२१ ॥ रसतुल्यं प्रदातव्यं दत्वा तोयं चतुर्गुणम् ।

शिष्टैकगुणतोयेन भावना निधिरिप्यते ॥ ६२२ ॥ भावनायां भावनायां शोषणं मुहुरिप्यते । ततश्च वटिकां कृत्वा भैरवाय बलिं ददेत् ॥ ६२३ ॥ रसोऽयं श्रीसन्निपातभैरवो ज्वरनाशनः । सर्वोपद्रवसंयुक्तं ज्वरं हन्ति न संशयः ॥ ६२४ ॥ सन्निपातज्वरं हंति जीर्णञ्च विषमं तथा। ऐकाहिकंद्व्याहिकञ्च चातुर्थकमपि ध्रुवम्। ६२५ ॥ ज्वरञ्च जलदोषोत्थं सर्वदोषसमाकुलम् । भैरवस्य प्रसादेन जगदानन्दकन्थजी ॥ ६२६ ॥

सर्वं चूर्णं समं कृत्वा अर्कमूलादिपिप्पलीमूलान्तानामष्टानां मिलितपारसादिसामग्रीतुल्यानां चतुर्गुणजलैकगुणशिष्टकायेन त्रिंशद्वारानातपे भावनीयम् । प्रतिवारं यत्नेन शोषयित्वा गुंजाप्रमाणा वटिकाः कृत्वा व्याध्यनुरूपमार्द्रकरसेन ज्वरिणे दद्यात् । विरेकादनन्तरं शुण्ठीजीरकतोयप्रक्षालितान्नं दद्यात् । अजाते विरेचने पुनरपि रसं दद्यात् । व्याधिनिवृत्तौ कदाचित् वातपीडायां वातचिकित्सा कार्या । अत्र भैरवं रुधिरवर्णं ध्यायेत् ।

पारा, विष, गन्धक, हरिताल, त्रिफला, जमालगोटा, निसोथ, धतूरे का बीज, सर्वेषा, सीसा, अभ्रक, लोह, मदार का दूध, कलिहारी ( विष ) और सोनामाखी भस्म समान भाग इन कुल द्रव्यों को लेकर नीचे लिखे द्रव्यों के क्वाथ की ३० भावनायें देवे और प्रतिभावना में उत्तम रीति से मर्दन करके धूप में शुष्क कर लेवे। भावना के द्रव्य जैसे—आक की मूल, श्वेत कोयल, मुंडी, सूर्यमुखी, कसौंजी, काकजंघा, लोनापाटा, मूड, त्रिफला, बेंदवी, सूर्यकान्तमणि, भस्मकान्तमणि, गंभारी, रुद्रजटा, भाङ्ग, जमालगोटा का मूल और पिपरामूल इन १८ अठारह द्रव्यों के समुदाय को पूर्वोक्त पारा आदि द्रव्यों के समुदाय के समान परिमाण में लेकर चतुर्गुण जल में पकावे, जब एक भाग जल शेष रह जावे, तो उतारकर वस्त्र से छान लेवे। इसी क्वाथ की पूर्वोक्त रीति से ३० भावना देवे । अर्थात् प्रतिभावना में उत्तम रीति से मर्दन करके धूप में शुष्क करे। तदनन्तर मटर के समान गोलियां बनाकर अदरख के अर्क के साथ सन्निपातज्वर में प्रयोग करे। इस रस से उपद्रवयुक्त सान्निपातिक, ऐकाहिक, द्व्याहिक, चातुर्थिक, जीर्ण और विषम आदि अनेक प्रकार के ज्वर निवृत्त होते हैं। इस सन्निपात भैरव रस के सेवन से विरेचन हो जाने पर सोंठ और जीरायुक्त जल से धोया हुआ भात भोजन के लिये देवे। विरेचन न होने पर इस रस की फिर एक मात्रा देवे। इस औषध के सेवन से ज्वर निवृत्त होने पर कभी कभी वातरोग उत्पन्न हो जाता है, यदि ऐसा हो तो वातरोगोक्त चिकित्सा करनी चाहिये। इस औषध का सेवन करने के समय रक्तवर्ण भैरवजी का ध्यान करना चाहिये ॥ ६१८-६२६ ॥

### गदमुरारि रस ।

रस बलि शिललोह व्योम ताम्रेण तुल्यान्यथ रस दल भागो वत्सनाभः प्रदिष्टः । भवति गदमुरारिश्चास्य गुञ्जार्द्रवारा लपयति दिवसेन प्रौढमाम ज्वराख्यम् ॥ ६२७ ॥

शुद्ध पारा, शुद्ध गन्धक, शुद्ध मैनसिल, लोह भस्म, अभ्रक भस्म, ताम्रभस्म प्रत्येक एक २ तोला शुद्ध बछनाग चौथाई तोला सबको अदरख के रस के साथ घोटकर गोली बना ले। मात्रा ½ से १ रत्ती तक दिनमें २ बार। अनुपान—अदरख का रस, तुलसी का रस, जल रोगानुसार। गुण—आमप्रधान पुराने सभी प्रकार के ज्वरों को नाश करता है, दोषपाचक भी है ॥ ६२७ ॥

### पाशुपत रस ।

पटुना पूरयेत् स्थालीं तन्मध्ये पटुमृत्तिका। तन्मध्ये रामठीयणा तन्मध्ये पारदं क्षिपेत्॥

६२८ ॥ विषं विमृष्य सूतांशं वारिणया-लोड्य सप्तभिः । कुले त्रिभिः सङ्गुणिते तेन चैवं दुहेच्छनैः ॥ ६२६ ॥ वह्नि मध्याल-येच्चुल्यां हठात यामचतुष्टयम् । तद्भस्म तिलमात्रन्तु दद्यात् सर्वेषु पाप्मसु ॥ ६३० ॥ ग्रहण्यां जठरे शूलं मन्देऽग्नौ परिणामजे । युक्तमेतान्निहन्त्याशु कुर्याद्बहुतरां क्षुधाम । तापे शीतक्रियां कुर्यात् वाडवाग्न्यो महा-रसः ॥ ६३१ ॥

एक मूस लवण ( नोन की बनावे और एक हिंगु की फिर पारद १ भाग, मीठा विष १ भाग, इन दोनों को २१ गुने जल में अच्छी तरह आलो-डन करके सुखा ले, सूख जाने पर हिंगु मूसा में रख दे, लवणमूस ढक दे, फिर इनको एक लवण से भरी हुई हाँडी में रखकर बारह घंटे धीमी-धीमी अग्नि से पाक करे । इस प्रकार पारद की भस्म तैयार मिलेगी । यह तिलमात्र सर्वरोगों में प्रयोग की जाती है । ग्रहणी, पेट के विकार, शूल, मन्दाग्नि, परिणामशूल में लाभदायक है और क्षुधावर्धक है । यदि इससे दाह हो तो शीतल वस्तुओं का उपयोग करना चाहिए । ॥ ६२८-६३१ ॥

आर्द्रकवटी ।

मनःशिला रसो गन्धः साम्लक्षारा-मृतञ्च वै । आर्द्रकस्वरसेनैव मर्दयेत्ततो भिषक् ॥ ६३२ ॥ भावयेत् सप्तवारञ्च सप्तमाने दिने सुधीः । वटिका सर्षपमिता कार्या वैद्येन धीमता ॥ ६३३ ॥ आर्द्रक-स्वरसेनापि भक्षयेज्ज्वरशान्तये । स्वेदार्थं शाययेद्रौद्रे गात्रे दत्त्वा सुचेलकम् ॥ ६३४ ॥ घर्मं दृष्ट्वा च तं वस्त्रं त्यजेत्स्वेदञ्च गात्रमम्भू रिजन्मुद्गांस्तथा चेक्षुरसं दधि च शीतलम् । तत्परेऽहनि च स्नानं कुर्याद्विभय एव च ॥ ६३५ ॥

मैनसिल, पारद, गन्धक, साँभर, मीठा विष, इन सबको बराबर लेकर अदरख के रस से सात भावना देकर सात दिन घोटे और फिर छोटी सरसों के बराबर गोली बना ले । अनुपान अदरख का रस । ज्वर में पसीना लाने के लिए इस रस का प्रयोग कराना चाहिए । रोगी को कम्बल आदि मोटे वस्त्र उढाकर धूप में लिटा दे । पसीना आने पर उसको पोंछकर, उन वस्त्रों को हटा दे, ज्वर उतरने पर फिर रोगी को भोजन के लिए मछली, मूँग, गन्ने का रस, दही तथा अन्य ठण्डी वस्तुओं का आयोजन करे और वैद्य रोगी को अगले दिन उसकी अवस्था को देखकर स्नान की भी आज्ञा दे सकता है ६३२-६३५

दाडिमपत्रौषधि ।

साम्लक्षारं गृहीत्वा च दाडिमच्छदशो-धितम् । रस गन्धं मर्दयेच्च अर्द्रकस्वरसेन च ॥ ६३६ ॥ भावयेत् सप्तवारन्तु एक-स्मिन दिवसे सुधीः । अनुपानं प्रदातव्यं दाडिमच्छदजं रसम् ॥ तथा मधु च दातव्यं ज्वराणां कुलशान्तये ॥ ६३७ ॥

अनार के पत्तों के स्वरस से शुद्ध हुआ साँभर १ भाग लेकर पारद १ भाग, गन्धक १ भाग, दोनों को कज्जल के समान करके उसमें मिश्रण कर दे, इसके बाद अदरख के रस से सात भावनाएँ दे और इसी के चालीसवें हिस्से से बीसवें हिस्से तक गोली बना ली, अनुपान, अनार के पत्तों का स्वरस और शहद ॥ ६३६-६३७ ॥

मृत्युञ्जय रस ।

सूतं गन्धकटङ्कनं शुभविषं धुस्तूरबीजं कटु नीत्वा भागमथोत्तरद्विगुणितं चोन्म-त्तमूलाम्बुना ॥ कुर्यान्माषवटीं सुखाति-सुखदां सर्वाञ्ज्वरान्नाशयेदेष श्रीशिव-शासनात् मननिनः सूतश्च मृत्युञ्जयः ॥ ६३८ ॥ नारिकेलसितायुक्तं वातपित्तज्वरं जयेत । मधुना श्लेष्मपित्तोत्थं ज्वरं

संनाशयेद्ध्रुवम् ॥ सन्निपातज्वरं घोरं नाशयेदार्द्रनीरतः ॥ ६३६ ॥

पारा १ भाग, गन्धक २ भाग, सोहागा की खील ४ भाग, विष ८ भाग, धतूरे के बीज १६ भाग, और त्रिकटु ३२ भाग। इन कुल द्रव्यों को एकत्र कर धतूरे के मूल के रस में अथवा क्वाथ में पीसकर उर्द के समान छोटी-छोटी गोलियां बना लेवे। इस मृत्युञ्जय रस का सेवन करने से सब प्रकार के ज्वर नष्ट होते हैं। अनुपान—वातपित्त-ज्वर में मिश्री मिला नारियल का जल, कफपित्त-ज्वर में मधु और सान्निपातिक ज्वर में अदरख का अर्क ॥ ६३८-६३९ ॥

संजीवनी गुटिका।

विडङ्गं नागरं कृष्णा पथ्यामलविभीतकौ। वचा गुडूची भल्लातं सद्विषं चात्र योजयेत् ॥ ६४० ॥ एतानि समभागानि गोमूत्रेणैव पेषयेत्। गुञ्जाभा गुटिका कार्या दद्यादार्द्रकजैरसैः ॥ ६४१ ॥ एकामजीर्णे-गुल्मेषु द्वे विषूच्यां प्रदापयेत्। तिस्रश्च सर्पदष्टे चतस्रः सन्निपातके। वटी संजीवनी नाम्ना सञ्जीवयति मानवम् ॥ ६४३ ॥

वायविडंग, सोंठ, पीपल, हरड़, बहेड़ा, आंवला, वच, गिलोय, शुद्ध भिलावाँ और शुद्ध सींगियाँ विष इन सब औषधियों को समान भाग लेकर गोमूत्र की भावना देकर रत्ती के समान गोलियाँ बना लेवे अदरख के रस के संग इसका सेवन करने से अजीर्ण १ गोली में मिट जाती है। हैजा २ गोली में शान्त हो जाता है सांप काटने पर ३ गोली देने से सारा विष उतर जाता है। यह वटी मनुष्य को पुनर्जीवन देने वाली है। विशेष अनुभूत है ॥ ६४०-६४३ ॥

सन्निपातमृत्युञ्जय रस।

विषं सूतकगन्धौ च पित्तं मत्स्यवराहयोः। आजमायूरपित्ते च माहिष्याश्चापि योजयेत् ॥ ६४४ ॥ हरितालञ्च सव्योषं वानरीबीजसंयुतम्। अपामार्गं चित्रमूलं जयपालञ्च कल्कयेत् ॥ ६४५ ॥ एतत् सर्वं समांशेन अजामूत्रेण मर्दयेत्। माषेण सदृशी कार्य्या वटिका सन्निपज्वरैः॥६४६॥ महाज्वरे महाशीते महाशीतज्वरेऽपि च। मज्जागते सन्निपाते विसूच्यां विषमज्वरे ॥ ६४७ ॥ असाध्येमानवे मुंच्यादैकाहाज्ज्वरनाशिनी। जलोदरे शिथिलाङ्गे नासास्रावे चपीनसे ॥ ६४८ ॥ अजीर्णे मूर्च्छनाभावे श्लेष्मभावेऽतिदुर्जये। शोथकामलपाण्ड्वादिसर्वरोगापहारकः ॥ ६४९ ॥ मृत्युञ्जयो सन्निपातज्ञानज्योतिः प्रकाशितः। भृङ्गराजरसेनायं रसराजः प्रदीयते ॥ ६५० ॥ निर्वाते निर्जनस्थाने बहुवस्त्रसमावृते। प्रस्वेदः क्षणमात्रेण जायते चिह्नमीदृशम् ॥ ६५१ ॥ मूर्च्छितः पतितो भूमौ दह्यमानः पुनः पुनः। एवं चिह्नं समालोक्य वदेन्नैरुज्यमातुरे ॥ ६५२ ॥ पथ्यं यद् याचते रोगी तदातव्यं प्रयत्नतः। दध्योदनं शीतजलं दातव्यं तद् विचक्षणैः॥ ६५३ ॥ एष महारसः श्रेष्ठः शम्भुना प्रेरितो भुवि। कृपया सर्वभूतानां ज्ञानज्योतिः प्रकाशितः ॥ ६५४ ॥

विष, पारा, गन्धक, रोहितमत्स्य का पित्त, शूकर का पित्त, बकरा का पित्त, मोर का पित्त, मोहषी ( भैंस ) का पित्त, हरिताल, त्रिकटु, कौंच का बीज, चिरचिटा का मूल, चीते का मूल और जमालगोटा का बीज समभाग, इन सब द्रव्यों को लेकर बकरी के मूत्र में पीसकर उर्द के समान गोलियाँ बनावे। इसका सेवन करने से भयंकर शीतयुक्त सान्निपातिकज्वर,

मज्जागतज्वर, विसूचिका, विषम ज्वर आदि नाना प्रकार के रोग नष्ट होते हैं ।

अनुपान—भाँगरे का रस । औषध सेवन कराने के पश्चात् रोगी को मोटा वस्त्र ओढ़ा देवे । ऐसा करने से क्षणमात्र में पसीना आने लगता है । जब रोगी मूर्च्छित हो भूमि पर गिर पड़े और दाह से पीड़ित हो तो समझना चाहिये कि यह रोगी रोग से छुटकारा पा गया । इस अवस्था में रोगी भोजन के लिये जो कुछ माँगे, उसको वही वस्तु तत्काल देवे । विशेषकर भोजन के लिये दही-भात और पीने के लिये शीतल जल देना चाहिये । कुल प्राणियों पर कृपा करके शिवजी ने अपने ज्ञानज्योति से प्रकाशित कर इस महारस सन्निपातमृत्युञ्जय का पृथ्वी में प्रचार किया था ॥ ६४४-६५४ ॥

## मृतप्राणदायी रस ।

रसं गन्धकं टङ्कणं वत्स नाभं
समंमर्दयेद्धूर्त बीजेन यामम् ॥
ततो वत्सनाभेन हेमैश्चबीजै ।
रसै भावयेच्च त्रिवारं त्रिवारम् ॥६५५॥
कटुत्र्यादिजैः पञ्चवारं तत स्या-
दयं सूतराजो मृतप्राणदायी ।
ज्वरेसन्निपाते ज्वरे नूतने वा ।
महाश्लेष्मरोगे च गुञ्जा प्रमाणम् ॥६५६॥
पयः पायसं दाधिकं तक्र भक्तं ।
सिता पानवे हिज्वरे चाऽऽर्द्रनीरैः ॥
ज्वरे चाऽतिसारे घनक्वाथ युक्ते ।
ग्रहण्यर्शसां क्षौद्रयुक्तं सिताऽऽढ्यम् ६५७॥
चले स्नायुगे त्रिकटाग्नि पीतं ।
प्रकम्पेऽपबाहुक एकाङ्गवाते ।
अपस्मारमुन्माद वातं निहन्ति ।
प्रयुक्तः सितापञ्चभिर्धूर्त बीजै ॥६५८॥

शुद्ध पारा, गन्धक, सुहागा और बच्छनाग समान भाग धतूरे के बीज, सबको बराबर सबकी कज्जली कर बच्छनाग और धतूरे के रसों से २-२ दिन घोटकर त्रिकुट के रस में पाँच रोज और घोटे, फिर इसे १-१ रत्ती की मात्रा में रोगानुसार अनुपान के साथ लेने से ज्वर, सन्निपात, नवीन ज्वर, महाश्लेष्मरोग नष्ट होते हैं । दूध, खीर, दही के पदार्थ, छाछ, चावल ये सब वस्तुएँ पथ्य में देवे । नवीन ज्वर में अदरख के रस के साथ देवे, ज्वर और अतिसार में नागरमोथे के काढ़े से, संग्रहणी और बवासीर में मधु व शक्कर के साथ दे । वातज्वर में त्रिकुट और चित्रक के साथ देवे । प्रकम्प, अपबाहुक, एकाङ्गवात, अपस्मार, उन्माद इनमें शक्कर और ५ नग धतूरे के बीज के साथ देने से सबका विनाश करता है ॥ ६५५-६५८ ॥

टिप्पणी—धतूरे के बीज दो ही से ५ अधिक हैं ।

## कालाग्निभैरव रस ।

शुद्धसूतं द्विधा गन्धं मर्दयेद् गोक्षुर-द्रवैः । भावितश्च विशोष्याथ चूर्णयेदति-चिक्कणम् ॥ ६५९ ॥ चूर्णतुल्यं मृतं ताम्रं ताम्राद्दशांशिकं विषम् । हिंगुलं रसभागं च द्वौ भागौ कनकस्य च ॥ ६६० ॥ बाण-भागोऽत्र गोदन्त कारणभाग मनः शिला । टङ्कनं नेत्रभागं च ऋतुभागं च खर्परम् ॥ ॥ ६६१ ॥ अग्निभागं च जैपालं नेत्रभागं हलाहलम् । माक्षिकं पाग्निभागं च लौहं वङ्गं च भागकम् ॥६६२ ॥ सर्वाण् खल्वो-दरे क्षिप्त्वा क्षीरेणार्कस्य मर्दयेत् । दशमूल-कषायेण मर्दयेद् यामसप्तकम् ॥ ६६३ ॥ पञ्चमूलकषायेण सर्वत्र च विमर्दयेत् । गुञ्जामात्रां वटीं कृत्वा बलं ज्ञात्वा प्रयोज-येत् ॥ ६६४ ॥ ज्वरं त्रिदोषजं हन्ति सन्निपातं सुदारुणम् । पूर्ववद्दापयेद् पथ्यं जलयोगं च कारयेत् ॥ ६६५ ॥ पथ्यं शाल्योदनं ज्ञेयं दधिभक्तसमन्वितम् ।

कालाग्निभैरवो नाम रसोऽयं भूरिपूजितः ॥ ६६६ ॥

पारा १ भाग, गन्धक २ भाग इनकी कजली बनाकर गोखुरू के स्वरस की भावना देवे। सूख जाने पर चूर्ण करके, उस चूर्ण में चूर्ण के समान ताम्रभस्म, ताम्रभस्म का अष्टमांश विष, हिंगुल १ भाग, धतूरे के बीज २ भाग, गोदन्ती हरिताल २ भाग, मैनशिल १ भाग, सोहागा की खील १ भाग, खपरिया १ भाग, जमालगोटे के बीज १ भाग, काले साँप का विष ३ भाग, स्वर्णमाक्षिक १ भाग, लोह भस्म १ भाग और वङ्गभस्म १ भाग इन सब औषधों को एकत्र कर खरल में आक के दूध के साथ मर्दन करके दशमूल के क्वाथ की भावना देकर एक प्रहर पर्यन्त मर्दन करे। तदनन्तर स्वल्प पञ्चमूल के क्वाथ के साथ खाप मर्दन करके चना के समान वटी बनावे। रोगी का बलाबल देखकर इस कालभैरव औषध का प्रयोग करना चाहिये। इस रस के सेवन करने से दारुण सन्निपात नष्ट होते हैं। औषध सेवन कराने के पश्चात् रोगी को पूर्ववत् भोजन के लिये दही-भात देवे, और शिर पर जल सेचन आदि शीत उपचार करना चाहिए ॥ ६६१-६६६ ॥

त्रैलोक्यचिन्तामणि रस।

रसभस्मत्रयो भागा द्विभागं च भुजङ्गमम्। कालकूटं च षड्भागं भार्गेकं तालकं तथा ॥ ६६७ ॥ गोदन्त गगनं तुत्थं शिलागन्धकटङ्कणम्। जयपालोन्मत्तदन्ती करवीरं च लाङ्गली ॥ ६६८ ॥ पलाशीमूलजैर्नीरैः सप्तधा भावितं दृढम्। चित्रमूलकषायेण चार्द्रकस्य च वारिणा ॥ ॥६६९॥ मात्स्यमाहिषमायूरच्छागवाराहदुग्धभम्। प्रत्येकं दशधा मर्द्य शिलाखल्ले च संतपात् ॥ ६७० ॥ वटीं च सर्षपमितां शुद्धबसे(?)ण धारयेत्। दातव्यं चानुपानेन नारिकेलोदकेन च ॥ ६७१ ॥ ताम्बूलं च ततो दद्याद् भक्ष्यं शीतोपचारकम्। तिलतैले सदा स्नानं घृतमत्स्यादिभोजनम्। शीताम्लं दधिसंयुक्तं पुराणान्नं च भक्षयेत् ॥ ६७२ ॥

रससिंदूर ३ भाग, सर्पविष २ भाग, कालकूट विष ६ भाग, हरिताल २ भाग, गोदन्ती हरिताल १ भाग, अभ्रकभस्म १ भाग, तूतिया १ भाग, मैनशिल १ भाग, गन्धक १ भाग, *सोहागा फुलाया हुआ १ भाग*, जयपाल (जमालगोटा) १ भाग, धतूरे के बीज १ भाग, जमालगोटा की जड़ १ भाग, कनैल का मूल १ भाग, कलिहारी एक भाग, इन कुल द्रव्यों को पलाश मूल के क्वाथ की ७ भावनायें देवे और प्रति भावना में उत्तम रीति से मर्दन कर धाम में शुष्क कर लेवे। पश्चात् चीते के मूल का क्वाथ, अदरख का रस रोहितमत्स्य का पित्त, महिष का पित्त, मयूर का पित्त, छाग का पित्त, शूकर का पित्त और दोमुहा साँप का विष इनमें प्रत्येक की दश-दश भावना देकर मर्दन करे। तदनन्तर सरसों के बराबर-बराबर छोटी गोलियाँ बनावे। अनुपान—नारियल का जल १ औषध सेवन कराकर पान खिलावे और शीतल उपचार करें। शरीर में तिल के तेल का मर्दन कराकर स्नान कराना चाहिये। भोजन के लिये घी, मछली, पुराने चावल का भात, दही और शीतल और खट्टे पदार्थ देना चाहिये ॥ ६६७-६७२ ॥

मल्ल सिन्दूर रस।

नवकर्षमितः सूतो रस चन्द्रश्च तत्समः। चतुः कर्ष मितो मल्लः सार्द्धपश्चात्र सम्मितः॥ गन्धकश्चेति तत्सर्वं काच कूप्यां निधापयेत्। क्रमवृद्धाग्निना सम्यग्वालुकायन्त्रगं पचेत् ॥ वह्निं षोडशयामश्च दत्त्वा शीतं समुद्धरेत्। रसोऽयं मल्लसिन्दूरः सर्व वात विकारनुत् ॥ गुञ्जानुपानतो हन्यात्सन्निपातादिकान्गदान्।

*शुद्धपारा, रस कपूर ९-९ तोला, सफेद सोमल*

२ तोला, शुद्ध गन्धक १० तोला लेकर सबकी कज्जली बना १०० कपड़ा मिट्टी की हुई आतशी शीशी में भरकर वालुकायन्त्र में मन्द मध्य और खर इस प्रकार से १ प्रहर अग्नि देवे। ठंढी होने पर मध्य भाग में लगे हुए मकरध्वज को निकाल कर रख छोड़े, इसमें से १,१ रत्ती रोगानुसार अनुपान के साथ देने से सन्निपात श्वास कास और तमाम प्रकार की व्याधियाँ नष्ट होती हैं ॥

त्रिभुवन कीर्तिरस।

हिङ्गुलं च विषं व्योषं टङ्कणं मागधी शिफाम्। सञ्चूर्ण्य भावयेत्त्रेधा सुरसाऽऽर्द्रकैरभिः ॥ ६७३ ॥ रसस्त्रिभुवने कीर्तिर्गुञ्जैकाऽऽर्द्ररसेन यः। विनाशयेज्ज्वरान् सर्वान् सन्निपातादयोऽदराः ॥ ६७४ ॥

शुद्ध सिंगरफ विष, सुंठ, मिर्च, पीपल, सुहागा, पीपलामूल, सब बराबर २ लेकर कूट पीस कपड़े में छान कर अदरक तुलसी धतूरे के रस में ३-३ दफे घोट कर १-१ रत्ती की गोलियाँ बनावे। १-१ गोली समयानुसार अनुपान के साथ देने से या अदरख के रस के साथ देने से १३ सन्निपात और सब ज्वरों का नाश हो जाता है। मियादी बुखार में विशेष लाभप्रद है ॥ ६७३-६७४ ॥

रसेश्वर।

रसेन गन्धं द्विगुणं गृहीत्वा तत्पादगन्धं रविनालहेम। भस्मीकृतं योजय मर्दयेत्तु दिनत्रयं वह्निरसेन पश्चे ॥ ६७५॥ विषं च दत्त्वात्र कलाप्रमाणमथादिपित्तैः परिभावयेच्च। रक्तिद्वयं चास्य ददीत वह्निकटुत्रयेणार्द्ररसप्रयुक्तम् ॥ ६७६ ॥ तैलेन चाभ्यक्तवपुश्च कुर्यात् स्नानं जलेनैव सुशीतलेन। यावद्भवेद् दुःसहमस्य शीतं मूत्रं पुरीषं च शरीरकम्पः ॥६७७ ॥ पथ्ये यदीच्छा परिजायतेऽस्य मरीचखण्डं दधि भक्तकं च। अल्पं ददीतार्द्रकमत्र शाकं दिनाष्टकं स्नानमिदं च पथ्यम् ॥ ६७८ ॥

पारा ४ तोले, गन्धक पारे का दूना (८ तोले), ताम्रभस्म १ तोले, हरिताल १ तोले, स्वर्णभस्म १ तोले इन कुल द्रव्यों को तीन दिन पर्यन्त चीता के रस की भावना देकर और मर्दन करके घाम में शुष्क कर लेवे। इसमें षोडशांश विष मिलाकर पान आदि के पित्त में भावना देकर दो-दो रत्ती की गोलियाँ बनावे। अनुपान अदरख का रस, चीता और त्रिकटु का चूर्ण। औषध सेवन कराकर रोगी के शरीर में तैल मर्दन कराकर शीतल जल से तब तक स्नान कराता रहे जब तक उसको शीत असह्य, शरीर में कम्प और मल-मूत्र की प्रवृत्ति न हो जावे। इस प्रकार ८ दिन पर्यन्त स्नान कराना लाभदायक होता है। रोगी को भोजन की इच्छा होने पर मरिच, खाँड़, दही-भात, थोड़ी अदरख और शाक देने चाहिये ॥ ६७५-६७८ ॥

पञ्चाननरस।

कान्तं च सूतं हरितालगन्धं
समुद्रफेनं लवणानि पञ्च।
नीलाञ्जनं तुत्थकमेव रूप्यं
भस्मप्रवालानि वराटकाश्च ॥ ६७९ ॥
वैक्रान्तशम्बूकसमुद्रशुक्ति
सर्वाणि चैतानि समानि कुर्यात्।
सूतं भवेद् द्वादशभागकं च
स्नुह्यर्कदुग्धेन विमर्दयेच्च ॥ ६८० ॥
दिनत्रयं वह्निरसैस्ततश्च
निवेशयेत्ताम्रजसम्पुटे तत्।
मृदा च संलिप्य रसं पुटेत्तद्
रसस्ततः स्याद्दहनानलाख्यः ॥६८१॥
तत्पादभागेन विषं नियोज्य
कृशानुतोयेन पचेत् क्षणं तत्।
वातप्रधाने च कफप्रधाने
नियोजयेत्पृथगुचितप्रयुक्तम् ॥६८२॥
दोषत्रयोत्थेऽपि च सन्निपाते
वाताधिकत्वादिह सूतकोक्तः ॥ ६८३ ॥

कान्तलोह की भस्म, पारा, हरिताल, गन्धक, समुद्रफेन, गौंओं नमक, काला सुरमा, तूतिया, रूपे की भस्म, प्रवालभस्म, कौडी-भस्म, वैक्रान्तभस्म, शङ्खभस्म और समुद्र की सीपी की भस्म, समान भाग इन सब द्रव्यों को लेवे। परन्तु पारा १२ भाग लेकर इन सबको थूहर और आक के दूध में मर्दन करे। पश्चात् तीन दिन पर्यन्त चीता के क्वाथ में मर्दन करके, ताँबा के सम्पुट में रखकर, ऊपर मिट्टी का लेप करके पुटपाक करे। शीतल होने पर कुल योग का चतुर्थांश विष मिलाकर चीता के क्वाथ में मर्दन करके यथामात्र पुनः पाक करके आधी आधी रत्ती की गोली बना लेवे। अनुपान-चीता का स्वरस अथवा क्वाथ और त्रिकटु का चूर्ण। इस वडवानल रस का सेवन करने से वातोल्बण, कफोल्बण और सान्निपातिक ज्वर निवृत्त होता है॥ ६७९-६८३॥

अर्कमूर्ति रस और त्रिदोषदावानल रस।

लौहाष्टकं मारितमर्कभागं
सूतं द्विभागं द्विगुणं च गन्धम्।
विमर्दयेद् वह्निरसेन तापे
दिनत्रयं चात्र विषं कलांशम्॥६८४॥
विलिप्य पित्तैः परिभावितोऽयं
रसोऽर्कमूर्तिर्भवति त्रिदोषे।
ताम्रस्य पात्रे तु दिनैकमात्रं
निम्बूरसेनापि च पित्तवर्गैः॥६८५॥
शुण्ठ्यार्द्रकोत्थेन रसेन सूत-
स्त्रिदोषदावानल एष सिद्धः।
गुञ्जाद्वयं त्र्यूषणचूर्णकस्य
ददीत चित्रार्द्ररसेन वापि॥ ६८६॥
नासापुटे चापि नियोजनीया
गुञ्जास्य शुण्ठीमरिचेन युक्ता॥६८७॥
यदि ताम्रपात्रजम्बीरादिरसैः पुनरपि
भावयेत् तदा त्रिदोषदावानलो भवति।

लोहभस्म १ भाग, ताम्रभस्म ८ भाग, पारा २ भाग, द्विगुण गन्धक और षोडशांश विष, इन कुल द्रव्यों को चीता के क्वाथ में तीन दिन मर्दन करके पञ्चपित्त की भावना देवे। इसका नाम "अर्कमूर्ति रस" है। इसका सेवन करने से त्रिदोष निवृत्त होता है।

यदि इस अर्कमूर्ति रस को ताम्रपात्र में रख कर फिर नींबू का रस, पञ्चपित्त, कटेरी का रस और अदरख का रस इन कुल द्रव्यों की भावना दी जाय तो त्रिदोषदावानल रस बन जाता है।

इसकी मात्रा २ रत्ती। अनुपान त्रिकटु चूर्ण, चीता का क्वाथ और अदरख का अर्क। इस रस में सोंठ, मिरिच मिलाकर नस्य भी देना चाहिये॥ ६८४-६८७॥

त्रिदोषदावानलकालमेघ रस।

तालेन वङ्गं शिलया च नागं
रसैः सुवर्णं रविशारपत्रम्।
गन्धेन लौहं दरदेन सर्वं
पुटे मृतं योजय तुल्यभागम्॥६८८॥
तत्तुल्यसूतं द्विगुणं च गन्धं
तुत्थं च गन्धेन समानभागम्।
निम्बूत्थतोयेन विमर्द्य सर्वं
गोलं प्रकृत्याथ मृदा विलिप्य॥६८९॥
पुटं च दत्त्वाथ विमर्दयेनं
गन्धेन तुल्येन कृशानुनीरैः।
विषं च दत्त्वाथ कलाप्रमाण-
मीपत्कृशानुत्थरसैः पचेत्तत्॥६९०॥
पित्तैस्तथा मारित एष सूत-
स्त्रिदोषदावानलकालमेघः।
वल्लं ददीतास्य च पूर्वयुक्त्या
दाहोत्तरे सं मधुपिप्पलीभिः॥६९१॥
मुद्गश्च शाल्यन्नमिह प्रशस्तं
पथ्यं भवेत्कोष्णमिदं दिवान्ते॥६९२॥
रसेश्वरादिकालमेघान्ता रसा वातो-

त्रयणे सन्निपाते प्रयोज्या इति सारकौमुद्यां माधवः ।

हरिताल के साथ वङ्ग, मैनशिल के साथ शीशा, पारा के साथ स्वर्ण, ताम्र, चाँदी का पत्र और गन्धक के साथ लोह का जारण करके, पश्चात् इन कुल द्रव्यों को द्विगुन के साथ फिर गजपुट में पकावे । तदनन्तर ये कुल पूर्वोक्त औषध समभाग, जितने अन्य द्रव्य हों उतना ही पारा, पारा से दूना गन्धक और गन्धक के समान तूतिया इन कुल द्रव्यों को एकत्र कर नींबू के रस के साथ गोला बनावे । उस गोला के ऊपर मिट्टी का लेप कर पुटपाक की रीति से पकावे । पश्चात् उसमें समान भाग गन्धक डालकर चीता के स्वरस अथवा क्वाथ से मर्दन करके पुटपाक की रीति से पाक करे । तदनन्तर उसमें षोडशांश विष मिलाकर चीता के स्वरस अथवा क्वाथ में मर्दन कर पूर्वोक्त रीति से किञ्चित् पाक करे । पीछे मत्स्य आदि के पित्त में मर्दन करके दो रत्ती प्रमाण वटी बनावे । इसको "त्रिदोषदावानलकालमेघ रस" कहते हैं ।

दाहप्रधान ज्वर में मधु और पीपरि के साथ सेवन करना चाहिये । सायंकाल में रोगी को मूँग की दाल, शाली के चावल का कुछ उष्णमान भोजन के लिये देना चाहिये ॥ ६८८ ६९२ ॥

रसेश्वर से आरम्भ कर कालमेघ रस पर्यन्त जितने रस पीछे लिखे गये हैं उनका वातोल्बण सन्निपात में प्रयोग करना चाहिये ऐसा रसकौमुदी में माधवकर ने लिखा है ।

श्रीप्रतापलङ्केश्वर रस ।

अपामार्गस्य मूलानां चूर्णं चित्रकमूलजैः । वल्कलैर्मर्दयित्वाथ रसं नस्त्रेण गालयेत् ॥ ६९३ ॥ तेन सूतसमं गन्धमभ्रकं पारदं विषम् । टङ्कणं तालकञ्चैव मर्दयेद्दिनसप्तकम् ॥ ६९४ ॥ त्रिदिनं मूषलीकन्दैर्भावयेद् घर्म्मरक्षितम् । मूषां च गोस्तनाकारामापूर्य्योपरि ढक्कयेत् ॥ ६९५ ॥ सप्तभिर्मृत्तिकावस्त्रैर्वेष्टयित्वा पुटेल्लघु । रसतुल्यं लौहभस्म मृतवङ्गादिकस्तथा ॥ ६९६ ॥ मधूकसारं जलदं रेणुकं गुग्गुलं शिलाम् । चाम्पेयं च समांशं स्याद्भागार्द्धं शोधितं विषम् ॥ ६९७ ॥ तत्सर्वं मर्दयेत् खल्ले भावयेद् विषनीरतः । आतपे सप्तधा तीव्रे मर्दयेद् घटिकाद्वयम् ॥ ६९८ ॥ कटुत्रयकषायेण कनकस्य रसेन च । फलत्रयकषायेण मुनिपुष्परसेन च ॥ ६९९ ॥ समुद्रफेननीरेण विजयापत्रवारिणा । चित्रकस्य कषायेण ज्वालामुख्या रसेन च ॥ ७०० ॥ प्रत्येकं सप्तधा भाव्य तद्वत्पित्तैश्च पञ्चभिः । सर्वस्य समभागेन विषेण परिधूपयत् ७०१ विमर्द्य प्रक्षयित्वा च रक्षयेत् कूपिकोदरे । गुञ्जैकं वह्निनीरेण शृङ्गवेररसेन वा ॥ ७०२ ॥ दद्याच्च रोगिणे तीव्रमौक्यविस्मृतिशान्तये । क्षुरेण तालुमाहत्य घर्षयेदार्द्रनीरत ॥ ७०३ ॥ नोद्घटन्ते यदा दन्तास्तदा कुर्य्यादिमं विधिम् । सेचयेन्मन्त्रपिद्धैश्च वारां कुम्भशतैर्नरम् ॥ ७०४ ॥ भोजनेच्छा यदा तस्य जायते रोगिणः परा । दध्योदनं सितायुक्तं दद्यात्तक्रं सजीरकम् ॥ ७०५ ॥ पाने पानं सिताजातं यदि च्छेदादढीत सत् । एवं क्रमेण शान्तिः स्यात् तापस्य च रुजस्य च ॥ ७०६ ॥ सचन्द्र चन्दनरसालेपनं कुरु शीतलम् । यूथिकामल्लिकाजातीपुन्नागबकुलास्तृताम् ॥ ७०७ ॥ विधाय शय्यां तत्रस्थलेपनैश्चन्दनैर्मुहुः । हावभावविलासोक्तैः कटाक्षचञ्चलेक्षणैः ॥ ७०८ ॥ पीनोत्तुङ्गकुचापीडैः कामिनीपरिरम्भणैः । रम्यवीणाविनादोक्तैर्गायनैः श्रवणामृतैः ॥ ७०९ ॥ पुण्यश्लोक-

कथाद्यैश्च सन्तापहरणं कुरु। दद्याद् वातेषु सर्वेषु सिन्धुजैः सह वार्द्धिभिः ॥ ७१०॥ दद्यात् कणामाक्षिकाभ्यां कामलाद्ययपाण्डुषु। तत्तद्रोगानुपानेन सर्वरोगेषु योजयेत्। अयं मतापलङ्केशः सन्निपातहरः परः ॥ ७११ ॥

चिरचिरा के मूल और चीते के मूल को एकत्र जल में पीसकर कल्क बनावे, उस कल्क को वस्त्र में रखकर हाथ से दबाकर रस निकाल लेवे। तदनन्तर इस रस के समान परिमाण में पारा, गन्धक, अभ्रक, विष, सोहागा फूला हुआ, हरिताल लेकर, रस में सात दिन पर्यन्त मर्दन करे। पश्चात् तीन दिन पर्यन्त काली मुसली के रस में मर्दन करके घाम में शुष्क कर लेवे। तदनन्तर गौ के स्तन के समान आकृतिवाले मूषा में भरकर, एक सकोरा से मूषा का मुख ढँककर मिट्टी से संधिस्थान बन्द करके ऊपर से सात परत कपड़मिट्टी करके लघुपुट में पाक करे। पश्चात् लोहभस्म, वङ्गभस्म, अहिफेन (अफ़ूम), मधुपा का सार, नागरमोथा, भिलावे के बीज, गुग्गुल, मैनशिल और नागकेशर इनमें से प्रत्येक द्रव्य पारे के समान, तथा शुद्ध विष पारे का आधा भाग लेकर एकत्र खरल में मर्दन करे। तदनन्तर सींगिया विष के क्वाथ की तीव्र घाम में सात भावना देकर प्रतिभावना में दो-दो घड़ी (४८ मिनट) मर्दन करे। पश्चात् त्रिकटु का क्वाथ, धतूरे का स्वरस, त्रिफला का क्वाथ, अगस्ति के फूल का रस, समुद्रफेन मिला जल, भाँग की पत्तियों का रस, चीता के मूल का क्वाथ और ज्वालामुखी (कलिहारी) का स्वरस और पञ्चपित्त इनमें से प्रत्येक की सात सात भावना देकर मर्दन करे।

तदनन्तर कुल द्रव्य मिलकर जितने हों उतना ही इसमें विष मिलाकर मर्दन करके सुखा लेवे। इस रस को शीशी में रखकर डाट लगा देवे।

चीते के क्वाथ अथवा अदरख के रस के साथ एक रत्ती प्रमाण इस औषध का सेवन करने से सन्निपातजन्य तीव्र मोह और विस्मृति आदि उपद्रव शान्त होते हैं।

रोगी के मस्तक में तालु के बालों को छुरा (उस्तुरा) से साफ करके वहाँ का चमड़ा थोड़ा छीलकर उस स्थान पर इस औषध को अदरख के रस में मिश्रित कर मर्दन करे। इस क्रिया के करने से रोगी की अज्ञानता और दाँतों का लग जाना आदि उपद्रव दूर होते हैं। रोगी के मस्तक पर सैकड़ों घड़े जल डालना चाहिये।

रोगी को भोजन के लिये मिश्रीयुक्त दही के साथ भात और जीरा मिश्रित तक्र देवे। पीने को मिश्री का शर्बत यथेच्छ देना चाहिये। ऐसा करने से ताप तथा रोग की शान्ति होती है। रोगी के शरीर में घिसे चन्दन में कपूर मिलाकर लेप आदि शीतल उपचार तथा रोगी के लिये प्रसन्नता उत्पन्न करनेवाली जुही, मालती, चमेली, नागकेसर, मौलश्री आदि के फूलों से युक्त शय्या, हावभावविलासयुक्त स्त्रियों की बातें और शीतल कटाक्ष, पुष्ट ऊँचे कुच की स्त्री से आलिंगन, रमणीय वीणा के गीत, मधुर श्लोक एवं कथा आदि श्रवण द्वारा सान्त्वनात्मक क्रियाएँ करनी चाहिये।

इस रस को सब प्रकार के वातरोग में सैन्धव और चीता के क्वाथ के साथ, कामला और पाण्डुरोगों में पीपर का चूर्ण और मधु के साथ सेवन करे। तत्तद्रोगनाशक अनुपानों के साथ सब रोगों में इस रस का प्रयोग करना चाहिये। यह मतापलङ्केश रस सन्निपात नाशन में श्रेष्ठ है॥ ६९६-७११ ॥

द्वितीय कफकेतु।

टङ्कणं त्रिकटुं शङ्खं समभागिकम्। विषं च पञ्चभिस्तुल्यमार्द्रकतोयेन मर्दयेत् ॥ ७१२ ॥ वारत्रयं रक्तिपादां वटीं कुर्याद्भिषग्वरः। प्रातः सायं च वटिका द्रवमार्द्रकवारिणा ॥७१३॥ कफकेतुः कण्ठरोगं शिरोरोगं च नाशयेत्।

पीनसं कफसङ्घातं सन्निपातं सुदारुणम् ॥ ७१४ ॥

शंखभस्म १ तोला, सोंठ १ तोला, मरिच १ तोला, पीपरि १ तोला, सोहागा की खील १ तोला, विष २ तोले इन सब द्रव्यों को एकत्र अदरख के रस में ३ भावना देकर मर्दन करे। तदनन्तर एक-एक रत्ती की गोली बनाकर सायं प्रातः अदरख के अर्क के साथ दो गोली प्रयोग करनी चाहिये। इस कफकेतु रस के सेवन करने से कण्ठरोग, सिर के रोग, पीनस और कफोल्वण दारुण सन्निपातज्वर निवृत्त होते हैं ॥७१२-७१४॥

मृत्युञ्जय ।

त्रिकटु त्रिफला सूत गन्धकौ टङ्कणं विषम् । यष्टी निशा कुबेराक्षो दन्ति बीज मथाऽपिच ॥७१५॥ एतानि समभागानि खल्वमध्ये विनिःक्षिपेत् । भृङ्गराज रसेनैव मर्दयेत्त्रिदिनं भिषक् ॥ ७१६ ॥ गुटिका माष मात्रासु छाया शुष्काश्च कारयेत् । अनुपान विशेषेण सर्वरोगेषु योजयेत् ॥७१७॥ मृत्युञ्जयो रसोनाम सर्वरोग विदारणः ७१८

त्रिकुट, त्रिफला शुद्धपारा, गन्धक, टंकण, और बच्छनाग, मुलहठी, हल्दी, करंज के बीज, शुद्ध जमालगोटा ये सब समान भाग लेकर महीन चूर्ण कर पारे गन्धक की कज्जली मिलाकर भंगरे के रस में ३ रोज घोटकर उड़द के बराबर गोलियाँ बनाकर छाया में सुखाकर रख दे। इनमें से १-१ गोली रोगानुसार अनुपान के साथ देने से सब रोगों को नष्ट करता है ॥७१५-७१८॥

श्लेष्मकालानल रस ।

हिंगूलसम्भवं सूतं गन्धकं मृतताम्रकम् । तुत्थं मनोह्वा तालं च कट्फलं धूर्त्तबीजकम् ॥ ७१९ ॥ हिंगु समाक्षिकं कुष्ठं त्रिवृद्दन्ती कटुत्रिकम् । व्याधिघातफलं वङ्गं टङ्कनं समभागिकम् ॥७२०॥ स्नुहीक्षीरेण वटिकाः कारयेत् कुशलो भिषक् । विज्ञाय कोष्ठं कालं च योजयेद्रक्तिकाक्रमात् ॥७२१॥ वातश्लेष्मणि मन्देऽग्नौ पित्तश्लेष्माधिकेऽपि च । जीर्णज्वरे च श्वयथौ सन्निपाते कफोल्वणे ॥ ७२२ ॥ बलासमबलं त्यक्त्वा धातुं वातात्मकं नयेत् । सेवनात् सर्वरोगघ्नः श्लेष्मकालानलो रसः॥७२३॥

हिंगुलोत्थपारद, गन्धक, ताम्रभस्म, तूतिया मैनशिल, हरिताल, कायफल, धतूरे के बीज, हींग, सोनामाखी, कूट, निसोथ, जमालगोटा का मूल, सोंठ, मरिच, पीपरि, अमलतास, बङ्गभस्म, सोहागा की खील सम भाग; इन सब द्रव्यों को एकत्र कर थूहर के दुग्ध में मर्दन करके एक-एक रत्ती प्रमाण वटी बनावे। इस श्लेष्मकालानल रस का सेवन करने से वातकफोल्बण, पित्तकफोल्बण तथा कफोल्बण सान्निपातिक ज्वर निवृत्त होता है और मन्दाग्नि, जीर्णज्वर तथा शोथ का नाश होता है। यह सर्वरोगनाशक है ॥ ७१९-७२३ ॥

बृहत्कस्तूरीभैरव रस ।

मृगमदशशिसूर्य्या धातकी शूकशिम्बी रजतकनकमुक्ताविद्रुमं लौहपाठाः क्रिमिरिपुघनविश्वा वारिताला भ्रधात्रीरविदलरसपिष्टं कस्तूरीभैरवोऽयम् ॥७२४॥ कस्तूरीभैरवः ख्यातः सर्वज्वरविनाशनः । आर्द्रकस्य रसैः पेयो विषमज्वरनाशनः ॥७२५॥ द्वन्द्वजान् भौतिकान् वापि ज्वरान् कामादिसम्भवान् । अभिचारकृतांश्चैव तथा शत्रुकृतान् पुनः ॥ ७२६ ॥ निहन्त्याशु भक्षणादेव डाकिन्यादियुतांस्तथा । त्रिफलाचूर्णजीरकाभ्यां मधुना सह पानतः ॥ ७२७ ॥ आमातीसारं ग्रहणीं ज्वरातीसारमेव च । अग्निदीप्तिकरः शान्तः कासरोगनिकृन्तनः ॥ ७२८ ॥ सपयेद्

भक्षणादेव मेहरोगं हलीमकम्। जीर्णज्वरं नूतनं वा द्विकालीनं च सन्ततम् ॥७२९॥ प्लीहं भौतिकं वापि हन्ति सर्वान् विशेषतः। ऐकाहिकं द्व्याहिकं वा त्र्याहिकं चातुराहिकम् ॥ ७३० ॥ पाञ्चाहिकं पक्षसंस्थं पाक्षिकं मासिकं तथा। सर्वान् ज्वराग्निहन्त्याशु भक्षणादार्द्रकद्रवैः ७३१

कस्तूरी, कपूर, ताम्रभस्म, धाय के फूल, कौंच के बीज, चाँदी की भस्म, स्वर्णभस्म, मुक्ताभस्म, प्रवालभस्म, लोहभस्म, पाढ़ी, बायविडङ्ग, नागरमोथा, सोंठ, सुगन्धबाला, हरिताल, अभ्रकभस्म और आँवला समभाग, इन सब द्रव्यों को चूर्णकर आक की पत्तियों के रस में घोटकर एक-एक रत्ती प्रमाण गोलियाँ बना लेवे। अनुपान—अदरख का रस। इसका सेवन करने से सब प्रकार के ज्वर तथा बिल्वचूर्ण, जीरा और शहद के साथ लेने से आमातीसार, ज्वरातीसार और ग्रहणीरोगातीसार नष्ट होते हैं। मन्दाग्नि, कास, प्रमेह, हलीमक आदि का भी यह कस्तूरी भैरवनाशक है ॥७२४-७३१॥

### श्रीकालानल रस।

रसं गन्धं मृताभ्रं च टङ्कनं च मनःशिलां। हिंगुलं गरलं दारु विषं ताम्रं च सत्समम् ॥ ७३२ ॥ बिडालपदमात्रन्तु सर्वं शुद्धं विचूर्णयेत्। भावनाय च दातव्यं लाङ्गलीमलकं तथा ॥ ७३३ ॥ घोषामूलं तथा देयं मूलं लोहितचित्रकम्। अपुष्पफलं सुधायीमूलं भ्रमररुद्रकम् ॥ ७३४ ॥ छागवराहमयूरा महिषो मत्स्य एव च। ऐतेषां च ददेत् पित्तमार्द्रकस्य रसेन च। प्रत्येकं मर्दितं शुष्कं कणामात्रामभागतः ॥ ७३५ ॥

पारा, गन्धक, अभ्रकभस्म, सोहागा पुष्पाकर हुआ, मैनसिल, हिंगुल, काले साँप का विष, दारु (दार्मुज) विष और ताम्रभस्म यह प्रत्येक द्रव्य २ तोले, एकत्र चूर्ण करके, कलिहारी का मूल, कड़ुई तरोई की जड़, लाल चीते की जड़, गूमर की जड़, भुईं आँवला का मूल, भारंगी और आक का मूल इनके रस की भावना देकर मर्दन करे। पश्चात् छाग, शूकर, मयूर, महिष और रोहितमत्स्य के पित्त की क्रमशः भावना देवे और मर्दन करे। तदनन्तर अदरख के रस में मर्दन करके अत्यन्त छोटी-छोटी गोलियाँ बनाकर शुष्क कर लेवे। इसका सन्निपात ज्वर में प्रयोग करना चाहिये ॥ ७३२-७३५ ॥

### मृतसञ्जीवनी सुरा।।

गुडं द्रोणसमं ग्राह्यं वर्षादूर्ध्वं पुरातनम्। बावरीत्वचमादाय दापयेत् पलविंशतिम् ॥ ७३६ ॥ दाडिमी दपमोचं च वराक्रान्ताऽरुणा तथा। अश्वगन्धादेवदारुबिल्वश्योनाकपाटलाः ॥ ७३७ ॥ शालपर्णी पृश्निपर्णी बृहतीद्वयगोक्षुरम्। बदरीन्द्रवारुणी चित्रं स्वयंगुप्ता पुनर्नवा ॥ ७३८ ॥ एषां दशपलान् भागान् कुट्टयित्वा उदूखले। सुगभीरे च मृद्भाण्डे तोयमष्टगुणं क्षिपेत् ॥ ७३९ ॥ गुडसङ्घोलनं कृत्वा एतैःसंपूरयेद्बुधः। मुखे शरावकं दत्वा रक्षयेद्दिनविंशतिम् ॥ ७४० ॥ षोडशादिवसादूर्ध्वं द्रव्याणीमानि दापयेत्। पूगमस्थद्वयं चाप्रकुट्टयित्वा विनिक्षिपेत्। धुस्तूरं देवपुष्पं च पद्मकोशीरचन्दनम् ॥ ७४१ ॥ शतपुष्पा यमानी च मरीचं जीरकद्वयम्। शटी मांसी त्वगेला च सजातीफलमुस्तकम् ॥ ७४२ ॥ ग्रन्थिपर्णी तथा शुण्ठी मेथी मेषी च चन्दनम्। ऐषां द्विपलिकान् भागान् कुट्टयित्वा विनिक्षिपेत् ॥ ७४३ ॥ मृण्मये मोचिकायन्त्रे मयूराख्येऽपि यन्त्रके। यथाविधिप्रकारेण

चालनं दापयेद् बुधः ॥ ७४४ ॥ शुद्धिमान् सोंजलं कृत्वा उद्धरेद् विधिवत् सुराम । एतन्मद्यं पिबेन्नित्यं यथा धातुवयः क्रमम् ॥ ७४५ ॥ देहदार्ढ्यकरं पुष्टिबलवर्णाग्निवर्द्धनम् । सन्निपातज्वरे घोरे विसूच्यां च मुहुर्मुहुः । क्षीणे देहे प्रयोज्येयं मृतसञ्जीवनी सुरा ॥ ७४६ ॥

एक वर्ष से भी अधिक पुराना गुड़ १२ सेर ४० तोला, कुटी हुई बबूल की छाल ८० तोले, अनार की छाल, अडूसा की छाल, मोचरस, सहजना, अतीस, असगन्ध, देवदारु, बेल की छाल; श्योनाक की छाल, पाढ़र की छाल, सरिवन, पिठवन, बड़ी कटेरी, छोटी कटेरी, गोखुरू, बेर, इन्द्रायण की जड़, चीता, कौंच और गदहपुर्ना ( साँठी ) कुटे हुये ये कुल औषध ४० तोले, इन सबको अठगुने जल में डालकर मिट्टी के बड़े पात्र में रखकर सकोरा से मुख बन्द कर देवे । १६ दिन के पश्चात् इसमें कुटी हुई सुपारी २ सेर, धतूरे का मूल, पद्मास्त, लौंग, लाल चन्दन, सोया, अजवाइन, कालीमिरिच, जीरा, कालाजीरा, कपूर, जटामांसी, दालचीनी, छोटी इलायची, जायफल, नागरमोथा, गठिवन, सोंठ, मेथी, मेषशृङ्गी और चन्दन इनमें से प्रत्येक औषध को दो-दो पल ( ८ तोला ) लेकर कूटकर मिलावे तथा मुख पर सकोरा रखकर फिर मुख बन्द कर देवे । चार दिन के पश्चात् मिट्टी के पात्र के बने हुये कोष्ठिका यन्त्र अथवा मयूरादय यन्त्र में चुआकर सुरा बनावे । बल, अग्नि और अवस्था के अनुसार इसकी मात्रा स्थिर करे ।

इसका सेवन करने से देह की दृढ़ता तथा बल, वर्ण और अग्नि की वृद्धि होती है । घोर सन्निपातज्वर में विसूचिका में जब बड़ा शीतल हो जावे उस समय बार-बार इस "मृतसञ्जीवनी सुरा" का प्रयोग करना चाहिये ॥ ७३६-७४६ ॥

मृगमदासव ।

मृतसञ्जीवनी ग्राह्या पञ्चाशत्पलसंमिता । तदर्द्धं मधु संग्राह्यं तोयं मधुसमं तथा ॥ ७४७ ॥ कस्तूरीकुडवं तत्र मरिचं देवपुष्पकम् । जातीफलं पिप्पलीत्वग् भागान् द्विपलिकान् क्षिपेत् ॥ ७४८ ॥ भाण्डे संस्थाप्य रुद्‌ध्वा च निदध्यात् मासमात्रकम् । विसूचिकायां हिक्कायां त्रिदोषप्रभवे ज्वरे । वीक्ष्य कोष्ठं बलं चैव भिषङ्मात्रां प्रयोजयेत् ॥ ७४९ ॥

पूर्वोक्त मृतसंजीवनी सुरा ५० पल ( २॥ सेर ) मधु २५ पल (१। सेर), जल २५ पल (१। सेर), कस्तूरी १६ तोले, मरिच, लवङ्ग, जायफल, पीपरि और दालचीनी प्रत्येक २ पल ( ८ तोला ), इन सब द्रव्यों को एकत्र कर मिट्टी के पात्र में रखकर पात्र के मुख को भलीभांति बन्द करके एक मासपर्यन्त रख छोड़े, पश्चात् छानकर रख लेवे, रोगी का कोष्ठ और बलाबल देखकर इसकी मात्रा स्थिर करे । इसका सेवन करने से विसूचिका, हिचकी और सान्निपातिक ज्वर निवृत्त होते हैं ॥ ७४७-७४९ ॥

---

## अथ मध्यज्वरादौ ।

ज्वरमातङ्गकेसरी रस ।

पारदं गन्धकञ्चैव हरितालं समाक्षिकम् । कटुत्रयं तथा पथ्या क्षारौ द्वौ सैन्धवं तथा ॥ ७५० ॥ निम्बस्य विषमुष्टेश्च बीजं चित्रकमेव च । एषां माषमितं भागं ग्राह्यं अतिसुसंस्कृतम् ॥ ७५१ ॥ द्विमाषञ्चाङ्कोलफलं विषं चापि द्विमाषिकम् । निर्गुण्डीस्वरसेनैव शोषयेत्तत् प्रयत्नतः ॥ ७५२ ॥ सार्द्धरक्तिप्रमाणेन वटी कार्य्या सुशोभना । सर्वज्वरहरी चैषा भेदिनी दोषनाशिनी ॥ ७५३ ॥ आमाजीर्णप्रशमनी कामलापाण्डुरोगहा । वह्नि-

दीप्तिकरी चैषा जठरामयनाशिनी ॥७५४॥ उष्णोदकानुपानेन दातव्या हितकारिणी। भाषितो लोकनाथेन ज्वरमातङ्गकेसरी ॥ ७५५ ॥

पारा, गन्धक, हरिताल, सोनामाखी, सोंठ, मरिच, पीपरि, हर्रे, यवक्षार, सज्जीखार, लाहौरी नोन, नीम के बीज, कुचिला और चीता इनमें से प्रत्येक द्रव्य १ माशा, जमालगोटे के बीज २ माशे और विष २ माशे, इन सब द्रव्यों को निर्गुण्डी के पत्ते के रस में घोटकर डेढ़-डेढ़ रत्ती की वटी बनावे। अनुपान उष्ण जल। इसका सेवन करने से सब प्रकार के ज्वर, आमाजीर्ण, कामला, पाण्डुरोग और उदररोग नष्ट होते हैं, तथा अग्नि का दीपन और मल का भेदन होता है ॥ ७५०-७५५ ॥

रसमङ्गलोक्त ज्वरमुरारि रस।

शुद्धसूतं शुद्धगन्धं विषं च दरदं पृथक्। कर्षमात्रं कर्षार्द्धं लवङ्गं मरिचं पलम् ॥ ७५६ ॥ शुद्धं कनकबीजं च पलद्वयमितं तथा। त्रिवृताकर्षमेकं तु भावयेद्दन्तिकाद्रवैः ॥ ७५७ ॥ सप्तधा च ततः कार्य्या गुटी गुञ्जामिता शुभा। ज्वरमुरारिनामायं रसो ज्वरकुलान्तकः ॥ ७५८ ॥ अत्यन्ताजीर्णपूर्वे च ज्वरे विष्टम्भसंयुते। सर्वाङ्गग्रहणीगुल्मे चामवातेऽम्लपित्तके ॥७५९॥ कासश्वासे यक्ष्मरोगेऽप्युदरे सर्वसम्भवे। गृध्रस्यां सन्धिमज्जस्थे वाते शोथे च दुस्तरे ॥ ७६० ॥ यकृत्प्लीहरोगे च वातरोगे चिरोत्थिते। अष्टादशकुष्ठरोगे सिद्धो मदननिर्मितः ॥ ७६१ ॥

पारा, गन्धक, विष और हिंगुल प्रत्येक १ तोला, लवङ्ग ६ माशे, कालीमरिच ४ तोले, धतूरे के बीज ८ तोले, निसोथ १ तोला, इन सब द्रव्यों को चूर्ण कर दन्ती के क्वाथ की सात भावना देकर एक-एक रत्ती की गोलियाँ बनावे। इस ज्वरमुरारि-नामक रस का सेवन करने से सब प्रकार के ज्वर, अजीर्ण, आमवात, अम्लपित्त, कास, श्वास, राजयक्ष्मा, उदररोग, गृध्रसी, वातरोग, शोथ, यकृत, प्लीहा और १८ प्रकार के कुष्ठरोग निवृत्त होते हैं ॥ ७५६-७६१ ॥

पञ्चानन रस।

शम्भोः कण्ठविभूषणं समरिचं दैत्येन्द्ररक्तं रविः पक्षौ सागर लोचनं शशियुगं भागोऽर्कसंख्यान्वितः। खल्ले तत्परिमर्दितं रविजलैर्गुञ्जैकमात्रं ददेत् सिंहोऽयं ज्वरदन्तिदर्पदलनः पञ्चाननाख्यो रसः ॥७६२॥ पथ्यञ्च देयं दधिभक्तकञ्च सिन्धूत्थपथ्या मधुना समेतम्। गन्धानुलेपो हिमतोयपानं दुग्धञ्च देयं शुभदाडिमञ्च ॥ ७६३ ॥

विष २ तोले, मरिच ४ तोले, गन्धक २ तोले, हिंगुल १ तोला और ताम्रभस्म २ तोले, इन कुल द्रव्यों का समुदाय १२ तोला परिमित हो, इनको मदार (आक) के मूल के क्वाथ में मर्दन करके एक रत्ती प्रमाण वटी बनावे। इस पञ्चानन रस का सेवन करने से प्रबल ज्वर निवृत्त होता है। इस रस का सेवन कराकर शीतक्रिया करनी चाहिये। अनुपान—सेंधा नोन, हर्रे का चूर्ण और मधु।

पथ्य—दही-भात, सुगन्धित द्रव्य का शरीर में लेप, शीतल जल का पान, दूध और अनार के दाने ॥ ७६२-७६३ ॥

चन्द्रशेखर रस।

शुद्धसूतं द्विधा गन्धं मरिचं टङ्कणं तथा। चतुस्तुल्या सिता योज्या मत्स्यपित्तेन भावयेत् ॥ ७६४ ॥ त्रिदिनं मर्दयेत्तेन रसोऽयं चन्द्रशेखरः। द्विगुञ्जामार्द्रकद्रवैर्देयं शीतोदकं मधु ॥ ७६५ ॥ तक्र-

भक्तश्च शृन्ताकं पथ्यं तत्र प्रदापयेत् । त्रिदिनात् श्लेष्मपित्तोत्थमत्युग्रं नाशयेज्ज्वरम् ॥ ७६६ ॥

पारा १ भाग, गन्धक २ भाग, मरिच २ भाग, सुहागा फूला हुआ २ भाग, मिश्री ७ भाग, इन सब द्रव्यों को रोहित मत्स्य के पित्त की तीन दिन भावना देकर, उत्तम रीति से मर्दन करके, दो-दो रत्ती की गोलियां बना लेवे। अनुपान—अदरख का रस । चन्द्रशेखर रस का सेवन कराकर शीतल जल पान करावे। पथ्य—तक्र, भात, बैंगन की तरकारी। इस औषध का सेवन करने से ३ दिन में अत्यन्त घोर ज्वर शान्त हो जाता है ॥ ७६४-७६६ ॥

## अर्द्धनारीश्वर रस।

रसगन्धामृतं चैव समं शुद्धञ्च टङ्कनम् । मर्दयेत् खल्लमध्ये तु यावत् स्यात् कज्जलप्रभम् ॥ ७६७ ॥ नकुलारिमुखे क्षिप्त्वा मृदा संवेष्टयेद्बहिः । स्थापयेत् मृण्मये पात्रे उर्ध्वाधो लवणं क्षिपेत् ॥ ७६८ ॥ भाण्डवक्त्रं निरुध्याथ चतुर्यामं हठाग्निना। स्वाङ्गशैत्यं समुद्धृत्य खल्ले कृत्वा तु कज्जलीम् ॥ ७६९ ॥ गुञ्जामात्रं प्रदातव्यं नस्यकर्मणि योजयेत् । वामभागेज्वरं हन्ति तत्क्षणाल्लोककौतुकम् ॥ ७७० ॥ कुर्य्याद्दक्षिणभागेन चारोग्यं निश्चितं भवेत् । गोप्याद्गोप्यतमं प्रोक्तं गोपनीयं प्रयत्नतः । अर्द्धनारीश्वरो नाम रसोऽयं कथितो भुवि ॥ ७७१ ॥

पारा, गन्धक, विष, सोहागा फूला हुआ इनको खरल में मर्दन करके कज्जल के समान बना लेवे। पश्चात् इस कज्जली को काले साँप के मुख में रखकर ऊपर एक अंगुल मोटा मिट्टी का लेप करके मिट्टी के पात्र में रख देवे। पात्र में रक्खे हुये गोला के नीचे और ऊपर नमक रखकर पात्र का मुख सकोरा से बन्द करके सन्धिस्थान में मिट्टी लगा देवे। तदनन्तर चूल्हा पर रख ४ प्रहरपर्यन्त तीव्र आँच देकर पाक करे, स्वाङ्गशीतल होने पर पात्र से गोला निकालकर मिट्टी अलग करके औषध को खरल में घोटकर कज्जली के समान बनाकर रख लेवे। एक रत्ती इस औषध को नस्य के लिये देना चाहिये। इस औषध के प्रयोग से तत्काल वाम भाग में ज्वर निवृत्त हो जाता है, इसमें लोगों को बड़ा आश्चर्य होता है, तदनन्तर दक्षिण भाग पर भी ज्वर नष्ट हो जाता है। यह अर्धनारीश्वर नामक रस अत्यन्त गोपनीय है ॥ ७६७-७७१ ॥

## श्रीरसराज।

भागैकं रसराजस्य भागश्च हेममाक्षिकात् । भागद्वयं शिलायाश्च गन्धकस्य त्रयो मताः ॥ ७७२ ॥ तालकाष्टादशभागाः शुल्वं स्यादागयश्चकम् भल्लातकात् त्रयो भागाः सर्वमेकत्र चूर्णयेत् ॥७७३॥ वज्रीक्षीरप्लुतं कृत्वा दृढे मृण्मयभाजने । विधाय सुदृढां मुद्रां पचेद् यामचतुष्टयम् ॥ ७७४ ॥ स्वाङ्गशीतं समुद्धृत्य खल्लयेत् सुदृढं पुनः। गुञ्जाद्वयमिति चास्यं पर्णखण्डेन दापयेत् ॥ रसराजः प्रसिद्धोऽयं ज्वरमष्टविधं जयेत् ॥ ७७५ ॥

पारा १ भाग, स्वर्णमाक्षिक १ भाग, मैनशिल २ भाग, गन्धक ३ भाग, हरिताल १८ भाग, ताम्रभस्म २ भाग और भिलावाँ ३ भाग इन सब द्रव्यों को चूर्ण करके मिट्टी के पात्र में रखकर, उसमें थूहर का दूध इतना डाले जिससे चूर्ण डूब जावे। तदनन्तर पात्र के मुख पर दृढ़ मुद्रा देकर, चार प्रहर पर्यन्त पाक करे। शीतल होने पर मर्दन करके रख लेवे। दो रत्ती इस श्रीरसराज रस को पान के साथ खाने को देवे। इसका सेवन करने से आठ प्रकार के ज्वर निवृत्त होते हैं ॥ ७७२-७७५ ॥

### मुद्राघोटक रस।

पारदो गन्धकश्चैव त्रिक्षारं लवणत्रयम्। गुग्गुलुर्वत्सनाभश्च प्रत्येकन्तु द्विमाषिकम् ॥७७६॥ कृष्णोन्मत्तजटानीरैर्भावयेत् सप्तवारकम्। गोक्षुरेन्द्रकमारीषकरञ्जचित्रतेजिका ॥ ७७७ ॥ भूकुरुवकलताभिश्च त्रिफलाकुटतीरसैः। मर्दिता वटिका कार्य्या कृष्णलाफलसन्निभा ॥७७८॥ तत एकां वटीं दद्या यवैः पाथ्यादिभिर्वृतः। रसः सर्वज्वरं हन्ति क्षणमात्रान्न संशयः ॥ ७७९ ॥

पारा, गन्धक, जवाखार, सज्जीखार, सोहागा, सेंधानोन, काला नोन, विरियासंचरनोन, गुग्गुल और विष प्रत्येक २ मासे लेकर एकत्र मर्दन करे। पश्चात् काले धतूरे के मूल के रस की सात भावना देवे। तदनन्तर गोखरू, इन्द्रजौ, मरसा, कंजा, चीता, तेजबल, लाल फूलवाला पीयावांसा, त्रिफला और बड़ी कटेरी इनके क्वाथ में मर्दन करके गुञ्जाफल के समान अर्थात् एक एक रत्ती की गोलियां बनावे। १ वटी सेवन करावे। औषध सेवन कराकर, रोगी का शरीर वस्त्र आदि से ढँक देवे। इसका सेवन करने से सब प्रकार के ज्वर शीघ्र नष्ट हो जाते हैं ॥ ७७६-७७९ ॥

### शीतारि रस।

पारदं गन्धकं टङ्कं शुल्वं चूर्णं समं समम्। पारदाद् द्विगुणं देयं जैपालं तुषवर्जितम् ॥ ७८० ॥ सैन्धवं मरिचं चिञ्चात्वग्भस्म शर्कराऽपि च। प्रत्येकं सूततुल्यं स्याज्जम्बीरैर्मर्दयेद्दिनम् ॥ ७८१ ॥ गुञ्जार्क तप्ततोयेन वातश्लेष्मज्वरापहः। रसः शीतारिनामायं शीतज्वरहरः परः ॥७८२॥

पारा १ भाग, गन्धक १ भाग, सोहागा की खील १ भाग, ताम्रभस्म १ भाग, जमालगोटा के बीज २ भाग, सेंधानोन १ भाग, मरिच १ भाग, इमली की छाल की भस्म १ भाग और मिश्री १ भाग, इन कुल द्रव्यों को एकत्र कर जँभीरी नीबू के रस में १ दिन मर्दन करके एक रत्ती प्रमाण वटी बनावे। अनुपान उष्ण जल। इस शीतारिरस का सेवन करने से वातश्लेष्मज्वर और शीतज्वर निवृत्त होते हैं ॥ ७८०-७८२ ॥

### पर्णखण्डेश्वर।

समांशं मर्दयेत् खल्वे रसं गन्धं शिलां विषम्। निर्गुण्डीस्वरसैर्भाव्यं त्रिवारं चार्द्रकद्रवैः ॥ गुञ्जापादस्थितं पर्णे ज्वरं हन्ति महाद्भुतम् ॥ ७८३ ॥

पारा, गन्धक, मैनशिल और विष प्रत्येक सम भाग लेकर एकत्र मर्दन करके सँभालू की पत्तियों के रस की ३ भावना देवे, तदनन्तर अदरख के रस की ३ भावना देकर गोली बनावे, ¼ रत्ती पान के पत्ते में रखकर सेवन करने से बड़ी अद्भुत रीति से सब प्रकार के ज्वर नष्ट होते हैं ॥ ७८३ ॥

### शीतभञ्जी रस।

पारदं रसकं तालं तुत्थं टङ्कणगन्धकम्। सर्वमेतत् समं शुद्धं कारवेल्या रसैर्दिनम् ॥७८४॥ मर्दयित्वा कल्केन ताम्रपात्रोदरं लिपेत्। अङ्गुल्यार्द्धार्द्धमानेन तं पचेत् सिकतालये ॥ ७८५ ॥ यन्त्रे यावत् स्फुटन्त्येव व्रीहयस्तस्य पृष्ठतः। ताम्रपात्रं समुद्धृत्य चूर्णयेन्मरिचैः समम् ॥७८६॥ शीतभञ्जीरसो नाम द्विगुञ्जो वातिके ज्वरे। दातव्यः पर्णखण्डेन मुहूर्त्तान्नाशयेज्ज्वरम् ॥ ७८७ ॥

अत्र रसकं खर्परम्। शुद्धताम्रं षट्तोलकं तेन निर्मितं ताम्रपात्रं मर्दितं तोलकमितेन पारदादिषड्द्रव्येण लिप्तम् अधोमुखं कृत्वा स्थाल्यां संस्थाप्य पात्रा-

LIBRARY

न्तरेणाच्छाद्य उपरि वालुकाभिः स्थालीं परिपूर्य्य तदुपरि व्रीहीन् दत्त्वा चुल्ल्यां निवेश्य तावदग्निज्वाला दातव्या यावद् व्रीहयो न स्फुटन्ति स्फुटितेषु तेषु व्रीहिषु रसः सिद्धो भवति पश्चान्मरिचचूर्णं षट् तोलकम् अन्यत् सर्वमेकीकृत्य चूर्णयित्वा अस्य द्विगुञ्जं पर्णखण्डेन सह भक्षयेदित्युपदेशः ।

६ तोला परिमित शुद्ध ताम्र का एक खल बनवावे । पश्चात् पारा, खपरिया, हरिताल, तूतिया, सोहागा की खील और गन्धक इन ६ द्रव्यों में से प्रत्येक द्रव्य को एक एक तोला लेकर करेले की पत्तियों के रस में घोटकर, इस घुटी हुई औषध से पूर्वोक्त खरल के भीतरी भाग में लेप करे । तदनन्तर इस खरल को एक हाँडी में अधोमुख रखकर, उस खरल को किसी अन्य पात्र से ढाँककर हाँडी के शेष भाग को बालू से पूर्ण करके ऊपर कुछ धान्य रख देवे । पश्चात् उसको चूल्हे पर चढ़ाकर, तब तक आँच देता रहे जब तक बालू के ऊपर रक्खे हुए धान्य फूटने न लगें । धान्यों के फूटने पर चूल्हे से उतारकर, शीतल होने पर हाँडी से ताम्र के पात्र को निकालकर, उसमें ६ तोले मरिच का चूर्ण मिलाकर, उत्तम रीति से घोटकर रख लेवे । २ रत्ती प्रमाण इस रस को पान के पत्ता में रखकर सेवन करने से मुहूर्त्तमात्र में वातज्वर नष्ट होता है ॥ ७८४-७८७ ॥

टिप्पणी—ताम्रभस्म निरुत्थ हो गई हो तो अन्यथा नहीं तो ।

### अल्पज्वराङ्कुश रस ।

शुद्धसूतं विषं गन्धं धूर्त्तबीजं त्रिभिः समम् । चतुर्णां द्विगुणं व्योषं चूर्णं गुञ्जाद्वयं हितम् ॥ ७८८ ॥ जम्बीरस्य च मज्जाभिरार्द्रकस्य रसैर्युतम् । ज्वराङ्कुशो रसो नाम्ना ज्वरान् सर्वान् विनाशयेत् ॥ ॥ ७८९ ॥ व्योषं मिलित्वा द्विगुणम् ।

पारा १ तोला, विष १ तोला, गन्धक १ तोला, धतूरे के बीज ३ तोले, त्रिकटु के तीनों द्रव्य मिलकर १२ तोले, इन कुल द्रव्यों को एकत्र घोटकर दो-दो रत्ती की गोलियाँ बना लेवे । अदरख के रस तथा जँभीरी नीबू के बीज के साथ इस स्वल्पज्वराङ्कुश रस का सेवन करने से सब प्रकार के ज्वर नष्ट होते हैं । मात्रा १ रत्ती ॥ ७८८-७८९ ॥

### ज्वराङ्कुश ।

मरिचं टङ्कणं शङ्खं चूर्णं पारदगन्धकम् । शोधितं वत्सपुत्रञ्च भागमेकं विनिक्षिपेत् ॥ ७९० ॥ गुञ्जार्द्धञ्च प्रदातव्यं नागवल्लीदलैः सह । ज्वराङ्कुशो रसो ह्येष ज्वरमष्टविधं जयेत् ॥ ७९१ ॥

कालीमिर्च, सुहागा, शंखभस्म, पारद, गन्धक, वत्सपुत्र विष ( इसके न मिलने पर मीठा विष काम में लाना चाहिए ) इनको बराबर बराबर लेकर यथाविधि आधी रत्ती की गोलियाँ बना ले ॥ इन गोलियों को पान के साथ प्रयोग में लाना चाहिए । ये आठ प्रकार के ज्वरों को नष्ट करती हैं ॥ ७९०-७९१ ॥

### सर्वज्वराङ्कुशवटी ।

शुद्धसूतं तथा गन्धं मरिचं नागरं कणा । त्वचं जैपालकं कुष्ठं भूनिम्बं मुस्तकं पृथक् ॥ ७९२ ॥ चूर्णयित्वा समांशान्तु कज्जल्या सह मेलयेत् । निर्गुण्ड्याः स्वरसे चापि आर्द्रकस्य रसे तथा ॥ ७९३ ॥ भावनां कारयित्वा तु वटिकां कारयेद्भिषक् । वटिकां भक्षयित्वा तु धारयेदश्च कारयेत् ॥ ७९४ ॥ एषा ज्वराङ्कुशा वटी सर्वज्वरविनाशिनी । पृथग्दोषाश्च विविधान् समस्तान् विषमज्वरान् ॥ ७९५ ॥ माकृतं वैकृतं चापि वातश्लेष्मकृतश्च यत् । अन्तर्गतं बहिःस्थञ्च निराममं सामकं वा

ज्वरमष्टविधं हन्ति वृत्तमिन्द्राशनिर्यथा ॥ ७९६ ॥

पारा और गन्धक समभाग लेकर कज्जली बना लेवे। पश्चात् मिरिच, सोंठ, पीपरि, दालचीनी, जमालगोटा के बीज, कूठ, चिरायता और नागरमोथा इनमें से प्रत्येक द्रव्य को पारा के समान परिमाण में लेकर कज्जली में मिलाकर तंबाकू की पत्तियों के रस की भावना देकर मर्दन करे। तदनन्तर अदरख के रस में घोटकर एक-एक रत्ती की गोलियाँ बना लेवे। इस औषध का सेवन कराकर रोगी का शरीर वस्त्र से ढाँक देवे। इस सर्वज्वरांकुशवटी रस का सेवन करने से सब प्रकार के ज्वर विनष्ट होते हैं ॥ ७९२-७९६ ॥

बृहत्-ज्वराङ्कुश।

पारदं गन्धकं ताम्रं हिंगुलं तालमेव च। लौहं वङ्गं माक्षिकञ्च खर्परञ्च मनःशिला ॥ ७९७ ॥ स्वर्णमभ्रं गैरिकञ्च टङ्कनं रूप्यमेव च। सर्वाण्येतानि तुल्यानि चूर्णयित्वा विभावयेत् ॥ ७९८ ॥ जम्बीरतुलसीचित्रविजयातिन्तिडीरसैः। एभिर्दिनत्रयं रौद्रे निर्जने खल्लगह्वरे ॥ ७९९ ॥ चणमात्रां वटीं कृत्वा छायाशुष्कान्तु कारयेत्। महाग्निजननी चैषा सर्वज्वरविनाशिनी ॥ ८०० ॥ एकजं द्वन्द्वजं चैव चिरकालसमुद्भवम्। ऐकाहिकं द्व्याहिकञ्च त्रिदोषप्रभवं ज्वरम् ॥८०१॥ चतुर्थकं तथात्युग्रं जलदोषसमुद्भवम्। सर्वान् ज्वरान् निहन्त्याशु भास्करस्तिमिरं यथा ॥ ८०२ ॥ नातः परतरं किञ्चिज्ज्वरनाशाय भेषजम्। महाज्वरांकुशो नाम रसोऽयं मुनिभाषितः ॥ ८०३ ॥

पारा, गन्धक, ताम्रभस्म, हिंगुल, हरिताल, लोहभस्म, वङ्गभस्म, स्वर्णमाक्षिक, खपरिया, मैनशिल, स्वर्णभस्म, अभ्रकभस्म, गेरू, सोहागा भुना हुआ और चाँदीभस्म, समभाग, इन कुल द्रव्यों को एकत्र कर मर्दन करे। पश्चात् जँभीरी नीबू का रस, तुलसी की पत्तियों का रस, चीता की पत्तियों का रस, भाँग की पत्तियों का रस, इमली की पत्तियों का रस, इन समस्त रसों की सात दिन पर्यन्त भावना देकर छाया में शुष्क कर लेवे। तदनन्तर चना के समान गोलियाँ बना लेवे। इस महाज्वरांकुश रस का सेवन करने से सब प्रकार के ज्वरों का नाश और अग्नि की वृद्धि होती है ॥ ७९७-८०३ ॥

ज्वराङ्कुश।

शुद्धसूतं तथा गन्धं बीजं कनकसम्भवम्। महौषधं टङ्कनञ्च हरितालं तथा विषम् ॥ ८०४ ॥ भृङ्गराजाम्भसा सर्वं मर्दयित्वा वटीञ्चरेत्। गुञ्जाप्रमाणां खादेत् तां तथा दोषानुपानतः ॥ ८०५ ॥ एष ज्वरांकुशो नाम्ना विषमज्वरनाशनः। ज्वरातिसारं मन्दाग्निं नाशयेच्चाविकल्पतः ॥ ८०६ ॥

पारा, गन्धक, धतूरे के बीज, सोंठ, सोहागा की खील, हरिताल और विष इन कुल द्रव्यों को समभाग लेकर भँगरा के रस में घोटकर एक-एक रत्ती की गोलियाँ बना लेवे। दोषानुकूल अनुपान के साथ इस ज्वरांकुश रस का सेवन करने से सब प्रकार के विषमज्वर, ज्वरातिसार अग्निमान्द्य नष्ट होते हैं ॥ ८०४-८०६ ॥

चिन्तामणि रस।

रसं गन्धं मृतं ताम्रं मृतमभ्रं फलत्रिकम्। त्र्यूषणं दन्तिबीजञ्च समं खल्ले विमर्दयेत् ॥ ८०७ ॥ द्रोणपुष्पीरसैर्भाव्यं शुष्कं सद्गुपपालितम्। चिन्तामणिरसो ह्येष ह्यजीर्णे शस्यते सदा ॥ ८०८ ॥ ज्वरमष्टविधं हन्ति सर्वं शूलनिसूदनः। गुञ्जैक वा द्विगुञ्जं वाऽद्र्यमार्द्रकवारिणा ॥ ८०९ ॥

पारा, गन्धक, ताम्रभस्म, अभ्रकभस्म, आँवला हर्र, बहेड़ा, सोंठ, मिरिच, पीपरि और जमाल-गोटा के बीज इन सब द्रव्यों को समान भाग, लेकर खरल कर लेवे। तदनन्तर गूमा के रस में भावना देकर; एक-एक रत्ती की गोलियाँ बनाकर छाया में शुष्क कर लेवे। इसका सेवन करने से अजीर्ण, शूल और आठ प्रकार के ज्वर विशेषत: वातज्वर नष्ट होते हैं। अनुपान अदरख के रस के साथ एक या दो गोली देनी चाहिये ८०७-८०९

त्रिलोचनवटी।

वारिणा मर्दयेत्तालं सीसकं मरिचं विषम्। मुद्गमाना वटी कार्य्या फलेन सितया सह ॥ ८१० ॥ द्विमुहूर्त्तान्तरं दद्यात् क्रमेण वटिकात्रयम्। त्रिलोचनवटी ह्येषा पर्यायज्वरनाशिनी॥८११॥वातिकं पैत्तिकं चापि श्लैष्मिकं सान्निपातिकम्। सर्वान् ज्वरान् निहन्त्याशु प्रयुक्ता ज्वरमार्दवे८१२

हरताल शुद्ध की हुई, सीसकभस्म, काली मिरिच, मीठा विष उपर्युक्त सब द्रव्यों को बराबर ले और मिश्रित कर जल से घोटे और मूँग के बराबर गोली बना ले। इन गोलियों को उस अवस्था में प्रयोग में लाना चाहिए जब कि ज्वर न हो या बहुत कम हो। ये वातिक, पैत्तिक, कफ से आनेवाले तथा सान्निपातिक सम्पूर्ण ज्वरों को नष्ट करती हैं—इन गोलियों को दो मुहूर्त्त (लगभग १॥ घंटा) के अन्तर से देना चाहिए। ज्वर चढ़ने के समय तक दो मुहूर्त्त के अन्तर से तीन गोलियाँ दे देने से ज्वर रुक जाता है। अनुपान—गोली को पीसकर उसमें उतनी ही खाँड मिलाकर पानी के साथ प्रयोग करे ॥ ८१०-८१२ ॥

वातश्लेष्मान्तक रस।

पञ्चकोलं मरालञ्च पारदञ्चाभ्रकं तथा। आर्द्रकस्वरसेनैव मर्दयेदतियत्नतः॥८१३॥ गुञ्जाद्वयं प्रदातव्यं नागवल्लीरसंयुतम्। वातश्लेष्मज्वरहरो वातश्लेष्मान्तको रसः ॥ ८१४ ॥ वातजं पित्तजं श्लेष्म-द्विदोषजमपि तथा। सर्वान् ज्वरान् निहन्त्याशु भास्करस्तिमिरं यथा ॥८१५॥

पीपरि, पीपरामूल, चव्य, चित्रक, प्रवालभस्म, रससिन्दूर, अभ्रकभस्म, इन सम्पूर्ण द्रव्यों को बराबर-बराबर एकत्र करके अदरख के रस से अच्छी तरह घोटकर दो रत्ती प्रमाण की गोली बना ले। अनुपान पान का रस। इससे वातश्लेष्मज्वर, वातज, पित्तज, कफज, दो दोषों से उत्पन्न होनेवाला ज्वर तथा सम्पूर्ण ज्वर शीघ्र नष्ट होते हैं ॥ ८१३-८१५ ॥

ज्याहिकारि रस।

रसगन्धशिला तालं सर्वैरतिविषासमा। रसस्य द्विगुणं लौहं रौप्यं लौहार्द्धसम्मितम् ॥ ८१६ ॥ पिचुमर्दरसेनापि विष्णुक्रान्तारसेन च। सर्वं संमर्द्य वटिकाः कुर्य्याद् गुञ्जात्रयोन्मिताः ॥ ८७७ ॥ हन्यादतिविषाक्वाथसंयुतोऽयं रसोत्तमः। त्र्याहिकादीन् ज्वरान् सर्वान् रक्षांसीव रघूद्वहः ॥ ८१८ ॥

पारा, गन्धक, मैनशिल, हरिताल प्रत्येक १ भाग, अतीस ४ भाग, लोहभस्म २ भाग, और चाँदी आधा भाग इन कुल द्रव्यों को नीम की छाल के रस में और विष्णुक्रान्ता (कोयल) के रस में घोटकर तीन तीन रत्ती की गोलियाँ बना लेवे। अतीस के काढ़ा के साथ इस ज्याहिकारि रस का सेवन करने से तृतीयक आदि सब प्रकार के ज्वर नष्ट होते हैं ॥ ८१६-८१८ ॥

चातुर्थकारि रस।

रसगन्धकलौहाभ्रहरितालं समांशिकम्। रसार्द्धमितं हेम सर्वं खल्लोदरे क्षिपेत् ॥ ॥ ८१९ ॥ कृष्णधुस्तूरपयसा मुनिपुष्परसेन च। भावयित्वा वटीं कार्य्यां द्विगुञ्जाफलमानतः ॥ ८२० ॥ चम्पकत्वग्योगेन

सेवितोऽयं रसेश्वरः । चातुर्थकादीन् निखिलान् निहन्त्याह्निकज्वरान्॥८२१॥

ऐकाहिकारिश्चातुर्थकारिश्च रसो ज्वरविरतौ प्रयोज्य इति वृद्धवैद्याः।

पारा, गन्धक, लोहभस्म, अभ्रकभस्म और हरिताल प्रत्येक १ भाग, सोना पारे का आधा भाग; इनको खरल करके, काले धतूरे की पत्तियों के रस में और अगस्त्य के फूल के रस में भावना देकर दो-दो रत्ती की गोलियाँ बना लेवे । बबूल की छाल के काढ़े के साथ इस रस का सेवन करने से चातुर्थिक आदि सब प्रकार के विषमज्वर नष्ट होते हैं। मात्रा १ रत्ती।

ऐकाहिकारि और चातुर्थकारि इन दोनों रसों को ज्वर उतरने पर देना चाहिये ऐसा वृद्ध वैद्यों का उपदेश है ॥८१६-८२१॥

विश्वेश्वर रस ।

पारदं रसकं गन्धं तुल्यांशं मर्दयेद्रसे। अश्वत्थजे त्र्यहं पश्चाद्रसे कोलकमूलजे ॥ ८२२ ॥ निर्दिग्धिकारसे काकमाचिकाया रसे तथा । द्विगुञ्जां वा त्रिगुञ्जां वा गोक्षीरेण प्रदापयेत् । रात्रिज्वरं निहन्त्याशु नाम्ना विश्वेश्वरो रसः ॥ ८२३ ॥

( रात्रिज्वरे प्रशस्तोऽयं रसः । )

पारा, खपरिया और गन्धक सम भाग इन द्रव्यों को लेकर पीपल के मूल की छाल के रस में, बेर की मूल की छाल के रस में छोटी कटेरी के रस में और मकोय के रस में तीन-तीन दिन भावना देकर, दो दो रत्ती की अथवा तीन-तीन रत्ती की गोलियाँ बना लेवे। गाय के दूध के साथ इस रस का सेवन करने से रात्रिज्वर शीघ्र नष्ट हो जाता है ॥ ८२२-८२३ ॥

विक्रमकेसरी रस ।

शुल्वमेकं द्विधा तारं मर्दयेद्विधिवद्भिषक्। पश्चाद् विषं रसं गन्धं मेलयित्वा तु मानयेत् ॥ ८२४ ॥ एकविंशतिवारांश्च निम्बपाकवल्कलद्रवैः । रसः सिद्धः प्रदातव्यो गुञ्जामात्रो ज्वरान्तकृत् । सर्वज्वरहरः ख्यातो रसो विक्रमकेसरी ॥८२५॥

ताम्रभस्म १ तोला, चाँदी २ तोले इनको विधिपूर्वक खरल करे । पश्चात् उसमें विष, पारा और गन्धक प्रत्येक एक तोला मिलाकर फिर खरल करे । तदनन्तर नींबू के मूल की छाल के रस में २१ बार भावना देकर एक-एक रत्ती की गोलियाँ बना लेवे । इस रस का सेवन करने से सब प्रकार के ज्वर नष्ट होते हैं ॥ ८२४-८२५ ॥

ज्वरकालकेतु रस ।

रसं विषं गन्धकताम्रकञ्च मनः शिलारुद्ररसालकञ्च । विमर्द्य वज्रीपयसा समांशं गजाह्वयं तत्र पुटं विदध्यात् ॥८२६॥ गुञ्जार्द्धमस्यैव मधुप्रयुक्तं ज्वरं निहन्त्यष्टविधं महोग्रम् । पुरा भवान्यै कथितो भवेन नृणां हिताय ज्वरकालकेतुः ॥ ८२७ ॥

पारा, विष, गन्धक, ताम्र, मैनशिल, रुद्राक्ष और हरिताल इन कुल द्रव्यों को सम भाग लेकर थूहर के दूध में घोटकर गजपुट में फूँक देवे। मधु के साथ ½ रत्ती की मात्रा में इस रस का सेवन करना चाहिये। इसका सेवन करने से आठ प्रकार के ज्वर नष्ट होते हैं ॥८२६-८२७॥

त्रिपुरारि रस ।

हुताशमुखसंशुद्धं रसं ताम्रञ्च गन्धकम् । लौहमभ्रं विषञ्चैव सर्वं कुर्यात् समांशकम् ॥८२८॥ रसार्द्धं मृतकृष्णञ्च मृङ्गेराम्बुमर्दितम् । गुञ्जैकं मधुना देयं सितयार्द्ररसेन वा ॥ ८२९ ॥ ज्वरमष्टविधं हन्ति वातश्लेष्मभवं तथा । प्लीहानमुदरं शोथमतीसारं विनाशयेत्। रोगानेतान्निहन्त्याशु शङ्करस्त्रिपुरं यथा ॥ ८३० ॥

हिंगुल से निकाला हुआ पारा, ताम्रभस्म,

गन्धक, लोहभस्म, ताम्रभस्म और विष ये एक द्रव्य समभाग, पारे का आधा भाग चाँदी की भस्म; इन सब द्रव्यों को एकत्र कर अदरख के रस में घोटकर १ रत्ती प्रमाण गोली बनावे। अनुपान मधु, मिश्री अथवा अदरख का रस। इसका सेवन करने से आठ प्रकार के ज्वर, धातु-दोषज्वर ( धातु की ग्रस्ति से उत्पन्न ) ज्वर, फोड़ा, कुष्ठरोग, शोथ और अतिसार ये रोग शीघ्र नष्ट होते हैं॥ ८२८-८३०॥

### मेघनाद रस।

तारं कांस्यं मृतं ताम्रं त्रिभिस्तुल्यश्च गन्धकम्। क्वाथेन मेघनादस्य पिष्ट्वा रुद्ध्वा पुटे पचेत्॥ ८३१॥ षड्भिः पुटैर्भवेत् सिद्धो मेघनादो ज्वरापहः। भक्षयेत् पर्णखण्डेन विषमज्वरनाशनम्॥ ८३२॥ अस्य मात्रा द्विगुञ्जा स्यात् पथ्यं दुग्धौदनं हितम्। नागराशिवामुस्तभूनिम्बामृतवत्सकैः॥ ८३३॥ सर्वज्वरातिसारघ्नं कषायमस्यानुपाययेत्। तरुणं वा ज्वरं जीर्णं तृष्णां दाहं च नाशयेत्॥ ८३४॥

चाँदी, कांसा और ताम्रभस्म प्रत्येक १ तोला, गन्धक ३ तोले। इन सबको चौलाई के क्वाथ के साथ घोटकर ६ बार गजपुट में पाक करे। २ रत्ती इस रस को पान के पत्ते में रखकर सेवन करना चाहिये। इसका सेवन करने से विषमज्वर नष्ट होता है। पथ्य दूध-भात।

लौहभस्म ४ तोला, अभ्रकभस्म ४ तोला। रससिन्दूर ४ तोला। त्रिफला प्रत्येक १६-१६ तोला, समुद्र नमक ८ तोले इन सबको १६ गुने जल में किया हुआ अष्टमांश बचा क्वाथ के समान भाग घृत तथा शतावरी का रस, उसमें दूना दूध मिलाकर एक कड़ाई में परिपाक करे, जब यथावत् पाक हो जाय ( गाढ़ा होने पर आवे ) तब लौहभस्म ४ तोला, शूरणकन्द, कापालिका ( गुदकामाई, बंग भाषा में, किसी के मत से रास्ना ), चव्य, वायविडंग, पठानीलोध, शरपुंखा, पाठा, चित्रक, सोंठ पाँचों नमक, जवाखार, विधारावीज, अजवाइन, सेंहुड़ की जड़ प्रत्येक १२ तोले चूर्ण कर डाल दे और लोहे की कलछी से चलाता रहे। यह प्लीहोदर, यकृद्रोग तथा गुल्म को विनाशक और अग्निप्रदीप्त के नष्ट करता है। इस प्रयोग में जो लौहभस्म प्रयुक्त किया जाय उसमें प्लीहोदर नष्ट करने के लिये मानकन्द, घण्टा-

269 CON

कर्ष ( मोरया ) और शुरणकन्द के पृथक्-पृथक् दो दो पुट और देने चाहिये। मात्रा 1 माशा से २ माशा तक ॥ १३०-१३७ ॥

सोटादि रस।

कर्षकं तालचूर्णस्य तत्पादांशं सुवर्णकम् । पलार्द्धमृतताम्रञ्च तत्समं शुद्धमभ्रकम् ॥ १३८ ॥ मृगाजिनस्य भस्मापि कर्षमात्रं प्रदापयेत् । शिग्रुमूलत्वचस्तद्वत्सर्वमेकत्र कारयेत् ॥ १३९ ॥ गुञ्जाद्वयप्रमाणेन वटिकां कारयेत्ततः । मधुना वह्निचूर्णेन खादेन्नित्यं यथाबलम् ॥१४०॥ असाध्यमपि प्लीहानं हन्त्यवश्यं न संशयः । यकृतं पाण्डुरोगञ्च गुल्मादिकभगन्दरान् ॥ १४१ ॥

शुद्ध हरिताल १ तोले, स्वर्णभस्म ¼ तोला, ताम्रभस्म २ तोला, अभ्रकभस्म २ तोला, मृगचर्मभस्म १ तोला, सोंजने की जड़ की छाल १ तोला, इन कुल द्रव्यों को इकट्ठा कर मिला ले। मात्रा—१ रत्ती से २ रत्ती तक। अनुपान—मधु या चित्रक चूर्ण। इस रस के सेवन से यकृद्रोग ( जिगर ), पाण्डुरोग ( पीलिया ), गुल्म, भगंदर प्रभृति रोग दूर होते हैं ॥१३८-१४१॥

प्लीहार्णव रस।

हिंगुलं गन्धकं टङ्कमभ्रकं विषमेव च। प्रत्येकं पलिकं भागं चूर्णयेदतिचिक्कणम्॥ ॥ १४२ ॥ पिप्पली मरिचञ्चैव प्रत्येकञ्च पलार्द्धकम् । मर्दयित्वा वटीं कुर्याद्‌द्विगुञ्जामात्रां प्रयत्नतः ॥ १४३ ॥ सेव्या शेफालिदलजैर्वटी माक्षिकसंयुता । प्लीहानं पञ्चप्रकारञ्च हन्ति शीघ्रं न संशयः ॥१४४॥ ज्वरं मन्दानलञ्चैव कासं श्वासवमिभ्रमिम् । प्लीहार्णव इतिख्यातो गहनानन्दभाषितः ॥ १४५ ॥

( अत्र जम्बीरस्वरसपरिशोधितं हिंगुलं, गोमूत्रविशोधितञ्च विषं ग्राह्यम् )

जम्बीर रस से शुधा हुआ हिंगुल, गन्धक, सुहागा, अभ्रकभस्म, गोमूत्र से शुधा हुआ विष, प्रत्येक द्रव्य ४ तोले। पीपल, कालीमिर्च हरएक २ तोले, इन सबको इकट्ठा कर और अच्छी प्रकार मिलाकर पानी के साथ १ रत्ती से २ रत्ती प्रमाण की गोली बना लेवे। अनुपान-हारसिंगार के पत्तों का रस तथा मधु। इसके प्रयोग से हर प्रकार का प्लीहा ( तिल्ली ), मन्दाग्नि, कास ( खाँसी ), श्वास, वमि ( कै ), चक्कर आना, आदि रोग नष्ट होते हैं ॥ १४२-१४५ ॥

लौहमृत्युञ्जय रस।

रसगन्धकलौहाभ्रं कुनटीमृतताम्रकम् । विषमुष्टिवराटञ्च तुत्थं शंखरसाञ्जनम् ॥ १४६ ॥ जातीफलञ्च कटुकी द्विक्षारं कानकं तथा। व्योषं हिंगु सैन्धवञ्च प्रत्येकं सूततुल्यकम् ॥ १४७ ॥ श्लक्ष्णचूर्णीकृतं सर्वमेकत्र भावयेत्ततः। सूर्यावर्त्तरसेनैव बिल्वपत्ररसेन च ॥ १४८ ॥ सूर्यावर्त्तेन मतिमान् वटिकां कारयेत्ततः। प्लीहानं यकृतं गुल्ममष्ठीलाञ्च विनाशयेत् ॥ १४९ ॥ अग्रमांसं तथा शोथं तथा सर्वोदराणि च। वातरक्तं च जठरं चान्तर्विद्रधिमेव च ॥ १५० ॥

पारा, गन्धक, लोहभस्म, अभ्रकभस्म, मैनसिल, ताम्रभस्म, शुद्ध कुचला, कौड़ीभस्म, तूतिया, शंखभस्म, रसौत, जायफल, कुटकी, यवक्षार, सज्जीक्षार, शुद्ध जैपाल, त्रिकटु ( सौंठ मिर्च पीपर ) हींग, सेंधा नमक, उपर्युक्त कुल द्रव्यों को बराबर-बराबर लेकर यथाविधि चूर्ण बना ले। फिर चूर्ण को सूरजमुखी तथा बिल्व के पत्तों के रस से भावना दे। फिर सूरजमुखी के पत्तों के रस से घोटकर १ रत्ती से २ रत्ती

प्रमाण की गोली बना ले। इस गोली के व्यवहार से प्लीहा (तिल्ली), उदररोग, यकृत (जिगर), गुल्म, अष्ठीला, अग्रमांस, शोथ (सूजन), वातरक्त तथा अन्तर्विद्रधि प्रभृति आदि रोग नाश को प्राप्त होते हैं॥ १४६-१५० ॥

### प्लीहाशार्दूल रस।

सूतकं गन्धकं व्योषं समभागं पृथक् पृथक्। एभिः समं ताम्रभस्म योजयेद्वैद्यसत्तमः॥ १५१ ॥ मनःशिला वराटश्च तुत्थं रामठलौहकम्। जयन्ती रोहितश्चैव क्षारटङ्कणसैन्धवम्॥ १५२ ॥ बिडं चित्रं कानकञ्च रसतुल्यं पृथक् पृथक्। भावयेत्त्रिदिनं यावत् त्रिवृच्चित्रकआर्द्रकैः॥ १५३ ॥ गुञ्जामात्रां वटीं खादेत्सद्यः प्लीहाविनाशिनीम्। मधुपिप्पलिसंयुक्तां द्विगुञ्जां वा प्रयोजयेत्॥ १५४ ॥ प्लीहानमग्रमांसञ्च यकृद्गुल्मं सुदुस्तरम्। आमाशयेषु सर्वेषु चोदरे शोथविद्रधौ॥ १५५ ॥ अग्निमान्द्ये ज्वरे चैव प्लीह्नि सर्वज्वरेषु च। श्रीमद्गहननाथेन भाषितः प्लीहशार्दूलः॥ १५६ ॥

पारद, गन्धक, त्रिकुटा प्रत्येक एक तोला, तांबे की भस्म ४ तोला, मैनसिल, कौड़ीभस्म, शुद्ध तूतिया, हींग, लोहभस्म, जयन्ती, रूसर, मयखार, सोहागा, सेंधा नमक, बिड नमक, चित्रक, शुद्ध जैपाल, प्रत्येक द्रव्य पृथक्-पृथक् एक-एक तोला, इनको निसोत, चित्रक तथा अदरख के रस से अलग अलग तीन तीन दिन भावना देकर १ रत्ती से २ रत्ती प्रमाण की गोली बना लेवे। इसके व्यवहार से तुरन्त ही प्लीहा (तिल्ली) रोग नष्ट होता है और दूसरे रोग जैसे प्लीहा, अग्रमांस, यकृद्रोग, गुल्मरोग, आमाशय के रोग, उदररोग, शोथ (सूजन), विद्रधि, मन्दाग्नि, ज्वर प्रभृति आदि रोग दूर होते हैं। अनुपान—पीपल का चूर्ण आधी रत्ती और शहद॥ १५१-१५६ ॥

### यकृत्प्लीहोदरारि लौह।

स्वर्णरौप्यं तथा ताम्रं वङ्गञ्चाभ्रं समाक्षिकम्। सर्वार्द्धं जरितं लौहं कल्पयेत्कुशलो भिषक्॥ १५७ ॥ शृङ्गवेररसेनापि शेफालीदलजै रसैः। स्वरसैर्बिल्वपत्राणां क्वाथैश्च कटुतिक्तजैः॥ १५८ ॥ रसेन वहुमञ्जर्या भावयेच्च त्रिधा त्रिधा। वल्लमात्रं प्रदातव्यं पर्पटक्वाथसंयुतम्॥ १५९ ॥ प्लीहानं यकृतं श्वासं कासञ्च विषमज्वरम्। गुल्मशोथोदरानाहमग्रमांसमरोचकम्॥ १६० ॥ कामलां पाण्डुरोगञ्च चिरकालानुबन्धिनम्। सर्वान् रोगान्निहन्त्याशु वातपित्तकफोद्भवान्॥ १६१ ॥

स्वर्णभस्म, चाँदीभस्म, ताम्रभस्म, वङ्गभस्म, अभ्रकभस्म, स्वर्णमाक्षिकभस्म, अलग अलग १ तोला, लोहभस्म ३ तोला, इनको इकट्ठा करके अदरख के रस से, हारसिंगार के रस तथा बिल्वपत्र इनके रस से या चिरायता के काढ़े से या तुलसी के रस से अलग अलग तीन-तीन भावना देकर गोली बना लेवे। मात्रा १ रत्ती से २ रत्ती तक। अनुपान—पित्तपापड़ा का काढ़ा। इन गोलियों के व्यवहार से प्लीहा (तिल्ली), यकृत् (जिगर) श्वास, कास, विषमज्वर, गुल्म, शोथ, उदररोग, आनाह, अग्रमांस, अरुचि कामला, तथा पुराना पीलिया प्रभृति और वात, पित्त, कफ से उत्पन्न होनेवाले रोग शान्त होते हैं॥ १५७-१६१ ॥

### रोहीतकाद्य चूर्ण।

रोहीतकं यवक्षारो भूनिम्बः कटुरोहिणी। मुस्तकं नरसारञ्च वीरा विश्वं सुचूर्णितम्॥ १६२ ॥ माषमात्रं ततः खादेच्छीततोयानुपानतः। यकृद्रोगं निहन्त्याशु भास्करस्तिमिरं यथा॥ १६३ ॥

रोहिड़ा की छाल, यवक्षार, चिरायता, कुटकी,

नागरमोथा, नौसादर, कसीस और सोंठ, इन कुल औषधों को समभाग लेकर एकत्र कूट पीसकर चूर्ण बना लेवे। मात्रा—१ माशा। अनुपान—शीतल जल। इसका सेवन करने से यकृत् और प्लीहा रोग इस प्रकार नष्ट होते हैं जैसे सूर्योदय होने से अन्धकार नष्ट हो जाता है॥१६०-१६३॥

शंखद्रावक रस।

योगिनीभैरवाभ्याञ्च बलिमादौ प्रदापयेत्। पश्चात् यन्त्रञ्च कर्त्तव्यमेवमाह महेश्वरी॥१६४॥ रसः शंखद्रवो नाम शम्भुदेवेन भाषितः। गुह्याद् गुह्यतमं गुह्यमिदानीं कथ्यते मया॥१६५॥ शंखचूर्णं यवक्षारं सर्जिक्षारं सटङ्कनम्। समं च पंचलवणं स्फटिकारिनृसादरः॥१६६॥ काचकूप्यां ततः क्षिप्त्वा वारुणीयन्त्रमुद्धरेत्। यामार्द्धं द्रावयत्येष शंखशुक्तिवराटकान्॥१६७॥ अर्शांसि नाशयेत् पट् च मूत्रकृच्छ्रारमरीस्तथा। उदराष्टविधं हन्ति गुल्मप्लीहोदराणि च॥१६८॥ अजीर्णं नाशयेच्छीघ्रं ग्रहणीञ्च विसूचिकाम्। भुक्तशेषे च भोक्तव्यो बिन्दुमात्रो रसोत्तमः॥१६९॥ क्षणमात्राज्जरयेदन्नम् पुनर्भोजनमिच्छति प्रत्यहं भोजनान्ते च संसेव्योऽयं रसोत्तमः॥१७०॥ न रुजायां भयं क्वापि सत्यं सत्यं वदाम्यहम्। न देयं यस्य कस्यापि सदा गोप्यञ्च कारयेत्। रसः शंखद्रवो नाम वैद्यानामुपकारकः॥१७१॥

फिटकरी और नौसादर समभाग। प्रत्येक द्रव्य को लेकर बोतल में स्थापित कर वारुणी यन्त्र द्वारा चुआ लेने से शंखद्रावक रस तैयार होता है। यह अर्धप्रहर में ही शंख, शुक्ति और कौड़ी आदि को गला देता है। एक बूँद इस शंखद्राव को आठ गुने जल में मिलाकर भोजन के अन्त में सेवन करना चाहिये। इसका सेवन करने से ६ प्रकार के बवासीर, मूत्रकृच्छ्र, पथरी, ८ प्रकार के उदर रोग, गुल्म, प्लीहा, अजीर्ण, ग्रहणी और विसूचिका आदि अनेक रोग शीघ्र नष्ट होते हैं तथा क्षणमात्र में ही भोजन का परिपाक हो जाने से पुनः भोजन करने की इच्छा उत्पन्न होती है। मैं सच कहता हूँ, इसका सेवन करने से किसी प्रकार के रोग का भय नहीं रहता। हरएक को इसका उपदेश न करना चाहिये, यह सर्वदा गोपनीय और वैद्यों का उपकारक है॥ १६४-१७१॥

महाद्रावक रस।

शुद्धं काञ्चनमाक्षिकं मृदुतरं कांस्याभिधं तत्तथा। सिन्धूत्थं विमलं रसाञ्जनवरं फेनः स्रवन्तीपतेः॥ क्षारौ सर्जिकसाम्भलौ सुविमलौ भागास्त्वमीषां समाः। सप्तानां सदृशन्तु टङ्कनमिहास्यार्द्धो नृसारः सितः॥१७२॥ तत्तुल्या स्फटिकारिका त्रिसदृशः शुक्लो यवक्षारकः। कासीसं त्रितयं यवाग्रजसमं संचूर्ण्य सर्वं न्यसेत्॥ पात्रे काचमये मृदम्बरयुते यन्त्रे सकाच्ये भिषक्। ज्वालेन क्रमवर्द्धितेन त्र्यहितोऽमीषां रसं पातयेत्॥ १७३॥ यो द्राग्भस्मवराटिकां प्रकुरुते सोऽयं महाद्रावकः। को वक्तुं प्रभवेदमुष्य नितरां सम्यग्गुणान् भूतले॥ एतद्वल्लचतुष्टयं सह गिलेत् शुण्ठ्या लवङ्गेन वा। तत्पश्चात् परिपाकसिद्धं बहुगुणं साम्लकं भक्षयेत्॥ १७४॥ मासद्वयात् कथयामि तान् शृणु गुणान् अस्यैव का-

१ पहिले योगिनी और भैरव के लिये बलिप्रदान कराकर पश्चात् शंखद्राव नामक रस के निर्माण के लिये वारुणी यन्त्र की रचना करनी चाहिये। शिवजी के कहे हुये अत्यन्त गोपनीय इस शंखद्राव नामक रस को अब मैं बताता हूँ। शंख का चूर्ण, जवाखार, सज्जीखार, सोहागा, पाँचों नमक,

रिचत् परान्। निःशेषं विनिहन्त्यसौ चिरभवान्यष्टोदराणि ध्रुवम्॥ गुल्मं पाण्डुहलीमकं सुकठिनामष्ठीलिकां कामलां। मन्दाग्निं विषमाग्नितां बहुविधान् शोथांश्च शूलानपि ॥ १७५॥ सर्वार्शांसि भगन्दरान् क्रिमिगदान् पञ्चैव कासांस्तथा। हिक्काश्लीपदकोषवृद्धिमरुचिं व्याधिं महादारुणम्॥ नव्यं वा चिरजं ज्वरं बहुविधं छर्दिं कृमीन् विंशतिं। यक्ष्माणं चिरजामवातपिडिकां वीसर्पविस्फोटकम्॥१७६॥ उन्मादं स्वरभेदमर्बुदमपि स्वेदं हृत्पाणिजं। जिह्वास्तम्भगलग्रहं चिरभवं ग्रीवारुजामुल्वणाम्॥ नासाकर्णशिरोऽक्षिवक्त्रभगदान् क्षुद्रामयांश्चापरान्। हन्यादेव चिरोत्थितान् बहुविधानन्यांश्च रोगानपि ॥ १७७॥ एकः स्यादपरो हि टङ्कणमुखैर्द्रव्यैः परैः सप्तकैः। अन्यस्तु स्फटिकारिटङ्कणयवक्षारप्रकासीसकैः ॥ जानीयाद् गुरुतो विभागमनयोर्यन्त्रादिकं चापरं। निर्दिष्टास्त्रय एव भेषजवराः स्वल्पो महान्मध्यमः ॥ १७८॥

टङ्कणादिकासीसान्तैः सप्तद्रव्यैर्मध्यमः।
स्फटिकारिकासीसान्तचतुर्द्रव्यैः स्वल्पः।
स्वर्णमाक्षिकादिकासीसान्तैर्महान्।

शुद्ध स्वर्णमाक्षिक, शुद्ध रौप्यमाक्षिक, सैंधव लवण, रसौत, समुद्रफेन, सज्जीखार और सांभर-नोन प्रत्येक १ तोला, सोहागा ७ तोले, श्वेत नौसादर ३॥ तोले, फिटकरी १॥ तोले, यवक्षार १४ तोले, धातुकासीस, पुष्पकासीस और कासीस (हीराकसीस) तीनों मिलकर १४ तोले (यदि तीनों प्रकार के कासीस न मिलें तो केवल हीराकासीस ही को १४ तोले लेवे); इन सब द्रव्यों को अलग कूट पीस कर चूर्ण बना लेवे। तदनन्तर उक्त रीति से कपड़मिट्टी किये हुए काँच के पात्र में रख कर वकयन्त्र द्वारा, क्रमशः मृदु, मध्य और तीव्र आँच देकर अत्यन्त सावधानी से इनका रस चुआवे। इसी रस को महाद्रावक कहते हैं। यह वही महाद्रावक है जो कौड़ी को तत्काल भस्म कर देता है, फिर पृथिवी में इसके निःशेष गुणों का वर्णन कौन कर सकता है। सोंठ अथवा लौंग के चूर्ण के साथ ३ रत्ती (७ या ८ बूँद) परिमित महाद्रावक रस का सेवन करना चाहिये। तदनन्तर लौंग इलायची आदि सुगन्धित और गुणद पदार्थों से युक्त पान का बीड़ा खावे।

इसका सेवन करने से ८ प्रकार के उदररोग, गुल्म, पाण्डुरोग, हलीमक, अतिकठिन अष्ठीला, कामला, अग्निमान्द्य, विषमाग्निता, हर प्रकार के शोथरोग, शूल, सब प्रकार के बवासीर, भगन्दर, कृमिरोग, ५ प्रकार के कास, हिचकी, श्लीपद, कोषवृद्धि, अरुचि, नया अथवा पुराना महादारुण ज्वर, हर प्रकार के वमन, २० प्रकार के कृमि, राजयक्ष्मा पुरानी आमवातजन्य पिडिका, वीसर्प नामक फोड़ा, उन्माद, स्वरभेद, अर्बुद, हृदय और हाथ में होनेवाला स्वेद (पसीना), जिह्वास्तम्भ, गलग्रह, पुरानी और उग्र ग्रीवा की पीड़ा, नासिकारोग, कर्णरोग, मस्तक रोग, नेत्ररोग और मुखरोग आदि अनेक प्रकार के रोग नष्ट होते हैं॥

द्रावक रस अल्प, मध्य और महत् इन भेदों से ३ प्रकार का है। फिटकरी, सोहागा, यवक्षार और हीराकासीस इन चारों द्रव्यों के समान चूर्ण एकत्रित कर जो चुआया जाता है, उसको अल्प द्रावक कहते हैं। इसी प्रकार सोहागा, नौसादर, फिटकरी, यवक्षार धातुकासीस, पुष्पकासीस और हीराकासीस इन सात द्रव्यों के समान भाग चूर्ण मिश्रित कर जो अर्क निकाला जाता है उसको मध्यम द्रावक कहते हैं। तथा सुवर्णमाक्षिक आदि कुल द्रव्यों को यथाभाग एकत्रित कर जो रस चुआया जाता है उसको महाद्रावक कहते हैं।

इनके (अल्प और मध्यमद्रावक के) बनाने के नियम और यन्त्र आदि का ज्ञान गुरु से प्राप्त

करना चाहिये। इस रस की व्यावहारिक मात्रा १ मूँग है ॥ १७२-१७८ ॥

महाशंखद्रावक।

चिञ्चाश्वत्थः स्नुही अर्कोऽपामार्गश्च हि पञ्चम। पृथग्भस्मजलं कृत्वा तुद्धृत्य लवणानि च ॥ १७९ ॥ टङ्कनञ्च यवक्षारं स्वर्जं लवणपञ्चकम्। रामठं तालकञ्चैव लवङ्गं नरसादरम् ॥ १८० ॥ जातीफलञ्च गोदन्तं ताप्यं गन्धरसं तथा। विषं समुद्रफेनञ्च सोरकास्फटिकारिका ॥ १८१ ॥ शंखचूर्णं शंखनाभिचूर्णं पाषाणसम्भवम्। मनःशिला च कासीसं समभागञ्च कारयेत् ॥ १८२ ॥ भाव्यास्ते वेतसरसैः काचकूप्यां क्षिपेत्ततः। अत्र द्रव्यञ्च तदरया उष्णस्थाने च धारयेत् ॥ १८३ ॥ वस्त्रेणाच्छादितस्तावद्यावत् स्यात् सप्तवासरम्। पश्चान्मन्दाग्निना देयं वारुणीयन्त्रमुद्धरेत् ॥ १८४ ॥ काचकूप्यां जलं धार्यं रक्षयेद्यत्नतः सुधीः। गुञ्जैकं पर्णखण्डेन प्रत्यहं भक्षयेन्नरः ॥ १८५ ॥ कासं श्वासं क्षयं प्लीहामजीर्णं ग्रहणीगदम्। रक्तपित्तं क्षतं गुल्ममर्शांसि च विनाशयेत् ॥ १८६ ॥ अश्मरीं मूत्रकृच्छ्रञ्च शूलमष्टविधं तथा। आमवातं वातरक्तं खञ्जवातं धनुस्तथा ॥ १८७ ॥ उदरामयमामञ्च स्थूलतां कृमिकोष्ठताम्। वातपित्तकफान् सर्वान्नाशयेन्नात्र संशयः ॥ १८८ ॥ भुक्त्वा च कण्ठपर्य्यन्तं गुञ्जैकञ्च रसं लिहेत्। तत्क्षणात् कारयेद्भस्म तृणराशिमिवानलः ॥ १८९ ॥ यामार्द्धं द्रावयेत्सर्वं शङ्खशुक्तिवराटकम्। पूर्वोक्तविधिना तत्र दद्यान्निशिचतुष्पथे ॥ १९० ॥ योगिनीभैरवाभ्याञ्च बलिं माषतिलान्वितम्। महाशंखद्रवो नाम्ना शम्भुदेवेन भाषितः ॥ १९१ ॥ गुह्याद्गुह्यतमं गोप्यं पुत्रस्यापि न कथ्यते। लोकानां कौतुकान् कर्त्ता प्रकारयो राजसन्निधौ ॥ १९२ ॥

इमली की छाल, पीपल की छाल, थूहर, आक के जड़ की छाल और लटजीरा, इनमें से प्रत्येक के भस्म अलग अलग जल में घोल देवे। जब भस्म नीचे बैठ जाने से पानी साफ़ निर्मल हो जाय तब युक्तिपूर्वक उस निर्मल जल को दूसरे पात्र में निकाल लेवे। तदनन्तर उस पानी को साफ़ कड़ाही में रखकर धीमी आँच से जलाकर लवण बनावे। इसी प्रकार पाँचों के भस्म के क्षार जल का अलग-अलग लवण तैयार कर लेवे; तदनन्तर सोहागा, यवक्षार, सज्जीखार, पाँचों नमक, हींग, हरिताल, लौंग, नौसादार, जायफल, गोदन्ती हरिताल, स्वर्णमाक्षिक, कोल विष, समुद्रफेन, कलमीशोरा, फिटकरी शङ्खचूर्ण, शङ्खनाभिचूर्ण, पत्थर का चूर्ण, मैनसिल और हीराकसीस सम भाग; इन सब द्रव्यों को एकत्र चूर्णित करके बेंत के रस में घोटकर बोतल में रक्खे। तदनन्तर उस बोतल को कपड़े से ढक करके उष्ण स्थान में ७ दिन पर्यन्त रख छोड़े। पश्चात् मन्द मन्द आँच से वारुणीयन्त्र में पकाकर थोड़े जल से युक्त किसी काँच के पात्र में अर्क चुआ लेवे। प्रतिदिन १ रत्ती इस महाशङ्खद्राव को पान की पत्ती पर चुपड़ कर खाना चाहिये। इसका सेवन करने से कास, श्वास, क्षय, प्लीहा, अजीर्ण, ग्रहणी, रक्तपित्त क्षत, गुल्म, बवासीर, पथरी, मूत्रकृच्छ्र, आठ प्रकार के शूल, आमवात, वातरक्त, खञ्जवात, धनुर्वात, उदररोग, स्थूलता, कृमिकोष्ठता, वातरोग, पित्तरोग और कफरोग ये सब निःसंदेह नष्ट हो जाते हैं। कण्ठपर्यन्त भोजन करके एक रत्ती इस महाशङ्खद्राव रस को यदि (पान की पत्ती पर रखकर) खा लेवे तो उन कुल भुक्तपदार्थों को क्षणमात्र में इस प्रकार

भस्म कर देता है जैसे अग्नि तृणों की राशि को भस्म करे। पहिले रात्रि के समय किसी चौराहे पर पूर्वोक्त विधि से योगिनी और भैरव के लिये तिल और उरद की बलि देकर, पश्चात् इस महाशङ्खद्राव को बनाना चाहिये। शिवजी के कहे हुये अत्यन्त गोपनीय इस महाशङ्खद्राव को अपने पुत्र से भी न कहे, किन्तु लोगों को आश्चर्यान्वित करने के लिये राजसभा में इस को प्रकाशित करना चाहिये। यह आधे पहर में शङ्ख, सीपी और कौड़ी को गला देता है ॥१७६-१८२॥

रोहीतकारिष्ट।

रोहीतकतुलामेकां चतुर्द्रोणे जले-पचेत्। पादशेषे रसे पूते शीते पलशत-द्वयम् ॥ २१८ ॥ दद्याद्गुडस्य धातक्याः पलषोडशिका मता। पञ्चकोलं त्रिजातञ्च त्रिफलाञ्च विनिक्षिपेत् ॥ २१९ ॥ चूर्णयित्वा पलांशेन ततो भाण्डे निधापयेत् मासादूर्ध्वञ्च पिबतां सर्वोदररुजां जयेत् ॥ २२० ॥ प्लीहगुल्मोदराष्ठीलाग्रहण्यर्शांसि कामलाम्। कुष्ठशोफारुचिहरो रोहीतारिष्ट संज्ञितः ॥ २२१ ॥

रोहिड़ा की छाल १ सेर लेकर एक मन ग्यारह सेर सोलह तोला जल में पकावे, १२ सेर १४ तोला जल शेष रहने पर उतारकर छान लेवे। क्वाथ को शीतल होने पर इसमें १० सेर गुड़ मिलावे। तदनन्तर ६४ तोला धाय के फूल, पीपर, पिपरामूल, चाब, चीता, सोंठ, दालचीनी, इलायची, तेजपात, आंवला, हर्र और बहेड़ा इनमें से प्रत्येक का चूर्ण ४ तोले मिलाकर किसी मिट्टी के पात्र में रखकर पात्र का मुख मुद्रित करके रख छोड़े। एक मास के अनन्तर छान कर काम में लावे। इसका नाम रोहितकारिष्ट है। इसकी मात्रा आधी छटांक है सम भाग जल मिला। दिन में १ बार इसका सेवन करना चाहिये। इसका सेवन करने से सब प्रकार के उदररोग, प्लीहा, गुल्म, अष्ठीला, ग्रहणी, बवासीर, कामला, कुष्ठ, शोथ और अरुचि ये सब रोग नष्ट होते हैं ॥ २१८-२२१ ॥

यकृत प्लीहारोग में पथ्यापथ्य।

यत्पथ्यं यदपथ्यं चोदरे प्रोक्तंभिषग्वरैः तदेवयकृतिप्लीहि गदे ज्ञेयं विनिश्चितम् ॥

इति भैषज्यरत्नावल्यां प्लीहयकृद-धिकारः समाप्तः ॥

वैद्यों ने उदररोग में जो पथ्य और अपथ्य कहा है वही निश्चित रूप से प्लीहा यकृत्रोग में भी पथ्य अपथ्य समझना चाहिए।

इति सरयूप्रसादत्रिपाठिकृतायां भैषज्य-रत्नावल्या रत्नप्रभाख्यायां व्याख्यायां प्लीहयकृदधिकार समाप्तः ॥

---

## अथ पाण्डुकामलाहलीम-काधिकारः।

साध्यन्तु पाण्डुामयिनं समीक्ष्य स्निग्धं घृतेनोर्ध्वमधश्च शुद्धम्। सम्पादयेत् क्षौद्रघृतप्रगाढैर्हरीतकीचूर्णमयैः प्रयोगैः ॥ १ ॥

साध्य पाण्डुरोग में पहिले रोगी को घृत (पञ्चतिक्तादिक घृत) का सेवन कराकर स्निग्ध करना चाहिये। तदनन्तर वमन और विरेचन द्वारा शुद्ध करके पश्चात् घृत और मधु से युक्त हरीतकीचूर्ण आदि प्रयोगों का सेवन करावे ॥१॥

पाण्डुरोगनाशक योग।

पिबेद्घृतं वा रजनीविपक्वं यत्त्रैफलं तैल्वकमेव वापि। विरेचनद्रव्यकृतं पिबेद्वा योगांश्च वैरेचनिकान् घृतेन ॥ २ ॥

पाण्डुरोग में हल्दी के क्वाथ और कल्क के साथ सिद्ध घृत, त्रिफला के क्वाथ और कल्क

के साथ सिद्ध घृत, मात्राधिकारोक्त तैन्दुकघृत अथवा विरेचन द्रव्यों के क्वाथ और कल्क के साथ सिद्ध घृत का पान करे। अथवा विरेचक (दस्तावर) औषधों का घृत के साथ सेवन करे ॥ २ ॥

विधिः स्निग्धस्तु वातोत्थे तिक्तशीतस्तु पैत्तिके। श्लैष्मिके कटुरूक्षोष्णः कार्यो मिश्रस्तु मिश्रके ॥ ३ ॥

वातजन्य पाण्डुरोग में स्निग्ध प्रयोग, पित्तजन्य पाण्डुरोग में तिक्त और शीत प्रयोग, कफजन्य पाण्डुरोग में कटु, रूक्ष और उष्ण प्रयोग और द्वन्द्वज आदि में मिश्रप्रयोगों का सेवन कराना चाहिये ॥ ३ ॥

पाण्डुरोगे सदा सेव्या सगुडा च हरीतकी ॥ ४ ॥

पाण्डुरोग में सदा गुड़ और हर्रे का सेवन करना चाहिए ॥ ४ ॥

सप्तरात्रं गवां मूत्रे भावितं वाप्ययोरजः। पाण्डुरोगप्रशान्त्यर्थं पयसाथ पिबेन्नरः ॥ ५ ॥

पाण्डुरोग की शान्ति के लिये सात दिवस पर्यन्त गोमूत्र की भावना देकर दूध के साथ लोहचूर्ण का सेवन करना चाहिये ॥ ५ ॥

अयोमलन्तु सन्तप्तं भूयो गोमूत्रशोधितम्। मधुसर्पिर्युतं चूर्णं सहभक्तेन योजयेत्। दीपनं चाग्निजननं शोथपाण्ड्वामयापहम् ॥ ६ ॥

मण्डूर को अग्निपर तपाकर सातबार गोमूत्र में बुझाकर शुद्ध कर लें। तदनन्तर उसका महीन चूर्ण करके घी और शहद में मिलाकर भात के साथ खिलावे। इससे अग्नि की वृद्धि, तथा शोथ और पाण्डुरोग का नाश होता है ॥ ६ ॥

रेचनं कामलार्तस्य स्निग्धस्यादौ प्रयोजयेत्। ततः प्रशमनी कार्य्या क्रिया वैद्येन जानता ॥ ७ ॥

कामला रोगी को पहिले स्नेहपान कराकर पश्चात् रेचन (दस्तावर) औषध देना चाहिये। तदनन्तर प्रशमन औषध का प्रयोग करना चाहिये ॥ ७ ॥

त्रिफलाया गुडूच्या वा दार्व्या निम्बस्य वा रसः। प्रातर्माक्षिकसंयुक्तः शीलितः कामलापहः ॥ ८ ॥

त्रिफला, गिलोय, दारुहल्दी और नीम की छाल इनमें से किसी एक के रस को मधुसंयुक्त प्रातःकाल सेवन करने से कामला रोग नष्ट होता है ॥ ८ ॥

सशर्करा कामलिनां त्रिभण्डी हिता गवाक्षी[1] सगुडा च शुण्ठी ॥ ९ ॥

चीनी के साथ निसोथ और इन्द्रायण का चूर्ण अथवा गुड़ के साथ सोंठ का चूर्ण सेवन करने से कामला रोग में लाभ होता है ॥ ९ ॥

दग्ध्वाक्षकाष्ठैर्मलमायसन्तु गोमूत्रनिर्वापितमष्टवारान्। विचूर्ण्य लीढं मधुनाचिरेण कुम्भाह्वयं पाण्डुगदं निहन्ति १०

बहेड़ा की लकड़ी की आग पर मण्डूर तपा-तपाकर आठ बार गोमूत्र में बुझावे। तदनन्तर उस मण्डूर का महीन चूर्ण बनाकर मधु के साथ सेवन करने से कुम्भकामला रोग अति शीघ्र नष्ट हो जाता है ॥ १० ॥

लौहपात्रे शृतं क्षीरं सप्ताहं पथ्यभोजनः। पिबेत् पाण्ड्वामयी शोषी ग्रहणीदोषपीडितः ॥ ११ ॥

पाण्डुरोगी, शोषरोगी और ग्रहणीरोगपीड़ित मनुष्य एक सप्ताह पर्यन्त पथ्य भोजन करें और लोह के पात्र में पकाये हुये दुग्ध का पान करें तो उनके पाण्डु आदि रोग शान्त हो जाते हैं ॥ ११ ॥

---

1 गवाक्षीन्द्रवारुणी।

कामलानाशक अञ्जन।

अञ्जनं कामलार्त्तस्य द्रोणपुष्पीरसः स्मृतः। निशागैरिकधात्रीणां चूर्णं वा संप्रकल्पयेत् ॥ १२ ॥

गूमा के रस को आँख में छोड़ने से अथवा हलदी, गेरू और आँवला के चूर्ण को शहद में मिलाकर आँखों में अंजन करने से कामलाजन्य आँखों का पीलापन नष्ट हो जाता है ॥ १२ ॥

पाण्डुनाशक नस्य।

नस्यं कर्कोटमूलं वा घ्रेयं वा जालिनीफलम् ॥ १३ ॥

ककोड़े की जड़ के रस का अथवा घोषालता के फल के रस ( अभाव में चूर्ण ) का नस्य कामला और पाण्डुरोग में लाभदायक होता है ॥ १३ ॥

फलत्रिकादि क्वाथ।

फलत्रिकामृता वासा तिक्ता भूनिम्ब-निम्बजः। क्वाथः क्षौद्रयुतो हन्यात्पाण्डु-रोगं सकामलम् ॥ १४ ॥

त्रिफला ( हर्रे, बहेड़ा, आमला ), गिलोय, वासा, कुटकी, चिरायता नीम की छाल,उपर्युक्त कुल द्रव्य मिलाकर २ तोले ले और इनको ३२ तोले पानी में डालकर पकावे, जब आठ तोले काढ़ा शेष रहे तो तैयार समझे। इस काढ़े में ऊपर से शहद मिलाकर प्रयोग में लाने से पाण्डु रोग नाश को प्राप्त होता है ॥ १४ ॥

विशालादि चूर्ण।

विशाला कटुका मुस्तकुष्ठदारुकलि-ङ्गकाः। कर्षांशा द्विपिचुं मूर्वा कर्षार्द्धा च घुणप्रिया ॥ १५ ॥ पीत्वा तच्चूर्ण-मम्भोभिः सुखं लिह्यात्ततो मधु। पाण्डु-रोगं ज्वरं दाहं कासं श्वासमरोचकम् ॥ गुल्मानाहामवातांश्च रक्तपित्तञ्च तज्-जयेत् ॥ १६ ॥

इन्द्रायण, कटुकी, मोथा, कूट, देवदारु, इन्द्रजौ, हरएक द्रव्य दो तोले, मूर्वामूल ४ तोले, अतीस १ तोला, इनका पृथक्-पृथक् चूर्ण कर मिला ले। मात्रा–२ मासे। अनुपान जल। विधि- २ मासा चूर्ण जल के साथ फाँकने के पश्चात् ऊपर से शहद चाटे। इस चूर्ण के प्रयोग से पाण्डुरोग ( पीलिया ) ज्वर, दाह, कास, श्वास, अरुचि, गुल्म, आनाह, आमवात एवं रक्तपित्त नष्ट होता है ॥ १५-१६ ॥

धात्रीलौह।

धात्रीलोहरजोव्योषनिशाक्षौद्राज्य-शर्कराः। लेहो निवारयत्याशु कामलामुद्ध-तामपि ॥ १७ ॥

आँवला, लोहभस्म, त्रिकटु ( सोंठ,मिर्च, पीपरि ), हलदी, मधु, घी तथा खाँड को मिलाकर चाटने से कामला रोग नष्ट होता है। मात्रा- २ रत्ती ॥ १७ ॥

अयस्तिलादि मोदक

अयस्तिलत्र्यूषणकोलभागैः सर्वैः समं माक्षिकधातुचूर्णम्। तैर्मोदकः क्षौद्रयुतो-ऽनुतक्रः पाण्ड्वामये दूरगतेऽपिशस्तः १८

लोहभस्म, तिल, त्रिकटु ( सोंठ, मिर्च, पीपरि ), बेर हरएक १ भाग, सोनामक्खी की भस्म ६ भाग इन्हें इकट्ठे मिलाकर शहद के साथ लड्डू बना ले। मात्रा २ रत्ती से ४ रत्ती तक। अनुपान मठा। ये मोदक पाण्डु रोग में अत्यन्त लाभदायक हैं ॥ १८ ॥

दार्व्यादि लेहि।

दार्वी सत्रिफला व्योषविडङ्गान्ययसो रजः। मधुसर्पिर्युतं लिह्यात् कामलापाण्डु-रोगवान् ॥ १९ ॥

दारुहल्दी, त्रिफला ( हर्रे, बहेड़ा, आमला ), त्रिकटु ( सोंठ, मिर्च, पीपरि ), वायविडङ्ग, लोहभस्म, इन द्रव्यों को बराबर-बराबर मिला-

कर १ रत्ती मधु या घी के साथ पाण्डु रोगी को सेवन करना चाहिए ॥ १६ ॥

तुल्या चायोरजः पथ्या हरिद्राक्षौद्रसर्पिषा। चूर्णिता कामली लिह्यात् गुडक्षौद्रेण वाभयाम् ॥ २० ॥

लोहभस्म, हरड़, हल्दी, इनको इकट्ठा कर मिलाकर घी या शहद के साथ या इकले हरड़ को ही गुड़ और शहद के साथ कामलारोगी को चाटना चाहिए ॥ १० ॥

मृद्विरेचनम्।

इन्द्रलोचन नेत्राणि शिखि भागोञ्च योजयेत्। त्रुटि गन्धक सूक्ष्मारग्वधपुष्पाविचूर्णितम् ॥ २१ ॥

माषद्वय शरां दुग्धैः सेवयेद्दिनपञ्चकम्। रेचयेन्मृत्तिकां शुद्धां शिशूनां हितमोषधम् ॥ २२ ॥

इलायची १ भाग, गन्धक १ भाग, मुर्दासङ्ग २ भाग, सौंफ २ भाग लेकर महीन चूर्ण कर रख ले। इसमें से १।२ माशे गौ दूध के साथ देने से ५ दिन में बच्चों की खाई हुई मिट्टी दस्त द्वारा निकल जाती है। विशेष अनुभूत है ॥ २१-२२ ॥

निशालौह।

लोहचूर्णं निशायुग्मत्रिफलारोहिणीयुतम्। प्रलिह्यान्मधुसर्पिर्भ्यां कामलापाण्डुशान्तये ॥ २३ ॥

हल्दी, दारुहल्दी, त्रिफला (हर्र, बहेड़ा, आँवला), कुटकी हरएक एक एक तोला, लोहभस्म ६ तोला, इन्हें मिलाकर सेवन करने से कामला तथा पाण्डुरोग शान्त होता है। मात्रा-२-३ रत्ती, अनुपान-शहद तथा घृत ॥ २३ ॥

विडङ्गाद्य लौह।

विडङ्गमुस्तत्रिफलादेवदारुषडूषणैः। तुल्यमात्रमयश्चूर्णं गोमूत्रेऽष्टगुणे पचेत् ॥ २४ । गुञ्जाद्वयमितां कृत्वा वटीं खादेत् दिनेदिने। कामलापाण्डुरोगार्त्तः सुखमाप्नुयतेऽचिरात् ॥ २५ ॥

वायविडङ्ग, मोथा, त्रिफला, (हर्र, बहेड़ा, आँवला), देवदारु, पीपरि, पिप्पलीमूल, चव्य, चित्रक, सोंठ, काली मिर्च, प्रत्येक द्रव्य १ भाग, लोहभस्म सबके बराबर, इस मिले हुए चूर्ण से आठगुना गोमूत्र मिट्टी के बर्तन में चूर्णसहित डालकर पका ले। जब गोली बनाने योग्य गाढ़ा हो जावे तब उतार ले और २।२ रत्ती प्रमाण की गोली बना ले। इनका लगातार सेवन करने से कामला तथा पाण्डुरोग नष्ट हो जाते हैं और मनुष्य आरोग्य हो जाता है ॥ २४-२५ ॥

अष्टादशाङ्ग लौह।

किराततिक्ता च सुदारु दार्वीमुस्तागुडूची कटुकापटोलम्। दुरालभा पर्पटकं सनिम्बं कटुत्रिकं वह्निफलत्रिकञ्च ॥ २६ ॥ फलं विडङ्गस्य समांशिकान्येतैः सर्वैः समं चूर्णमथायसञ्च। सर्पिर्मधुभ्यां वटिका विधेया तक्रानुपाना भिषजप्रयोज्या ॥ २७ ॥ निहन्ति पाण्डुञ्च हलीमकञ्च शोथं प्रमेहं ग्रहणीरुजञ्च। श्वासञ्च कासञ्च सरक्तपित्तमर्शांस्यथो वातग्रहमामवातम्। व्रणांश्च गुल्मान् कफविद्रधींश्च श्वित्रञ्च कुष्ठञ्च ततः प्रयोगात् ॥ २८ ॥

चिरायता, देवदारु, दारुहल्दी, मोथा, गिलोय कुटकी, पटोलपत्र, दुरालभा, पित्तपापड़ा, नीम, त्रिकटु, (सोंठ, मिर्च, पीपरि,), चित्रक, त्रिफला, (हर्र, बहेड़ा, आँवला), वायविडङ्ग, हर एक द्रव्य १ तोला, लोहभस्म १८ तोले, इन्हें मिलाकर घी या शहद के साथ गोली बना, ले। मात्रा १।२ रत्ती। अनुपान मट्ठा। इनके व्यवहार से पाण्डु, हलीमक, शोथ (सूजन) प्रमेह, संग्रहणी, श्वास, कास, रक्तपित्त, बवासीर, वातगद, आमवात, व्रण, (फोड़ा), गुल्म,

विद्रधि, श्वित्र तथा कुष्ठ नाश को प्राप्त होते हैं ॥ २६-२८ ॥

कामलान्तक लौह।

द्विपलं जारितं लौहं लौहार्द्धं जारिताभ्रकम्। मण्डूरञ्च तदर्धञ्च तदर्धं मृतवङ्गकम् ॥ २९ ॥ वङ्गार्धं मागधं शुण्ठी पिप्पलीगजपिप्पली। ग्रन्थिकं गन्धपत्रञ्च दार्वी चव्यं यमानिका ॥ ३० ॥ चित्रकं कट्फलं रास्ना देवदारु फलत्रिकम्। रसाञ्जनं चातिविषा समभागान् विचूर्णयेत् ॥ ३१ ॥ केशराजस्य भृङ्गस्य सोमराजरसस्य च। मण्डूकपर्ण्याः स्वरसैर्भावयेच्च दिनत्रयम् ॥ ३२ ॥ भक्षयेन्मधुना युक्तं सर्वमेहकुलान्तकः। कामलां पाण्डुरोगञ्च हलीमकमथारुचिम् ॥ ३३ ॥ कासं श्वासं शिरःशूलं प्लीहानमग्रमांसकम्। जीर्णज्वरं तथा शोथमङ्गग्रहनिपीडितम् ॥ ३४ ॥ गुल्मं शूलञ्च कुरुते दीप्तं ज्वरं जीर्णं व्यपोहति ॥ कामलान्तकनामायं लौहः कामलरोगनुत् ॥ ३५ ॥

लोहभस्म १६ तोले, अभ्रकभस्म ८ तोले, मण्डूर ४ तोले, वङ्गभस्म २ तोले, मागध (जीरा), सोंठ, पीपल, गजपीपल, पिप्पलीमूल, तेजपत्र, दारुहल्दी, चव्य, अजवाइन, चित्रक, कट्फल, रास्ना, देवदारु, त्रिफला, (हर्र, बहेड़ा, आँवला), रसौत, अतीस, प्रत्येक द्रव्य १ तोला; इन्हें केशराज, भृङ्गराज (सफेद काले दोनों भाँगरे), सोमराज (काली जीरी) तथा मण्डूकपर्णी के रस से अलग-अलग तीन दिन भावना दे, मात्रा—२ रत्ती से ४ रत्ती, अनुपान—शहद। इसके सेवन करने से प्रमेह, कामला, पाण्डु, हलीमक, अरुचि, कास, श्वास, शिरोवेदना, (सिरदर्द), प्लीहा, अग्रमांस, जीर्णज्वर, शोथ (सूजन), अंगग्रह, गुल्म, शूल, हृद्रोग तथा संग्रहणी आदि रोग दूर होते हैं और यह अग्निदीपन है ॥ २९-३५ ॥

हलीमकचिकित्सा।

पाण्डुरोगक्रियां सर्वां योजयेच्च हलीमके। कामलायाञ्च या दिष्टा सापि कार्या भिषग्वरैः ॥ ३६ ॥

पाण्डुरोग और कामला में जो-जो चिकित्साएँ कही गई हैं, वैद्यवर हलीमक में भी उन्हीं सब चिकित्साओं का प्रयोग करें ॥ ३६ ॥

नवायसलौह

त्र्यूषणं त्रिफला मुस्तं विडङ्गं चित्रकं समम्। नवायोरजसो भागास्तच्चूर्णं मधुसर्पिषा। भक्षयेत् पाण्डुहृद्रोगकुष्ठार्शःकामलापहम् ॥ ३७ ॥

सोंठ, मिरिच, पीपरि, आँवला, हर्र बहेड़ा, नागरमोथा, वायविडङ्ग और चीता प्रत्येक एक-एक तोला, लोहभस्म ९ तोले; इन सब द्रव्यों को जल में घोटकर वटी बना लेवे। मात्रा—१ रत्ती से क्रमशः बढ़ाकर ४ रत्ती पर्यन्त। अनुपान—घृत और मधु। इसका सेवन करने से पाण्डुरोग, हृद्रोग, कुष्ठ, बवासीर और कामला रोग नष्ट होते हैं ॥ ३७ ॥

त्रिकत्रयाद्यलौह।

पलं लौहस्य किट्टस्य पलं गव्यस्य सर्पिषः। शिलायाश्च पलञ्चैकं मधुनश्च पलं तथा ॥ ३८ ॥ तोलैकं कान्तलौहस्य त्रिकत्रयसमन्वितम्। ततः पात्रे विधातव्यं लौहे वा मृण्मये तथा ॥ ३९ ॥ भावितं मधुसर्पिर्भ्यां रौद्रे शिशिर एव च। भोजनादौ तथा मध्ये चान्ते चैव प्रयोजयेत्। अनुपानं प्रदातव्यं बुद्ध्वा दोषगतिं भिषक् ॥ ४० ॥ कामलां पाण्डुरोगञ्च हलीमकमथापि च। अम्लपित्तं तथा शूलं

शूलञ्च परिणामजम् ॥ ४१ ॥ कासं पञ्चविधञ्चैव प्लीहश्वासज्वरानपि । अपस्मारं तथोन्मादमुदरं गुल्ममेव च ॥ ४२ ॥ अग्निमान्द्यमजीर्णञ्च श्वयथुञ्चसुदारुणम् । निहन्ति नात्र सन्देहो भास्करस्तिमिरं यथा ॥४३॥ त्रिकत्रयादिरित्येष वाग्भटेन प्रकाशितः ।

मण्डूर ८ तोले, गोघृत ८ तोले, चीनी ४ तोले, मधु ४ तोले कान्तलोह १ तोला, सोंठ मिरिच, पीपरि, आँवला, हर्रे, बहेड़ा, वायविडङ्ग, नागरमोथा और चीता प्रत्येक १ तोला। इन सब औषधों को एकत्रकर लोह के पात्र में लोहदण्ड से घोटकर दिन भर घाम में और रात को ओस में रख छोड़े। यह औषध मिट्टी के पात्र में भी बन सकती है। इसकी मात्रा ४ रत्ती। भोजन के आदि में पहिले ग्रास के साथ, भोजन के मध्य में ग्रास के साथ और भोजन के अन्त में अन्तिम ग्रास के साथ इस त्रिकत्रयाख्यलोह का सेवन करना चाहिए। इसका सेवन करने से कामला, पाण्डुरोग, हलीमक, अम्लपित्त, शूल, परिणामजन्य शूल, ५ प्रकार के कास, प्लीहा, श्वास, ज्वर, अपस्मार, उन्माद, उदररोग, गुल्म, अग्निमान्द्य, अजीर्ण, दारुणशोथ ये सब रोग इस प्रकार नष्ट होते हैं जैसे सूर्योदय होने से अन्धकार नष्ट हो। इसमें किञ्चिन्मात्र भी सन्देह नहीं ॥ ३७-४३ ॥

### योगराजलोह ।

त्रिफलायास्त्रयो भागास्त्रयस्त्रिकटुकस्य च। भागाश्चित्रकमूलस्य विडङ्गानांतथैव च ॥ ४३ ॥ पञ्चाऽश्म जतुनोभागास्तथारूप्य मलस्य च। माक्षिकस्य च शुद्धस्य लौहस्य रजसस्तथा ॥ ४४ ॥ अष्टौभागा सितायाश्च तत्सर्वं सूक्ष्मचूर्णितम्। माक्षिकेणाऽऽप्लुतं स्थाप्य मायसेभाजने शुभे ॥४५॥ उदुम्बरसमां मात्रां ततः खादेद्यथाऽग्निना। दिनेदिने प्रयुञ्जीत जीर्णेभोज्यं यदीप्सितम् ॥ ४६ ॥ वर्जयित्वा कुलत्थानि काकमाची कपोतकम् । योगराज इतिख्यातो योगोऽयममृतोपमः ॥ ४७ ॥ रसायनमिदं श्रेष्ठं सर्वरोगहरं शिवम् । पाण्डुरोगं विषं कासं शोषं श्वासमरोचकम् ॥ ४८ ॥ विशेषाद्धन्त्यपस्मारं कामलां गुदजानि च ॥ ४९ ॥

त्रिफला, त्रिकुटा, चित्रक, विडङ्ग ३-३ भाग शुद्ध शिलाजीत रूपामाखी, सोनामाखी, लोहभस्म ५-५ भाग शक्कर ८ भाग लेकर सबका महीन चूर्ण कर शहद में मिलाकर लोहे के पात्र में रख ६-७ रोज चावल के ढेर में रखा रहने देवे, फिर निकाल कर रख लेवे। ३ माशे से १ तोले तक बलानुसार नित्यप्रति सेवन करने से, पाण्डु विषय का राजयक्ष्मा विषम ज्वर, कुष्ठ, अजीर्ण, प्रमेह, शोथ, श्वास, अरुचि, कामला बवासीर इनको यह दूर करता है, विशेष कर अपस्मार को नष्ट करता है। जीर्ण ज्वर में कुलथी मकोय कबूतर को त्याग इच्छानुसार भोजन करे। मात्रा २-४ रत्ती ॥ ४४-४९ ॥

### पञ्चषट्कमण्डूर ।

पंचकोलं समरिचं देवदारुफलत्रिकम् । विडङ्गमुस्त युक्ताश्च भागास्त्रिपलसम्मिताः ॥ ५० ॥ यावन्त्येतानि चूर्णानि मण्डूरं द्विगुणं ततः । पक्त्वा चाष्टगुणे मूत्रे घनीभूते तदुद्धरेत् ॥ ५१ ॥ ततो माषार्द्धमितं पिबेत्तक्रेण तक्रभुक् । पाण्डुरोगं जयत्येष मन्दाग्नित्वमरोचकम् ॥ ५२ ॥ अर्शांसि ग्रहणीदोषमूरुस्तम्भमथापि च । कृमिं प्लीहानमुदरं गलरोगञ्च नाशयेत् ॥५३॥ मण्डूरो यत्रनामायं रोगानीकविनाशनः निशोध्य बहुशो मूत्रे मण्डूरं ग्राह्यमिष्यते॥

-५४ ॥ ग्राहयन्त्यष्टगुणितं मूत्रं मण्डूरचूर्णतः ॥ ५५ ॥

गोमूत्र में शुद्ध किया हुआ मण्डूर का चूर्ण २४ तोले लेकर २ सेर ३२ तोले गोमूत्र में पकावे, गाढ़ा हो जाने पर उसमें पीपरि, पिपरामूल, चव्य, चीतामूल, सोंठ, मिरिच, देवदारु, आँवला, हर्र, बहेड़ा, वायविडङ्ग और नागरमोथा इन सबका चूर्ण १२ तोले मिलाकर चार-चार रत्ती की बटी बना लेवे। अनुपान—तक्र। भोजन भी तक्र के साथ करना चाहिये। इस नवायसमण्डूर का सेवन करने से पाण्डुरोग, अग्निमान्द्य, अरुचि, बवासीर, ग्रहणी, उरुस्तम्भ, कृमिरोग, प्लीहा, उदररोग और गलरोग आदि अनेक रोग नष्ट होते हैं॥ ५०-५२ ॥

## पुनर्नवादिमण्डूर।

पुनर्नवा त्रिवृच्छुण्ठी पिप्पली मरिचानि च। विडङ्गं देवकाष्ठञ्च चित्रकं पुष्कराह्वयम् ॥ ५६ ॥ त्रिफला द्वे हरिद्रे च दन्ती च चविका तथा। कुटजस्य फलं तिक्ता पिप्पलीमूलमुस्तकम् ॥ ५७ ॥ एतानि समभागानि मण्डूरं द्विगुणं ततः। गोमूत्रेऽष्टगुणे पक्त्वा स्थापयेत् स्निग्धभाजने। पाण्डुशोथोदरानाहशूलार्शः कृमिगुल्मनुत् ॥ ५८ ॥

शुद्ध मण्डूर का चूर्ण ४० तोले लेकर आठ गुने (४ सेर) गोमूत्र में पकावे। जब गाढ़ा हो जावे, तब इसमें सोंठी की जड़, निसोथ, सोंठ, पीपरि, मिरिच, वायविडङ्ग, देवदारु, चीता, कूठ, आँवला, हर्र, बहेड़ा, हरदी, दारुहरदी, दन्ती की जड़, चव्य, इन्द्रजौ, कुटकी, पिपरामूल और नागरमोथा इनमें से प्रत्येक का चूर्ण १ तोला मिलाकर उतार लेवे। तदनन्तर शीतल होने पर घी के चिकने पात्र में रख देवे। इसकी मात्रा २ रत्ती से १ माशे पर्यन्त। इसका सेवन करने से पाण्डुरोग, शोथ, उदररोग, आनाह, शूल, बवासीर, कृमिरोग और गुल्मरोग ये सब नष्ट होते हैं॥ ५६-५८ ॥

## पञ्चामृतलौहमण्डूर।

लौहं ताम्रं गन्धमभ्रं पारदञ्च समांशिकम्। त्रिकटु त्रिफला मुस्तं विडङ्गं चित्रकं तथा ॥ ५९ ॥ किरातं देवकाष्ठञ्च हरिद्राद्वयपुष्करम्। यमानी जीरयुग्मञ्च शटी धान्यकचव्यकम् ॥ ६० ॥ प्रत्येकं लौहभागञ्च श्लक्ष्णं चूर्णन्तु कारयेत्। सर्वचूर्णस्य चार्द्धांशं सुशुद्धं लौहकिट्टकम् ॥ ६१ ॥ गोमूत्रे पाचयेद्वैद्यो लौहकिट्टं चतुर्गुणे। पुनर्नवाष्टगुणितं काथं तत्र प्रदापयेत् ॥ ६२ ॥ सिद्धेऽवतारिते चूर्णं मधुनः पलमात्रकम्। भक्षयेत् प्रातरुत्थाय कोकिलाक्षानुपानतः ॥ ६३ ॥ ग्रहणीं चिरजां हन्ति सशोथां पाण्डुकामलाम्। अग्निञ्च कुरुते दीप्तं ज्वरं जीर्णं व्यपोहति ॥ ६४ ॥ प्लीहानं यकृतं गुल्ममुदरञ्च विशेषतः। कासं श्वासं प्रतिश्यायं कान्तिपुष्टिविवर्द्धनम् ॥ ६५ ॥

अत्र सर्वचूर्णसमांशं मण्डूरचूर्णमिति वृद्धाः। गोमूत्रपुनर्नवाक्वाथमण्डूराणां पाकः चूर्णानां प्रक्षेपः शीते च मधुनः।

लौहभस्म, ताम्रभस्म, गन्धक, अभ्रकभस्म, पारद, सोंठ, मिरिच, पीपरि, आँवला, हर्र, बहेड़ा, नागरमोथा, वायविडङ्ग, चीता, चिरायता, देवदारु, हरदी, दारुहरदी, कूठ, अजवाइन, स्याह जीरा, सफेद जीरा, कचूर, धनिया और चव्य, प्रत्येक का चूर्ण १ तोला और कुल मिलाकर जितने हों उसका आधा शुद्ध मण्डूर, किन्तु वृद्ध वैद्यों के मतानुसार कुल चूर्ण का समान भाग मण्डूर भस्म होनी चाहिये। मण्डूर

की अपेक्षा चौगुना गोमूत्र और अष्टगुण पुनर्नवा का क्वाथ होना चाहिये । गोमूत्र, पुनर्नवा का क्वाथ और मण्डूर इन तीनों को एकत्र पकावे जब गाढ़ा हो जाये तब उसमें पूर्वोक्त लोहभस्म आदि औषधों को डाले और उत्तम रूप से मिलाकर उतार लेवे । शीतल होने पर उसमें १ पल ( ४ तोला ) मधु मिलाकर रख देवे । मात्रा—३ रत्ती ॥ ६६-६५ ॥ नागरमोथा के पञ्चाङ्ग के क्वाथ अथवा स्वरस के साथ उपयुक्त मात्रा में प्रातःकाल सेवन करना चाहिये । इसका सेवन करने से पुरानी ग्रहणी, शोथयुक्त पाण्डुरोग और कामला, प्लीहा, यकृत, गुल्म, उदररोग, कास श्वास और प्रतिश्याय ये सब रोग नष्ट होते हैं । तथा अग्नि की दीप्ति, कान्ति और पुष्टि की वृद्धि होती है । मात्रा—१ २ रत्ती ॥ ६६-६५ ॥

### त्र्यूषणादिमण्डूर ।

त्र्यूषणं त्रिफला मुस्तं विडङ्गं चव्य-चित्रकौ । दार्वी त्वङ्माक्षिको धातुर्ग्रन्थिकं देवदारु च ॥ ६६ ॥ एषां द्विपलिकान् भागांश्चूर्णं कृत्वा पृथक्पृथक् । मण्डूरं द्विगुणं चूर्णाच्छुद्धमञ्जनसन्निभम् ॥ ६७ ॥ मूत्रे चाष्टगुणे पक्त्वा तस्मिंस्तु प्रक्षिपेत्ततः । उदुम्बरसमान् कृत्वा वटकांस्तान् यथाग्नि तु ॥ ६८ ॥ उपयुञ्जीत तक्रेण सात्म्यं जीर्णे च भोजनम् । मण्डूरवटकाह्येते प्राणदाः पाण्डुरोगिणाम् ॥ ६९ ॥ कुष्ठान्यरोचकं शोथमूरुस्तम्भं कफामयान् । अर्शांसि कामलां मेहान् प्लीहानं शमयन्ति च ॥ ७० ॥ निर्वाप्य बहुशो मूत्रे मण्डूरं ग्राह्यमिष्यते । ग्राहयन्त्यष्टगुणितं मूत्रं मण्डूरचूर्णत ॥ ७१ ॥

त्रिकटु, त्रिफला, मोथा, वायविडङ्ग, चव्य, चीता, दारुहल्दी, दालचीनी, सोनामाखी की भस्म, पिप्पलीमूल, देवदारु, हर एक द्रव्य १६ तोले, शुद्ध मण्डूर भस्म ४१ पल, गाय का मूत्र २२६ पल इनको विधि अनुसार पकाकर २ रत्ती प्रमाण की गोली बनावे । अनुपान—मठा (तक्र) । ये गोलियाँ पाण्डुरोगी को प्राणदायिनी हैं । इनके व्यवहार से कुष्ठ, अरुचि, शोथ ( सूजन), ऊरुस्तम्भ, कफरोग, अर्श, कामला, प्रमेह, प्लीहा आदि रोग नाश को प्राप्त होते हैं । इस क्रिया से पहले मण्डूर को कई बार गोमूत्र में बुझा लेना चाहिए ॥ ६६-७१ ॥

### चन्द्रसूर्य्यात्मक रस ।

सूतकं गन्धकं लोहमभ्रकञ्च पलं पलम् । शंखद्रुमराटञ्च प्रत्येकार्द्धपलं हरेत् ॥ ७२ ॥ गोक्षुरबीजचूर्णञ्च पलैकं तत्र दीयते । सर्वमेकीकृतं चूर्णं खल्वयन्त्रे विभावयेत् ॥ ७३ ॥ पटोलं पर्पटं भार्गी विदारी शतपुष्पिका । कुण्डली दण्डिनी वासा काकमाचीन्द्रवारुणी ॥ ७४ ॥ वर्षाभूः केशराजश्च शालिञ्चो द्रोणपुष्पिका । प्रत्येकार्द्धपलैर्द्रवैर्भावयित्वा वटीं कुरु ॥ ७५ ॥ चतुर्गुञ्जामितां खादेच्छागीदुग्धानुपानतः । गहनानन्दनाथोक्तश्चन्द्रसूर्य्यात्मको रसः ॥ ७६ ॥ हलीमकं निहन्त्याशु पाण्डुरोगञ्च कामलाम् । जीर्णज्वरं सविषमं रक्तपित्तमरोचकम् ॥ ७७ ॥ शूलं प्लीहोदरानाहमष्ठीलागुल्मविद्रधीन् । शोथं मन्दानलं कासं श्वासं हिक्कां वमिं भ्रमिम् ॥ ७८ ॥ भगन्दरोपदंशौ च दद्रूकण्डूव्रणापचीः । दाहं तृष्णामुरुस्तम्भमामवातं कटीग्रहम् ॥ ७९ ॥ युक्त्या मद्येन मण्डेन युवूषपेण वारिणा । गुडूचीत्रिफलारास्नाक्वाथनीरेण वा क्वचित् ८० ॥

पारा, गन्धक, लोहभस्म और अभ्रकभस्म प्रत्येक ४ तोले, शंखभस्म, सोहागा की खील, हीरीभस्म, प्रत्येक २ तोले, गोखरू के बीजों का

चूर्ण ४ तोले इन कुल औषधों को एकत्रित कर परवल के पत्ते, पित्तपापड़ा, भारंगी, विदारीकन्द, सौंफ, गिलोय, कृष्णोत्पल, अडूसा, मकोय, इन्द्रायण की जड़, मौंडी, भाँगरा, शालिञ्चशाक और गूमा इनमें से प्रत्येक औषध के दो दो तोले रसों से वाष्पयन्त्र में भावना देकर एक २ रत्ती की वटी बनावे। १४ दिन पर्यन्त प्रतिदिन एक-एक वटी बकरी के दूध के साथ खाना चाहिये। इसका आविष्कार गहनानन्दजी ने किया था। इस चन्द्रसूर्यात्मक रस के सेवन करने से हलीमक, पाण्डुरोग, कामला, जीर्णज्वर, विषमज्वर, रक्तपित्त, अरोचक, शूल, प्लीहा, उदररोग, आनाह, अष्ठीला, गुल्म, विद्रधि, शोथ, अग्निमान्द्य, कास, श्वास, हिचकी, वमन, भ्रमरोग, भगन्दर, उपदंश, दद्रु, कण्डू, व्रण, अपची, दाह, तृष्णा, उरुस्तम्भ, आमवात और कटीशूल आदि नाना रोग नष्ट होते हैं। प्रत्येक रोग में दोष आदि विचारकर मद्य, मण्ड ( माड़ ), मूँग का जूस, जल, गिलोय का क्वाथ, त्रिफला का क्वाथ और रास्ना का क्वाथ इनमें से किसी एक के साथ सेवन कराना चाहिये ॥ ७२-८० ॥

प्राणवल्लभ रस।

हिंगुलसम्भवं सूतं गन्धं काश्मीरसम्भवम्। लौहं ताम्रं वराटीञ्च तुत्थं हिंगुफलत्रयम् ॥ ८१ ॥ स्नुहीमूलं यवक्षारं जैपालं टङ्कनं त्रिवृत्। प्रत्येकन्तु समं भागं छागीदुग्धेन भावयेत् ॥ ८२ ॥ गुञ्जैकां च वटीं खादेद्वारिणा मधुना सह। प्राणवल्लभनामायं गहनानन्दभाषितः ॥ ८३ ॥ श्लेष्मदोषञ्च संवीक्ष्य युक्त्या वा गुटिवर्द्धनम्। निहन्ति कामलां पाण्डुमानाहं श्लीपदं तथा ॥ ८४ ॥ गलगण्डं गण्डमालां कृच्छ्राणि च हलीमकम्। शोथं शूलमुरुस्तम्भं संग्रहग्रहणीं तथा ॥ ८५ ॥ हन्ति मूर्च्छां वमिं हिक्कां कासं श्वासं गलग्रहम्। असाध्यं सन्निपातञ्च जीर्णज्वरमोचकम् ॥ ८६ ॥ जलदोषभवं शोथं महोग्रञ्च जलोदरम्। नातः परतरः श्रेष्ठः कामलार्त्तिरुजापहः ॥ ८७ ॥

हिंगुल का निकाला पारा, आँवलासार गन्धक, लोहभस्म, ताम्रभस्म, कौड़ीभस्म, तूतिया, हींग, आँवला, हर्रं, बहेड़ा, थूहर की जड़, यवक्षार, जमालगोटा, सोहागा की खील और निसोथ इन सब औषधों को एकत्र कर बकरी के दूध की भावना देकर घोटना चाहिये। तदनन्तर एक एक रत्ती की गोलियाँ बना लेवे अनुपान—मधु और जल। यह गहनानन्दजी का कहा हुआ प्राणवल्लभ नामक रस है। यदि रोगी को कफ अधिक हो तो विचार कर क्रमशः मात्रा बढ़ा देवे। इसका सेवन करने से कामलापाण्डुरोग, आनाह, श्लीपद, गलगण्ड, गण्डमाला, मूत्रकृच्छ्र, हलीमक, शोथ, शूल, उरुस्तम्भ, संग्रहग्रहणी, मूर्च्छा, वमन, हिचकी, कास, श्वास, गलग्रह, असाध्य सन्निपात, जीर्णज्वर, अरुचि, जलदोषजन्य शोथ, महान् उग्र जलोदर आदि रोग नष्ट होते हैं। कामला नष्ट करने के लिये इससे उत्तम और कोई औषध ही नहीं है ॥ ८१-८७ ॥

पञ्चानना वटी।

शुद्धसूतं समंगन्धं मृतताम्राभ्रगुग्गुलु। जैपालबीजतुल्यञ्च घृतेन गुटिकीकृतम् ॥ ८८ ॥ भक्षयेदर्धगुञ्जाभं शोथपाण्डुप्रशान्तये। पञ्चाननवटी ख्याता पाण्डुरोगकुलान्तिका ॥ ८९ ॥

अत्र सर्वसमं जैपालम्। घृतेन प्रहरं संमर्द्य स्निग्धभाण्डे संस्थाप्य वटराण्डप्रमाणं भक्षयेत्। द्रोणपुष्पीरसमनुपिबेत्।

शुद्ध पारा, गन्धक, ताम्रभस्म, अभ्रकभस्म और गूगुल इन कुल औषधों को सम भाग लेवे और कुल औषधों के समुदाय के बराबर जमालगोटा लेकर घृत के साथ एक प्रहर पर्यन्त घोटकर आधी रत्ती के बराबर गोलियाँ बनाकर घृत के

चिकने बासन में रख छोड़े । गूमा के रस के साथ इस प्रसिद्ध पञ्चामृता वटी का सेवन करने से पाण्डुरोग और शोथ रोग नष्ट होते हैं ॥ ८१-८२ ॥

### पाण्डुसूदन रस ।

रसगन्धं मृतं ताम्रंजयपालञ्चगुग्गुलु । समांशमाज्यसंयुक्तां गुडिकां कारयेद्भिषक् ॥ ९० ॥ एकैकां खादयेद्वैद्यः पाण्डुशोथापनुत्तये । शीतलञ्च जलञ्चाम्लं वर्जयेत्पाण्डुसूदने ॥ ९१ ॥

पारा, गन्धक, ताम्रभस्म, जमालगोटा और, गूगुल समभाग इन कुल औषधों को लेकर घृत के साथ घोटकर दो-दो रत्ती की गोलियाँ बना लेवे। इसका सेवन करने से पाण्डु और शोथ रोग नष्ट होते हैं । इस रस का सेवन करनेवाले रोगी को शीतल जल और खट्टे पदार्थ सेवन न करने चाहिये ॥ ९०-९१ ॥

### पाण्डुपञ्चानन रस ।

लोहमभ्रञ्च ताम्रञ्च प्रत्येकं पलसम्मितम् । त्रिकटु त्रिफला दन्ती चविकं कृष्णजीरकम् ॥ ९२ ॥ चित्रकञ्च निशे द्वे च त्रिवृता माणमूलकम् । कुटजस्य फलं तिक्ता देवदारु वचा घनम् ॥ ९३ ॥ प्रत्येकमेषां कर्षन्तु निक्षिपेत्प्राकविद्भिषक् । सर्वस्य द्विगुणं देयं शुद्धमण्डूरचूर्णकम् ॥ ९४ ॥ गोमूत्रेऽष्टगुणे पक्त्वा सिद्धे शीततां गते । भक्षयेत् प्रातरुत्थाय उष्णतोयानुपानतः ॥ ९५ ॥ हलीमकं शोथपाण्डुमूरुस्तम्भञ्च नाशयेत् । रसायनवरश्चैष बलवर्णाग्निकारकः । यकृतं प्लीहगुल्मञ्च सर्वरोगहरः परः ॥ ९६ ॥

लोहभस्म, अभ्रकभस्म और ताम्रभस्म प्रत्येक ४ तोले, त्रिकटु ( सोंठ, मिरिच और पीपरि ) त्रिफला, जमालगोटा की जड़, चव्य, कालाजीरा, चीता का मूल, हलदी, दारुहलदी, निशोथ, मानकन्द का मूल, इन्द्रजौ, कुटकी, देवदारु, वच और नागरमोथा प्रत्येक १ तोला, कुल औषधों से दूना शुद्ध मण्डूर, भस्म मण्डूर से आठ गुना गोमूत्र लेवे । पहिले मण्डूर को गोमूत्र में पकावे, पाक सिद्ध होने पर उसमें पूर्वोक्त लोहभस्म और अभ्रक आदि औषधों को मिला देवे । इसको पाण्डुपञ्चानन रस कहते हैं । प्रातःकाल उष्ण जल के साथ इसका सेवन करना चाहिये । इसका सेवन करने से हलीमक, शोथ, पाण्डु, उरुस्तम्भ, यकृत, प्लीहा और गुल्म आदि अनेक रोग नष्ट होते हैं । तथा बल, वर्ण और अग्नि की वृद्धि होती है, यह श्रेष्ठ रसायन है । मात्रा—१ रत्ती ॥ ९२-९६ ॥

### आनन्दोदय रस ।

पारदं गन्धकं लौहमभ्रकं विषमेव च । समांशं मरिचं चाष्टगुणं दद्यं चतुर्गुणम् ॥ ९७ ॥ भृङ्गराजरसैः सप्त भावनाश्चाम्लदाडिमैः । गुञ्जाद्वयं पर्णखण्डे खादेत् सायं निहन्ति च ॥ ९८ ॥ वातश्लेष्मभवान् रोगान् मन्दाग्निं ग्रहणीं ज्वरान् । अरुचिं पाण्डुताञ्चैव जयेदचिरसेवनात् ॥ ९९ ॥ नष्टमग्निं करोत्येष कालभास्करतेजसम् । पार्वतोऽपि हि जीर्य्येत मात्रानादस्य देहिनः । गुर्वन्नमम्लमापञ्च भक्षणादेव जीर्य्यति ॥ १०० ॥

पारा, गन्धक, लोह अभ्रक और विष प्रत्येक एक तोला, कालीमिरिच ८ तोले और सोहागा फूला हुआ ४ तोले, इनको एकत्र घोटकर भँगरैया के रस में और खट्टे अनार के रस में सात-सात भावना देकर दो-दो रत्ती की

"पार्वतोऽपि हि जीर्य्येत" यह उल्लेख केवल अग्निवृद्धि को सूचित करने के लिये किया गया है इससे यह तात्पर्य नहीं है कि इस रस का सेवन करने से पत्थर पच जाता है ।

गोलियाँ बनावे। पान के पत्ता में रखकर २ रत्ती की मात्रा में इस रस को सायंकाल सेवन करना चाहिये। यह रस सेवन करने से सब प्रकार के वात-कफजन्य रोग, अग्निमान्द्य, ग्रहणी, ज्वर, अरुचि और पाण्डुरोग शीघ्र नष्ट करता है तथा नष्ट अग्नि को प्रलयकाल के सूर्य के समान-दीप्त करता है। इस रस का सेवन करने से पर्वत का पत्थर भी पच सकता है, फिर गुरुपाक अन्न, खट्टे पदार्थ और उर्द आदि तो भोजन करते ही पच जाते हैं, इसमें संदेह ही क्या है ॥ ६९-१०० ॥

## पुनर्नवा तैल।

पुनर्नवापलशतं जलद्रोणे विपाचयेत्। तेन पादावशेषेण तैलप्रस्थं विपाचयेत् ॥ १०१ ॥ त्रिकटु त्रिफला भृङ्गी धन्याकं कट्फलं तथा। शटी दारु प्रियङ्गुश्च देवदारुहरेणुभिः॥ १०२ ॥ कुष्ठं पुनर्नवामूलं यमानी कारवी तथा। एलात्वचं पद्मकञ्च पत्रं नागरकेशरम् ॥ १०३ ॥ एषाञ्च कार्षिकं कल्कं पेषयित्वा विनिक्षिपेत्। कामलां पाण्डुरोगञ्च हलीमकमथापि वा ॥ १०४ ॥ रक्तपित्तं प्रमेहाश्च कासं श्वासं भगन्दरम्। प्लीहानमुदरञ्चैव ज्वरं जीर्णं व्यपोहति॥ १०५ ॥ कुरुते च परां कान्तिं प्रदीपयति चानलम्। तैलं पौनर्नवं नाम मलव्याधीन् नियच्छति ॥ १०६ ॥

५ सेर पुनर्नवा को २५ सेर ४८ तोला जल में पकावे। ६ सेर ३२ तोला जल शेष रहने पर उसमें १२८ तोला तिल का तेल मिलावे, तदनन्तर त्रिकटु, त्रिफला, काकड़ासिंगी, धनियां, कायफल, कचूर, दारुहल्दी, फूलप्रियंगु, देवदारु, सँभालू के बीज, कूठ, पुनर्नवा की जड़, अजवायन, कलौंजी, इलायची, दालचीनी, पदुमकाठ, तेजपात और नागकेसर इनमें से प्रत्येक द्रव्य को एक एक तोले लेकर कल्क बनावे, इस कल्क को भी क्वाथ में मिलाकर यथाविधि पाक करे, तैलमात्र शेष रहने पर छानकर रख लेवे। इस पौनर्नवतैल का मर्दन करने से पाण्डुरोग, हलीमक, रक्तपित्त, प्रमेह, कास, श्वास, भगन्दर, प्लीहा, उदररोग, जीर्णज्वर और हर प्रकार के मलजन्य रोग नष्ट होते हैं, तथा कान्ति की वृद्धि और अग्नि का दीपन होता है ॥ १०१-१०६ ॥

## मूर्वाद्य घृत।

मूर्वातिक्तानिशायासकृष्णाचन्दनपर्पटैः। त्रायन्तीवत्सभूनिम्बपटोलाम्बुददारुभिः ॥ १०७ ॥ अक्षमात्रैर्घृतप्रस्थं सिद्धं क्षीरचतुर्गुणम्। पाण्डुताज्वरविस्फोटशोथार्शोरक्तपित्तनुत् ॥ १०८ ॥

घी दो सेर, दूध ६ सेर ३२ तोला, जल २५ सेर ४८ तोला, मूर्वा, कुटकी, हल्दी, जवासा, पीपरि, लालचन्दन, पित्तपापड़ा, त्रायमाणा, कुड़ा की छाल, चिरायता, परवल के पत्ते नागरमोथा और देवदारु; इनमें से प्रत्येक औषध को एक एक तोला लेकर कल्क बनावे। तदनन्तर घी, दूध, जल और कल्क इनको एकत्रित कर यथाविधि पाक करें। मात्रा ६ मासे से १ तोला तक। इस घृत का सेवन करने से पाण्डु रोग, ज्वर, विस्फोट, शोथ, बवासीर, और रक्तपित्त ये सब रोग नष्ट होते हैं ॥ १०७-१०८ ॥

## व्योषाद्य घृत।

व्योषं बिल्वं द्विरजनी त्रिफला द्विपुनर्नवम्। मुस्तान्ययोरजः पाठा विडङ्गं देवदारु च ॥ १०९ ॥ वृश्चिकाली च भार्गी च सक्षीरैस्तैः शृतं घृतम्। सर्वान् प्रशमयत्येतद्विकारान् मृत्तिकाकृतान् ॥ ११० ॥

घृत २ सेर, दूध ८ सेर, कल्क के लिये सोंठ,

मिर्च, पीपरि, बेल की छाल, हरदी, दारुहलदी, त्रिफला, श्वेत पुनर्नवा, रक्त पुनर्नवा, नागरमोथा, लोहभस्म, पाढ़ी, वायविडङ्ग, देवदारु, बिछुआ घास और भारङ्गी ये कुल द्रव्य मिलकर १ सेर तथा पाकार्थ जल ३२ सेर, घृत, दूध, कल्क और जल इनको एकत्रित कर यथाविधि पाक करे। मात्रा ½।। तोला। इसका सेवन करने से मृत्तिकाभक्षणजन्य सब प्रकार के रोग नष्ट होते हैं॥ १०६-११०॥

### योगराज।

त्रिफलायास्त्रयो भागास्त्रयस्त्रिकटुकस्य च। भागाश्चित्रकमूलस्य विडङ्गानां तथैव च॥ १११॥ पञ्चाश्मजतुनो भागास्तथा रूप्यमलस्य च। माक्षिकस्य विशुद्धस्य लौहस्य रजसस्तथा॥ ११२॥ अष्टौ भागाः सितायाश्च तत्सर्वं श्लक्ष्णचूर्णितम्। माक्षिकेणाप्लुतं स्थाप्यमायसे भाजने शुभे॥ ११३। चतुर्गुञ्जामितां मात्रां ततः खादेद् यथाग्निना। दिने दिने प्रयोगेण जीर्णे भोज्यं यथेप्सितम्॥ ११४॥ वर्जयित्वा कुलत्थांश्च काकमाचीकपोतकान्। योगराज इति ख्यातो योगोऽयममृतोपमः॥ ११५॥ रसायनमिदं श्रेष्ठं सर्वरोगहरं परम्। पाण्डुरोगं विषं कासं यक्ष्माणं विषमज्वरम्॥ ११६॥ कुष्ठान्यजरकं मेहं श्वासं हिक्कामरोचकम्। विशेषाद्धन्त्यपस्मारं कामलां गुदजानि च ११७

त्रिफला ( हर्रे, बहेड़ा, आँवला, ) मिला हुआ ३ भाग, त्रिकटु ( सोंठ, मिर्च, पीपरि ) मिला हुआ ३ भाग, चित्रकमूल १ भाग, वायविडङ्ग १ भाग, शिलाजीत ५ भाग, रूपा मक्खी की भस्म ५ भाग लोह ८ भाग, इन्हें अतिसूक्ष्म चूर्ण कर शहद मिलाकर लोहे के बासन में रक्खे। मात्रा—४ रत्ती। औषधि के सेवनकाल में कुलथी, मकोय तथा कबूतर का मांस इत्यादि त्याज्य है। यह रसायन अमृत के समान गुण करनेवाला है। इसको प्रयोग में लाने से पाण्डु, विष, कास, राजयक्ष्मा, पुराना बुखार, कुष्ठ, अजीर्ण, प्रमेह, श्वास, हिक्का ( हिचकी ), अरुचि, अपस्मार, कामला तथा अर्श ( बवासीर ) आदि रोग नष्ट होते हैं॥ १११-११७॥

### आमलक्यवलेह।

रसामलकानान्तु संशुद्धं यन्त्रपीडितम्। द्रोणं पचेत मृद्वग्नौ तत्र चेमानि दापयेत्॥ ११८॥ चूर्णितं पिप्पलीप्रस्थं मधुकं द्विपलं तथा। प्रस्थं गोस्तनिकायाश्च द्राक्षायाः किल पेषितम्॥ ११९॥ शृङ्गवेरपले द्वे तु तुगाक्षीर्याः पलद्वयम्। तुलार्द्धं शर्करायाश्च घनीभूतं समुद्धरेत्॥ १२०॥ मधु प्रस्थसमायुक्तं लेहयेत् पलसम्मितम्। हलीमकं कामलाञ्च पाण्डुत्वञ्चापकर्षति॥ १२१॥

आँवले के २५ सेर ४८ तोले का रस मंद अग्नि से पकाकर, उसमें पीपल का चूर्ण ६४ तोला, मुलहठी का चूर्ण ८ तोला, दाख ६४ तोला, सोंठ ८ तोला, वंशलोचन ८ तोला, खाँड़ २॥ सेर, इनके चूर्ण को उपर्युक्त पाक में ऊपर से मिलावे अर्थात् प्रक्षेप दे। गाढ़ा होने पर उतार ले और ठण्ढा होने पर ६४ तोला शहद मिलाकर रोगी को सेवन करावे। मात्रा ½ तोले से १ तोले तक। इसके सेवन करने से हलीमक, कामला तथा पाण्डु आदि रोग शान्त होते हैं॥ ११८-१२१॥

### धात्र्यरिष्ट

धात्रीफलसहस्रे द्वे पीडयित्वा रसं भिषक्। क्षौद्राष्टभागं पिप्पल्याश्चचूर्णार्द्धकुडवान्वितम्॥ १२२॥ शर्करार्द्धतुलोन्मिश्रं पक्षं स्निग्धघटे स्थितम्। भावयेत् पाण्डुरोगार्त्तो जीर्णे हितमिताशनः॥

१२३ ॥ कामलापांडुहृद्रोगवातासृग्विषमज्वरान् । कासहिक्कारुचिश्वासानेषोऽरिष्टः प्रणाशयेत् ॥ १२४ ॥

२००० आँवले का रस निचोड़कर निकाले। इस रस में पीपल १६ तोले, और खाँड २॥ सेर मिलाकर पकावे। खाँड के घुल जाने पर उसे नीचे उतार ले और ठण्डा होने पर चिकने मिट्टी के बर्तन में मुख बन्द करके रख दे। जब अरिष्ट तैयार हो जावे तब निकालकर काम में लावे। इस अरिष्ट के व्यवहार करने से पाण्डु, हृद्रोग, वातरक्त, विषमज्वर, खाँसी, हिक्का, हिचकी, अरुचि, श्वास आदि रोग नाश को प्राप्त होते हैं। मात्रा 1½ तोले से २½ तोले तक ॥१२२-१२४॥

### पर्पटाद्यरिष्ट।

रक्तपुष्पतुलामेकां चतुर्द्रोणाम्भसा पचेत् । चतुर्भागावशिष्टेऽस्मिन् क्वाथे शीते तुलाद्वयम् ॥ १२५ ॥ दद्याद् गुडस्य धातक्याः पलान् षोडशसम्मितान् । अब्दामृतादारुनिशाः दारुव्याघ्रीयवासकाः ॥ १२६ ॥ चविका वह्निमूलञ्च विडङ्गव्योषमेव च। सर्वाण्येतानि संचूर्ण्य पलभागैस्तु निक्षिपेत् ॥ १२७ ॥ विश्राम्य च ततो भाण्डे मासादूर्ध्वं पिबेद्बुधः । कामलामुदरप्लीहाः गुल्मं पाण्डुहलीमकम् ॥ १२८ ॥ प्लीहयकृच्छोथरक्तविकारान् विषमज्वरान् । एषोऽरिष्टो निहन्त्याशु वृक्षमिन्द्राशनिर्यथा ॥ १२९ ॥

पित्तपापड़ा ५ सेर, पानी ८ द्रोण (२ मन ३२ सेर ३२ तोला), यथाविधि काढ़ा बनावे। जब २ द्रोण (२१ सेर ४८ तोला) शेष रहे तब उतारकर ठण्डा कर ले, फिर छानकर उसमें गुड़ २ तुला १० सेर, धाय के फूल १६ पल (६४ तोला), मोथा, गिलोय, दारुहल्दी, देवदार, छोटी कटेरी, दुरालभा, चाब, चित्रकमूल, बायबिडङ्ग, त्रिकटु (सोंठ, मिर्च, पीपरि), इनको चार चार तोला ले और चूर्ण कर उपर्युक्त काढ़े में प्रक्षेप देकर एक मिट्टी के बर्तन में मुख बन्द करके रख दे। एक महीना बाद निकालकर काम में लावे। इसके सेवन से कामला, उदररोग, प्लीहा, गुल्म, पाण्डु, हलीमक, प्लीहा, यकृत, (जिगर), शोथ (सूजन), रक्तविकार तथा विषमज्वर आदि अल्पकाल में दूर होते हैं। मात्रा 1½ तोले से २½ तोले तक ॥ १२५-१२९ ॥

### पाण्डुरोग में पथ्य।

छर्दिर्विरेचनं जीर्ण यवगोधूम शालयः । मुद्गाढकीमसूराणां यूषाजाङ्गलजा रसाः ॥ १३० ॥ पटोलं वृद्धकूष्माण्डं तरुणं कदलीफलम् । जीवन्ती क्षुद्रमत्स्याक्षी गुडूची तण्डुलीयकम् ॥ १३१ ॥ पुनर्नवा द्रोणपुष्पी वार्ताकुं लशुनद्वयम् । पक्काम्रमभया बिम्बी शृङ्गी मत्स्या गवां जलम् ॥ १३२ ॥ धात्री तक्रं घृतं तैलं सौवीरकतुषोदके । नवनीतं गन्धसारो हरिद्रा नागकेशरम् ॥ १३३ ॥ यवक्षारो लोहभस्म कषायाणि च कुङ्कुमम् । दाहश्चरणयोः सन्धौ नाभेश्च द्व्यंगुलादधः ॥ १३४ ॥ मस्तके हस्तयोर्मूले मध्ये च स्तनकक्षयोः । यथादोषमिदं पथ्यं पाण्डुरोगवतां भवेत् ॥ १३५ ॥

वमन, विरेचन, पुराने जौ, गेहूँ, शालि चावल, मूँग, अरहर, मसूर का पानी, जङ्गली पक्षियों के मांस का रस, परवल, पका पेठा कच्चा केला, जीवन्तीशाक, तालमखाना, मकोय, गिलोय, चौलाई, पुनर्नवा, गोभा, बैंगन, दोनों तरह का लहसन, पका आम, हरड़, बिम्बी, काकड़ासिंगी, मछली, गोमूत्र, आँवला, मट्ठा, घी, तेल, सौवीर, तुषोदक, मक्खन, चन्दन, हल्दी, नागकेशर, यवक्षार, लोहभस्म, क्वाथ, केशर, पैरों में, जोड़ों पर, नाभि से दो अङ्गुल

पीठे, माथे पर, हाथों की जड़ में, स्तन और कमर के मध्यप्रदेश में दाह करना उपयुक्त है ये ही पथ्य हैं ॥ १३०-१३५ ॥

अपथ्य ।

रक्तस्रुतिं धूमपानं वमिवेगविधारणम् । स्वेदनं मैथुनं शिम्बी पत्रशाकानि रामठम् ॥ १३६ ॥ माषोऽम्बुपानं पिण्याकस्ताम्बूलं सर्षपाः सुरा । मृद्भक्षणं दिवास्वप्नं तीक्ष्णानि लवणानि च ॥१३७॥ सह्यविन्ध्याद्रिजातानां नदीनां सलिलानि च । सर्वाण्यम्लानि दुष्टाम्बुविरुद्धान्यशनानि च ॥ १३८ ॥ गुर्वन्नञ्च विदाहीनि पाण्डुरोगवतां विषम् । वह्निमातपमत्यासमनपानञ्च विषलम् । मैथुनं क्रोधमध्वानं पाण्डुरोगी सदा त्यजेत् १३९

इति भैषज्यरत्नावल्यां पाण्डुकामलाहलीमकाधिकार समाप्तः ।

रक्त मोक्षण, धूमपान, के रोकना, पसीना, मैथुन, मटर आदि शिम्बीधान्य, सरसों, आदि पत्तों के शाक, हींग, उड़द, बहुत पानी पीना, तिलखल, सरसों, मदिरा, पान, मिट्टी खाना, दिन में सोना, तीक्ष्ण पदार्थ लाल मिर्च आदि अम्ल, दुष्ट पानी, विरुद्ध भोजन, भारी अन्न, दाहयुक्त वस्तुएँ, उपर्युक्त सम्पूर्ण बातें पाण्डुरोगी को विषतुल्य हैं। अग्नि तापना, धूप में परिश्रम करना, क्रोध, मैथुन, पैदल पथगमन, पाण्डुरोगी को सदैव इनका त्याग रखना चाहिए ॥ १३६-१३९ ॥

इति सरयूप्रसादत्रिपाठिकृतायां भैषज्यरत्नावल्यां रामप्रभाऽभिधायां व्याख्यायां पाण्डुकामला-हलीमकाधिकार समाप्त ॥

# अथ शोथाधिकारः ।

शोथचिकित्सा ।

लङ्घनं पाचनं शोथे शिरः कायविरेचनम् । वमनञ्च यथासत्त्वं यथादोषं प्रकल्पयेत् ॥ १ ॥

शोथरोग में दोष तथा सत्व विचारकर लङ्घन, पाचन, नस्य, विरेचन और वमन कराना चाहिये ॥ १ ॥

स्नेहोऽथ वातिके शोथे बद्धविट्के निरूहणम् । पयोघृतं पैत्तिके तु कफजे रूक्षणक्रमः ॥ २ ॥

वातजन्य शोथरोग में स्नेहनक्रिया, मलबद्धता रहने पर निरूहण, अर्थात् पिचकारी देकर कोष्ठ को स्वच्छ करना, पैत्तिक शोथ में दुग्ध और घृत पिलाना तथा कफजन्य शोथरोग में रूक्षक्रिया करनी चाहिये ॥ २ ॥

शोथ में लङ्घन आदि ।

अथामजं लङ्घनपाचनक्रमैर्विशोधनैरुल्बणदोषमादितः । शिरोगतं शीर्षविरेचनैरधोविरेचनैरूर्ध्वहरैस्तथोर्ध्वगम् ॥ ३ ॥ उपाचरेत्स्नेहभवं विरूक्षणैः प्रकल्पयेत् स्नेहविधिञ्च रूक्षजे ॥ ४ ॥

आमजन्य शोथरोग में लंघन और पाचनक्रिया, शोथरोग में यदि दोष अत्यन्त प्रबल हों तो शोधनक्रिया, मस्तकगत शोथरोग में नस्य, देह के अधोभाग में शोथ हो तो विरेचन और शरीर के ऊर्ध्वभाग में शोथ हो तो वमनकारक औषधों का प्रयोग करना चाहिये। इसी प्रकार घृत और तैल आदि स्निग्ध पदार्थों के सेवन करने से उत्पन्न हुये शोथरोग में रूक्षक्रिया और सावाँ, कोदो आदि रूक्ष पदार्थों के सेवन से उत्पन्न हुये शोथ में स्नेहनक्रिया आरामदायक होती है ॥ ३-४ ॥

शोथरोग में मुष्टियोग ।

दशमूलं सदा शस्तं वातशोथे विशेषतः । वातजे तैलमैरण्डं विड्ग्रहे पयसा पिबेत् ॥ ५ ॥

वातजन्य शोथरोग में दशमूल का क्वाथ लाभदायक होता है । यदि वातज शोथरोग में मलबद्धता हो तो दूध के साथ एरण्ड का तैल पिलाना चाहिये ॥ ५ ॥

गोमूत्रस्य प्रयोगो वा शीघ्रं श्वयथुनाशनः । यवागूर्माणकन्दस्य माषशश्चातिशोथजित् ॥ ६ ॥

गोमूत्र अथवा पुराने मानकन्द की यवागू पीने से शीघ्र शोथ नष्ट होता है ॥ ६ ॥

सिंहास्यादि क्वाथ ।

सिंहास्यामृतभण्टाकी क्वाथं कृत्वा समाक्षिकम् । पीत्वा शोथं जयेज्जन्तुः श्वासं कासं ज्वरं वमिम् ॥ ७ ॥

अडूसा की छाल, गिलोय और कटेरी इनके क्वाथ में मधु मिलाकर पीने से शोथ, श्वास, कास, ज्वर और वमन ये सब रोग नष्ट होते हैं ॥ ७ ॥

पुनर्नवाष्टक क्वाथ ।

पुनर्नवानिम्बपटोलशुण्ठीतिक्तामृतादार्व्यभयाकषायः । सर्वाङ्गशोथोदरपार्श्वशूलश्वासान्वितं पाण्डुगदं निहन्ति ॥८॥

सोंठी, नीम की छाल, परवल के पत्ते, सोंठ, कुटकी, गुरुच, दारुहल्दी और हर्र ; इन कुल द्रव्यों का क्वाथ सेवन करने से सर्वाङ्ग का शोथ, उदर और पसलियों की पीडा और श्वाससहित पाण्डुरोग नष्ट होता है ॥ ८ ॥

पुनर्नवादि ।

पुनर्नवाविश्व त्रिवृद्गुडूचीशम्पाकपथ्यामरदारुकल्कम् । शोथे कफोत्थे महिषाक्षयुक्तंमूत्रं पिबेद्वासलिलं तयोवा ॥९॥

पुनर्नवा, सोंठ, निशोत, गिलोय, अमलतास का गूदा, हरड़, देवदारु, इन सबको इकट्ठा पीसकर गोमूत्र और गुगुल के साथ पीना चाहिए या उपर्युक्त द्रव्यों के काढ़े में गुग्गुल और गोमूत्र को ऊपर से मिलाकर ( प्रक्षेप देकर ) पीना कफ से उत्पन्न शोथ में लाभदायक है ॥ ९ ॥

शोथरोग पर मुष्टियोग ।

निम्बपत्ररसं पीतं शोफघ्नं श्वयथौ त्रिजे । विट्सङ्गे चैव दुर्नाम्नि विदध्यात् कामलासु च ॥ १० ॥

संशोधनं लंघनमस्रमोक्षः स्वेदः प्रलेपः परिषेचनं च। पुरातनाः शालियवाः कुलत्था मुद्गाश्च गोधा शिखिशल्लकोऽपि ॥ १७९ ॥ भुजंगभुक्तित्तिरताम्रचूडलावादयो जांगलविष्किराश्च। कूर्मोऽपि मद्गुर्मधुराणसर्पिस्तक्रं सुरा माक्षिकमासवं च ॥ १८० ॥ निष्पावकाठिल्लककर्कशिग्रुरसोनकर्कोटकबालमूलं। सुवर्चलाशृंजनकं पटोलं वेत्राग्रधात्रीफलमूलकानि ॥१८१॥ पुनर्नवाचित्रकपारिभद्रश्रीपर्णिनिम्बेंगुदपल्लवानि एरंडतैलं कटुका हरिद्रा हरीतकी क्षारनिषेवणं च ॥ १८२ ॥ मूत्राणि गोजामहिषीनवानि कस्तूरिका चापि शिलाजतूनि। यत्पांडुरोगेष्वपि वह्निकर्म पुरा प्रदिष्टं हि तदेव चापि ॥ १८३॥ यथामलं पथ्यमिदं प्रयुक्तं शोथामयान्संत्वरमुच्छिनत्ति ॥ १८४ ॥

शोधन, लंघन, रुधिर निकालना, पसीना निकालना, लेप, परिषेचन ( तरडे देना ), पुराने चावल, जौ, कुलथी, मूँग, गोह, साही, मोर, तीतर, मुर्गा, लवा आदि जंगली जीवों का मांस, तथा विष्किर जीव ( कुरेदकर खानेवाले कबूतर आदि ), कछुवा, मंगी मछली, पुराना घी, छाछ, सुरा, शहद, आसव ( द्राक्षासव आदि ), चौरा करेले, लाल सहजना, लहसन, ककोड़ा, नई पतली मूली, हुलहुल, गाजर, परवल, बेंत की कोपल, आमले, जड़वाले पदार्थ, पुनर्नवा, चित्रकी, फरहद, खँभारी, नीम, तालमखाने के पत्ते, अंडी का तेल, कुटकी, हल्दी, हर, जवाखार आदि ( भिलावे, गुग्गुल, लोह, कड़वे, तीक्ष्ण, दीपन पदार्थ ) का सेवन। गौ, बकरी, भैंस का नवीन मूत्र, कस्तूरी, शिलाजीत एवम् पाण्डुरोग में कथित पथ्य, दागना ये सब पथ्य हैं[१] ॥ १७९-१८४ ॥

शोथ में अपथ्य।

पिष्टान्नमुष्णं लवणानि मद्यं मृदं दिवास्वप्नमजाङ्गलञ्च। पयो गुडं तैलमथो गुरूणि शोथं जिघांसुः परिवर्जयेच्च ॥ १८५ ॥

पिट्ठी के बने खाने के पदार्थ, गरम भोजन, नमक, शराब, मिट्टी, दिन में सोना, जाङ्गल मांस के सिवाय आनूप आदि मांस, अधिक मात्रा में जल, गुड़, तेल, भारी पदार्थ ये सब त्याग देने चाहिये ॥ १८५ ॥

अन्यच्च—

[१] सुरा औषधविशेष से निर्मित ही पथ्य है। साधारण सुरा नहीं, और बाह्य प्रयोग में लाता है।

पवनं सलिलं वेगरोधं च विषमाशनम् । विरुद्धपानमशनं मृत्तिकायाश्च भक्षणम् ॥ १८६ ॥ ग्राम्यानूपं पिशितलवणं शुष्कशाकं नवान्नं गौडं पिष्टं दधि सकृशरं निर्जलं मद्यमम्लम् ॥ धानावल्लूरमशनमथो गुर्व्यसात्म्यं विदाहि, स्वप्नं दैनं श्वयथुगदवान् वर्जयेन्मैथुनं च ॥ १८७ ॥

इति भैषज्यरत्नावल्यां शोथाधिकारः समाप्तः ।

हवा खाना, अति जल पीना, मल-मूत्रादि वेगों को रोकना, विरुद्ध अन्न जल का सेवन, मिट्टी खाना, ग्राम और जल के किनारे रहनेवाले जीवों का मांस, नमक, सूखे शाक, नया अन्न, गुड़ के पदार्थ, पिसे पदार्थ, दही, खिचड़ी जलरहित शराब, खटाई, खिरणा आदि भुने अन्न, सूखा मांस, भारी पदार्थ, असात्म्य भोजन, दाहकर्ता पदार्थ, दिन में सोना और मैथुन ये सब अपथ्य हैं ॥ १८६-१८७ ॥

इति सरयूप्रसादत्रिपाठिविरचितायां भैषज्यरत्नावल्यां रत्नप्रभाख्यायां व्याख्यायां शोथाधिकारः समाप्तः ।

---

## अथ उदराधिकारः ।

उदरचिकित्सा ।

सर्वमेवोदरं प्रायो दोषसङ्घातजं यतः । अतो वातादिशमनी क्रिया सर्वत्र शस्यते ॥ १ ॥

सभी उदररोग प्रायः त्रिदोषजन्य होते हैं । अतः वायु आदि तीनों दोषों को शान्त करनेवाली ही चिकित्सा सब प्रकार के उदररोग में करनी चाहिये ॥ १ ॥

उदररोग में पथ्य-व्यवस्था ।

उदरे दोषसम्पूर्णे कुक्षौ मन्दो भवेदनलः । तस्माद्भोज्यानि भोज्यानि दीपनानि लघूनि च ॥ २ ॥ रक्तशालीन्यवान्मुद्गान् जाङ्गलान् मृगपक्षिणः । पयो मूत्रासवारिष्टं मधु शीधु च शीलयेत् ॥ ३ ॥

उदर के दोषपूर्ण होने पर अग्नि मन्द पड़ जाती है । अतः इस रोग में दीपन और लघु भोजन देना चाहिये । इस रोग में रक्तशाली धान का भात, जौ की रोटी, मूँग की दाल, जङ्गली मृग और पक्षियों का मांसरस, दुग्ध, गोमूत्र, आसव, अरिष्ट, मधु और शीधु इनका बार-बार सेवन करना चाहिये ॥ २-३ ॥

उदर में विरेचन विधि ।

दोषातिमात्रोपचयात् स्रोतोमार्गनिरोधनात् । सम्भवत्युदरं तस्मान्नित्यमेनं विरेचयेत् ॥ ४ ॥

दोषों के अत्यन्त सञ्चय और समस्त शारीरिक स्रोतों के रुक जाने से उदररोग उत्पन्न होता है, अतः उदररोगी को सर्वदा विरेचन कराना चाहिये ॥ ४ ॥

उदरनाशक योग ।

पाययेत् तैलमैरण्डं समूत्रं सपयोऽपि वा ॥ ५ ॥

गोमूत्र के साथ अथवा उष्ण दुग्ध के साथ एरण्ड का तैल पिलाने से उदररोग शान्त होता है ॥ ५ ॥

वातोदर-चिकित्सा ।

वातोदरं बलवतः स्नेहस्वेदैरुपाचरेत् । स्निग्धाय स्वेदिताङ्गाय दद्यात् स्निग्धं विरेचनम् ॥ ६ ॥ हृते दोषे परिम्लानं वेष्टयेद्वाससोदरम् । यथास्यानवकाशत्वाद्वायुर्नाध्मापयेत् पुनः ॥ ७ ॥
( परिम्लानं विरेचनेन नम्रीकृतम् । )

वातोदर का रोगी यदि बलवान् हो तो स्नेहन और स्वेदन द्वारा पहिले शरीर को स्निग्ध तथा स्विन्न करे । पश्चात् स्निग्ध विरेचन देवे । विरेचन द्वारा दोषों के निकल जाने से उदर

के कोमल हो जाने पर वस्त्र से कसकर बाँध देवे, जिससे कि अवकाश न मिलने के कारण वायु उदर को फिर न फुला सके ॥ ६-७ ॥

उदर में पेयाविधि।

विरिक्ते च यथा दोषहरैः पेया भृता हिता ॥ ८ ॥

विरेचन के पश्चात् जो दोष उपस्थित हो उसी दोष के नष्ट करनेवाले औषधों द्वारा पेया बनाकर सेवन कराना लाभदायक होता है ॥ ८ ॥

उदररोग में तक्रपानव्यवस्था।

वातोदरी पिबेत्तक्रं पिप्पलीलवणान्वितम् । शर्करामरिचोपेतं स्वादु पित्तोदरी पिबेत् ॥९॥ यमानीसैन्धवाजाजी व्योषयुक्तं कफोदरी । त्र्यूषणक्षारलवणैर्युक्तं त्रैदोषिकोदरी । गौरवारोचकार्त्तानाममृततराय कल्पते ॥ १० ॥

वातोदर में पीपरि और सेंधानोन मिलाकर, पित्तोदर में मिश्री और काली मिरिच मिलाकर, कफोदर में अजवाइन सेंधा नमक, जीरा, सोंठ, मिरिच और पीपरि मिलाकर तथा त्रिदोषजन्य उदररोग में सोंठ, मिरिच, पीपरि, जवाखार और सेंधानोन मिलाकर तक्र पान करे। इससे शरीर की गुरुता और अरुचि का नाश होता है ॥ ९-१० ॥

मधुतैलवचाशुण्ठीशताह्वाकुष्ठसैन्धवैः । युक्तं प्लीहोदरी जातं सेव्योपन्तु दकोदरी ॥ ११ ॥ बद्धोदरी तु हबुषादीप्यकाजाजिसैन्धवैः। पिबेच्छिद्रोदरी तक्रं पिप्पलीक्षौद्रसंयुतम् ॥ १२ ॥ त्र्यूषणक्षारलवणैर्युक्तन्तु निचयोदरी । गौरवारोचकार्त्तानां समन्दाग्न्यतिसारिणाम् ॥ १३ ॥ तक्रं वातकफार्त्तानाममृतत्वाय कल्पते ॥ १४ ॥

प्लीहोदर में शहद, तैल, बच, सोंठ, सोवा, कूठ तथा सेंधा नमक के साथ, जलोदर में त्रिकटु ( सोंठ, मिर्च, पीपर ) के साथ, बद्धोदर में हबुषा, अजवायन, जीरा तथा सेंधा नमक के साथ, छिद्रोदर में पीपल तथा मधु के साथ, त्रिदोषज उदरमें त्रिकटु ( सोंठ, मिर्च, पीपर ), यवक्षार तथा सेंधा नमक के साथ मठा का सेवन अत्यन्त हितकर है—वात कफ से उत्पन्न रोग, शरीर भारी रहना, अरुचि, मन्दाग्नि तथा अतिसार में मठा अमृत के समान गुणकारी है ॥ ११—१४ ॥

वातोदर में दुग्धादि व्यवस्था।

वातोदरे पयोऽभ्यासो निरूहो दशमूलिकः ॥ १५ ॥

वातोदर में दुग्धपान और दशमूल के क्वाथ की निरूहवस्ति अर्थात् पिचकारी देना लाभदायक है ॥ १५ ॥

सामुद्राद्य चूर्ण।

सामुद्रसौवर्चलसैन्धवानि क्षारं यमानीमजमोदकञ्च । सपिप्पली चित्रकशृङ्गवेरं हिंगुं विडञ्चेति समानि कुर्य्यात् ॥ १६ ॥ एतानि चूर्णानि घृतप्लुतानि भुञ्जीत पूर्वं कवलं प्रशस्तम् । वातोदरं गुल्ममजीर्णभक्तं वातात्मकोपं ग्रहणीं प्रदुष्टाम् ॥ १७ ॥ अर्शांसि दुष्टानि च पाण्डुरोगं भगन्दरं चापि निहन्ति सद्यः ॥ १८ ॥

सामुद्रनोन, सौवर्चलनोन, जवाखार, सेंधा नोन अजवाइन, अजमोद, पीपरि, चीता, सोंठ, हींग और बिड़नोन समभाग, इन सब द्रव्यों को लेकर चूर्ण बनावे इस चूर्ण को घी में मिलाकर भोजन के प्रथम ग्रास के साथ खावे। इसका सेवन करने से वातोदर, गुल्म, अजीर्ण, वातरक्त, दूषित ग्रहणी, बवासीर, पाण्डुरोग और भगन्दर ये सब रोग शीघ्र नष्ट होते हैं ॥ १६-१८ ॥

कुष्ठादि चूर्ण।

कुष्ठं दन्ती यवक्षारो व्योष त्रिलवणं वचा । अजाजी दीप्यकं हिङ्गुस्वर्जिका-

चव्यचित्रकम् ॥ १९ ॥ शुण्ठी चोष्णाम्भसा पीतं चूर्णं वातोदरं जयेत् ॥ २० ॥

कूठ, दन्तीमूल, यवक्षार, त्रिकटु ( सोंठ, मिर्च, पीपर ), सेंधा नमक, काला नमक, बिड लवण, वच, जीरा, अजवाइन, हींग, सर्जिक्षार, चव्य, चित्रक तथा सोंठ इन्हें बराबर बराबर लेकर चूर्ण कर उष्ण जल के साथ लेना चाहिए। मात्रा- १ माशे से २ माशे तक। इस चूर्ण को सेवन करने से वात से उत्पन्न उदररोग दूर होता है ॥ १९-२० ॥

पित्तोदर में क्रिया।

पित्तोदरेषु बलिनं पूर्वमेव विरेचयेत्। अनुवास्याबलं क्षीरं बस्तिशुद्धं विरेचयेत् ॥ २१ ॥ पयसा सत्रिवृत्कल्केनोरुबकशृतेन वा। शातलात्रायमाणाभ्यां शृतमारग्वधेन वा ॥ २२ ॥

पित्त से उत्पन्न उदररोग में यदि रोगी बलवान् है तो सबसे पहले उसे विरेचन करवाना चाहिए और यदि निर्बल है तो अनुवासन तथा दूध से बस्ति द्वारा रोगी को प्रथम शुद्ध कर विरेचन कराना चाहिए। विरेचन के लिए निसोतचूर्ण डालकर दूध या अरण्डी के बीज, चर्मकषा, त्रायमाणा अथवा अमलतास का गूदा इनमें से किसी एक औषधि से दूध को सिद्ध कर रोगी को देना चाहिए ॥ २१-२२ ॥

कफोदरचिकित्सा।

कफोदरिणं शुद्धं कटुक्षारान्नभोजिनम्। मूत्रारिष्टायस्कृतिभिर्योजयेच्च कफापहैः ॥ २३ ॥

जिस उदररोग में कफ प्रबल हो उसमें प्रथम विरेचन तथा बस्ति द्वारा रोगी को शुद्ध कर कड़वे पदार्थ, क्षारयुक्त अन्न, गोमूत्र अरिष्ट आदि कफ के नाश करनेवाले भोजन तथा औषध सेवन कराना चाहिए ॥ २३ ॥

त्रिदोषजोदरचिकित्सा।

सान्निपातोदरे सर्वा यथोक्ताः कारयेत्क्रियाः ॥ २४ ॥

त्रिदोषज ( वात, पित्त, कफ ) उदररोग में वात, पित्त, कफ आदि कही उदररोग की चिकित्सा करनी चाहिए ॥ २४ ॥

प्लीहोदरचिकित्सा।

प्लीहोदरे प्लीहहरं कर्मोदरहरं तथा २५

प्लीहोदर में बढ़ी हुई तिल्ली को नष्ट करनेवाली तथा उदररोग को नष्ट करनेवाली औषधियों का प्रयोग करना चाहिए ॥ २५ ॥

बद्धोदरचिकित्सा।

स्विन्नाय बद्धोदरिणे मूत्रतीक्ष्णौषधान्वितम्। सतैललवणं दद्यान्निरूहं सानुवासनम् ॥ परिस्रंसीनि चान्नानि तीक्ष्णञ्चैव विरेचनम् ॥ २६ ॥

बद्धोदर में पेट पर स्वेदन क्रिया करनी चाहिए, तत्पश्चात् तीक्ष्णवीर्य औषधि, तैल तथा सेंधा नमक आदि पदार्थों को मिलाकर बस्तिकर्म तथा अनुवासन करना चाहिए और भेदक भोजन तथा तीक्ष्ण विरेचन देना चाहिए ॥ २६ ॥

छिद्रोदर में क्रिया का निर्देश।

छिद्रोदरमृते स्वेदाच्छ्लेष्मोदरवदाचरेत् ॥ २७ ॥

छिद्रोदर में स्वेदन क्रिया के अतिरिक्त कफोदर में कही चिकित्सा करनी चाहिए ॥ २७ ॥

जलोदर में शस्त्रकर्म।

जातं जातं जलं स्राव्य शास्त्रोक्तं शस्त्रकर्म च। जलोदरे विशेषेण द्रवसेवां विवर्जयेत् ॥ २८ ॥

जलोदर में सुश्रुत आदि ग्रन्थों में कही हुई विधि के अनुसार शस्त्र ( औजार ) द्वारा पेट में इकट्ठे हुए जल को निकाल देना चाहिए। इसमें पतला भोजन देना निषेध है ॥ २८ ॥

उदरहर यूप।

स्नुक्पयसा परिभाविततण्डुलचूर्णविनिर्मितः यूपः। उदरमुदारं हिंस्याद्योगोऽयं सहसाग्रेण ॥ २९ ॥

थूहर के दूध में चावल भिगोवे, फूल आने पर पीसकर उसका चूर्ण बनावे। उस चूर्ण को खाने से सात रात में उदररोग अवश्य नष्ट होता है॥ २९॥

उदरहर मूत्र।

सक्षीरं माहिषं मूत्रं निराहारः पिबेन्नरः। शाम्यत्यनेन जठरं सप्ताहादिति निश्चयः॥ ३०॥

निराहार मनुष्य गाय का दूध मिलाकर भैंस का मूत्र पान करे। अन्य कोई वस्तु न खावे और न पीवे ऐसा करने से सात दिन में उदररोग अवश्य नष्ट होता है॥ ३०॥

दन्त्यादि चूर्ण।

दन्ती वचा गवाक्षी च शङ्खिनी तिल्वकं त्रिवृत्। गोमूत्रेण पिबेदेषां कल्कमुदरनाशनम्॥ ३१॥

दन्तीमूल, वच, इन्द्रायण की जड़, शङ्खिनी (ससका), तिल्वक (शावरलोध) और निसोत इन्हें इकट्ठा करके पीसकर गोमूत्र के साथ पीने से उदररोग नष्ट होता है। मात्रा ४ रत्ती से ८ रत्ती तक॥ ३१॥

उदर में प्रलेप।

देवदारुपलाशार्कहस्तिपिप्पलिशिग्रुकैः। साश्वगन्धैः सगोमूत्रैः प्रदिह्यादुदरं शनैः॥ ३२॥ मूत्राण्यष्टावुदरिणां सेके पाने च शस्यते॥ ३३॥

देवदारु, आक की रूई, मदार के पत्ते, गजपीपल, सहिंजने की छाल, असगन्ध, इन्हें इकट्ठा करके गोमूत्र के साथ पीसकर पेट पर लेप करने से उदररोग में लाभ होता है। आठों प्रकार के मूत्रों से उदररोगी को परिषेक तथा पान कराने से लाभ होता है॥ ३२-३३॥

देवद्रुमादियोग।

देवद्रुमं शिग्रु मयूरकञ्च गोमूत्रपिष्टामथवाश्वगन्धाम्। पीत्वाशु हन्यादुदरं प्रवृद्धं कृमीन् सशोथानुदरं च दूष्यम्॥ ३४॥

देवदारु, सहिंजने की छाल, अपामार्ग, इन्हें इकट्ठा कर मिलाकर अथवा अकेले असगंध को गोमूत्र से पीसकर पीने से बढ़ा हुआ उदररोग, कृमि तथा सूजनसहित दूष्योदर नाश होता है॥ ३४॥

दशमूलादि क्वाथ।

दशमूलदारुनागरच्छिन्नरुहापुनर्नवाभयाक्वाथः। जयति जलोदरशोथश्लीपदगलगण्डवातरोगांश्च॥ ३५॥

दशमूल, देवदारु, सोंठ, गिलोय, पुनर्नवा, हरड़ ये कुल द्रव्य मिलाकर २ तोला लेना चाहिए। तत्पश्चात् इनको ३२ तोला जल में पकाना चाहिए, जब शेष ८ तोला रह जावे तो उतार ले। इस काढ़े को सेवन करने से जलोदर, शोथ (सूजन), श्लीपद, गलगण्ड तथा वातरोग आदि सम्पूर्ण दूर होते हैं॥ ३५॥

हरीतक्यादि क्वाथ।

हरीतकीनागरदेवदारुपुनर्नवाछिन्नरुहाकषायः। सगुग्गुलुर्मूत्रयुतस्तु पेयः शोथोदराणां प्रवरः प्रयोगः॥ ३६॥

हरड़, सोंठ, देवदारु, पुनर्नवा, गिलोय ये सम्पूर्ण मिश्रित द्रव्य २ तोला लेना चाहिए। तत्पश्चात् इनको ३२ तोला जल में पकाना चाहिए। जब शेष ८ तोला रह जावे तो उतार ले फिर इस काढ़े में किञ्चित् गुग्गुल और गोमूत्र डालकर पीने से उदररोग और शोथ शान्त होते हैं॥ ३६॥

पुनर्नवादि क्वाथ।

पुनर्नवा दारु निशा सतिक्ता पटोलपथ्या पिचुमर्दमुस्ता। सनागरच्छिन्नरुहेति सर्वैः कृतः कषायो विधिना विधिज्ञैः॥ ३७॥ गोमूत्रयुग्गुग्गुलुना च युक्तः

पीतः प्रभाते नियतं नराणाम् । सर्वाङ्गशोथोदरकासशूलश्वासान्वितं पाण्डुगदं निहन्ति ॥ ३८ ॥

पुनर्नवा, देवदारु, हल्दी, कुटकी, पटोलपत्र, हरड़, नीम, मोथा, सोंठ, गिलोय ये सम्पूर्ण मिश्रित द्रव्य २ तोला लेकर ३२ तोले जल में पकावे । जब शेष ८ तोला रह जावे तो उतार ले । इस काढ़े में गुग्गुल और गोमूत्र ऊपर से मिलाकर ( प्रक्षेप देकर ) पीने से सम्पूर्ण अङ्गों के शोथ, उदररोग कास, शूल ( दर्द ), पीलिया, श्वासादि रोग नाश को प्राप्त होते हैं ॥ ३७-३८ ॥

नारायण चूर्ण ।

यमानी हपुषा धान्यं त्रिफला सोपकुञ्चिका । कारवी पिप्पलीमूलमजगन्धा शटी वचा ॥ ३९ ॥ शताह्वा जीरकं व्योषं स्वर्णक्षीरी सचित्रका । द्वौ क्षारौ पौष्करं मूलं कुष्ठं लवणपञ्चकम् ॥ ४० ॥ विडङ्गञ्च समांशानि दन्त्या भागत्रयं तथा । त्रिवृद्विशाले द्विगुणे सातला स्याच्चतुर्गुणा ॥ ४१ ॥ एष नारायणो नाम चूर्णो रोगगणापहः । नैनं प्राप्याभिवर्द्धन्ते रोगा विष्णुमिवासुराः ॥ ४२ ॥ तक्रेणोदरिभिः पेयो गुल्मिभिर्बदराम्बुना । आनद्धवाते सुरया वातरोगे प्रसन्नया ॥ ४३ ॥ दधिमण्डेन विट्सङ्गे दाडिमाम्बुभिरर्शसैः । परिकर्त्ते च वृक्षाम्लैरुष्णाम्बुभिरजीर्णके ॥ ४४ ॥ भगन्दरे पाण्डुरोगे कासे श्वासे गलग्रहे । हृद्रोगे ग्रहणीदोषे कुष्ठे मन्दानले ज्वरे ॥ ४५ ॥ दंष्ट्राविषे मूलविषे सगरे कृत्रिमेविषे । यथार्हं स्निग्धकोष्ठेन पेयमेतद्विरेचनम् ॥ ४६ ॥

अजवायन, हाऊबेर, धनियाँ, त्रिफला (हर्रे, बहेड़ा, आँवला), कालाजीरा, कारवी ( सोये ) पिप्पली मूल, अजमोदा, कचूर, वच, सोये, जीरा, त्रिकटु, ( सोंठ, मिर्च, पीपल ), स्वर्णक्षीरी, चित्रक, यवक्षार, सज्जीक्षार, पोहकर मूल, कूठ, पाँचों नमक, वायविडंग हरएक द्रव्य १ भाग, दन्ती ३ भाग, निसोत २ भाग, इन्द्रायण की जड़ २ भाग, सातला (चर्मकषा) ४ भाग । इन सम्पूर्ण औषधियों को एकत्र कर यथाविधि चूर्ण कर ले । मात्रा-१ माशा से ३ माशे तक । इस चूर्ण के सेवन करने से अनेक प्रकार के रोग नष्ट होते हैं । अनुपान—इस चूर्ण को उदररोग में मठा के साथ, गुल्म रोग में बेर के काढ़े के साथ, अफारा में मदिरा के साथ, वातरोग में प्रसन्ना के साथ, मलबन्ध में दही के पानी के साथ, अर्श ( बवासीर ) रोग में अनार के रस के साथ, परिकर्तिका में वृक्षाम्ल के साथ, अजीर्ण में उष्ण जल के साथ, भगन्दर, पीलिया, खाँसी श्वास गलग्रह, हृद्रोग, संग्रहणी, कुष्ठ, मंदाग्नि, ज्वर, दंष्ट्राविष, कृत्रिम विष, इन रोगों में यह चूर्ण विरेचन के लिए देना चाहिए । यदि रोगी स्निग्ध कोष्ठ हो ॥ ३९-४६ ॥

पटोलाद्य चूर्ण ।

पटोलमूलं रजनी विडङ्गं त्रिफलात्वचम् । कंपिल्लकं नीलिनीञ्च त्रिवृताञ्चेति चूर्णयेत् ॥ ४७ ॥ षडाद्यान् कार्षिकानन्त्यांस्त्रींश्च द्वित्रिचतुर्गुणान् । कृत्वा चूर्णं ततो माषं गवां मूत्रेण सम्पिबेत् ॥ ॥ ४८ ॥ विरक्तो जाङ्गलरसैर्भुञ्जीत मृदु ओदनम् । मण्डं पेयां च पीत्वा तु सव्योषं षडहं पयः ॥ ४९ ॥ शृतं पिबेत्तु तच्चूर्णं पिबेदेवं पुनःपुनः । हन्ति सर्वोदराण्येतच्चूर्णं जातोदकान्यपि । कामलां पाण्डुरोगञ्च श्वयथुञ्चापकर्षति ॥ ५० ॥

परवल की जड़, हल्दी, वायविडङ्ग, त्रिफला ( हर्रे, बहेड़ा, आँवला ) प्रत्येक द्रव्य दो-दो तोला लेकर चार्णिए । ४ तोला कबीला, ६

तोला नीलनी मूल, ८ तोला निसोत, उपर्युक्त सम्पूर्ण द्रव्यों को मिलाकर यथाविधि चूर्ण बना ले और उचित मात्रा में प्रयोग में लावे। मात्रा—१ माशे से २ माशे तक। अनुपान—गोमूत्र। जिस समय इस चूर्ण के देने से विरेचन हो जावे तब रोगी को जङ्गली पशुपक्षियों के मांस के यूप से चावल देना चाहिए या पेया अथवा मण्ड को देना चाहिए। इसके पश्चात् ६ दिन तक त्रिकटु ( सोंठ, मिर्च, पीपरि ) डालकर औटाया दूध पिलाना चाहिए। इस दूध का सेवन उस समय तक रखना चाहिए जब तक रोग पूरी तरह से अच्छा न हो जावे। इस प्रकार औषध सेवन कराने से सब प्रकार के उदररोग, जलोदर, कामला, पीलिया तथा शोथ-रोग ( सूजन ) नाश को प्राप्त होते हैं ॥४७-५०॥

महाबिन्दुघृत।

स्नुहीक्षीरपले कल्के प्रस्थार्द्धञ्चैव सर्पिषः। कम्पिल्लकं पलञ्चैकं पलार्द्धं सैन्धवस्य च ॥ ५१ ॥ त्रिवृतायाः पलञ्चैकं कुडवं धात्रिकारसात्। तोयप्रस्थेन विपचेत् शनैर्मृद्वग्निना भिषक् ॥ ५२ ॥ शाणप्रमाणं दातव्यं जठरे प्लीहगुल्मयोः। तथा कच्छपरोगेषु युञ्जीत मतिमान् भिषक् ॥ ५३ ॥ एतद्गुल्मान् सञ्चियान् सशूलान् सपरिग्रहान्। निहन्त्येष प्रयोगो हि वायुर्जलधरानिव ॥ ५४ ॥ पञ्चगुल्मयथार्थाय यज्ञो मुक्तः स्वयम्भुवा। महाबिन्दुघृतं नाम सिद्धं सिद्धैश्च पूजितम् ॥ ५५ ॥

घृत ६४ तोला लेकर उसमें थूहर का दूध १पल (८तोला) मिलावे। तदनन्तर कबीला ४ तोला, सांभरी नमक २ तोले और निसोथ ४ तोला लेकर इनका कल्क बनावे। आंवले का रस १६ तोला और पाकार्थ जल १२८ तोला लेवे। इन सब द्रव्यों को एकत्र मिलाकर धीमी आंच पर पकावे। उदर, प्लीहा और गुल्मरोग में ३ माशा की मात्रा में सेवन करना चाहिये। कच्छप रोग में भी बुद्धिमान् वैद्य इसका प्रयोग करें। इसका सेवन करने से शूलयुक्त तथा अपानयुक्त पञ्चविध गुल्मरोग इस प्रकार नष्ट होते हैं, जैसे प्रचण्ड वायु के चलने से बादलों के समूह विनष्ट होवें। पाँच प्रकार के गुल्मरोग को नष्ट करने के लिये साक्षात् स्वयम्भू ने अनुभूत और सिद्धनिषेवित 'महाबिन्दुघृत' नामक यज्ञ छोड़ा है ॥५१-५५॥

बृहन्नाराचघृत।

लोध्रचित्रकचव्यानि विडङ्गं त्रिफला त्रिवृत्। शङ्खिन्यतिविषा व्योषमजमोदा निशाद्वयम् ॥ ५६ ॥ दन्ती च कार्षिकं सर्वं गोमूत्रस्य पलाष्टकम्। चतुःपलं स्नुहीक्षीरं राजवृक्षफलं तथा ॥ ५७ ॥ एतैश्चतुर्गुणे तोये घृतप्रस्थं विपाचयेत्। उदरकपामवातञ्च गुल्मप्लीहभगन्दरान् ॥ ५८ ॥ निहन्त्यचिरयोगेन गृध्रसीं स्तम्भमूरुजम्। बृहन्नाराचकं नाम घृतमेतद् यथामृतम् ॥ ५९ ॥

घृत १२८ तोला लेवे, उसमें थूहर का दूध १६ तोला मिलावे। तदनन्तर उसमें लोध, चीता की जड़, चव्य, वायविडङ्ग, आंवला, हर्र, बहेड़ा, निसोथ, शंखिनी, अतीस, सोंठ, मिरिच, पीपरि, अजमोद, हल्दी, दारुहल्दी और दन्ती जमालगोटा की जड़ प्रत्येक एक-एक तोला, अमिलतास के फल का गूदा १६ तोला सबका कल्क बनाकर मिलावे। पश्चात् ६४ तोला गोमूत्र और ६ सेर १२ तोला जल मिलाकर धीमी आंच से पकावे। इस घृत का सेवन करने से उदररोग, आमवात, गुल्म, प्लीहा, भगन्दर, गृध्रसी और ऊरुस्तम्भ ये सब रोग नष्ट होते हैं। यह बृहन्नाराच नामक घृत अमृत के समान है ॥ ५६—५९ ॥

रसोनतैल।

लशुनस्य तुलामेकां जलद्रोणे विपा-

चयेत् । त्रिकटु त्रिफला दन्ती हिङ्गुसैन्धवचित्रकम् ॥ ६० ॥ देवदारु वचा कुष्ठं मधुशिग्रुपुनर्नवा । सौवर्चलं विडङ्गानि दीप्यकोगजपिप्पली ॥ ६१ ॥ एतेषां पलिकान् भागान् त्रिवृतः षट्पलानि च । पिष्ट्वा कषायेणानेन तैलंमृद्वग्निना पचेत् ॥ ६२ ॥ तत्पिबेत्प्रातरुत्थाय यथाग्निबलमात्रया । निहन्ति सकलान् रोगानुदराणि विशेषतः ॥ ६३ ॥ मूत्रकृच्छ्रमुदावर्तमन्त्रवृद्धिं गुदक्रमीन् । पार्श्वकुक्षिभवं शूलमामशूलमरोचकम् ॥ ६४ ॥ यकृदष्ठीलिकानाहान् प्लीहनाञ्चाग्निवेदनाम् । मासमात्रेण नश्यन्ति अशीतिर्वातजा गदाः ॥ ६५ ॥

तिल का तेल ८ प्रस्थ ( १२८ तोला ), लहसन की गिरी ५ सेर, जल १ द्रोण ( २५ सेर ३८ तोला ), पक चुकने पर काढ़ा आधा द्रोण ८ प्रस्थ ( ६ सेर ३२ तोला ), कल्क के लिए—त्रिकटु ( सोंठ, मिर्च, पीपर ), त्रिफला ( हर्रे, बहेरा, आँवला ), दन्तीमूल, हींग, सहिंजन, सेंधा नमक, चित्रक, देवदारु, वच, कुष्ठ, मधु, की छाल, पुनर्नवा, काला नमक, वायविडङ्ग, अजवायन, गजपीपल, हरएक द्रव्य 1 पल ( ४ तोला ), निसोत ६ पल ( २४ तोला ) इनको धीमी-धीमी आँच से पकावे । रोगी के बलानुसार प्रातः समय सेवन करावे । इसके व्यवहार से मूत्रकृच्छ्र, उदावर्त, अन्त्रवृद्धि, गुदाकृमि, पार्श्वों में शूल, कुक्षिशूल, आमशूल तथा अरुचि, जिगर, अष्ठीलिका, आनाह, तिल्ली, अग्निशूल और सब प्रकार के उदररोग नाश को प्राप्त होते हैं और इसके 1 महीने तक लगातार सेवन करने से वात रोग शान्त होते हैं ॥६०-६५॥

श्रीवैद्यनाथादेशवटिका ।

त्रिकटुकपारदपथ्यासमभागं कानकफलं द्विगुणम् । वटिकागुञ्जार्द्धमिता कार्या स्वरसेनाम्ललोणिकायाः ॥ ६६ ॥ प्रबलजलोदरगुल्मज्वरपाण्डवामयनाशिनी प्रोक्ता । तिमिरापि पटलविद्रधिप्रबलोदावर्तशूलहरी ॥ ६७ ॥ कृमिकोठकुष्ठकण्डुपिडकाश्च निहन्ति रोगचयम् । सिद्धगुटी प्रथिता भुवने श्रीवैद्यनाथपादाज्ञा ॥ ६८ ॥

अतिसरणे सति हस्तपादप्रक्षालनपूर्वकं दधिभक्तेन भोजयेत् । पथ्यं स्वल्पं देयम् ।

त्रिकटु, रससिन्दूर ( केवल पारद देना ठीक नहीं है ) और हरड़ प्रत्येक समभाग, सबसे दूने जमालगोटा के बीज ; इन सब द्रव्यों को चौपतिया के रस में घोटकर आधी-आधी रत्ती की गोलियाँ बनावे । इसका सेवन करने से प्रबल जलोदर, गुल्म, ज्वर, पाण्डुरोग, तिमिर रोग, पटल ( नेत्ररोग ), विद्रधि, प्रबल उदावर्त, शूल, कृमि, कोठ ( चकत्ता ), कुष्ठ, कण्डू और पिडिका आदि अनेक रोगसमूह नष्ट होते हैं । वैद्यनाथजी ने इस सिद्धवटी का आविष्कार किया था । इस औषध का सेवन करने से यदि आवश्यकता से अधिक विरेचन हो जावे तो उसका प्रतिकार यह है कि हाथ और पैर धुलाकर दही और भात थोड़ी मात्रा में खिलाना चाहिये । मात्रा—1 गोली से २ गोली तक ॥ ६६-६८ ॥

इच्छाभेदीरस ।

शुण्ठी मरिचसंयुक्तं रसगन्धकटङ्कणम् । जैपालास्त्रिगुणाः प्रोक्ताः सर्वमेकत्र पेषयेत् ॥ ६९ ॥ इच्छाभेदी द्विगुञ्जः स्यात् सितया सह पाययेत् । यावन्तश्चुलुकान् पीता तावद्वेगान्विरेचयेत् ॥ तक्रोदनञ्च दातव्यमिच्छाभेदी यथेच्छया ॥ ७० ॥

चुल्लकं सितोदकगण्डूषम् ।

सोंठ, मिरिच, पारा, गन्धक और सोहागा प्रत्येक एक तोला, जमालगोटा ३ तोले ; इन सब औषधी को एकत्र जल में [illegible]

रत्ती की गोलियाँ बनावे । अनुपान—मिश्री का शरबत । इस इच्छाभेदी रस को खाकर जितने बार घुसल्-घुसल् शरबत पीते हैं, उतने ही बार विरेचन ( दस्त ) होता है । भली भाँति विरेचन होने के पश्चात् तक्र के साथ भात खावे । मात्रा—१ रत्ती से २ रत्ती तक ॥ ६१-७० ॥

अभयावटी ।

अभया मरिचं कृष्णा टङ्कनञ्च समांशिकम् । सर्वचूर्णसमं भागं दद्यात् कानकजं फलम् ॥ ७१ ॥ स्नुहीक्षीरेण संकुर्यादगुञ्जापादमितां वटीम् । वटीद्वयं शिवाम्भेका पिष्ट्वा तण्डुलवारिणा ॥७२॥ उष्णाद्भिरेचयेत्तेपा शीते स्वास्थ्यमुपैति च । जीर्णज्वरं प्लीहरोगं हन्त्यष्टावुदराणि च ॥ ७३ ॥ वातोदरे प्रशस्तोऽयं सर्वाजीर्णव्यपोहति । कामलां पाण्डुरोगञ्च तथैव कुम्भकामलाम् ॥ ७४ ॥

हरड़, मिरिच, पीपरि और सोहागा फूला हुआ प्रत्येक एक तोला, जमालगोटा ४ तोले ; इन सब औषधों को एकत्र थूहर के दूध में घोटकर चौथाई रत्ती की मात्रा में गोलियाँ बना लेवे । इसके सेवन की विधि यह है कि चावलों के पानी में एक हरड़ पीस लेवे उसी के साथ एक ही बार दो गोलियाँ खावे । इस औषध के सेवन करने के पश्चात् जब तक उष्ण जल पीता रहे तब तक विरेचन होता रहता है, शीतल जल पीने पर विरेचन होना बन्द हो जाता है । इसका सेवन करने से जीर्णज्वर, प्लीहा, आठ प्रकार के उदररोग, सब प्रकार के अजीर्ण, कामला, पाण्डुरोग और कुम्भकामला ये सब रोग नष्ट होते हैं । वातोदर के लिये यह विशेष लाभदायक है तीक्ष्णरेचक ॥ ७१-७४ ॥

नाराचरस ।

सूतं टङ्कनतुल्यांशं मरिचं सूततुल्यकम् । गन्धकं पिप्पली शुण्ठी द्वौ द्वौ भागौ विचूर्णयेत् ॥ ७५ ॥ सर्वतुल्यं जैपालबीजं निस्तुषमेव च । गुञ्जैको रेचने सिद्धो नाराचोऽयं महारसः । गुल्मप्लीहोदरं हन्ति पिबेत्तमुष्णवारिणा ॥७६॥

पारा, सोहागा फूला हुआ और मिरिच प्रत्येक एक तोला, गन्धक, पीपरि और सोंठ प्रत्येक दो-दो तोले, छिले हुए जमालगोटा के बीज ६ तोले ; इन सब औषधों को पानी में पीसकर एक-एक रत्ती की गोलियाँ बना लेवे । यह उत्तम विरेचन है । इसका सेवन करने से गुल्म, प्लीहा और उदररोग नष्ट होते हैं । अनुपान—गर्म जल । तीक्ष्णरेचक है ॥ ७५-७६ ॥

चूलिकावटी ।

रसो गन्धो विषं तालं त्रिकटु त्रिफला तथा ॥ टङ्कनं समभागञ्च जयपालं चतुर्गुणम् ॥ ७७ ॥ भृङ्गराजरसेनाथ केशराजरसेन वा । मधुना वटिका कार्या गुञ्जापादमिता शुभा ॥ ७८ ॥ चूलिकाख्या वटी ख्याता शोथोदरविनाशिनी । कामलां पाण्डुरोगञ्च आमवातं हलीमकम् ॥ हन्याद्भगन्दरं कुष्ठं प्लीहानं गुल्ममेव च ॥ ७९ ॥

पारा, गन्धक, विष, शुद्ध हरिताल, सोंठ, मिरिच, पीपरि, आँवला, हरड़, बहेड़ा, और सोहागा फूला हुआ प्रत्येक सम भाग लेवे । उसमें कुल औषधों का चौगुना जमालगोटा मिलाकर भाँगरा अथवा केशराज के अर्क की भावना देवे । पश्चात् मधुसहित घोटकर पाव-पाव रत्ती की गोलियाँ बनावे । इस चूलिकावटी का सेवन करने से शोथ, उदर, कामला, पाण्डुरोग, आमवात, हलीमक, भगन्दर, कुष्ठ, प्लीहा, ये सब रोग नष्ट होते हैं । तीक्ष्णरेचक है ॥ ७७-७९ ॥

मेदनीवटी ।

त्रिकण्टकस्नुक् पयसा पिप्पल्या वटिका कृता । भेदनीयमिद्मता महागदनिषूदनी ॥ ८० ॥

गोखुरू, थूहर का दूध और पीपरि इनको घोटकर गोलियाँ बनावे । इसका सेवन करने से विरेचन हो जाता है, अतः अनेक प्रबलरोग शान्त होते हैं ॥ ८० ॥

प्रवालपञ्चामृत ।

प्रवाल मुक्ता फल शङ्ख शुक्ति कपर्दिकानाञ्च समांश भागम ॥ ८१ ॥ प्रवालभात्रं द्विगुणं प्रयोज्य सर्वैः समांशं रवि दुग्धमेव ॥ ८२ ॥ एकीकृतं तत्खलु भाण्डमध्ये । क्षिप्त्वा मुखे बन्धन मत्रयोज्यम् ॥ ८३ ॥ पुटं विदध्यादति शीतले च । उद्धृत्य तद्भस्म भरेत्करण्डे ॥ ८४ ॥ नित्यं द्विवारं प्रतिरोगयोगैः वल्लप्रमाणेन प्रयोज्यमेव ॥ ८५ ॥ गुल्मोदर प्लीहविबद्धकास श्वासाऽग्नि मान्द्यान्कफमारुतोत्थान ॥ ८६ ॥ अजीर्णमुद्गारहृदामयघ्नं बालप्रदासौ परमं प्रशस्तम् ॥ ८७ ॥ मेहामयं मूत्ररोगं मूत्रकृच्छ्रं तथाऽश्मरीम् नाशयेन्नाऽत्र सन्देहः सत्यंगुरुवचो यथा ॥ ८८ ॥ पथ्याश्रितं भोजनमादरेण समाचरेन्निर्मल चित्त वृत्त्या ॥ ८९ ॥ प्रवालपञ्चामृतनामधेयो । योगोत्तमः सर्व गदाऽपहारी ॥ ९० ॥

मूँगा २ भाग, मोती शङ्ख, मोती की सीप, पीली कौड़ी इनकी भस्में १-१ भाग लेकर सबके समान आक का दूध डालकर मिट्टी के बर्तन में और मुँह बन्द करके गजपुट की आँच दे ठण्डा होने पर निकाल शीशी में भर दे, इनमें से १-२ रत्ती सुबह शाम मधु आदि रोगानुसार अनुपान के साथ देने से गुल्म, उदर, प्लीहा, बद्धोदर, कास, श्वास, मन्दाग्नि, कफ, वातरोग, अजीर्ण उद्गार, हृद्रोग, प्रदोपद्रव, प्रमेह, मूत्ररोग, मूत्रकृच्छ्र पथरी इन सब रोगों का विनाश करता है । पथ्य रोगानुसार देना चाहिये । इसको रोगानुसार अनुपान के साथ देने से सब रोगों को नष्ट करता है ॥ ८१-९० ॥

शोथोदरारिलौह ।

पुनर्नवाऽमृतावह्नि मयाक्षीमानशिग्रवः । सूर्य्यावर्त्तार्कमूलञ्च पृथगष्टपलं जले ॥ ९१ ॥ पादशेषे शृतं द्रोणे सुपूते वस्त्रगालिते । लौह भस्माष्टपलकं पचेदाज्यसमं भिषक् ॥ ९२ ॥ अर्कस्य द्विपलं क्षीरं स्नुहीक्षीरं चतुःपलम् । पलद्वयं कौशिकस्य गन्धकस्य पलं तथा ॥ ९३ ॥ पलार्द्धं पारदं सिद्धे वक्ष्यमाणन्तु निक्षिपेत् । जयपालं ताम्रमभ्रं शुद्धमत्र प्रदापयेत् ॥ ९४ ॥ कङ्कुष्ठहिकन्दानां शराख्याद् वणट कर्णकात् । पलाशस्य च बीजानि कञ्चुकी तालमूलिका ॥ ९५ ॥ त्रिफलायाः कृमिरिपोस्त्रिवृद्दन्तीभवं तथा । सूर्य्यावर्त्तगवाक्ष्योश्च वर्षा भूर्यवल्लिका ॥ ९६ ॥ एषां लौहसमां मात्रां स्निग्धभाण्डे निधापयेत् । अतोऽस्य भक्षयेन्मात्रामनुपानञ्च युक्तितः ॥ ९७ ॥ हन्ति सर्वोदरं शीघ्रं नात्र कार्य्या विचारणा । ये च शोथाः सुदुर्वाराश्चिरकालानुबन्धिनः ॥ ९८ ॥ ते सर्वे नाशमायान्ति तमः सूर्य्योदये यथा । नातःपरतरं किञ्चित् शोथोदरविनाशनम् ॥ ९९ ॥ उदराणि पाण्डुरोगं कामलाञ्च हलीमकम् । अर्शो भगन्दरं कुष्ठं ज्वरं गुल्मञ्च नाशयेत् ॥ १०० ॥

सोंठि, गिलोय, चीता, इन्द्रायण, मानकन्द, सहिजन की छाल हुलहुल और आक की जड़ प्रत्येक ८ पल ३२ तोला लें । इनको एकत्र कर २४ सेर ४८ तोला जल में पकावे, जब ६ सेर ३२ तोला जल शेष रहे तब छानकर, उस छाप

में लोहभस्म ३२ तोला, घृत १२ तोला, आक का दूध २ पल ७ तोला, थूहर का दूध ४ पल १६ तोला गूगुल २ पल ७ तोला, गन्धक १ पल ४ तोला, पारा २ तोले मिलाकर पकावे। मिलाने के समय पारा और गन्धक की कजली कर लेवे। पाक शेष होने पर जमालगोटा, ताम्रभस्म, अभ्रकभस्म, कंकुष्ठ ( उसारेरेवन्द ), चीता की जड़, सूरन, सरफोंका, पलाशपर्ण ( मोरवा ), दाक के बीज, कंघुकशाक, मुसली, आँवला, हरड़ बहेड़ा, वायविडङ्ग, निशोथ, दन्ती ( जमालगोटा की जड़ ), हुलहुल, इन्द्रायण की जड़, सोंठ और इन्द्रजौ ये सब मिलकर ३२ तोला हों, इनको मिलाकर उतार लेवे। शीतल होने पर घी के चिकने पात्र में रख देवे। इसकी मात्रा और अनुपान की व्यवस्था रोगी की अवस्था और बल के अनुसार निश्चित करे। यह शोथोदरारि लौह सब प्रकार के उदररोग और चिरकालोत्पन्न, दुर्निवार शोथरोग को इस प्रकार नष्ट करता है जैसे सूर्योदय होने से अन्धकार नष्ट हो। शोथ और उदररोग की इससे बढ़कर और कोई औषध है ही नहीं। इसका सेवन करने से उदररोग, पाण्डुरोग, कामला हलीमक, बवासीर, भगन्दर, कुष्ठ, ज्वर और गुल्मरोग भी नष्ट होते हैं मात्रा २ रत्ती से ४ रत्ती तक ॥ ९१-१०० ॥

त्रैलोक्य सुन्दर रस।

शुद्धसूतं द्विधा गन्धं ताम्राभ्रं सैन्धवं विषम्। कृष्णजीरं विडङ्गञ्च गुडूचीसत्त्वचित्रकम् ॥ १०१ ॥ उग्रगन्धा यवक्षारं प्रत्येकं कर्षमात्रकम्। निर्गुण्डिकाद्रवैरग्निबीजपूरद्रवैर्दिनम् ॥ १०२ ॥ मर्दयेच्छोषयेत्सोऽयं रसस्त्रैलोक्यसुन्दरः। गुञ्जाद्वयं घृतैर्लेह्यं वातोदरकुलान्तकम् ॥ १०३ ॥ वह्निचूर्णं यवक्षारं प्रत्येकञ्च पलद्वयम्। घृतप्रस्थं विपक्तव्यं गोमूत्रैश्च चतुर्गुणैः। घृतावशेषं कर्त्तव्यं द्विमाषञ्च पिबेदनु ॥ १०४ ॥

शुद्ध पारा १ तोला, गन्धक २ तोला, ताम्रभस्म, अभ्रकभस्म, सेंधा नमक, शुद्ध मीठा विष, काला जीरा, वायविडङ्ग, सतगिलोय, चित्रक, वच, यवक्षार प्रत्येक द्रव्य १ तोला लेकर इनको एकत्र मिश्रित कर १ दिन सँभालू के रस से, दूसरे दिन चित्रक के रस से और तीसरे दिन बिजौरा के रस से घोटे और धूप में सुखा ले। मात्रा--२ रत्ती। अनुपान घी। इस अनुपान घृत को इस प्रकार तैयार करना चाहिए कि गाय का घी १ प्रस्थ ( ६४ तोला ), गोमूत्र ४ प्रस्थ ( ३ सेर १६ तोला ), चित्रक चूर्ण ८ तोला, यवक्षार ८ तोला, इनसे विधि के अनुसार घी पाककर २ माशे तोल में अनुपान में प्रयोग करावे। इस रस के सेवन करने से वातोदर नाश होता है ॥ १०१-१०४ ॥

जलोदरारि रस।

पिप्पली मरिचं ताम्रं रजनीचूर्णसंयुतम्। स्नुहीक्षीरैर्दिनं मर्द्यं तुल्यं जैपालबीजकम् ॥ १०५ ॥ गुञ्जार्द्धेन विरेकः स्यात् सद्यो हन्ति जलोदरम्। रेचनानाञ्च सर्वेषां दध्यम्लं स्तम्भने हितम् ॥ दिनान्ते च प्रदातव्यमन्नं वा मुद्गयूषकम् ॥१०६॥

पीपल, कालीमिर्च ताम्रभस्म, हलदीचूर्ण, इन सम्पूर्ण द्रव्यों को सेहुण्ड के दूध से घोटकर इसको तोल ले और इसके बराबर शुद्ध जैपालबीज मिला ले। मात्रा ½ रत्ती। इस रस के व्यवहार से प्रथम रोगी को विरेचन होता है और तत्पश्चात् जलोदर नष्ट होता है। विरेचन रोकने के लिए रोगी को दही और खट्टे पदार्थों का सेवन कराना चाहिए। रोगी को भोजन के लिए सायंकाल के समय चावल और मूँग का यूष देना चाहिये ॥ १०५-१०६ ॥

वह्नि रस।

सूतस्य गन्धकस्यापि रजनीत्रिफलाशिला। प्रत्येकञ्च द्विभागं स्यात् त्रिवृज्जैपालचित्रकम् ॥ १०७ ॥ प्रत्येकं स्यात्त्रि-

भागश्च व्योषं दन्तिकजीरकम् । प्रत्येकं सप्तभागं स्यादेकीकृत्य विचूर्णयेत् ॥१०८॥ जयन्तीस्नुक्पयोभृङ्गवह्निशालारितैलकैः । प्रत्येकेण क्रमाद् भाव्यं सप्तवारं पृथक् पृथक् ॥ १०९ ॥ महावह्निरसो नाम्ना गुञ्जायुग्मजलैः पिबेत् । विरेचनं भवेत्तेन तक्रभक्तं ससैन्धवम् ११० ॥ दिनान्ते दापयेत्पथ्यं वर्जयेच्छीतलंजलम् । सर्वोदरहरः प्रोक्तः श्लेष्मवातहरः परः १११

पारा ८ भाग, गन्धक ८ भाग, हल्दी २ भाग, त्रिफला (हर्रे, बहेड़ा, आँवला ) २ भाग, मैनशिल, २ भाग, निसोत २ भाग, जयपाल ३ भाग, चित्रक ३ भाग, त्रिकटु (सोंठ,मिर्च, पीपर) ७ भाग, दन्तीमूल ७ भाग, जीरा ७ भाग, इन सबको इकट्ठा कर जयन्तीपत्र, सेहुण्ड का दूध, भाँगरा, चित्रक तथा एरण्ड तैल से अलग अलग सात-सात भावना दे । मात्रा--२ रत्ती । अनुपान-उष्ण जल । इस रस के सेवन कराने से विरेचन होता है। रोगी को पथ्य सायंकाल को देना चाहिए। पथ्य-सेंधा नमक, चावल, मठा। इस औषध के सेवन काल में ठण्डा पानी प्रयोग में न लाना चाहिए। यह रस हर प्रकार के उदररोग तथा कफ वात को दूर करता है॥ १०७-१११ ॥

### पिप्पल्याद्यलौह ।

पिप्पलीमूलचित्राभ्रत्रिकत्रितयसैन्धवम् । सर्वचूर्णसमं लोहं हन्ति सर्वोदरामयम् ॥ ११२ ॥

पिप्पलीमूल, चित्रक, अभ्रकभस्म, त्रिकटु ( सोंठ, मिर्च, पीपर ), त्रिफला ( हर्र, बहेड़ा-आँवला), त्रिजात, सेंधा नमक, सम्पूर्ण द्रव्यों को बराबर-बराबर लेकर सबके बराबर लोह-भस्म मिश्रण करे। इसके सेवन करने से हर प्रकार का उदररोग दूर होता है। मात्रा १-२ रत्ती है ॥ ११२ ॥

### उदरारि रस ।

पारदं शुक्तितुत्थञ्च जैपालं पिप्पली समम् । आरग्वधफलान्मज्जा धत्रीक्षीरेण मर्दयेत् ॥ ११३ ॥ गुञ्जामात्रां वटीं खादेत् स्त्रीणां जलोदरं जयेत् । चिञ्चाफलरसश्चानु पथ्यं दध्योदनं हितम् ॥ ११४ ॥ दकोदरं हरत्येव तीव्रेण रेचनेन च ॥ ११५ ॥

रससिन्दूर, शुक्तिभस्म, शुद्ध तुत्थियाभस्म, शुद्ध जैपाल, पीपल, अमलतास का गूदा, इन सम्पूर्ण द्रव्यों को एकत्र कर सेहुण्ड के दूध से घोटकर आधी रत्ती से १ रत्ती प्रमाण की गोली बना ले। इसके सेवन करने से स्त्रियों का जलोदर नाश होता है। अनुपान-इमली का रस। पथ्य-दही चावल। इस रस से प्रथम रेचन होता है फिर जलोदर नष्ट होता है ॥११३-११५ ॥

### वारिशोषण रस ।

चतुर्विंशतिभागाः स्युर्गन्धाद् वङ्गं तदर्द्धकम् । वङ्गभागाद्भवेदर्द्धः पारदः कृष्णमभ्रकम् ॥ ११६ ॥ चतुर्दशविभागं स्यात् मृतं तद्दीयते पुनः । मृतलौहमष्टभागं मृतताम्रं नवाभ्र शतं ॥ ११७ ॥ मृतहेमद्वयं तेषां मृतरूप्यञ्च सप्तकम् । अतिशुद्धमतिस्थूलं मृतं हीरं प्रयोजयेत् ॥११८॥ भागाः शाणा माक्षिकस्य विशुद्धस्यात्र षोडश । अष्टादशमितं शाणं नवकासीशकं पुनः ॥ ११९ ॥ तुत्थकञ्च षडेवात्र नवीनं आक्षमेव च । तालकञ्च चतुर्भागं शिला योज्यास्त्रयो बुधैः ॥१२०॥ शैलेयं पञ्च दातव्यं सर्वमेकत्र नूतनम् । मृतमौक्तिकभागैकं सौभाग्यं द्वयमेव च ॥१२१॥ कुट्टयित्वा विचूर्ण्याथ जम्बीरस्य रसेन च । भावयेत्सप्तधा गाढं गाढिकां तस्य कारयेत

॥१२२॥ पानकद्वितये कृत्वा मुद्रयेत्पानकद्वयम् । घटमध्ये निवेश्याथ दत्त्वा पूर्वञ्च वालुकाम् ॥ १२३ ॥ ऊर्ध्वञ्च तां पुनर्दत्त्वा वालुकां मुद्रयेत् ध्रुवम् । अहोरात्रं दहेदग्नौ स्वाङ्गशीतं समुद्धरेत् ॥१२४॥ वकुलस्य च वीजेन कण्टकारीद्वयेन च । गुडूची त्रिफला वाशा भावयेत्सप्त सप्तधा ॥१२५ ॥ वृद्धदारसेनापि तथा देयास्तु भावनाः । गिरिकन्यारसेनापि रोहितः मत्स्यपित्ततः ॥ १२६ ॥ एवं सिद्धो भवेत्सम्यक् रसोऽसौ वारिशोषणः । देवान् गुरून् समभ्यर्च्य पितॄन् साधूँस्तथा मुनीन् ॥ १२७ ॥ रक्तिकाद्वितयं देयं सन्निपाते समुद्धृते । मरिचेन समं देयं तेन जागर्ति मानवः ॥ १२८ ॥ श्लैष्मिके च गदे देयं ग्रहण्यामग्निमान्द्यके । प्लीह्नि पाण्डौ प्रयोक्तव्यं त्रिकटुत्रिफलाम्भसा ॥ १२९ ॥ शूलरोगे प्रयोक्तव्यमुदरे च विशेषतः । कुष्ठे सुदुष्टे देयोऽयं काकोदुम्बरिकाम्भसा ॥ १३० अति वह्निकरः श्रीदो बलवर्णाग्निवर्द्धनः । धन्वन्तरिकृत- सयो रसः परम दुर्लभः ॥ सर्वरोगे प्रयोक्तव्यो निःसन्देहं भिषग्वरैः ॥ १३१ ॥

गन्धक २४ भाग, वंगभस्म १२ भाग, पारा ६ भाग, अभ्रकभस्म १४ भाग, लौहभस्म ८ भाग, ताम्रभस्म ६ भाग, स्वर्णभस्म २ भाग, रजतभस्म ७ भाग, हीरकभस्म १६ भाग, स्वर्णमाक्षिक भस्म १६ भाग, कासीस १८ भाग, शुद्ध तूतिया १ भाग, हरताल ४ भाग, मैनशिल ३ भाग, शिलाजीत ५ भाग, मुक्ताभस्म १ भाग, सुहागा २ भाग उपर्युक्त संपूर्ण द्रव्यों को एकत्र कर जम्बीरी के रस से ७ बार भावना देकर गोली बनावे। इसके बाद इस गोली को मूस में रखकर वालुकायन्त्र द्वारा २४ घंटे तक पाक करे। स्वाङ्ग शीतल होने पर निकाल ले। फिर मौलसरी के बीज, छोटी बड़ी कटेरी, गिलोय, त्रिफला, विधारा, विष्णुकान्त रोहू मछली का पित्त हरएक से सात-सात बार भावना देकर २ रत्ती प्रमाण की गोली बनावे। अनुपान—मरिच-चूर्ण। इस रस के सेवन करने से सन्निपात का रोगी शीघ्र होश में आ जाता है। कफजरोग, ग्रहणी, अग्निमान्द्य, प्लीहा, पीलिया शूलरोग, उदररोग। ऐसे रोगों में त्रिकटु तथा त्रिफला के काढ़े के अनुपान से देना चाहिए और दुष्ट-कुष्ठ रोग में कठगूलरिया के रस के साथ सेवन कराना चाहिए। इस रस के व्यवहार से बल तथा अग्नि बढ़ती है और रंग निखरता है। इस रस के प्रारम्भ से पूर्व देवता, गुरु, पितर साधु मुनियों का पूजन करना परमावश्यकीय है ॥ ११६—१३१ ॥

### उदररोग में पथ्य ।

विरेचनं लंघनमब्दसंभवाः कुलत्थमुद्गारुणशालयो यवाः । मृगद्विजा जांगलसंज्ञयान्विताः सितासुरामाक्षिकसीधुमाध्विकाः ॥ १३२ ॥ तक्रं रसोनोरुबुतैलमार्द्रकंशालिंच शाकं कुलकं कटिल्लकम् । पुनर्नवाशिग्रु फलं हरीतकी ताम्बूलमेलायवशूकमायसम् ॥ १३३ ॥ अजागवोष्ट्रीमहिषीपयो जलं लघूनि तीक्ष्णानि च दीपनानि । वस्त्रेण संवेष्टनमग्निकर्मविषप्रयोगोऽन्नयुतो यथायथम् ॥ १३४ ॥ विशेषतः प्लीहसमुद्भवे गदे वामेप्रबाहौ धमनीत्यधः परम् । बद्धोदरे चोदरजे क्षतोत्थिते नाभेरधः शास्त्रविधिर्यथाविधिः ॥ १३५ ॥ समारणोत्थं घृतपानमादितः साभ्यंजनं चान्यनुवासनं तथा । यथामलं पथ्यगणोऽयमाश्रितो सता नृणां स्यादुदरामये सति ॥ १३६ ॥

विरेचन, लंघन, बहुत दिन के पुराने कुलथी, मूँग, लाल चावल, जौ, मृग, पक्षी, जंगली जीवों का मांस, मिश्री। खाँड़, शराब, शहद, सीधु, माध्वीक, आसव, लहसन, अण्डी का तैल, अदरख शालिंच शाक, परवल, करेला, सोंठ, सहँजने की पत्ती, हरड़, पान, इलायची, घी, लौह, बकरी, गौ, भैंस, ऊँटनी का दूध और मूत्र, हलके पदार्थ, अपरे दीपनकारी पदार्थ, कपड़े से लपेटना, दागना और विष प्रयोग यथानुकूल करना चाहिये। विशेषतः प्लीहोदर में बाईं भुजा के अग्रभाग में धमनी की फस्द खोले, यकृदोदर और जलोदर में नाभि के नीचे यथाविधि शस्त्रकर्म (चीरा) करना चाहिये। वायुजन्य उदररोग में प्रथम घी पिलाना चाहिये। उबटना, अनुवासन बस्ति सब दोषों के अनुसार करना चाहिये। ये सब उदररोग में हितकारक हैं॥ १३२—१३६॥

### उदररोग में अपथ्य।

संस्नेहनं धूमपानं जलपानं शिराव्यधम्। छर्दियानं दिवास्वप्नं व्यायामं पिष्टवैकृतम्॥ १३७॥ आँटकानूपमांसानि पत्रशाकस्तिलान्यपि। उष्णानि च विदाहीनि लवणान्यशनानि च॥ १३८॥ महेन्द्रगिरिजातानां सरितां सलिलानि च। शिम्बीधान्यं विरुद्धान्नं दुष्टनीरं गुरूणि च॥ १३९॥ विष्टम्भीनि विशेषात्तु स्वेदं विष्टम्भसंभवे। वर्जयेदुदरव्याधौ वैद्यो रक्षन्निजं यशः॥ १४०॥ अम्बुपानं दिवास्वप्नं गुर्वभिष्यन्दिभोजनम्। व्यायामं चाध्वयानञ्च जठरी परिवर्जयेत्॥ १४१॥

स्नेहनकर्म, धूम्रपान, जलपान, फस्द खोलना, वमन, मार्ग चलना, दिन में सोना, व्यायाम, पिसे अन्न के पदार्थ, जल और जल के किनारे रहनेवाले जीवों का मांस, पत्ते के शाक, तिल, गरम और दाहकारक नमकीन पदार्थ, महेन्द्र पर्वत से निकली हुई नदियों का जल, फली के धान्य, उड़द, मूँग, चना आदि विरुद्ध पदार्थ, दुष्ट जल, भारी पदार्थ, विष्टम्भकारी पदार्थ, विष्टम्भजन्य उदररोग में पसीना निकालना ये सब कर्म वैद्य को अपने यश की रक्षा के लिये (अर्थात् रोगी को अच्छा करने के लिये) त्याग देने चाहिये। उदर रोगी को चाहिए कि वह निम्नांकित बातों को छोड़ दे—जैसे बहुत पानी पीना, दिन में सोना भारी तथा तरदार वस्तुओं का भोजन, कसरत अधिक चलना तथा सवारी करना ये बातें उदररोगी को त्याज्य हैं॥ १३७-१४१॥

### जलोदरारिरस

पिप्पलीमरिचं ताम्रं रजनी चूर्णसंयुतम्। स्नुहीक्षीरैर्दिनं मर्द्यं तुल्यं जैपालबीजकम्॥ १४२॥ वल्लं खादेद्विरेकः स्यात्सद्यो हन्ति जलोदरम्। रेचनान्ते च सर्वेषां दध्यन्नं स्तम्भनं हितम्॥ १४३॥ दिनान्ते च प्रदातव्यमन्नं वा मुद्गयूषकम्॥ १४४॥

### इति भैषज्यरत्नावल्यामुदराधिकारः समाप्तः।

पीपल, मरिच ताम्रभस्म, हल्दी ये सब समान भाग लेकर सबको महीन चूर्ण कर थूहर के दूध में १ रोज घोट कर इन सब के समान भाग शुद्ध जमालगोटा मिलाकर धर दे (इसमें से १ माशे की मात्रा में ठण्डे पानी के साथ देवे जिस जलोदर में विष्टम्भ हो उसमें विशेष फायदा करता है) और अन्य स्थान पर ३ रत्ती का प्रयोग करना चाहिये, इससे सारा मल निकल कर जलोदर मिट जाता है। अधिक मात्रा में खाने से अगर अधिक दस्त आने लगें तो दही भात खाने से बन्द हो जाते हैं। साधारणतः खिचड़ी और मूँग का यूष देना चाहिये॥ १४२-१४४॥

इति सरयूप्रसादत्रिपाठिविरचितायां भैषज्यरत्नावल्या रत्नप्रभाख्यायां व्याख्यायामुदररोगाधिकारः समाप्तः।

## क्लोमरोगाधिकारः

### क्लोम का कार्य और स्थान ।

प्लीहयकृद्ग्रन्थ्योर्मध्यमन्नपाकादिकर्म्मणि। सहायभूतमध्यास्ते क्लोम तच्च तिलाभिधम् ॥ १ ॥ अधस्तु दक्षिणे भागे हृदयात् क्लोम तिष्ठति। जलवाहि सिरामूलं तृष्णाच्छादनकृन्मतम् ॥ २ ॥

प्लीहा और क्षुद्र आँतों के मध्य में क्लोम[1] (पिपासा स्थान) है, इसका दूसरा नाम तिल अथवा तिलक है। यह अन्न के पाचनादि क्रिया में सहायक होता है। हृदय के दाहिने भाग में क्लोम की स्थिति है यह जल को वहन करनेवाली सिराओं का मूल और पिपासा स्थान है॥ १-२ ॥

### क्लोमरोगनिदान।

तत्रातिस्निग्धगुरुभिः भोज्यैरत्यर्थशीलितैः[2]। अभिघातादिभिश्चापि याति वृद्धिञ्च मार्दवम् ॥ ३॥ तथा शोणितसङ्घातो विद्रधिश्चापि जायते। अन्ये च दारुणा रोगा जायन्तेऽस्मिञ्च जायते ॥ ४ ॥

अधिक मात्रा में अधिक चिकना एवम् भारी आहार सेवन करने से तथा चोट लगना आदि कारणों से यह ग्रन्थि बढ़ जाती है और मृदु हो जाती है। इसमें रुधिर इकट्ठा होने लगता है कभी कभी विद्रधि भी हो जाती है, इस ग्रन्थि के विकृत हो जाने पर मधुमेह आदि अन्य कठिन रोग भी हो जाते हैं ॥ ३-४ ॥

### क्लोमविकृति के चिह्न।

उत्क्लेशो वमथुर्वह्नेः सादः कार्श्यञ्च पाण्डुता। भ्रमः सादश्च काठिन्यमौष्ण्यमूर्ध्वोदरे तथा ॥ ५ ॥ विद्रधेर्विकृतौ तत्र शूलाध्मानौ तृषाधिका। अश्मरीवच्छिला घोरा सुकष्टा तत्र जायते ॥ ६ ॥

जी मिचलाना, वमन, अग्निमान्द्य, कृशता, पाण्डु, थकावट शिथिलता, पेट पर कठापन तथा उष्णता आदि लक्षण होते हैं। ग्रन्थि में विद्रधि हो जाने पर शूल, आध्मान तथा अति प्यास आदि के लक्षण होते हैं। इस ग्रन्थि में अश्मरीरोग के समान घोर एव अत्यन्त कष्टदायक पथरी भी उत्पन्न हो जाती है ॥ ५-६ ॥

### क्लोमरोग की चिकित्सा।

यद्वह्नेर्दीपनं यच्च मारुतस्यानुलोमनम्। अन्नपानौषधं तत्तद्धितं क्लोमगदातुरे ॥७॥

जो-जो अग्नि के दीपन और वायु के अनुलोमन करनेवाले अन्न, पान और औषध हैं वे सब क्लोमरोग में लाभदायक होते हैं ॥ ७ ॥

### अभयादिक्वाथ।

अभयामलकं दारु धन्याकं विश्वभेषजम्। द्राक्षा च शारिवेत्येषां क्वाथः क्लोमगदापहः ॥ ८ ॥

हरड़, आँवला, देवदारु, धनिया, सोंठ, मुनक्का और अनन्तमूल; इन औषधों का क्वाथ पिलाने से क्लोमरोग शान्त होता है। विधि—मिले हुए सब द्रव्य २ तोले, जल ३२ तोले, क्वाथ के लिये जल ३२ तोले, बचा हुआ ८ तोले ॥ ८ ॥

---

१ 'क्लोम' के विषय में मतभेद है किन्तु यहाँ पर Pancreas नामक ग्रन्थि का ग्रहण है।

२ क्लोम शब्द का अर्थ क्या किया जाय इसके विषय में मतभेद ही है। कविराज गणनाथसेनमहामहोपाध्याय Trachea (कण्ठ नाली) प० हरिप्रपन्नजी पित्ताशय (Gall Bladder), कुछ विद्वान् Pharynx और कुछ विद्वान् Pancreas मानते हैं। यहाँ Pancreas नामक ग्रन्थि का ही ग्रहण है। यह ग्रन्थि वामपार्श्व में आमाशय के नीचे होती है और एक नली द्वारा अपने रस को अन्त्रप्रणाली ( पक्वाशय आदि ) में भेजकर आहार को पचाती है। इसके विकार से प्यास अधिक लगती है एवम् मधुमेह उत्पन्न हो जाता है।

सुरेन्द्रमोदक।

देवपुष्पाजमूला श्यामा शतपुत्री कुशेशयम्। यमानीं मागधीं शृङ्गीं द्राक्षां मधुरिकाभये॥ ९॥ सम्मर्द्य मधुना विद्वान् मोदकं परिकल्पयेत्। तं यथाग्निबलं खादेत् क्लोमरोगनिवृत्तये॥ १०॥ मोदकोऽयं सुरेन्द्राख्यः पुष्टिकृद्बलवर्द्धनः। वह्निसन्दीपनो हृद्यो रसायनवरः स्मृतः ११

लौंग, मजीठ, श्यामालता, शतावरि, कमल की जड़, पर्वताद्रक, पीपरि, काकड़ासिंगी, मुनक्का, सौंफ और हरड़; इन सब द्रव्यों को समान भाग लेकर चूर्ण बनाये, तदनन्तर मधु मिलाकर खरल करके लड्डू बनाये। रोगी के बल और अग्नि के अनुसार २ मासे से ४ मासे तक की मात्रा में सेवन करना चाहिये। इसका सेवन करने से क्लोमरोग की निवृत्ति, शरीर की पुष्टि, बल की वृद्धि और अग्नि की दीप्ति होती है। यह मोदक हृदय के लिये हितकारक और श्रेष्ठ रसायन है॥ ९-११॥

शशिशेखर रस।

रसगन्धाभ्रहेमानि मौक्तिकं विद्रुमं तथा। कन्याद्रिर्मर्दयेद् यस्तं ततः सिद्धो भवेद्रसः॥ १२॥ सर्वान् क्लोमगदान् हन्ति ह्यशीतिं मारुतोद्भवान्। पैत्तिकांश्चाखिलांश्चापि श्लैष्मिकांनप्यथं ध्रुवम् १३॥

पारा, गन्धक, अभ्रकभस्म, स्वर्णभस्म, मौक्तिक और प्रवालभस्म; इन सब द्रव्यों को समान भाग लेकर घीकुआर के रस में एक दिन घोटकर एक-एक रत्ती की गोलियाँ बना लेवे। इसका सेवन करने से हर प्रकार के क्लोमरोग, ८० प्रकार के वातरोग तथा सब प्रकार के पैत्तिक और श्लैष्मिक रोग निःसंदेह नष्ट होते हैं॥ १२-१३॥

सुरेन्द्राभ्रवटी।

अभ्रं सहस्रशो दग्धं रसं दरदसम्भवम्। केशराजरसैः शुद्धं गन्धकं हीरकं तथा॥ १४॥ विद्रुमं मौक्तिकं हेम रौप्यं माक्षिकमेव च। कान्तलौहञ्च सम्मर्द्य विधिना वह्निशारिणा॥ १५॥ वट्यो गुञ्जार्धप्रमिताः कुर्याच्छायाविशोषिताः। एकैकां योजयेत् प्राज्ञो यथादोषानुपानतः॥ १६॥ क्लोमरोगविनाशाय वह्नेः सन्धुक्षणाय च। अम्लपित्तं यकृच्छोथं प्लीहां पाण्डुजलोदरम्॥ १७॥ गुल्मरोगं प्रमेहञ्च दारुणं विषमज्वरम्। कुष्ठं सुदारुणं चैव निहन्ति नात्र संशयम्॥ १८॥ न सोऽस्ति रोगो लोकेऽस्मिन् यमियं न विनाशयेत्॥१९॥

सहस्र पुटित अभ्रकभस्म, हिंगुलोत्थ पारद, केशराज (भँगरैया) के रस में शुद्ध किया हुआ गन्धक, हीरा, मूँगा, मुक्ता, स्वर्ण, चाँदी, सोनामाखी और कान्तलोह की भस्म समभाग इन सब द्रव्यों को लेकर चीता के रस में घोटकर आधी-आधी रत्ती की गोलियाँ बनाकर छाया में सुखा लेवे। दोषानुसार उपयुक्त अनुपान के साथ एक-एक गोली सेवन करावे। यह सुरेन्द्राभ्रवटी सेवित होने पर क्लोमरोग और अग्निमान्द्य को नष्ट करती है तथा अम्लपित्त, यकृत्शोथ, तिल्ली, पाण्डु, जलोदर, गुल्म, प्रमेह, भयानक विषमज्वर एवम् कुष्ठरोग निःसंदेह अच्छे हो जाते हैं। संसार में प्रायः वैसा कोई रोग है ही नहीं; जिसको नष्ट न कर सके॥१४-१९॥

क्लोमरोग की चिकित्साविधि।

यो यः समाश्रयेद्व्याधिः क्लोम्नि तं समवेक्ष्य च। क्रियां संसाधयेद्वैद्यो यथादोषं यथाबलम्॥ २०॥

क्लोम में जो-जो रोग उत्पन्न हो वैद्य को उसकी भली भाँति परीक्षा करके दोष और बल के अनुसार उचित चिकित्सा करनी चाहिये॥२०॥

क्लोमरोग में पथ्यापथ्य।

अनुपानप्रधानानि क्लोमामयनिपी-

ह्नितः। सेवेतोग्राणि सर्वाणि यत्नतः परिवर्जयेत् ॥ २१ ॥

इति भैषज्यरत्नावल्यां क्लीमरोगचिकित्सा समाप्तः ॥

क्लीबरोगी को चाहिये कि सौम्य अन्न पान का सेवन करे और जितने उग्र अन्न और पान हैं उनको सावधानी से त्याग दे ॥ २१ ॥

इति सरयूप्रसादत्रिपाठिविरचितायां भैषज्यरत्नावल्या रत्नप्रभाख्यायां व्याख्यायां क्लीबरोगचिकित्सा समाप्ता।

## मेदरोगाधिकारः (स्थौल्य)

स्थौल्यहर विहाराहार।

श्रमचिन्ताव्यवाया‌ऽध्वक्षौद्रजागरणप्रियः। हन्त्यवश्यमतिस्थौल्यं यवश्यामाकभोजनैः ॥ १ ॥

परिश्रम, चिन्ता, मैथुन, मार्ग चलना, मधु (शहद) पीना, रात में जागरण करना, जौ और साँवों का भोजन करना, इन सब उपचारों के सेवन करने से मेदा की वृद्धि के कारण उत्पन्न हुआ शरीर का अधिक मोटापन अवश्य नष्ट होता है ॥ १ ॥

स्थौल्यनाशक उपाय।

अस्वप्नञ्च व्यवायञ्च व्यायामं चिन्तनानि च। स्थौल्यमिच्छन् परित्यक्तुं क्रमेणातिप्रवर्द्धयेत् ॥ २ ॥

स्थूलता के त्याग की इच्छा रखनेवाले मनुष्य को रात्रि जागरण, मैथुन, व्यायाम और चिन्ता, इन सब कार्यों को क्रम से बढ़ा देना चाहिए ॥ २ ॥

स्थौल्यनाशक योग।

प्रातर्मधुयुतं वारि सेवितं स्थौल्यनाशनम्। उष्णमन्नस्य मण्डं वा पिबन् कृशतनुर्भवेत् ॥ ३ ॥

प्रातःकाल मधुमिश्रित जल पीने से स्थूलता नष्ट होती है। उष्ण भात का माँड पीने से शरीर कृश हो जाता है ॥ ३ ॥

चव्यादिशक्तुप्रयोग।

सचव्यजीरकव्योषहिङ्गुसौवर्चलानलः। मस्तुना शक्तवः पीता मेदोघ्ना वह्निदीपनाः ॥ ४ ॥

(समभागेन समुदितचूर्णात् षोडशगुणाः शक्तवः।)

चव्य, जीरा, सोंठ, मिरिच, पीपरि, हींग, कालानमक और चीता की जड़ समभाग लिये हुए इन कुल औषधों का चूर्ण १ मासा, सत्तू (सतुआ) १६ तोले इन सबको एकत्र मिश्रित कर दही के पानी के साथ सेवन करना चाहिये। परन्तु यह ध्यान रहे कि उस दिन अन्य पदार्थ का भोजन न करे। इस सत्तू को पीने से मेदा का नाश और अग्नि का दीपन होता है ॥ ४ ॥

विडङ्गादि चूर्ण।

विडङ्गनागरक्षारकान्तलौहरजोमधु। यवामलकचूर्णन्तु प्रयोगः स्थौल्यनाशनः ॥ ५ ॥

वायविडङ्ग, सोंठ, जवाखार, कान्तलोह का भस्म, मधु, जौ और आँवले समभाग इन सब द्रव्यों को लेकर चूर्ण बनाय। इस चूर्ण का सेवन करने से स्थूलता नष्ट होती है। मात्रा ६ रत्ती ॥ ५ ॥

व्योषाद्यशक्तुप्रयोग।

व्योषं विडङ्गशिग्रूणि त्रिफला कटुरोहिणीम्। बृहत्यौ द्वे हरिद्रे द्वे पाठामतिविषां स्थिराम् ॥ ६ ॥ हिङ्गुकेबुकमूलानि यमानी धान्यचित्रकम्। सौवर्चलमजाजीञ्च

हवुषांश्चेति चूर्णयेत् ॥ ७ ॥ चूर्णतैलघृतक्षौद्रभागाः स्युर्मानतः समाः । शक्तूनां षोडशगुणो भागः सन्तर्पणं पिबेत् ॥ ८ ॥ प्रयोगात्तस्य शाम्यन्ति रोगाः सन्तर्पणोत्थिताः । प्रमेहमूढवातश्च कुष्ठान्यर्शांसि कामला ॥ ९ ॥ प्लीहापाण्ड्वामयः शोथो मूत्रकृच्छ्रमरोचकः । हृद्रोगो राजयक्ष्मा च कासः श्वासो गलग्रहः ॥ १० ॥ कृमयो ग्रहणीदोषाः शैत्यं स्थौल्यमतीव च । नराणां दीप्यते चाग्निः स्मृतिर्बुद्धिश्च वर्द्धते ॥ ११ ॥

सोंठ, मिरिच, पीपरि, बायविडङ्ग, सैंजन के मूल की छाल, आँवला, हरड़, बहेड़ा, कुटकी, छोटी कटेरी, बड़ी कटेरी, हलदी, दारुहलदी, पाढ़, अतीस, शालपर्णी, हींग, केमुआ (कँऊ) की जड़, अजवाइन, धनियाँ, चीता का मूल, काला नमक, जीरा और हाऊबेर प्रत्येक औषध को समभाग लेकर एकत्रित कर चूर्ण बनावे। तदनन्तर तिल का तेल, घृत और मधु —इन तीनों में से प्रत्येक को कुल चूर्ण के समान परिमाण में लेकर मिलावे। सत्तू (सतुवा) चूर्ण से सोलह गुना लो; इसको भी उसी चूर्ण में मिश्रित कर किसी शीतल अनुपान के साथ सेवन करे। इसका सेवन करने से हर प्रकार के अधिक तृप्ति से उत्पन्न रोग, प्रमेह, मूढ़वात, कुष्ठ, बवासीर, कामला, प्लीहा, पाण्डुरोग, शोथ, मूत्रकृच्छ्र, अरोचक, हृद्रोग, राजयक्ष्मा, कास, श्वास, गलग्रह, कृमिरोग, ग्रहणी, शीतलता और अति स्थूलता ये सब रोग नष्ट होते हैं तथा अग्नि की दीप्ति, स्मरणशक्ति और धारणाशक्ति की वृद्धि होती है। चूर्ण की मात्रा ४ माशा ॥ ६-११ ॥

स्थौल्यापकर्षिणी पेया।

बदरीपत्रकल्केन पेया काञ्जिकसाधिता ॥ १२ ॥

बेर की पत्तियाँ लेकर पीस लेवे, उसमें थोड़ा सा चावल मिलाकर, काँजी के साथ पकाकर पेया बना लेवे। इस पेया का सेवन करने से स्थूलता नष्ट होती है ॥ १२ ॥

शिलाजतु प्रयोग।

स्थौल्यहृत् स्यात् साग्निमन्थरसं वापि शिलाजतु ॥ १३ ॥

अरनी के रस अथवा क्वाथ में थोड़ा सा शिलाजीत मिलाकर सेवन करे। इससे स्थूलता नष्ट होती है ॥ १३ ॥

अमृताद्य गुग्गुलु।

अमृतात्रुटिवेल्लवत्सकं कलिङ्गपथ्यामलकानि गुग्गुलुम्। क्रमवृद्धमिदं मधुप्लुतं पिडकास्थौल्यभगन्दरं जयेत् ॥ १४ ॥

त्रुटिः सूक्ष्मैला वेल्लो विडंग। अत्र केचिच्छन्दो भङ्गभिया कलिपाठं कुर्वन्ति तन्मते कलिर्बिभीतकः। किन्तु महेश्वरपत्रिकायामपि इन्द्रयवः इति व्याख्यातः। तस्मादनन्तराच्छन्दोमार्गोणामत्र छन्दोभङ्गदोषो नाशङ्कनीय इति शिवदासः।

गिलोय १ भाग, छोटी इलायची २ भाग, बायबिडङ्ग ३ भाग, कुड़ा की छाल ४ भाग, इन्द्रजौ ५ भाग, हरड़ ६ भाग, आँवले ७ भाग और गुग्गुल ८ भाग; इन सब औषधों का एकत्र चूर्ण बनाकर मधु के साथ सेवन करने से पिड़िका (फुंसी), स्थूलता और भगन्दर रोग नष्ट होते हैं। मात्रा—१ माशा ॥ १४ ॥

नवक गुग्गुलु।

व्योषाग्नित्रिफलामुस्तविडङ्गैर्गुग्गुलुं समम्। खादन् सर्वान् जयेत् व्याधीन् मेदःश्लेष्मामवातजान् ॥ १५ ॥

त्रिकटु, चीता, त्रिफला, नागरमोथा और बायबिडङ्ग; इन ९ द्रव्यों में से प्रत्येक द्रव्य को समभाग लेवे। उसमें ९ भाग गुग्गुल मिलाकर

एकत्र कूट पीसकर सेवन करे। इससे मेदा, कफ आमवातजन्य कुल रोग शान्त होते हैं। मात्रा—४ रत्ती ॥ १५ ॥

### लौहरसायन।

गुग्गुलुस्तालमूली च त्रिफला खादिरं वृषम्। त्रिवृतालम्बुषा चैव निर्गुण्डी चित्रकं स्नुही ॥ १६ ॥ एषां दशपलान् भागान् तोये पञ्चाढके पचेत्। पादशेषं ततः कृत्वा कषायमवतारयेत् ॥ १७ ॥ पलद्वादशकं देयं तीक्ष्णलौहस्य चूर्णितम्। पुराणसर्पिषः प्रस्थं शर्कराष्टपलानि च ॥ १८ ॥ पचेत्ताम्रमये पात्रे सुशीते चावतारिते। प्रस्थार्द्धं माक्षिकं देयं शिलाजतु पलद्वयम् ॥ १९ ॥ एलात्वचोः पलार्द्धञ्च विडङ्गानि पलद्वयम्। मरिचं चाञ्जनं कृष्णा द्विपलं त्रिफलान्वितम् ॥ २० ॥ पलद्वयन्तु कासीसं श्लक्ष्णचूर्णीकृतं बुधैः। चूर्णं दत्त्वाथ मथितं स्निग्धे भाण्डे निधापयेत् ॥ २१ ॥ ततः संशुद्धदेहस्तु भक्षयेन्माषमात्रकम्। अनुपानं पिबेत् क्षीरं जाङ्गलानां रसस्तथा ॥ २२ ॥ वातश्लेष्महरं श्रेष्ठं कुष्ठमेहज्वरापहम्। कामलां पाण्डुरोगञ्च श्वयथुं सभगन्दरम् ॥ २३ ॥ मूर्च्छामोहविषोन्मादं गराणि विविधानि च। स्थूलानां कर्षणं श्रेष्ठं मेदुरे परमौषधम् ॥ २४ ॥ कर्षयेच्चातिमात्रेण कुक्षिं पातालसन्निभम्। बल्यं रसायनं मेध्यं वाजीकरणमुत्तमम् ॥ २५ ॥ श्रीकरं पुत्रजननं वलीपलितनाशनम्। नारनीयात् कदलीकन्दं काञ्जिकं करमर्दकम् ॥ करीरं कारवेल्लञ्च ककारादि वर्जयेत् ॥ २६ ॥

ढीली पोटली में बंधा हुआ गुगुल, ताड़मूली, त्रिफला, खैर की लकड़ी, अडूसा की छाल, निसोथ, भुँईकदम्ब, निर्गुण्डी, चीता की जड़ और थूहर, प्रत्येक आध सेर लेवे। इनको ३२ सेर जल में पकावे, ८ सेर जल शेष रहने पर उतारकर वस्त्र से छान लेवे। तदनन्तर उस गुगुलमिश्रित क्वाथ में तीक्ष्ण लोह की भस्म १२ पल (४८ तोला), पुराना घृत १२८ तोला और शक्कर ८ पल (३२ तोला) मिलावे। पश्चात् धीमी आँच पर ताँबा के पात्र में पकावे। पाक शेष होने पर उसमें शिलाजीत ८ तोला, छोटी इलायची के दाने २ तोले, दालचीनी २ तोले, वायविडङ्ग ८ तोला, कालीमिरिच, रसौत, पीपरि और त्रिफला प्रत्येक ८ तोला और हीराकसीस ८ तोला इनका महीन चूर्ण मिलाकर उतार लेवे। शीतल हो जाने पर उसमें ३२ तोला शहद मिलाकर घी के चिकने पात्र में रख लेवे। विरेचनादि द्वारा रोगी के शरीर को शुद्ध कराकर, प्रतिदिन १ मासा की मात्रा में लौहरसायन का सेवन करावे। अनुपान दुग्ध अथवा जङ्गली पशुओं का मांस रस देवे। इसका सेवन करने से वातश्लैष्मिक रोग, कुष्ठ, प्रमेह, ज्वर, कामला, पाण्डुरोग, शोथ, भगन्दर, मूर्च्छा, मोह, विष, उन्माद, गरदोष और स्थूलता आदि अनेक रोग शान्त होते हैं। स्थूलता को दूर करने की यह महौषध है। बढ़े हुए पेट को पाताल के समान नीचा कर देता है। यह बलवर्धक, रसायन, मेधाजनक, श्रेष्ठ वाजीकरण, कान्तिवर्धक, पुत्रोत्पादिनी शक्ति का वर्धक, वली (झुर्रियाँ पड़ना) और पलित (बाल पकना) नाशक है। इस लौहरसायन का सेवन करनेवाले रोगी के लिये केले का कन्द, काँजी, करौंदा, करील और करैला ये ककारादि पदार्थों का सेवन नहीं करना चाहिये ॥ १६-२६ ॥

### त्रिफलाद्य तैल।

त्रिफलातिविषामूर्वात्रिवृच्चित्रकवासकैः। निम्बारग्वधषड्ग्रन्था सप्तपर्णनिशाद्वयैः ॥ २७ ॥ गुडूचीन्द्रसुरी कृष्णा कुष्ठसर्षपनागरैः। तैलमेभिः समैः पक्वं सुरसादिरसाप्लुतम् ॥ २८ ॥ पानाभ्यञ्जनगण्डूष-

नस्यवस्तिषु योजितम् । स्थूलतादींश्च कण्ड्वादीञ्जयेत् कफकृतान् गदान् ॥ २९ ॥

तिल का तेल १२८ तोला लेवे उसमें तुलसी और काली तुलसी का रस ६ सेर ३२ तोला मिलावे । तदनन्तर त्रिफला, अतीस, मूर्वा निसोथ, चीता का मूल, अरूसा की छाल, नीम की छाल, अमिलतास का गूदा, बच, सहोना की छाल, हरदी, दारुहरदी, गिलोय, सँभालू, पीपरि, कूठ, सरसों और सोंठ सम भाग इन सब द्रव्यों को लेकर कुल ३२ तोला कल्क बनाकर पूर्वोक्त तैल में मिलाकर धीमी आँच पर पकावे। सिद्ध होने पर छान कर रख लेवे । इस तैल का उपयोग पीने में, मालिस करने में, गण्डूष ( कुल्ला ) धारण में और वस्तिकर्म में होता है। यह तैल स्थौल्य रोग, कण्डू आदि चर्मरोग तथा अन्यान्य अनेक कफजन्य रोगों को नष्ट करता है ॥ २७-२९ ॥

दौर्गन्ध्यहर प्रदेह ।

शिरीषलामज्जकहेमलोध्रैस्त्वग्दोषसंस्वेदहरः प्रघर्षः । पत्राम्बुलोहाभयचन्दनानि शरीरदौर्गन्ध्यहरः प्रदेहः ॥ ३० ॥

सिरस की छाल, लामज्जक ( खसभेद ), नागकेशर और लोध, इनके चूर्ण का देह में घिसना ( मलने ) से चमड़ा के विकार और पसीना का अधिक आना दूर होते हैं । इसी प्रकार तेजपात, सुगन्धवाला, अगर, खस और चन्दन, इनको पानी में पीसकर लेप करने से शरीर की दुर्गन्धि दूर होती है ॥ ३० ॥

दौर्गन्ध्यहर लेप ।

वासादलरसो लेपात् शंखचूर्णेन संयुतः । बिल्वपत्ररसो वापि गात्रदौर्गन्ध्यनाशनः ॥ ३१ ॥

अरूसा की पत्तियों के रस में अथवा बिल्व पत्र के रस में शंख का चूर्ण मिलाकर लेप करने से शरीर की दुर्गन्धता नष्ट होती है ॥ ३१ ॥

जंघाकषाय ।

हरीतकी लोध्रमरिष्टपत्रं चूततत्वचो दाडिमवल्कलञ्च । एषोऽङ्गरागः कथितोऽङ्गनानां जंघाकषायश्च नराधिपानाम् ३२

जंघोद्वर्त्तनार्थकल्कः प्रायेण हि राजादीनां गजवाहनात् जंघा विवर्णता भवति तत्सवर्णकरणार्थं जंघासवर्णकषायविधि ।

हरीतकी, लोध, नीम की पत्तियाँ, आम की छाल और अनार की छाल, इन सब औषधों को एकत्र पानी के साथ पीस लेवे । यह कल्क स्त्रियों के लिये अङ्गरागरूप है। हाथी आदि की सवारी करने से राजा आदि धनिक पुरुषों की जांघों में जो विवर्णता उत्पन्न हो जाती है, उसको दूर करने के लिये इस कल्क का मर्दन करना चाहिये ॥ ३२ ॥

हरितालयोग ।

गोमूत्रपिष्टं विनिहन्ति कुष्ठं नगोज्झलं गोपयसा च युक्तम् । कक्षादिदौर्गन्ध्यहरं पयोभिः शस्तं वशीकृत् रजनीद्वयेन ३३ ॥

हरिताल को गोमूत्र में पीसकर लेप करने से कुष्ठ रोग नष्ट होता है, दुग्ध में पीसकर लेप करने से काख आदि की दुर्गन्ध दूर होती है और गोदुग्ध में पीसकर उसमें हलदी तथा दारुहलदी मिलाकर सेवन करने से वशीकरण होता है ॥ ३३ ॥

दुग्धहरिद्रा ।

चिञ्चापत्रस्वरसम्रक्षितं कक्षादियोजितं जयति । दुग्धहरिद्रोद्वर्त्तनमरिचादि देहस्य दौर्गन्ध्यम् ॥ ३४ ॥

चिञ्चापत्रस्वरसेनादौ म्रक्षणं कार्य्यं तदनन्तरं दुग्धहरिद्रां पिष्ट्वा उद्वर्त्तनं कार्य्यम् ।

पहिले इमली की पत्तियों के रस की शरीर में मालिस करके पश्चात् दूध में पिसी हुई

हल्दी की मालिश करने से देह की दुर्गन्ध दूर हो जाती है ॥ ३४ ॥

दुर्गन्धहर लेप और चूर्ण।

दलजलजलघुमलयाभयविलेपो हरति देहदौर्गन्ध्यम्। विमलारनालसहितं पीतमिवालम्बुषाचूर्णम् ॥ ३५ ॥

तेजपात, सुगन्धवाला, अगर श्वेत चन्दन और खस, इनको पानी के साथ पीस कर लेप करने से शरीर की दुर्गन्ध दूर होती है। गोरखमुण्डी के चूर्ण को फाँक कर निर्मल कांजी पीने से भी शरीर की दुर्गन्ध दूर होती है ॥ ३५ ॥

स्थौल्य में उद्वर्तन।

शैलेयकुष्ठागुरुदेवदारुकौन्तीसमुस्तान्यथ पञ्चपत्रैः। श्रीवासपृक्कारखपुष्पदेवपुष्पं तथा सर्वमिदं प्रपिष्य ॥ धुस्तूरपत्रस्य रसेन गाढमुद्वर्त्तनं स्थौल्यहरम् प्रदिष्टम् ॥ ३६॥

छरीला, कूठ, अगर, देवदारु, रेणुका, मोथा, पञ्चपत्र (आम, जामुन, कैथ, मातुलुङ्ग, बिल्व) इनके पत्ते, चीड़, पृक्का, तुलसी, लौंग, इन्हें इकट्ठा कर धतूरे के रस में पीसकर उबटना करने से मेदरोग दूर होता है ॥ ३६ ॥

त्र्यूषणाद्य लौह।

त्र्यूषणं विजया चव्यचित्रकं विडभौद्भिदम् । वागुजीसैंधवञ्चैव सौवर्चलसमन्वितम् ॥ ३७ ॥ अयश्चूर्णेन संयुक्तं भक्षयेन्मधुसर्पिषा। स्थौल्यापकर्षणं श्रेष्ठं बलवर्णाग्निवर्द्धनम्। मेहघ्नं कुष्ठ शमनं सर्वव्याधिहरं परम् ॥ ३८ ॥

त्रिकटु (सोंठ, मिर्च, पीपरि), भाँग, चव्य, चित्रक, विड्लवण, उद्भिदलवण, बाकुचीजीरी, सेंधानमक, कालानमक, प्रत्येक द्रव्य बराबर-बराबर लेकर और इन सम्पूर्ण के बराबर लौह भस्म मिलाकर चर्पणी भरद मिश्रित कर रख ले। इसको मधु तथा घृत के साथ सेवन करने से कुष्ठ, प्रमेह, तथा स्थूलता नाश होकर बल और जठराग्नि बढ़ती है। रंग निखर जाता है। मात्रा २।४ रत्ती ॥ ३७-३८ ॥

विडङ्गाद्य लौह।

विडङ्गत्रिफलामुस्तैः कणा नागरकेण च। बिल्वचन्दनह्रीवेरं पाठोशीरं तथा बला ॥ ३९ ॥ एषां सर्वसमं लौहं जलेन घटिकां कुरु। घृतयोगेन कर्त्तव्या चतुर्गुञ्जा मिता वटी ॥ ४० ॥ अनुपानं प्रयोक्तव्यं लौहादष्टगुणं पयः। सर्वमेहहरं बल्यं कान्त्यायुर्बलवर्द्धनम् ॥ ४० ॥ अग्निसन्दीपनकरं वाजीकरणमुत्तमम्। सोमरोगं निहन्त्याशु भास्करस्तिमिरं यथा ॥ ४२ ॥ विडङ्गाद्यमिदं लौहं सर्वरोगनिसूदनम् ॥ ४३ ॥

वायविडङ्ग, त्रिफला, (हर्रे, बहेड़ा, आँवला), मोथा, पिप्पली, सोंठ, बेलफल का गूदा, लाल चन्दन, गन्धबाला, पाढ़, खस, बलामूल, ये सम्पूर्ण द्रव्य एक-एक हिस्सा, लौहभस्म १२ हिस्सा इन सबको इकट्ठा कर जल से घोटकर घी से गोली बनावें। मात्रा—२ रत्ती से ४ रत्ती तक। अनुपान दूध। इस औषध के सेवन करने से प्रमेह तथा सोमरोग दूर होता है। यह लौह अग्नि को बढ़ानेवाला तथा वाजीकरण है। बल, आयु तथा कान्तिवर्धक है ॥ ३९-४३ ॥

वह्न्याग्नि लौह।

सूतभस्मसतालञ्च लौहं ताम्रं समं समम्। मर्दयेत्सूर्यपत्रेण चास्य वल्लं प्रयोजयेत् ॥ ४४ ॥ मधुना स्थूलरोगे च शोथे शूले तथैव च। मद्याज्यनुपानञ्च देयं चापि कफोल्बणे ॥ ४५ ॥

रससिन्दूर, हरताल, लौहभस्म, ताम्रभस्म, इन सम्पूर्ण द्रव्यों को बराबर लेकर मिला के

और मदार के पत्तों के रस से घोटकर गोली बना ले, मात्रा १ रत्ती से २ रत्ती तक, अनुपान शहद मेदरोग में कफज शोथ तथा शूल में शहद व घी के साथ ॥ ४४-४५ ॥

### वडवाग्नि रस।

शुद्धसूतं समं गन्धं ताम्रं तालं समं समम्। अर्कक्षीरैर्दिनं मर्द्यं सौद्रैर्देयं द्विगुञ्जकम् ॥ ४६ ॥ वडवाग्निरसो नाम्ना स्थौल्यमाशु नियच्छति ॥ ४७ ॥

पारा, गन्धक, ताम्रभस्म, हरिताल, इन्हें बराबर बराबर मिलाकर मदार के दूध से गोली बना ले। मात्रा—१ रत्ती से २ रत्ती तक। अनुपान, शहद। ये गोलियाँ स्थूलतानाशक हैं ॥ ४६-४७ ॥

### महासुगन्धित तैल।

चन्दनं कुङ्कुमोशीरप्रियङ्गुत्रुटिरोचनाः। तुरुष्कागुरुकस्तूरी कर्पूरं जातिपत्रिका ॥ ४८ ॥ जातिकक्कोलपूगानां लवङ्गस्य फलानि च। नलिका नलदं कुष्ठं हरेणुतगरं घनम् ॥ ४९ ॥ नखं व्याघ्रनखं स्पृक्का चोलं दमनकं मुरा। स्थौणेयकं चोरकञ्च शैलेयं शैलवालुकम् ॥ ५० ॥ सरलं सप्तपर्णश्च लाक्षामलकौ तथा। लामज्जकं पद्मकञ्च धातक्याः कुसुमानि च ॥ ५१ ॥ सपौण्डरीकं कर्पूरं समांशैः शाणमात्रकैः। महासुगन्धमित्युक्तं तैलं प्रस्थेन साधयेत् ॥ ५२ ॥ प्रस्वेदमलदौर्गन्ध्यकण्डूकुष्ठ हरं परम्। अनेनाभ्यक्तगात्रस्तु वृद्धः सप्ततिकोऽपि वा ॥ ५३ ॥ युवा भवति शुक्राढ्यः स्त्रीणामत्यन्तवल्लभः। सुभगो दर्शनीयश्च गच्छेच्च प्रमदाशतम् ॥ ५४ ॥ वन्ध्यापि लभते गर्भं षण्ढोऽपि पुरुषायते। अपुत्रः पुत्रमाप्नोति जीवेच्च शरदां शतम् ॥ ५५ ॥

तिल का तैल २ प्रस्थ (१२८ तोला) कल्क के लिए लाल चन्दन, केसर, खस, प्रियङ्गु, छोटी इलायची, गोरोचन, शिलारस, अगर, कस्तूरी, कपूर, जावित्री, जायफल, सुरचीनी, सुपारी, लौंग, नलिका, जटामांसी, कूठ, रेणुका, तगर, केवटी, मोथा, नखी, व्याघ्रनख, स्पृक्का, चोल, दमनक, मुरामांसी, स्थौणेयक, (थुनेर), चोरक, छैलछबीला, एलवालुक, चीड़, फीम्ड, धाय के फूल, पुण्डरीक काष्ठ, कपूर, सप्तपर्णी की छाल, लाख, आँवला, उशीरभेद, पद्माख, उपरोक्त सम्पूर्ण द्रव्यों को बराबर बराबर एक-एक शाण (४ मासे) लेना चाहिए और इनसे विधि के अनुसार तैल सिद्ध करे। इस प्रकार सुगन्धित तैल के प्रयोग से पसीना, मलिनता, दुर्गन्धि, खुजली एवं कुष्ठ आदि रोग दूर होते हैं। इस तैल के अभ्यङ्ग से वृद्ध पुरुष भी तरुणता को प्राप्त करता है। पुरुष वीर्यवान् होकर स्त्रियों का प्रिय बन जाता है तथा भाग्यवान् और सुन्दर रूपवाला बन जाता है। सौ स्त्रियों से भोग करने की शक्ति उत्पन्न होती है। इस तैल के सेवन करने से वन्ध्या स्त्रियाँ गर्भवती होती हैं। नपुंसक पुरुषत्व को प्राप्त करता है। पुत्रहीन पुत्र पाता है और १०० वर्ष की दीर्घ आयु प्राप्त करता है ॥ ४८-५५ ॥

### स्थौल्य में पथ्य।

पुराणशालयो मुद्गकुलत्थयवकोद्रवाः। लेखना बस्तयश्चैव सेव्या मेदस्विना सदा ॥ ५६ ॥

स्थौल्यरोगवाले पुरुष को चाहिए कि पुराने शालि चावल, मूँग, कुलथी जौ तथा कोदो आदि का आहार रक्खे तथा लेखनबस्तियों का हमेशा उपयोग करता रहे ॥ ५६ ॥

अन्यच्च—

चिन्ताश्रमो जागरणं व्यवायं मोद्वर्तनं

लंघनमातपश्च । हस्त्यश्वयानं भ्रमणं विरेकः मच्छर्दनं चाप्यथ तर्पणं च ॥ ५७ पुरातना वैणवकोरदूषश्यामाकनीवारप्रियंगुजूर्णाः । यवाः कुलत्थाश्चणकामसूरा मुद्गास्तुवर्यश्च मधूनि लाजाः ॥ ५८ ॥ कटूनि तिक्तानि कषायकानि तक्रं सुराचिंगलमत्स्य एव । दग्धानि वार्ताकफलानि चापि फलत्रयं गुग्गुलुरायसं च ॥ ५९ ॥ शिरीषलोध्रद्रहरीतकीनां चूर्णेन गात्रस्य विलेपनं च । कटुत्रयं सर्षपतैलमेलारूक्षाणि सर्वाणि च मुख्यतैले ॥ ६० ॥ पत्रोरस्थशाकागुरुलेपनानि प्रतप्तनीराणि शिलाजतूनि । एतानि सर्वाणि निषेवितानि मेदोगदे सत्वरमुत्तियन्ति ॥ ६१ ॥

चिन्ता, परिश्रम, जागना, मैथुन, उबटना, लंघन, धूप में घूमना, हाथी घोड़े की सवारी, घूमना ( मार्ग चलना ), वमन, विरेचन, अपतर्पण, पुराने बाँस के चावल, कोदों, समा, पसाई, नीवार, प्रियगु, ज्वार, जौ, कुलथी, चना, मसूर, मूँग, अरहर की दाल, शहद, खील, कड़वे, चरपरे, कषैले पदार्थ, छाछ, मद्य, चिंगल जाति की मछली, बैंगन का भुरता, हरड़, बहेड़ा, आँवला, गूगल, लोहभस्म और सिरस, लोध, हरड़ के चूर्ण की मालिश, सोंठ, मिर्च, पीपल, सरसों का तैल ( मालिश ), इलायची, सम्पूर्ण रूखे पदार्थ, तिल का तैल ( मालिश ), पत्तों के साग, अगर का लेप, गरम जल, शिलाजीत इन सम्पूर्ण पदार्थों का सेवन स्थूलतानाशक है ॥ ५८-६१ ॥

अपथ्यानि ।

स्नानं रसायनं शालीन् गोधूमान् सुखशीलताम् । क्षीरेक्षुविकृतीर्मापान् सौहित्यं स्नेहनानि च ॥ ६२ ॥ मत्स्यं मांसं दिवा निद्रां स्रगन्धान् मधुराणि च । समभावत्वमन्विच्छन् मेदस्वी परिवर्जयेत् ॥ ६३ ॥

इति भैषज्यरत्नावल्यां मेदरोगाधिकारः समाप्तः ॥

स्थूल पुरुष को रोग के निवारणार्थ निम्नांकित बातों को त्यागना चाहिए । जैसे, ठण्डे पानी से स्नान, रसायन, नया चावल, गेहूँ, दिन भर पड़े रहना, दूध, मछली, मांस, दिन में सोना, मालादि पहरना, इत्यादि वस्तुओं का लगाना, मीठा आदि वस्तुओं को छोड़ दे ॥ ६२-६३ ॥

इति सरयूप्रसादत्रिपाठिविरचितायां भैषज्यरत्नावल्या रत्नप्रभाख्यायां व्याख्यायां मेदरोगचिकित्सा समाप्तः ॥

---

## आमाशयरोगाधिकारः ।

आमाशयिक रोगों के लक्षण ।

आमाशये बहुविधा हेतुभिर्बहुभिर्नृणाम् । पृथुलक्षणसम्पन्ना जायन्ते बहवो गदाः ॥ १ ॥ सामान्यं लक्षणं तेषां यरुद्वैलपरिस्रयः । मायश्चोतक्लेशवमने दौर्बल्यं सदनं भ्रमः ॥ २ ॥ शूलदाहौ विवर्णत्वं कृशत्वञ्च ज्वरोऽरुचिः । इन्द्रियाणाञ्च शैथिल्यं भवेन्मूर्च्छा च दारुणा ।

आमाशय में अनेक कारणों से भिन्न-भिन्न लक्षणवाले बहुत से रोग उत्पन्न हो जाते हैं । आमाशय के हर प्रकार के रोगों में प्रायः मन्द पड़ जाती है । इसी प्रकार प्रायः उबकाई का आना, वमन होना, दुर्बलता, देह में पीड़ा, भ्रम, शूल, दाह, विवर्णता, कृशता, ज्वर, अरुचि, इन्द्रियों की शिथिलता और दारुण मूर्च्छा ये सब लक्षण उपस्थित होते हैं ॥ १-२ ॥

उनकी चिकित्सा।

आमाशयिकरोगेषु हेतुदोषानुसारतः। विदध्याद्दीपनं वह्नेः पाचनं चानुलोमनम् ॥ ४ ॥

आमाशय के रोगों में निदान और दोषों का विचार करके अग्नि को दीप्त करनेवाले, पाचक और वायु के अनुलोमन करनेवाले औषधों का प्रयोग करना चाहिये ॥ ४ ॥

पिप्पल्यादिक्वाथ।

पिप्पली शारिवा श्यामा अभयामलकं शटी। क्वाथमेषां पिबेत् प्रातः सक्षौद्रञ्च सशर्करम् ॥ ५ ॥ आमाशयभवान् रोगानग्नेर्मान्द्यं बलक्षयम्। शूलारोचकहृल्लासान् नाशयत्येष निश्चितम् ॥ ६ ॥

पीपरि, अनन्तमूल, श्यामालता, हरीतकी, आँवला और कचूर; इनके क्वाथ में मधु और चीनी मिलाकर पीने से सब प्रकार के आमाशय के रोग, अग्निमान्द्य, दुर्बलता, शूल, अरुचि और वमनवेग आदि निःसंदेह नष्ट हो जाते हैं ॥ ५-६ ॥

अमृतार्णव

अमृतं रसगन्धौ च लोहमभ्रं समांशकम्। भावयेद् वह्निनीरेण सप्तकृत्वः पृथक् पृथक् ॥ ७ ॥ गुञ्जैकप्रमितं खादेद् यथा दोषानुपानतः। (आमाशयिकरोगेषु ज्वरेषु विषमेषु च) ॥ ८ ॥

विष पारा, गन्धक, लोहभस्म, और अभ्रकभस्म; इन सब औषधों को समभाग लेकर चीता के रस में ७ बार भावना देकर खरल करके एक-एक रत्ती की गोलियाँ बना लेवे। दोषानुकूल अनुपान के साथ सेवन करने से आमाशय के रोग और सब प्रकार के विषमज्वर नष्ट होते हैं ॥ ७-८ ॥

त्रिपुरसुन्दर रस।

सिन्दूरमभ्रं स्वर्णं हेममाक्षिकं मुक्ताफलं हेम च तुल्यभागिकम्। कन्याम्बुना मर्दय सप्तवासरं गुञ्जाप्रमाणां वटिकां विधेहि च ॥ ९ ॥ रसोत्तमस्यास्य निषेवणान्नरः आमाशयोत्थामयरोगसंगतः। गत्वा विमुक्तिं बलवीर्य्यसंयुतो मेधान्वितः सौम्यवपुश्च जायते ॥ १० ॥

रससिन्दूर, अभ्रकभस्म, स्वर्णमाक्षिक, मुक्ता और स्वर्ण प्रत्येक द्रव्य को सम भाग लेकर घृतकुमारी के रस में ७ दिन पर्यन्त घोटकर एक-एक रत्ती की गोलियाँ बनावे। इसका सेवन करने से मनुष्य आमाशयोत्पन्न सब प्रकार के रोगों से मुक्त होकर, बल वीर्यसम्पन्न, मेधावी और कान्तिमान् होता है ॥ ९-१० ॥

आमाशयिकरोग में पथ्यापथ्य।

अन्नपानादिकं सर्वं सुपचं यच्च पोषणम्। आमाशयगदे सेव्यं दुर्जरञ्च विवर्जयेत् ॥ ११ ॥

इति भैषज्यरत्नावल्यामामाशयरोगाधिकारः समाप्तः ॥

आमाशय के रोगों में उन्हीं सब अन्नपानादिकों का सेवन करना चाहिये, जो सुपाच्य और पुष्टिकारक हों। तथा गुरुपाक अन्नपानादि सर्वथा त्याग देने चाहिये ॥ ११ ॥

इति सरयूप्रसादत्रिपाठिविरचितायां भैषज्यरत्नावल्या रसप्रभाख्यायां व्याख्यायामामाशयरोगाधिकारः समाप्तः ॥

---

## छर्दिरोगाधिकारः

वमन की सामान्य चिकित्सा।

आमाशयोत्क्लेशभवाहि सर्वाश्छर्द्यो मतालङ्घनमेव तस्मात्। प्राक् कारयेत् मारुतजां विमुच्य संशोधनं वा कफपित्तहारि ॥ १ ॥

अत्र लङ्घनमल्पदोषविषयं संशोधनं बहुदोषविषयमिति व्यवस्था। संशोधनमत्र विरेचनम्।

आमाशय की विकृति क्षुब्ध से ही सब प्रकार के वमन रोग उत्पन्न होते हैं, अतएव यदि दोषों की अल्पता में हो तो वमनरोग में पहिले लङ्घन कराना चाहिये। दोषों की प्रबलता हो तो पहिले कफपित्तनाशक विरेचन का प्रयोग करे। किन्तु वातजन्य वमनरोग में विरेचन तथा लङ्घन कराना निषिद्ध है[1] ॥ १ ॥

छर्दिनाशकमुष्टियोग।

चन्दनेनाक्षमात्रेण संयोज्यामलकीरसम्। पिबेत् माक्षिकसंयुक्तं छर्दिस्तेन निवर्त्तते ॥ २ ॥

चन्दनमत्र श्वेतमिति भानुदास। चन्दनकर्षचतुर्गुणामामलकीरसम्।

श्वेत चन्दन १ तोला और आँवला का रस १ तोला; इनको एकत्र मिलाकर, उसमें थोड़ा शहद मिलाकर सेवन करने से वमनरोग नष्ट होता है ॥ २ ॥

क्वाथः पर्पटजः पीतः सक्षौद्रश्छर्दिनाशनः ॥ ३ ॥

पित्तपापड़ा के क्वाथ में थोड़ा शहद मिलाकर पीने से वमनरोग नष्ट होता है ॥ ३ ॥

हरीतकीनां चूर्णन्तु लिह्यान्माक्षिकसंयुतम्। अधोभागीकृते दोषे छर्दिः शान्तिं निवर्त्तते ॥ ४ ॥

मधु के साथ हरीतकी के चूर्ण का सेवन करने से दोष के अधोगत हो जाने पर वमनरोग नष्ट हो जाता है ॥ ४ ॥

छर्दिहर कषाय।

कषायो मुद्गमुद्गस्य सलाजमधुशर्करः छर्द्यतीसारतृड्दाहज्वरघ्नः संप्रकीर्त्तितः ॥ ५ ॥

भुनी हुई मूँग जल में पकाकर उसमें धान के लावा का चूर्ण मिलावे। तदनन्तर थोड़ा शहद और थोड़ी मिश्री मिलाकर पान करे। इससे वमन, अतिसार, प्यास, दाह और ज्वररोग नष्ट होते हैं ॥ ५ ॥

धात्र्यादि।

धात्रीरसः कपित्थस्य पिप्पलीमरिचान्वितः। क्षौद्रेण युक्तः शमयेल्लेहोऽयं छर्दिमुल्बणाम् ॥ ६ ॥

अत्र जाती आमलकी।

आँवले का रस १ तोला और कैथ का रस १ तोला, थोड़ा थोड़ा पीपर का चूर्ण, मिरिच का चूर्ण और शहद मिलाकर सेवन करने से तीव्र वमनरोग शान्त होता है ॥ ६ ॥

अवलेहत्रय।

लाजाकपित्थमधुमागधिकोषणानां क्षौद्राभयाविषडुधान्यकजीरकाणाम्। पथ्यामृताभरिचमाक्षिकपिप्पलीनां लेहास्त्रयः सकलवम्यरुचिप्रशान्त्यै ॥ ७ ॥

धान की लावा, कैथ, मधु, पीपरि और मरिच। मधु हरीतकी, सोंठ मिरिच, पीपरि, धनिया और जीरा। हरीतकी, गिलोय, मरिच मधु और पीपरि इन तीन प्रकार के अवलेहों का सेवन करने से सब प्रकार के वमन और अरोचकरोग शान्त होते हैं ॥ ७ ॥

एलादिचूर्ण।

एलालवङ्गगजकेशरकोल मज्जलाजप्रियङ्गुघनचन्दनपिप्पलीनाम्। चूर्णानि माक्षिकसितासहितानि लीढ्वा छर्दिं निहन्ति कफमारुतपित्तजाताम् ॥ ८ ॥

---

[1] यह मत भी है कि पित्तहारी संशोधन (विरेचन) कफहारी संशोधन अर्थात् वमन कराना चाहिये। सुश्रुत में कहा है 'छर्दिषु बहुदोषासु वमनं हितमुच्यते' अर्थात् बहुदोष प्रधान वमन में यथोपयिक्त वमन ही हितकारक है।

छोटी इलायची, लौंग, नागकेशर, बेर की गुठली, धान की खील, प्रियगु, नागरमोथा, लालचन्दन और पीपरि, सम भाग इन सब द्रव्यों को लेकर चूर्ण बना लेवे। इस चूर्ण को मधु और चीनी में मिलाकर चाटने से कफज पित्तज और त्रिदोषज वमनरोग नष्ट होता है ॥ ८ ॥

अश्वत्थवल्कलं शुष्कं दग्ध्वा निर्वापितं जले। तज्जलं पानमात्रेण छर्दिमाशु व्यपोहति ॥ ९ ॥

अश्वत्थ ( पीपल ) वृक्ष की सूखी छाल को जलाकर, किसी पात्र में रक्खे हुए जल में बुझाकर बुझा देवे। तदनन्तर उस जल को छानकर पीने से शीघ्र ही वमन रोग शान्त हो जाता है ॥ ९ ॥

वान्तिहृद्रस ।

अयः शङ्खवलीसूतं, खल्वेतुल्यं विमर्दितम। कन्या कनक काकेरी रसैर्गोलं विधीयताम् ॥ १० ॥ सप्त मृत्कर्पटैर्लिप्त्वा पुटितो वान्तिहृद्रसः। द्विवल्लः कृमि रोगेऽपि साजमोदः सवेल्लकः ॥ ११ ॥ नांसि हारेण मुनिना मोक्तोऽयमधुनायुतः पिप्पलक्षार पानीयं पाययेद्वान्ति हृद्रसः ॥ १२ ॥

लोह और शङ्खभस्म, शुद्धगन्धक और पारा समान भाग लेकर कज्जली कर घीकुमार, धतूरा और मकोनियाँ के रसों से १, १ दिन घोटकर गोला बनाकर शराब सम्पुट में बन्द कर ७ कपड़ मिट्टी देकर सूखने पर लघुपुट की आँच दे ठंढा होने पर निकाल कर रख देवे, इसमें से २ रत्ती की मात्रा अजमोद और विडङ्ग के साथ मिलाकर मधु के साथ चाटने से सब तरह की वमनी मिट जाती है। तृषा लगने पर पीपल की राख का पानी पिलावे। २ ३ रत्ती पर्याप्त है ॥ १०-१२ ॥

रसेन्द्र ।

अजाजीधान्यकृष्णाभिः सक्षौद्राभिः कटुत्रिकैः। एभिः सार्द्धं भस्मसूतः सेव्यो वान्तिप्रशान्तये ॥ १३ ॥

जीरा, धनियां, पीपरि मधु त्रिकटु और रससिन्दूर सम भाग इन सब औषधों को लेकर खरल करके रख लेवे। इसका सेवन करने से वमनरोग शान्त होता है। मात्रा-१ रत्ती से ४ रत्ती तक ॥ १३ ॥

वृषध्वज रस ।

शुद्धं रसं गन्धकञ्च लौहमेव समांशिकम्। मधुकं चन्दनं धात्री सूक्ष्मैला सलवङ्गकम् ॥ १४ ॥ टङ्कणं पिप्पली मांसी तुल्यं पारदसम्मितम्। विदारीक्षुरसाभ्याञ्च भावयेद्दिनसप्तकम् ॥ १५ ॥ संशोष्य मर्दयेद्यामं छागीदुग्धेन यत्नतः। द्विगुञ्जं भक्षयेन्नित्यं विदारीरससंयुतम् ॥ १६ ॥ वातात्मिका पित्तयुतां छर्दिं हन्ति सशोणिताम्। वृषध्वजरसो नाम वृषध्वजेन निर्मितः ॥ १७ ॥

पारा, गन्धक, लौहभस्म, मुलहठी, लाल चन्दन आँवला, छोटी इलाइची, लौंग, सुहागा, पीपल, जटामासी, प्रत्येक बराबर लेकर इन्हें इकट्ठा कर विदारीकन्द के रस तथा इक्षुरस से अलग अलग सातरोज भावना देकर सुखा ले। इसके बाद बकरी के दूध से ३ घण्टे तक घोटे और २ रत्ती प्रमाण की गोली बना ले। अनुपान विदारीकन्द का रस ( विदारीक्षु का अर्थ यहाँ पर शास्त्रियों लगाते हैं )। इस रस के सेवन करने से वातज, पित्तज तथा खूनवाली छर्दि दूर होती है ॥ १४-१७ ॥

छर्दिरोग में पथ्य ।

विरेचनच्छर्दनलङ्घनानि स्नानं मृगालाजकृतश्च मण्डः। पुरातना षष्टिक-

शालिमुद्गकलायगोधूमयवा मधूनि ॥ १८ ॥ शशादिभुक्तित्तिरिलावकाद्या मृगद्विजा जाङ्गलसंज्ञिताश्च । मनोज्ञनानारसगन्धरूपा रसाश्च यूषा अपि षाडवाश्च ॥ १९ ॥ हरीतकीदाडिमबीजपूरं जातीफलं बालकनिम्बवासा । सिता शताह्वा करिकेशराणि गव्या मनःप्रीतकरा हिताश्च ॥ २० ॥ रागाः खडाः काम्बलिकाः सुरा च वेत्राग्रकुस्तुम्बुरुनारिकेलम् । जम्बीरधात्रीसहकारकोलद्राक्षाकपित्थानि पचेलिमानि ॥ २१ ॥ भुक्तस्य वक्त्रे शिशिराम्बुसेकः कस्तूरिका चन्दनमिन्दुपादाः । मनोज्ञगन्धान्यनुलेपनानि पुष्पाणि पत्राणि फलानि चापि ॥ २२॥ रूपाणि शब्दाश्च रसाश्च गन्धाः स्पर्शाश्च ये, यस्य मनोऽनुकूलाः । दाहश्च नाभेस्त्रिवलोपरिष्टादिदं हि पथ्यं वमनातुरेषु ॥ २३ ॥

विरेचन, वमन, लङ्घन, स्नान, शरीरशुद्धि, आश्वासन, पुराने साँठी के चावल, शालि, मूँग, मटर, गेहूँ, जौ, शहद, खरगोश, मोर, तीतर, लावा आदि जङ्गली पशु-पक्षियों के मांस, मन के लुभानेवाले अनेक प्रकार के रस, गन्ध एवं रूप, मांसरस, मूँग आदि के यूष, षाडव, हरड़, अनार, बिजौरा, जायफल, बाला, नीम, अडूसा, खांड, सोया, नागकेशर, तथा अन्य रुचिकर तथा हित करनेवाले पदार्थ, राग-खड, काम्बलिक, ( फल विशेष द्वारा संपादित द्रव्य ) सुरा, बेंतअग्र, धनियाँ, नारियल, जम्बीर, आंवला, आम, बेर, अंगूर, कैथ, आदि, भोजन के बाद शीतल जल से मुँह धोना, कस्तूरी, चन्दन, चाँदनी, सुन्दर सुगन्ध, अनुलेपन, पुष्प, पत्र, फल, प्रियरूप, शब्द, रस, गन्ध स्पर्श तथा नाभि के तीन बलों के ऊपर दाह।

उपर्युक्त सम्पूर्ण बातें वमनरोगियों के लिए पथ्य हैं ॥ १८-२३ ॥

अपथ्य ।

नस्यं बस्तिं स्वेदनं स्नेहपानं रक्तस्रावं दन्तकाष्ठं द्रवान्नम् । बीभत्सेक्षां भीतमुद्वेगमुष्णं स्निग्धासात्म्यहृद्यवैरोधिकान्नम् ॥ २४ ॥ शिम्बी बिम्बी कोषवत्यो मधूकं चित्राभेलां सर्षपान् देवदालीम् । व्यायामं च अग्निकामञ्जनञ्च छर्द्यां सत्यां वर्जयेदप्रमत्तः ॥ २५ ॥

इति भैषज्यरत्नावल्यां छर्दिरोगाधिकारः समाप्तः ॥

नस्य, बस्ति, स्वेद, स्नेहपान, रक्तस्राव, दातून करना, पतले भोजन, घिनावनी चीजों का देखना अथवा डर, उद्वेग, गरम भोजन, गर्मी, अत्यन्त चिकने, नामाफिक, अप्रिय तथा विरोधी भोजन, सेम, कुन्दरू, तोरई, महुआ, चित्रा, इलायची, सरसों, देवदाली, व्यायाम, अग्नि का सेवन, सुरमा आदि लगाना इनका वमनरोग में त्याग करना चाहिए ॥ २४-२५ ॥

इति सरयूप्रसादत्रिपाठिविरचितायां भैषज्यरत्नावल्या रत्नप्रभाख्यायां व्याख्यायां छर्दिरोगाधिकारः समाप्तः ॥

---

## दाहरोगाधिकारः ।

दाह की सामान्य चिकित्सा ।

यत् पित्तज्वरदाहोक्तं दाहे तत् सर्वमिष्यते ॥ १ ॥

पित्तज्वरजन्य दाह में जो-जो चिकित्सायें कही गई हैं, साधारण दाहरोग में उन्हीं सब चिकित्साओं का प्रयोग करना चाहिए ॥ १ ॥

दाहरोग में उपचार ।

चंदनाम्बुकणस्यन्दितालवृन्तोपवीजितः । सुप्याद्दाहार्दितोऽम्भोजकदलीदलसंस्तरे २

चन्दन घिसकर जल में घोल देवे, तदनन्तर उसी जल से ताड़ की पङ्खी को भिगो करके हवा करे। तथा कमल अथवा केला की पत्तियों पर शयन करावे। इन क्रियाओं से दाहरोग में शान्ति होती है ॥ २ ॥

शिशिरजल ।

परिषेकावगाहेषु व्यजनानाञ्च सेवने ।
शस्यते शिशिरं तोयं तृष्णादाहोपशान्तये ॥ ३ ॥

शरीर पर छिड़कने (अथवा मुख और हाथ आदि धोने) के लिये, स्नान करने के लिये और पंखी को गीला करने के लिये शीतल जल का उपयोग करने से तृष्णा और दाह की शान्ति होती है ॥ ३ ॥

फलिन्यादि प्रलेप ।

फलिनीलोध्रसेव्याम्बुहेमपत्रकुटन्नटम् ।
कालीयकरसोपेतं दाहे शस्तं प्रलेपनम् ॥ ४ ॥

प्रियंगु, लोध, खस, सुगन्धवाला, नागकेसर तेजपात और नागरमोथा; इनको महीन पीसकर कालीयक (चन्दन विशेष) के क्वाथ में मिलाकर लेप करने से दाहरोग शान्त होता है ॥ ४ ॥

नाम्बुस्नान ।

ह्रीवेरपद्मकोशीरचन्दन क्षोदवारिणा ।
सम्पूर्णामवगाहेत द्रोणीं दाहार्दितो नरः ॥ ५ ॥

सुगन्धवाला, पद्माख, खस और चन्दन के चूर्ण से युक्त जल को एक नाँद (टब) में भर देवे। तदनन्तर उसमें स्नान कराने से दाहरोग नष्ट होता है ॥ ५ ॥

आरनालार्द्रवाससा । सर्वाङ्गमारनालार्द्रवाससा ।
लामज्जकेन शुक्तेन चन्दनेनानुलेपयेत् ॥
सर्पिषा शतधौतेन लेपाद्दाहः प्रशाम्यति ॥ ६ ॥

काँजी से भीगे हुए वस्त्र द्वारा रोगी के शरीर को ढकने से दाहरोग शान्त होता है या सौ बार के धोये हुए घी का लेप करने से दाह शान्त होता है। अथवा खस तथा चन्दन को शुक्त में मिलाकर लेप करने से दाहरोग शान्त होता है ॥ ६ ॥

चन्दनादि क्वाथ ।

पटीरपर्पटोशीरनीरनीरदनीरजैः ।मृणालमिसधन्याकयष्ट्यामलकैः कृतः ॥ ७ ॥
अर्धशिष्टः शृतः शीतः पीतः क्षौद्रसमन्वितः । क्वाथो व्यपोहयेद्दाहं नृणाञ्ज्वरमोल्बणम् ॥ ८ ॥

चन्दन, पित्तपापड़ा, खस, गन्धबाला, मोथा, कमल की जड़, कमल की डण्डी, सौंफ, धनियाँ, मुलेठी, आँवला सम्पूर्ण मिलाकर २ तोला लेना चाहिए। इसके बाद इनको ३२ तोले जल में पकाना चाहिये। जब १६ तोले शेष रह जावे तो उतार ले। इस काढ़े में शहद मिलाकर पीने से दाहरोग शान्त होता है ॥ ७-८ ॥

दाहान्तक रस ।

सूताद् पञ्च क्षितश्चैकं कृत्वा पिण्डं सुशोभनम् । जम्बीररसरसैर्मर्द्य सूततुल्यञ्च गन्धकम् ॥ ९ ॥ नागवल्लीदलैः पिष्ट्वा ताम्रपत्रं प्रलेपयेत् । प्रपुटेद् भूधरे यन्त्रे यावद् भस्मत्वमाप्नुयात् ॥ १० ॥ गुञ्जार्धमार्द्रकद्राक्षैरनुपानेन च योजयेत् । निहन्ति दाहसन्तापं मूर्च्छां पित्तसमुद्भवाम् ॥ ११ ॥

पारा ५ भाग, ताँबा १ भाग, शुद्ध पारा तथा गन्धक की कज्जली करके जम्बीरी के रस या पान के रस से घोटकर ताम्रभस्म पर प्रलेप करे। तत्पश्चात् भूधरयन्त्र द्वारा जब तक पाक करे कि सम्पूर्ण भस्म हो जावे। मात्रा ½ रत्ती से १ रत्ती तक। अनुपान—अदरख का रस तथा त्रिफला का चूर्ण। यह रस पित्त से उत्पन्न मूर्छा तथा दाह को शान्त करनेवाला है। ताम्रभस्म की परीक्षा कर ले कि निरुत्थ हो गई है अन्यथा काम [illegible]

### सुधाकर रस।

सिन्दूराभ्रहेमानि मौक्तिकं त्रिफलाम्भसा। शतपुत्रीरसेनापि मर्दयेत् सप्तसप्तधा ॥ १२ ॥ ततो रक्तिमितां कुर्याद् घटीं छायाप्रशोषिताम्। एकैकां योजयेत्तान्तु यथादोषानुपानतः ॥ १३ ॥ रससुधाकरः सोऽयं हन्ति दाहं महाबलम्। प्रमेहानपि वातास्रं बलशुक्रकरः परः ॥ १४ ॥

रससिन्दूर, अभ्रकभस्म, सुवर्णभस्म, मुक्ताभस्म, इनको त्रिफला (हर्र, बहेड़ा, आँवला) तथा शतावर के रस से अलग अलग सात बार भावना देकर १ रत्ती से १ रत्ती प्रमाण की गोली बना ले। इसमें दोषानुसार अनुपान की व्यवस्था करनी चाहिए। इस रस के सेवन करने से दाह, प्रमेह, वातरक्त आदि रोगों को शान्त करता है तथा बल वीर्यवर्धक है ॥ १२-१४ ॥

### दाह में पथ्य।

शालयः षष्टिका मुद्गा मसूराश्चणका यवाः। धन्वमांसरसा लाजमण्डस्तत्सक्तवः सिता ॥ १५ ॥ शतधौतं घृतं दुग्धं नवनीतं पयोभवम्। कूष्माण्डं कर्कटी मोचं पनसं स्वादुदाडिमम् ॥ १६ ॥ धारावेश्म तथा सुशीतलशशीज्योत्स्ना तु पानानि च वातः शीतलचन्दनं च कमलं प्रेमालुगन्धस्तथा। रामा गूहनमर्दनं स्तनयुगं शुक्लार्द्रवस्त्राणि च। क्षीरं शर्करयांबलोहरजतं दाहप्रशान्त्यै हितम् ॥ १७ ॥

शालि, षष्टिक, मूँग, मसूर, चने, जौ, जाङ्गली पशु, पक्षियों के मांस का रस, लाजमण्ड, लाजा के सत्तू, खाँड, शतधौत घृत, दूध, दूध से निकला मक्खन, पेठा, ककड़ी, केला, कटहल, मीठा अनार, धारागृह, चाँद की शीतल चाँदनी, शीतल वायु, चन्दन का लेपन, कमल, प्रेम, प्रियालिङ्गन, प्रियाहस्तमर्दन, गीले वस्त्र, दूध, खाँड, शङ्खभस्म, लोहभस्म, चाँदीभस्म। ये सम्पूर्ण उपर्युक्त द्रव्य दाह शान्ति के लिए लाभकारी हैं ॥ १५-१७ ॥

### अपथ्य।

विरुद्धान्यन्नपानानि क्रोधं वेगाभिधारणम्। गजाश्वयानमध्वानं क्षारं पित्तकराणि च ॥ १८ ॥ व्यायाममातपं तक्रं ताम्बूलं मधु रामठम्। व्यवायं कटुतीक्ष्णोष्णं दाहवान् परिवर्जयेत् ॥ १९ ॥

इति भैषज्यरत्नावल्यां दाहरोगाधिकारः समाप्तः ॥

विरुद्ध भोजन, क्रोध, मल-मूत्रादि वेगों का रोकना, हाथी घोड़े की सवारी, अधिक चलना, क्षार पित्त के बढ़ानेवाले आहार, विहार, व्यायाम, धूप में घूमना, मट्ठा पीना, शहद, हींग, मैथुन, कटुक, तीखे, गरम भोजन, इन सबका त्याग करना दाहरोगी को हितकर है ॥१८-१९॥

इति मरवूमलालाद्विजवरविरचितायां भैषज्यरत्नावल्यां रसप्रभाख्यायां व्याख्यायां दाहरोगाधिकार समाप्त।

---

## तृष्णारोगाधिकारः

### वातिक तृष्णा की चिकित्सा।

तृष्णायां पवनोत्थायां सगुडं दधि शस्यते। रसाश्च बृंहणा शीता गुडूच्या रस एव वा ॥ १ ॥

वातजन्य तृष्णारोग में गुडयुक्त दही पुष्टिकारक तथा शीतल रस और गिलोय का स्वरस; इनमें से किसी का प्रयोग करना लाभदायक होता है ॥ १ ॥

### पित्तज तृष्णा की चिकित्सा।

पित्तजायान्तु तृष्णायां पक्वोदुम्बरजो

रसः। तत् क्वाथो वा हिमस्तद्वच्छारिवादिगणाम्बु वा ॥ २ ॥

पित्तजन्य तृष्णारोग में पकी हुई गूलर के रस अथवा क्वाथ का सेवन कराना, अथवा शारिवादि-गण का क्वाथ पिलाना चाहिए ॥ २ ॥

लाजोदकं मधुयुतं शीतं गुडविमर्दितम्। काश्मरीशर्करायुक्तं पिबेत् तृष्णार्दितो नरः ॥ ३ ॥

आध पाव धान के लावा (खील) को १ सेर उष्ण जल में रात को भिगो देवे, प्रातःकाल छानकर उसमें शहद ८ मासे, गुड़ ८ मासे, खंभारी के फल का चूर्ण ८ मासे और मिश्री ८ मासे इनको मिलाकर पान करे। इससे तृष्णा-रोग नष्ट होता है ॥ ३ ॥

कफज तृष्णा की चिकित्सा।

बिल्वाढकीधातकिपञ्चकोलदर्भेषु सिद्धं कफजां निहन्ति। हितं भवेच्छर्दनमेव चात्र तप्तेन निम्बप्रसवोदकेन ॥ ४ ॥

बेलगिरी, अरहर की जड़ (अभाव में पत्ते), धाय के फूल, पीपरि, पिपरामूल, चव्य, चीता, सोंठ और कुश की जड़, इन औषधों का क्वाथ पिलाने से कफजन्य पिपासा दूर होती है। कफ-जन्य पिपासारोग में नीम की पत्तियों का उष्ण क्वाथ पिलाकर वमन कराना भी लाभदायक होता है ॥ ४ ॥

क्षतजन्य और क्षयजन्य तृष्णा की चिकित्सा।

क्षतोत्थितां रुग्विनिवारणेन जयेद्रसानामसृजश्च पानैः। क्षयोत्थितां क्षीरजलं निहन्यात् मांसोदकं वाथ मधूदकं वा ॥ ५ ॥

क्षत (जखम) जन्य तृष्णारोग में क्षतनाशक औषधों का प्रयोग, मांस रस अथवा रुधिर का पान करना लाभदायक होता है। क्षयरोगजन्य तृष्णा में दुग्धमिश्रित जल, मांसरस अथवा मधुमिश्रित जल पिलाना चाहिये ॥ ५ ॥

गुर्वन्नजा तृष्णा की चिकित्सा।

गुर्वन्नजामुल्लिखनैर्जयेत्तु क्षयादृते सर्वकृताश्च तृष्णाम् ॥ ६ ॥

गुरुपाक पदार्थों के भोजन करने से उत्पन्न तृष्णा में और क्षयजन्य तृष्णा के सिवाय हर प्रकार की तृष्णा में वमन कराना लाभदायक होता है, अर्थात् क्षयजन्य तृष्णा को छोड़कर सब तृष्णा में वमन कराना लाभदायक है ॥ ६ ॥

रौक्ष्यदौर्बल्यनाशिका तृष्णाचिकित्सा।

अतिरूक्षदुर्बलानां तर्षं शमयेन् नृणामिहाशु पयः। छागो वा घृतभ्रष्टः शीतो मधुरो रसो हृद्यः ॥ ७ ॥

अत्यन्त रूक्ष शरीरवाले और दुर्बल मनुष्यों को होनेवाली तृष्णा में दूध पिलाना अथवा घृत में भूनकर पकाये हुए बकरा के मांस का मधुर शीतल रस पिलाना शरीर की रूक्षता, दुर्बलता और तृष्णा को दूर करके हृदय के लिये भी लाभ दायक होता है ॥ ७ ॥

नासिकापेय तृष्णाहरयोग।

गोस्तनेक्षुरसक्षीरयष्टीमधुमधूत्पलैः। नियतं नस्यतः पीतैस्तृष्णा शाम्यति दारुणा ॥ ८ ॥

मुनक्का दाख का रस, ईख का रस, दूध, मुलेठी का क्वाथ, शहद अथवा कमल के फूल का रस, इनको नासिका (नाक) द्वारा पीने से भयङ्कर तृष्णारोग नष्ट होता है ॥ ८ ॥

तालुशोषहर गण्डूषधारण।

क्षीरेक्षुरसमाध्वीकक्षौद्रसीधुगुडोदकैः। वृक्षाम्लाम्लैश्च गण्डूषास्तालुशोषनिवारणः ॥ ९ ॥

दूध, ईख का रस, महुआ के फूलों की मद्य, मधु, सीधु, गुड़मिश्रित जल, इमली का रस, तथा अन्यान्य खट्टे द्रव्यों के रस का गण्डूष (कुरला) धारण करने से तालुशोषरोग दूर होता है ॥ ९ ॥

आम्रादि कषाय।

आम्रजम्बूकषायं वा पिबेन्माक्षिकसंयुतम्। छर्दिं सर्वां प्रणुदति तृष्णाञ्चैवापकर्षति ॥ १० ॥

आम और जामुन की कोमल पत्तियों के क्वाथ में शहद मिलाकर पीने से सब प्रकार के वमन और तृष्णारोग दूर होते हैं ॥ १० ॥

वटशुङ्गादि प्रयोग।

वटशुङ्गसितालोध्रदाडिमं मधुकं मधु। पिबेत्तण्डुलतोयेन छर्दितृष्णानिवारणम् ॥ ११ ॥

वड़ के अंकुर, मिश्री, लोध, अनार, मुलेठी, और मधु, इनको चावल के धोवन के साथ पीस कर पीने से वमन और पिपासा की निवृत्ति होती है ॥ ११ ॥

तृष्णादिनाशक ग्रास और गण्डूष।

केशरं मातुलुङ्गस्य सक्षौद्रं दाडिमीयुतम्। क्षणमात्रेण दुर्वारां तृष्णां कवलतो जयेत्। दाहतृष्णाप्रशमनं मधुगण्डूषधारणम् ॥ १२ ॥

बिजौरा नींबू के फूलों की केशर, अनार, और मधु इनको एकत्र पीस कर मुख में धारण करने से कठिनता से शान्त होनेवाली प्यास क्षणमात्र में नष्ट होती है। इसी प्रकार मधु का गण्डूष (कुल्ला) धारण करने से दाह और तृष्णा की शान्ति होती है ॥ १२ ॥

कवल और गण्डूष की मात्रा।

असञ्चार्या तु या मात्रा गण्डूषे सा प्रकीर्तिता। सुखं सञ्चार्यते या तु सा मात्रा कवले हिता ॥ १३ ॥

जिस परिमाण में औषध को मुख में रखने पर, मुख का संचालन न किया जा सके उस परिमाण में औषध का मुख में रखना गण्डूष धारण में उचित है। और जिस परिमाण में औषधों को मुख में रखने पर मुख का संचालन किया जा सकता है, उस परिमाण में औषध का मुख में धारण करना कवलधारण में उचित है। तात्पर्य यह कि गण्डूषधारण में मुख को भलीभाँति परिपूर्ण करना होता है, और कवल धारण में मुख कुछ खाली रक्खा जाता है ॥ १३ ॥

वटशुङ्गादि वटी।

वटशुङ्गमपक्षौद्रलाजनीलोत्पलैर्दृढा। गुटिका वदनन्यस्ता क्षिप्रं तृष्णामुदस्यति ॥ १४ ॥

वड़ के अंकुर, कूट, मधु, धान की खील और नील कमल, इनको एकत्र पीसकर कर गोलियाँ बना लेवे। इन गोलियों को मुख में रखने से शीघ्र तृष्णा दूर होती है ॥ १४ ॥

तृष्णादिरोग में पथ्य।

ओदनं रक्तशालीनां शीतमाक्षिकसंयुतम्। भोजयेत्तेन शाम्येत छर्दिस्तृष्णाचिरोत्थिता ॥ १५ ॥

रक्त शालीधान के चावलों के भात को शीतल करके मधु मिलाकर खिलाने से चिरकालोत्पन्न वमन और तृष्णारोग नष्ट होते हैं ॥ १५ ॥

मधुवारिप्रयोग।

वारि शीतं मधुयुतमाकण्ठाद्वा पिपासितम्। पाययेद्वामयेच्चापि तेन तृष्णा प्रशाम्यति ॥ १६ ॥

तृष्णारोग में प्यास लगने पर रोगी को कण्ठपर्यन्त मधुमिश्रित शीतल जल पिलावे और वमन करावे। इससे तृष्णारोग निवृत्त होता है ॥ १६ ॥

शीतल जल पीने की व्यवस्था।

मूर्च्छाछर्दितृषादाहस्त्रीमद्यभृशकर्शिताः। पिबेयुः शीतलं तोयं रक्तपित्तमदात्यये ॥ १७ ॥

मूर्च्छा, वमन, तृषा, दाह, स्त्रीप्रसङ्ग और मद्यपान से अत्यन्त क्षीण मनुष्य को शीतल जल

पीना चाहिये । रक्तपित्त और मदात्यय रोग में भी शीतल ही जल पीना चाहिये ॥ १७ ॥

तृष्णार्दित को जल न देने से अनिष्ट ।

पूर्वामयातुरः सन् दीनस्तृष्णार्दितो जलं याचन् । लभते न चेत् तदायं मरणं प्राप्नोति दीर्घरोगं वा ॥ १८ ॥

यदि मूर्च्छारोगजन्य तृष्णा से पीड़ित मनुष्य, दीनता के साथ जल की प्रार्थना करे, किन्तु उसी समय उसको जल न मिले तो उसकी मूर्च्छा का का वेग बहुत विलम्ब तक रहता है अथवा वह मर ही जाता है ॥ १८ ॥

तृषितो मोहमायाति मोहात् प्राणान् विमुञ्चति तस्मात् सर्वास्ववस्थासु न क्वचित् वारि वार्य्यते ॥ १९ ॥

अधिक प्यास से मनुष्य मूर्च्छित हो जाता है। मूर्च्छा से मृत्यु तक होती है। अतः किसी भी अवस्था में जल देना वर्जित नहीं है ॥ १९ ॥

अन्नेनापि विना जन्तुः प्राणान् धारयते चिरम् । तोयाभावे पिपासार्त्तः क्षणात् प्राणैर्विमुच्यते ॥ २० ॥

अन्न न भी मिले तो मनुष्य बहुत समय तक प्राण रख सकता है, किन्तु जल के बिना तो क्षण भर भी कोई प्राण नहीं रख सकता ॥ २० ॥

जलपानविषयक विशेष विधि ।

अत्यम्बुपानात् प्रभवन्ति रोगा निरम्बुपानाच्च स एव दोषः । तस्माद् बुधः प्राणविवर्द्धनार्थं मुहुर्मुहुर्वारि पिबेद् भूरि ॥ २१ ॥

अधिक परिमाण में जल पीने से अनेक रोग उत्पन्न होते हैं और जल न पीने से भी यही दशा होती है। अतः बार बार थोड़ा थोड़ा जल पीता रहे ॥ २१ ॥

तृष्णाहर रससिन्दूरादि प्रयोग ।

सक्षौद्रमाम्रजम्बूत्थं पिबेत् क्वाथं रसान्वितम् । सतृष्णो मधुना कुर्यात् गण्डूषाञ्छीतले स्थितः ॥ २२ ॥

आम और जामुन की छाल के क्वाथ में मधु और पारदभस्म मिलाकर पीने से, शीतल स्थान में बैठकर मधु का गण्डूष धारण करने से तृष्णा रोग नष्ट होता है ॥ २२ ॥

महोदधि रस ।

ताम्रञ्च वज्रकञ्चैव सूतं तालं समुत्थकम् । वटांकुररसैर्भाव्यं तृष्णाहृद्वटिपादप ॥ २३ ॥

तांबे की भस्म, वज्रभस्म, पारा, हरताल, तुल्य ( नीला थोथा ), इन सम्पूर्ण द्रव्यों को वटाङ्कुर के रस से घोटकर गोलियाँ बनावे। मात्रा ½ रत्ती से ¼ रत्ती तक । इसके सेवन करने से तृष्णा ( प्यास ) रोग दूर होता है ॥ २३ ॥

कुमुदेश्वर रस ।

मृतताम्रस्य भागौ द्वौ भागैकं वज्रभस्मकम् । यष्टीमधुरसैर्भाव्यं गुञ्जापादांशकं शुभम् ॥ २४ ॥ सेव्यश्चैवानुपानेन वक्ष्यमाणेन धीमता । चन्दनं शारिवा मुस्तं चुद्रैला नागकेशरम् ॥ २५ ॥ सर्वतुल्यां तथा लाजां पचेच्चौडशिकैर्जलैः । अर्धशेषं हरेत् क्वाथं सिताक्षौद्रयुतं पिबेद् ॥ २६ ॥ छर्दिं तृष्णां निहन्त्याशु रसोऽयं कुमुदेश्वरः ॥ २७ ॥

तांबे की भस्म २ भाग, वज्रभस्म १ भाग इनको मुलहठी के काढ़े से सात दफे भावना देकर सुखा ले। मात्रा ¼ रत्ती। अनुपान लाल चन्दन, अनन्तमूल, मोथा, छोटी इलायची, नागकेसर इन सम्पूर्ण द्रव्यों को मिलाकर १ तोला लेना चाहिए, फिर इसको १२ तोला जल में पकाना चाहिए। जब पकते-पकते १६ तोले रह जावे तो उतार लो। इस काढ़े में शक्कर या

खाँड मिलाकर अनुपान के रूप में देना चाहिए। इस रस के सेवन करने से वमि ( कै ), तृष्णा ( प्यास ) दूर होते हैं ॥ २४-२७ ॥

तृष्णारोग में पथ्य ।

शोधनं शमनं निद्रां स्नानं कवलधारणम् । जिह्वाधःशिरसोर्दाहो दीपदग्धहरिद्रया ॥ २८ ॥ कोद्रवाः शालयः पेया विलेपी लाजसक्तवः । अन्नमण्डो धन्वरसाः शर्करारागषाडवौ ॥ २९ ॥ एला जातिफलं पथ्या कुस्तुम्बुरु च टङ्कणम् । घनसारो गन्धसारः कौमुदी शिशिरानिलाः ॥ ३० ॥ बालतालाम्बुशीताम्बु पर्पटी प्रपानकम् । माक्षिकं सरसं तोयं धात्राह्वा नागकेशरम् ॥ ३१ ॥ चन्दनार्द्रप्रियाश्लेषो रत्नाभरणधारणम् । हिमानुलेपनञ्च स्यात् पथ्यमेतत्तृषातुरे ॥ ३२ ॥

शोधन एवं शमनकारी क्रियाएँ, निद्रा, स्नान, कवल धारण, दीपे पर जलाई हुई हल्दी से जीभ के नीचे की शिराओं का दाह, कोदों, शालि, पेया, विलेपी, लाजा का सत्तू, चावलों की माँड, जङ्गली पशुपक्षियों के मांस का रस, शरबत रागषाडव ( मुरब्बे, चटनी इत्यादि ), इलायची, जायफल, हरड, धनियाँ, सुहागा, कपूर, चन्दन, चाँदनी, शीतल हवा, कच्चे ताड़ का पानी, शीतल जल, पर्पटक, शर्करा, शहद सुस्वादु जल, आँवले, नागकेसर, अङ्ग में चन्दन लगाने के पश्चात् प्रिया का आलिङ्गन, रत्न एवं आभूषणों का पहरना, बर्फ तथा शीतल लेपन, अनुलेपन, तृष्णा ( प्यास ) रोग में लाभकारी हैं ॥ २८-३२ ॥

तृष्णा रोग में अपथ्य ।

स्नेहाञ्जनस्वेदनधूमपानव्यायामनस्यातपकोष्ठम् । गुर्वन्नमम्लं लवणं कषायं कटु तिक्तं दुष्टजलानि तीक्ष्णम् ॥ ३३ ॥ एतानि सर्वाणि हिताभिलाषी तृषातुरो नैव भजेत्कदाचित् ॥ ३४ ॥

स्नेहन, सुरमा आदि लगाना, पसीना आदि लेना, सिगरेट आदि पीना, कसरत, हुलास आदि सूँघना, धूप में पेट को सेंकना, भारी भोजन, खटाई, अत्यन्त नोन की वस्तु खाना, कसैली, कड़वी, मैथुन, खराब पानी, तीक्ष्ण पदार्थ, जिस मनुष्य को प्यास ( तृष्णा ) रोग हो उसको चाहिए कि उपर्युक्त अपथ्यों का त्याग कर दे ॥ ३३-३४ ॥

आवश्यक सूचना ।

यत्र केवल एव रसस्तत्र भस्मसूतो योज्यः ।

इति भैषज्यरत्नावल्यां, तृष्णाधिकारः समाप्तः ॥

जिस योग में गन्धक न लिखा हो किन्तु रस ( पारा ) का उल्लेख हो तो उस योग में पारद-भस्म डालना चाहिये।[1]

इति सरयूप्रसादत्रिपाठिविरचितायां भैषज्यरत्नावल्यां रत्नप्रभाव्याख्यायां तृष्णारोगाधिकारः समाप्तः ।

## रक्तपित्ताधिकारः ।

रक्तपित्त की असंग्राह्यता ।

नोद्रिक्तमादौ संग्राह्यं बलिनोऽश्नतश्च यत् । हृत्पाण्डुग्रहणीरोगप्लीहगुल्मज्वरादिकृत् ॥ १ ॥

रोगी बलवान् और भोजन करने में समर्थ हो तो प्रबल रक्तपित्त के रोकने की चेष्टा कदापि न करे, कारण यह कि दूषित रक्तपित्त शरीर में अवरुद्ध हो जाने पर हृद्रोग, पाण्डुरोग, ग्रहणी-

[1] पारदभस्म के स्थान पर रससिन्दूर।

रोग, प्लीहा, गुल्म और ज्वर आदि अनेक रोग उत्पन्न करता है ॥ १ ॥

रक्तपित्त में अपतर्पण।

ऊर्ध्वं प्रवृद्धदोषस्य पूर्वं लोहितपित्तिनः। अक्षीणबलमांसाग्नेः कर्त्तव्यमपतर्पणम् ॥ २ ॥

रोगी के बल और मांस क्षीण न हों, अग्नि भी प्रबल हो तो रक्तपित्त के ऊर्ध्वमार्गगामी होने पर पहिले लङ्घनादि क्रिया करानी चाहिये ॥ २ ॥

रक्तपित्त में तर्पण विरेचनादि।

ऊर्ध्वगे तर्पणं पूर्वं कर्त्तव्यञ्च विरेचनम्। प्रागधोगमने पेया वमनञ्च यथाबलम् ॥ ३ ॥

ऊर्ध्वगे प्रक्षीणबलमांसेन तर्पणं प्रथमतः कार्य्यम्। अतिप्रवृत्ते ऊर्ध्वगे रक्तपित्ते विपुलबलमांसे न विरेचनमित्याशयः।

ऊपर के मार्गों (मुख, नाक, कान, आँख) से रक्तपित्त निकलता हो, किन्तु रोगी के बल और मांस क्षीण हों तो सन्तर्पण (तृप्ति करनेवाला) उपचार करना चाहिये। ऊर्ध्वगामी (ऊपर के मार्गों से निकलनेवाला) रक्तपित्त यदि अत्यन्त प्रबल हो, अर्थात् अधिक परिमाण में निकलता हो, किन्तु रोगी के बल और मांस क्षीण न हुये हों तो विरेचन कराना चाहिये। अधोमार्ग (नीचे के मार्ग गुदा, लिंग, योनि) से निकलनेवाले रक्तपित्त में पहिले पेया आदि खिलाना चाहिये और रोगी के बल का विचार करके वमन करानी चाहिये[1] ॥ ३ ॥

क्षीणमांसबलं वृद्धं बालं शोषानुबन्धिनम्। अवम्यमविरेच्यञ्च स्तम्भनैः समुपाचरेत् ॥ ४ ॥

[1] दुर्बल और अशक्त रोगी को वमन नहीं करानी चाहिये।

क्षीण मांस क्षीण बल, वृद्ध, बालक और क्षयरोगयुक्त, रक्तपित्त रोगी को और वमन अथवा विरेचन के अयोग्य रक्तपित्तवाले रोगी की स्तम्भन औषधों से चिकित्सा करनी चाहिये ॥ ४ ॥

रक्तपित्त में पथ्य।

शालिषष्टिकनीवारकोरदूषप्रसाधिकाः। श्यामाकश्च प्रियङ्गुश्च भोजनं रक्तपित्तिनाम् ॥ ५ ॥

शालीधान (जड़हन), साँठी, तिन्नी, कोदों, रक्तचर्णा की तिन्नी, सावा और प्रियगु ये सब अन्न रक्तपित्तरोगी के लिये पथ्य हैं ॥ ५ ॥

सूपयूपार्थ पथ्य।

मसूरमुद्गचणकाः समकुष्ठाढकीफलाः। प्रशस्ताः सूपयूपार्थं कल्पिता रक्तपित्तिनाम् ॥ ६ ॥

मसूर, मूँग, चना वनमूँग और अरहर, इन सब अन्नों की दाल और जूस रक्तपित्तरोगी के लिये पथ्य हैं ॥ ६ ॥

पथ्य शाक और मांस

शाकं पटोलवेत्राग्रतण्डुलीयादिकं हितम्। मांसं लावकपोतादिशशैणहरिणादिकम् ॥ ७ ॥

रक्तपित्तरोग में परवल की पत्तियों के, बेंत की कोपलों के और चौराई आदि के शाक तथा लावा और कबूतर आदि चिड़ियों के और खरगोश, एण हरिन आदि पशुओं के मांस लाभदायक होते हैं ॥ ७ ॥

रक्तपित्तनाशक योग।

वृषपत्राणि निष्पीड्य रसं समधुशर्करम्। पिबेत् तेन शमं याति रक्तपित्तं सुदारुणम् ॥ ८ ॥

वृषपत्राणि वासकपत्राणि पुटेन पक्त्वा रसो ग्राह्य इति वृद्धोपदेशः।

अडूसा की पत्तियों का पुटपाक करके रस निकाले, उसमें शहद और मिश्री मिलाकर पान करे। इससे भयानक रक्तपित्तरोग शान्त होता है ॥ ८ ॥

समाक्षिकः फल्गुफलोद्भवो वा पीतो रसः शोणितमाशु हन्ति ॥ ९ ॥

कठगूलर के फल के रस में मधु मिलाकर पीने से शीघ्र रक्तपित्तरोग नष्ट होता है ॥ ९ ॥

हरीतकीप्रयोग।

अभया मधुसंयुक्ता पाचनी दीपनी मता। श्लेष्माणं रक्तपित्तञ्च हन्ति शूलातिसारनुत् ॥ १० ॥

हरीतकी के चूर्ण में शहद मिलाकर चाटने से दोषों का पाचन और अग्नि की दीप्ति होती है तथा कफ, रक्तपित्त, शूल और अतिसार ये सब रोग भी नष्ट होते हैं ॥ १० ॥

हरीतक्यादि प्रयोग।

वासकस्वरसे पथ्या सप्तधा परिभाविता। कृष्णा वा मधुना लीढा रक्तपित्तं द्रुतं जयेत् ॥ ११ ॥

हरीतकी (हर्रे) के चूर्ण को अडूसा की पत्तियों के रस में ७ बार भिगोकर सुखावे, तदनन्तर उसका मधु के साथ सेवन करने से अथवा मधु के साथ पूर्वोक्त रीति से भावना दिया हुआ पीपरि के चूर्ण का सेवन करने से रक्तपित्तरोग शीघ्र नष्ट होता है। मात्रा ३।४ माशा ॥ ११ ॥

पक्कोदुम्बरादि प्रयोग।

पक्कोदुम्बरकाश्मर्यपथ्याखर्जूरगोस्तनाः। मधुना घ्नन्ति संलीढा रक्तपित्तं पृथक् पृथक् ॥ १२ ॥

उदुम्बरादीनां पक्कानि फलानि यतः शुष्काणि ततस्तेषां श्लक्ष्णचूर्णानां मधुना लेहः। अत्र पथ्याचूर्णं मधुना लीढमतीव फल प्रदमिति भानुः।

पकीगूलर, कुम्भेर, हरीतकी, खजूर और मुनक्का, इनमें किसी एक के पके हुये फलों को सुखाकर चूर्ण बनावे। उसको मधु के साथ चाटने से रक्तपित्तरोग नष्ट होता है। 'भानु' का कहना है कि इनमें से हरीतकी का चूर्ण मधु के साथ चाटने से अत्यन्त लाभ प्रद होता है। मात्रा ३।४ माशा ॥ १२ ॥

कुसुमचूर्ण।

खदिरस्य प्रियंगूनां कोविदारस्य शाल्मलेः। पुष्पचूर्णन्तु मधुना लिह्यारोग्यमश्नुते ॥ १३ ॥

खैर, प्रियङ्गु, लाल कचनार और सेमर; इनके फूलों का चूर्ण बनाकर शहद के साथ चाटने से रक्तपित्तरोगी को स्वास्थ्य लाभ होता है ॥ १३ ॥

लाक्षाचूर्ण।

लाक्षाचूर्णं सुकृतं क्षौद्राज्यसमन्वितं सकृल्लीढम्। शमयति सोद्धतवमनं सरक्तपित्तस्य सिद्धमिदम् ॥ १४ ॥

लाख के कपड़छान किये चूर्ण को घी और मधु के साथ चाटने से रक्तपित्त का प्रबल वमन एक ही बार में शान्त होता है। रक्तपित्त के लिये यह अनुभूत प्रयोग है। मात्रा १।२ माशा ॥ १४ ॥

धान्यकादि हिम।

धान्याकधात्रीवासानां द्राक्षापर्पटयोर्हिमः। रक्तपित्तं ज्वरं दाहं तृष्णां शोषञ्च नाशयेत् ॥ १५ ॥

धनियाँ, आँवला, अडूसा, द्राक्षा तथा पित्तपापड़ा इनका विधि के अनुसार शीत कषाय बनाकर रोगी को देने से रक्तपित्त, ज्वर, दाह, प्यास और शोष (सूजन) आदि दूर होते हैं। मात्रा २।४ तोला ॥ १५ ॥

ह्रीबेरादि क्वाथ।

ह्रीबेरमुत्पलं धान्यं चन्दनं यष्टिका-

सिता । उशीरश्च त्रिवृच्चैषां क्वाथं समधुशर्करम् ॥ १६ ॥ पाययेत्तेन सद्यो हि रक्तपित्तं प्रणश्यति । रक्तपित्तं जयत्युग्रं तृष्णां दाहं ज्वरं तथा ॥ १७ ॥

गन्धबाला, नीलोत्पल, धनियाँ, लालचन्दन, मुलहठी, गिलोय, खस, निसोत, ये सम्पूर्ण द्रव्य मिश्रित कर २ तोला लेना चाहिये । तत्पश्चात् इनको ३२ तोले जल में पकावे जब ८ तोला रह जावे तो उतार ले । इस काढ़े में खाँड या शहद मिलाकर पीने से शीघ्र ही रक्तपित्त शान्त होता है । यह काढ़ा प्यास, दाह, ज्वर को भी दूर करता है । मात्रा १ तोला ॥ १६ १७ ॥

आटरूषकादि क्वाथ ।

आटरूषकमृद्वीकापथ्याक्वाथः सशर्करः । क्षौद्राढ्यः कसनश्वासरक्तपित्तनिबर्हणः ॥ १८ ॥

अडूसे की जड़ का छिलका, किशमिश, हरड़ इनके काढ़े को खाँड या शहद मिलाकर पीने से श्वास, खाँसी तथा रक्तपित्त दूर होता है । मात्रा ४ तोला ॥ १८ ॥

दाहतृष्णादि में उशीरादि चूर्ण ।

उशीरं तगरं शुण्ठी कक्कोलं चन्दनद्वयम् । लवङ्गं पिप्पलीमूलं कृष्णैलानागकेशरम् ॥ १९ ॥ मुस्तामधुककर्पूरं तुगाक्षीरी च पत्रकम् ॥ कृष्णागुरुसमं चूर्णं सिता चाष्टगुणा तथा । रक्तवान्तिश्च तापघ्नं नाशयेन्नात्र संशयः ॥ पिबेदौदुम्बरं परषाद्रसं कर्षचतुष्टयम् ॥ २० ॥

तगरं तगरपादिकं, तुगाक्षीरी वंशलोचना ।

खस, तगर, सोंठ कङ्कोल, रक्तचन्दन श्वेतचन्दन, लौंग, पिपरामूल, पीपरि, छोटी इलायची, नागकेसर, नागरमोथा, मुलेठी, कपूर, वंशलोचन और तेजपात समभाग इन सब औषधों को लेकर चूर्ण बनावे । कुल चूर्ण जितना हो उतना ही काली अगर का चूर्ण मिलावे । तदनन्तर मिश्रित कुल चूर्ण जितना हो उससे आठगुना मिश्री मिलाकर रख लेवे । प्रतिदिन आधा तोला परिमित इस चूर्ण को खाकर ४ तोले गूलर के फल का रस पीवे । इससे रक्त के वमन और दाह निःसंदेह नष्ट होते हैं । मात्रा ३।६ मासा ॥ १९—२० ॥

एलादि गुटिका ।

एलापत्रं त्वचोऽर्द्धाक्षाः पिप्पल्यर्द्धपलं तथा । सितामधुकखर्जूरमृद्वीकाश्च पलोन्मिताः ॥ २१ ॥ संचूर्ण्य मधुना युक्ता गुटिकाः कारयेद् भिषक् । तोलकार्द्धां ततश्चैकां भक्षयेच्च दिने दिने ॥ २२ ॥ श्वासं कासं ज्वरं हिक्कां छर्दिं मूर्च्छां मदं भ्रमम् । रक्तनिष्ठीवनं तृष्णां पार्श्वशूलमरोचकम् ॥ २३ ॥ शोषप्लीहामवातांश्च स्वरभेदं क्षतक्षयम् । गुटिका तर्पणी वृष्या रक्तपित्तं विनाशयेत् ॥ २४ ॥

छोटी इलायची के दाने आधा तोला, तेजपात आधा तोला, पीपरि २ तोला, मिश्री, मुलेठी, खजूर और मुनक्का प्रत्येक ४ तोले । इनका चूर्ण बनाकर मधुमिश्रित करके ६ छ माशे की बटी बनावे । एक बटी प्रतिदिन सेवन करने से श्वास, कास, ज्वर, हिक्का, वमन, मूर्च्छा, मद, भ्रम, रक्त का वमन, तृष्णा, पार्श्वशूल, अरोचक, शोथ, प्लीहा, आमवात, स्वरभेद, क्षतजन्य क्षयरोग और रक्तपित्तरोग नष्ट होते हैं तथा ये गुटिकायें तृप्ति और बल की वृद्धि करती हैं । मात्रा १।२ मा० ॥ २१-२४॥

घ्राणप्रवृत्त रक्त की चिकित्सा ।

घ्राणप्रवृत्ते जलमाशु देयं सशर्करं नासिकया पयो वा । द्राक्षारसं क्षीरघृतं पिबेद् वा सशर्करञ्चेक्षुरसं हितं वा ॥ २५ ॥

घ्राण ( नाक ) से रक्त निकलता हो तो जल का अथवा मिश्री मिले हुये दूध का नस्य लेना

और मुनक्के का रस, घृत और मिश्री मिला दूध, अथवा ईख का रस इनमें प्रत्येक का पानी लाभदायक होता है ॥ २५ ॥

नस्यं दाडिमपुष्पोत्थो रसो दूर्वाभवोऽथवा। आम्रास्थिजः पलाण्डोर्वा नासिकास्रुतरक्तजित् ॥ २६ ॥

अनार का फूल, दूब, आम की गुठली की मींगी और प्याज इनमें से किसी एक के रस का नस्य लेने से नासिका द्वारा रक्त का निकलना शीघ्र बन्द होता है ॥ २६ ॥

रसो दाडिमपुष्पस्य दूर्वारससमन्वितः। अलक्तकरसोपेतः पथ्यया वा समन्वितः ॥ योजितो नस्यतः क्षिप्रं त्रिदोषमपि देहिनाम्। नासाप्रवृत्तं रक्तन्तु हन्यादेव न संशयः ॥ २८ ॥

अनार के फूल का रस और दूब का रस इनको एकत्र मिलाकर, उसमें लाख का जल अथवा हरीतकी का जल मिलाकर नस्य देने से नासिका द्वारा होनेवाला त्रिदोषजन्य भी रक्तस्राव निःसंदेह नष्ट होता है ॥ २७-२८ ॥

नासाप्रवृत्तरुधिरं घृतभृष्टं श्लक्ष्णपिष्टमामलकम्। सेतुरिव तोयवेगं रुणद्धि मूर्ध्नि प्रलेपेन ॥ २९ ॥

आमलकं घृते भृष्ट्वा काञ्जिकेन पिष्ट्वा मूर्ध्नि लेप इति नीलकण्ठ।

आँवले को घी में भूनकर काँजी के साथ महीन पीसकर शिर में लेप करे। इस प्रयोग से नासिका द्वारा निकलनेवाला रक्त इस प्रकार रुक जाता है जैसे सेतु के बाँधने से जल का वेग रुक जाता है ॥ २९ ॥

मेढ्रप्रवृत्त रक्त की चिकित्सा।

मेढ्रेऽतिप्रवृत्ते तु बस्तिरुत्तरसंज्ञितः। शृतं क्षीरं पिबेद्वापि पञ्चमूल्या तृणाह्वया ॥ ३० ॥

यदि लिङ्ग के द्वारा अधिक रक्त निकलता हो तो उत्तरबस्ति क्रिया करनी चाहिये। अथवा दो तोले तृणपञ्चमूल[1], सोलह तोले बकरी का दूध और चौंसठ तोले जल, इनको एकत्र मिलाकर पकावे, जब दुग्धमात्र शेष रह जावे तब छानकर पीना चाहिये ॥ ३० ॥

रूपस्य स्वरसं कृत्वा द्रवैरेभिः प्रयोजयेत्। प्रियङ्गुस्फटिकीलोध्रमञ्जनं चेति चूर्णयेत् ॥ ३१ ॥ एतच्चूर्णं पाययेत्तद्रसैः क्षौद्रसमन्वितः। नासिकामुखपायुभ्यो योनिमेढ्राच्च वेगितम् ॥ ३२ ॥ रक्तपित्तं स्रवद्धन्ति सिद्ध एष प्रयोगराट्। यंत्र शस्त्रक्षते नैव रक्तं तिष्ठति वेगितम् ॥ ३३ ॥ तदप्यनेन चूर्णेन तिष्ठत्येवावचूर्णितम् ॥ ३४ ॥

प्रियङ्गु, फिटकरी, लोध्र तथा रसाञ्जन, इनका पृथक् पृथक् चूर्ण बनाकर मिला ले। मात्रा ४ रत्ती। अनुपान-शहद या अडूसे का रस। इसके ४ रत्ती चूर्ण को कहे हुए अनुपान के साथ लेने से नासिका, मुख, गुदा, योनि तथा अन्य सूक्ष्म मार्गों द्वारा निकलता हुआ रक्तपित्त शान्त होता है। यदि किसी शस्त्र द्वारा घाव हो और उसमें से अधिक रक्त निकलता हो तो इस चूर्ण के बुरकने से रक्त शीघ्र ही रुक जाता है ॥ ३१-३४ ॥

कूष्माण्ड खण्ड।

कूष्माण्डकात् पलशतं सुस्विन्नं निष्कुलीकृतम्। पचेत् तप्ते घृतप्रस्थे शनैस्ताम्रमये दृढे ॥ ३५ ॥ यदा मधुनिभः पाकस्तदा पलशतं न्यसेत्। पिप्पलीशृङ्गवेराभ्यां द्वे पले जीरकस्य च ॥ ३६ ॥ त्वगेलापत्रमरिचधान्यकानां पलार्द्धकम्। न्यसेत् चूर्णीकृतं तत्र दार्व्या

[1] कुश, काश, सरकण्डा, डाभ और ईख, इन पाँचों के मूल को 'पञ्चतृणमूल' कहते हैं।

सद्द्रूपेत् पुनः ॥ ३७ ॥ तत् पक्वं स्थापयेत् भाण्डे दत्त्वा क्षौद्रं घृतार्द्धकम्। तत् यथाग्निबलं खादेद्रक्तपित्ती क्षतक्षयी ॥ ३८ ॥ कासश्वासतमश्छर्दितृष्णाज्वरनिपीडितः। वृष्यं पुनर्नवकरं बलवर्णप्रसादनम् ॥ ३९ ॥ उरःसन्धानकरणं बृंहणं स्वरवर्द्धनम्। अश्विभ्यां निर्मितं श्रेष्ठं कूष्माण्डकरसायनम् ॥ ४० ॥ खण्डामलकमानानुसारात् कूष्माण्डकद्रवात्। पात्रे पाकाय दातव्यं यावानत्र रसो भवेत् ॥ ४१ ॥

छिलका और बीज से रहित तथा थोड़ी देर तक धूप में सुखाया हुआ पुराना पेठा ४ सेर लेवे, इसको १२८ तोले घी में तांबे की कड़ाही (कलई की हुई) में धीमी आँच पर तब तक भूनता रहे, जब तक उसका मधु के समान वर्ण न हो जावे। पश्चात् इसमें ५ सेर खांड और पेठे का जल जितना उसमें से निचोड़कर निकाला हो डालकर पकावे। पाक सिद्ध होने पर उसमें छोटी पीपरि, सोंठ और जीरा प्रत्येक के चूर्ण ८ तोला, दालचीनी, छोटी इलायची के दाने, तेजपात, मिरिच और धनिया प्रत्येक के चूर्ण दो दो तोले डालकर करछी से भली भांति मिलाकर उतार लेवे। शीतल होने पर ६४ तोला मधु मिलाकर किसी घृत के चिकने पात्र में रख देवे। रोगी के बल और अग्नि के अनुसार (आधा तोला से २ तोले पर्यन्त) मात्रा की कल्पना करे। इसका सेवन करने से रक्तपित्त, उरःक्षत क्षय, कास, श्वास, नेत्र के सामने अँधेरा सा ज्ञात होना, वमन, तृष्णा और ज्वर ये सब रोग नष्ट होते हैं। यह अवलेह वीर्यवर्द्धक, पुष्टिकारक, बलप्रद, कान्तिवर्धक, उर क्षतनाशक, बृंहण और स्वर शोधक होने से शरीर को फिर नूतन बना देता है। इस कूष्माण्डरसायन का आविष्कार अश्विनीकुमारों ने किया था। मात्रा-६ माशा २ तोला ॥ ३६-४१ ॥

### वासाकूष्माण्डखण्ड।

पञ्चाशच्च पलं ग्राह्यं कूष्माण्डात् प्रस्थमाज्यतः। ग्राह्यं पलशतं खण्डं वासाक्वाथाढके पचेत् ॥ ४२ ॥ मुस्ता धात्री शुभा भार्गी त्रिसुगन्धैश्च कार्षिकैः। ऐलेयविश्वधन्याकमरिचैश्चपलांशिकैः ॥ ४३ ॥ पिप्पलीकुडवश्चैव मधुमानीं प्रदापयेत्। कासं श्वासं क्षयं हिक्कां रक्तपित्तं हलीमकम्। हृद्रोगमम्लपित्तञ्च पीनसञ्च व्यपोहति ॥ ४४ ॥

२५ सेर पेठे को (पहिले प्रयोग में लिखी) विधि के अनुसार १६ तोला घी में भूनकर ५ सेर खांड, १ सेर ३२ तोला अडूसे का क्वाथ डालकर पाक करे। पाक समाप्त होने से पहिले नागरमोथा, आँवला, वंशलोचन, भारंगी, दालचीनी, इलायची और तेजपात इनमें से प्रत्येक का चूर्ण १ तोला, एलुवा (एलवालुक सुगन्ध द्रव्य), सोंठ, धनिया और मिरिच प्रत्येक का चूर्ण ४ तोले और पीपरि का चूर्ण १ कुडव (१६ तोला) डालकर उत्तम रीति से चलाकर उतार लेवे। शीतल होने पर ३२ तोला मधुमिश्रित करके रख लेवे। इसका सेवन करने से कास, श्वास, क्षय, हिचकी, रक्तपित्त, हलीमक, हृद्रोग, अम्लपित्त और पीनस ये सब रोग नष्ट होते हैं। ६ माशा-२ तोला ॥ ४२-४४ ॥

### वासाखण्ड।

तुलामादाय वासायाः पचेदष्टगुणे जले। तेन पादावशेषेण पाचयेदाढकं भिषक् ॥ ४५ ॥ चूर्णानामभयानाञ्च खण्डाच्छुद्धशतं न्यसेत्। द्विपलं पिप्पलीचूर्णात् सिद्धे शीते च माक्षिकात् ॥ ४६ ॥ कुडवं पलमानन्तु चातुर्जातं सुचूर्णितम्। क्षिप्त्वा विलोडितं खादेद्रक्तपित्ती क्षतक्षयी। कासश्वासपरीतश्च यक्ष्मणा च प्रपीडितः ॥ ४७ ॥

वासकमूलस्य शतपलमार्द्रमेव ग्राह्यं जलं शराव १००, शेषः शराव २५, हरीतकीचूर्णं पलं ६४, शर्करा पलं १००, पिप्पलीचूर्णं पलं २, मधुनः कुडवमष्टपलं द्विगुणयादिति भानुदासः, चातुर्जातस्य प्रत्येकं पलम्। वासाक्वाथे शर्करा पलशतं गोलयित्वा दार्व्यालोडयेत् आसन्नपाके पिप्पलीचूर्णं चातुर्जातचूर्णञ्च प्रक्षेप्यशीतीभूते मधुप्रक्षेपणीयम्।

रूसे की गीली जड़ १०० पल ( ५ सेर ) लेकर ४० सेर जल में पकावे, १० सेर जल शेष रहने पर उतारकर छान लेवे। तदनन्तर उस क्वाथ में ३ सेर १६ तोला हरड़ का चूर्ण और १०० पल ( ५ सेर ) खाँड मिलाकर पकावे। पाक सिद्ध होने पर पीपरि का चूर्ण ८ तोला, दालचीनी, इलायची, तेजपात और नागकेशर इनमें से प्रत्येक का चूर्ण ४ तोला डालकर, भली भांति मिलाकर उतार लेवे। शीतल होने पर मधु ३२ तोला मिलाकर रख लेवे। इसका सेवन करने से रक्तपित्त, क्षतजन्य क्षय, कास, श्वास और राजयक्ष्मारोग नष्ट होते हैं। मात्रा आधा तोला से दो तोला पर्यन्त। अनुपान—बकरी का दूध ॥ ४१-४७ ॥

वासाघृत।

वासां सशाखां सपलाशमूलां कृत्वा कषायं कुसुमानि चास्याः। प्रदाय कल्कं विपचेद् घृतञ्च सक्षौद्रेण पानाद्विनिहन्ति रक्तम् ॥ ४८ ॥

अडूसा की शाखा ( डाली ), पत्ता और मूल कुल मिले हुये ४ सेर लेवे, उसको ३२ सेर जल में पकावे, जब ८ सेर जल शेष रहे तब छानकर रख लेवे। तदनन्तर उस क्वाथ में पाव भर अडूसा के पुष्प का कल्क और २ सेर घृत मिलाकर धीमी आंच से यथाविधि घृत सिद्ध करे। इस घृत में थोड़ा शहद मिलाकर पीने से रक्तपित्त रोग नष्ट होता है ॥ ४८ ॥

शणस्य कोविदारस्य वृषस्य ककुभस्य च। कल्काढ्यस्तात् पुष्पकल्कं प्रस्थे पलचतुष्टयम् ॥ ४९ ॥

सन, कचनार, अडूसा और अर्जुन वृक्ष ये कल्कप्रधान हैं अतः एक प्रस्थ घृत में ४ पल इनके पुष्पों का कल्क मिलाना चाहिये ॥ ४९ ॥

दूर्वाद्यघृत।

दूर्वा सोत्पलकिञ्जल्का मञ्जिष्ठा शैलवालुका। सितासितमुशीरञ्च मुस्तं चन्दनपद्मके ॥ ५० ॥ विपचेत् कार्षिकैरेतैः सर्पिराजं सुखाग्निना। तण्डुलाम्बु त्वजाक्षीरं दत्त्वा चैव चतुर्गुणम् ॥ ५१ ॥ तत् पानं वमतो रक्तं नावनं नासिकागते। कर्णाभ्यां यस्य गच्छेत्तु तस्य कर्णौ प्रपूरयेत् ॥ ५२ ॥ चक्षुःस्राविणि रक्ते च पूरयेत्तेन चक्षुषी। मेढ्पायुप्रवृत्ते तु वस्तिकर्म्मसु तद्धितम्। रोमकूपप्रवृत्ते तु तदभ्यङ्गः प्रशस्यते ॥ ५३ ॥

तण्डुलोदकछागदुग्धयोः प्रत्येकं चातुर्गुण्यं रक्तशालितण्डुलं शरावं ४ जलशरावं १६ संमर्द्य वस्त्रपूतं ग्राह्यम्।

रक्तशालीधान के २ सेर चावल को आठ सेर जल में मलकर छान लेवे। तदनन्तर यह जल ८ सेर, बकरी का दूध ८ सेर और बकरी का घृत २ सेर इन तीनों द्रव्यों को एकत्र मिश्रित करे। तत्पश्चात दूब, कमल, कमल की केशर, मजीठ, एलवालुक ( सुगन्ध द्रव्य ), मिश्री, श्वेत चन्दन, खस, नागरमोथा, रक्तचन्दन और पद्माख इनमें से प्रत्येक औषधि का एक-एक तोला कल्क मिलाकर धीमी आंच से यथाविधि पकावे। रक्त का वमन होता हो तो इस घृत का पान करे, नाक से रक्त गिरता हो तो इस घृत का नस्य लेवे, कानों से रक्त गिरता हो तो घृत से कानों को परिपूर्ण करे, नेत्रों से रक्तस्राव होता हो तो इस घृत से नेत्रों में आंजन करे, लिङ्ग अथवा

गुदा से रक्तस्राव होता हो तो इस घृत की पिचकारी देवे और रोमकूपों द्वारा रक्तस्राव होता हो तो इस घृत का शरीर में मर्दन करना चाहिये॥ ५०-५३॥

शतावर्यादिघृत।

शतावरी पयोद्राक्षा विदारीइक्षामलै रसैः। सर्पिषा सह संयुक्तैः सप्त प्रस्थं पचेद् घृतम्॥ ५४॥ शर्करापादसंयुक्तं रक्तपित्तं हरं पिबेत्। उरःक्षते पित्तशूले चोष्णवातेऽप्यसृग्दरे॥ बलमोजस्करं हृद्यं तथहृद्रोगनाशनम्॥ ५५॥

शतावरी गायका दूध, द्राक्षा, विदारीकन्द, ईख (गन्ना), आंवला इनमें से हरएक का अलग अलग रस १ प्रस्थ (६४ तोला) लेना चाहिये। घी १ प्रस्थ (६४ तोला), इनका विधि के अनुसार पाक करके रखना चाहिए। इस घृत के प्रयोग के समय घी से चौथाई खांड मिलाकर लेना चाहिए। इसके सेवन से रक्तपित्त, उर क्षत, पित्तशूल उष्णवात, रक्तप्रदर, क्षय तथा हृद्रोग आदि दूर होते हैं। यह घृत बल, वीर्य तथा ओज को बढ़ानेवाला है। मात्रा ½ तोला से १ तोला तक॥ ५४-५५॥

सप्तशर्करलौह।

लौहाच्चतुर्गुणं क्षीरमाज्यं द्विगुणमुत्तमम्। चूर्णं यावत्तु वैडङ्गं दद्यात् मधुसिते समे॥५६॥ ताम्रपात्रे शुभे पक्त्वा स्थापयेद् घृतभाजने। गुञ्जाद्वयप्रमाणेन भक्षयेद्विधिपूर्वकम्॥ ५७॥ अनुपानं प्रयुञ्जीत नारिकेलजलादिकम्। रक्तपित्तं जयेत् तीव्रमम्लपित्तं क्षतक्षयम्। पुष्टिदं कान्तिजननमायुष्यं हृद्यमुत्तमम्॥ ५८॥

मधुसिते प्रत्येकं लौहसमे मुद्रया पाके जाते लौहात् पादिकं विडङ्गचूर्णं प्रक्षेप्यं शीते च मधु देयम्।

लोहभस्म १ तोला, बकरी का दूध ४ तोला, घृत २ तोला, मिश्री १ तोला; सब द्रव्यों को एकत्र ताम्र के पात्र (कलई किये हुए) में पकाकर, उसमें ३ माशे वायविडङ्ग का चूर्ण मिलावे। शीतल होने पर एक तोला मधु मिलाकर घृत के पात्र में रख देवे। इसकी मात्रा—२ रत्ती। अनुपान—नारियल का जल आदि। इसका सेवन करने से रक्तपित्त, तीव्र अम्लपित्त क्षत और क्षय रोग नष्ट होते हैं तथा पुष्टि, वीर्य, कान्ति और आयु की वृद्धि होती है॥ ५६-५८॥

शतमूल्यादिलौह।

शतमूली सिता धान्यनागकेशरचन्दनैः। त्रिकत्रयतिलैर्युक्तं लौहं सर्वगदापहम्। तृष्णादाहज्वरच्छर्दिरक्तपित्तहरं परम्॥ ५६॥

शतावरि, चीनी, धनिया, नागकेशर, रक्तचन्दन, सोंठ, मिरिच, पीपरि, आंवला, हर्र, बहेरा, वायविडङ्ग, नागरमोथा, चीता और काले तिल ये सब एक एक भाग, मिले हुये कुल औषधों के सम न लोहभस्म, इन कुल औषधों को एकत्र खरल करके रख लेवे। मात्रा—२ रत्ती। अनुपान—मधु। इसका सेवन करने से तृष्णा, दाह, ज्वर, वमन और रक्तपित्त आदि विविध रोग नष्ट होते हैं॥ ५६॥

खण्डखाद्य लौह।

शतावरी छिन्नरुहा वृषमुण्डितिकाबलाः। तालमूली च गायत्री त्रिफलापारस्त्वचस्तथा॥ ६०॥ भार्गी पुष्करमूलञ्च पृथक् पञ्च पलानि च। जलद्रोणे विपक्तव्यमष्टभागावशेषितम्॥ ६१॥ पलद्वादशकं देयं कान्तलौहस्य चूर्णितम्। दिव्यौषधिहतस्यापि माक्षिकेण हतस्य वा॥ ६२॥ खण्डतुल्यं घृतं देयं पलषोडशिकं बुधैः। पचेत् ताम्रमये पात्रे

गुडपाको मतो यथा ॥ ६३ ॥ मस्थार्द्धं मधुनो देयं शुभ्रारमजतुकं स्वचम्। भृङ्गी विडङ्गं कृष्णा च शुण्ठी जातीफलं पलम्॥ ६४ ॥ त्रिफला धान्यकं पत्रं द्व्यक्षं मरिचकेशरम्। चूर्णं दत्त्वा सुमथितं स्निग्धे भाण्डे निधापयेत् ॥ ६५ ॥ यथाकालं प्रयुञ्जीत चतुर्गुञ्जामितं ततः। गव्यक्षीरानुपानञ्च सेव्यो मांसरसः पयः ॥ ६६ ॥ गुरुद्रव्यानुपानानि स्निग्धमांसादिबृंहणम् रक्तपित्तं क्षयं कासं पक्तिशूलं विशेषतः ॥ ६७ ॥ वातरक्तं प्रमेहञ्च शीतपित्तं वमिं क्लमम् श्वयथुं पाण्डुरोगञ्च कुष्ठं प्लीहोदरं तथा ॥ ६८ ॥ आनाहं शोणितस्रावमम्लपित्तं निहन्ति च। चक्षुष्यं बृंहणं वृष्यं माङ्गल्यं प्रीतिवर्द्धनम् ॥ ६९ ॥ आरोग्यपुत्रदं श्रेष्ठं कायाग्निबलवर्द्धनम्। श्रीकरं लाघवकरं खण्डकाद्यं प्रकीर्त्तितम् ॥ ७० ॥

पूर्वोक्तलौहान्तरवत् पथ्यापथ्यनिरूपणीयम्। केचिदत्र रसगन्धकमक्षेपे वदन्ति शुण्ठीजातीफलं पलमित्यत्र शुण्ठ्याजाजी पलं पलमिति केचित्।

शतावरि, गिलोय, अडूसा की छाल, गोरक्षमुण्डी, खरेटी, काली मुसली, खैर, आँवला, हर्रे, बहेड़ा, भारङ्गी और पुष्करमूल प्रत्येक २० तोला इनको २५ सेर ४८ तोला जल में पकावे। ६ सेर १६ तोला जल शेष रहने पर छानकर रस लेवे। तदनन्तर मैनशिल और स्वर्णमाक्षिक के संयोग से भस्म किया हुआ कान्तलौह ४८ तोला घृत ६४ तोला और खाँड़ ४८ तोला, लेकर पूर्वोक्त क्वाथ में मिलाकर ताम्रपात्र ( कलई किये हुए ) में गुड़पाक की रीति से पकावे। जब गाढ़ा हो जावे तब वंशलोचन, शिलाजीत, दालचीनी, काकड़ासिंगी, वायविडङ्ग, पीपरि, सोंठ और जायफल प्रत्येक का चूर्ण ४ तोला, आँवला, हरड़, बहेड़ा, धनिया, तेजपात, मिरिच और नागकेशर प्रत्येक का चूर्ण २ तोले मिलाकर उतार लेवे। शीतल होने पर मधु ६४ तोला मिलाकर किसी घी के चिकने पात्र में रख देवे। मात्रा ४ रत्ती, अनुपान—गाय का दूध और मांसरस आदि पौष्टिक द्रव्य। यथासमय इस औषध का सेवन करने से रक्तपित्त, क्षय, कास, पक्तिशूल, वातरक्त, प्रमेह, शीतपित्त, वमन, क्लान्ति, शोथ, पाण्डुरोग, कुष्ठ, प्लीहा, उदर, आनाह, रक्तस्राव और अम्लपित्त ये सब रोग नष्ट हो जाते हैं। यह लौह चक्षु के लिये लाभदायक, बलवीर्यवर्धक, माङ्गल्य, प्रीतिवर्धक, आरोग्यतादायक, पुत्रदायक, अग्नि का दीपन और कान्तिवर्धक है ॥ ६०–७० ॥

## सुधानिधिरस।

सूतं गन्धं माक्षिकं लौहचूर्णं सर्वं घृष्टं त्रैफलेनोदकेन। मूषामध्ये भूधरे वस्तुदित्वा दद्याद् गुञ्जां त्रैफलेनोदकेन ॥ ७१ ॥ लौहे पात्रे गोपयः पाचयित्वा रात्रौ दद्याद्रक्तपित्तप्रशान्त्यै ॥ ७२ ॥

पारा, गन्धक, स्वर्णमाक्षिक और लोहभस्म समभाग इन सब औषधों को लेकर त्रिफला के क्वाथ में घोटकर भूधरयन्त्र में फूँक देवे। स्वाङ्गशीतल होने पर त्रिफला के क्वाथ में घोटकर एक एक रत्ती की गोली बनावे। अनुपान—त्रिफला का क्वाथ और लोहे के पात्र में पकाया हुआ दूध। रात में इसका सेवन करना चाहिये। यह रक्तपित्तनाशक है ॥ ७१–७२ ॥

## ह्रीवेराद्य तैल।

ह्रीवेरं नलदं लोध्रं पद्मकोशीरपत्रकम्। नागपुष्पञ्च बिल्वञ्च भद्रमुस्ता तथा शटी॥ ७३ ॥ चन्दनञ्चैव पाठा च कुटजस्य फलत्वचम्। त्रिफलाभृङ्गराजश्च भल्लवासत्वचस्तथा ॥ ७४ ॥ आम्रास्थिजम्बुसारास्थिमूलं रक्तोत्पलस्य च। एतेषां कार्षिकै-

भार्गैस्तैलमस्थं विपाचयेत् ॥ ७५ ॥ लाक्षारसाढकञ्चैव क्षीरं स्नेहसमं भवेत् ॥ रक्तपित्तञ्च त्रिविधं नाशयेदविकल्पतः ॥ ७६ ॥ कासं पञ्चविधं हन्ति तथा श्वासमुरःक्षतम्। ह्रीवेराद्यमिदं तैलं बलवर्णाग्निवर्द्धनम् ॥ श्रीमद्गहननाथेन निर्मितं चिरत्नमङ्गलम् ॥ ७७ ॥

तिल का तैल १२८ तोला, पीपल की लाख का काथ १ सेर ३२ तोला, दूध १२८ तोला, इन सब द्रव्यों को एकत्र मिलाकर, नीचे लिखे औषधों के कल्क के साथ पकाकर तैल सिद्ध करे। कल्कार्थ औषध—सुगन्धवाला, खस, लोध, पद्माख, खस, तेजपात, नागकेशर, बेलगिरी, नागरमोथा, कपूर, रक्तचन्दन, पाढ़ी, इन्द्रजौ, कुडा की छाल, आंवला, हरड़, बहेड़ा, सोंठ, बहेड़ा की छाल, आम की गुठली की मींगी, जामुन की गुठली की मींगी और रक्त कमल की जड़ प्रत्येक एक एक तोला। इस तैल के मर्दन करने से तीन प्रकार के रक्तपित्त, पाँच प्रकार के कास-श्वास तथा उर:क्षत इन रोगों की शान्ति और बल, वर्ण और अग्नि की वृद्धि होती है। इस तैल का आविष्कार गहननाथजी ने किया है ॥ ७५-७७ ॥

## अर्केश्वर रस।

मृतार्कं मृतवङ्गञ्च मृताभ्रञ्च समाक्षिकम्। अमृतास्वरसैर्भाव्यं त्रिसप्तकपुटे पचेत् ॥ ७८ ॥ वासाक्षीरविदारीभ्यो गुञ्जाद्वयप्रमाणतः। भक्षणाद्विनिहन्त्याशु रक्तपित्तं सुदारुणम् ॥ ७९ ॥

तांबे की भस्म, वङ्गभस्म, अभ्रकभस्म, स्वर्णमाक्षिक भस्म, इन सबको एकत्रकर गिलोय के रस से २१ बार भावना देकर पुट दें। मात्रा- २ रत्ती, अनुपान—वासा तथा विदारीकंद का रस, इस रस के व्यवहार से भयंकर रक्तपित्त दूर होता है ॥ ७८-७९ ॥

## रक्तपित्तान्तक रस।

मृताभ्रं मुण्डतीक्ष्णञ्च माक्षिकं रसतालकम्। गन्धकञ्च भवेत्तुल्यं चण्डिद्राक्षामृताद्रवैः ॥ ८० ॥ दिनैकं मर्दयेत्खल्ले सिताक्षौद्रसमन्वितम्। गुञ्जाद्वयं निहन्त्याशु रक्तपित्तं सुदारुणम् ॥ ८१ ॥ ज्वरं दाहं ज्वतक्षीणं तृष्णां शोषमरोचकम् ८२ ॥

अभ्रकभस्म, मुण्डलोहभस्म, तीक्ष्णलोह भस्म, सोनामक्खी की भस्म, पारा, हरिताल, गन्धक, इन सम्पूर्ण द्रव्यों को बराबर लेकर एक एक दिन अलग-अलग घोटकर रख ले। यह रस २ रत्ती प्रमाण में खाँड वा शहद के साथ देने से दाह, श्वास, सूजन, अरुचि आदि रोगों में सेवन करने से हित करता है। इस रस को पुराने रक्तपित्तवाले रोगी को, जिसे ज्वर आता हो तथा वह क्षीण हो गया हो, देना चाहिए ॥ ८०-८२ ॥

## रक्तपित्तकुलकुठार रस।

शुद्धपारदबलिमतालकं हेममाक्षिकसुजङ्गरङ्गकम्। मारितं सकलमेतदुत्तमं भावयेत्पृथक् पृथक् द्रवैस्त्रिशः ॥ ८३ ॥ चन्दनस्य कमलस्य मालतीकोरकस्य वृषपल्लवस्य च। धान्यवारणकणा शतावरी शाल्मली वटजटामृतस्य च ॥ ८४ ॥ रक्तपित्तकुलकण्डनाभिधो जायते रसवरोऽस्य विधिनाम्। माषदो मधुदृपद्रवैरयं सेवितस्तु गुणकुम्पल्लैर्मितः ॥ ८५ ॥ नास्त्यनेन सममत्र भूतले भेषजं किमपि रक्तपित्तिनाम् ॥ ८६ ॥

पारा, गन्धक, मूँगाभस्म, सोनामक्खी की भस्म, सीसकभस्म, वङ्गभस्म इन सम्पूर्ण द्रव्यों को अलग-अलग, चन्दन का काढ़ा, कमल, मालती के फूल, वासापत्र, धनियाँ, गजपीपल, शतावरी, सेमल की जड़, बटजटा, गिलोय,

इनके रस से तीन—तीन भावना देना चाहिए। मात्रा—२ रत्ती, अनुपान शहद या वासा रस। यह रस रक्तपित्त के रोगियों के लिए अमृत के समान है। इसकी समानता का रक्तपित्त के लिये कोई दूसरा रस नहीं है ॥ ८३-८६ ॥

### रक्तपित्तान्तक रस।

जाती कोषफले मांसी कुष्ठं तालीशपत्रकम्। माक्षिकं मृतलौहञ्च अभ्रं दिव्यं समांशकम् ॥ ८७ ॥ सर्वतुल्यं मृतं तारं सर्वं निष्पिष्य वारिणा। द्विगुञ्जाभा वटी कार्या पित्तरोगविनाशिनी ॥ ८८ ॥ कोष्ठाश्रितञ्च यत्पित्तं शाखाश्रितमथापि वा। शूलञ्चैवाम्लपित्तञ्च पाण्डुरोगं हलीमकम् ॥ ८९ ॥ दुर्नामं भ्रान्तिवान्तिञ्च क्षिप्रमेव विनाशयेत्। रक्तपित्तान्तको ह्येषः काशिराजेन भाषितः ॥ ९० ॥

जावित्री, जायफल, जटामांसी, कुठ, तालीसपत्र, सोनामक्खी की भस्म, लौहभस्म, अभ्रकभस्म, हरएक द्रव्य बराबर-बराबर एक एक भाग, चांदी की भस्म ८ भाग, इन सम्पूर्ण द्रव्यों को इकट्ठा कर पानी के साथ घोटकर २ रत्ती प्रमाण की गोली बना लेना चाहिए। यह रस पित्त से उत्पन्न रोगों को शान्त करता है। कोठे में गया हुआ पित्त, शाखाश्रित पित्त, शूल, अम्लपित्त, पीलिया, हलीमक, बवासीर, सिर में चक्कर आना, इन सम्पूर्ण रोगों को यह रस तुरन्त ही हरण करता है ॥ ८७-९० ॥

### त्रिवृतादिमोदक।

त्रिवृता त्रिफला श्यामा पिप्पली शर्करा मधु। मोदकं सन्निपातोर्ध्वरक्तपित्तज्वरापहम् ॥ ९१ ॥

निसोत, त्रिफला (हर्रे, बहेड़ा, आंवला), श्यामा लता, पीपल इन सब द्रव्य बराबर-बराबर लेकर और इन सबके तोल से दूनी खांड लेकर विधि के अनुसार पाक कर ले। जब तैयार हो जावे उसका कर थोड़ा शहद मिलाकर १ मासे के लड्डू बना लेवे। ये मोदक सेवन कराने से सन्निपातज्वर, ऊर्ध्वग रक्तपित्त, ज्वरादि अनेक रोग दूर होते हैं ॥ ९१ ॥

### तीक्ष्णादि वटिका।

खर्पराभ्ररसास्तुल्यास्तीक्ष्णञ्च द्विगुणं मतम्। तीक्ष्णपादसमं स्वर्णं जतुक्वाथेन सप्तधा ॥ ९२ ॥ भावयित्वा ततः कार्या द्विगुञ्जा प्रमिता वटी। पलङ्कषाकषायेण रसेनोदुम्बरस्य वा ॥ ९३ ॥ प्रयोज्या वटिका ह्येषा शुभा तीक्ष्णादिनामिका। रक्तपित्तं क्षयं कासं यक्ष्माणं श्वसनं ज्वरम् ॥ ९४ ॥ निहन्यात् सकलान् रोगान् केशरी करिणं यथा ॥ ९५ ॥

खर्परभस्म, अभ्रकभस्म, रससिन्दूर, हर एक बराबर बराबर १ भाग, तीक्ष्ण लोहभस्म २ भाग, स्वर्णभस्म ½ भाग, इन सबको इकट्ठा कर लाख के काढ़े से सात भावनाएँ देकर २ रत्ती प्रमाण की गोली बना लेवे। अनुपान—गुग्गुल का काढ़ा या गूलर का रस। इन गोलियों के व्यवहार से रक्तपित्त, क्षय, खांसी, यक्ष्मा, श्वासक ज्वर इत्यादि अनेक रोगों को इस प्रकार नष्ट करता है जिस प्रकार सिंह हाथियों को ९२-९५ ॥

### उशीरासव।

उशीरं वालकं पद्मं काश्मीरं नीलमुत्पलम्। प्रियङ्गुपद्मकं लोध्रं मञ्जिष्ठा धन्वयासकम् ॥ ९६ ॥ पाठां किराततिक्तञ्च न्यग्रोधोदुम्बरं शटीम्। पर्पटं पुण्डरीकञ्च पटोलं काञ्चनारकम् ॥ ९७ ॥ जम्बूशाल्मलिनिर्यासं प्रत्येकं पलसम्मितम्। सर्वं सुचूर्णितं कृत्वा द्राक्षायाः पलविंशतिम् ॥ ९८ ॥ धातकीं षोडशपलां जलद्रोणद्वये क्षिपेत्। शर्करायास्तुलां दत्त्वा क्षौद्रस्यार्द्धतुलान्तथा ॥ ९९ ॥ मासं संस्थापये-

भाण्डे मांसीमरिचधूपिते। उशीरासव इत्येष रक्तपित्तविनाशनः। पाण्डुकुष्ठ-प्रमेहार्शः कृमिशोथहरस्तथा ॥ १०० ॥

खस, सुगन्धवाला, कमल, गम्भारी, नील कमल, फूलप्रियंगु, पद्माख, लोध, मजीठ, जवासा, पाढ़ी, चिरायता, बड़ की छाल, गूलर की छाल, कचूर, पित्तपापड़ा, कूठ, परवल की पत्तियाँ, कचनार की छाल, जामुन की छाल और सेमर का गोंद प्रत्येक का चूर्ण ४ तोले, मुनक्का १ सेर, धाय के फूल ६४ तोले, चीनी ६ सेर, मधु ३॥ सेर और जल २४ सेर ४८ तोला, इन सबको एकत्र मिलाकर किसी मिट्टी के बड़े पात्र में रख देवे, उस पात्र के मुख पर सकोरा रखकर मिट्टी से सन्धिस्थान को मुद्रित कर देवे। परन्तु उस पात्र को पहिले ही जटा मांसी और मिरिच से धूपित कर देवे। इन औषधों को एक मासपर्यन्त बन्द रहने देवें। तदनन्तर निकाल के वस्त्र से छानकर बोतलों में अथवा मिट्टी ही के पात्र में भरकर रख लेवे। इसका नाम उशीरासव है। इसका सेवन करने से रक्तपित्त, पाण्डु, कुष्ठ, प्रमेह, बवासीर, कृमिरोग और शोथरोग नष्ट होते हैं ॥ ९६ । १०० ॥

रक्तपित्त में अपथ्य।

अधोगते च्छर्दनं मूर्ध्वनिर्गमे विरेचनं स्यादुभयत्र लङ्घनम्। पुरातनाः षष्टिक शालिकोद्रवप्रियंगु नीवारयवप्रशातिका ॥ १०१ ॥ मुद्गामसूराश्चणका चणकास्तुवर्यो मुकुष्ट काश्चिद्वद वर्मिमत्स्याः शशककपोतौ हरिणयेनलावः शरारिपारावत वर्त्तकाश्च ॥ १०२ ॥ बकाउरभ्राश्च सकालपुच्छाः कपिञ्जलाश्चापिकषायवर्गः। गवामजायाश्च पयोघृतं च घृतं महिष्याः पनसं पियालम् ॥१०३॥ रम्भाफलं कञ्चट तुण्डुलीयं पटोल वेत्राग्र महार्द्रकाणि। पुराण कूष्माण्ड फलं च पक्वं तालानि तद्बीज जलानि शासा ॥ १०४ ॥ स्यादूनि बिम्बानि च दाडिमानि खर्जूरधात्रीमिशि नारिकेलम्। कशेरु शृङ्गाटमरुष्कराणि कपित्थ शालूक परूषकाणि ॥१०५॥ भूनिम्बशाकं पिचुमर्द पत्रं तुम्बीकलिङ्गानि चलाजशक्तुः। द्राक्षासितामाक्षिकमैक्षवश्च शीतोदकं चौद्भिद वारि चापि ॥ १०६ ॥ सेकोऽवगाहः शतधौतसर्पिः रम्यश्च योगः शिशिरः प्रदेहः। हिमानिलश्चंदनमिन्दु पादाः कथाश्चित्रा श्रवमनोनुकूलाः ॥ १०७ ॥ धारागृहं भूमिगृहं सुशीतं वैदूर्य मुक्तामणि धारणं च। रक्तोत्पलाम्भोरुहपत्र शय्या तामाम्बरं चोपवनं सुशीतम् ॥ १०८ ॥ प्रियङ्गु युक्त चन्दन रूषितानामालिङ्गनं चापि वराङ्गनानाम् पद्माकराणां सरितां ह्रदानां चन्द्रोदयानां हिमवद्दरीणाम् १०९ सुशीतलानां गिरिनिर्झराणां श्रुतिं प्रशस्तानि च कीर्तितानि। भकुष्टनीरं हिमवालुका च मितं नृणां शोणित पित्त-रोगं ॥ ११० ॥

अधोगामी रक्तपित्त में वमन ऊर्ध्वगामी रक्तपित्त में विरेचन और उभय गामी में लघन करना चाहिये। पुराना साठी चावल, अगहनी धान का चावल, कोदों, कांगनी, नीवार जौ, तीनी चावल, मूँग, मसूर, चना, अरहर, मोंठ, बन, चिनट वर्मी दोनों प्रकार की मछली, खरगोश, कपोत (एक प्रकारका कबूतर) हिरन एेन (मृगभेद) लवा, लेह कबूतर, बत्तख, बगला, मैढा, दुम्बा, सफेद तीतर, कसैली औषधियाँ, गौसम बकरी का घी, दूध भैंस का घी, कटहल, चिरौंजी, केला, केचट (चौलाई भेद) चौलाई, परवल, बेत की कोपल अदरख पुराना पेठा, पके हुए ताड़ का फल और उसके बीजों का रस जल चबूसा, मीठा कदूरी का फल, मीठा अनार, खजूर, आँवला, सौंफ, नारियल,

कसेरू, सिंघाड़ा, भिलावा, कैथ, कमलकंद, फालसा चिरायता का शाक, नीम की पत्ती, तुम्बी, मतीरा, धान की खील के सत्तू, मुनक्का, मिश्री, शहद, ईख का रस, शीतल जल, औद्भिद जल से परिषेक (सींचना) बुधकी लगाकर स्नान, सौ बार धोया घी लगाना, तैल की मालिश, शीतल लेप, शीतल वायु, चन्दन का लेप, चाँदनी सेवन, मनोरंजक कथावार्ता, विनोद, फुहारेयुक्त घर में रहना, शीतल तहखाने में निवास, वैदूर्य तथा मोती आदि मणि धारण, केले, कमल आदि के पत्तों पर सोना, पतले बारीक कपड़े पहनना, गहरी छायादार फूल बगिया में रहना, फूलप्रिय प्रेम सहित चन्दन लेप किए सुन्दरी स्त्रियों का आलिंगन, कमल खिले नदी तालाब में विहार, चाँदनी में सर्फीले गुफामें रहना, झरनों युक्त शीतल पर्वतों पर विहार, शीतल जल और शीतल वायु, रक्तपित्त रोग में मित्र के समान लाभदायक है ॥ १०१-११० ॥

रक्तपित्त में अपथ्य।

व्यायामाध्वनिषेवणं रविकरस्तीक्ष्णानि कर्माणि च। क्षोभो वेगविधारणं चपलता हस्त्यश्वयानानि च ॥ १११ ॥ स्वेदास्रस्रुतिधूमपान सुरत क्रोधाः कुलत्थो गुडा। वार्ताकुस्तिलमाप सर्षपदधिक्षारणि कौपे पयः ॥ ११२ ॥ ताम्बूलं नवदाम्बु मद्यलशुनं शिम्बी विरुद्धाशनं कट्वाम्लं लवणं विदाहि च गणस्त्याज्योऽस्रपित्ते नृणाम् ॥ ११३ ॥

इति भैषज्यरत्नावल्यां रक्तपित्ताधिकारः समाप्तः ॥

शारीरिक परिश्रम, पैदल मार्ग चलना, धूप, परिश्रम और क्रूरतापूर्ण काम करना, क्षोभ करना, मलमूत्र आदि के वेगों को रोकना, चंचलता (बार २ इधर-उधर घूमना उठना-बैठना) हाथी घोड़ा आदि की धचके वाली सवारी, स्वेदन, रक्त निकलवाना, धूम्रपान, मैथुन, क्रोध कुलथी, गुड़, बैंगन (ताजा जल) तिल, उरद, सरसों दही, क्षारीय पदार्थ कुएँ का जल पान, खस, की शराब, लहसुन, सेम; विरुद्ध अन्न चरपरे खट्टे नमकीन, जलन, उत्पन्न करने वाले पदार्थों का सेवन, रक्तपित्त के रोगी के लिए हानिकारक है ॥ १११-११३॥

इति सरयूप्रसादत्रिपाठिविरचितायां भैषज्य-रत्नावल्या रत्नप्रभाऽभिधायां व्याख्यायां रक्तपित्ताऽधिकारः समाप्तः ॥

---

## अग्निमान्द्याधिकारः।

पाचकाग्नि की सर्वथा रक्षणीयता

सारमेतच्चिकित्सायाः परमग्नेश्च पालनम्। तस्माद् यत्नेन कर्त्तव्यं वह्नेस्तु गतिपालनम् ॥ १ ॥ अस्तु दोषशतं क्रुद्धं सन्तु व्याधिशतानि च। कायाग्निमेव मतिमान् रक्षन् रक्षति जीवितम् ॥२॥ समस्य रक्षणं कार्य्यं विषमे वातनिग्रहः। तीक्ष्णे पित्तप्रतीकारो मन्दे श्लेष्मविशोधनम्[1] ॥३॥

पाचकाग्नि की यत्नपूर्वक रक्षा करना यही चिकित्सा का तत्त्व है, इससे यत्नपूर्वक अग्नि की रक्षा करनी चाहिये। सैकड़ों दोष कुपित हुये हों, सैकड़ों रोग उत्पन्न हुये हों, तथापि पहिले अग्नि की ही रक्षा करने से रोगी के जीवन की रक्षा हो सकती है। यदि अग्नि सम हो तो उसको उसी रूप में रक्षित रखना, विषमाग्नि हो तो वायु का शमन करना, तीक्ष्णाग्नि हो तो पित्त का शमन करना और यदि मन्दाग्नि हो तो कफ का शोधन करना चाहिये ॥ १-३ ॥

अग्निमान्द्य।

हरीतकी तथा शुण्ठी भक्ष्यमाणा गुडेन

1 'विशोधनं' इति पाठान्तरम्-कफ को सुखाना चाहिये यह भी अर्थ होता है।

च। सैन्धवेन युता वापि सातत्येनाग्निदीपनी ॥ ४ ॥

हरड़ और सोंठ को गुड़ या सेंधे नमक के साथ खाने से अग्नि बढ़ती है, अर्थात् यह योग अग्निदीपन है ॥ ४ ॥

सैन्धवादिचूर्ण।

सैन्धवं चित्रकं पथ्या लवङ्गं मरिचं कणा। टङ्कनं नागरं चव्यं यमानी मधुरी वचा ॥ ५ ॥ द्रव्याणि द्वादशैतानि समभागानि चूर्णयेत्। भावयेन्निम्बुकद्रावैस्त्रिसप्ताहं प्रयत्नतः ॥ ६ ॥ ततो माषद्वयं चूर्णं वारिणोष्णेन पाययेत्। सैन्धवेन सतक्रेण मस्तुना काञ्जिकेन वा। सैन्धवाद्यमिदं चूर्णं सद्यो वह्निं प्रदीपयेत् ॥ ७ ॥

सेंधानमक, चीता का मूल, हरड़, लौंग, मिरिच, पीपरि, सोहागा फूला हुआ, सोंठ, चव्य, अजवाइन, सौंफ और वच, इन १२ औषधों का समभाग चूर्ण एकत्रित कर २१ दिन पर्यन्त नींबू के रस में भावना देकर सुखा लेवे। इसकी मात्रा २ मासा। उष्ण जल, सेंधानोन मिला तक, दही का पानी अथवा कांजी, इनमें से किसी एक के साथ सेवन करना चाहिये। सेवन करने से शीघ्र ही अग्नि दीप्ति होती है ॥ ५-७ ॥

हिङ्ग्वष्टक चूर्ण

त्रिकटुकमजमोदा सैन्धवं जीरके द्वे समधरणधृतानामष्टमो हिङ्गुभागः। प्रथमकवलभुक्तं सर्पिषा चूर्णमेतत् जनयति जठराग्निं वातरोगांश्च हन्ति ॥ ८ ॥

अजमोदात्र यमानी अग्नेरत्यन्तदीपनत्वादिति भानुदासगोपालदासौ। चूर्णं भक्तोपरि दत्त्वा घृतेन सन्धीय ग्रासत्रयं भोजनीयमिति भानुदासः।

सोंठ, मिरिच, पीपरि, अजवाइन, सेंधा नमक, स्याह जीरा और सफेद जीरा ये सब औषध समभाग हों तथा हींग सब औषध का अष्टमांश हो, इनको कूट पीसकर चूर्ण[1] बना लेवे। भोजन करने के समय पहले ग्रास के साथ घृत में मिलाकर इस चूर्ण का सेवन करने से अग्नि की दीप्ति और वातजन्यरोगों का नाश होता है ॥ ८ ॥ भानुदास कहते हैं कि भात में इस चूर्ण को मिलाकर घी में सान कर पहिले तीन ग्रास भोजन करना चाहिये। मात्रा—१ माशा ॥ ८ ॥

बृहदग्निमुख चूर्ण

द्वौ क्षारौ चित्रकं पाठा करञ्जं लवणानि च। सूक्ष्मैलापत्रकं भार्गी क्रिमिघ्नं हिङ्गुपुष्करम् ॥ ९ ॥ शटी दार्वी त्रिवृन्मुस्तं वचा चेन्द्रयवस्तथा। धात्री जीरकवृक्षाम्लं श्रेयसी चोपकुञ्चिका ॥ १० ॥ अम्लवेतसमम्लीका यमानी सुरदारु च। अभयातिविषा श्यामा हबुषारग्वधं समम् ॥ ११ ॥ तिलमुष्ककशिग्रूणां कोकिलाक्षपलाशयोः। क्षाराणि लौहकिट्टञ्च तप्तं गोमूत्रसेचितम् ॥ १२ ॥ समभागानि सर्वाणि श्लक्ष्णचूर्णानि कारयेत्। मातुलुङ्गरसेनैव भावयेच्च दिनत्रयम् ॥ १३ ॥ दिनत्रयन्तु शुक्तेन आर्द्रकस्य रसेन च। अत्यग्निकारकं चूर्णं प्रदीप्ताग्निसमप्रभम् ॥ १४ ॥ उपयुक्तविधानेन नाशयत्यचिराद्‌दृढान्। अजीर्णकमथो गुल्मान् प्लीहानं गुदजानि च ॥ १५ ॥ उदराण्यन्त्रवृद्धिञ्च अष्ठीलां वातशोणितम्। प्रणुदत्युल्बणान् रोगान् नष्टमग्निं प्रदीपयेत् ॥ १६ ॥

---

[1] चूर्ण बनाने से पहिले हींग और दोनों जीरों को भून लेना चाहिये।

समस्तव्यञ्जनोपेतं भक्तं कृत्वा सुभाजने । दापयेदस्य चूर्णस्य माषद्वयमितं शुभम् । गोदोहमात्रात् तत् सर्वं द्रवीभवति सोष्मकम् ॥ १७ ॥

जवाखार, सज्जीखार, चीता, पाढ़ी करञ्ज के मूल की छाल, पाँचों नमक, छोटी इलायची के दाने, तेजपात, भारङ्गी, बायबिडङ्ग, हींग, पुहकरमूल, कचूर, दारुहलदी, निसोथ, नागरमोथा, बच, इन्द्रजौ, आँवला, जीरा, अमलोनिया (विषाबिल या कोकम), गजपीपरि, कलौंजी अमलवेत, इमली, अजवाइन, देवदारु, हरीतकी, अतीस, अनन्तमूल, हाऊबेर, अमिलतास की फली का गूदा, तिल की लकड़ी का क्षार, मोखा का क्षार, अडूसा की छाल का क्षार, लाल मखाना के पञ्चाङ्ग का क्षार, पलाश का क्षार, तपाकर गोमूत्र में बुझाया हुआ मण्डूर, इन सब औषधों को समान परिमाण में लेकर महीन चूर्ण बनावे । उस चूर्ण को तीन दिन तक बिजौरा नींबू के रस में, तीन दिन शुक्त में और तीन दिन पर्यन्त अदरख के रस में खरल करके सुखा लेवे । विधि से सेवन करने पर यह चूर्ण अजीर्ण, गुल्म, प्लीहा, बवासीर, उदर, अन्त्रवृद्धि, अष्ठीला और वातरक्त आदि अनेक उपद्रव रोगों को शीघ्र नष्ट कर शीघ्र अन्नों का परिपाचन और अग्नि का दीपन करता है । यह प्रज्वलित अग्नि के समान है । थाली में भात, दाल, तरकारी, शाक और घृत आदि भोज्य पदार्थों को परोसकर, उसमें २ मासा बड़वाग्निमुख चूर्ण मिलाकर थोड़ी देर रख देवे, इससे यह सब गल जायगा और उसमें से धुवाँ सा निकलने लगेगा । मात्रा–१ मासा से २ मासा तक ॥ ११-१७ ॥

वडवानलचूर्ण ।

सैन्धवं पिप्पलीमूलं पिप्पली चव्यचित्रकम् । शुण्ठी हरीतकी चेति क्रमवृद्धानि चूर्णयेत् ॥ १८ ॥ वडवानलनामैतच्चूर्णं स्यादग्निदीपनम् ॥ १९ ॥

सेंधा नमक १ भाग, पिप्पलीमूल १ भाग, पीपल ३ भाग, चव्य ४ भाग, चित्रक ५ भाग, सोंठ ६ भाग, हरड़ ७ भाग, इन सम्पूर्ण द्रव्यों का पृथक्-पृथक् चूर्ण कर मिला ले । इस चूर्ण से अग्नि प्रदीप्त होती है ॥ १८-१९ ॥

वडवामुखचूर्ण ।

पथ्यानागरकृष्णाकरञ्जबिल्वाग्निभिः सितातुल्यैः । वडवामुखं विजयते गुरुतरमपि भोजनं चूर्णम् ॥ २० ॥

हरड़, सोंठ, पीपल, करञ्ज की छाल, बिल्व फलमज्जा, चित्रक, हर एक द्रव्य बराबर लेकर चूर्ण कर ले । इस सम्पूर्ण चूर्ण के बराबर खाँड़ मिश्रण करे मात्रा–२ मासा । इस चूर्ण के सेवन करने से भारी से भारी भोजन पच जाता है ॥ २० ॥

भास्करलवण ।

पिप्पली पिप्पलीमूलं धान्यकं कृष्णजीरकम् । सैन्धवञ्च विडञ्चैव पत्रं तालीशकेशरम् ॥ २१ । एषां द्विपलिकानि भागान् पञ्च सौवर्चलस्य च । मरिचाजाजीशुण्ठीनामेकैकस्य पलं पलम् ॥ २२ ॥ त्वगेला चार्द्धभागेन सामुद्रात् कुडवद्वयम् । दाडिमात् कुडवञ्चैव द्वे पले चाम्लवेतसात् ॥ २३ ॥ एतच्चूर्णीकृतं श्लक्ष्णं गन्धाढ्यममृतोपमम् । लवणं भास्करं नाम भास्करेण विनिर्मितम् ॥ २४ ॥ जगतस्तु हितार्थाय वातश्लेष्मामयापहम् । वातगुल्मं निहन्त्याशु वातशूलानि यानि च ॥ २५ ॥ तक्रमस्तुसुराशीधुशुक्तकाञ्जिकयोजितम् । जाङ्गलानां च मांसेन रसेन विविधेन च ॥ २६ ॥ मन्दाग्नेरश्नतो नित्यं भवेदग्नेश्च पावकः । अर्शांसि ग्रहणीदोषं कुष्ठामयभगन्दरान् । २७ ॥ हृद्रोगमामदोषञ्च विबन्धानुदरे स्थितान् । प्लीहानमश्मरीञ्चैव श्वासका-

सोदरक्रमीन् ॥ २८ ॥ विशेषतः शर्करादीन् रोगान् नानाविधांस्तथा । पाण्डुरोगांश्च विविधान् नाशयत्यशनिर्यथा ॥ २९ ॥

पत्रतालीशादियोगादेव गन्धाढ्यं न पुनरपरचातुर्जातादिप्रक्षेपात् ।

पीपरि, पिपरामूल, धनिया, कालाजीरा, सेंधानमक, विडनोन, तेजपात, तालीसपत्र और नागकेसर प्रत्येक ८ तोला, कालानमक २० तोला, मिरिच, जीरा और सोंठ प्रत्येक ४ तोला, दालचीनी और छोटी इलाइची के दाने प्रत्येक १ तोले, सामुद्रनोन ३२ तोला, अनार के दाने १६ तोला और अमलबेत ८ तोला; इनको भलीभाँति कूट पीस कपड़छान करके रख लेवे। सुगन्धित और अमृत के समान लाभदायक इस भास्करलवण का भगवान् भास्करजी ने संसार के हित के लिये आविष्कार किया था । मद्य (शराब), दही का पानी, सुरा, सीधु ( ईख के रस का सिरका ), कांजी, जङ्गली पशुओं का मांसरस आदि विविध अनुपानों के साथ इसका सेवन किया जाता है। उक्त अनुपानों के साथ सेवन करने पर यह समस्त वातश्लैष्मिकरोग, वातगुल्म, वातिकशूल, अग्निमान्द्य, बवासीर, ग्रहणीविकार, कुष्ठ, भगन्दर, हृद्रोग, आमदोष, मलबद्धता, प्लीहा, अश्मरी ( पथरी ), श्वास, कास, उदररोग, अनेक प्रकार के शर्करा रोग पाण्डुरोग आदि अनेक प्रकार के रोगों को नष्ट करता है। अग्नि के दीपन के लिये यह महौषध है। इस लवण को सुगन्धित बनाने के अभिप्राय से इसमें किसी चातुर्जातादि सुगन्धित पदार्थों का प्रक्षेप नहीं किया गया है, किन्तु तालीसपत्र और तेजपात आदि औषध ही ऐसे हैं जिनके योग से यह सुगन्धित हो जाता है ॥ २१-२९ ॥

अग्निमान्द्यहर योग ।

भोजनाग्रे सदा पथ्यं जिह्वाकण्ठविशोधनम् । अग्निसन्दीपनं हृद्यं लवणार्द्रकभक्षणम् ॥ ३० ॥

भोजन के पहिले सेंधानोन मिलाकर थोड़ा अदरख खाना चाहिये । इससे जिह्वा और कण्ठ की शुद्धि तथा अग्नि की दीप्ति होती है। यह हृदय के लिये लाभप्रद और सर्वदा पथ्य है ॥ ३० ॥

आमजीर्णचिकित्सा ।

वचालवणतोयेन वान्तिरामे प्रशस्यते ॥ ३१ ॥

वच को पानी में पीसकर सेंधानमक के साथ सेवन करने से वमन हो जाता है, इससे आमदोष की शान्ति होती है ॥ ३१ ॥

धान्यनागरसिद्धं च तोयं दद्याद्विचक्षणः । आमाजीर्णप्रशमनं शूलघ्नं बस्तिशोधनम् ॥ ३२ ॥

धनियाँ तथा सोंठ के काढ़े को आमाजीर्ण में सेवन कराना चाहिए, इसके प्रयोग से शूल का शमन होता है तथा मूत्राशय साफ होता है ॥ ३२ ॥

विदग्धाजीर्ण की चिकित्सा ।

अन्नं विदग्धं हि नरस्य शीघ्रं शीताम्बुना वै परिपाकमेति । तत्तस्य शैत्येन निहन्ति पित्तमाक्लेदिभावाच्च नयत्यधस्तात् ॥ ३३ ॥

विदग्धाजीर्ण में शीतल जल पीने से अन्न का शीघ्र ही परिपाक हो जाता है। तथा उस जल की ठंडक और द्रवत्व से दूषित पित्त नष्ट होकर अन्न अधोमार्ग से निकल जाता है ॥ ३३ ॥

हरीतकीधान्यतुषोदसिद्धा सपिप्पली सैन्धवसंप्रयुक्ता । सोद्गारधूमं भृशमप्यजीर्णं विजित्य सद्यो जनयेत् क्षुधाञ्च ॥ ३४ ॥

हरीतकी और पीपरि, इन दोनों को कांजी में पकाकर सेंधानमक के साथ सेवन करने से धूमयुक्त डकार का आना और अजीर्ण,

इनकी निवृत्ति होने से शीघ्र ही भूख लगती है ॥ ३४ ॥

विष्टब्धाजीर्णचिकित्सा।

विष्टब्धे स्वेदनं पथ्यं पेयञ्च लवणोदकम्। रसशेषे दिवास्वप्नं लङ्घनं वातवर्जनम्। ३५ ॥

विष्टब्धाजीर्ण में स्वेदन करना और नमक मिलाकर पानी पीना चाहिये। रसशेषाजीर्ण में दिन में शयन करना, उपवास करना और वायु से बचना लाभदायक होता है ॥ ३५ ॥

व्यायामप्रमदाध्ववाहनरतः क्लान्तानतीसारिणः शूलश्वासवतस्तृषापरिगतान् हिक्कामरुत्पीडितान्। क्षीणान् क्षीणकफान् शिशून् मदहतान् वृद्धान् रसाजीर्णिनो रात्रौ जागरितान्नरान्निरशनान् कामं दिवा स्वापयेत् ॥ ३६ ॥

जो लोग सर्वदा व्यायाम, स्त्रीसङ्ग, रास्ता चलना और घोड़ा आदि की सवारी करके श्रम किया करते हैं, इनके लिये तथा क्लान्त (थके हुए), अतिसाररोगी, शूलरोगी, श्वासरोगी, तृष्णारोगी, हिचकी और वायु से पीड़ित, क्षीणधातु, क्षीणकफ, शिशु, मद्यात्ययादि रोगी, वृद्ध, रसाजीर्णाजीर्ण रोगी, रात में जागे हुये और निराहार मनुष्यों के लिये दिन में यथेष्ट शयन करना लाभदायक होता है ॥ ३६ ॥

सर्वाजीर्णनाशक विधि।

आलिप्य जठरं प्राज्ञो हिंगुत्र्यूषणसैन्धवैः। दिवास्वप्नं प्रकुर्वीत सर्वाजीर्णविनाशनम् ॥ ३७ ॥

हींग, सोंठ, मिरिच, पीपरि और सेंधा नमक, इनको पानी में पीसकर पेट पर लेप करके दिन में शयन करने से सब प्रकार के अजीर्णरोग नष्ट होते हैं ॥ ३७ ॥

अजीर्णहर योग।

पथ्यापिप्पलिसंयुक्तं चूर्णं सौवर्चलं पिबेत्। मस्तुनोष्णोदकेनाथ बुद्ध्वा दोषगतिं भिषक् ॥ ३८ ॥ चतुर्विधमजीर्णञ्च मन्दानलमरोचकम्। आध्मानं वातगुल्मञ्च शूलञ्चाशु नियच्छति ॥ ३९ ॥

हरड़, पीपरि और कालानमक, इन तीनों को सम भाग लेकर चूर्ण बनावे। दोषानुसार दही के पानी अथवा उष्णजल के साथ इस चूर्ण का सेवन करने से चार प्रकार के अजीर्ण, अग्निमान्द्य, अरोचक, आध्मान, वातगुल्म और शूलरोग नष्ट होते हैं ॥ ३८-३९ ॥

विसूचिकाचिकित्सा।

विसूचिकायां वमितं विरिक्तं सलङ्घितं वा मनुजं विदित्वा। पेयादिभिर्दीपनपाचनैश्च सम्यक् क्षुधार्त्तं समुपक्रमेत् ॥ ४० ॥

विसूचिकारोग में वमन, विरेचन और लङ्घन कराने के पश्चात् रोगी को भली भाँति भूख लगने पर दीपन और पाचन पेया आदि आहार के लिये देना चाहिये ॥ ४० ॥

जलपीतमपामार्गमूलं हन्ति विसूचिकाम् ॥ ४१ ॥

चिरचिरा की जड़ को पानी में पीस कर पीने से विसूचिकारोग नष्ट होता है ॥ ४१ ॥

बालमूलस्य तु क्वाथः पिप्पलीचूर्णसंयुतः। विसूचीनाशनः श्रेष्ठो जठराग्निविवर्धनः ॥ ४२ ॥

छोटी मूली के काढ़े में पीपल का चूर्ण ऊपर से मिलाकर पिलाने से विसूचिका (हैजा) नाश को प्राप्त होता है तथा यह अग्निप्रदीपक है ॥ ४२ ॥

बिल्वनागरनिःक्वाथो हन्याच्छर्दिं विसूचिकाम्। सतैलं कारवेल्लाम्बु नाशयेद्धि विसूचिकाम् ॥ ४३ ॥

बिल्व और सोंठ के क्वाथ से छर्दि तथा विसूचिका (हैजा) नष्ट होता है और बेलगुड़ फल का रस भी विसूचिका को नाश करता है ॥ ४३ ॥

कुष्ठसैन्धवयोः कल्कं चुक्रतैलसमन्वितम्। विसूच्यां मर्दनं कोष्णं खल्लीशूलनिवारणम् ॥ ४४ ॥

चूक (अभाव में काँजी) और तिल के तेल के साथ कूठ और लाहौरी नमक पीसकर गरम करके मर्दन (मालिश) करने से हाथ, पैर आदि का खल्लीशूल निवृत्त होता है ॥ ४४ ॥

व्योषं करञ्जस्य फलं हरिद्रां मूलं समावाप्य च मातुलुङ्ग्याः। छायाविशुष्का गुटिकाः कृतास्ता हन्युर्विसूचीं नयनाञ्जनेन ॥ ४५ ॥

सोंठ, मिरिच, पीपरि, हरद, करञ्ज का फल, हलदी और बिजौरा का मूल, इनको पानी में पीसकर गोलियाँ बना लेवे। इन गोलियों को छाया में सुखाकर रख लेवे। पानी में घिसकर इसको आँखों में अञ्जन करने से विसूचिका नष्ट होती है ॥ ४५ ॥

गुडपुष्पशिरीषतण्डुलगिरिकर्णिकाहरिद्राभिः। अञ्जनगुटिका विलयति विसूचिकां त्रिकटुसंयुक्ता ॥ ४६ ॥

महुआ का फूल, सिरसिरा के बीज का चावल, सफेद कोयल की जड़, हल्दी और त्रिकटु इनको एकत्र पानी में पीसकर गोलियाँ बना लेवे। इस अञ्जन गुटिका को पानी में घिसकर आँखों में अञ्जन करने से विसूचिका रोग नष्ट होता है ॥ ४६ ॥

त्वक्पत्ररास्नाऽगुरुशिग्रु कुष्ठैरम्लप्रपिष्टैः सवचाशताह्वैः। उद्वर्तनं खल्लिविसूचिकाघ्नं तैलं विपक्वञ्च तदर्थकारि ॥ ४७ ॥

दालचीनी, तेजपात, रास्ना, अगर, सहिंजने की छाल, कूठ, वच और सोया, इन कुल औषधों को एकत्र काञ्जी में पीसकर मर्दन करने से अथवा इन औषधों के कल्क और काँजी के साथ पकाकर सिद्ध किये हुये तैल का मर्दन करने से विसूचिका और विसूचिकाजन्य हाथ पैर आदि का सिकुड़ना, ऐंठना आदि नष्ट होते हैं ॥ ४७ ॥

अलसकचिकित्सा।

वमनं त्वलसे पूर्वं लवणेनोष्णवारिणा। स्वेदो वर्तिर्लङ्घनञ्च क्रमश्चातोऽग्निवर्द्धनः ॥ सेवयेदौषधं पश्चात् मूत्रकृच्छ्रानुनाशनम् ॥ ४८ ॥

अलसकरोग में पहिले लवण मिला उष्ण[1] जल पिलाकर वमन करावे। पश्चात् स्वेद, [2]वर्ति, उपवास और अग्निवर्धक क्रियाओं को करे। तदनन्तर मूत्रजनन (जिससे पेशाब उतरे) और वायुनाशक औषधों का सेवन कराना चाहिये ॥ ४८ ॥

उदरवेदनाचिकित्सा।

सरुक् चानद्धमुदरमम्लपिष्टैः प्रलेपयेत्। दारुहैमवतीकुष्ठशताह्वाहिङ्गुसैन्धवैः ॥ ४९ ॥

उदर में पीड़ा होती हो और तना हो तो देवदारु, वच, कूठ, सोया, हींग और लाहौरी नमक, इनको काँजी में पीसकर लेप करना चाहिये ॥ ४९ ॥

तक्रेण युक्तं यवचूर्णमुष्णं सक्षारमर्त्तिं जठरे निहन्यात्। स्वेदो घटैर्वा बहुबाष्पपूर्णैः कोष्णैस्तथान्यैरपि पाणितापैः ॥ ५० ॥

तक्रेण सन्धाय यवचूर्णं सयवक्षारं पूर्णं स्थोल्लके तप्तं कृत्वा उदरे स्वेदो

---

१—इसमें मैनफल भी मिला लेवे तो और अच्छा है।

२—बकुल के बीज को पीसकर बत्ती बनावे उस बत्ती को गुदा में रखना चाहिये।

दातव्यः लेपो वा इति भानुः । अम्लघोलांश[1] ४ चतुष्पलानि यवचूर्णं पलद्वयं यवक्षारमेकपलञ्च सर्वं स्थाल्यां पक्त्वयम् । अतितप्ते सति अपरघटिकायां किञ्चिद्घ्या तां घटीमुदरे भ्रामयेदिति त्रिपुरारिः ।

जौ का आटा और जवाखार का चूर्ण, इनको माठा में मिलाकर आग पर उष्ण करके उससे उदर पर स्वेद ( सेंक ) देवे अथवा लेप कर देवे, यह तो भानुजी का मत है। त्रिपुरारिजी कहते हैं कि—'खट्टा घोल १६ तोला, जौ का चूर्ण ८ तोला और जवाखार ४ तोला, इन सब द्रव्यों को मिश्रित कर बटली में पकावे, जब अत्यन्त तप्त हो जावे, तब किसी दूसरे घड़ा में डालकर उस घड़े की पेंदी उदर पर घुमावे।' बहुत भाप से भरे हुए घड़ों से स्वेदन करना अथवा हाथ गरम करके उससे उदर को सेंकना आदि क्रियाओं से उदर की पीड़ा दूर होती है ॥ ५० ॥

तीव्रार्त्तिरपि नाजीर्णी पिबेच्छूलघ्नमौषधम् । दोषच्छन्नोऽनलो नालं पक्तुं दोषौषधाशनम् ॥ ५१ ॥

उदर में अत्यन्त पीड़ा होने पर भी अजीर्ण रोगी शूलनाशक औषध का सेवन न करे। कारण यह कि जठराग्नि जब वात आदि दोषों से ढँकी रहती है, तब दोष, औषध और किसी भी खाये हुए द्रव्य का परिपाक नहीं कर सकती है ॥ ५१ ॥

लवङ्गाद्य मोदक ।

लवङ्गं पिप्पली शुण्ठी मरिचं जीरकद्वयम् । केशरं तगरञ्चैव एला जातीफलं तुगा ॥ ५२ ॥ कट्फलं तेजपत्रञ्च पद्मबीजं सचन्दनम् । कंकोलमगुरुश्चैव उशीरमभ्रकं तथा ॥ ५३ ॥ कर्पूरं जातिकोषं च मुस्तं मांसी यवस्तथा । धान्यकं शतपुष्पा च लवङ्गं सर्वतुल्यकम् ॥ ५४ ॥ सर्वचूर्णद्विगुणितां शर्करां विनियोजयेत् । सर्वरोग निहन्त्याशु अम्लपित्तं सुदारुणम् ॥५५॥ अग्निमान्द्यमजीर्णञ्च कामलापाण्डुरोगनुत् । बलपुष्टिकरञ्चैव विशेषात् शुक्रवर्द्धनम् ॥ ५६ ॥ ग्रहणीं सर्वरूपाञ्च अतीसारं सुदुर्जयम् । अश्विभ्यां निर्मितं हन्ति लवङ्गाद्यमिदं शुभम् ॥ ५७ ॥

लौंग, पीपरि, सोंठ, मिरिच, सफेद जीरा, स्याह जीरा, नागकेशर, तगर, इलायची, जायफल, वंशलोचन, कायफल, तेजपात, कमलगट्टा, रक्तचन्दन, शीतलचीनी, अगर, खस, अभ्रकभस्म, कपूर, जावित्री, नागरमोथा, जटामासी, जौ, धनिया और सोया प्रत्येक का चूर्ण १ तोला, लौंग का चूर्ण २६ तोले, इनको एकत्र मिला लेवे। तदनन्तर १०४ तोले मिश्री लेकर उसकी चाशनी बनावे, उस चाशनी को पूर्वोक्त चूर्ण में मिलाकर लड्डू बना लेवे। इसका सेवन करने से अम्लपित्त, दारुण, अग्निमान्द्य, अजीर्ण, कामला, पाण्डुरोग और सब प्रकार की ग्रहणी, दुर्जय अतिसार आदि अनेक रोग शीघ्र ही नष्ट होते हैं तथा बल वीर्य की वृद्धि होती है। इस लवङ्गादि मोदक का आविष्कार अश्विनीकुमारों ने किया था ॥ ५२-५७ ॥

वाताजीर्ण में सुकुमारमोदक।

पिप्पली पिप्पलीमूलं नागरं मरिचं शिवा । धात्री चित्रकमभ्रञ्च गुडूची कटुरोहिणी ॥ ५८ ॥ प्रत्येकमेषां कर्षांशं चूर्णं दन्त्याश्चिकार्षिकम् । द्विपलं त्रिवृताचूर्णं शर्करायाः पलत्रयम् ॥ ५९ ॥ मधुना मोदकं कार्य्यं सुकुमारकमोदकम् । वाताजी-

---

1 घोलम्, दधि । 'ससरं निर्जलमथितं घोलम्' । अर्थात् मलाईयुक्त दही में चौथाई पानी डालकर मथानी से मथकर जो माठा तैयार किया जाता है, उसको घोल कहते हैं।

गुल्मशमनं विष्टम्भे परमौषधम्। उदावर्त्ता-नाहहरं सर्वाजीर्णविनाशनम् ॥ ६० ॥

पीपरि, पिपरामूल, सोंठ, मिरिच, हरड़, आंवला, चीता, अभ्रकभस्म गिलोय और कुटकी, प्रत्येक का १ तोला चूर्ण, दन्ती (जमालगोटे की जड़) का चूर्ण ३ तोले, निसोथ का चूर्ण ८ तोले और चीनी १९ तोले, इन सब द्रव्यों को एकत्र कर मधु मिलाकर लड्डू बना लेवे। इसका नाम सुकुमारमोदक। इसका सेवन करने से वाताजीर्ण, विष्टम्भ, उदावर्त, आनाह और सब प्रकार के अजीर्ण रोग आराम होते हैं ॥ ५८-६० ॥

वाताजीर्ण में हरीतकी प्रयोग।

हरीतक्याः शतं ग्राह्यं तक्रैः स्विन्नञ्च कारयेत्। पश्चाद्बीजं समुद्धृत्य चूर्णानीमानि पूरयेत् ॥ ६१ ॥ पटूपर्णं पञ्चपटु यमानीद्वयमेव च। त्रिक्षारं हिङ्गुदिव्यञ्च कर्षद्वयमितं पृथक् ॥ ६२ ॥ श्लक्ष्णचूर्णीकृतं सर्वं चुक्राम्लेनापि भावयेत्। लिम्पाकस्वरसेनापि भावयेच्च दिनत्रयम् ॥ ६३ ॥ खादयेदभयामेकां सर्वाजीर्णविनाशिनीम्। चतुर्विधमजीर्णञ्च वह्निमान्द्यं विसूचिकाम्। गुल्मशूलादिरोगांश्च नाशयेदविकल्पतः ॥ ६४ ॥

एक सौ १०० हरड़ लेकर मठा में उबाल लेवे। तदनन्तर उन हरड़ों के बीज निकाल डाले, किन्तु बीज निकालने में ऐसी सावधानी रखनी चाहिये कि छिलकों के टुकड़े अलग अलग न हो जावें, नहीं तो उनमें चूर्ण भरने की सुविधा न होगी। पश्चात् पीपरि, पिपरामूल, चव्य, चीता, सोंठ, मिरिच, पाँचो नमक, अजवाइन, अजमोद, यवाक्षार, सज्जीखार और सोहागा की खील प्रत्येक २ तोले, इनका चूर्ण बनाकर पूर्वोक्त हरीतकी के छिलकों के भीतर भरकर सूत से बांध देवे। तदनन्तर चूक के रस में और नीबू के रस में तीन तीन दिन भावना देकर रख लेवे। प्रतिदिन एक-एक हरड़ खाने से ४ प्रकार के अजीर्ण, अग्निमान्द्य, विसूचिका, गुल्म और शूल आदि रोग निःसन्देह नष्ट होते हैं ॥ ६१-६४ ॥

विष्टंभ में त्रिवृतादिमोदक।

त्रिवृद्दन्तीकणामूलं कणा वह्नि पलं पलम्। सर्वतुल्यामृता शुण्ठी गुडेन सह मोदकम्। कर्षार्द्धं भक्षयेन्नित्यं दीप्ताग्नि कुरुते क्षणात् ॥ ६५ ॥

निशोथ का मूल, दन्ती (जमालगोटे की जड़) का मूल, पिपरामूल, पीपरि और चीता की जड़ प्रत्येक ४ तोला, गिलोय १० तोला, सोंठ १० तोला इनका चूर्ण बनाकर एकत्र मिला लेवे। तदनन्तर १ सेर गुड़ लेकर चाशनी बनावे, उस चाशनी को चूर्ण में मिलाकर छ-छः माशे के लड्डू बाँध लेवे। एक लड्डू का प्रतिदिन सेवन करने से शीघ्र ही अग्नि प्रदीप्त होती है ॥ ६५ ॥

अग्निमुखलवण।

चित्रकं त्रिफला दन्ती त्रिवृता पुष्करं समम्। यावन्त्येतानि चूर्णानि तावन्मात्रन्तु सैन्धवम् ॥ ६६ ॥ भावयित्वा स्नुहीक्षीरैस्तत् काण्डे निःक्षिपेत् ततः। मृदुपङ्केनानुलिप्तं प्रक्षिपेज्जातवेदसि ॥ ६७ ॥ सुदग्धं तु समुद्धृत्य संचूर्ण्योष्णाम्बुना पिबेत्। एतदग्निमुखं नाम लवणं वह्निकृत् परम्। यकृत्प्लीहोदरानाहगुल्मार्शःपार्श्वशूलनुत् ॥ ६८ ॥

(सर्वं चूर्णमेकीकृत्य पञ्चरक्तिकप्रमाणं जलेन पिबेत्।)

चीता, त्रिफला, दन्ती (जमालगोटा) का मूल, निसोथ, पुष्करमूल प्रत्येक समभाग, मिले हुए कुल औषधों के समान सेंधानोन, इन कुल औषधों का एकत्र चूर्ण बनावे। तदनन्तर उस

चूर्ण में पहिले थूहर के दूध की भावना देकर सुखा लेवे। पश्चात् थूहर की मोटी लकड़ी के मध्य में खोखला बनाकर उसमें चूर्ण को भर देवे, लकड़ी के मुख को उसी के (थूहर के) दूसरे टुकड़े से मुद्रित कर, ऊपर चिकनी मिट्टी का लेप करके सुखा लेवे। तदनन्तर कण्डों की आग में डाल देवे, भलीभाँति जल जाने पर निकाल कर मिट्टी को अलग करके चूर्ण बना कर रख लेवे। इसकी मात्रा २ रत्ती। अनुपान-उष्ण जल। इसका सेवन करने से अग्नि अत्यन्त दीप्त होती है, तथा यकृत, प्लीहा, उदर, आनाह, गुल्म, बवासीर और पार्श्वशूल रोग नष्ट होते हैं ॥ ६६-६८ ॥

विष्टम्भ में शार्दूलकाञ्जिक।

पिप्पली शृङ्गवेरञ्च देवदारुसचित्रकम्। चविकां बिल्वपेशीञ्च अजमोदां हरीतकीम् ॥ ६९ ॥ महौषधं यमानीञ्च धन्याकं मरिचं तथा। जीरकञ्चापि हिङ्गुञ्च काञ्जिकं साधयेद्भिषक् ॥७०॥ एष शार्दूलको नाम काञ्जिकोऽग्निबलप्रदः। सिद्धार्थतैलसंभृष्टो दशरोगान् व्यपोहति ७१ ॥ कासं श्वासमतीसारं पाण्डुरोगं सकामलम्। आमञ्च गुल्मरोगञ्च वातशूलं सवेदनम् ॥ ७२ ॥ अर्शांसि श्वयथुञ्चैव भुक्ते पीते च सम्मतः। क्षीरपाकविधानेन काञ्जिकस्यापि साधनम् ॥ ७३ ॥

(सर्वचूर्णापेक्षया अष्टगुणं काञ्जिकं चतुर्गुणजलेन पक्त्वा काञ्जिकशेषमवतारयेत्। वह्निबलानुसारिण्या मात्रया दद्यात्।)

पीपर, अदरख, देवदारु, चीता की जड़, चव्य, बेलगिरी, अजमोद, हरीतकी, सोंठ, अजवाइन, धनिया, मिरिच, जीरा और हींग प्रत्येक का चूर्ण समभाग, कुल मिश्रित चूर्ण से आठगुनी कांजी और कांजी से चौगुना जल डाल कर पकावे। जब जल निःशेष हो जावे, तब उतार लेवे। इसका नाम शार्दूल काञ्जिक है। अग्नि और बल का वर्धक है। इसको सरसों के तेल में छौंककर अग्नि और बल के अनुसार योग्य मात्रा में देना चाहिये। इसका सेवन करने से कास, श्वास, अतीसार, पाण्डुरोग, कामला, आमदोष, गुल्मरोग, वेदनायुक्त, वातशूल, बवासीर और शोथरोग नष्ट होते हैं। क्षीरपाक की रीति से (जिस रीति के अनुसार ऊपर बनाने की विधि लिखी है उसी रीति से) इस काञ्जिक को सिद्ध करना चाहिये ॥ ६९-७३ ॥

मुस्तकारिष्ट।

मुस्तकस्य तुलाद्वन्द्वं चतुर्द्रोणेऽम्बुनः पचेत्। पादशेषे रसे तस्मिन् क्षिपेद् गुडतुलात्रयम् ॥ ७४ ॥ धातकीं षोडशपलां यमानीविश्वभेषजम्। मरिचं देवपुष्पञ्च मेथीं वह्निञ्च जीरकम् ॥ ७५ ॥ पलयुग्ममितं क्षिप्त्वा रुद्धभाण्डे निधापयेत्। संस्थाप्य मासमात्रन्तु ततः संस्रावयेद्भिषक् ॥ ७६ ॥ अजीर्णमग्निमान्द्यञ्च विसूचीमपि दारुणम्। ग्रहणीं विविधां हन्ति नात्र कार्या विचारणा ॥ ७७ ॥

मोथा दस सेर। पाक करने के लिए जल ८ द्रोण (१ मन २२ सेर ३२ तोला), जब पकते-पकते २ द्रोण जल (२५ सेर ४८ तोला), रह जावे तो उसमें गुड़ १५ सेर, धाय के फूल १६ पल (६४ तोला), अजवायन, सोंठ, कालीमिर्च, लौंग, मेथी के बीज, चित्रक, जीरा, प्रत्येक ८ तोले, चूर्ण मिलाकर एक महीने तक मिट्टी के घड़े में बन्द कर रख दे. इसके बाद छान कर काम में लावे। इसके सेवन से अजीर्ण, मन्दाग्नि, विसूचिका (हैजा) तथा ग्रहणी आदि रोग नाश को प्राप्त होते हैं ॥ ७४-७७ ॥

## अथ रसप्रयोगः

क्षीरसमुद्र रस।

पारदामृतलवङ्गगन्धकं भागयुग्मम-

रिचेन मिश्रितम्। जातिकोषफलमर्द्धमाषिकं तिन्तिडीफलरसेन मर्दितम् ॥७८॥ माषमात्रमनुपानयोगतः सद्य एव जठराग्निदीपनः। संग्रहग्रहणिकुम्भकर्णकं सामवाततखरदूषणं जयेत् ॥ ७९ ॥ अग्निमान्द्यदशवक्त्रनाशनो रामबाण इव विश्रुतो रसः ॥ ८० ॥

पारा, मीठा विष लौंग और गन्धक प्रत्येक एक तोला, काली मिरिच २ तोले, जायफल आधा तोला, इन औषधों को एकत्र कर इमिली के फल के रस में घोटकर उर्द के समान गोलियाँ बना लेवे। यह रामबाण रस दोषानुसार अनुपान के साथ प्रयुक्त होने पर संग्रहणीरूपी कुम्भकर्ण को, आमवातरूपी खरदूषण को और अग्निमान्द्यरूपी रावण को नष्ट करके शीघ्र ही अग्नि को दीपन करता है ॥ ७८-८० ॥

### अग्नितुण्डी वटी।

शुद्धसूतं विषं गन्धमजमोदाफलत्रयम्। सर्जिक्षारं यवक्षारं वह्निसैन्धवजीरकम् ॥ ८१ ॥ सौवर्चलविडङ्गानि सामुद्रं टङ्कणं समम्। विषमुष्टिं सर्वतुल्यं जम्बीराम्लेन मर्दयेत्। मरिचाभां वटीं खादेदग्निमान्द्यप्रशान्तये ॥ ८२ ॥

पारा, विष, गन्धक, अजवाइन, आँवला, हरड़, बहेड़ा, सज्जीखार, जवाखार, चीता का मूल, सेंधा नमक, जीरा, कालानमक, बायबिडङ्ग, समुद्रनोन और सोहागा फूला हुआ, प्रत्येक समभाग और सबके बराबर कुचिला, इन सब औषधों को एकत्र कर नींबू के रस में खरल करके कालीमिर्च बराबर गोली बनावे। इसका सेवन करने से अग्निमान्द्य रोग दूर होता है ॥ ८१-८२ ॥

टिप्पणी—इसे लगातार १२ दिन तक सेवन न करना चाहिए।

### अग्निरस।

मरिचाब्दवचा कुष्ठं समांशं विषमेन च। आर्द्रकस्य रसैः पिष्टा मुद्गमात्रान्तु कारयेत्। अयमग्निरसो नाम सर्वाजीर्णप्रशान्तये ॥ ८३ ॥

(सर्व समं विषम्)

मिरिच, नागरमोथा, बच और कूठ, प्रत्येक समभाग और सबके बराबर विष, इन कुल औषधों को एकत्र अदरख के रस में खरल करके मूँग के बराबर गोलियाँ बनावे। इसका नाम है अग्निरस। इसका सेवन करने से सब प्रकार के अजीर्णरोग शान्त होते हैं ॥ ८३ ॥

### अमृतवटी।

अमृतवराटकमरिचैर्द्विपञ्चनवभागिकैः क्रमशः। वटिका मुद्गसमाना कफपित्ताग्निमान्द्यहारिणी ॥ ८४ ॥

इयमग्नितुण्डी नाम्ना च रूयाता।

विष २ भाग, वराटिका ( कौड़ी ) की भस्म ५ भाग, और कालीमिरिच ९ भाग, इनको जल में पीसकर मूँग के समान गोलियाँ बना लेवे। इसका सेवन करने से कफ, पित्त और अग्निमान्द्यरोग विनष्ट होते हैं। इसका नाम है अमृतवटी, किन्तु 'अग्नितुण्डी' नाम से भी प्रसिद्ध है ॥ ८४ ॥

### सुधासागर रस।

त्रिकटु त्रिफला चैव तथा लवणपञ्चकम्। क्षारत्रयं रसं गन्धं मार्गिकं पूर्ववद्विषम् ॥ ८५ ॥ गुञ्जामात्रां वटीं कुर्यात्तल्लवह्नेः पञ्चभिः सह। सुधासागरनामायं रसः सूर्य्येण निर्मितः ॥ ८६ ॥

पूर्ववद्विषमित्यमृतवटघुक्तभागवत् तेनात्र विषस्य भागद्वयम्।

त्रिकटु, त्रिफला, पाँचोंनमक, जवाखार, सज्जीखार, सोहागा फूला हुआ, पारा और गन्धक प्रत्येक १ भाग तथा विष २ भाग, इनको एकत्र जल में पीसकर एक-एक रत्ती की गोलियाँ बना

लेवे। एक गोली को पाँच लौंगों के चूर्ण के साथ शहद मिलाकर चाटे। इसका सेवन करने से भूख लगती है। इस सुधासागर नामक रस का सूर्य ने आविष्कार किया था ॥ ८१-८६ ॥

टङ्कणादि वटी।

टङ्कननागरगन्धकपारदगरलं मरिचं समभागयुतम्। लकुचस्वरसेश्चणकप्रतिमा गुटिका जनयत्यचिरादनलम् ॥८७॥

सोहागा फूला हुआ, सोंठ, गन्धक, पारा, विष और मिरिच प्रत्येक सम भाग, इनको एकत्र बड़हल के फल के रस में घोटकर चना के समान गोलियाँ बना लेवे। इसका सेवन करने से शीघ्र ही अग्नि दीप्त होती है ॥ ८७ ॥

अजीर्णकण्टक रस।

शुद्धसूतं विषं गन्धं समं सर्वं विचूर्णयेत्। मरिचं सर्वतुल्यं स्यात् कण्टकार्य्याः फलद्रवैः ॥ ८८ ॥ मर्दयेत् भावयेत् सर्वमेकविंशतिवारकम्। गुञ्जामात्रां वटीं खादेत् सर्वाजीर्णप्रशान्तये। अजीर्णकण्टकः सोऽयं रसो हन्ति विसूचिकाम् ॥८९॥

पारा, विष और गन्धक प्रत्येक समभाग, सबके बराबर काली मिरिच मिलाकर चूर्ण बनावे। तदनन्तर छोटी कटेरी के फल के रस में २१ बार भावना देकर भलीभांति खरल करके एक एक रत्ती की गोलियाँ बनावे। इसका नाम अजीर्णकण्टक रस है। इसका सेवन करने से सब प्रकार के अजीर्ण और विसूचिका रोग नष्ट होते हैं ॥ ८८-८९ ॥ मात्रा—१।२ रत्ती।

महोदधि रस।

एकैकं विषसूतौ च जाती टङ्कं द्विकं द्विकम्। कृष्णात्रयं विश्वपञ्चकं तथा दग्धं कपर्दकम् ॥ ९० ॥ देवपुष्पं चाष्टमितं सर्वं सम्मर्द्य यत्नतः। महोदधिवटी नाम्ना नष्टमग्निं प्रदीपयेत् ॥ ९१ ॥

विष १ तोला, पारा १ तोला, जायफल १ तोला, सोहागा की खील २ तोला पीपरि ३ तोले, सोंठ ५ तोले, कौड़ी की भस्म ४ तोले और लौंग ८ तोले, इन सब औषधों को एकत्र जल में घोटकर २ रत्ती की गोलियाँ बना लेवें। इसका सेवन करने से नष्ट अग्नि का फिर दीपन हो जाता है ॥ ९०-९१ ॥

अग्निकुमार रस।

रसेन्द्रगन्धौ सह टङ्कनेन समं विषं योज्यमिह त्रिभागम्। कपर्दशङ्खाविह नेत्रभागौ मरीचमष्टगुणं प्रदेयम् ॥ ९२ ॥ सुपक्वजम्बीररसेन घृष्टः सिद्धो भवेदग्निकुमार एषः। विसूचिकाजीर्णसमीरमार्त्ते दद्यात्तु गुञ्जां ग्रहणीगदे च ॥ ९३ ॥

अत्र सर्वमेकभागापेक्षया वचनान्तरसंवादात्।

पारा १ तोला, गन्धक १ तोला, सोहागे की खील १ तोला, विष ३ तोले, कौड़ीभस्म २ तोले, शङ्खभस्म २ तोले और मिरिच ८ तोले इन औषधों को एकत्र कर पके जँभीरी नींबू के रस में घोटकर एक एक रत्ती की गोलियाँ बना लेवे। इस अग्निकुमार रस का सेवन करने से विसूचिका (हैजा), अजीर्ण, वातरोग और ग्रहणी आदि रोग नष्ट होते हैं। मात्रा २।३ रत्ती ॥ ९२-९३ ॥

अग्नि मुख रस।

सूतं गन्धं विषं तुल्यं मर्दयेदार्द्रकद्रवैः। अश्वत्थचिञ्चापामार्ग क्षारः क्षारो च टङ्कणम् ॥ ९४ ॥ जातीफलं लवङ्गं च त्रिकटु त्रिफला समम्। शङ्ख भस्म पञ्चपटु हिङ्गु जीरं द्विभागकम् ॥ ९५ ॥ मर्दयेदम्लयोगेन गुञ्जा मात्रा वटी शुभा। पाचनी दीपनी सद्योऽजीर्णं शूल विसूचिकाः ॥ ९६ ॥ हिक्कां गुल्मं चोदरं च नाशयेन्मात्र

संशयः। रसेन्द्र संहितायां च नाम्नाग्निमुखो रसः॥ ९७॥

पारा, गन्धक, विष सबको समान भाग लेकर अदरख के रस में घोटे फिर पीपल इमली चिरचिटा इनके क्षार यथाक्रम, सज्जी और सुहागा, जायफल, लौंग, त्रिकुटा, त्रिफला समान भाग ले और शङ्खभस्म पाँचों नमक, हींग, जीरा पारे से दुगने डालकर नींबू आदि खट्टे रसों में घोटकर २ रत्ती की गोलियां बना ले। यह अग्निदीपन पाचन है। अजीर्ण, दर्द, हैजा, हिचकी गुल्म आदि पेट के रोगों को नाश करती है। इसको रसेन्द्र संहिता में अग्नि मुख रस कहा है। विशेष अनुभूत है॥ ९४-९७॥

हुताशन रस।

गन्धेशटङ्कणैकैकं विषमत्र त्रिभागिकम्। अष्टभागन्तु मरिचं जम्भाम्भोमर्दितं दिनम्॥ ९८॥ तद्वटीं मुद्गमानेन क्रूरगार्द्रेण प्रयोजयेत्। शूलारोचकगुल्मेषु विसूच्यामग्निमान्द्यके। अजीर्णसन्निपातादौ शैत्ये जाड्ये शिरोगदे॥ ९९॥

गन्धक १ भाग, पारा १ भाग, सोहागा फूला हुआ १ भाग, विष ३ भाग और मिरिच ८ भाग; इनको एकत्र नींबू के रस में १ दिन भर घोटे। तदनन्तर मूँग के बराबर गोलियाँ बना लेवे। अदरख के रस के साथ इसका सेवन करना चाहिये। इसका सेवन करने से शूल, अरोचक, गुल्म, विसूचिका, अग्निमान्द्य, अजीर्ण, सन्निपात, सर्दी, जड़ता और शिरोरोग दूर होते हैं। मात्रा २।३ रत्ती॥ ९८-९९॥

भास्कर रस।

विषं सूतं फलं गन्धं त्र्यूषणं टङ्कजीरकम्। एकैकं द्विगुणं लौहं शङ्खमभ्रकरसटकम्॥ १००॥ सर्वतुल्यं लवङ्गञ्च जम्बीरैर्मर्दयेद्भिषक्। सप्तवासरपर्यन्तं ततः स्याद्भास्करो रसः॥ १०१॥ गुञ्जाद्वयप्रमाणेन वटीं कुर्याद्भिषग्वरः। ताम्बूलीदलयोगेन वटीं सञ्चर्व्य भक्षयेत्॥ १०२॥ शूलरोगेषु सर्वेषु विसूच्यामग्निमान्द्यके। सद्यो वह्निकरो ह्येष तन्त्रनाथेन भाषितः॥ १०३॥

विष, पारा, त्रिफला, गन्धक, त्रिकटु, सोहागा फूला हुआ और जीरा प्रत्येक एक-एक भाग, लोहभस्म, शङ्खभस्म और कौड़ीभस्म प्रत्येक दो-दो भाग और सबके बराबर लौंग लेवे। इनको एकत्र जँभीरी नींबू के रस में ७ दिन पर्यन्त घोटकर २ रत्ती की गोलियां बनावे। पान के पत्ता में रखकर इस वटी को खाना चाहिये। यह वटी सब प्रकार के शूलरोग, विसूचिका और अग्निमान्द्य को नष्ट कर शीघ्र ही अग्नि को दीप्त करती है। इसके आविष्कर्ता तन्त्रनाथजी हैं। मात्रा १-४ रत्ती॥ १००-१०३॥

अग्निसन्दीपन रस।

षड्पणं पञ्चपटु क्षितारं जीरकद्वयम्। अजमोदाग्रगन्धे च मधुरी हिङ्गुचित्रकम्॥ १०४॥ जातीफलं तथा कुष्ठं जातीकोषं त्रिजातकम्। विश्वाशेखरिकक्षारमसृतं रसगन्धकौ॥ १०५॥ लौहमभ्रञ्च वङ्गञ्च लवङ्गञ्च हरीतकी। समभागानि सर्वाणि भागौ द्वावम्लवेतसात्॥ १०६॥ शङ्खस्य भागाश्चत्वारः सर्वमेकत्र भावयेत्। क्वाथेन पञ्चकोलस्य चित्रापामार्गयोस्तथा॥ १०७॥ अम्ललोणीरसेनैव प्रत्येकं भावयेत् त्रिधा। त्रिसप्तकृत्वो लिम्पाकरसैः पश्चाद्विभावयेत्॥ १०८॥ बदराभा वटी कार्य्या योक्तव्या सन्ध्ययोर्द्वयोः। अनुपानं प्रदातव्यं गुरुणा दोषानुसारतः॥ १०९॥ अग्निसन्दीपनो नाम रसोऽयं अति दुर्लभः। दीपयत्याशु मन्दा-

ग्निमजीर्णञ्च विनाशयेत्। अम्लपित्तं तथा शूलं गुल्ममाशु व्यपोहति ॥ ११० ॥

पीपरि, मिरिच, सोंठ, चव्य, चीता, पिपरामूल, पाँचो नमक, सज्जीखार, जवाखार, सोहागा फूला हुआ, सफेद जीरा, काला जीरा, अजवाइन, वच, सौंफ, हींग, चीता का मूल, जायफल, कूट, जावित्री, दालचीनी, इलायची, तेजपात, इमिली के छाल की भस्म, चिरचिरा की भस्म, मीठा विष, पारा, गन्धक, लोहभस्म, अभ्रकभस्म, वङ्ग, लौंग और हरद, इसमें से प्रत्येक एक-एक भाग, अभिलवेत २ भाग और शङ्खभस्म ५ भाग; इन सब औषधों को एकत्र कर पीपरि, पिपरामूल, चव्य, चीता और सोंठ के क्वाथ में, चीता और चिरचिरा के क्वाथ में तथा चौपतिया के रस में तीन-तीन बार भावना देवे। तदनन्तर नींबू के रस में २१ बार भावना देकर पांच-पांच रत्ती की गोलियां बना लेवे। दोषानुसार अनुपान के साथ सायं प्रातः इस वटी का सेवन करना चाहिये। यह अग्निसंदीपन नामक रस शीघ्र अग्नि को दीप्त करके अजीर्ण, अम्लपित्त, गुल्म और शूल आदि रोगों को नष्ट करता है। मात्रा-२।४ रत्ती ॥ १०२-११० ॥

अजीर्णबलकालानल रस।

द्विपलं शुद्धसूतञ्च गन्धकञ्च समं समम्। लौहं सात्रं हरीतालं विषं तुत्थं सवङ्गकम् ॥ १११ ॥ पलमभ्राणञ्च पृथक् लवङ्गं टङ्कणं तथा। दन्तीमूलं त्रिवृच्चूर्णमेकैकं पलसम्मितम् ॥११२॥ अजमोदां यमानी च द्विक्षारलवणानि च। पृथगर्द्धपलं भागमेकीकृत्य च भावयेत् ॥ ११३ ॥ आर्द्रकस्यरसेनैकविंशतिः पञ्च कोलजैः। दशधा भावयेत्तोयैर्गुडूचीनां रसैर्दश ११४॥ सर्वार्द्धं मरिचं दत्त्वा काचकूप्याञ्च धारयेत्। गुञ्जामात्रा वटीं कृत्वा छायायां परिशोषयेत् ॥ ११५ ॥ रसोऽजीर्णबलकालानल एष प्रकीर्तितः। अनेककालनष्टाग्नेर्दीपनः परमः स्मृतः ॥ ११६ ॥ आमवातकुलध्वंसी प्लीहपाण्डुगदापहः। प्रमेहानाहविष्टम्भसूतिकाग्रहणीहरः ॥ ११७ ॥ श्वासकासप्रतिश्याययक्ष्मक्षयविनाशनः। अम्लपित्तञ्च शूलञ्च भगन्दरगुदोद्भवौ ॥ ११८ ॥ अष्टोदराणि प्लीहानं यकृतं हन्ति दारुणम्। आकण्ठं भोजयित्वा तु खादयेच्च रसोत्तमम् ॥ ११९ ॥ अर्द्धयामेन तत्सर्वं भस्मीभवति निश्चितम्। चतुर्विधरसोपेतं महाभोजनमिच्छतः ॥१२० भोजस्य नृपतेः काङ्क्षा भोजनात् कृपया कृतः। गहनानन्दनाथेन सर्वलोकहितैषिणा ॥ १२१ ॥

पारा ८ तोला, गन्धक ८ तोला, लोहभस्म ४ तोला, ताम्रभस्म ४ तोला, हरताल ४ तोला, मीठा विष ४ तोला, तूतिया (शुद्ध) ४ तोला, वङ्गभस्म ४ तोला, लौंग ४ तोला, सुहागा ४ तोला, दन्तीमूल ४ तोला, निसोथ ४ तोला, अजमोद २ तोला, अजवाइन २ तोला, यवक्षार २ तोला, सर्जिक्षार २ तोला, पाँचों नमक २ तोला, इसमें सम्पूर्ण चूर्ण से आधा भाग कालीमिर्च का चूर्ण मिश्रित करे। इसके बाद अदरख के रस से २१ बार भावना देकर पञ्चकोल के काढ़े से और गिलोय के रस से १० बार भावना देकर १ रत्ती प्रमाण की गोलियां बना ले और छाया में सुखा ले। इन गोलियों के सेवन करने से नष्ट हुई अग्नि दीप्त होती है तथा आमवात, तिल्ली, पीलिया, प्रमेह, आनाह, विष्टम्भ (एक प्रकार का अजीर्ण), सूतिकारोग, ग्रहणी, श्वास, खांसी, प्रतिश्याय (जुकाम), यक्ष्मा, अम्लपित्त, शूल, भगन्दर, बवासीर, उदर आदि रोग नाश को प्राप्त होते हैं। यह रस कण्ठ तक किये हुए भोजन को शीघ्र पचानेवाला है ॥ १११-१२१ ॥ मात्रा १-२ रत्ती।

(१-२) शंखवटी और महाशंखवटी ।

दग्धशङ्खस्य चूर्णं हि तथा लवणपञ्चकम् । चिञ्चिकाक्षारकश्चैव कटुकत्रयमेव च ॥ १२२ ॥ तथैव हिङ्गुकं ग्राह्यं विषगन्धकपारदम् । अपामार्गस्य वह्नेश्च क्वाथैर्निम्बाकजैः रसैः ॥ १२३ ॥ भावयेत् सर्वचूर्णं तदम्लवर्गैर्विशेषतः । यावच्चदम्लतां याति गुटिकामृतरूपिणी ॥ १२४॥ सद्यो वह्निकरी चैव भस्मकञ्च नियच्छति । भुक्त्वाकण्ठन्तु तस्यान्ते खादेच गुटिकामिमाम् ॥ १२५ ॥ तत्क्षणाज्जरयत्याशु सर्वाजीर्णविनाशिनी । ज्वरं गुल्मं पाण्डुरोगं कुष्ठं शूलं प्रमेहकम् ॥ १२६ ॥ वातरक्तं महाशोथं वातपित्तकफानपि । दुर्नामारिरयश्चाशु हन्ति वारसहस्रशः ॥ १२७॥ निर्मूलं दह्यते शीघ्रं तूलकं वह्निना यथा । लौहवङ्गयुता सेयं महाशङ्खवटी स्मृता ॥ १२८ ॥ प्रभाते कोष्णतोयानुपानमेव प्रशस्यते ॥ १२९ ॥

शङ्खभस्म, पाँचों नमक, इमली की छाल का खार, सोंठ, मिरिच, पीपरि, हींग, विष, गन्धक और पारा, इन सब औषधों को समभाग लेकर मिश्रित करके खरल कर लेवे। तदनन्तर चिरचिरा और चीता के क्वाथ में भावना देने के पश्चात् नींबू के रस में और अम्लवर्ग में इस प्रकार भावना देवे, जिससे कि यह कुल चूर्ण अम्ल (खट्टा) हो जावे। तदनन्तर दो २ रत्ती की गोलियाँ बना लेवे। इसका नाम शङ्खवटी है। इसी में लौहभस्म और वङ्गभस्म मिला देने से महाशङ्खवटी कही जाती है। प्रातःकाल उष्ण जल के साथ सेवन करना चाहिये। ये वटियाँ अमृत के समान लाभदायक हैं। इनका सेवन करने से अग्निमान्द्य, भस्मक, सब प्रकार के अजीर्ण, ज्वर, गुल्म, पाण्डुरोग, कुष्ठ, शूल, प्रमेह, वातरक्त, महाशोथ और बवासीर आदि रोग, वात, पित्त और कफ शीघ्र नष्ट होते हैं। कण्ठपर्यन्त भोजन करके भी यदि इस शङ्खवटी अथवा महाशङ्खवटी का सेवन किया जाय तो क्षणमात्र में ही सब खाये हुये पदार्थों को हज्म कर देती है। ये हजारों बार अनुभूत हो चुकी हैं ॥ १२२-१२९ ॥ मात्रा २।४ रत्ती ।

अग्नीसूनरस ।

भागो दग्धकपर्दकस्य च तथा, शङ्खस्य भागद्वयं । भागो गन्धकसूतयो मिलितयोः पिष्टा मरीचादपि ॥ १३० ॥ भागत्रयमिश्रितं नियोज्य सकलं निम्बूरसैर्मर्दितं । नाम्ना वह्निसुतो रसोऽयमचिरान्मान्द्यं जयेद्दारुणम् ॥ १३१ ॥ घृतेन खण्डैः सह भक्षितोऽसौ क्षीणान् नरान् हस्ति समान करोति ॥ समागधी चूर्णं घृतेन लीढ्वा सुक्षोभनेत्संग्रहणी विकारान् ॥ १३२ ॥ शोथ ज्वरारोचकशूल गुल्मान् पाण्डूदरार्शो ग्रहणी विकारान् । तक्रानुपानो जयति प्रमेहान् युक्त्या प्रयुक्तोऽग्निसुतो रसेन्द्रः ॥ १३३ ॥

कौड़ी भस्म १ भाग, शङ्ख भस्म २ भाग, गन्धक ½ भाग और कालीमिर्च ३ भाग इन सबको मिलाकर नींबू के रस की भावना देकर २ रत्ती की गोलियाँ बना ले। इसके खाने से कठिन से कठिन मन्दाग्नि भी शीघ्र नष्ट हो जाती है। शोथ, ज्वर, अरुचि, शूल, गुल्म, पाण्डुरोग, उदर शूल, अर्श, संग्रहणी आदि रोगों को दूर करता है, प्रमेह में छाछ के साथ देना चाहिये, संग्रहणी में पीपल के चूर्ण और घी के साथ देने से लाभ होता है ॥ १३०-१३३ ॥

अम्लवर्ग ।

जम्बीरं बीजपूरञ्च मातुलुङ्गकचुक्रकम् । चाङ्गेरी तिन्तिडी चैव बदरी करमर्द-

कम् । अष्टावम्लस्य वर्गोऽयं कथितो मुनिसत्तमैः ॥ १३४ ॥

जमीरी नीबू, शर्बती नीबू, बिजौरा नींबू, खट्टी पालक, चौपतिया, इमली, बेर और करौंदा, इन आठों के समूह को मुनियों ने अम्ल वर्ग कहा है ॥ १३४ ॥

( ६ ) महार्शोघ्नवटी ।

कणामूलं वह्निदन्ती पारदं गन्धकं कणा । त्रिक्षारं पञ्चलवणं मरिचं नागरं विषम् ॥ १३५ ॥ अजमोदामृता हिङ्गु क्षारं सिन्धिडिकाभवम् । सञ्चूर्ण्य सम-भागन्तु द्विगुणं शङ्खभस्मकम् ॥ १३६ ॥ अम्लद्रवेण सम्भाव्य वटी गुञ्जाद्वयोन्मिता । अम्लदाडिमतोयेन लिम्पाकस्वरसेन च ॥ १३७ ॥ भक्षयेत् प्रातरुत्थाय नाम्ना शङ्खवटी शुभा । तक्रमस्तुसुराशीधुका-ञ्जिकोष्णोदकेन वा ॥ १३८ ॥ शशैणा-दिरसेनैव रसेन विविधेन च । मन्दाग्नि दीपयत्याशु वडवाग्निसमप्रभम् ॥ १३९ ॥ अर्शांसि ग्रहणीरोगं कुष्ठमेदोभगन्दरान् । प्लीहानमश्मरीं श्वासं कासं मेदोदरकृमीन् ॥१४०॥ हृद्रोगं पाण्डुरोगञ्च विबन्धानु-दरे स्थितान् । तान् सर्वान् नाशयत्याशु भास्करस्तिमिरं यथा ॥१४१॥

पिपरामूल, चीतामूल, जमालगोटे की जड़, पारा, गन्धक, पीपरि, सज्जीखार, जवाखार, सोहागा भुना हुआ, पांचो नमक, मिरिच, सौंठ, विष, अजमोद, गिलोय, हींग और इमिली का खार, प्रत्येक १ तोला, शंखभस्म २ तोले, इन सब औषधों को पूर्वोक्त अम्लवर्ग के रस में घोटकर झरबेरी के बेर की गुठली के बराबर गोलियां बना लेवे। गर्म अनार का रस, नीबू का रस, तक्र, तोड़, सुरा, शीधु, कांजी और उष्णजल इनमें से किसी एक के साथ तथा खरगोश और एणमृग आदि जङ्गली पशुओं के मांसरस के साथ, अथवा दोषानुसार अन्यान्य अनेक प्रकार के रसों के साथ सेवन करना चाहिये। इससे अग्निमान्द्य, बवासीर, ग्रहणी, कुष्ठ, मेद, प्रमेह, भगन्दर, प्लीहा, पथरी, श्वास, कास, उदर-कृमि, हृदयरोग, पाण्डुरोग और मलबद्धता आदि विविध प्रकार के रोग ऐसे नष्ट होते हैं जैसे सूर्य के प्रकाश से अंधकार नष्ट हो जाता है ॥ १३६-१४१ ॥

क्रव्याद रस ।

पलं रसस्य द्विपलं बलेः स्याच्छुल्बा-यसी चार्द्धपलप्रमाणे । विचूर्ण्य सर्वं द्रुतमग्नियोगादेरण्डपत्रेऽथ निवेशनी-यम् ॥ १४२ ॥ कृत्वाथ तां पर्पटिकां विदध्याल्लोहस्य पात्रेऽवरपूतमस्मिन् । जम्बी-रजं पक्वरसं पलानि शतं नियोज्याग्नि-महाल्पमात्राम् ॥१४३॥ जीर्णे रसे भावित-मेतदेतैः सुपञ्चकोलोद्भववारिपूरैः । सेत साम्लैः शतमत्र देयं समं रजष्टङ्कनजं सुभृष्टम् ॥ १४४ ॥ बिडं तदर्द्धं मरिचं समञ्च तत् सप्तधाऽऽर्द्रपणकाम्लधारा । क्रव्यादनामा भवति प्रसिद्धो रसस्तु मन्था-नकभैरवोक्तः । रक्तद्वयं सैन्धवतक्रपीतमे-तस्य धन्यैः खलु भोजनान्ते ॥ १४५ ॥ गुरूणि मांसानि पयांसि पिष्टघृतानि से-व्यानि फलानि चैव । मात्रातिरिक्तान्यपि सेवितानि यामद्वयाज्जारयति प्रसिद्धः ॥ १४६ ॥ काश्यपस्थौल्यनिवर्हणो गरहरः सामातिनिर्नाशनो, गुल्मप्लीहजलोदरा-दिशमनः शूलार्तिमूलापहः ॥ वातश्लेष्म-निबर्हणो ग्रहणिकातीसारविध्वंसनो, वात-ग्रन्थिमहोदरापहरणः क्रव्यादनामा रसः ॥ १४७ ॥

रसः १ पलं, गन्धकः २ पलमितं, ताम्रं २ तोलकमितं, लौहं २ तोलकमितं सर्वं चूर्णयित्वा लौहपात्रे मृदुवह्निना पर्पटीवत् कार्यम् ततो जम्बीररसपलशतेन शनैः शनैः पक्तव्यम् रसे शुष्के पुनर्भावना दातव्या पञ्चकोलक्वाथेन ५० पलमितेन, अम्लवेतसक्वाथेन ५० पलमितेन। ततः सर्वद्रव्यसमं भृष्टटङ्कनचूर्णं ४ पलमितं, तस्यार्द्धं विडलवणं २ पलमितं, सर्वद्रव्यसमं मरिचचूर्णं १० पलमितं, ततश्चणकशिशिरेण सप्त भावना दातव्या इति कविचन्द्रप्रभृतयः।

पारा ४ तोले, गन्धक ८ तोले, ताम्रभस्म २ तोले, लोहभस्म २ तोले लेवे। इन सबको एकत्र कर अग्नि के योग से पिघलाकर एरण्ड के पत्ते पर डालकर पर्पटी बना लेवे। तदनन्तर उसका चूर्ण करके लोहे के पात्र में डालकर उसमें जँभीरी नीबू का रस ४०० तोले देकर मंद-मंद आंच पर पकावे। जब पकते पकते रस शुष्क हो जावे, तब उसको उतारकर चूर्ण कर लेवे। पीछे पीपरि पीपरामूल, चव्य, चीता और सोंठ इनके क्वाथ की भावना देवे तत्पश्चात् अम्लवेत के क्वाथ की भावना देकर उसमें भुना हुआ सुहागा १६ तोले, बिड़नमक ८ तोले और कालीमिर्च का चूर्ण ४० तोले मिलाकर चनों के खार की सात भावना देवे। यह मन्थानक भैरवजी का कहा हुआ प्रसिद्ध क्रव्याद रस है। इस रस को भोजन के बाद दो माशे खावे और ऊपर से सेंधा नमक तथा माठा पीवे तो मांस, पिट्ठी आदि के गरिष्ठ भोजन तथा सब प्रकार के मात्रा से अधिक खाये हुए पत्र, दो पहर में पच जाते हैं। यह क्रव्याद रस कृशता (दुबलापन), स्थूलता (मोटापन), पित्त के रोग, आमातीसार, गुल्म, हिचकी, जलोदर, शूलरोग, वात कफ के रोग संग्रहणी, पतीसार, आनाभिष्य (गठियावाय) और उदर के रोगों को नाश करता है। मात्रा-४।८ रत्ती॥ १४२ १४७॥

### अजीर्णारि रस।

शुद्धं सूतं गन्धकं चापलमानं पृथक् पृथक्। हरीतकी च द्विपला नागरं त्रिपलं स्मृतम्॥ १४८॥ कृष्णा च मरिचं तद्वत् सिन्धूत्थं त्रिपलं पृथक्। चतुष्पला च विजया मर्दयेन्निम्बुकद्रवैः॥ १४९॥ भावनं सप्तधा कार्यं घर्ममध्ये पुनः पुनः। अजीर्णारिरयं प्रोक्तः सद्यो दीपनपाचनः॥ १५०॥ भक्षयेद् द्विगुणं भक्ष्यं पाचयेद्रेचयेदपि॥ १५१॥

४ तोला पारा, ४ तोला गन्धक, ८ तोला हरड़, १२ तोले सोंठ, १२ तोले पीपल, १२ तोले कालीमिर्च, १२, तोले सेंधा नमक, १६ तोले भांग का चूर्ण, इन सम्पूर्ण द्रव्यों को इकट्ठा कर मिला ले। फिर नींबू के रस से ७ भावनाएँ देकर रख ले। मात्रा-१ रत्ती से ४ रत्ती तक। यह अजीर्णारि रस दीपन तथा पाचन है। इसके सेवन से क्षुधा द्विगुण हो जाती है। यह रस पाचक तथा मलबद्धता को नष्ट करता है॥ १४८ १५१॥

### आदित्य रस।

हरद्रञ्च विषं गंधं त्रिकटुत्रिफलासमम्। जातीफलं लवङ्गञ्च लवणानि च पञ्च वै॥ १५२॥ सर्वमेतत्कृतं चूर्णमम्लयोगेन सप्तधा। भावयित्वा वटी कार्या गुञ्जार्धमिता बुधैः॥ १५३॥ रसो ह्यादित्यसंज्ञोऽयमजीर्णक्षयकारकः। भुक्तमात्रं पाचयतिजठरानलदीपनः॥ १५४॥

हिंगुल, मीठा विष, गन्धक, त्रिकटु (सोंठ, मिर्च, पीपरि), त्रिफला (हर्र, बहेड़ा, आँवला), जायफल, लौंग, पाँचो नमक, हर एक को बराबर लेकर और मिलाकर नींबू के रस से सात

बार भावना देकर ½ रत्ती प्रमाण की गोलियाँ बना ले। इस रस के सेवन करने से अजीर्ण नष्ट होता है तथा जठराग्नि दीप्त होती है ॥ १५२-१५४ ॥

### वड़वानल रस।

शुद्धसूतस्य कर्षकं गन्धकं तत्समं मतम्। पिप्पली पञ्चलवणं मरिचञ्च फलत्रयम् ॥ १५५ ॥ क्षारत्रयं समं सर्वं चूर्णं कृत्वा प्रयत्नतः। निर्गुण्ड्याश्च द्रवेणैव भावयेद्दिनमेकतः ॥ १५६ ॥ वडवानलनामायं मन्दाग्निञ्च विनाशयेत् ॥ १५७ ॥

पारा १ तोला, गन्धक १ तोला, पीपल, पाँचों नमक, कालीमिर्च, त्रिफला ( हर्रे, बहेड़ा, आँवला ), यवक्षार, सर्जिक्षार, सुहागा हरएक द्रव्य एक-एक तोला। इन सम्पूर्ण द्रव्यों को इकट्ठा कर और मिलाकर सम्हालू के रस से एक दिन भावना देकर गोली बना ले। मात्रा—४ रत्ती से ६ रत्ती तक। यह रस मन्दाग्नि को नष्ट करता है ॥ १५५-१५७ ॥

### बृहद्‍हुताशन रस।

एकद्विकद्वादशभागयुक्तं योज्यं विषं टङ्कणमूषणञ्च। हुताशनो नामहुताशनस्य करोति वृद्धिं कफजिन्नराणाम् ॥ १५७ ॥

मीठा विष १ भाग, सुहागा २ भाग, कालीमिर्च १२ भाग, इन्हें इकट्ठा कर यथाविधि चूर्ण कर ले और पानी के साथ २ रत्ती प्रमाण की गोली बना ले। इन गोलियों के सेवन करने से कफ का नाश होता है तथा जठराग्नि की वृद्धि होती है ॥ १५७ ॥

### बृहदग्निकुमार रस।

शुद्धसूतं द्विधा गन्धं गन्धतुल्यञ्च टङ्कणम्। फलत्रयं यवक्षारं व्योषं एकैकं पद्दनि च ॥ १५८ ॥ द्वादशैतानि सर्वाणि रसतुल्यानि योजयेत्। संमर्द्य सप्तधा सर्वं भावयेदार्द्रकद्रवैः ॥ १५९ ॥ संशोध्य चूर्णयित्वा तु भक्षयेदार्द्रकाम्बुना। माषमात्रं वयो वीक्ष्य नानाजीर्णप्रशान्तये ॥ १६० ॥ रसश्चाग्निकुमारोऽयं महेशेनप्रकाशितः। महाग्निकारकश्चैव कालभास्करतेजसाम् ॥ १६१ ॥ अग्निमान्द्यभवान् रोगान् शोथं पाण्ड्वामयं जयेत्। दुर्नामग्रहणीसामरोगान् हन्ति न संशयः ॥ १६२ ॥ यथेष्टाहारचेष्टस्य नास्त्यत्र नियमः क्वचित् ॥ १६३ ॥

पारा १ भाग, गन्धक २ भाग, सुहागा २ भाग, त्रिफला ( हर्रे, बहेड़ा, आँवला ), जवाखार, त्रिकटु ( सोंठ, मिर्च, पीपरि ), पाँचों नमक, हरएक द्रव्य १ भाग, इन सम्पूर्ण द्रव्यों को मिलाकर अदरख के रस से सात भावना देकर सुखा ले। मात्रा—१ माशा, अनुपान—अदरख का रस। इसके सेवन करने से सूजन, पीलिया, बवासीर ( अर्श ), संग्रहणी आदि रोग दूर होते हैं तथा अग्निमान्द्यनाशक है और अग्नि की वृद्धि करता है ॥ १५८-१६३ ॥

### अमृतफलपर्पटी।

शुद्धौ पारदगन्धौ च समानौ कज्जलीकृतौ। तयोरर्द्धं विषं शुद्धं तत्समं टङ्कणं मर्द्येत् ॥ १६४ ॥ भृङ्गराजद्रवैर्भाव्यं त्रिदिनं यत्नतः पुनः। मुद्गप्रमाणा वटिका कर्तव्या भिषजां वरैः ॥ १६५ ॥ वटीद्वयं हरेच्छूलमग्निमान्द्यं सुदारुणम्। अजीर्णं जरयत्याशु धातुपुष्टिं करोति च ॥ १६६ ॥ नानाव्याधिहरा चेयं वटी गुरुवचो यथा। अनुपानविशेषेण सम्यग् गुणकरी भवेत् ॥ १६७ ॥

पारा १ भाग, गन्धक १ भाग, इनकी कज्जली के समान मर्दनकर १ भाग मीठा विष, १ भाग सुहागा मिलावे और भाँगरे के रस से ३ दि

घोटकर आधी रत्ती या मूँग के बराबर गोली बना लेवे यह अनुपानभेद से बहुत से रोगों पर प्रयोग की जा सकती हैं । ये गोलियाँ धातु पुष्ट करती हैं । शूल, मन्दाग्नि, अर्श आदि रोग दो गोलियों के सेवन से ही नष्ट हो जाते हैं ॥ १५४-१६७ ॥

### पाशुपत रस ।

शुद्धसूतं द्विधा गन्धं त्रिभागं तीक्ष्णभस्मकम् । त्रिभिः समं विषं देयं चित्रककाथभावितम् ॥ १६८ ॥ धूर्तबीजस्य भस्मापि द्वात्रिंशद्भागसंयुतम् । कटुत्रयं त्रिभागं स्यात् लवङ्गैला च तत्समम् १६९ जातीफलं तथा कोषमर्द्धभागं नियोजयेत् । तथार्द्धलवणं पञ्च स्नुह्यर्कैरण्डतिन्तिडी ॥ १७० अपामार्गाश्वत्थजञ्च क्षारं दद्याद्विचक्षणः । हरीतकी यवक्षारं सर्जिकां हिङ्गुजीरकम् ॥ १७१ ॥ टङ्कणञ्च सूततुल्यं चाम्लयोगेन मर्दयेत् । भोजनान्ते प्रयोक्तव्यो गुञ्जाफलप्रमाणतः ॥ १७२ ॥ रसः पाशुपतो नाम सद्यः प्रत्ययकारकः । दीपनः पाचनो हृद्यः सद्यो हन्ति विसूचिकाम् ॥ १७३ ॥ तालमलीरसेनैव उदरामयनाशनः । मोचरसेनातिसारं ग्रहणीं तक्रसैन्धवैः ॥ १७४ ॥ सौवर्चलकणाशुण्ठीयुतः शूलं विनाशयेत् । अर्शो हन्ति च तक्रेण पिप्पल्या राजयक्ष्मकम् ॥ १७५ ॥ वातरोगं निहन्त्याशु शुण्ठी सौवर्चलान्वितः । शर्कराधान्ययोगेन पित्तरोगं निहन्त्ययम् ॥ १७६ ॥ पिप्पलीक्षौद्रयोगेन श्लेष्मरोगञ्च तत्क्षणात् । अतः परतरो नास्ति धन्वन्तरिमतो रसः ॥ १७७ ॥

पारद १ भाग, गन्धक २ भाग, लोहभस्म ३ भाग मीठा विष ६ भाग इनको चित्रक के काढ़े से भावना दे, इसके पश्चात् धतूरे के बीज की भस्म ३२ भाग, सोंठ ३ भाग, मिर्च ३ भाग पीपल ३ भाग, लौंग ३ भाग छोटी इलायची ३ भाग, जायफल ½ भाग, जावित्री ½ भाग, पाचों नमक हर एक ½ भाग, स्नुहीक्षार १ भाग, आकक्षार १ भाग, इमलीक्षार १ भाग, अपामार्ग क्षार १ भाग, पीपल का क्षार १ भाग, हरड़ १ भाग, जवाखार १ भाग, सज्जिक्षार १ भाग, हींग १ भाग, जीरा १ भाग, सुहागा १ भाग उपर्युक्त सम्पूर्ण द्रव्यों को अम्लवर्ग से घोटकर १ रत्ती प्रमाण की गोलियां बनावे, यह रस विसूचिका नाशक है और दीपन तथा पाचन है । अनुपान— उदररोग में मूसली के रस में, अतिसार में मोचरस में, ग्रहणी में नमकीन मठा में, शूल में सौंचर नोन, पीपल तथा सोंठ में, अर्श रोग में मठा के साथ, राजयक्ष्मा में पीपलचूर्ण के साथ पृथक् पृथक् प्रयोग में लाना चाहिए । इस रस को वातरोग में सोंठ तथा सौंचल नमक के साथ, पित्तरोग में खांड तथा धनिया के साथ और कफरोग में पीपलचूर्ण तथा शहद के साथ सेवन करना चाहिये ॥ १६८-१७७ ॥

### चिरबोदीपकरस ।

अभ्रं निर्मलमारितं पलमितं चूर्णीकृतं मर्दनतरचव्यं चित्रकमिन्द्रसूरकनक मालूरपत्रार्द्रकम् । मूलं पिप्पलिसम्भवं मधुरिका नीपोऽर्कमूलं पृथक् चैषां सत्वपलैर्विमर्दितमिदं कर्षं क्षिपेट्टङ्कणम् ॥ १७८ ॥ गुञ्जासम्मितमेतदेव वलितं तत्पारिभद्रं निर्मं-ष्ठाग्नि चिरजातगुल्मनिचयं शूलाम्लपित्तं ज्वरम् । छर्दिं दुष्टमसूरिकामलसकं श्वासञ्च कासं तृषां प्लीहानं यकृतं क्षयं स्वरहतिं कुष्ठं महारोचकम् ॥ १७९ ॥ दाहं मोहमशेषदोषजनितं ठद्ध्रञ्च दुर्नामकम्, धामं वातविमिश्रितं नयनजं रोगं समुन्मूलयेत् । चिरबोदीपकनामरोगहरणे भौमे पुरा शम्भुना, सर्वेषां हितकारकं गदवतां सर्वो-

मयध्वंसनम् ॥ १८० ॥ पापाणं यदि भक्षितं तदपि तत् कुर्यात् सुजीर्णं पुनर्बल्यं वृष्यतरं रसायनवरं मेधाकरं कान्तिदम् ॥ १८१ ॥

अभ्रकभस्म ४ तोला और त्र्यूषण का चूर्ण ४ तोला, इन दोनों को एकत्र कर चीता, निर्गुण्डी ( सँभालू ), धतूर और बेल की पत्तियों के चार चार तोला रस में और अदरख के ४ तोला रस में अच्छी रीति से घोटे । तदनन्तर पिपरामूल, सौंफ, कदम्ब और आक की जड़, चार चार तोला क्वाथ में घोटकर एक तोला सोहागा फूला हुआ मिलाकर फिर खरल करे। पीछे एक एक रत्ती की गोलियाँ बना लेवे। करंद के स्वरस के साथ इसका सेवन करना चाहिये। इससे अग्निमान्द्य, पुराना गुल्म, शूल, अम्लपित्त, ज्वर, वमन, दुष्ट मसूरिका, अलसक, श्वास, कास, तृषा, प्लीहा, यकृत्, क्षय, स्वरभङ्ग, कुष्ठ, दाह, मोह, मूत्रकृच्छ्र, बवासीर और आमवात, नेत्रविकार आदि अनेक रोग नष्ट होते हैं। इस त्रिदोषघ्न भ्रामक अभ्रक का उपदेश शिवजीने किया था। यह सब प्रकार के रोगों का नाशक होने से हर एक रोगी के लिये लाभदायक होता है। पाचन के लिये तो यह महौषध है। यहाँ तक कि इसका सेवन करने से पत्थर भी जीर्ण ( हजम ) हो जाता है। यह अभ्रक बल, वीर्य, मेधा और कान्ति का वर्धक तथा श्रेष्ठ रसायन है ॥ १७८-१८१ ॥

### वीरभद्राभ्रक।

अभ्रकं पुटसहस्रमारितं कर्षयुग्ममतिनिर्मलीकृतम्। वासराणि नवतिं विमर्दितं चित्रकस्वरसमाधुसिक्तकम् ॥ १८२ ॥ द्रवेरसमर्दितावटी कारिता सकलरोगनाशिनी। भक्षिता भुजगवल्लिपत्रकैः शृङ्गबेरकुलेन वा पुनः ॥ १८३ ॥ वह्निमान्द्यमभिनाश्य सत्वरं कारयेत् प्रखरपाचकोत्करम्। श्वासकासवमिशोथकामलाप्लीहगुल्मजठरारुचिभ्रमान् ॥ १८४ ॥ रक्तपित्तयकृदम्लपित्तकं शूलकोष्ठजगदान् विसूचिकाम्। आमवातवहुवातशोणितं दाहशीतबलह्रासकार्श्यकम् ॥ १८५ ॥ विद्रधिं ज्वरगरं शिरोगदं नेत्ररोगमखिलं हलीमकम्। हन्तिवृष्यतममेतदभ्रकं वीरभद्रमतिबल्यमुत्तमम् ॥ १८६ ॥ भक्षितं त्रिविधभक्ष्यमागलं काष्ठसन्निभमपि भस्मतां नयेत् ॥ १८७ ॥

सहस्रपुटित अभ्रकभस्म २ तोला लेकर, ९० दिन तक चीता के स्वरस में मर्दन करे। तदनन्तर अदरख के रस में घोटकर आधी आधी, रत्ती की गोलियाँ बनावे पान की पत्ती के साथ अथवा अदरख के रस के साथ सेवन करना चाहिये। इसके सेवन करने से अग्निमान्द्य, श्वास, कास, वमन, शोथ, कामला, प्लीहा, गुल्म, जठर, अरुचि, भ्रम, रक्तपित्त, यकृत्, अम्लपित्त, शूल, कोष्ठजन्य रोग, विसूचिका, आमवात, वातरक्त, दाह, शीत, निर्बलता, कृशता, विद्रधि, ज्वर, विषजन्यरोग, शिरोरोग, हर प्रकार के नेत्ररोग और हलीमकको नष्ट करता है और बलवीर्य की वृद्धि करता है। एवं गले तक भोजन किया हुआ काष्ठ के समान कठोर पदार्थ भी पच जाता है ॥ १८२-१८७ ॥

### रसराक्षस।

ताम्रं पारदगन्धकं त्रिकटुकं तीक्ष्णाभ्र सौवर्चलम्। खल्ले मर्द्य दिनं निधाय सिकताकुम्भेषु यामन्ततः ॥ १८८ ॥ स्विन्नं नेऽद्यपि रक्तशाकिनिभरं क्षारं समं भावयेत्। एकीकृत्य च मातुलुङ्गजलैर्नाम्ना रसो राक्षसः ॥ १८९ ॥

तांबे की भस्म, पारा, गन्धक, त्रिकटु, ( सोंठ, मिर्च, पीपल ), लोहभस्म, अभ्रक भस्म, इनमें

से प्रत्येक द्रव्य को बराबर-बराबर लेकर मिला ले और घोट डाले - इसके पश्चात् बालुकायन्त्र में १ घंटे तक पाक करे, इसके बाद लाल पुनर्नवा के क्षार को भी बराबर लेकर मिला ले और मातुलुङ्ग के रस से भावना देकर रख ले। इस रस को अजीर्ण में सेवन कराना चाहिए। मात्रा-१ रत्ती॥ १८८-१८९॥

बृहल्लवङ्गादि वटी।

लवङ्गजातीफलधान्यकुष्ठं जीरद्वयं त्र्यूषणत्रैफलञ्च। एलात्वचं टङ्कणराट्मुस्तं वचाजमोदा विडसैन्धवञ्च॥ १९०॥ तदर्द्धकं पारदगन्धकाभ्रं लौहञ्च तुल्यं सुविचूर्ण्य सर्वम्। तन्नागवल्लीदलतोयपिष्टं वल्लप्रमाणा वटिकाश्च कृत्वा॥ १९१॥ आर्तिं विदध्यादपि चोष्णतोयैरियं निहन्याद्ग्रहणीविकारम्। आमानुबन्धं सरुजं प्रवाहं ज्वरं तथा श्लेष्मभवं सशूलम्॥ १९२॥ कुष्ठाम्लपित्तं प्रबलं समीरं मन्दानलं कोष्ठगतं च वातम्। वटीलवङ्गादिवसुप्रणीता तथा सवातं विनिहन्ति शीघ्रम्॥ १९३॥

- लौंग, जायफल, धनिया, कुठ, जीरा, काला जीरा, त्रिकटु (सोंठ, मिर्च, पीपर), त्रिफला (हर्रे, बहेड़ा, आँवला), छोटी इलायची, दालचीनी, सुहागा, वराटभस्म, मोथा, वच, अजमोदा, विडलवण, सेंधा नमक, इनमें प्रत्येक द्रव्य बराबर-बराबर लेना चाहिए। पारा ½ भाग, गन्धक ½ भाग, अभ्रकभस्म ½ भाग, लोहभस्म १ भाग, इन सम्पूर्ण द्रव्यों को अच्छी तरह चूर्ण कर पान के पत्तों के रस के साथ घोटकर दो रत्ती प्रमाण की गोलियाँ बना ले। अनुपान—गरम जल। इनको सुबह के समय सेवन कराना चाहिए। इसके सेवन करने से ग्रहणी, आमातिसार, प्रवाहिका, कफज्वर, शूल, कुष्ठ, अम्लपित्त, वातव्याधि, मन्दाग्नि, कोठे में गई हुई वायु आदि रोग नष्ट होते हैं॥ १९०-१९३॥

ज्वालानल रस।

क्षारद्वयं सूतगन्धौ पञ्चकोलमितं समम्। सर्वतुल्या जया देया तदर्धं शिग्रुवल्कलम्॥ १९४॥ एतत्सर्वं जयाशिग्रुवह्निमार्कवजै रसैः। भावयेन्निदिनं घर्मे ततो लघुपुटे पचेत्॥ १९५॥ भावयेत्सप्तधा चार्द्रद्रावैर्ज्वालानलो भवेत्। पाचनो दीपनो, ह्ययमुदरामयनाशनः॥ १९६॥

यवक्षार, सज्जीखार, पारा, गन्धक, पीपल, पिप्पलीमूल, चव्य, चित्रक, सोंठ इनमें प्रत्येक द्रव्य १ तोला लेना चाहिए और भाँग १८ तोला, सहिजने की छाल ९ तोला, इन सम्पूर्ण द्रव्यों को इकट्ठा कर मिलाकर इसको भाँग के रस से, सहिजने के रस से, चित्रक तथा भाँगरे के रस से अलग-अलग तीन दिन घोटकर लघुपुट से पाक करे। जब स्वाङ्गशीतल हो जावे तो निकालकर अदरख के रस से सात बार भावना दे। मात्रा—४ रत्ती। यह रस पाचन, दीपन तथा उदररोगों को नष्ट करता है॥ १९४-१९६॥

महाद्राविक वटी।

माक्षिकं रसगन्धौ च हरितालं मनःशिला। त्रिवृद्दन्ती यवक्षारं चित्रकञ्च महौषधम्॥ १९७॥ पिप्पली मरिच पथ्या यमानी कृष्णजीरकम्। रामठं कटुका पाक्यसैन्धवं साजमोदकम्॥ १९८॥ जातीफलं यवक्षारं समभागं विचूर्णयेत्। आर्द्रकस्य रसेनैव निर्गुण्ड्याः स्वरसेन च॥ १९९॥ सूर्यावर्त्तरसेनैव तुलस्याः स्वरसेन च। प्रातपे भावयेद्वैद्यः खल्लपात्रे च निर्मले। वेषयित्वा वटीं कारयेत् गुञ्जाफल सममभाम्॥ २००॥ अजीर्णरोगे बहुभोजनान्ते मुहुर्मुहुर्वाञ्छति भोज-

नानि । आमानुबन्धे च चिराग्निमान्द्ये विड्विग्रहे पित्तकफानुबन्धे ॥ २०१ ॥ शोथोदरे चार्शगदेऽप्यजीर्णे शूले त्रिदोषप्रभवे ज्वरे च । शस्ता वटी भक्तविपाकसंज्ञा सुखं विपाचयाशु नरस्य कोष्ठम् २०२

सोनामक्खी की भस्म, पारा, गन्धक, हरिताल, मन:शिला, निसोत, दन्तीमूल, मोथा, चित्रक, सोंठ, पीपल, कालीमिर्च, हरड, अजवाइन, काला जीरा, हींग, कटुकी, सज्जीखार, सेंधानमक, यवक्षार, जायफल, जवाखार, हरएक द्रव्य बराबर-बराबर लेकर इसे अदरख के रस, सँभालू के रस, कुलकुल तथा तुलसी के रस से पृथक्-पृथक् भावना देकर १ रत्ती की गोली बनावे और धूप में सुखा ले । इन गोलियों को भोजन के बाद खाने से बार-बार भोजन करने की इच्छा होती है । ये गोलियाँ सुस्वादु तथा अग्निवर्धक हैं । आमयुक्त मन्दाग्नि, मलबद्धता, सूजन, उदररोग, अजीर्ण, शूल, बवासीर तथा साम्निपातिक ज्वर आदि रोगों में लाभदायक हैं । मात्रा १-४ रत्ती ॥ १९७-२०२ ॥

पञ्चामृत वटी ।

अभ्रकं पारदं ताम्रं गन्धकं मरिचानि च । समभागमिदं चूर्णं चाङ्गेरीरसमर्दितम् ॥२०३॥ मर्दिते हि रसे भूयो जयन्ती सिन्धुवारयोः । भावनापि च दातव्या गुञ्जा परिमिता वटी ॥ २०४ ॥ तप्तोदकानुपानेन चतस्रस्तिस्र एव वा वह्निमान्द्ये प्रदातव्या वट्यः पञ्चामृतास्तथा ॥ २०५ ॥

अभ्रकभस्म, पारा, तांबे की भस्म, गन्धक, कालीमिर्च, इनके पृथक्-पृथक् चूर्ण को बराबर-बराबर मिलाकर चाङ्गेरी के रस से घोट डाले और जयन्ती तथा सँभालू के पत्तों के रस से भावना देकर १ रत्ती प्रमाण की गोलियाँ बना लेवे । ये गोलियाँ मन्दाग्नि दूर करने के लिए तीन या चार बार प्रयोग करनी चाहिए अनुपान—उष्णोदक ॥ २०३-२०५ ॥

विसूचीविध्वंस रस ।

टङ्कणं माक्षिकं शुण्ठी पारदं गन्धकं विषम् । गरलं समभागेन सर्वेषां हिङ्गुलं समम् ॥ २०६ ॥ मर्दयेज्जम्बीरद्रावैर्वटीकार्या प्रयत्नतः । श्वेतसर्षपतुल्या च मृतसञ्जीवनी तथा ॥ २०७ ॥ विसूचीं नाशयत्याशु दध्यन्नं पथ्यमाचरेत् । त्रिदोषोत्थमतीसारं सर्वोपद्रवसंयुतम् ॥ २०८ ॥

सुहागा सोनामक्खी की भस्म, सोंठ, पारा, गन्धक, मीठा विष, काले साँप का विष, इनमें से हर एक द्रव्य १ भाग ले, और हिंगुल ७ भाग ले, इनको जम्बीर के रस से घोटकर सरसों के बराबर गोलियाँ बना लेवे । मृतसञ्जीवनी सुरा और यह रस दोनों ही विसूचिकानाशक हैं और तीनों दोषों से उत्पन्न अतिसार को नष्ट करते हैं । मात्रा—१ रत्ती ॥ २०६-२०८ ॥

सारसंग्रह में सारामृतमोदक ।

शुण्ठीचूर्णस्य कुडवं हरीतक्यास्तथैव च । लवङ्गं जीरकं व्योषं चातुर्जातञ्च मुस्तकम् ॥ २०९ ॥ कर्पूरं जातिकोषञ्च जातीफलसमन्वितम् । एषां द्विकार्षिकान् भागान् परं तु सार्द्धकार्षिकम् ॥ २१० ॥ यमानी सैन्धवं कुष्ठं धनिका जारितं त्वयः । कार्षिकं ग्रन्थिकं चव्यं मूर्वा च चित्रकं शटी ॥ २११ ॥ अजाजी रेणुकं मांसी मेथिका वङ्गमभ्रकम् । रसाञ्जनं मोचरसं द्राक्षा यष्टी च धान्यकम् ॥ २१२ ॥ सर्वं चूर्णीकृतं यत्नाच्छर्करा द्विगुणा मता । ततश्च पाकविद्वैद्यो मोदकं परिकल्पयेत् ॥ २१३ ॥ मृगशिञ्जातचूर्णेन कर्पूरेणाधिवासयेत् । भक्षयेत् प्रातरुत्थाय बुद्ध्वा दोष-

पलाष्टकम् ॥ २१४ ॥ कौलेकं वार्द्धकोलं वा दुग्धानुपानमत्र च । पथ्यापथ्यविहीनश्च भक्षयेद्रोगवानपि ॥ २१५ ॥ ग्रहण्यादि गदं हन्यात् मन्दाग्निञ्च विशेषतः । वातिकं पैत्तिकञ्चैव श्लैष्मिकं सान्निपातकम् ॥ २१६ ॥ आमशूलं यकृच्छूलं हृच्छूलं पार्श्वशूलकम् । कामलां पाण्डुरोगञ्च हलीमकमगन्दरम् ॥ २१७ ॥ ग्रहणीं चिरजां सूतिं क्रमिं कोष्ठगदंस्तथा। गदस्योच्छेदको ह्येष तुष्टिपुष्टिकरस्तथा ॥ २१८ ॥ दीपनः पाचनो ह्येष पलवर्णाग्निवर्द्धनः । रसायनवरश्चायं वाजीकरण उत्तमः । सर्वाजीर्णप्रशमने ब्रह्मणा परिकल्पितः ॥ २१६ ॥

सोंठ का चूर्ण १६ तोले, हरड़ १६ तोले, लौंग २ तोले, जीरा २ तोले, त्रिकटु, ( सोंठ, मिर्च, पीपल ) २ तोले, दारचीनी २ तोले, तेजपत्र २ तोले, छोटी इलाइची २ तोले, नागकेसर २ तोले, मोथा २ तोले, कपूर २ तोले, जावित्री २ तोले, जायफल २ तोले, अजवायन १॥ तोले, सैंधव लवण १॥ तोले, कुट १॥ तोले, प्रियगु १॥ तोले, लोहभस्म १॥ तोले, पिप्पली मूल १ तोला, वच १ तोला, मूर्वामूल १ तोला, चित्रक १ तोला, कपूर १ तोला, कालाजीरा १ तोला, रेणुका १ तोला, जटामांसी १ तोला, मेथीबीज १ तोला, वङ्गभस्म १ तोला, अभ्रकभस्म १ तोला, रसौत १ तोला, मोचरस १ तोला, दाख १ तोला, मुलहठी १ तोला, धनियाँ १ तोला, सबसे द्विगुणी खाँड, विधि अनुसार पाक बनाकर थोड़ा त्रिजात चूर्ण तथा कपूर मिलाकर ½ तोला से १ तोला प्रमाण तक लड्डू बना ले। अनुपान—दूध। रोगी की ताकत देखकर सुबह के समय उपयुक्त मात्रा में सेवन करावें। यह मोदक ग्रहणी, मन्दाग्नि, आमशूल, यकृच्छूल, हृच्छूल, पार्श्वशूल, कामला, पीलिया, हलीमक, भगन्दर, सूतिका रोग, कृमि, कोष्ठरोग तथा और अनेक प्रकार के वात पित्त कफ से उत्पन्न होनेवाले तथा त्रिदोषज रोगों को नष्ट करते हैं। ये पौष्टिक, दीपन पाचन तथा वाजीकरण हैं। यह रसायन बल, वर्ण अग्नि को बढ़ानेवाला है। ब्रह्माजी द्वारा बनाया हुआ यह रसायन सम्पूर्ण अजीर्णनाशक है ॥ २०४-२१६ ॥

कर्पूरासव ।

तुलां प्रसन्नां परिगृह्य शुद्धां पलाष्टकं चोडुपतेःक्षिपेच्च। एला च मुस्ता घनशृङ्गवेरं यमानिका वेल्लजमत्र सर्वम् ॥ २२० ॥ पलप्रमाणं पिहिते च भाण्डे मासं निदध्याद् भिषगत्र यत्नात् । विसूचिकायाः परमौषधं तन्निहन्ति चान्यान् विविधान् विकारान् ॥ २२१ ॥

शुद्ध सुरा ( शराब ) ५ सेर, कपूर ३२ तोले, छोटी इलायची ४ तोले, मोथा ४ तोले, सोंठ ४ तोले, अजवाइन ४ तोले, कालीमिरच ४ तोले, इन सम्पूर्ण द्रव्यों को एक बर्तन में मुख बन्द करके १ महीने के लिए रख दे। इसके बाद छानकर काम में लावे। यह आसव विसूचिका के लिये अत्यन्त लाभकारी है। इसके सेवन से अन्य अनेक प्रकार की व्याधियाँ (रोग) दूर होते हैं। मात्रा ५।६ बूँद आवश्यकतानुसार ॥ २२०-२२१ ॥

मुस्ताद्य वटी ।

मुस्तात् पलद्वयं चूर्णं कणाकर्पूरहिङ्गुतः। पलं पलं गृहीत्वा तु सम्यगेकत्र मिश्रयेत् ॥ २२२ ॥ हिमांशोरम्बुभिः कुर्याद्वटिका वल्लसम्मिताः । अतीसारमजीर्णञ्च विषूचीमुग्रग्रहणीम् ॥ २२३ ॥ अरोचकं वह्निमान्द्यं ग्रहणीमपि दारुणम् । कासं पञ्चविधं चैव नाशयेद्विकल्पतः ॥ २२४ ॥

मोथा ८ तोला, पीपल ४ तोला, कपूर ४ तोला, हींग ४ तोला, इनको पृथक्-पृथक्

चूर्ण कर मिला ले । इसके पश्चात् कपूरोदक से घोटकर २ रत्ती प्रमाण की गोली बना लेवे । इन गोलियों के सेवन करने से अतिसार, अजीर्ण, भयकर विसूचिका, अरुचि, अग्निमान्द्य, भयंकर ग्रहणी तथा पाँचों प्रकार की खाँसी दूर होती है ॥ २२२-२२४ ॥

### मन्दाग्नि में पथ्य

नानाप्रकारो व्यायामो दीपनानि लघूनि च । बहुकालसमुत्पन्ना सूक्ष्मा लोहितशालयः ॥ २२५ ॥ विलेपी लाजमण्डश्च मण्डो मुद्गरसः सुरा । एणो बर्ही शशो लावः क्षुद्रमत्स्याश्च सर्वशः ॥ २२६ ॥ शालिञ्चशाकं वेत्राग्रं वास्तूकं बालमूलकम् । लशुनं वृद्धकूष्माण्डं नवीनकदलीफलम् ॥ २२७ ॥ शोभाञ्जनं पटोलञ्च वार्ताकुफलं दुम्बु च । कर्कोटकं कारवेल्लं वहिः तच महार्द्रकम् ॥ २२८ ॥ प्रसारिणी मेषशृङ्गं चाङ्गेरी सुनिषण्णकम् । धात्रीफलं नागरङ्गं दाडिमं निम्बुकं तथा ॥२२९॥ अम्लवेतसजम्बीरमातुलुङ्गानि माक्षिकम् । नवनीतं घृतं तक्रं सौवीरकतुषोदके ॥ २३० ॥ धान्याम्लं कटुतैलञ्च रामठं लवणार्द्रकम् । यमानी मरिचं मेथी धान्यकं जीरकं दधि ॥ २३१ ॥ ताम्बूलं तप्तसलिलं कटुतिक्तौ रसावपि । मन्दानलेऽप्यजीर्णेऽपि पथ्यमेतन्नृणां भवेत् ॥ २३२ ॥

अजीर्ण तथा मन्दाग्नि में अनेक प्रकार के व्यायाम (कसरत), अग्नि को दीपन करनेवाले तथा हलके पदार्थ, पुराने लाल पतले शालि-चावल, यवागू, लावा से प्रस्तुत मण्ड, मूंग का पानी, मदिरा, हिरन, मोर, शशक, लावा, छोटी मछलियाँ, हरे साग, वेत की फुनगी, बथुआ, कच्ची मूली, लहसुन, पुराना पेठा पका हुआ, कच्चा केला, सहिजन, परवल, बैंगन, नीम के पत्तों का शाक, ककोड़े, करेला, बृहतीफल, महार्द्रक, प्रसारणी, मेषशृङ्गी, चाङ्गेरी, चौपतिया, आँवला, नारंगी, अनार, नीबू, अम्लवेतस, जम्बीर, बिजौरा, मधु, मक्खन, घी, मठा, सौवीर, तुषोदक, काञ्जी, सरसों का तेल, हींग, नमक, अदरख, अजवाइन, कालीमिर्च, मेथी, धनियाँ, जीरा, दही, पान, गरम पानी, कडुवे एवं तीखे रसवाले पतले पदार्थ अग्निमान्द्य रोगी को पथ्य हैं ॥ २२५-२३२ ॥

### मन्दाग्नि में अपथ्य ।

विरेचनानि विण्मूत्रवायुवेगविधारणम् । अध्यशनं समशनं जागरं विषमाशनम् ॥ २३३ ॥ रक्तस्रुतिं शमीधान्यं मत्स्यं मांसमुपोदिकाम् । जलपानं पिष्टकञ्च जाम्बवं सर्वमालुकम् ॥ २३४ ॥ कूर्चिकां मोरटं क्षीरं किलाटञ्च मथानकम् । तालास्थिमस्यं सद्रालं स्नेहं दुष्टवारि च ॥ २३५ ॥ विरुद्धासात्म्यपान्नानं विष्टम्भीनि गुरूणि च । अग्निमान्द्येऽप्यजीर्णे च सर्वाणि परिवर्जयेत् ॥ २३६ ॥

इति भैषज्यरत्नावल्यामग्निमान्द्याधिकारः समाप्तः ॥

तेज विरेचन, दस्त, मूत्र, वायु आदि के वेगों को रोकना, जितनी भूख हो उससे अधिक भोजन करना, अनमल भोजन करना, रात को जागना, कभी ज्यादा कभी कम और कभी कुसमय पर भोजन करना, रक्त का निकलवाना, सेम मटर आदि खाना, नये चावल, मछली, मांस, पोई का साग, अधिक जल पीना, पिट्ठी से बनी चीजें, जामुन, आलू, कूर्चीका, मोरट (प्रसव के सात दिन के बाद का दूध), फटे हुए दूध के खोआ से बने पदार्थ, शरबत, ताड़ के बीज का गूदा, कच्चे ताड़ का फल, घी, तेल, इत्यादि से बने हुए पदार्थ, खराब पानी, नामाफिक भोजन, एक दूसरे से विरुद्ध भोजन (दूध, मछली आदि),

भारी पदार्थ, ये सब अजीर्ण व अग्निमान्द्य में रोगी को अपने हित के लिए छोड़ देना चाहिए ॥ २३५-२३६ ॥

इति सरयूप्रसादत्रिपाठिविरचितायां भैषज्यरत्नावल्या रत्नप्रभाभिधायां व्याख्यायाम-ग्निमान्द्याधिकार समाप्त ।

---

## अरोचकाधिकारः ।

### अरोचक में शोधन ।

बस्तिं समीरणे पित्ते विरेकं वमनं कफे । कुर्याद् हृद्यानुकूलानि हर्षणञ्च मनोघ्नजे ॥ १ ॥

वातजन्य अरोचक में बस्तिक्रिया, पित्तजन्य अरोचक में विरेचन और कफजन्य अरोचक में वमन करे । मनोविघातजन्य अरोचक में हृदय के लिये हितकारी अनुकूल और चित्त को सन्तुष्ट करनेवाली चिकित्सा करनी चाहिये ॥ १ ॥

### कवल-धारण ।

कुष्ठसौवर्चलाजाजी शर्करा मरिचं विडम् । धात्र्येलापद्मकोशीरपिप्पल्यश्चन्दनोत्पलम् ॥ २ ॥ लोध्रं तेजोवती पथ्या त्र्यूषणं सयवाग्रजम् । आर्द्रदाडिमनिर्यासश्चाजाजीशर्करायुत ॥ ३ ॥ सतैलमाक्षिकास्त्वेते चत्वारः कवलग्रहः । चतुरोऽरोचकान् हन्युर्वातपित्तकफजसर्वजान् ॥ ४ ॥

कूठ, कालानोन, जीरा, मिश्री, मिरिच और विडनमक, आँवला, इलायची, पद्माख, खस, पीपरि, लाल चन्दन और कमल । लोध, चव्य, हरड़, सोंठ, मिरिच, पीपरि और जवाखार । कच्चे अनार के फल के बीजों का रस, जीरा और मिश्री । इन चारों योगों में से किसी एक के चूर्ण को तैल और मधु में मिश्रित कर कवल धारण करना चाहिये । यह योग क्रमशः वातिक, पैत्तिक, श्लैष्मिक और सान्निपातिक अरोचक रोग को नष्ट करते हैं[1] ॥ २-४ ॥

### मुखशोधन योग ।

त्वङ्मुस्तमेलाधान्यानि मुस्तमामलकं त्वचः । त्वक् च दार्वी यमान्यश्च तेजोवत्यपि पिप्पली ॥५॥ यमानी तिन्तिडीकञ्च पञ्चैते मुखशोधनः । श्लोकपादैरभिहितः सर्वारोचकनाशनाः ॥ ६ ॥

दालचीनी, नागरमोथा, इलायची और धनियाँ का चूर्ण । नागरमोथा, आँवला और दालचीनी का चूर्ण । दालचीनी, दारुहल्दी और अजवाइन का चूर्ण । चव्य और पीपरि का चूर्ण । अजवाइन और इमिली का चूर्ण । श्लोक के एक-एक पाद से कहे हुये यह पाँच योग मुखशोधन और सब प्रकार की अरुचि के नाशक हैं ॥ ५-६ ॥

भोजनाग्रे सदा पथ्यं लवणार्द्रकभक्षणम् । रोचनं दीपनं वह्नेर्जिह्वाकण्ठविशोधनम् ॥ ७ ॥

भोजन से पहले नमक और अदरख खाने से भोजन में रुचि होती है, अग्नि बढ़ती है तथा जीभ और कण्ठ साफ होते हैं ॥ ७ ॥

### अभक्तच्छन्दनाशककवलधारण ।

अम्लिका गुडतोयञ्च त्वगेला मरिचान्वितम् । अभक्तच्छन्दरोगेषु शस्तं कवलधारणम् ॥ ८ ॥

इमिली और गुड़ को जल में घोलकर इसमें दालचीनी, इलायची और मिरिच का चूर्ण मिलाकर मुख में धारण करने से हर प्रकार के अभक्तच्छन्द ( अन्न में रुचि न होना ) रोग नष्ट होते हैं ॥ ८ ॥

---

[1] जिनको तेल रुचिकर नहीं है, वह अकेले ही या घृत मिलाकर प्रयोग कर सकते हैं ।

### कारव्यादिकवलधारण।

कारव्यजाजी मरिचं द्राक्षा वृक्षाम्ल-दाडिमम्। सौवर्चलं गुडः क्षौद्रं सर्वारोचकनाशनम् ॥ ९ ॥

कलौंजी, जीरा, मरिच, मुनक्का, इमली, अनार, काला नमक और गुड़; इन औषधों का कवल धारण करने से सब प्रकार की अरुचि नष्ट होती है ॥ ९ ॥

### विड्चूर्णादिकवल।

विड्चूर्णमधुसंयुक्तो रसो दाडिमसम्भवः। असाध्यामपि संहन्यादरुचिं वक्त्रधारितः ॥ १० ॥

अनार के रस में शहद और विड्नमक मिलाकर मुख में रखने से असाध्य भी अरुचि नष्ट होती है ॥ १० ॥

श्रीण्यूषणानि त्रिफला रजनीद्वयञ्च चूर्णीकृतानि यवशूकविमिश्रितानि। क्षौद्रान्वितानि वितरेन्मुखधारणार्थमन्यानि तिक्तकटुकानि च भेषजानि ॥ ११ ॥

सोंठ, मिर्च, पीपर ( त्रिकटु ), हर्र, बहेड़ा, आँवला ( त्रिफला ), हल्दी दारुहल्दी, यवक्षार तथा दूसरी कड़वी, तीखी औषधियों को शहद मिलाकर मुँह में रखने से अरुचि नाश को प्राप्त होती है ॥ ११ ॥

राजिकाजीरकौ भृष्टौ भृष्टं हिङ्गु सनागरम्। सैन्धवं दधि गोः सर्वं वस्त्रपूतं प्रकल्पयेत् ॥ १२ ॥ तावन्मात्रं क्षिपेत्तक्रं यथा स्याद्रुचिरुत्तमा। तक्रमेतद्भवेत् सद्यो रोचनं वह्निवर्धनम् ॥ १३ ॥

भुनी हुई राई, भुनी हुई हींग, भुना हुआ जीरा, सोंठ और सेंधा नमक हरएक द्रव्य १ भाग लेकर चूर्ण कर के और सबके बराबर परिमाणयुक्त दही लेकर इसमें मथ डालें और कपड़े में छानकर सबके बराबर मट्ठा मिला ले। इसके पान करने से रुचि बढ़ती है और अग्नि की वृद्धि होती है ॥ १२-१३ ॥

द्वे पले दाडिमाम्लस्य खण्डं दद्यात् पलत्रयम्। त्रिसुगन्धिपलञ्चैकं चूर्णमेकत्र कारयेत् ॥ १४ ॥ तच्चूर्णं मात्रया भुक्तमरोचकहरं परम्। दीपनं पाचनं च स्यात् पीनसज्वरकासजित् ॥ १५ ॥

२ पल ( ८ तोला ) अनारदाना, ३ पल ( १२ तोला ) खांड, १ पल ( ४ तोला ) छोटी इलायची ४ तोला दालचीनी, १ पल ( ४ तोला ) तेजपत्र, इन सबको इकट्ठा कर यथाविधि चूर्ण बना ले। इस चूर्ण के सेवन करने से अरुचि, पीनस, ज्वर तथा खाँसी नाश को प्राप्त होते हैं। यह चूर्ण दीपन-पाचन है ॥ १४-१५ ॥

### महाखाण्डवचूर्ण।

मरिचं नागपुष्पाणि तालीसं लवणानि च। प्रत्येकमेकभागाः स्युः पिप्पलीमूलचित्रकैः ॥ १६ ॥ त्वकणा तिन्तिडीकं च जीरकं च द्विभागिकम् धन्याम्लवेतसौ विश्वं भद्रैला बदराणि च ॥ १७ ॥ अजमोदा जलधरः प्रत्येकं स्युस्त्रिभागिकाः। सर्वौषधि चतुर्थांशद्दाडिमस्य फलं भवेत् ॥ १८ ॥ द्रव्येभ्यो निखिलेभ्यश्च सितादेयाऽर्धभागयः। महाखाण्डव संज्ञस्याच्चूर्णमेतत्सुरोचनम् ॥ १९ ॥ अग्निदीप्तिकरं हृद्यं कासातीसारनाशनम् हृद्रोग कण्ठ जठर मुखरोग प्रणाशनम् ॥ २० ॥ विषूचिकां तथाऽऽध्मानमर्शो गुल्म कृमीनपि। छर्दि पञ्चविधां श्वासं चूर्णमेतद्व्यपोहति ॥ २१ ॥

कालीमिर्च, नागकेशर, तालीस पत्र, पाँचो नमक प्रत्येक औषधियाँ 1-1 तोला, पिपलामूल-

चीता की जड़, दालचीनी, पीपरि, तिन्तिडीक (इमलियापूड) यह प्रत्येक औषधियाँ २-२ तोला। धनियाँ, अमलबेत, सोंठ, बड़ी इलायची, बेर, अजवायन और नागरमोथा प्रत्येक औषधियां ३-३ तोले। सब औषधियों का चतुर्थांश (सवा दस तोले) अनार दाना और सब औषधियों की अर्द्ध भाग २१॥ तोले खांड ( या मिश्री ) मिलावे । यह चूर्ण रुचि बढ़ाने वाला जठराग्नि को बढ़ानेवाला और हृदय को हितकारी है। यह चूर्ण खांसी, हृदय के रोग, अतिसार कण्ठरोग, उदररोग, मुँह के रोग, हैजा, अफरा, बवासीर, गुल्म, पेट के कृमि, पांचो तरह की ग्रहणी और श्वास को नष्ट करता है ॥ १६-२१ ॥

महौषधादि चूर्ण और गुडिका ।

महौषध शिवाजीरं शतपुष्पावचात्वचम् । त्रुटी मधुरिका हिङ्गु देवपुष्पं हविर्भुजाम् ॥ २२ ॥ यमान्याश्च लवणयोः पयोधरमरीचयोः । पिप्पलीटङ्कयो श्लक्ष्णचूर्णानि समभागतः ॥ २३ ॥ सम्मिश्र्य मर्दयेत् खल्ले माषमात्रन्तु सेवयेत् । महौषधादिकं चूर्णमिदं हन्यादरोचकम् ॥ २४ ॥ अग्निमान्द्यमतीसारमम्लपित्त विसूचिकाम् । ग्रहणीं शूलगुल्मांश्च सूतिकाञ्च तिल्लिनकाम् ॥ २५ ॥ यकृत्प्लीहज्वरं जीर्णं रक्तजं यथाग्निका ॥ २६ ॥ चतुर्गुणेन लिम्पाकरसेन वारसप्तकम् । तदेव भावितं चूर्णं यदिष्टर्द्धिश्चिकित्सकैः ॥ गुणैर्वरा तदाख्याता तदाख्या गुडिका भवेत् ॥ २७ ॥

सोंठ, हरड़, सफेद जीरा, सोया, बच, दारचीनी, छोटी इलायची, सौंफ, हींग, लौंग, चित्रक अजवाइन, सेंधा नमक, बिड नमक, मोथा, कालीमिर्च पीपल सुहागा इनको पृथक् पृथक् चूर्ण कर बराबर बराबर मिलाकर घोटे। मात्रा—१ माशा। इस महौषध आदि चूर्ण के सेवन करने से अरुचि, मन्दाग्नि, अतिसार (दस्त), अम्लपित्त, विसूचिका (हैजा), ग्रहणी, शूल (दर्द), गुल्म, सूतिकारोग, विलम्बिका, तिल्ली, जिगर से उत्पन्न पुराना ज्वर आदि रोग नाश को प्राप्त होते हैं। अगर इस चूर्ण में चार गुने नींबू के रस की भावनाएँ देकर गोलियाँ बना ले तो यह गोलियाँ दूसरे चूर्णों की अपेक्षा अधिक गुणकारी होंगी ॥ २२-२७ ॥

यमानीषाडव ।

यमानी तिन्तिडीकञ्च नागरञ्चाम्लवेतसम् । दाडिम बदरञ्चाम्लं कार्षिकाण्युपकल्पयेत् ॥ २८ ॥ धान्यसौवर्चलाजाजी वराङ्गञ्चार्द्धकार्षिकम् । पिप्पलीनां शतञ्चैव द्वे शते मरिचस्य च ॥ २९ ॥ शर्कराया्श्च चत्वारि पलान्येकत्र चूर्णयेत् । जिह्वाविशोधनं हृद्यं तच्चूर्णं भक्तरोचनम् ॥ ३० ॥ हृत्पीडापार्श्वशूलघ्नं विबन्धानाहनाशनम् । कासश्वासहरं ग्राहि ग्रहण्यर्शोविकारनुत् ॥ ३१ ॥

अजवाइन, इमिली, सोंठ अमलबेत, अनार का दाना और खट्टा बेर एक एक तोला, धनियाँ, कालानमक, जीरा और दालचीनी आधा आधा तोला, पीपरि १००, मरिच दो सौ और चीनी १६ तोला, इन औषधों को कूट-पीसकर चूर्ण बना लेवे। इस चूर्ण को कुछ देर तक मुख में धारण करके पीछे धीरे धीरे निगल जाना चाहिये। यह चूर्ण जिह्वाशोधक हृदय को हित कारक और रुचिवर्धक है। तथा हृदय की पीड़ा, पसलियों की पीड़ा, मलबद्धता, अफारा, कास, श्वास, ग्रहणी और बवासीर को नष्ट करता है एवं ग्राही है ॥२८-३०॥

कलहंस ।

शिग्रु फलान्यष्टादशार्द्धमरिचानि विंशतिः पिप्पल्यः । आर्द्रकपलं गुडपलं प्रस्थद्वयमारनालस्य ॥ ३२ ॥ एतद्धिङ्गुलवणसहितं खजाहतं सुरभिगन्धाढ्यम् ।

व्यञ्जनसहस्रधाति ह्येयं कलहंसकं नाम ॥ ३३ ॥

खजाहतं मन्थानदण्डमथितम्। सुरभिगन्धाढ्यं चातुर्जातचूर्णेन सुगन्धीकृतं चातुर्जातं मिलित्वा पलं, प्रत्येकमिति केचित्। कलहंसवत् स्वरकर्तृत्वादस्य कलहंससंज्ञा।

सहिंजन के फल १८, मिरिच १० दाने, पीपरि २०, अदरख ४ तोले, गुड़ ४ तोले, कांजी १२८ तोले, पिसनमक ४ तोले; इन सब वस्तुओं को एकत्रित कर अच्छी तरह चूर्ण करके चतुर्जातक (दालचीनी, इलायची, तेजपात और नागकेसर) का ४ तोले चूर्ण मिलाकर सुगन्धित करे। किसी वैद्य का मत है कि चतुर्जातक के दालचीनी आदि जो चार औषध हैं, उनमें से प्रत्येक का चार-चार तोले चूर्ण मिलावे। यह औषध अत्यन्त सुस्वादु होने से हजारों प्रकार के व्यञ्जनों को तिरस्कृत करता है। इसका सेवन करने से कलहंस के समान अत्यन्त सुमधुर स्वर होता है, अग्नि की वृद्धि होती है और सब प्रकार की अरुचि नष्ट होती है। कलहंस के समान स्वर करने ही से इसका नाम कलहंस रक्खा गया है ॥ ३२-३३ ॥

तिन्तिडीपानक।

भागास्तु पञ्च चिञ्चायाः खण्डस्यापि चतुर्गुणाः। धान्यकार्द्रकयोर्भागं चातुर्जातार्द्धभागिकम् ॥ ३४ ॥ द्विगुणं जलमेतेषामेकपात्रे विलोडितम्। पीडितं तप्तदुग्धेन ततो वस्त्रपरिप्लुतम् ॥ ३५ ॥ विधिना धूपिते पात्रे कृत्वा कर्पूरवासितम्। नृपयोग्यमिदं पानं भवेद् युक्त्या सुयोजितम् ३०॥

बीजादि-रहित परिपक्व इमिली ५ तोले, खाँड़ २० तोले, धनियाँ का चूर्ण आधा तोला, अदरख आधा तोला, दालचीनी, इलायची, तेजपात और नागकेसर का चूर्ण आधा तोला और जल ५१ तोले, इन सब औषधों को पात्र में मलकर मिश्रित कर देवे। पश्चात् थोड़ा-सा उष्ण दुग्ध मिलाकर वस्त्र से ढँक देवे। पीछे अगर आदि द्वारा धूपित पात्र में रखकर कपूर से सुवासित कर देवे। तत्पश्चात् सेवन करने के योग्य हो जाता है। यह तिन्तिडीपानक युक्तिपूर्वक प्रयोग करने से राजाओं के योग्य होता है ॥ ३४-३६ ॥

रसाला।

अर्द्धाढकं सुचिरपर्युषितस्य दध्नः खण्डस्य षोडशपलानि शशिप्रभस्य। सर्पिः पलं मधुपलं मरिचद्विकर्षं शुण्ठ्याः पलार्द्धमपि चार्द्धपलं चतुर्णाम् ॥ ३७ ॥ शुक्लोपले ललनया मृदुपाणिघृष्टा कर्पूरचूर्णसुरभीमयमाण्डसंस्था। एषा वृकोदरकृता सुरसा रसाला याऽऽस्वादिता भगवता मधुसूदनेन ॥ ३८ ॥ रसाला बृंहणी वृष्या स्निग्धा बल्या रुचिप्रदा ॥ ३९ ॥

अत्र दध्नो न द्वैगुण्यमिति केचित्।

खट्टा दही ३ सेर १६ तोला, मिश्री ६४ तोला, घृत ४ तोला, मधु ४ तोला, मरिच का चूर्ण २ तोले, सोंठ का चूर्ण २ तोले, दालचीनी इलायची, तेजपात और नागकेसर प्रत्येक का चूर्ण आधा तोला। इन औषधों को श्वेत पत्थर के पात्र में कोई सुन्दरी रमणी अपने कोमल हाथों से मसल कर कपूर के चूर्ण से सुगन्धित किये हुए पात्र में रख देवे। इस सुमधुर रसाला को भीमसेनजी ने बनाया था और भगवान् मधुसूदन ने इसका आस्वादन किया था। यह रसाला बृंहण, वृष्य, स्निग्ध, बलप्रद और रुचिवर्धक है ॥ ३७-३९ ॥

किसी वैद्य का मत है कि दधि द्रव पदार्थ होने पर भी इस योग में द्विगुण नहीं लिया जाता है, अतः उनके मत के अनुसार दही १२८ तोला लेना चाहिये।

### रसकेशरी।

रसगन्धौ समौ शुद्धौ दन्तीक्वाथेन मर्द्दयेत्। देवपुष्पं त्रागमितं रसपादं तथामृतम्।॥ ४०॥ माषमात्रञ्च तत् सेव्यं नागरेण गुडेन वा। सर्वारोचकशूलार्त्तिमामवातं विनाशयेत्॥ ४१॥ विसूचीमग्निमान्द्यञ्च भक्तद्वेषं सुदारुणम्। रसो निवारयत्येष केशरी करिणं यथा॥ ४२॥

पारा १ तोला, गन्धक १ तोला, लौंग २ तोले, विष और पारा चतुर्थांश अर्थात् तीन-तीन मासे; इन औषधों को दन्ती के क्वाथ में घोटकर उर्द के बराबर गोली बनावे। सोंठ अथवा गुड़ के साथ इसका सेवन करना चाहिये। यह रस सब प्रकार के अरोचक, शूल और आमवात को नष्ट करता है। जिस प्रकार सिंह हाथी को भगाता है वैसे ही यह रसकेसरी विसूचिका, अग्निमान्द्य और घोर अरुचि (भोजन के नाम से भी घृणा हो) को दूर करता है॥ ४०-४२॥

### अरोचक में पथ्य।

गोधूममुद्गारुणशालिषष्टिका मांसं वराहाजशशैणसम्भवम्। चेङ्गो झषाण्डं मधुरालिकेल्लिशः भोष्टी खलीशः कवयी च रोहितः॥ ४३॥ कर्कारुशैत्राम्रनवीनमूलकं वार्ताकुशोभाञ्जनमोचदाडिमम्। भव्यं पटोलं रुचकं घृतं पयो शालानि तालानि रसोनगृञ्जनम्॥ ४४॥ द्राक्षा रसालं नलदाम्बु काञ्जिकं मद्यं रसाला दधि तक्रमार्द्रकम्। कक्कोलखर्ज्जूरभियालतिन्दुकं पक्वं कपित्थं बदरं विकङ्कतम्॥ ४५॥ तालास्थिमज्जा हिमवालुका सिता पथ्या यवानी मरिचानि रामठम्। स्वाद्वम्ललिक्तानि च देहमार्जना वर्गोऽप्ययमुक्तोऽरुचिरोगिणे हितः॥ ४६॥

गेहूँ, मूँग, लाल शालि, साठी के चावल, सूअर, बकरा, हिरन, शशक आदि के मांस, चेङ्ग मछली, मगर के अण्डे, मधुरालिका, इल्लिश, भोष्टी, खलीश, कवयी, रोहित आदि मछलियाँ, ककड़ी, बेत की फुनगी, कच्ची मूली, बैंगन, सहिंजन, केला, अनार, कमरख, परवल, काला नमक, घी, दूध, कच्चे ताड़ फल, लहसन, शिमीकंद, अंगूर, आम, खस का पानी, काँजी, शराब, रसाला, दही, मठा, अदरख, शीतलचीनी, खजूर, पियाल, तिन्दुक, पका हुआ कैथ, बेर, विकङ्कत, ताल की गुठली की मज्जा, कपूर, मिश्री, हरड़, अजवाइन, कालीमिर्च, हींग, खट्टे तथा तीखे सुस्वादु पदार्थ, उबटना, नहाना, शरीर को शुद्ध रखना उपर्युक्त सब बातें अरोचक रोगी के लिए पथ्य हैं॥ ४३-४६॥

### अरोचक में अपथ्य।

कासोद्गारक्षुधानेत्रवारिवेगविधारणम्। अहृद्यान्नमसृङ्मोक्षं क्रोधं लोभं भयं शुचम्॥ ४७॥ दुर्गन्धारूपसेवाञ्च न कुर्यादरुचौ नरः॥ ४८॥

इति भैषज्यरत्नावल्यामरोचकाधिकारः समाप्तः।

खाँसी, डकार, भूख, आँसू, इनके वेगों का अवरोध करना, जो अन्न प्रिय न हों उनका ग्रहण करना, रक्त निकलवाना, क्रोध, लोभ करना, भय, शोक आदि, दुर्गन्ध, कुरूप ये सम्पूर्ण बातें अरोचक रोगी के लिये अपथ्य हैं॥ ४७-४८॥

इति सरयूप्रसादत्रिपाठिविरचितायां भैषज्यरत्नावल्या रत्नप्रभाऽभिधायां व्याख्यायामरोचकाधिकारः समाप्तः॥

---

# अथातीसाराधिकारः।

आमपक्वज्ञान का प्रयोजन।

आमपक्वक्रमं हित्वा नातिसारे क्रिया यतः। अतः सर्वातिसारेषु ज्ञेयं पक्वामलक्षणम् ॥ १ ॥

अतीसार रोग में आम और पक्व अवस्था को बिना जाने हुए, चिकित्सा नहीं की जा सकती है। प्रयोजन यह कि यदि आमातीसार में पक्वातीसार की क्रिया की जाय, अर्थात् ग्राहक औषधियों का प्रयोग किया जाय, अथवा पक्वातीसार में आमातीसार की क्रिया, अर्थात् लंघन आदि की व्यवस्थायें की जावें, तो महान् अनिष्ट हो सकता है। अत. सब प्रकार के अतीसारों में पहले आम और पक्व के लक्षणों को अच्छी तरह समझकर चिकित्सा आरम्भ करनी चाहिए ॥१॥

आम और पक्व के लक्षण।

मज्जत्यामो गुरुत्वाद्विट् पक्वस्तूत्प्लवते जले। विनातिद्रवसंघातं शैत्यश्लेष्ममदूषणात् ॥ २ ॥

आमातीसार में विष्ठा जल में डूब जाती है, और पक्वातीसार में नहीं डूबती। परन्तु अत्यन्त द्रव (पतला) अत्यन्त सहत (कड़ा), अत्यन्त शीतल अथवा कफदूषित होने पर पक्व मल भी जल में डालने से डूब जाता है ॥ २ ॥

आम और पक्व के लक्षणान्तर।

शकृद्दुर्गन्धि साटोपविष्टम्भार्त्तिप्रसेकिनः। विपरीतं निरामन्तु कफात् पक्वञ्च मज्जति ॥ ३ ॥[1]

आमातीसार में मल में दुर्गन्ध आना, पेट का गुड़गुड़ाना, थोड़ा थोड़ा मल निकलना, पीड़ा होना और मुख में लार का अधिक आना ये सब लक्षण होते हैं। एवं पक्वातीसार में उक्त लक्षणों की अपेक्षा विपरीत लक्षण उपस्थित होते हैं।

श्लैष्मिक अतीसार में कफ की गुरुता के कारण, पक्वावस्था में भी मल जल में डूब जाता है ॥३॥

[1] —क्वचित् सामामपक्वेति पाठान्तरम्।

अतीसारचिकित्सा।

आमे विलङ्घनं शस्तमादौ पाचनमेव वा। कार्य्यञ्चानशनस्यान्ते प्रद्रवं लघु भोजनम् ॥४॥ लङ्घनमेकं त्यक्त्वा नान्यदस्तीह भेषजं बलिनः। समुदीर्णं दोषचयं शमयति तत् पाचयत्यपि च ॥ ५ ॥

प्रद्रवं प्रकृष्टद्रवं तच्च लघु एतेन मण्डपेयायवाग्वादिकं सूचितम्। वर्ज्जयेद् द्विदलं शूली कुष्ठी मांसं क्षयी स्त्रियम्। द्रवमम्लमतीसारी सर्वञ्च तरुणज्वरी इत्यत्र द्रवनिषेधोऽविहितदुग्धादिद्रवनिषेधार्थ इति न विरोधः।

आमातीसार में पहले लंघन और पाचन की व्यवस्था करे। लंघन करने के बाद भोजन के लिये अत्यन्त पतली हलकी वस्तु अर्थात् मॉड, पेया और यवागू आदि की व्यवस्था करनी चाहिये। बलवान् मनुष्य के लिये लंघन के समान कोई अन्य औषध नहीं है, क्योंकि लंघन द्वारा दोषों की शान्ति और उनका परिपाक हो जाता है।

प्रश्न—शूल रोग में दाल, कुष्ठ रोग में मांस क्षय रोग में स्त्री, अतीसार में द्रव पदार्थ और अम्लपदार्थ तथा तरुण ज्वर में ये सब पदार्थ त्याज्य हैं, ऐसा अन्यत्र लिखा है। फिर यहां अतीसार में द्रव का विधान क्यों किया ?

उत्तर—उक्त निषेध उन्हीं दुग्ध आदि द्रव पदार्थों के विषय में है, जिनका अतीसार में विधान नहीं है किन्तु मण्ड पेया और यवागू आदि का निषेध नहीं है ॥ ४ ५ ॥

नागरादि कषाय।

नागरातिविषामुस्तैरथवा धान्यनागरैः। कृष्णाशूलातिसारघ्नं पाचनं दीपनं लघु ६॥ शालिपर्णी पृश्निपर्णी बृहती कण्टका-

रिका । बलाश्वदंष्ट्राबिल्वानि पाठानागरधान्यकम् ॥ ७ ॥ एतदाहारसंयोगे हितं सर्वातिसारिणाम् । शालिपर्णीबलाबिल्वैः पृथक्पर्ण्या च साधिता ॥८॥ दाडिमाम्ला हिता पेयापित्तश्लेष्मातिसारिणाम् ॥ ९ ॥

१ सोंठ, अतीस, मोथा मिलाकर २ तोला अथवा धनियां तथा सोंठ मिलाकर २ तोला, इनका विधि से क्वाथ करके तृष्णा, शूल तथा अतीसार अच्छा करने के लिये इस पाचन, दीपन तथा लघु पथ्य को सेवन कराना चाहिये, शालिपर्णी, पृश्निपर्णी, बड़ी कटेरी, छोटी कटेरी, गोखरू, बेल के फल की गिरी, पाठा, धनिया इनके साथ आहार बनाकर अतीसार से पीड़ित रोगियों को भोजन कराना चाहिये। शालिपर्णी, खरेटी, बेल, पृश्निपर्णी से सिद्ध तथा अनार का रस डालकर जरा खट्टी की हुई पेया, पित्त, कफ-जन्य अतिसार में प्रयोग कराना चाहिये ॥६-९॥

धान्यपञ्चकसिद्धो वा धान्यविश्वकृतोऽथवा । आहारो भिषजा योज्यो वातश्लेष्मातिसारिणाम् ॥ १० ॥

वात-कफजन्य अतिसार में धान्यपञ्चक से सिद्ध अथवा धनियां और सोंठ से सिद्ध किये हुए आहार का प्रयोग करना चाहिये ॥ १० ॥

लघुना पञ्चमूलेन वातपित्ते प्रशस्यते । ह्रीवेरशृङ्गवेराभ्यां मुस्तपर्पटकेन वा ॥ आभ्यामेव सपाठाभ्यां सिद्धमाहारमाचरेत् ॥ ११ ॥

लघुपञ्चमूल से सिद्ध आहार वातपित्तातिसार में श्रेष्ठ है। सुगन्धवाला तथा सोंठ से अथवा मोथे तथा पित्तपापड़े से सिद्ध किया हुआ अथवा सुगन्धवाला, सोंठ, मोथा, पित्तपापड़ा तथा पाठा से सिद्ध आहार को अतीसार में प्रयोग करना चाहिये ॥ ११ ॥

ह्रीवेरादि पथ्य ।

ह्रीवेरशृङ्गवेराभ्यां मुस्तपर्पटकेन वा । मुस्तोदीच्यशृतं तोयं देयं वापि पिपासवे १२

सुगन्धवाला और सोंठ अथवा नागरमोथा और पित्तपापड़ा अथवा नागरमोथा और सुगन्धवाला, इन तीन योगों में से किसी एक योग का क्वाथ पिलाने से अतीसार के रोगी की पिपासा शान्त होती है ॥ १२ ॥

युक्तेऽन्नकाले क्षुत्क्षामं लघून्यन्नानि भोजयेत् ॥१३॥ औषधसिद्धाः पेयालाजानां शक्तवोऽप्यतिसारहिताः । वस्त्रप्रस्नुतमण्डः पेया च मसूरयूषश्च ॥ १४ ॥

नियमित रूप से लंघन करने के बाद भूख से पुकारते हुए रोगी को उचित भोजन के समय में लघु अन्न खिलावे। धान्यपञ्चक अथवा पञ्चकोल आदि औषधों से सिद्ध की हुई पेया, धान की खील के सत्तू, वस्त्र से छाना हुआ माड़, पेया और मसूर का यूष, ये सब पदार्थ अतीसार में पथ्य हैं ॥ १३-१४ ॥

न तु संग्रहणं दद्यात् पूर्वमामातिसारिणे । दोषा ह्यादौ रुध्यमाना जनयन्त्यामयान् बहून् ॥ १५ ॥ शोथपाण्ड्वामयप्लीहकुष्ठगुल्मोदरज्वरान् दण्डकालसकाध्मानग्रहण्यर्शोगदांस्तथा ॥ १६ ॥

आमातीसार में पहले संग्राही ( धारक ) औषधियाँ न देवे। प्रयोजन यह कि संग्राही औषधों द्वारा रुके हुए दोष-शोथ, पाण्डु, प्लीहा, कुष्ठ, गुल्म, उदर, ज्वर, दण्डक, अलसक, आध्मान, ग्रहणी और बवासीर आदि बहुत रोगों को उत्पन्न कर देते हैं ॥ १५-१६ ॥

क्षीणधातुबलार्तस्य बहुदोषोऽतिनिःसृतः । आमोऽपि स्तम्भनीयः स्यात् पाचनान्मरणं भवेत् ॥ १७ ॥

जो रोगी धातु और बल के क्षीण हो जाने से दुःखित है, उसके अनेक दोष-युक्त एवं अत्यधिक मल निकल चुके हों, तो आमावस्था में भी स्तम्भन औषधि का प्रयोग करना चाहिए। कारण यह है कि ऐसी अवस्था में पाचन औषध

द्वारा और भी अधिक मल निकलने से रोगी के मरण की संभावना है ॥ १७ ॥

स्तोकं स्तोकं विबद्धं वा सशूलं योऽतिसार्य्यते। अभयापिप्पलीकल्कैः सुखोष्णैस्तं विपाचयेत् ॥ १८ ॥

अतीसार में थोड़ा-थोड़ा बँधा मल निकलता हो और पेट में पीड़ा भी होती हो, तो हड़ और पीपल को पानी में चटनी के समान पीसकर थोड़ा गरम करके सेवन कराना चाहिये। इसके द्वारा दोषों का परिपाक हो जाता है मात्रा ४-६ माशा ॥ १८ ॥

धान्यपञ्चक और धान्यचतुष्क।

धान्यकं नागरं मुस्तं बालकं बिल्वमेव च। आमशूलातिसारघ्नं पाचनं वह्निदीपनम् ॥ १९ ॥ इदं धान्यचतुष्कं स्यात् पैत्ते शुण्ठीं विना पुनः ॥ २० ॥

धनियाँ, सोंठ, नागरमोथा, सुगन्धबाला और बेलगिरी; इन औषधियों का क्वाथ[1] पीने से आमशूल और अतिसार का नाश, दोषों का पाचन और अग्नि का दीपन होता है। पैत्तिक अतिसार में उक्त धान्यपञ्चक में से सोंठ को निकालकर शेष चार औषधों का क्वाथ पिलाना चाहिये। इसको धान्यचतुष्क कहते हैं। मात्रा ५ तोला ॥ १९-२० ॥

नागरातिविषामुस्तैरथवा धान्यनागरैः। तृष्णाशूलातिसारघ्नं पाचनं दीपनं लघु ॥ २१ ॥

सोंठ, अतीस और नागरमोथा; इन तीन औषधों का अथवा धनियाँ और सोंठ, इन दो औषधों का क्वाथ तृष्णा, शूल और अतीसार का नाशक, दोषों का पाचक, अग्नि का दीपक और हलका है। मात्रा-५ तोला ॥ २१ ॥

पक्वोऽसकृदतीसारो ग्रहणीमार्दवाद् यदा। प्रवर्त्तते तदा कार्य्यः क्षिप्रं सांग्राहिको विधिः ॥ २२ ॥

ग्रहणी की (अग्न्यधिष्ठान-नाड़ी-विशेष की) मृदुता के कारण जब पक्वातीसार में निरंतर मल निकलने लगे, तब तत्काल संग्राही (धारक) औषध की व्यवस्था करनी चाहिए ॥ २२ ॥

कञ्चटादि कषाय।

कञ्चटदाडिमजम्बूशृङ्गाटकपत्रह्रीबेरम्। जलधरनागरसहितं गङ्गामपि वेगिनीं रुन्ध्यात् ॥ २३ ॥

जलचौराई की पत्तियाँ, अनार की पत्तियाँ, जामुन की पत्तियाँ, सिंघाड़ा की पत्तियाँ, सुगंधबाला, नागरमोथा और सोंठ, इन औषधों का क्वाथ बनाकर पीने से गङ्गा के समान प्रबल वेगवाला भी अतीसार बंद हो जाता है ॥ २३ ॥

कुटजादि कषाय।

कुटजं दाडिमं मुस्तं धातकी बिल्वबालकम्। लोध्रचन्दनपाठाश्च कषायं मधुना पिबेत् ॥ २४ ॥ सामे शूले च रक्ते च पिच्छास्रावे च शस्यते। कुटजादिरिति ख्यातः सर्वातीसारनाशनः ॥ २५ ॥

अतिसारे दृष्टफलोऽयं योगः।

कुड़े की छाल, अनार का छिलका, नागरमोथा, धाय के फूल, बेलगिरी, सुगन्धबाला, पठानी लोध, लालचंदन और पाढ़, इन औषधों का क्वाथ बनाकर, उसमें आधा तोला मधु मिलाकर पीना चाहिये। यह क्वाथ आम-शूल, रक्तस्राव और मल की पिच्छिलता (मल में चिकने छिछड़े आना) को नष्ट करता है। यह कुटजादि क्वाथ नाम से प्रसिद्ध है और सब प्रकार के अतीसारों को नष्ट करता है ॥ २४-२५ ॥

ग्रन्थकार ने इस योग को अत्यन्त लाभप्रद तथा अनुभूत लिखा है।

वत्सकादि कषाय।

सवत्सकः सातिविषः सबिल्वः सोदीच्यमुस्तश्च कृतः कषायः। सामे सशूले

1—धान्य-पञ्चक और धान्य-चतुष्क के क्वाथ में आधा तोला मधु मिलाने से विशेष लाभ होता है।

सहशोणिते च चिरमवृत्तेऽपि हितोऽतिसारे ॥ २६ ॥

कुड़े की छाल, अतीस, मेलगिरी, सुगंधबाला और नागरमोथा, इन औषधों का क्वाथ आमशूल, रक्तस्राव और अधिक दिनों के अतीसार में लाभदायक होता है । मात्रा ४-५ तोला ॥ २६ ॥

पथ्यादि क्वाथ ।

पथ्यादारुवचामुस्तैर्नागरातिविषान्वितैः । आमातीसारनाशाय क्वाथमेभिः पिबेन्नरः ॥ २७ ॥

हरड़, देवदार, बच, मोथा, सोंठ, अतीस, इनके क्वाथ को आमातीसार की शान्ति के लिये प्रयोग कराना चाहिए । मात्रा-४।५ तोला ॥ २७ ॥

व्यूषणादि चूर्ण ।

व्यूषणातिविषाहिङ्गुवचासौवर्चलाभयाः । पीत्वोष्णेनाम्बुना जह्यादामातीसारमुद्धतम् ॥ २८ ॥

मिरच, पीपल, सोंठ, अतीस, हींग, बच, सोंचर नमक, हरड़, इनका चूर्ण बढ़े हुए अतिसार को नष्ट करता है । मात्रा-२।३ माशा । अनुपान-गरम जल ॥ २८ ॥

कुटजादि क्वाथ ।

कुटजत्वक्फलं मुस्तं क्वाथयित्वा पिबेज्जलम् । अतीसारं जयेदाशु शर्करामधुयोजितम् ॥ २९ ॥

कुड़ा की छाल, इन्द्रजौ, मोथा इनके क्वाथ में मिश्री तथा शहद डालकर सेवन कराने से अतिसार शीघ्र ही नष्ट हो जाता है । मात्रा-४।५ तोला ॥ २९ ॥

कुटजादि क्वाथ ।

कुटजातिविषा मुस्तं हरिद्रा पर्णिनीद्वयम् । सक्षौद्रशर्करं शस्तं पित्तश्लेष्मातिसारिणाम् ॥ ३० ॥

कुड़ा की छाल, अतीस, मोथा, हल्दी, माषपर्णी, मुद्गपर्णी, इनके क्वाथ में शहद, शक्कर डालकर पित्त-कफजन्य अतिसार में सेवन कराना चाहिये । मात्रा ४।५ तोला ॥ ३० ॥

किराततिक्तादि क्वाथ ।

किराततिक्तकं मुस्तं वत्सकं सरसाञ्जनम् । पित्तातिसाररोगघ्नं सक्षौद्रं वेदनापहम् ॥ ३१ ॥

चिरायता, मोथा, इन्द्रजौ, रसौत, मिलाकर २ तोले, पाक के लिये जल ३२ तोले, शेष, ४ तोले, इस क्वाथ में शहद डालकर पीना कष्ट सहित पित्तातिसार में लाभदायक है ॥ ३१ ॥

पथ्यादि क्वाथ ।

पथ्या दारु वचा शुण्ठी मुस्ता चातिविषामृता । क्वाथ एषां हरेत्पीतो वातातीसारमुल्बणम् ॥ ३२ ॥

हरड़, देवदारु, बच, सोंठ, मोथा, अतीस तथा गिलोय का क्वाथ बहुत बढ़े हुए वातातीसार को नष्ट करता है । मात्रा-४ तोला ॥ ३२ ॥

## अथ नाभिप्रलेपाः ।

आमलकालवाल ।

कृत्वालवालं सुदृढं पिष्टैरामलकैर्भिषक् । आर्द्रकस्वरसेनाथ पूरयेन्नाभिमण्डलम् ॥ नदीवेगोपमं घोरमतीसारं निवारयेत् ॥ ३३ ॥

आँवले को जल में पीस कर रोगी की नाभि के चारों ओर थामला ( घेरा ) सा बना देवे फिर उसमें अदरख का रस भर देवे तो नदी के वेग के समान घोर अतीसार रुक जाता है ॥ ३३ ॥

जातीफलप्रलेप ।

तथा जातीफलं पिष्ट्वा नाभौ दद्यात्

प्रलेपनम्। दुर्निवारमतीसारं वारयत्यनिवारितम् ॥ ३४ ॥

जायफल को पीसकर नाभि पर लेप कर देवें। यह लेप कठिन और अत्यन्त बढ़े हुये अतीसार को दूर करता है ॥ ३४ ॥

आम्रकल्कप्रलेप।

आम्रस्य वल्कलं पिष्टं काञ्जिकेन प्रयत्नत ॥ ३५ ॥ नाभिं संलेपयेत्तेन कल्केन मतिमान् भिषक्। नदीवेगोपमं घोरमतीसारं निवारयेत् ॥ ३६ ॥

आम की छाल को काँजी में पीसकर नाभि पर प्रलेप करे तो नदी के वेग के समान घोर अतीसार नष्ट होता है ॥ ३५-३६ ॥

## अथ सामान्यातीसारचिकित्सा।

बिल्वादि क्वाथ।

बिल्वचूतास्थिनिर्य्यूहः पीतः सक्षौद्रशर्करः। निहन्याच्छर्द्यतीसारं वैश्वानर इवाहुतिम् ॥ ३७ ॥

बेलगिरी और आम की गुठली की गिरी, इन दोनों औषधों का क्वाथ बनाकर उसमें शहद और मधु मिलाकर पिलावे। जैसे अग्नि आहुति को नष्ट करता है, वैसे ही यह क्वाथ वमन और अतीसार को तत्काल नष्ट करता है। मात्रा ४ तोला ॥ ३७ ॥

पटोलादि क्वाथ।

पटोलयवधन्याकक्वाथः पेयः सुशीतलः। शर्करामधुसंयुक्तश्छर्द्यतीसारनाशनः ॥ ३८ ॥

परवल, इन्द्रयव और धनियाँ, इन तीनों औषधों के क्वाथ को शीतल करके शक्कर और मधु के साथ पिलावे। यह क्वाथ वमन और अतीसार को नष्ट करता है मात्रा ४ तोला ॥ ३८ ॥

अतीसार में शाखोटकप्रयोग।

ऊर्ध्वाधोवदनेन वल्कलयुगं शाखोटकस्यादरादादायाशु यथाक्रमं कटितटे मौञ्जेन बद्धं गले। हन्त्येतद्युगपत्प्रभूतवमनोत्क्लेशातिसारामयान् योगोऽयं परमेश्वरस्य न कदाप्युल्लङ्घनीयो बुधैः ॥ ३९ ॥

शाखोटक वृक्ष से दो छाल उतार कर उनको ऊपर नीचे मुख करके कटिप्रदेश एवं गले में, बाँधने से वमन, जी मचलाना तथा अतीसार एक साथ नष्ट हो जाते हैं ॥ ३९ ॥

लवङ्गचतुःसम।

जातीफलं त्रिदशपुष्पसमन्वितञ्च जीरञ्च टङ्कनयुतं मुनिभिः प्रणीतम्। एतानि माक्षिकसितासहितानि लीढ्वा आमातिसारमखिलं गुरुमाशु हन्ति ॥ ४० ॥

जायफल, लौंग, जीरा और सोहागा फूला हुआ इनका चूर्ण बनाकर उसमें मधु और चीनी मिलाकर चाटने से प्रबल आमातीसार तत्काल नष्ट होता है ॥ ४० ॥

अहिफेनप्रयोग।

गुञ्जामितमहिफेनं छागदुग्धेन योजितम्। बहुवेगमतीसारं वारयत्याशु निश्चितम् ॥ ४१ ॥ अहिफेनातियोगेन नातिसारो निवर्त्तते। किन्त्वस्य बहुभिर्योगैर्मृतोऽमृत[1] एव स ॥ ४२ ॥

एक रत्ती अफीम को बकरी के दूध में घोलकर पिलाने से बहुत वेगवाला अतीसार तत्काल दूर हो जाता है। अफीम का एक ही बार, अधिक मात्रा में प्रयोग करने से लाभ नहीं होता, प्रत्युत हानि होती है। किन्तु अत्यन्त अल्प मात्रा में बार-बार प्रयोग करने से अमृत के समान लाभदायक होती है ॥ ४१-४२ ॥

---

1 रतिसारो न सिध्यतीति पाठान्तरम्।

## अथ रक्तातीसारचिकित्सा ।

कुडज-दाडिम कषाय ।

कषायो मधुना पीतस्त्वचो दाडिमवत्सकात् । सद्यो जयेदतीसारं सरक्तं दुर्निवारकम् ॥ ४३ ॥

अनार का छिलका और कुड़े की छाल, इन दो औषधों का काथ बनाकर, उसमें मधु मिलाकर पीने से कठिन रक्तातीसार तत्काल नष्ट होता है। मात्रा—२ तोला ॥ ४३ ॥

गुडबिल्व ।

गुडेन खादितं बिल्वं रक्तातीसारनाशनम् । आमशूलविबन्धघ्नं कुक्षिरोगविनाशनम् ॥ ४४ ॥

भुने हुए बेल के गूदे में गुड़ मिलाकर सेवन करने से रक्तातीसार, आम-शूल, विबन्ध और कुक्षि-रोग नष्ट होता है मात्रा—२ तोला ॥४४॥

शल्लक्यादिप्रयोग ।

शल्लकीबदरीजम्बूपियालाम्रार्जुनत्वचः । पीताः क्षीरेण मध्वाढ्याः पृथक् शोणितनाशनाः ॥ ४५ ॥

सलई ( लाख वृक्ष का भेद ), बेर, जामुन, पियाल (चिरौंजी का वृक्ष), आम या अर्जुन, इनमें से किसी एक की छाल को बकरी के दूध में पीस और शहद मिलाकर पीने से रक्तातीसार नष्ट हो जाता है। मात्रा १ मासा ॥ ४५ ॥

जम्ब्वादिस्वरसप्रयोग ।

जम्ब्वाम्रामलकानान्तु पल्लवानथ कुट्टयेत् । संगृह्य स्वरसं तेषामजाक्षीरेण योजयेत् ॥ ४६ ॥ तं पिबेन्मधुना युक्तं रक्तातीसारनाशनम् ॥ ४७ ॥

जामुन, आम और आंवला को पत्तियों को कूटकर स्वरस निकाले और उस स्वरस में बकरी का दूध तथा मधु मिलाकर पीवें, तो रक्तातीसार नष्ट हो जाता है। मात्रा२॥ तोला ॥ ४६-४७ ॥

बिल्वसिद्धदुग्धप्रयोग ।

बिल्वं छागपयः सिद्धं सितामोचरसान्वितम् । कलिङ्गचूर्णसंयुक्तं रक्तातीसारनाशनम् ॥ ४८ ॥

बेलगिरी २ तोले, बकरी का दूध १६ तोले और जल ६४ तोले इन सबको मिलाकर पकावे। दुग्ध-मात्र शेष रहने पर चीनी तथा मोचरस और इन्द्रजव का चूर्ण मिलाकर पान करे तो रक्तातीसार नष्ट होता है ॥ ४८ ॥

"वृद्ध वैद्यों का मत है कि बेलगिरी ६ मासे, सिता ? मासे तथा मोचरस और इन्द्रजव का चूर्ण १ मासा लेना चाहिए" ॥

तण्डुलीयादि प्रयोग ।

ज्येष्ठाम्बुना तण्डुलीयं पीतञ्च ससितं मधु ॥ ४९ ॥ पीत्वा शतावरीकल्कं पयसा क्षीरभुग् जयेत् । रक्तातिसारं पीत्वा वा तया सिद्धं घृतं नरः ॥ ५० ॥

चावलों के जल के साथ चौराई के मूल को पीसकर, उसमें मधु और चीनी मिलाकर, उसके पीने से रक्तातीसार नष्ट होता है। शतावरि के कल्क को दूध के साथ सेवन करे अथवा शतावरि के कल्क के साथ सिद्ध किये हुए घृत का सेवन करे और भूख लगने पर दुग्ध-पान करे, तो रक्तातीसार निवृत्त हो जाता है ॥ ४९-५० ॥

रक्तातिसार पर सर्वोत्तमप्रयोग ।

कुटजस्य पलं ग्राह्यमष्टभागजले शृतम् । तच्चैव विपचेद्भूयो दाडिमोदकसंयुतम् ५१ यावच्चैव लसीकाभं शृतं तदुपकल्पयेत् । तस्यार्द्धकर्षं तक्रेण पिबेद्रक्तातिसारवान् । अवश्यमरणीयोऽपि मृत्योर्याति न गोचरम् ॥ ५२ ॥

( क्वाथदाडिमाम्बुभागाः समाः भागेऽप्यनुक्ते समता विधेया। )

चार तोले कुड़े की छाल को ३२ तोला जल में पकावे। आठ तोला शेष रहने पर, इसी क्वाथ में अनार के फल का रस अथवा छाल व पत्तियों का ८ तोला क्वाथ मिश्रित करके आँचपर रखकर पकावे। 'लमदार' के समान गाढ़ा हो जाने पर उतार कर रख लेवें। आधा तोला इस औषध को तक्र के साथ खावे। इसका सेवन करने से कठिन रक्तातीसार नष्ट हो जाता है। एवं मरणासन्न रोगी भी काल के गाल से बच जाता है मात्रा ४।५ तोला ॥ ५१-५२ ॥

### तिलकल्क।

कल्कस्तिलानां कृष्णानां शर्कराभागसंयुतः। आजेन पयसा पीतः सद्यो रक्तं नियच्छति ॥ ५३ ॥

काले तिलों को जल में पीसकर, उसमें शक्कर मिलाकर, बकरी के दूध के साथ सेवन करे, तो रक्तातीसार तत्काल नष्ट हो जाता है मात्रा-१।२ तोला ॥ ५३ ॥

### बिल्वादिकल्क।

बिल्वाब्दधातकीपाठाःशुण्ठीमोचरसाः समाः। पीता रुन्धन्त्यतीसारं गुडतक्रेण दुर्जयम् ॥ ५४ ॥

गुडेन मधुरीकृतं तक्रं गुडतक्रम्। कल्केन योग इति गोपालदासः।

बेलगिरी, नागरमोथा, धाय के फूल, पाढ़, सोंठ और मोचरस, इन सब औषधों का कल्क बनाकर गुड़ और तक्र के साथ सेवन करे, तो दुर्जय रक्तातीसार नष्ट हो जाता है। मात्रा-६ माशा १ तोला ॥ ५४ ॥

### रसाञ्जनादि चूर्ण।

रसाञ्जनं सातिविषं कुटजस्य फलं त्वचम्। धातकी शृङ्गवेरं च पिबेत् तण्डुलवारिणा। क्षौद्रयुक्तं मयुदन्ति रक्तातीसारमुल्बणम् ॥ ५५ ॥

रसौत, अतीस, इन्द्रजव, कुड़े की छाल, धाय के फूल और सोंठ, इनका चूर्ण लाकर शहद मिले हुए चावलों के धोवन के साथ पीने से घोर रक्तातीसार नष्ट हो जाता है ॥ ५५ ॥

### कुटजक्षीर।

निष्क्वाथ्य मूलममलं गिरिमल्लिकायाः सम्यक् पलद्वितयमम्बुचतुःशरावे। तत्पादशेषसलिलं खलु शोषणीयं क्षीरे पलद्वयमिते कुशलैरजायाः ॥ ५६ ॥ क्षिप्य माषकानष्टौ मधुनस्तत्र शीतले। रक्तातिसारी तं लीढ्वा नैरुज्यमधिगच्छति ॥ ५७ ॥

आठ तोले कुड़े के मूल की छाल को १२८ तोला जल में पकावे, ३२ तोला जल शेष रहने पर इसी क्वाथ में ८ तोला बकरी का दूध मिलाकर फिर पकावे। दुग्ध-मात्र शेष रहने पर उतार लेवे। शीतल होने पर आठ माशे मधु मिलाकर पीने से रक्तातीसार निवृत्त हो जाता है ॥ ५६-५७ ॥

### चन्दनकल्क।

पीत्वा सशर्करं क्षौद्रं चन्दनं तण्डुलाम्बुना। दाहं तृष्णां प्रमेहञ्च सद्यो रक्तं नियच्छति ॥ ५८ ॥

सफेद चंदन को घिसकर, चीनी और मधु मिलाकर चावलों के धोवन के जल के साथ पीने से दाह, तृष्णा, प्रमेह और रक्तातीसार तत्काल नष्ट हो जाता है। मात्रा-३।४ माशा ॥ ५८ ॥

### नवनीतावलेह।

नवनीतं मधुयुतं लिहेद्वा सितया सह। नागकेशरसंयुक्तं रक्तसंग्रहणं परम्। मधुपादं सिताद्धांशं नवनीतं चतुर्गुणम् ॥ ५९ ॥

शहद ४ माशे, चीनी ८ माशे, नागकेसर का चूर्ण ४ माशे और मक्खन २ तोला

मिलाकर सेवन करने से रक्तातीसार निवृत्त हो जाता है। यहाँ मक्खन और शहद को नागकेशर के साथ मिलाकर चाटने से अथवा मक्खन, मिश्री और नागकेसर मिलाकर चाटने से रक्तातीसार नष्ट होता है ॥ ५९ ॥

गुददाहपाकप्रतीकार।

गुददाहे प्रपाके वा पटोलमधुकाम्बुना। सेकादिकं प्रशंसन्ति छागेन पयसाथवा ॥ गुदभ्रंशे तु कर्त्तव्या चिकित्सा तत्प्रकीर्तिता ॥ ६० ॥

मुलेठी और परवल की पत्तियों के क्वाथ से कई बार गुदा के धो डालने से गुदा का दाह एवं उसका पक जाना दोनों ही निवृत्त हो जाते हैं। इसी प्रकार बकरी के दूध[1] से गुदा के सेचन और प्रक्षालन करने से दाह और पाक की शान्ति हो जाती है। परन्तु गुद-भ्रंश रोग के उत्पन्न होने पर गुदभ्रंशाधिकारोक्त चिकित्सा करनी चाहिये ॥ ६० ॥

फलवर्त्ति।

पिष्ट्वा कनकमूलञ्च शक्रजं फणिफेनकम्। वल्लमात्रा कृता वर्त्तिर्मधूच्छिष्टघृतयोगतः ॥ ६१ ॥ हन्याद्गुदगतां क्षिप्रं दाहपाकावसंशयम्। फलवर्त्तिरियं कृत्स्नगुदरोगनिषूदनी ॥ ६२ ॥

धतूरे की जड़, भाँग के बीज और अफीम प्रत्येक को तीन तीन रत्ती महीन पीसकर और उसमें मोम और घृत डालकर खरल करके बत्ती बनावें। इस फलवर्त्ती को गुदा में रखने से दाह और पाक आदि समस्त गुदरोग नष्ट हो जाते हैं ॥ ६१-६२ ॥

नारायणचूर्ण।

गुडूची वृद्धदारश्च कुटजस्य फलं तथा। चित्रकश्चातिविषा चैव भृङ्गराजश्च नागरम् ॥ ६३ ॥ शक्राशनस्य चूर्णञ्च सर्वमेकत्र मेलयेत् ॥ चूर्णमेतत् समं ग्राह्यं कुटजस्य त्वचोऽपि च ॥ ६४ ॥ गुडेन मधुना वापि लेहयेद्भिषजां वरः। शोथं रक्तमतीसारं चिरजं दुर्जयं तथा ॥६५॥ ज्वरं तृष्णाञ्च कासञ्च पाण्डुरोगं हलीमकम्। मन्दानलं प्रमेहञ्च गुदजञ्च विनाशयेत् ॥ एतन्नारायणं चूर्णं श्रीनारायणभाषितम् ॥ ६६ ॥

गिलोय, विधारा, इन्द्रजव, बेलगिरी, अतीस, भांगरा, सोंठ और भांग प्रत्येक का चूर्ण समभाग और सबके बराबर कुड़े की छाल का चूर्ण एकत्रित करके मधु अथवा गुड़ के साथ इस चूर्ण का सेवन करना चाहिये। यह श्रीनारायण भगवान का कहा 'नारायणचूर्ण' शोथ, रक्तातीसार, ज्वर, तृष्णा, कास, पाण्डुरोग, हलीमक, अग्नि-मान्द्य, प्रमेह और बवासीर को नष्ट करता है। मात्रा ३।६ मासा ॥ ६३-६६ ॥

पुटपाकचिकित्सा।

अवेदनं सुसम्पक्वं दीप्ताग्नेः सुचिरोत्थितम्। नानावर्णमतीसारं पुटपाकैरुपाचरेत् ॥ ६७ ॥

तथा अग्नि दीप्त करनेवाले रोगी के वेदनारहित, परिपक्व, अति प्राचीन और अनेक वर्णोंवाले अतीसार की, पुटपाक से बनी हुई औषधियों से चिकित्सा करनी चाहिए ॥ ६७ ॥

कुटज पुटपाक।

स्निग्धं घनं कुटजवल्कमजन्तु दग्धमादाय तत्क्षणमतीव च पोथयित्वा। जम्बूपलाशपुटतण्डुलतोयसिक्तं बद्धं कुशेन च बहिर्घनपङ्कलिप्तम् ॥ ६८ ॥ सुस्विन्नमेतदवपीड्य रसं गृहीत्वा क्षौद्रेण युक्तमति-

---

[1] —अन्य ग्रन्थों में बकरी के दूध में शक्कर और शहद का मिलाना भी लिखा है—
'दाहे पाके हितं छागीदुग्धं सक्षौद्रशर्करम्। गुदस्य क्षालने सेके शुभं पाने च भोजने ॥'

सारवते प्रदद्यात्। कृष्णात्रिपुत्रमतपूजित एष योगः सर्वातिसारहरणे स्वयमेव राजा ॥ ६६ ॥ स्वरसस्य गुरुत्वेन पुटपाके पलं पिबेत्। पुटपाकस्य पाकोऽयं बहिरारुणवर्णता ॥ ७० ॥

कीड़ा (और कीड़ों के भक्षण) आदि से रहित मोटी और चिकने कुड़े की ताज़ी छाल को कूट और चावलों के धोवन-जल में भिगोकर गोल पिण्ड बना लेवे। उसके ऊपर जामुन की पत्तियाँ लपेटे और कुशों से बाँधकर मिट्टी का स्थूल लेप करके पुटपाक करे। पुटपाक को सुपक्व तब माने, जब पुट-पाक का गोला अग्नि में ही बाहर से लाल हो जावे। तदनन्तर उसको आग से निकालकर मिट्टी आदि को अलग करके औषध के रस को निचोड़ लेवे। अतीसार-रोग में थोड़ा मधु मिलाकर १ तोला रस पिलावे। इसकी यह मात्रा—पुटपाक में स्वरस के गुरु होने से कही गई है। इसके सेवन करने से सब प्रकार के अतीसार-रोग नष्ट हो जाते हैं ॥ ६८-७० ॥

श्योनाकपुटपाक।

त्वक्पिण्डं दीर्घवृन्तस्य काश्मरीपत्रवेष्टितम्। मृदावलिप्तं सुकृतमङ्गारेष्वनकूलयेत् ॥ ७१ ॥ स्विन्नमुद्धृत्य निष्पीड्य रसमादाय यत्नतः। शीतीकृतं मधुयुतं पाययेदुदरामये ॥ ७२ ॥

श्योनाक की नरम छाल को पीसकर पिण्डाकार बना लेवे और उस पिण्ड के ऊपर खम्भारी के पत्ते लपेट और कुश से बाँधकर, उसके ऊपर मिट्टी का स्थूल लेप करके पुटपाक करे। उत्तम रीति से सिद्ध होने पर रस निकालकर शहद के साथ पिलावे। इसका सेवन करने से सब प्रकार के प्रबल अतीसार और उदररोग शान्त हो जाते हैं ॥ ७१-७२ ॥

दाडिमपुटपाक।

दाडिमस्य फलं पिष्ट्वा पचेत् पुटविधानतः। तद्रसं मधुसम्मिश्रं पिबेत् सर्वातिसारजित् ॥ ७३ ॥

अनार के फल को पीसकर गोलाकार बनावे और उसके ऊपर जामुन की पत्तियाँ लपेट, और कुश से बाँधकर मिट्टी का मोटा लेप करके पुट पाक करे। उत्तम रूप से सिद्ध होने पर रस निकाल करके मधु मिलाकर पान करे, तो सब प्रकार के अतीसार रोग शान्त होते हैं ॥ ७३ ॥

कुटजलेह।

शतं कुटजमूलस्य क्षुण्णं तोयार्मणे पचेत्। क्वाथे पादावशेषेऽस्मिन् लेहं पूते पुनः पचेत् ॥ ७४ ॥ सौवर्चलयवक्षारबिडसैन्धवपिप्पली। धातकीन्द्रयवाजाजीचूर्णं दत्त्वा पलद्वयम् ॥ ७५ ॥ लिह्यात्क्षौद्रेण संयुतम्। पक्वापक्वमतीसारं नानावर्णं सवेदनम् ॥ दुर्वारं ग्रहणीरोगं जयेच्चैव प्रवाहिकाम् ॥ ७६ ॥

चूर्णं मिलित्वा पलद्वयं ग्राह्यं क्वाथे घनीभूते प्रक्षेपः कार्य्यः।

कुड़े की ४ सेर छाल को कूटकर २५ सेर ४८ तोला जल में पकावे। ६ सेर १६ तोला जल शेष रहने पर छान करके क्वाथ को फिर पकावे। गाढ़ा हो जाने पर काला नमक, जवाखार, विड़नमक, लाहौरी नमक, पीपल, धाय के फूल, इन्द्रजव और जीरा, इन सब औषधों का चूर्ण ८ तोले, अर्थात् प्रत्येक का एक,एक तोला चूर्ण डालकर भलीभाँति मिश्रित करके तीन,तीन मासे की मात्रा में प्रतिदिन मधु के साथ खाना चाहिये। यह कुटज अवलेह पक्वाऽपक्व तथा नाना वर्णों के अतीसार, कठिन ग्रहणी-रोग और प्रवाहिका-रोग को नष्ट करता है ॥ ७४-७६ ॥

कुटजाष्टक।

तुलामथार्द्रां गिरिमल्लिकायाः संक्षुद्य पक्त्वा रसमाददीत। तस्मिन् सुपूते पलसंमितानि श्लक्ष्णानि पिष्ट्वा सह शाल्मलेन ॥७७॥ पाठां समङ्गातिविषां सुमुस्तां बिल्वञ्च पुष्पाणि च धातकीनाम्। प्रक्षिप्य भूयो विपचेत्तु तावद् दार्वीप्रलेपः स्वरसस्तु यावत् ॥ ७८ ॥ पीतस्त्वसौ कालविदा जलेन मण्डेन वाजापयसाथवापि। निहन्ति सर्वंस्त्वतिसारमुग्रं कृष्णं सितं लोहितपीतकं वा ॥७९॥ दोषं ग्रहण्या विविधं च रक्तं पित्तं तथार्शांसि सशोणितानि। असृग्दरञ्चैवमसाध्यरूपं निहन्त्यवश्यं कुटजाष्टकोऽयम् ॥ ८० ॥ तुलाद्रव्ये जलद्रोणे द्रोणे द्रव्यतुला मता ॥ ८१ ॥

प्रागुक्तदार्वीप्रलेपावस्थायां शाल्मलादिचूर्णं प्रक्षेप्यं शाल्मलादीनां प्रत्येकं पलमानम्। शाल्मलं शाल्मलिनिर्यासः अग्निमान्द्ये कोष्णजलेन शृतशीतेन वा इत्यन्ये, वस्तिदुष्टौ भक्तमण्डेन, रक्ते छागदुग्धेन इति भानुदासः ॥

५ सेर कुड़े की छाल को कूट करके २५ सेर ४८ तोले जल में पकावे। ६ सेर १६ तोला जल शेष रहने पर छान करके क्वाथ को फिर पकावे। गाढ़ा हो जाने पर मोचरस, पाढ़ी, छुईमुई, अतीस, नागरमोथा, बेलगिरी और धाय के फूल इनमें से प्रत्येक के चार-चार तोले चूर्ण को मिलाकर उतार लेवे। इसका सेवन करने से सब प्रकार के अतीसार, विविध प्रकार के ग्रहणी-रोग, रक्त-पित्त, खूनी बवासीर, रक्त-प्रदर और अन्यान्य अनेक रोग नष्ट होते हैं। अग्निमान्द्य में किञ्चित् उष्ण अथवा गरम करके ठंडे किये हुए गुनगुने जल के साथ, बस्ति-दोष में भात के मांड के साथ, रक्तस्राव में बकरी के दूध के साथ, इस अवलेह का सेवन करना चाहिये—यह भानुदासजी का मत है। एक तुला अर्थात् ५ सेर द्रव्य में २५ सेर ४८ तोला जल, इसी प्रकार २५ सेर ४८ तोला जल में ५ सेर द्रव्य क्वाथ के लिये डालना चाहिए ॥ ७७-८१ ॥

जीर्णातिसार में बकरी के दुग्ध का प्रयोग।

जीर्णेऽमृतोपमं क्षीरमतीसारे विशेषतः। छागं तद्भेषजैः सिद्धं पेयं वा वारिसाधितम् ॥ ८२ ॥

जीर्णरोग में बकरी का दूध अमृत के समान है और जीर्ण अतीसार में तो विशेष-रूप से लाभदायक है। अतः उपयुक्त औषध अथवा जल के साथ सिद्ध करके इसका सेवन कराना चाहिये ॥ ८२ ॥

## अथ प्रवाहिका चिकित्सा।

बिल्वाद्यवलेह।

बालं बिल्वं गुडं तैलं पिप्पलीविश्वभेषजम्। लिह्याद्वाते प्रतिहते सशूलः सप्रवाहिकः ॥ ८३ ॥

कच्चे बेल की गिरी, गुड़, तिलों का तैल, पीपल और सोंठ का कल्क चाटे, तो वायु के अवरोध और शूल से युक्त प्रवाहिका रोग नष्ट होता है ॥ ८३ ॥

टिप्पणी—जिसको तिल के तैल का अभ्यास है, वही लें।

पिप्पलीकल्क और मरिचकल्क।

पयसा पिप्पलीकल्कः पीतो वा मरिचोद्भवः। त्र्यहात् प्रवाहिकां हन्ति चिरकालानुबन्धिनीम् ॥ ८४ ॥

दो माशे पीपल अथवा दो माशे मिर्च को पीसकर, चार तोले, बकरी के दूध के साथ सेवन करने से बहुत दिनों का पुराना प्रवाहिका रोग नष्ट हो जाता है ॥ ८४ ॥

बालबिल्वादि।

कल्कः स्याद् बालबिल्वानां तिलकल्कश्च तत्समः। दध्नः सरोऽम्लः स्नेहाढ्यः खंडो[1] हन्यात् प्रवाहिकाम् ॥ ८५ ॥ दध्ना ससारेण समाक्षिकेण भुञ्जीतनिश्चारकपीडितस्तु। सुतप्तकुप्यकथितेन वापि क्षीरेण शीतेन मधुप्लुतेन ॥ ८६ ॥

कच्चे बेल की गिरी का कल्क, तिलों का कल्क, खट्टे दही की मलाई और तिलों का तैल, इनमें से प्रत्येक को दो-दो मासे लेकर सेवन करने से प्रवाहिका-रोग नष्ट होता है, और यह योग 'खंड' नाम से प्रसिद्ध है।

मलाई-सहित दही और मधु अथवा कलई किये हुए ताम्रपात्र में अच्छी तरह पकाकर शीतल किए हुए दूध और मधु के साथ इस बिल्वादि अवलेह के सेवन करने से प्रवाहिका रोग नष्ट होता है ॥ ८५-८६ ॥

टिप्पणी—जिनको तैल सेवन का अभ्यास है वही लेवें।

निश्चारक प्रवाहिका।

बिल्वपेशीं गुडं लोध्रं तैलं मरिचयोजितम्। लीढ्वा प्रवाहिकां हन्तिक्षिप्रं सुखमवाप्नुयात् ॥ ८७ ॥

लिये सात सात गोलियाँ का सेवन करे। प्रतिदिन दही के साथ भात खावे। यह श्राभ्र पर्पटिका घटी ग्रहणी-रोग, अतीसार और ज्वर को नष्ट करती है तथा सर्वोत्तम अग्नि-दीपन है॥ ३१२-३१७॥

### अभ्रवटिका।

अथ शुद्धस्य सूतस्य गन्धकस्याभ्रकस्य च। प्रत्येकं कर्षमानं तु ग्राह्यं रसगुणैषिणा॥ ३१८॥ ततः कज्जलिकां कृत्वा व्योमचूर्णं[1] प्रदापयेत्। केशराजस्य भृङ्गस्य निर्गुण्ड्याश्चित्रकस्य च॥ ३१९॥ ग्रीष्मसुन्दरकस्याथ जयन्त्याः स्वरसं तथा। मण्डूकपर्ण्याः स्वरसं तथा शक्राशनस्य च॥ ३२०॥ श्वेतापराजितायाश्च स्वरसं पर्णसम्भवम्। दापयेत् तत्र तुल्यं च विधिवत् कुशलो भिषक्॥ ३२१॥ रसतुल्यं प्रदातव्यं चूर्णं मरिचसम्भवम्। देयं रसार्द्धभागेन चूर्णं टङ्कनसम्भवम्॥ ३२२॥ शुभे शिलामये पात्रे घर्षणीयं प्रयत्नतः। शुष्कमातपसंयोगाद्वटिकां कारयेद्भिषक्॥ ३२३॥ कलायपरिमाणां तु खादेत्तां तु प्रयत्नतः। दृष्ट्वा वयश्चाग्निबलं यथाव्याध्यनुपानतः॥ ३२४॥ हन्ति कासं क्षयं श्वासं वातश्लेष्मभवं रुजम्। परं वाजीकरः श्रेष्ठो बलवर्णाग्निवर्द्धनः॥ ३२५॥ ज्वरे चैवातिसारे च सिद्ध एष प्रयोगराट्। नातः परतरः श्रेष्ठो विद्यतेऽभ्ररसायनात्॥ ३२६॥ चातुर्थके ज्वरे श्रेष्ठः सूतिकातङ्कनाशनः। भोजने शयने पाने नास्त्यत्र नियमः क्वचित्। दधि चावश्यकं भक्ष्यं प्राह नागार्जुनो मुनिः॥ ३२७॥

[1] क्वचिद्व्योमचूर्णमिति पाठान्तरम्—तेषामभ्रे तु कर्षं त्रिकर्षापि प्रक्षेप्यम्।

(शुद्धरसकर्षं १ शुद्धगन्धककर्षं १ कज्जलीं कृत्वा जारिताभ्रकर्षं १ टङ्कनक्षारमर्धतोलकं मिश्रीकृत्य केशराजादीनां स्वरसकर्षेण भावयित्वा छायाशुष्कां वटीं कारयेत्।)

१ तोला पारा और १ तोला गंधक की कज्जली बनाकर, उसमें अभ्रक-भस्म १ तोला, मिर्च १ तोला, सोहागा फूला हुआ आधा तोला मिलाकर केशराज, भृंगराज, सँभालू, चीता, ग्रीष्मसुन्दरशाक, जयन्ती, ब्राह्मी, भाँग, श्वेत अपराजिता (सफेद विष्णुक्रान्ता) और पान, इनमें से प्रत्येक के एक-एक तोले रस की भावना दे, मटर के समान गोलियाँ बनाकर सुखा लेवे। अवस्था, अग्नि, बल और व्याधि के अनुसार अनुपान की व्यवस्था करे। यह 'अभ्रवटिका' कास, क्षय, श्वास और वात-श्लैष्मिक रोगों को नष्ट करती है। वाजीकरण, बल, वर्ण और अग्नि की वृद्धि करती है। ज्वर और अतीसार के लिये यह सिद्ध प्रयोग है। इन रोगों के लिये इस 'अभ्ररसायन' से उत्तम और कोई योग नहीं है। यह अभ्ररसायन चातुर्थिक ज्वर और सूतिका-रोगों को नष्ट करती है। इस औषध के सेवन करने पर भोजन, शयन और जलपान के विषय में कोई नियम नहीं है, किन्तु दही का खाना आवश्यक है, ऐसा 'नागार्जुन' मुनि ने कहा है॥ ३१८-३२७॥

### महाभ्रवटी।

अभ्रकं पुटितं ताम्रं लौहं गन्धकपारदम्। कुनटी टङ्कनं क्षारं त्रिफला च पलं पलम्॥ ३२८॥ गरलस्य तथा मापचतुष्कं चैव चूर्णितम्। तं सर्वं भावयेदेषां रसैः प्रत्येकशः पलैः॥ ३२९॥ देवराजाशनाख्यस्य केशराजाख्यकस्य च। सोमराजस्य भृङ्गाख्यराजस्य श्रीफलस्य च॥ ३३०॥ पारिभद्राग्निमन्थस्य हृद्-

दारस्य तुम्बुरोः । मण्डूकपर्णी निर्गुण्डी पूतिकोन्मत्तकस्य च ॥ ३३१ ॥ श्वेतापराजिताचाश्च जयन्त्याश्चित्रकस्य च । ग्रीष्मसुन्दरकस्याटरूषकस्य रसेन तु ॥ ३३२ ॥ रसैस्ताम्बूलवल्ल्याश्च पत्रोत्थैर्भावयेत् पृथक् । द्रवे किञ्चित् स्थिते चूर्णं मरिचस्य पलं क्षिपेत् ॥ ३३३ ॥ ततश्चैव वटीं कुर्य्यात् मात्रां दद्याद् यथोचिताम् ॥ ज्वरे चैवातिसारे च कासे श्वासे क्षये तथा ॥ ३३४ ॥ सन्निपातज्वरे चैव विविधे विषमज्वरे। क्षयरोगेषु सर्वेषु क्षीणशुक्रे च यक्ष्मणि ॥ ३३५ ॥ ग्रहण्यां चिरजातायां सूतिकायां विशेषतः। शोथे शूले तथाऽसाध्ये स्थाविरे चामवातके॥ ३३६ ॥ मन्दानलेऽबले चैव सकले श्लेष्मजे गदे। पीनसेऽपीनसे चैव पक्वेऽपक्वे विशेषतः॥ ३३७ ॥ वातश्लेष्मणि वाते वा विविधे चेन्द्रियस्थिते । वातरुद्धे हृते पित्ते बलासेनावृतेऽपि च ॥ ३३८ ॥ अष्टसूदररोगेषु कण्ठरोगे प्रशस्यते । अजीर्णे कर्णरोगे च कृशे स्थूले च यक्ष्मणि ॥ ३३९ ॥ अयं सर्वगदेष्वेव रसो वै परिकीर्तितः । महाभ्रवटिका सेयं परं श्रेष्ठा रसायने ॥३४०॥

अभ्रक-भस्म, ताम्रभस्म, लोह-भस्म, गन्धक, पारा, मैनशिल, सोहागा फूला हुआ, हरद, बहेड़ा और आंवला ; प्रत्येक चार-चार तोले और विष ४ माशे ; इन द्रव्यों को भाँग, केशराज, सोमराज, भृङ्गराज, बिल्वपत्र, करहल, अरणी, खिथारा, नेपाली धनिया, सँभालू, पूतिकरंज, धतूरे की पत्तियाँ, श्वेत अपराजिता (सफेद विष्णुकान्ता ), जयन्ती, चित्रक, ग्रीष्मसुन्दरशाक अडूसा और पान ; इनमें से प्रत्येक के चार-चार तोले रस की अलग-अलग भावना देवें । कुछ गीला रहते ही चार तोले मिर्च का चूर्ण बनाकर गोलियाँ बनावे । रोगी का बलाबल देखकर मात्रा की यथोचित व्यवस्था करे । यह 'महाभ्रवटी' ज्वर, अतीसार, कास, श्वास, क्षय, सन्निपात-ज्वर, विविध प्रकार के विषम-ज्वर, सब प्रकार के क्षय-रोग, शुक्र-क्षीणता, यक्ष्मा, पुराना ग्रहणी-रोग सूतिका रोग, शोथ, शूल, असाध्य और पुराना आमवात, अग्नि-मान्द्य, निर्बलता, पीनस अथवा पीनसातिरिक्त पकापक्व, सब प्रकार के श्लैष्मिक रोग, वातश्लैष्मिक, इन्द्रियों में कुपित अनेक प्रकार का वायु, कफावृत पित्त अथवा अनावृत पित्त, आठ प्रकार के उदर-रोग, कण्ठ-रोग, अजीर्ण, कर्ण रोग, कार्श्य-रोग, स्थौल्य रोग और यक्ष्मा आदि सब रोगों में अत्यन्त लाभदायक है । यह 'महाभ्रवटिका' श्रेष्ठ रसायन है । मात्रा—२।३ रत्ती ॥ ३२८-३४० ॥

पीयूषवल्लीरस ।

सूतकं गन्धकं चाभ्रं तारं लौहं सटङ्कनम् । रसाञ्जनं माक्षिकञ्च शाणमेकं पृथक् पृथक् ॥ ३४१ ॥ लवङ्गं चन्दनं मुस्तं पाठाजीरकधान्यकम् । समङ्गातिविषा लोध्रं कुटजेन्द्रयवं त्वचम् ॥ ३४२॥ जातीफलं विश्वबिल्वं कनकं दाडिमच्छदम् । समङ्गा धातकी कुष्ठं प्रत्येकं रससम्मितम् ॥ ३४३ ॥ भावयेत् सर्वमेकत्र केशराजरसैः पुनः । चणकाभा वटी कार्या छागीदुग्धेन पेषिता ॥ ३४४ ॥ अनुपानं प्रदातव्यं दग्धबिल्वसमं गुडम् । अतीसारं ज्वरं तीव्रं रक्तातीसारमुल्बणम् ॥ ३४५ ॥ ग्रहणीं चिरजां हन्ति शोथं दुर्नामकं तथा । आमशूलविबन्धघ्नं संग्रहग्रहणीहरम् ॥ ३४६ ॥ पिच्छामदोषं त्रिविधं पिपासादाहरोगकम् । हृल्लासारोचकच्छर्दि

गुदभ्रंशं सुदारुणम् ॥ ३४७ ॥ पक्वापक्वमतीसारं नानावर्णं सवेदनम् ॥ कृष्णारुणञ्च पीतञ्च मांसधावनसन्निभम् ॥३४८॥ प्लीहगुल्मोदरानाहं सूतिकारोगसङ्करम्। असृग्दरं निहन्त्येव वन्ध्यानां गर्भदं परम् ॥ ३४९ ॥ कामलां पाण्डुरोगञ्च प्रमेहानपि विंशतिम्। एतान् सर्वान्निहन्त्याशु मासार्द्धेनात्र संशयः ॥ ३५० ॥ पीयूषवल्लीवटिका अश्विभ्यां निर्मिता पुरा। कश्यपाय ददेऽश्विभ्यां ततः प्राप प्रजापतिः ॥ ३५१ ॥ धन्वन्तरिस्ततःप्राप देवतानां पतिस्ततः। परम्पराप्राप्त एष रसस्त्रैलोक्यदुर्लभः ॥ ३५२ ॥

पारा, गन्धक, अभ्रक-भस्म, चाँदी-भस्म, लोह-भस्म, सोहागा फूला हुआ, रसोत, स्वर्णमाक्षिक, लौंग, रक्त-चन्दन, नागरमोथा, पाढ़, जीरा, धनियाँ, छुईमुई, अतीस, लोध, कुड़े की छाल, इन्द्र जौ, दालचीनी, जायफल, सोंठ, बेलगिरी, धतूरे के बीज, अनार की पत्तियाँ, आम के फूल और कूट प्रत्येक तीन-तीन माशे इन द्रव्यों को एकत्र चूर्णित करके भाँगरा के रस की भावना देवे। तत्पश्चात् बकरी के दूध के साथ पीसकर चना के समान बटी बनावे। भूने हुए बेल के गूदे और गुड़ के साथ सेवन करना चाहिए। यह पीयूषवल्ली रस अतीसार, जीर्णज्वर, घोर रक्तातीसार, पुरानः ग्रहणीरोग-शोथ, बवासीर, आमशूल, मलबद्धता, आमग्रहणी, छिपेंद्रियुज आमविकार, विविध प्रकार के पित्तमारोग, दाहरोग, मघुली, मरोड़क, वमन, दारुण गुदभ्रंश (काँच निकलना), पक्व अथवा अपक्व, नानावर्णवाला, वेदनायुक्त, कृष्ण और रक्तवर्णवाला अथवा पीला, मांसधोवन के सदृश, अतीसार, प्लीहा, गुल्म, उदर, आनाह, सूतिका के रोगों का मिश्ररोग, रक्तप्रदर, बाँझपन, कामला, पाण्डुरोग और बीस प्रकार के प्रमेह आदि रोगों को पन्द्रह दिन में निःसंदेह नष्ट करता है। इस पीयूषवल्ली रस को पहले अश्विनीकुमारों ने बनाया था। पश्चात् अश्विनीकुमारों ने कश्यपजी को बताया। कश्यपजी से प्रजापतिजी ने पाया। उनसे धन्वन्तरिजी ने पाया और धन्वन्तरिजी से इन्द्र ने पाया। इस परम्परा से इस त्रैलोक्य-दुर्लभ रस की प्राप्ति हुई। मात्रा २।३ रत्ती ॥ ३५१-३५२ ॥

### श्रीनृपतिवल्लभ।

जातीफललवङ्गाब्दत्वगेला टङ्कराम्लम्। जीरकं तेजपत्रञ्च यमानी विश्वसैन्धवाः ॥ ३५३॥ लौहमभ्रं रसो गन्धस्ताम्रं प्रत्येकशः पलम्। मरिचं द्विपलं दत्त्वा छागीक्षीरेण पेषयेत् ॥ ३५४ ॥ धात्रीरसेन वा पेष्यं वटिकाः कुरु यत्नतः। श्रीमद्गहननाथेन विचिन्त्य परिनिर्मितः॥ ३५५ ॥ सूर्यवर्चजसा जातं रसो नृपतिवल्लभः। अष्टादश वटीः खादेत् पवित्रः सूर्यदर्शकः ॥ ३५६ ॥ हन्ति मन्दानलं सर्वमामदोषं विसूचिकाम्। प्लीहगुल्मोदराष्ठीलायकृत्पाण्डुत्वकामलाम् ॥ ३५७ ॥ हृच्छूलं पृष्ठशूलं च पार्श्वशूलं हलीमकम्। कटीशूलं कुक्षिशूलमानाहमष्टशूलरम् ॥ ३५८ ॥ कासश्वासामवातांश्च श्लीपदं महदर्बुदम्। गलगण्डं गण्डमालामम्लपित्तञ्च गर्दभी ॥ ३५९ ॥ कृमिकुष्ठानि दद्रूणि वातरक्तं भगन्दरम्। उपदंशमतीसारं ग्रहण्यर्शः प्रमेहकम् ॥ ॥ ३६० ॥ अश्मरीं मूत्रकृच्छ्रञ्च मूत्राघातं सुदारुणम्। ज्वरं जीर्णं तथा पाण्डुं तन्द्रालस्यं भ्रमं क्लमम् ॥ ३६१ ॥ दाहञ्च विश्रंधि हिक्कां जडगद्गदमूकताम्। मूढञ्च स्वरभेदञ्च अम्लवृद्धिविसर्पकान् ॥३६२॥

ऊरुस्तम्भ रक्तपित्तं गुदभ्रंशारुचिं तृषाम्। कर्णनासामुखोत्थांश्च दन्तरोगांश्च पीनसान् ॥ ३६३ ॥ स्थौल्यञ्च शीतपित्तञ्च स्थावरादिविषाणि च। वातपित्तकफोत्थांश्च द्वन्द्वजान् सान्निपातिकान् ॥ ३६४ ॥ सर्वानेवगदान् हन्ति चण्डांशुरिव पापहा। बलवर्णकरो हृद्य आयुष्यो वीर्य्यवर्द्धनः ॥ ३६५ ॥ परं वाजीकरः श्रेष्ठः पटुदो मन्त्रसिद्धिदः। अरोगी दीर्घजीवी स्याद्रोगी रोगाद्विमुच्यते। रसस्यास्य प्रसादेन बुद्धिमान् जायते नरः ॥ ३६६ ॥

जायफल, लौंग, नागरमोथा, दालचीनी, छोटी इलायची के बीज, सोहागा फूला हुआ, हींग, जीरा, तेजपात, अजवाइन, सोंठ, लाहौरी नमक, लोह-भस्म, अभ्रक भस्म, पारा, गन्धक और ताम्र भस्म प्रत्येक चार चार तोले और मिर्च ८ तोले, इन द्रव्यों को बकरी के दूध के साथ अथवा आँवले के रस के साथ पीसकर वटी बना लेवे। इस नृपतिवल्लभरस को, सूर्य के समान तेजस्वी श्रीमान् गहननाथजी ने विचार कर बनाया है। प्रातःकाल सूर्योदय के समय स्नान आदि द्वारा पवित्र होकर, १८ वटिकायें खाई जायें। इस नृपति-वल्लभ रस के सेवन करने से अग्निमान्द्य, सब प्रकार के आम दोष, विसूचिका, प्लीहा, गुल्म, उदर, अष्ठीला, यकृत, पाण्डुरोग, कामला हृदय शूल, पृष्ठ शूल, पार्श्व शूल, हलीमक, कटि शूल, कुक्षि-शूल, आनाह, आठ प्रकार के शूल, कास, श्वास, आमवात, श्लीपद, शोथ, अर्बुद, गलगण्ड, गण्डमाला, अम्लपित्त, गर्दभी,[1] कृमि, कुष्ठ, दद्रु, वातरक्त, भगन्दर, उपदंश, अतीसार, ग्रहणी, बवासीर, प्रमेह, पथरी, मूत्रकृच्छ्र, घोरमूत्राघात, जीर्ण-ज्वर, पाण्डुरोग, तन्द्रा, आलस्य, भ्रम, वमन, दाह, विद्रधि, हिक्का, जड़ता, गद्गदता (गिड़गिड़ाना), मूकता, मूढ़ता, स्वर भेद, नयन-रोग, वृद्धि (अण्डवृद्धि), विसर्प रोग ऊरुस्तम्भ, रक्तपित्त, गुदभ्रंश (काँच निकलना), अरुचि, तृषा, कर्णरोग, नासा रोग, मुखरोग दन्त रोग, पीनस, स्थूलता, शीत पित्त और स्थावर आदि विष तथा वातज पैत्तिक, श्लैष्मिक, द्वन्द्वज और सान्निपातिक समस्त रोग इस प्रकार नष्ट हो जाते हैं, जैसे सूर्य भगवान् द्वारा जगत् का समस्त अन्धकार नष्ट हो जाता है। एवं यह रस बल, कान्ति, आयु और वीर्य को बढ़ानेवाला, हृदय के लिये लाभदायक, श्रेष्ठ वाजीकरण, प्रवीणता और मन्त्र सिद्धि का दाता है। एवं स्वस्थ पुरुष इस रस के सेवन करने से दीर्घजीवी और रोगी पुरुष स्वस्थ तथा इस रस के प्रभाव से मनुष्य बुद्धिमान् होता है[1] ॥ ३६१-३६६ ॥

बृहन्नृपवल्लभ।

रसगन्धकलौहाभ्रं नागं चित्रं च मुस्त[2]कम्। टङ्कं जातीफलं हिङ्गु त्वगेलावह्निवङ्गकम् ॥ ३६७ ॥ तेजपत्रमजाजी च यमानी निशसैन्धवम्। प्रत्येकं तोलकं चूर्णं तथा मरिचताम्रयोः ॥ ३६८ ॥ निष्कस्थरमृतं हेम मधा माषचतुष्टयम्[3]। आर्द्रकस्य रसेनैव धात्र्याश्च स्वरसैस्तथा ॥ ३६९ ॥ भावयित्वा प्रदातव्यं चणमात्रं[4] भिषग्वरैः। भक्षयेत् प्रातरुत्थाय पथ्यं भक्तं यथोचितम् ॥ ३७० ॥ अग्निमान्द्यमजीर्णञ्च दुर्नामग्रहणीं जयेत्। आमाजीर्णप्रशमनं सर्व

---

१—यह पुंस्त्वरोग विशेष है। लक्षण यह है— मध्यदेशे वृषणमुष्कं तत्र पिडिकाचितम्। रक्ताकारी गर्दभिका ता विद्याद्वातपित्तजाम् ॥

१ इसकी गोली आधी आधी रत्ती की बनानी चाहिये प्रथम् क्रमशः बढ़ाकर १८ गोली तक सेवन कराना लाभदायक है।

२—'नाग चित्र त्रिकण्टकम्' इति पाठान्तरम्।

३—'दाडिमत्वक्कम्' इति पाठान्तरम्।

४—'माषद्वयप्रमाणेन' इति ग्रन्थान्तरमतम्।

रोगनिषूदनम्। नाशयेदोदरान् रोगान् विष्णुचक्रमिवासुरान् ॥ ३७१ ॥

(ग्रन्थान्तरेऽस्य राजवल्लभसंज्ञा)

पारा, गन्धक, लौह भस्म, अभ्रक-भस्म, नाग-भस्म, चीता, नागरमोथा, सोहागा फूला हुआ, जायफल, हींग, दालचीनी, छोटी इलायची के बीज, चीता की जड़, वङ्गभस्म, तेजपात, जीरा, अजवाइन, सोंठ, लाहौरी नमक, मिर्च और ताम्र भस्म प्रत्येक का एक-एक तोला चूर्ण तथा निरुत्थ स्वर्ण-भस्म ४ माशे, इन द्रव्यों को अदरख के रस और आँवला के स्वरस में भावित करके चना के समान गोलियाँ बना लेवे। पर प्रातःकाल इस रस का सेवन करे। यथोचित (हितकर) पथ्य भोजन करते इस वृहन्नृपवल्लभ रस के सेवन करने से अग्नि-मान्द्य, अजीर्ण, पथरी, संग्रहणी, आमा-जीर्ण आदि सब रोग नष्ट हो जाते हैं। जैसे सुदर्शन-चक्र द्वारा असुरों का विनाश हो गया है, वैसे ही यह रस समस्त पेट के रोगों को नष्ट कर देता है मात्रा—२ रत्ती ॥ ३६७-३७१ ॥

(ग्रन्थान्तर में इस रस का राजवल्लभ नाम है)

अजाज्यादिचूर्णं।

पलद्वन्द्वमजाज्यास्तु पलैकं यमानीकम्। अम्बुदं द्विपलं ज्ञेयं फणिफेनपलं तथा ॥ ३७२ ॥ अर्कमूलभवं चूर्णं चतुःपलमितं स्मृतम्। अजाज्यादिरयंतद्धि हन्त्युग्रं ग्रहणीमिदम् ॥ ३७३ ॥ सर्वरूपां सातिसारां गुदामयम्। ज्वरातिसारं नाशयेद्विसूचीं पाकपि-त्तीम् ॥ ३७४ ॥

जीरा ८ तोले, अजवाइन ४ तोले, नागरमोथा ८ तोले, अफीम ४ तोले और आक के मूल का चूर्ण १६ तोले, इनका चूर्ण करके रख लेवे। यह अजाज्यादि चूर्ण उग्र संग्रहणी रोग, सब प्रकार और ... सहित घोर ज्वरातिसार ... तथा

घोर विसूचिका रोग को नष्ट करता है। इसकी मात्रा ३।४ रत्ती है ॥ ३७२-३७४ ॥

रसपर्पटी।

श्रीविन्ध्यवासिपादान् नत्वा धन्वन्तरिञ्च सुरभिषजम्। रसगन्धकपर्पटिकापरिपाटीपाटवं वक्ष्ये ॥ ३७५ ॥ मग्नं रसे जयन्त्याः पश्चादेरण्डसंभूते। आर्द्रकरसे च सूतं घनरसे काकमाच्याश्च ॥ ३७६ ॥ मग्नमुदितानुपूर्व्या मर्दनशुष्कं करेण गृह्णीयात्। प्रस्तरभाजनमध्ये शुद्धिरियं पारदस्योक्ता ॥ ३७७ ॥ शुकपुच्छसमच्छायो नवनीतसमद्युतिः। मसृणः कठिनः स्निग्धः श्रेष्ठो गन्धक इष्यते ॥ ३७८ ॥ कृत्वा भद्रं गन्धकमतिपुंगलः शुद्धतण्डुलाकारम्। तद्भृङ्गराजरसान्तरं भावयेत् पात्रे ॥ ३७९ ॥ तदनु च शुष्कं कुर्याद् धूलिसमानञ्च सत्वरं रौद्रे। तदनु च शुष्कं चूर्णं कृत्वा विन्यस्य लौहिकामध्ये ॥ ३८० ॥ निर्धूमबदरकाष्ठाङ्गारे न्यस्तं विलाप्य तैलसमम्। पात्रस्थितभृङ्गराजरसमध्ये ढालयेन्निपुणः ॥ ३८१ ॥ तस्मिन् मणिष्मात्र कठिनतरं याति गन्धकचूर्णम्। पुनरपि रौद्रे शुष्कं चैतत्तनुना समानतां नीतम् ॥ ३८२ ॥ शुद्धे मृते ... तुल्यता ... सर्वगतोऽपि रसयो मृते ॥ ३८३ ॥ पश्चात् ... चूर्णं लौहीभिर्वं ... निर्धूमबदरकाष्ठाङ्गारे न्यस्तं विलाप्य तैलसमम् ॥ ३८४ ॥ ... ...

शिष्टं कठिनं तत्र गृहीतव्यम् ॥ ३८५ ॥ पश्चात्पर्पटीरूपा पर्पटिका कीर्त्यते लोकैः । मयूरचन्द्रिकाकारं लिङ्गं यत्र तु दृश्यते ॥ ३८६ ॥ तत्र सिद्धं विजानीयाद्वैद्यो नैवात्रसंशयः । सपुदितपात्रे भरणा मदनीया पर्पटी मनुजैः ॥ ३८७॥ जीरकगुञ्जे हिङ्गोरर्द्धं खादेच्च वातले जठरे । जीरकहिङ्ग्वो रसेन त्वनुपानं सलिलधारया कार्य्यम् ॥ ३८८ ॥ रसगन्धकपर्पटिका भक्षणमात्रे तु नाम्भसः पानम् । प्रथमं गुञ्जायुगलं प्रतिदिनमेकैकवृद्धितो भक्ष्यम् ॥ ३८९ ॥ दशगुञ्जापरिमाणान्नाधिकमदनीयमेकविंशतिदिनानि । वातातपकोपमनशिषन्तन्माहारसमयवैपम्यम् ॥ ३९० ॥ व्यायामश्चायासः स्नानं व्याख्यानमहितमत्यन्तम् । पाके स्तोकं सर्पिर्जीरकधन्याकवेशवारैश्च ॥ ३९१ ॥ सिन्धुद्रवेन रन्धनमोदनधान्यानि शालयो भक्ष्याः । कृष्णं वार्त्तिकुफलमविद्धकर्णा[2] च वास्तूकम् ॥ ३९२ ॥ अच्तपुष्पुगसहितं फलदलसहितो पटोलश्च । क्रमुकफलमृङ्गवेरौ भक्ष्यौ शाकेषु काकमाची च ॥ ३९३ ॥ लावकचकोरतित्तिरमयूरमांसञ्च हिततरं भवति । मद्गुररोहितमीनावदनीयौ[1] कृष्णमत्स्याश्च ॥ ३९४ ॥ नीरक्षीरं व्यञ्जनमदनीयं पक्कदलञ्च । रम्भाफलदलवल्कलमूलानां वर्जनं कार्य्यम् ॥ ३९५ ॥ तिक्तं निम्बादिकमपि नाद्यं नोष्णं तथाम्लञ्च । आनूपमांसजलचरपतत्रिपलञ्च सर्वथा त्याज्यम् ॥ ३९६ ॥ स्त्रीणां सम्भाषणमपि गडकश्च कृष्णमत्स्येषु । नाम्लं न दधि शाकं पर्पट्या भक्षणे भक्ष्यम् ॥ ३९७ ॥ गुडखण्डशर्करादिक इक्षुविकारो न भक्ष्य इक्षुश्च । न दलं न फलं न लताप्यदनीया कारवेल्लस्य ॥ ३९८ ॥ स्तोकं घृतमिह भक्ष्यं पथ्ये साकांक्षमुत्थानम् । क्षुत्पीडायां भोजनमवश्यकार्य्यं महानिशायाञ्च॥३९९॥ समजलमिश्रं पक्वं क्षीरं यद्वाधिकजलपकञ्च। कथमपि भोजनसमयातिक्रमजाते ज्वरे विरेके च ॥ ४०० ॥ वमने च नारिकेलसलिलं दुग्धञ्च पातव्यम । स्वप्ने जाते रमिते विरेकतः क्षीरमेव पातव्यम्॥४०१॥ न ज्ञायते बुभुक्षालक्षणलक्षया प्रतीयते यदि वा । अशक्तिभिर्भिनिभिर्निमस्तकशूलाद्यैर्नूनमवधार्य्या ॥ ४०२ ॥ किं बहुनास्यं रोगी यदा यदा भवति साकांक्षः । पाययितव्यं दुग्धं तदा तदा निर्भयीभूय ॥ ४०३ ॥ विहिताऽकरणे चास्याम विहितकरणे च रोगविज्ञानाम । व्यापत्तयोऽपि बहुधा दृष्टाः भामाखिकैर्बहुशः॥ ४०४ ॥ तस्मादवधातव्यं भवितव्यं भोजने निपुणैः । एवमियं क्रियमाणा भवति श्रेयस्करी नियतम् ॥ ४०५ ॥ अर्शोरोगं ग्रहणीं सामां शूलातिसारौ च । कामलपाण्डुव्याधिं प्लीहानञ्चातिदारुणं हन्ति ॥४०६॥ गुल्मजलोदर भस्मकरोगं हन्त्यामवातांश्च । अष्टादशैव कुष्ठान्यपशोषशोथादिरोगांश्च ॥४०७॥ इयमम्लपित्तशमनी त्रिदोषदमनी क्षुधातिकमनीया ।

1 पेशाचारः=श्येनपक्षे पिशमांसे च ।
2 वार्त्तिकुन =वार्त्ताकुवृक्षे ( बैंगन का वृक्ष )।
3 सरपभेदः

अग्नि निमग्नमुदरे ज्वालाजटिलं करोत्याशु ॥४०८॥ रसगन्धकपर्पटिका स्वपवार्य्य व्याधिसंघातम्। वलीपलितशून्यं पुरुषं दीर्घायुषं कुरुते ॥ ४०९ ॥ व्याधिप्रभावहरणादपमृत्युत्रासनाशकरणाच्च। मर्त्यानाममृतघटी रसगन्धकपर्पटी जयति ॥४१०॥ शम्भुं प्रणम्य भक्त्या पूजां कृत्वा च विष्णुचरणाब्जे। रसगन्धकपर्पटिका भक्षया तेनातिसिद्धिदा भवति ॥ ४११ ॥ नृणां ससरुजां ध्रुवमियमारोग्यं सततशीलिता कुरुते। श्रीवत्साङ्कविलिम्पितसम्यग्रसपर्पटी श्रेष्ठा ॥४१२॥ उक्तमेव हि कर्तव्यं नातुरागतया सधा। औषधक्रिययैवात्र कर्तव्या बीतरक्रिया ॥ ४१३ ॥ भत्यवायविनाशार्थं क्षेत्रपालनलिं न्यसेत्। कृतमङ्गलरुः मातर्योगिनीनामतः परम् ॥ ४१४ ॥

भक्षणपूर्वं बलिदानमन्त्रो यथा 'ॐ क्षां क्षें क्षेत्रपालाय नमः'। इति क्षेत्रपालस्य सामान्यबलिमन्त्रः। 'ॐ ह्रीं ह्रूँ दिव्याभ्यो योगिनीभ्यो मातृभ्यः खेत्रीभ्यो भूतेभ्यः शाकिनीभ्यो नमो नमो ह्रीं।' इति सामान्ययोगिनीनां बलिमन्त्रः। ॐ गन्धकमहाकालाय स्वाहा। ॐ ब्रह्मकोपिणि रक्त रक्त स्वाहा।' इति विशेषबलिमन्त्रः।

अत्र पारदस्य नैसर्गिकदोषत्रयशोधनमावश्यकं कार्य्यम्।

तदुक्तम्—यदुक्तं मलशिखिविषनामानो रसस्य नैसर्गिका दोषाः। मूर्च्छां मलेन कुरुते शिखिना दाहं विषेण हिकाञ्च ॥ ४१५ ॥ गृहकन्या हरति मलं त्रिफला वह्निं चित्रकश्च विषम्। तस्मादेभिर्वारान् संमूर्च्छयेत् सप्त सप्तेन इति ॥ ४१६ ॥ गृहकन्या घृतकुमारी तस्या दलरसेन खञ्जनम्।

(त्रिफलायाश्चूर्णेन खञ्जनम्। चित्रकस्य पत्ररसेन मूर्च्छनम्। तदैव नैसर्गिकदोषापहारानन्तरं जयन्त्यादिद्रव्यचतुष्टयरसेन मूर्च्छनमधिगन्तव्यम्।)

श्रीमती विन्ध्यवासिनी देवी और सुरवैद्य धन्वन्तरिजी को नमस्कार करके रस और गन्धक की पर्पटी बनाने की रीति कहता हूँ।

पहले यह बता देना आवश्यक है कि मल, वह्नि और विष ये तीन पारद के नैसर्गिक दोष हैं। पारद मल-दोष से मूर्च्छा, वह्निदोष से दाह और विष दोष से हिक्का उत्पन्न करता है। अतः रस पर्पटी सिद्ध करने के पहले, पारद के मल दोष, वह्निदोष, और विष दोष को दूर करना आवश्यक है।

उन दोषों को दूर करने की रीति यह है कि—४ तोले पारद को लेकर, घृतकुमारी (घीकुआँर) के रस में घोटने से पारद का मलदोष दूर हो जाता है। इसी प्रकार त्रिफला के चूर्ण के साथ घोटने से वह्नि दोष और चीता की पत्तियों के रस में घोटने से विष दोष दूर होता है। इस रीति से पारद के दोषों के दूर करने के बाद पारद को पत्थर के खरल में रखकर, क्रमशः जयन्ती की पत्तियों के रस में, एरंड की पत्तियों के रस में, भङ्गरैया के रस में और मकोय की पत्तियों के रस में डुबो डुबोकर इतनी घोटाई करे कि जिससे उक्त औषधों के रस शुष्क हो जावें। इस प्रकार शुद्ध किया हुआ पारद रसपर्पटी के बनाने योग्य होता है।

इस पारद में मिलाने के लिये ऐसा गन्धक लेना चाहिए, जो तोते की चोंच के समान कान्तिमान्, मक्खन के समान प्रभावान् चिकना,

कठोर और स्निग्ध हो। क्योंकि ऐसा ही गन्धक श्रेष्ठ माना गया है।

ऐसे गन्धक को ४ तोले लेकर, चावलों के समान छोटे छोटे टुकड़े करके ७ बार भाँगरा के रस की भावना देवे, और प्रतिबार धूप में रखकर शुष्क करे। उसके बाद धूल के समान चूर्ण बनाकर बेर की लकड़ी के निर्धूम अंगारों की आँच से लोहे की कड़ाही में गलाकर भाँगरा के रस में डाले। उसमें डालते ही गन्धक कड़ा हो जाता है। उसको घाम में सुखाकर और भलीभाँति खरल करके केतकी के रज के समान चूर्ण बना लेवे।

उक्त रीति से शुद्ध किये हुए पारद में समभाग शुद्ध गन्धक का चूर्ण मिलाकर, तब तक मर्दन करे, जब तक पारद के कण अदृश्य न हो जाय। पश्चात् उत्तम कज्जली के सिद्ध होने पर लोहे की कड़ाही में उस कज्जली को डालकर बेर की लकड़ी के निर्धूम अंगारों की आँच से गलाकर तेल के समान करे। तदनन्तर गौ के ताजा गोबर पर केला का पत्ता रखकर उस पर कज्जली की द्रुति को पतली पतली फैला देवे, और ऊपर भी केले के पत्तों से ढक करके उसके ऊपर गोबर रख देवे। थोड़े समय के बाद पापड़ के समान दोनों पत्तों के बीच में जमी हुई रस पर्पटी को निकाल लेवे। गली हुई कज्जली का जो अंश कठिन होकर कड़ाही में लगा रह जाता है, उसको न लेना चाहिये। जिस पर्पटी में मयूरपिच्छ की चन्द्रिका के समान चमक हो, उस पर्पटी को वैद्यगण लोग निःसन्देह सिद्ध जानें। एवं शास्त्रोक्त शुभ मुहूर्त भरणी नक्षत्र में इस पर्पटी को बनाना और सेवन करना चाहिये।

वातोदर रोग में २ रत्ती जीरा और १ रत्ती हींग के साथ सेवन करे। जीरा और हींग के साथ पर्पटी का सेवन करने पर शीतल जल पीना चाहिए। केवल पर्पटी के सेवन करने पर जल पीना आवश्यक नहीं है। पहले दिन दो रत्ती की मात्रा रखना तदनन्तर प्रतिदिन एक एक रत्ती मात्रा बढ़ाकर दस रत्ती तक ले जाया करे। दस रत्ती से अधिक मात्रा में सेवन करना उचित नहीं है। इस प्रकार ४१ दिन पर्यन्त इस औषध के सेवन करने का नियम है।

रसपर्पटी के सेवन करने के समय वायुसेवन, धूपसेवन, क्रोध, अधिक चिन्ता, भोजन समय पर न करना, व्यायाम, परिश्रम, स्नान और अधिक बोलना, ये सब वर्जित हैं। घी, जीरा, धनिया, और लाहौरी नमक से संस्कृत व्यञ्जन आदि, शालि धान के चावलों का भात, काला बैंगन, पाठा का शाक, बथुआ का शाक, चीड़ा आदि द्वारा भिगा खाई हुई मूँग, परवल के फल तथा पत्र-सहित परवल, सुपारी, अदरख, मकोय का शाक, लावा, बटेर, तित्तिर और मयूर के मांस मद्गुर ( माँगुर ), रोहू, काले वर्ण की मछली और जल मिश्रित करके सिद्ध किया हुआ दुग्ध ये सब पदार्थ पथ्य हैं।

पका हुआ केले का फल, केले का पत्ता, केले का बकला, केले का मूल, निम्ब आदि कड़वे द्रव्य, उष्ण जल, जलप्राय देश में रहनेवाले पशुओं का मांस, जलचर पक्षियों का मांस, काली मछलियों में से गड़क मछली का मांस, ये सब सर्वथा त्याज्य हैं। अम्ल ( खट्टे ) द्रव्य, खट्टा दही और पापड़ी का शाक ये सब पदार्थ त्याज्य हैं। एवं स्त्री के साथ सम्भाषण भी न करना चाहिए। गुड़, खाँड और शक्कर आदि इक्षुविकार और ईख, इनका भी सेवन न करना चाहिये। कोले का पत्र, फल और डंठल आदि सब त्याज्य हैं। एवं घृत थोड़ा थोड़ा खाना चाहिए। भूख लगने पर भोजन अवश्य करना चाहिए। यदि आधी रात में भूख लगे, तो भी तत्काल भोजन करना चाहिए। यदि भोजन के समय के अतिक्रमण हो जाने से किसी प्रकार ज्वर आ जावे, अथवा दस्त होने लगे, तो दूध में समभाग अथवा अधिक जल मिला करके पकाकर पीना चाहिए। यदि वमन होता हो, तो नारियल का जल मिलाकर दूध पीवे। यदि स्मरण दोष से धातु क्षीण होता हो, तो दूध पीना चाहिए। भूख है, या नहीं, इसका यदि ठीक परिज्ञान न हो, तो शरीर की अस्वस्थता, कुलकुली और सिर की

पीड़ा आदि से [मूत्र का होना निश्चित करके भोजन कर लेना चाहिए। अधिक तथा रोगी को जब भोजन करने की इच्छा हो, तभी निर्भय होकर दुग्ध पिलाया करे। उक्त आहार-विहार के परित्याग करने से और अनुक्त आहार-विहार के सेवन करने से;-उस मनुष्य को विषम व्याधियाँ उपस्थित हो जाती हैं। इस कारण जो उक्त आहार-विहार आदि का निश्चय करके भोजन के विषय में सावधान रहकर, इसका सेवन करता है, उसको यह पर्पटी अवश्य लाभ-दायक होती है। यह रसपर्पटी बवासीर, आम-दोष-युक्त ग्रहणी, शूल, अतीसार, कामला, पाण्डु रोग, मांस धारण, प्लीहा, गुल्म, जलोदर, भस्मक, धनुर्वात, १८ प्रकार के कुष्ठ और सब प्रकार के शोथ आदि रोगों को नष्ट करती है। यह पर्पटी अम्लपित्त को शान्त, त्रिदोष का दमन, बुभुक्षा की वृद्धि और अग्नि को तत्काल दीप्त करती है।

एवं व्याधि-समूह को दूर करके पुरुष को वली ( शरीर की त्वचा में झुर्रियाँ पड़ना ), पलित ( बाल पकना ) रहित और दीर्घायु करती है। व्याधियों के प्रभाव का हरण और अपमृत्यु के भय को नष्ट करने से यह रसगंधक-पर्पटी अमृत की घटी ( अमृत भरी कलशी ) के समान है। अतएव यदि शिव और विष्णु का पूजन तथा अभिवादन करके इस रसगंधक पर्पटिका का सेवन करे, तो यह पर्पटी अत्यन्त लाभकारक होती है। यह उत्तम रस-पर्पटी श्रीवत्साङ्क ( विष्णु ) निर्मित है, अतएव यह निरंतर सेवित होने पर रोगियों को अवश्य आरोग्य करती है। विविध प्रकार का विषमरोग होने पर भी यथोक्त आचरण करना चाहिए। औषध सेवन करने के साथ ही निम्नलिखित क्षेत्रपाल-बलि आदि क्रियाओं को भी करना आवश्यक है। अपमृत्यु की निवृत्ति के लिये प्रातःकाल स्नान पुण्याहवाचन आदि मांगलिक कृत्यों को करके क्षेत्रपाल और योगिनी के अर्थ बलि देवे। औषध-भक्षण करने के पूर्व, क्षेत्रपाल और योगिनी के लिये आठ श्लोकों में कहे हुए सामान्य और विशेष बलि के मन्त्रों से बलि-प्रदान करनी चाहिए॥ ३७३-४१५॥

ताम्र पर्पटी।

प्रत्येकं दश गद्याणान् शुद्धगन्धक सूतयोः। मृतताम्रस्य पञ्चैव खल्वेवं पञ्चविंशतिम्॥ ४१७॥ क्षिप्त्वा सम्मर्दयेत्तावद्यावन्निर्याति सत्वरम्। निर्धूमाङ्गारके यद्वा लौहपात्रे घृताक्तके॥ ४१८॥ तावच्च स्थाप्यते यावच्चैलाभो जायते रसः। प्रथमं कदली, श्रेष्ठा तदलाभे, पद्मिनीदलम्॥ ४१९॥ तदलाभे नागवल्लीकस्य च पत्रद्वयम्। गोमयोपरि निक्षिप्ते पत्रे तं ढालयेद्रसम्॥ ४२०॥ पुनर्दत्त्वाऽपरं पत्रं पत्रस्योपरि गोमयम्। रसं दं शीतलीभूतं खल्वे सूक्ष्मं हि पेषयेत्॥ ४२१॥ भृङ्गराज रसेनादौ दातव्याः सप्त भावनाः। आटरूषक पत्राणां स्वरसैः सप्त भावना॥ ४२२॥ कटुत्रयजलैः सप्त सप्तैवं त्रिफलाम्भसा। सप्तार्द्रकरसेनैवं सप्तपत्रकजैर्द्रवैः॥ ४२३॥ व्याघ्रीरसेन सप्तैव शिग्रुमूलरसेन च। वत्सनाभ विषेणैव श्रीखण्डे नैव सप्त च॥ ४२४॥ संशुष्कं च ततश्चूर्णं सूक्ष्मं सम्मर्दयेद्दृढम्। प्रक्षिपेत्कूपिके चूर्णं सम्भिन्नाञ्जन सन्निभाम्॥ ४२५॥ ताम्रपर्पटी संज्ञोऽयं रसं च परिकीर्तितः। रोगिणे प्रत्यहं देया वल्लयुग्मो जलान्वितः॥ ४२६॥ त्रिभिर्दिनैर्ज्वरो याति श्लेष्मवातादि सम्भवः। वातरक्ते ह्यजीर्णेषु ग्रहण्यां कुष्ठ रोगिषु॥ ४२७॥ मासिकेन निहन्त्याशु गणानेतान्सुदारुणान॥ ४२८॥

शुद्धपारा और गन्धक २-२ तोले, ताम्रभस्म २॥ तोले लेकर घुलाइ लोहे की कड़ाही में गलाकर भैंस के ताजे गोबर पर रक्खे हुए केले के पत्ते पर उसे डाल दूसरे पत्ते से दबाकर ऊपर ताजा गोबर रख देवे। ठंढा होने पर निकाल महीन पीस भाँगरा, अडूसा, त्रिकुटा, त्रिफला, अदरख, पत्रज, भटकटैया, साँइजन की जड़, नागकेशर, चन्दन इन सबके रसों से सात २ बार घोलकर १-१ रत्ती की गोलियाँ बनाकर रक्खे अथवा चूर्ण ही रक्खे, इनमें से १-१ गोली जल के साथ अथवा रोगानुसार अनुपान के साथ देने से, श्लेष्म ज्वर, वातज्वर तीन दिन में मिट जाते हैं। वातरक्त, अजीर्ण, ग्रहणी और कुष्ठ रोग इसके सेवन से १ महीने में बिलकुल अच्छे हो जाते हैं। विशेष अनुभूत है ॥ ४१७-४२८ ॥

लौहपर्पटी।

समौगंधरसौ कृत्वा कज्जलीकृत्य यत्नतः। शुद्धलौहस्य चूर्णन्तु रसतुल्यं प्रदापयेत् ॥ ४२९ ॥ एकीकृत्य ततो यत्नाल्लौहपात्रे प्रमर्दितम्। घृतमलिप्तदर्व्यान्तु स्वेदयेन्मृदुनाग्निना ॥ ४३० ॥ द्रवीभूतं समाहृत्य ढालयेत् कदलीदले। चूर्णीकृत्य सुखार्थाय पथ्यभुग्भिः प्रसेव्यते ॥ ४३१ ॥ शीतोदकानुपानं वा यथार्थं वा धान्यजीरयोः। लौहेन पर्पटी ख्याता भद्या लोकस्य सिद्धिदा ॥ ४३२ ॥ रक्तिकैकां समारभ्य वर्द्धयेत् रक्तिकां क्रमात्। सप्ताहं वा द्वयं वापि यावदारोग्यदर्शनम् ॥ ४३६ ॥ सूतिकाश्च ज्वरश्चैव ग्रहणीमतिदुस्तराम्। आमशूलातिसारांश्च पाण्डुरोगं सकामलम् ॥ ४३७ ॥ प्लीहानमग्निमान्द्यञ्च भस्मकञ्च तथैव च। आमवातमुदावर्त्तं कुष्ठान्यष्टादशैव तु ॥ ४३८ ॥ एवमादींस्तथा रोगान् गराणि विविधानि च। हन्त्यनेन प्रयोगेण व पुष्पाग्निर्मलः सुखी ॥ ४३९ ॥ जीवेद्वर्षशतं पूर्णं वलीपलितवर्जितः। भोजनं रक्तशालीनां त्यक्त्वा शाकं विदाहि च ॥ ४४० ॥ आमवातप्रकोपञ्च चिन्तनं मैथुनं तथा। मासरुरथाय संसेव्या विधिनायुः प्रवर्द्धिनी ॥ ४४१ ॥

१ तोला पारा और १ तोला गंधक की कजली बनाकर, उसमें १ तोला लौहभस्म मिला करके लौहपात्र में खरल करे। पश्चात् लोहे के कलछे में घी चुपड़कर, उसमें उक्त कजली को डालकर, मंद-मंद आँच दे। जब कजली द्रुत हो जाय, तब गौ के गोबर पर केला का पत्ता रखकर उस पर कजली की द्रुति को पतली-पतली फैला दे और उसके ऊपर भी केले के पत्ते से ढाँककर, उसके ऊपर गोबर रख दे। दो घटे के बाद दोनों पत्तों के बीच में पापड़ के समान जमी हुई लौहपर्पटी को निकालकर चूर्ण कर लेवे। १ रत्ती से आरम्भ करके प्रतिदिन १ रत्ती परिमित मात्रा बढ़ावे। इस प्रकार एक सप्ताह अथवा दो सप्ताह तक अर्थात् आराम होने तक सेवन करना चाहिए। अनुपान—शीतल जल अथवा जीरा और धनियाँ का क्वाथ देवे। पथ्य भोजन करना चाहिये। यह "लौहपर्पटी" सूतिकारोग, ज्वर, असाध्य ग्रहणीरोग, आमशूल, अतीसार, पाण्डुरोग, कामला, प्लीहा, अग्निमान्द्य, भस्मक, आमवात, उदावर्त और १८ प्रकार के कुष्ठ आदि विविध रोगों और विषदोषों को नष्ट करती है। इस 'लौहपर्पटी' का सेवन करनेवाला मनुष्य कान्तिमान्, सुखी, बली और पलित से रहित होकर सौ वर्ष पर्यन्त जीवित रहता है। औषध सेवन के समय रक्त शालीधान के चावलों का भात, विदाहि शाक आदि द्रव्य, आम-द्रव्य (कच्ची वस्तु) का सेवन, वायुसेवन, क्रोध, चिन्ता और मैथुन; ये सब त्याज्य हैं। इस आयु बढ़ानेवाली पर्पटी' का मास पर्यन्त विधिपूर्वक सेवन करना चाहिए ॥ ४२९-४४१ ॥

स्वर्णपर्पटी।

रसोत्तमं पलं शुद्धं हेमतोलकसंयुतम्[1]। शिलायां मर्दयेत्तावद्यावदेकत्वमागतम् ॥ ४४२ ॥ गन्धकस्य पलञ्चैकमयः पात्रे ततो द्रुते। मर्दयेद्दृढपाणिभ्यां यावत्कज्जलतां व्रजेत् ॥ ४४३ ॥ ततः पर्पटिं[2] विधानज्ञः पर्पटीं कारयेत्सुधीः। रक्तिकादिक्रमेणैव योजयेदनुपानतः ॥ ४४४ ॥ ग्रहणीं विविधां हन्ति यक्ष्माणञ्च विशेषतः। शूलमष्टविधं हन्ति तृष्णा सर्वरुजापहा ॥ सर्वज्वरोपहन्त्री च नाम्नेयं स्वर्णपर्पटी ॥ ४४५ ॥

( अत्र हेम्नोऽष्टभागित्वमुपलक्षणमिति प्रामाणिकाः )

पारा ४ तोले, गन्धक ४ तोले और स्वर्ण भस्म आधा तोला, इन तीनों को खरल में घोट करके उत्तम कज्जली बना लेवे। पश्चात् लोह की कड़ाही में कज्जली को डालकर, मन्द मन्द आँच में पकावे। जब कज्जली द्रुत हो जाय, गौ के गोबर पर केला का पत्ता रखकर उस पर कज्जली की द्रुति को पतली पतली फैला देवे और उसके ऊपर भी केला का पत्ता ढाककर, ऊपर गोबर रख देवे। दो घड़ी के बाद दोनों पत्तों के बीच में पापड़ के समान जमी हुई स्वर्ण-पर्पटी को निकाल लेवे। इस 'स्वर्ण-पर्पटी' की मात्रा एक रत्ती से प्रारम्भ करके, प्रतिदिन एक एक रत्ती बढ़ाकर, पूर्ण मासपर्यंत देवे। दोषानुसार अनुपान के साथ सेवन करने से यह 'स्वर्ण पर्पटी' विविध प्रकार के ग्रहणीरोग, विशेषत क्षय, आठ प्रकार के शूल और सब प्रकार के ज्वरों को नष्ट करती है। यह वीर्यवर्द्धक है ॥ ४४२-४४५ ॥

पञ्चामृत पर्पटी।

अष्टौ गन्धकतोलका रसदलं लौहं तदर्द्धं शुभं, लौहार्द्धञ्च वराभ्रकं सुविमलं ताम्रं तथार्द्धिकम्। पात्रे लौहमये च मर्दनविधौ चूर्णीकृतञ्चैकतो, दत्त्वा बादरवह्निनातिमृदुना पाकं विदित्वा दले ॥ ४४६ ॥ रम्भाया लघु ढालयेत् पदुरयं पञ्चामृता पर्पटी, ख्याता क्षौद्रघृतान्विता प्रतिदिनं गुञ्जाद्वयं वर्द्धतः। लौहे मर्दनयोगतः सुविमलं भक्ष्यक्रिया लौहवद्, गुञ्जाष्टावधयः त्रिकं त्रिगुणितं सप्ताहमेवं भजेत् ॥ ४४७ ॥ नानावर्णग्रहण्यामरुचसमुदये दुष्टदुर्नामकादौ, छर्द्यां दीर्घातिसारे ज्वरभयकसिते रक्तपित्ते क्षयेऽपि। स्त्रीणां शुष्यत्तरुणीवलिपलितहरा नेत्ररोगैकहन्त्री, कुन्दं दीप्तस्थिराग्निं पुनरपि नवकं रोगिदेहं करोति ॥ ४४८ ॥

( रसदलं गन्धकार्द्धमित्यर्थः। दीर्घातिसारे चिरोत्थितातिसारे। )

गन्धक ८ तोले और पारा ४ तोले, इनकी कज्जली बनाकर उसमें २ तोले लौहभस्म, १ तोला अभ्रक भस्म और आधा तोला ताम्र भस्म मिलाकर, लोहे के खरल में भलीभाँति मर्दन करे। पश्चात् इस कज्जली को लोहे के कलछे या कड़ाही में डालकर बेर की लकड़ी की अत्यन्त धीमी आँच दे। जब कज्जली पतली हो जाय, तब गौ के गोबर पर केला का पत्ता रखकर, उस पर कज्जली की कीचड़ के समान द्रवा को इस प्रकार से लीप देवे, जिसमें पापड़ सा बन जाय। उसके ऊपर भी केले के

१ तोलकशब्द शब्दमात्रेण कोलरूपे परिमाणे प्रयुक्त। तोलार्थे वैद्यकसम्प्रदायेऽस्य क्व प्रयुक्तो दृश्यते। अत्र तु कोलाऽपरपर्याय एव गृह्यते, स्वर्णपर्पट्यां पारदाऽष्टमांशस्यैव हेम्नो ग्राह्यत्वात्। चरकसुश्रुतादावपि हेम्नोऽष्टमांश विद्यते।

२ 'पाक' इति पाठान्तरम्।

पत्ते से ढाककर, ऊपर गोबर रख देवे । दो घटे के अनन्तर दोनों पत्तों के बीच में पापड के समान जमी हुई 'पञ्चसूत पर्पटी' को निकाल लेवे । पश्चात् लोह के खरल में घोटकर रख लेवे । इसकी मात्रा-२ रत्ती है । प्रतिदिन घृत और मधु के साथ सेवन करे । प्रतिदिन एक एक रत्ती की मात्रा बढ़ा करके, ८ या ६ रत्ती पर्यन्त सेवन करना चाहिए । एक सप्ताह सेवन करने से विविध प्रकार के ग्रहणीरोग, अरुचि, कुष्ठ, बवासीर, वमन, पुराना अतीसार, ज्वर, कास, रक्तपित्त और क्षय आदि सब रोग नष्ट होते हैं । यह 'पर्पटी' बल और वीर्य को बढ़ाती है, तथा वली ( शरीर की झुर्रियां )। पलित ( बाल सफेद हो जाना ) और नत्र के रोगों को दूर करती है । यह अग्नि को प्रदीप्त करके, रोगी के शरीर को फिर स्थूल तथा नूतन बना देती है ॥ ४४६ ४४८ ॥

विजयपर्पटी ।

गन्धकं द्रुतं कृत्वा भाव्यं भृङ्गरसेन तु । सप्तधा त्रिधा वापि पश्चाच्छुष्कं विचूर्णयेत् ॥ ४४६ ॥ चूर्णयित्वायसे पात्रे कृत्वा वह्निगतं सुधीः । इमं भृङ्गरसे क्षिप्तं तत उद्धृत्य शोषयेत् ॥ ४५० ॥ तत्र गन्धं पलार्द्धं कं गन्धार्द्धं शुद्धपारदम् । सूतार्द्धं भस्मरौप्यञ्च तदर्द्धं स्वर्णभस्मकम् ॥ ४५१ ॥ तदर्द्धं मृतवैक्रान्तं मौक्तिकञ्च विनिक्षिपेत् । एकीकृत्य ततः सर्वं कुर्य्यात् पर्पटिकां शुभाम् ॥ ४५२ ॥ लौहपात्रे समरसं मर्दितं कज्जलीकृतम् । बदराङ्गारवह्निस्थे लौहपात्रे द्रवीकृते ॥ ४५३ ॥ मयूरचन्द्रिकाकारं लिङ्गं वा यदि दृश्यते । आतपयोर्दृश्यते सूतः खरपाके न दृश्यते । मृदौ[1] न सम्यग्भङ्गः स्यान्मध्ये भङ्गश्च रूप्यवत् ॥ ४५४ ॥ खरे लघुर्भवेद्भङ्गो रूक्षः सूक्ष्मोऽरुणच्छविः । मृदुमध्यौ तथा ग्राह्यौ खरस्त्याज्यो विषोपमः ॥ ४५५ ॥ जराव्याधिशतकीर्णं विश्वं दृष्ट्वा पुरा हरः । चकार पर्पटीमेतां यथा नारायणोऽमृतम् ॥ ४५६ ॥ आदौ शङ्करमभ्यर्च्य द्विजातीन् प्रणिपत्य च । प्रभाते भक्षयेदेनां माषं रक्तिद्वयसम्मिताम् ॥ ४५७ ॥ रक्तिकादिक्रमाद् वृद्धिर्भक्ष्या नैव दशोपरि । आरोग्यदर्शनं यावत्तावद् ग्रासस्ततः परम् ॥ ४५८ ॥ अजीर्णे भोजनं नैव पथ्यकालव्यतिक्रमः । घृतसैन्धवधन्याकहिङ्गुजीरकनागरैः ॥ ४५९ ॥ शस्यते व्यञ्जनं सिद्धं पित्ते स्यादम्लमाक्षिकम् । कृष्णमत्स्येन पुष्टेन मांसेन जाङ्गलेन च ॥ ४६० ॥ मांसेषु शशच्छागौ मत्स्ये रोहितमद्गुरौ । पटोलपत्रञ्च तथा कुष्माण्डवार्त्ताकुनालिकाः[1] ॥ ४६१ ॥ सुरभित्रपुगैस्ताम्बूलैर्लाभे कर्पूरसंयुतैः । तृष्णाकाले व्यतिक्रान्ते यदि वायुः प्रकुप्यति ॥ ४६२ ॥ भिञ्झिनीति शिरःशूले विरेके वमथौ तथा । तृष्णायाश्चाधिके पित्ते नारिकेलाम्बु निर्भयम् ॥ ४६३ ॥ नारिकेलपयः पेयं निर्भयं क्षीरमन्न च । स्वप्ने शुक्रच्युतौ चैव चम्पकं कदलीफलम् ॥ ४६४ ॥ वर्ज्यं निम्बादिकं शाकं शाकाम्लं काञ्जिकं सुराम् । कदलीफलपत्राद्रिं त्रपुषालाबुकर्कटी[2] ॥ ४६५ ॥ कूष्माण्डं कारवेल्लञ्च यामयामजागरं निशि । न पश्येत् स्पृशेद् गच्छेन् स्त्रियं जीवि-

1—आतपयोर्दृश्यते सूतः खरपाके न दृश्यते । इति पाठान्तरेऽपि पाठ ।

1—नालिका-नाड़ीशोपालवाम्, हि० नेनुआ ।
2—त्रपुषा त्रपुकर्कटयम्, हि० खीरा ।

तुमिच्छति ॥ ४६६ ॥ यद्यौषधे स्थिरं गच्छेत् कर्त्तव्या तु प्रतिक्रिया। दुर्वारां ग्रहणीं हन्ति दुःसाध्यां बहुवार्षिकीम् ॥ ४६७॥ आमशूलमतीसारं सामञ्चैव सुदारुणम्। अतिसारं पञ्चकासिश्वमाणं सपरिग्रहम् ॥ ४६८ ॥ शोथञ्च कामलां पाण्डुं प्लीहानञ्च जलोदरम्। पक्तिशूलं चाम्लपित्तं वातरक्तं वमिं कृमिम्। अष्टादशविधं कुष्ठं प्रमेहान् विषमज्वरान् ॥ ४६९ ॥ वातपित्तकफोत्थांश्च ज्वरान् हन्ति सुदारुणान्। जीर्णोऽपि पर्पटीं कुर्वन् वपुषा निर्मलः सुधीः ॥ जीवेद्वर्षशतं श्रीमान् वलीपलितवर्जितः ॥४७०॥ मातः करोति सततं नियतं द्विगुणां यस्तां स विन्दति तुलां कुसुमायुधस्य। आयुश्च दीर्घमनघं वपुषः स्थिरत्वं हानिं वलीपलितयोरतुलं बलञ्च ॥ ४७१ ॥

चावलों के समान गन्धक के छोटे-छोटे टुकड़े करके, ७ बार या ३ बार भँगरा के रस की भावनाएँ देवे। और प्रतिवार धूप में रखकर शुष्क करे। पश्चात् धूल के समान चूर्ण बनाकर लोह के पात्र में रखकर बेर की लकड़ी के निर्धूम अंगारों की आँच से गलाकर, भँगरा में के रस में डाल देवे। तदनन्तर निकालकर शुष्क कर लेवे। इस प्रकार शुद्ध किया हुआ गन्धक ४ तोले, पारद २ तोले, चाँदी की भस्म १ तोला, स्वर्ण भस्म आधा तोला ( ६ माशे ), वैक्रान्त भस्म ६ माशे और मुक्ता ( मोती ) ६ माशे, इन द्रव्यों को मिलाकर, लोह के खरल में यत्न पूर्वक मर्दन करके उत्तम कज्जली बना लेवे। पश्चात् उस कज्जली को लोह की कड़ाही में डालकर, बेर की लकड़ी के अंगारों की आँच से पिघला कर पतली करे। जब गली हुई कज्जली में मयूर पिच्छ की चन्द्रिका के समान कान्ति देख पड़ने लगे, तब पाक को सिद्ध समझे। पश्चात् गौ के गोबर पर केला का पत्ता रखकर, उस पर कज्जली की द्रुति को पतली-पतली फैला दे, और उसके ऊपर भी केले के पत्ते को रख करके, उसके ऊपर गोबर रख देवे। दो घड़ी के बाद दोनों पत्तों के बीच में पापड़ के समान जमी हुई 'चिन्चपर्पटी' को निकाल लेना चाहिये।

कज्जली का पाक मृदु, मध्य और खर, इन भेदों से तीन प्रकार का होता है। मृदु पाक होने पर पर्पटी उत्तम रूप से भग्न नहीं होती। मध्य पाक होने पर चाँदी के समान टुकड़े होते हैं। परंतु खर पाक में लघु, रूक्ष, सूक्ष्म और रक्तवर्ण के टुकड़े होते हैं। मृदु और मध्य पाक की पर्पटी सेवन करने-योग्य होती है। खर पाक की कज्जली विष के समान त्याज्य है। श्रीशङ्करजी ने संसार के प्राणियों को जरा और व्याधि से पीड़ित देख करके इस 'पर्पटी' को बनाकर इस प्रकार प्रचलित किया था, जैसे विष्णु ने अमृत को आविष्कृत करके देवताओं को दिया था। अतएव पहले शिवजी का पूजन करके ब्राह्मणों को प्रणाम करे, तदनन्तर प्रतिदिन प्रातःकाल इस औषध का सेवन करना चाहिये।

पहले दिन प्रातःकाल दो रत्ती की मात्रा रक्खे। तदनन्तर प्रतिदिन एक एक रत्ती की मात्रा बढ़ा करके दस रत्तीपर्यन्त सेवन करनी चाहिये। दस रत्ती से अधिक मात्रा में सेवन करना उचित नहीं है। इस प्रकार जब तक आरोग्यता प्राप्त न हो, तब तक सेवन करना चाहिये। आरोग्यता प्राप्त होने पर क्रमशः मात्रा कम कर देनी उचित है। अजीर्ण में भोजन अथवा भोजनकाल के समय को छोड़कर भोजन न करे। घृत, लाहौरी नमक, धनियाँ, हींग, जीरा और सोंठ मिलाकर सिद्ध किये हुए खट्टे पदार्थ खाने चाहिये और पित्ताधिक्य में मधुर और खट्टे पदार्थों का तथा मधु का सेवन करना चाहिये। काली मछली, दूध और जंगली पशुओं के मांस के साथ भोजन करे। जंगली पशुओं में खरगोश और बकरा, मछली में रोहू और भाँगुर तथा शाकों में परवल की पत्तियाँ, फल, काला बैंगन और बथुआ सेवन

करने योग्य है। यदि मिल सके, तो उबालकर कोमल की हुई सुपारी और कपूर से युक्त पान का बीड़ा भी खावे। भूख लगने पर भोजन न करने से यदि वायु कुपित हो जाय तथा देह में झुनझुनी, शिर में पीड़ा, अतिसार, वमन, अधिक तृष्णा और पित्त की वृद्धि हो, तो निर्भय होकर नारियल का पानी पिलाना चाहिये। पेय पदार्थों में नारियल का पानी और प्रतिदिन दूध का सेवन करे। स्वप्न में धातु क्षीण होने पर भी दुग्ध का पीना लाभदायक है। पर्पक, कदलीदल, निम्ब आदि तिक्त द्रव्यों का शाक, इमली, कांजी, मदिरा, केले के फल, पत्र और मूल, खीरा, घीयां, ककड़ी और पेठा इनका सेवन न करना चाहिये। व्यायाम और रात्रि का जागरण भी वर्जित है। यदि जीवन की इच्छा हो, तो औषध के सेवनकाल में स्त्री को न देखे, और न स्पर्श करे और न उसके पास जावे। यदि कदाचित् दुर्भाग्यवश स्त्री-समागम हो ही जाय, तो यथोचित रूप से उसका प्रतीकार करना चाहिये। यह 'पर्पटी' कठिन एवं दुःसाध्य और बहुत दिनों के पुराने ग्रहणी-रोग, आमशूल, अतीसार, ६ प्रकार के बवासीर, उपद्रव-युक्त यक्ष्मा, शोथ, कामला, पाण्डु, प्लीहा, जलोदर, परिणामशूल, अम्लपित्त, वातरक्त, वमन, कृमि, अठारह प्रकार के कुष्ठ, प्रमेह, विषमज्वर, वातिक, पैत्तिक और श्लैष्मिक ज्वर आदि अनेक प्रकार की व्याधियों को नष्ट करके शरीर की पुष्टि, रति-शक्ति की वृद्धि, वली पलित शून्यता (शरीर की झुर्रियाँ, बालों की सफेदी रहित) और परमायु की वृद्धि करती है॥ ४५६-४७१॥

तन्त्रान्तरोक्तविजयपर्पटी।

रसंवज्रं हेमतारं मौक्तिकं ताम्रमभ्रकम्। सर्वतुल्येन गन्धेन कुर्य्याद्विजयपर्पटीम्॥ ४७२॥ दुर्वारां ग्रहणीं हन्ति दुःसाध्यां बहुवार्षिकीम्। आमशूलमतीसारं चिरोत्थमतिदारुणम्॥ ४७३॥ प्रवाहिकां पडर्शांसि यक्ष्माणं सपरिग्रहम्। शोथं च कामलांपाण्डुंप्लीहगुल्मजलोदरम्॥४७४॥ पंक्तिशूलमम्लपित्तं वातरक्तं वमिंभ्रमम्। अष्टादशविधं कुष्ठं प्रमेहान् विषमज्वरान्॥ ४७५॥ चतुर्विधमजीर्णञ्च मन्दाग्नित्वमरोचकम्। जीर्णोऽपि पर्पटीं कुर्वन् वपुषा निर्मलः सुधीः॥ जीवेद्वर्षशतं श्रीमान् वलीपलितवर्जितः॥ ४७६॥ प्रातः करोति सततं नियतं द्विगुञ्जां यस्तां स विन्दति तुलां कुसुमायुधस्य। आयुश्च दीर्घमनघं वपुषःस्थिरत्वंहानिंवलीपलितयोरतुलं बलञ्च॥ ४७७॥ जराव्याधिसमाकीर्णं विश्वं दृष्ट्वा पुरा हरः। चकार पर्पटीमेतां यथा नारायणः सुधाम्॥ ४७८॥

पारा, हीरा की भस्म, सोना की भस्म, चाँदी की भस्म, मोती की भस्म, ताम्रभस्म और अभ्रकभस्म प्रत्येक एक-एक तोला तथा गंधक सात तोले; इनको एकत्र करके विधिपूर्वक घोटना चाहिये और पहिली कही विधि से 'विजय-पर्पटी' को बना लेवे। यह "विजय पर्पटी" कठिन और बहुत पुराने ग्रहणीरोग, आमशूल, पुराने अतीसार, प्रवाहिका, ६ प्रकार के बवासीर, उपद्रव-युक्त यक्ष्मा, शोथ, कामला, पाण्डु, प्लीहा, गुल्म, जलोदर, परिणामशूल, अम्लपित्त, वात-रक्त, वमन, भ्रम, १८ प्रकार के कुष्ठ, प्रमेह, विषमज्वर, ४ प्रकार के अजीर्ण, अग्निमान्द्य और अरोचक आदि अनेकों प्रकार के रोगों को नष्ट करके शरीर की पुष्टि, कान्ति-वृद्धि, रति-शक्ति की वृद्धि, शरीर की झुर्रियों और बालों की सफेदी का नाश और परमायु की वृद्धि करती है। इसे पहले शिवजी ने संसार को बुढ़ापा और बीमारी से पीड़ित देखकर, इस प्रकार प्रकाशित किया था, जैसे विष्णु ने अमृत का आविष्कार करके देवताओं को दिया था। इसकी मात्रा २ रत्ती की है। प्रतिदिन प्रातःकाल सेवन करना चाहिये॥४७२-४७८॥

१ कर्मिमिति पाठान्तरम्।

### हिरण्यगर्भपोट्टली रस।

एकांशो रसराजस्य भागौ द्वौ हाटकस्य च। मुक्ताफलस्य चत्वारो भागः षड्दीर्घनिःस्वनात् ॥ ४७६ ॥ त्र्यंशं पलेर्वराटचाथ टङ्कनो रसपादिकः। पक्वनिम्बुकतोयेन सर्वमेकत्र मर्दयेत् ॥४८०॥ मूषामध्ये न्यसेत् कल्कं तस्य वक्त्रं निरोधयेत्। गर्तेऽरत्निममाखेन पुटेत् त्रिंशद्वनोपलैः ॥ ४८१ ॥ स्वाङ्गशीतलतां ज्ञात्वा रसं मूषोदरात्त्यजेत्। ततः खल्लोदरे मर्द्य सुधारूपं समुद्धरेत् ॥ ४८२ ॥ एतस्यामृतरूपस्य दद्याद् द्विगुञ्जसम्मितम्। घृतमाध्वीकसंयुक्तमेकोनत्रिंशदूषणैः ॥४८३॥ मन्दाग्नौ रोगसंघे च ग्रहण्यां विषमज्वरे। गुदाङ्कुरे महामूले पीनसे श्वासकासयोः ॥ ४८४ ॥ अतीसारे ग्रहण्याञ्च श्वयथौ पाण्डुके गदे। सर्वेषु कोष्ठरोगेषु यकृत् प्लीहादिकेषु च ॥ ४८५ ॥ वातपित्तकफोत्थेषु द्वन्द्वजेषु त्रिजेषु च। दद्यात् सर्वेषु रोगेषु श्रेष्ठमेतद्रसायनम् ॥४८६॥

पारा १ तोला, स्वर्ण-भस्म २ तोले, मोती-भस्म, ४ तोले, काँसा भस्म ६ तोले, गंधक ६ तोले, कौड़ी की भस्म ३ तोले और सोहागा फूला हुआ २ माशे इन सब द्रव्यों को एकत्र करके, पके नींबू के रस में खरल करे। पश्चात् इस कल्क को मूषा यन्त्र में रखकर, मूषा-यन्त्र का मुख मुद्रित करके गजपुट में ३० कंडियों की आँच देकर यथाविधि पुटपाक करे। स्वाङ्गशीतल होने पर रस को मूषा-यन्त्र से निकालकर, खरल में घोटकर रस लेवे। अमृतरूप इस रस की मात्रा २ रत्ती की है। घी मधु और २९ मिर्च के साथ सेवन करना चाहिए। अग्निमान्द्य, ग्रहणीरोग, विषम-ज्वर, महाव्य बवासीर, पीनस, श्वास, कास, अतीसार शोथ, पाण्डु और सब प्रकार के कोष्ठरोग, यकृत् और प्लीहा आदि रोगों में तथा अन्यान्य सब प्रकार के वातिक, पैत्तिक, श्लैष्मिक, द्वन्द्वज और सान्निपातिक रोगों में यह 'हिरण्यगर्भपोटलीरस' अत्यन्त लाभदायक और श्रेष्ठ रसायन है ॥ ४७८-४८६ ॥

### तक्रारिष्ट।

यमान्यामलकं पथ्या मरिचं त्रिपलांशिकम्। लवणानि पलांशानि पञ्च चैकत्र चूर्णयेत् ॥ ४८७ ॥ तक्रकं संयुतं जातं तक्रारिष्टं पिबेन्नरः दीपनं शोथगुल्मार्शः क्रिमिमेहोदरापहम् ॥ ४८८ ॥

अजवाइन, आँवला, हड़ और मिर्च प्रत्येक बारह-बारह तोला, पाँचों नमक प्रत्येक चार चार तोला; इन सब द्रव्यों को एकत्र करके चूर्ण बनावें। पश्चात् इस चूर्ण को १६ सेर तक्र में मिलाकर ४ दिन पर्यंत रख छोड़ें। इसका नाम 'तक्रारिष्ट' है। यह 'तक्रारिष्ट' अग्नि को दीप्त तथा शोथ, गुल्म, बवासीर, कृमिरोग, प्रमेह और उदररोगों को नष्ट करता है मात्रा ४ तोला ॥ ४८७-४८८ ॥

### पिप्पल्यादि आसव।

पिप्पली मरिचं चव्यं हरिद्रा चित्रको घनः। विडङ्गं क्रमुको लोध्रः पाठा धात्र्येलवालुकम् ॥ ४८९ ॥ उशीरं चन्दनं कुष्ठं लवङ्गं तगरं तथा। मांसी त्वगेलापत्रञ्च प्रियङ्गु नागकेशरम् ॥ ४९० ॥ एषामर्द्धपलान् भागान् सूक्ष्मचूर्णीकृताञ्छुभान्। जलद्रोणद्वये क्षिप्त्वा दद्याद् गुडतुलात्रयम् ॥ ४९१ ॥ पलानि दश धातक्या द्राक्षा षष्टिपला भवेत्। एतान्येकत्र संयोज्य मृद्भाण्डे विनिक्षिपेत् ॥४९२॥ ज्ञात्वा रसगतं सर्वं पाययेदग्न्यपेक्षया। क्षयं गुल्मोदरं कार्श्यं ग्रहणीं पाण्डुतां तथा ॥५३०॥

अर्शांसि नाशयेच्छीघ्रं पिप्पल्याद्यासवस्त्वयम् ॥ ४९४ ॥

इति भैषज्यरत्नावल्यां ग्रहण्यधिकारः समाप्तः ।

पीपल, मिर्च, चव्य, हल्दी, चीता, नागरमोथा, वायविडंग, सुपारी, लोध, पाढी, आँवला एलवालुक ( सुगन्धद्रव्य ) खस, लालचंदन, कूट, लौंग, तगर, जटामांसी, दालचीनी, छोटी इलायची के बीज, तेजपात, फूलप्रियंगु और नागकेसर, प्रत्येक को दो-दो तोले लेवें । इनका महीन चूर्ण करके २२ सेर ४८ तोला जल में मिलाकर पन्द्रह सेर गुड़, ४० तोला धाय के फूल और ३ सेर मुनक्का डालकर, मिट्टी के पात्र में रखकर, पात्र का मुख मुद्रित करके, एक मासपर्यन्त रख छोड़े । पश्चात् छानकर बोतलों में भरकर रख लेवे । अग्नि के बल का विचार करके मात्रा स्थिर करनी चाहिये । यह "पिप्पल्याद्यासव" क्षय, गुल्म, उदर, कार्श्य, ग्रहणीरोग, पाण्डु और बवासीर को तत्काल नष्ट करता है ॥ ४८९-४९४ ॥

ग्रहणी रोग में पथ्य ।

निद्राच्छर्दन लंघनं चिरभवा ये शालयः षष्टिकः । मण्डोलाजकृतो मसूर तुवरो मुद्गश्चयूषारसः । निःशेषोद्धृतसारमेव दधि यत्सत्तीर जातेगवांछाग्या । धान्यनवनीतमेवदधिजं तद्वत्पयः संभवम् ॥ ४९५ ॥ छागात्याज्य पयोदधीनि तिलजं तैलं सुरा मासिकं । शालूकं बकुलं च दाडिमयुगं भव्यानि मस्थानि च ॥ रामाभ्यः कुसुमं फलं चतरुणं बिल्वं च शृंगाटकं चांगेरी विजया कपित्थ कुटजा नागकेसरमेव च ॥ ४९६ ॥ तक्रं काञ्चट सौनिषण्णकं जातीफलं जाम्बवं । धान्याकानि च तिन्दुकानि चमहानिम्बोऽहणा पेलवम् ॥४९७॥ क्रव्याल्लाव शशैण तित्तिडरसः क्षुद्राभक्षः सर्वतः । क्षुद्रीशो मधुरालिका च खलिशः सर्व कषायो रसः ॥ ४९८ ॥ नाभेद्वर्यंगुलकादधोर्ध्व शशि वा दंशादिश्चपुणे तथा, दाहः प्रज्वलितायसायकथितं पथ्यं ग्रहण्यातुरे ॥ ४९८ ॥

सोना, वमन, उपवास, पुराने शाली चावल, पुराने साठी चावल, खीलों का मांड, मसूर, अरहर और मूँग का रस, मक्खन निकला हुआ, गौ बकरी का दही, बकरी का मक्खन घी, बकरी का दही दूध, तिल का तैल, मदिरा, शहद, कमलकंद, मौलसिरी, दोनों प्रकार के अनार, लिसोड़े भए, केला के फूल फल नए कच्चे बेलफल, सिंघाड़ा, चांगेरी भांग, कैथ, कुड़ा की छाल जीरा, कसेरू, छाछ, जव, चौलाई की पत्ती, चीपतिया, जायफल, जामुन, धनियां, नागकेसर, बकायन, मजीठ, पेलव, मांसाहारी पक्षियों का मांस, खरगोश, एणातीतर का मांसरस, सब प्रकार की छोटी २ मछलियां, सुईदार खास प्रकार की मछली जो थोड़ी देर तक उबली रहती है, मधुरालिका ( खास तरह की मछली ) सब प्रकार के कसैले द्रव्य नाभि के दो अंगुल नीचे तथा दो अंगुल ऊपर रीढ़ की हड्डी में लोहे से अर्द्धचन्द्र आकार में दाग देना ग्रहणी रोग में पथ्य है ॥ ४९५-४९८ ॥

ग्रहणी रोग में अपथ्य ।

रक्त स्रुति जागरमम्बुपानं स्नान स्त्रियं इंद्रियनिग्रहं च । नस्याञ्जन स्वेदन धूम्रपानं श्रम विरुद्धाशन मातपे च । गोधूम निष्पावकलायमाषयवार्द्रकच्छत्रक राजमाषाम् । उपोदिका वास्तुक काकमाची कूष्माण्ड तुंबी मधु शिग्रुकन्दान् ॥४९९॥ ताम्बूलमिक्षु बदरं रसालमेर्वारुकं पूगफलं रसोनम् । धान्याम्ल सौवीर

तुपोदकानि दुग्धं गुडं मस्तु च नारिकेलम् पुनर्नवार्थोहत वैणवाणि च पलवन्ति ॥ ५०० ॥ दुष्टाम्बु गोधरि कुरङ्ग नार्कक्षारं सराणिचापि द्राक्षामधाम्यं लवणं सरंच। गुर्वन्न पानं सकले च यूषम् वैद्यश्चिकित्सन्ग्रहणी विकारं विवर्जयत्संततममत्तः ॥ ५०१ ॥

फसद खोलना, रात में जगना, अत्यन्त जल पीना, नहाना, स्त्रीसंसर्ग, मलमूत्र आदि के वेग को रोकना नस्यकर्म, सुरमा लगाना, स्वेदन, धूम्रपान, परिश्रम करना, विरुद्ध भोजन, धूप पर आग से तपना, गेहूँ, सफेद सेम की फली, मटर, उड़द, जौ, मदरस, धुसधम, चौलाई, पोई का साग, बथुआ, मकोय, पेठा और काशीफल, तुम्बी, मीठा सहजना, आलू अरई आदि कंद पान, ईख, बेर, आम, ककड़ी, खीरा, सुपारी, लहसुन काँजी सौवीर ( जौमंडु की फली ) तुषोदक कच्चे जौ की बनी काँजी, दूध दही का तोड़, गुड़ नारियल की गिरी और जल, छोटी कटेरी, बांस के अंकुर, सब प्रकार के पत्तों के शाक, दूषित जल, गोमूत्र, कस्तूरी जवाखार आदि क्षार, सब प्रकार की दस्तावर वस्तुएँ, दाख, आमचूर आदि की खटाई, नमक, आदि देर से पचनेवाले आहार पूआ-पूरी आदि पकवान सब ग्रहणी के रोगी को हानिकारक हैं ॥ ४६६-५०१ ॥

इति सरयूप्रसादत्रिपाठिविरचितायां भैषज्यरत्नावल्या रत्नप्रभाभिधायां व्याख्यायां ग्रहण्यधिकारः समाप्तः।

---

## अथ कृम्यधिकारः

पारसीययमानी पीता पर्युषितवारिणा प्रातः। गुडपूर्वा कृमिजातं कोष्ठगतं पातयत्याशु ॥ १ ॥

गुडपूर्वा प्रथमतो गुडं भक्षयित्वा मनाक् विलम्बं कृत्वा पातव्या।

प्रातःकाल पहले थोड़ा गुड़ खाकर थोड़ी देर के बाद खुरासानी अजवाइन को बासी पानी के साथ खाने से कोष्ठगत सब प्रकार के कृमि शीघ्र गिर जाते हैं। मात्रा-२ रत्ती से ६ रत्ती तक ॥ १ ॥

पारिभद्रकपत्रोत्थं रसं क्षौद्रयुतं पिबेत्। केवुकस्य रसं चापि पत्तूरस्याथवा[1] पुनः ॥ लिह्यात् क्षौद्रेण वैडङ्गं चूर्णं कृमिहरं परम् ॥ २ ॥

शहद मिलाकर फरहद के पत्ते का रस, केमुआई के पत्ते का रस अथवा पत्तूर के पत्ते का रस पीने से अथवा शहद के साथ वायविडंग के चूर्ण को चाटने से भी उदर के भीतर के कृमि नष्ट हो जाते हैं मात्रा २ तोला ॥ २ ॥

मुस्ताखुपर्णी फलशिग्रु दारुक्वाथः सकृष्णाकृमिशत्रु कल्कः। मार्गद्वयेनापि चिरप्रवृत्तान् कृमीन्निहन्ति कृमिजांश्च रोगान् ॥ ३ ॥

नागरमोथा, मूसाकानी, त्रिफला, सहिजन की छाल और देवदारु के क्वाथ में एक-एक माशे पीपल और वायविडंग का कल्क मिलाकर पान करे, दोनों मार्गों से प्रवृत्त हुए चिरकालिक कृमि और कृमिजन्य अन्यान्य रोग नष्ट हो जाते हैं मात्रा ४ तोला ॥ ३ ॥

फलत्रिकः।

पलाशबीजस्वरसं पिबेद्वा क्षौद्रसंयुतम्। पिबेत्तद्बीजकल्कं वा तक्रेण कृमिनाशनम् ॥ ४ ॥

शहद मिलाकर पलाश के बीजों के स्वरस

---

1—यह शाक विशेष है। इसको बंगाल में शालिच कहते हैं।

२—मन्दारविशेषो मिश्रोऽपि गृह्णाति सेन।

को अथवा तक[1] में घोलकर ढाक के बीजों के कल्क को पीने से उदर के भीतर के कृमि नष्ट होते हैं मात्रा स्वरस २ तोला कल्क ६ मा १ तोला ॥ ४ ॥

स्वार्थं खर्जूरपत्राणां सक्षौद्रमुषितं निशि। पीत्वा निवारयत्याशु कृमिसङ्घमशेषतः ॥ ५ ॥

खजूर के पत्तों के बासी क्वाथ को शहद मिलाकर पान करे, तो समस्त कृमि तत्काल नष्ट हो जाते हैं मात्रा ४ तोला ॥ ५ ॥

अपक्वं क्रमुकं पिष्टं पीतं जम्बीरजैः रसैः। निहन्ति विड्भवं कीटं रसः खर्जूरजम्भयोः ॥ ६ ॥

दो माशे कच्ची सुपारी को पीसकर दो तोले नीबू के रस में घोलकर पीने से अथवा चार तोले खजूर की पत्तियों के स्वरस में चार तोले नीबू के स्वरस को मिलाकर पीने से विष्ठा के कृमि नष्ट होते हैं ॥ ६ ॥

पिबेत्तुम्बीबीजचूर्णं तक्रेण कृमिनाशनम्। नारिकेलजलं पीतं सक्षौद्रं कृमिनाशनम् ॥ ७ ॥

कड़वी तोंबी के बीजों के चूर्ण को तक्र में घोलकर पीने से अथवा नारियल के जल में शहद मिलाकर पीने से कृमि नष्ट होते हैं मात्रा ६ माशा ॥ ७ ॥

यमानीं लवणोपेतां भक्षयेत्कल्य उत्थितः। अजीर्णमामवातञ्च कृमिजांश्च जयेद् गदान् ॥ ८ ॥

प्रातःकाल अजवायन के चूर्ण में लाहौरी नमक मिलाकर खाने से अजीर्ण, आमवात और कृमिजन्य समस्त रोग नष्ट होते हैं मात्रा ३ माशा ॥ ८ ॥

पलाशबीजेन्द्रविडङ्गनिम्बभूनिम्बचूर्णं सगुडं लिहेद् यः। दिनत्रयेण क्रमयः पतन्ति पलाशबीजेन यमानिका वा ॥ ९ ॥

ढाक के बीज, इन्द्रजव, वायविडङ्ग, नीम की छाल और चिरायता के चूर्ण को गुड़ के साथ सेवन करने से अथवा ढाक के बीज के साथ अजवायन के चूर्ण को सेवन करने से सब प्रकार के कृमि तीन ही दिनों में गिर पड़ते हैं मात्रा ४ ६ माशा ॥ ९ ॥

कम्पिल्लचूर्णं माषार्द्धं गुडेन सह भक्षितम्। संपातयेत् कृमीन् सर्वानुदरस्थान्न संशयः ॥ १० ॥

चार रत्ती कमीले को गुड़ के साथ सेवन कराने से पेट के अन्दर के सब कीड़े बाहर निकल जाते हैं ॥ १० ॥

### पारसीयवाद्यचूर्णं।

पारसीययमानिका घनकणा शुण्ठी विडङ्गारुणा चूर्णं श्लक्ष्णतरं विलीढमपि तत् क्षौद्रेण संयोजितम्। कासं नाशयति ज्वरञ्च जयति मोहातिसारं जयेत् छर्दिं मर्दयति कृमिन्तु नियतं कोष्ठस्थमुन्मूलयेत् ॥ ११ ॥

खुरासानी अजवाइन, नागरमोथा, पीपल, काकड़ासिंगी, वायविडङ्ग और अतीस, इन सब औषधों का चूर्ण मधु के साथ चाटने से खांसी, ज्वर, अतीसार, वमन और कोष्ठस्थ कृमि नष्ट हो जाते हैं मात्रा १॥ से माशा ॥ ११ ॥

पेषयेदारनालेन नाडीचस्य फलानि च। यूकालिक्षप्रशान्त्यर्थं दद्याल्लेपन्तु मस्तके ॥ १२ ॥

कांजी के साथ नाडी (पटुआ) के फलों को पीसकर मस्तक पर लेप करने से जूँ और लीख मर जाते हैं ॥ १२ ॥

---

१—मुग्धवसार ने इस प्रयोग को चावलों के जल के साथ भी पीने को लिखा है। यथा "पलाशबीजस्वरसकल्कं वा तण्डुलाम्बुना" इति।

रसेन्द्रेण[1] समायुक्तो रसो धुस्तूरपत्रजः । ताम्बूलपत्रजो वापि लेपाद् यूकाविनाशनः ॥ १३ ॥

धतूरे की पत्तियों के रस में अथवा पान की पत्तियों के रस में पारा मिलाकर लेप करने से जूँ आदि बाहरी कृमि नष्ट हो जाते हैं ॥ १३ ॥

### विडङ्गतैल ।

सविडङ्गगन्धकशिलासिद्धं सुरभीजलेन कटुतैलम् । आजन्म नयति नाशं लिक्षासहितांश्च यूकांश्च ॥ १४ ॥

शिला मनःशिला, गन्धक शिला शब्देन गन्धक इति भानुः ।

कडुआ तैल २ सेर, गोमूत्र ८ सेर, वायविडंग, गन्धक और मैनसिल का कल्क १ सेर, इनको एकत्र पकाकर तैल सिद्ध करे। इस तैल के मर्दन करने से चिर-संचित जूँ और लीख नष्ट हो जाते हैं ॥ १४ ॥

इस श्लोक में 'शिला' का अर्थ मैनशिल है, परन्तु भानुजी का मत है कि यहाँ गन्धकशिला शब्द गन्धक अर्थ का वाचक है ॥

### विडङ्गाद्य तैल ।

तुलामानं विडंगस्य सोमवल्याः पलं शतम् । जलद्रोणे विपक्तव्यं चतुर्भागावशेषितम् ॥ १५ ॥ एतत्क्वाथे पचेत्तैलं द्वात्रिंशपलमानकम् । विडंगो वारुणी वह्निर्लाङ्गली च प्रसारिणी ॥ १६ ॥ दासीकुरण्टकश्चैव कट्फलस्त्र्यूषणं वरा । रास्ना चैरण्डमूलं च प्रत्येकं शुक्तिसम्मितम् ॥ १७ ॥ कल्कार्थं दीयते तत्र शनैर्मृद्वग्निना पचेत् । कोठकण्डूज्वरानाहहृल्लासारुचिपीनसान् ॥ १८ ॥ ग्रहणी पाण्डुता मूर्च्छाः कृमींश्चान्तर्बहिश्चरान् । विडंगाद्यमिदं तैलं नाशयेन्नात्र संशयः ॥ १९ ॥

वायविडंग पाँच सेर और सोमवल्ली (अभाव में काली जीरी) पाँच सेर इन दोनों को बारह सेर ६४ तोला जल में पकाये। जब चौथाई जल शेष रहे, तब उस क्वाथ में ६४ तोला तैल डाले और वायविडंग, इन्द्रायण, चीते की जड़, कलिहारी, गन्धप्रसारिणी, नील और पीत पुष्प का-पियावासा, कायफल, सोंठ, मिर्च, पीपल, त्रिफला, रासना और अरंडी की जड़ प्रत्येक दो-दो तोला ले। इनका कल्क तैल और क्वाथ में डालकर धीरे-धीरे मन्दाग्नि से पकाना चाहिये।

यह विडंगाद्य तैल कोढ़, खुजली, ज्वर,पेट फूलना, हल्लास, अरुचि, पीनस, ग्रहणी, पाण्डुरोग, मूर्च्छा और दोनों प्रकार के ( भीतरी और बाहरी ) कृमियों को निःसन्देह नाश करता है ॥ १५-१९ ॥

### धुस्तूरतैल ।

धुस्तूरपत्रकल्केन तद्रसेन च साधितम् । तैलमभ्यङ्गमात्रेण यूकां नाशयति ध्रुवम् ॥ २० ॥

धतूरे की पत्तियों का कल्क और धतूरे की पत्तियों के रस में तैल को पकाकर शिर में मालिश करने से जू अवश्य नष्ट होते हैं ॥ २० ॥

### त्रिफलाघृत ।

त्रिफला त्रिवृता दन्ती वचा काम्पिल्लकं तथा । सिद्धमेभिर्गवां मूत्रे सर्पिः कृमिविनाशनम् । सर्वान् कृमीन् प्रणुदति वज्रं मुक्तमिवासुरान् ॥ २१ ॥

त्रिफला, निसोत, दन्ती ( जमालगोटा की जड़ ), वच और कबीले का कल्क और गोमूत्र के साथ सिद्ध किए हुए घृत के सेवन करने से सब प्रकार के कृमि इस प्रकार नष्ट हो जाते हैं, जैसे इन्द्र के वज्र द्वारा असुरों का विनाश हुआ था ॥ २१ ॥

[1] —'कर्पूरेण' इति पाठान्तरम् ।

### त्रिफलाद्यघृत[1]।

त्रिफलायास्त्रयः प्रस्था विडंगप्रस्थ एव च। दीपनं[2] दशमूलञ्च लाभतः समुपाचरेत् ॥ २२ ॥ पादशेषे जलद्रोणे शृते सर्पिर्विपाचयेत्। प्रस्थोन्मितं सिन्धुयुतं तत्परं कृमिनाशनम् ॥ त्रिफलाघृतमेवद्धि लेह्यं शर्करया सह ॥ २३ ॥

दीपनं पञ्चकोलम्।

त्रिफला २ सेर ३२ तोला, वायविडंग ६४ तोला, पञ्चकोल १६ तोला और दशमूल १६ तोला लेकर १ मन ११ सेर १६ तोला जल में पकावे और १२ सेर ६४ तोला जल शेष रहने पर छान करके उस क्वाथ में ३ सेर १६ तोला घृत और १६ तोला लाहौरी नमक डाल करके धीमी आँच से यथाविधि घृत सिद्ध कर लेवे। इस घृत को शक्कर के साथ सेवन करने से सब प्रकार के कृमि नष्ट हो जाते हैं २२-२३

### कृमिरोग में हरिद्राखण्ड पारिभद्रावलेह।

स्वरसं पारिभद्रस्य प्रस्थमादाय यत्नतः। तदर्द्धां च सितां दत्त्वा घृतं कुडवसम्मितम् ॥ २४ ॥

प्रस्थार्द्धं रजनीचूर्णं दत्त्वा पाकं समाचरेत्। यदा दर्वीप्रलेपः स्यात्तदैषां चूर्णमाक्षिपेत् ॥ २५ ॥

चित्रकं त्रिफला मुस्तं विडंगं कृष्णजीरकम्। यमानीद्वयसिन्धूत्थं निर्गुण्डीफलमेव च ॥ २६ ॥ पाठाविडङ्गकञ्चैव सारिवाद्वयवासकौ। पलाशबीजं व्योषञ्च त्रिवृद्दन्ती सरेणुका ॥ २७ ॥ अरिष्टं सोमराजी च प्रत्येकन्तु द्विकार्षिकम्। शाणमितं खादेच्चोष्णञ्चानु पिवेन्नरः ॥ २८ ॥ कृमींश्च विंशतिविधान् नाशयेन्नात्र संशयः। दुष्टव्रणञ्च कुष्ठञ्च नाडीव्रणभगन्दरम् ॥ २९ ॥ शीतपित्तं विद्रधिञ्च दद्रुं चर्म्मदलं तथा। अजीर्णं कामलां गुल्मं श्वयथुञ्च विनाशयेत् ॥ ३० ॥ बलपुष्टिकरो ह्येष वलीपलितनाशनः। हरिद्राखण्डनामायं सर्वव्याधिनिषूदनः ॥ प्राणिनां हितकामो हि प्राह नागार्जुनो मुनिः ॥ ३१ ॥

द्रवद्वैगुण्यादष्टपलमिति ग्रन्थकर्त्तमतम्। पारिभद्रावलेहोऽयमित्यन्यत्र पाठः।

घ्नयम्। पिवेदुष्णाम्बुना वापि शूलगुल्मापतन्त्रकी[1] ॥ ७ ॥

शूल, गुल्म और अपतन्त्रकरोग में धनियाँ, हरड़, हींग, पुष्करमूल और तीनों लवणों के चूर्ण का उष्ण जल के साथ सेवन करना लाभदायक होता है। मात्रा १॥ माशा ॥ ७ ॥

यमान्यादि चूर्ण।

यमानी हिङ्गुसिन्धूत्थक्षारसौवर्चलाभयाः। सुरामण्डेन पातव्या वातशूलनिषूदनाः ॥ ८ ॥

अजवाइन, हींग, सेंधा नमक, यवक्षार, काला नमक और हरड़ के चूर्ण को ४ माशा की मात्रा में सुरामंड के साथ पीने से वातिक शूल नष्ट हो जाता है ॥ ८ ॥

विश्वादि क्वाथ।

विश्वमेरण्डजं मूलं क्वाथयित्वा जलं पिवेत्। हिङ्गुसौवर्चलोपेतं सद्यः शूलनिवारणम् ॥ ९ ॥

सोंठ और एरंड की जड़ के क्वाथ में हींग और काला नमक मिलाकर पान करने से शूलरोग शीघ्र शान्त हो जाता है।

हिङ्गुपुष्करमूलाभ्यां हिङ्गुसौवर्चलेन वा। विश्वैरण्डयवक्वाथः सद्यः शूलनिवारणः। तद्वदेव[2] यवक्वाथो हिङ्गुसौवर्चलान्वितः ॥ १० ॥

सोंठ, एरंड-मूल और इन्द्रजौ के क्वाथ में हींग और पुष्करमूल का ४ तोला चूर्ण मिलाकर अथवा हींग और काला नमक मिलाकर पान करे, तो शूल-रोग तत्काल नष्ट हो जाता है। इसी प्रकार केवल इन्द्रजौ के क्वाथ में हींग और काला नमक मिलाकर पान करने से भी शूलरोग शीघ्र नष्ट होता है ॥ १० ॥

सौवर्चलादिगुटिका।

सौवर्चलाम्लिकाजाजी मरिचैर्द्विगुणोत्तरैः। मातुलुङ्गरसैः पिष्ट्वा गुटिका वातशूलनुत् ॥ ११ ॥

काला नमक एक तोला, इमली दो तोले, जीरा ४ तोले और काली मिर्च ८ तोले; इनके चूर्ण को बिजौरा नींबू के रस में घोटकर गोलियाँ बना लेवे। इसका सेवन गर्म जल के साथ करने से वातिक शूल नष्ट होता है ॥ ११ ॥

बीजपूरकमूलञ्च घृतेन सह पाययेत्। जयेद्वातभवं शूलं माषमेकं प्रमाणतः ॥ १२ ॥

एक माशा बिजौरे नींबू के मूल का क्वाथ बना करके, उसमें घृत मिलाकर पान करे तो वातिक शूल नष्ट होता है ॥ १२ ॥

हिङ्ग्वादिगुटिका।

हिङ्ग्वम्लवेतसव्योषयमानीलवणत्रिकैः। बीजपूररसोपेतैर्गुटिका वातशूलनुत् ॥ १३ ॥

हींग, अमलबेत, त्रिकटु, अजवाइन और तीनों लवण को बिजौरे नींबू के रस में घोटकर गोलियाँ बना लेवे। यह गोली वातशूल को नष्ट करती है विशेष अनुभव ॥ १३ ॥

मृत्तिकास्वेद।

मृत्तिकां सजलां पाकाद् घनीभूतां पटे क्षिपेत्। कृत्वा तत्पोट्टलीं शूली यथास्वेदं निधापयेत् ॥ १४ ॥

जल में मिट्टी को घोलकर अग्नि पर पकावे। जब जल लेप के समान गाढ़ा हो जाय तब अग्नि पर से उतार ले और एक कपड़े के टूक में डालकर पोटली बना ले और गरम-गरम ही जहाँ पर शूल होता हो स्वेदन के लिये लगावे ॥ १४ ॥

---

१—पिवेदम्बुना , वातशूलगुल्मापतन्त्रकी इत्यादि पाठोऽन्यत्र प्रचरित तत्र यवाम्बुना इति यवक्वाथेनेत्यर्थः।

२—तद्वदयवक्वाथ इति पाठान्तरम्। ग्रन्थान्तरे तु नागरैरण्डयोः क्वाथः, क्वाथ इन्द्रयवस्य वेति पाठः।

तिलैश्च गुटिकां कृत्वा लेपयेज्जठरोपरि । गुटिका भ्रामयत्येषा शूलञ्चैवातिदुस्तरम् ॥ १५ ॥

तिलों को पीसकर उसकी गोली को पेट पर लेपन करे । इस प्रकार करने से अतिकठिन शूल अच्छा हो जाता है ॥ १५ ॥

बिल्वमूलतिलैरण्डं पिष्ट्वा चाम्लगुणाम्भसा । गुटिकां भ्रामयेदुष्णां वातशूलविनाशिनीम् ॥ १६ ॥

बेल के मूल की छाल, तिल और एरंड के मूल को खट्टी काँजी में पीसकर पोटली बना लेवे । इस पोटली को उष्ण करके पेट को सेंके । जिस स्थान पर शूल हो, वहीं पर घुमावें । कुछ देर तक ऐसा करने से वातिक शूल नष्ट हो जाता है ॥ १६ ॥

नाभिलेपाज्जयेच्छूलं मदनं काञ्जिकान्वितम् । जीवन्तीमूलकल्को वा सतैलः पार्श्वशूलनुत् ॥ १७ ॥

मैनफल को काँजी में पीसकर नाभि पर लेप करने से शूल-रोग नष्ट होता है । जीवन्ती के मूल के कल्क में तेल मिलाकर लेप करने से पसली का शूल दूर होता है ॥ १७ ॥

हिङ्ग्वादि चूर्ण ।

हिंग्वम्लकृष्णामलकं यवानी क्षाराभयासैन्धवतुल्यभागम् । चूर्णं पिबेद्वारुणिमण्डमिश्रं, शूले प्रवृद्धेऽनिलजे शिवाय ॥ १८ ॥

"अम्लोऽम्लवेतसः ॥"

हींग, अम्लवेत, पीपल, आँवला, अजवाइन, जवाखार, हरड़, सेंधा नमक, इन्हें बराबर मात्रा में मिलावे । मात्रा—२ रत्ती से ८ रत्ती तक । अनुपान—सुरामण्ड ( शराब के ऊपर का स्वच्छ भाग ) । यह चूर्ण वातजन्य शूल में लाभदायक है ॥ १८ ॥

श्यामादि चूर्ण ।

श्यामा बिडं शिग्रुफलानि पथ्या विडङ्गकम्पिल्लकमश्वमूत्री । कल्कं समं मद्ययुतञ्च पीत्वा शूलं निहन्यादनिलात्मकन्तु ॥ १९ ॥

'श्यामा वृद्धदारकः अश्वमूत्री शल्लकी' ।

विधारा, बिड़ नमक, सहिजने के बीज, हरड़, वायविडङ्ग, कमीला, अश्वमूत्री ( सल्लकी ), इनके चूर्ण को शराब के साथ पीने से वातजन्य शूल अच्छा हो जाता है । मात्रा—२ माशे ॥ १९ ॥

अथ पित्तशूलचिकित्सा ।

गुडशालियवाः क्षीरं सर्पिःपानं विरेचनम् । जाङ्गलानि च मांसानि भेषजं पित्तशूलिनाम् ॥ २० ॥

गुडोऽत्र शर्करा; पुरातनगुड इति वृद्धमतम् ।

गुड़, शाली, धान, जौ, दूध, घी, विरेचन-औषध और जंगली पशुओं का मांस पैत्तिक शूल के रोगियों के लिये लाभदायक होता है । इस श्लोक में गुड़ शब्द का अर्थ शक्कर है । पुराना गुड़ लिया जावे, ऐसा भी अनुभवी वृद्ध वैद्यों का मत है ॥ २० ॥

पैत्ते तु शूले वमनं पयोऽम्बुरसैस्तथेक्षोः सपटोलनिम्बैः । शीतावगाहाः पुलिनाः सवाताः कांस्यादिपात्राणि जलप्लुतानि ॥ २१ ॥

पैत्तिक शूल में जल मिश्रित दुग्ध अथवा परवल के पत्ते और नीम के पत्तों के अर्धसिद्ध क्वाथ से युक्त ऊख के रस के साथ मैनफल का सेवन करा के वमन कराना लाभदायक होता है । शीतल जल से स्नान, नदी के तट पर वायुसेवन और जलपूर्ण कांस्य-पात्र का उदर पर स्पर्श कराने से पैत्तिक शूल नष्ट होता है ॥ २१ ॥

पय आदि यथालाभं मदनफलयोगेना-

कण्ठं पीत्वा वमनम् । पटोलनिम्बयोर्-र्द्धसृतं मदनफलयुक्तं मधुहितञ्च पीत्वा विरेचनम् ।

विरेचनं पित्तहरञ्च शस्तं रसाश्च शस्ताः शशलावकानाम् । सन्तर्पणं लाजमधूपपन्नं योगाः सुशीताः मधुसम्प्रयुक्ताः ॥ २२ ॥

लाजसक्तुकं नारिकेलोदकेन माधुर्यार्थं मधु दत्त्वा सन्तर्पणम् ।

अर्त्यां ज्वरे पित्तभवेऽथ शूले घोरे विदाहे त्वतितर्षिते च । यवस्य पेयां मधुना विमिश्रां पिबेत् सुशीतां मनुजः सुखार्थी ॥ २३ ॥ धात्र्या रसं विदार्य्या वा त्रायन्ती गोस्तनाम्बुना । पिबेत् सशर्करं सद्यः पित्तशूलनिषूदनम् ॥ २४ ॥ शतावरीरसं क्षौद्रयुतं प्रातः पिबेन्नरः । दाहशूलोपशान्त्यर्थं सर्वपित्तामयापहम् ॥ २५ ॥ शतावरी सयष्ट्याह्वशाल्मलकुशगोक्षुरैः । शृतशीतं पिबेत्तोयं सगुडक्षौद्रशर्करम् । पित्तासृग्दाहशूलघ्नं सद्यो दाहज्वरापहम्[1] ॥ २६ ॥ तैलमेरण्डजं वापि मधुकक्वाथसंयुतम् । शूलं पित्तोद्भवं हन्ति गुल्मं पैत्तिकमेव च ॥ २७ ॥

पैत्तिक शूल में विरेचन, खरगोश और लवा आदि पक्षी के मांस का रस, नारियल का जल, मधु-मिश्रित धान के खील का चूर्ण और मधु-संयुक्त अन्यान्य सुशीतल मुष्टि-योग पृथक्से प्रयोग लाभदायक होते हैं । धान के लावा के सतुवा में मिठास के लिए मधु मिलाकर नारियल के जल के साथ सेवन करना चाहिए । प्रमत्त, ज्वर, पित्त-शूल, प्रबल दाह और अधिक प्यास में मधु-मिश्रित जौ की शीतल पेया का पान कराना लाभदायक होता है । आँवले के रस में अथवा विदारीकंद के रस में अथवा त्रायमाण के रस में और मुनक्का के रस में शक्कर मिलाकर पान करने से पैत्तिक शूल तत्काल नष्ट हो जाता है । प्रातःकाल शतावरि के रस में मधु मिलाकर पान करने से दाह, शूल और सब प्रकार के पैत्तिक रोग नष्ट हो जाते हैं । शतावरि, मुलेठी, खरेटी, कुश और गोखुरू के क्वाथ को शीतल करके गुड़, मधु और शक्कर मिलाकर पान करने से रक्त-पित्त, दाह, पैत्तिक शूल और दाह-युक्त ज्वर ये सब तत्काल विनष्ट हो जाते हैं । मुलेठी के क्वाथ में एरंड का तैल मिलाकर पीने से पैत्तिक शूल और पैत्तिक गुल्म-रोग नष्ट होता है ॥ २१-२७ ॥

1—दिह्वावर्यादिरार्द्रद्रिमिति योगरत्नाकरे पाठः ।

भक्षिवात् पित्तशूलघ्नं धात्रीचूर्णं समाक्षिकम् ॥ २८ ॥

मधु के साथ आँवला के चूर्ण का सेवन करने से पैत्तिक शूल नष्ट होता है ॥ २८ ॥

बृहत्यादि क्वाथ ।

बृहत्यौ गोक्षुरैरण्डकुशकाशेक्षुवालिकाः । पीताः पित्तभवं शूलं सद्यो हन्युः सुदारुणम् ॥ २९ ॥

छोटी कटेरी, बड़ी कटेरी, गोखुरू, अंडी की जड़, कॉस तृण मिलाकर २ तोले, क्वाथ के लिये जल ३२ तोले, बचा हुआ क्वाथ ४ तोले । इस क्वाथ के पान करने से कठिन पित्तजन्य शूल अच्छा हो जाता है ॥ २९ ॥

त्रिफलादि क्वाथ ।

त्रिफलारग्वधक्वाथं सक्षौद्रं शर्करान्वितम् । पाययेद्रक्तपित्तघ्नं दाहशूलनिवारणम् ॥ ३० ॥

त्रिफला तथा अमलतास के ४ तोला क्वाथ में शहद और खाँड डालकर पीने से रक्तपित्त, दाह, शूल नष्ट होते हैं ॥ ३० ॥

त्रिफलादि क्वाथ ।

त्रिफलानिम्बयष्ट्याह्वकटुकारग्वधैः

घृतम् । पाययेन्मधुसंमिश्रं दाहशूलोपशान्तये ॥ ३१ ॥

त्रिफला, नीम की छाल, मुलहठी, कुटकी, अमलतास का गूदा, इनके क्वाथ में शहद मिलाकर पीने से दाह तथा शूल शान्त होते हैं ॥ ३१ ॥

अथ श्लैष्मिक शूलचिकित्सा ।

श्लेष्मात्मके छर्दनलङ्घनानि शिरोविरेकं मधुसीधुपानम् । मधूनि गोधूमयवानरिष्टान् सेवेत रूक्षान् कटुकांश्च सर्वान् ॥ ३२ ॥

मधुसीधु इत्येकपदं मद्यविशेषस्य संज्ञा ।

श्लैष्मिक शूल-रोग में वमन, लंघन, शिरोविरेचन (नस्य), मधुसीधु (मद्य), मधु (शहद), गेहूँ, जौ, अरिष्ट, रूक्ष द्रव्य और चरपरे द्रव्य लाभदायक होते हैं ॥ ३२ ॥

लवणत्रयसंयुक्तं पञ्चकोलं सरामठम् । सुखोष्णेनाम्बुना पीतं कफशूलनिवारणम् ॥ ३३ ॥ बिल्वमूलमथैरण्डं[1] चित्रकं विश्वभेषजम् । हिङ्गुसैन्धवसंयुक्तं सद्यः शूलनिवारणम् ॥ ३४ ॥

तीनों लवण, पञ्चकोल (पीपरि, पिपरामूल, चव्य, चीता और सोंठ) और हींग के चूर्ण को गरम जल के साथ सेवन करने से श्लैष्मिक शूल निवृत्त हो जाता है। बेल की जड़, एरण्ड की जड़, चीता और सोंठ के क्वाथ में हींग और सेंधा नमक मिलाकर पीने से श्लैष्मिक शूल तत्काल नष्ट हो जाता है ॥ ३३, ३४ ॥

दशमूलक्वाथ ।

दशमूलकृतः क्वाथः सयवक्षारसैन्धवः । हृद्रोगगुल्मशूलानि कासं श्वासञ्च नाशयेत् ॥ ३५ ॥

दशमूल के क्वाथ में जवाखार तथा सेंधा नमक डालकर पीने से हृदयरोग, शूल तथा श्वास आदि रोग अच्छे हो जाते हैं ॥ ३५ ॥

कट्यादिशूलचिकित्सा ।

हिङ्गुसौवर्चलं शुण्ठी पथ्या च द्विगुणोत्तरा । एतच्चूर्णं कटीकुक्षिपार्श्वहृद्बस्तिशूलनुत् ॥ ३६ ॥

हींग १ भाग, काला नमक २ भाग, सोंठ ४ भाग और हरड़ ८ भाग लेकर चूर्ण बनावे। इस चूर्ण के सेवन करने से कटि, कुक्षि, पसली, हृदय और बस्ति के शूल नष्ट होते हैं ॥ ३६ ॥

मातुलुङ्गरसो वापि शिग्रुक्वाथस्ततः परः । सक्षारो मधुना पीतः पार्श्वहृद्बस्तिशूलनुत् ॥ ३७ ॥

बिजौरे की जड़ या सहिंजने की छाल के ४ तोला क्वाथ में जवाखार तथा शहद डालकर पिलाने से पसवाड़े का दर्द, हृदय का शूल तथा मूत्राशय का शूल अच्छे हो जाते हैं ॥ ३७ ॥

एरण्डसप्तक ।

एरण्डबिल्वबृहतीद्वयमातुलुङ्गपाषाणभित्त्रिकटुमूलकृतः कषायः । सक्षारहिङ्गुलवणो रुबुतैलमिश्रः श्रोण्यंसमेढ्रहृदयस्तनरुक्प्रलेपः(?) ॥ ३८ ॥

अंडी की जड़, बेल की जड़, दोनों भाँति की कटेरी, बिजौरे की जड़, पाषाण भेद, गोखुरू मिलाकर २ तोले, क्वाथ के लिये जल ३२ तोले, बचा हुआ क्वाथ ४ तोले। इसमें जवाखार, हींग तथा सेंधा नमक ४।४ रत्ती डालकर गरम क्वाथ को अंडी के तेल के साथ पीना चाहिये। इससे कमर का दर्द, कंधे का दर्द, शिश्नेन्द्रियशूल, हृदयशूल और स्तनों का दर्द अच्छा हो जाता है ॥ ३८ ॥

हिंग्वादि चूर्ण ।

हिंगुसौवर्चलं पथ्या विडसैन्धवतुम्बुरु

[1] १—ग्रन्थान्तरे तु वातशूलचिकित्साधिकारे लिखितमिदं पद्यम् ।

पौष्करञ्च पिबेच्चूर्णं दशमूलयवाम्भसा॥ ३९॥ पार्श्वहृत्कटिपृष्ठांशशूले तन्द्राप तानके। शोथे श्लेष्मसेके च कर्णरोगे च शस्यते॥ ४०॥

हींग, काला नमक, हरड़, बिड नमक, सेंधा नमक, धनियाँ, पोहकरमूल इनके चूर्ण को बराबर मात्रा में मिला ले। मात्रा—४ रत्ती से ८ रत्ती तक। इस चूर्ण को दशमूल तथा जौ के क्वाथ के साथ सेवन कराना चाहिए। इसके सेवन से पसवाड़े का दर्द, हृदय का दर्द, कमर का दर्द, पीठ का दर्द, कंधे का दर्द, तन्द्रा, अपतानक, सूजन, कफप्रसेक (मुँह और नाक द्वारा कफ गिरना) तथा कान के रोग अच्छे हो जाते हैं॥ ३९-४०॥

हिंग्वादि गुटिका।

हिंगु त्रिकटुकं कुष्ठं यवक्षारोऽथ सैन्धवम्। मातुलुङ्गरसोपेता प्लीहशूलापहा गुटी॥ ४१॥

हींग, त्रिकुटा, कूठ, जवाखार, सेंधा नमक इन्हें बराबर मात्रा में मिलाकर बिजौरे के रस से गोली बनाये। मात्रा—४ रत्ती से ८ रत्ती तक। इसके सेवन से तिल्ली, शूल अच्छे हो जाते हैं॥ ४१॥

अथामशूलचिकित्सा।

आमशूले क्रिया कार्या कफशूलविनाशिनी। सेव्यमामहरं सर्वं यदग्निबलवर्द्धनम्॥ ४२॥

कफस्य तुल्यस्थानात् कफशूले यत् पञ्चकोलादियुक्तं सदामशूले कार्यम्।

आम-शूल में कफ-शूलोक्त चिकित्सा करनी चाहिए। सब अग्नि-वर्धक, बल-वर्धक और आम नाशक औषधों का सेवन करना चाहिए॥ ४२॥

मुस्तादि चूर्ण

मुस्तां वचां तिक्तकरोहिणीञ्च तथाभयां निर्दहनीञ्च तुल्याम्। पिबेत्तु गोमूत्रयुतां कफोत्थशूले तथामस्य च पाचनार्थम्॥ ४३॥

मोथा, बच, कुटकी, हरड़, मूर्वा की जड़, इन्हें बराबर मात्रा में मिलाकर गोमूत्र के साथ शूलरोगी के लिये पिलाने से आमरस पच जाता है मात्रा—२ माशे॥ ४३॥

चतुःसम चूर्ण।

दीप्यकं सैन्धवं पथ्या नागरञ्च चतुःसमम्। चूर्णं शूलं जयत्याशु मन्दस्याग्नेश्च दीपनम्॥ ४४॥

अजवाइन, सेंधा निमक, हरड़ और सोंठ इनको समभाग लेकर चूर्ण बनाये। इस 'चतुःसम' चूर्ण के सेवन करने से शूल-रोग का निवारण और अग्नि का दीपन होता है॥ ४४॥ मात्रा—२ माशा॥

पित्तानिलशूलचिकित्सा।

समाक्षिकं बृहत्यादि पिबेत् पित्तानिलात्मके। व्यामिश्रं वा विधिं कुर्यात् शूले पित्तानिलात्मके॥ ४५॥

वात-पैत्तिक शूल में मधुमिश्रित कटेरी, गोखुरू और एरंड आदि के क्वाथ के पीने से तथा मिश्रित क्रिया करने से अर्थात् वातज शूल और पित्तज शूल में जो पृथक्-पृथक् चिकित्सा कही गई है उनको मिलाकर देने से लाभ होता है॥ ४५॥

कफपित्तशूलचिकित्सा।

पित्तजे कफजे चापि क्रिया या कथिता पृथक्। एकीकृत्य प्रयुञ्जीत तां क्रियां कफपित्तजे॥ ४६॥

पैत्तिक और श्लैष्मिक शूल-रोगों में जो अलग-अलग चिकित्साएँ लिखी गयी हैं उनको मिश्रित करके कफ-पित्तज शूल में प्रयोग करना चाहिए॥ ४६॥

पटोलादि क्वाथ।

पटोलत्रिफलारिष्टक्वाथं मधुयुतं

पिबेत् । पित्तश्लेष्मज्वरच्छर्दिदाहशूलोपशान्तये ॥ ४७ ॥

परवल के पत्ते त्रिफला तथा नीम की छाल के ४ तोला क्वाथ में शहद डालकर रोगी को पिलाना चाहिए । इसके सेवन से कफपित्त-प्रधान ज्वर, वमन, दाह तथा शूल अच्छे हो जाते हैं ॥ ४७ ॥

वातश्लेष्मशूलचिकित्सा ।

रसोनं मधुसंमिश्रं पिबेत् प्रातः प्रकाङ्क्षितः । वातश्लेष्मभवं शूलं निहन्तुं वह्निदीपनम् ॥ ४८ ॥

१ माशा लहसुन के रस में मधु मिलाकर पीने से वातश्लैष्मिक शूल का निवारण और अग्नि का दीपन होता है ॥ ४८ ॥

रुचकादि चूर्ण ।

चूर्णं समं रुचकहिंगुमहौषधानां शुण्ठ्यम्बुना कफसमीरणसम्भवासु । हृत्पार्श्वपृष्ठजठरार्तिविषूचिकासु पेयं तथा यवरसेन तु विड्विबन्धे ॥ ४९ ॥

सोंठ के क्वाथ के साथ काला नमक, हींग तथा सोंठ मिले हुए चूर्ण को सेवन करने से कफ-वातजन्य हृदय का शूल, पीठ का दर्द, पसवाड़े का दर्द, पेट का दर्द तथा हैजा आदि रोग अच्छे हो जाते हैं । यदि कब्ज हो तो इस चूर्ण को जौ के क्वाथ के साथ पीना चाहिए । चूर्ण की मात्रा—६ रत्ती ॥ ४९ ॥

त्रिदोषशूलचिकित्सा ।

शङ्खचूर्णं सलवणं सहिङ्गुव्योषसंयुतम् । उष्णोदकेन तत्पीतं शूलं हन्ति त्रिदोषजम् ॥ ५० ॥

सुदग्धस्य शङ्खस्य चूर्णं माषमेकमधिकं वा लवणव्योषयोर्मिलित्वा माषकद्वयं हिङ्गुनो रक्तिकाद्वयं दत्त्वा पिबेत् श्लेष्मोत्तरे योगोऽयम् । अन्ये तु भागानुक्तत्वात् सर्वं समभागम् । इति प्राहुः ।

शङ्खभस्म १ भाग, सेंधा नमक और त्रिकटु ये दोनों मिलाकर २ भाग, हींग चौथाई, इनका गरम जल के साथ सेवन करने से कफ-प्रधान सान्निपातिक शूलरोग नष्ट होता है । मात्रा—४।६ रत्ती की उपयुक्त है ॥ ५० ॥

गोमूत्रशुद्धं सुमृतं मण्डूरं वरया सह । विलिहन् मधुसर्पिर्भ्यां शूलं हन्ति त्रिदोषजम् ॥ ५१ ॥

त्रिफलाचूर्णसमं मण्डूरम् ।

गोमूत्र से शुद्ध किया हुआ एवम् भस्म किया हुआ मंडूर एक भाग और त्रिफला चूर्ण एक भाग लेकर घृत और मधु मिलाकर अवलेह बना लेवे । इसके सेवन करने से त्रिदोषजन्य शूलरोग नष्ट होता है । मात्रा १॥-२ माशा ॥५१॥

विदारीदाडिमरसः सव्योषलवणान्वितः । क्षौद्रयुक्तो जयत्याशु शूलं दोषत्रयोद्भवम् ॥ ५२ ॥

विदारीकन्द का रस १ तोला, अनार का रस २ तोला, इसके साथ त्रिकटु, सेंधा नमक तथा शहद मिलाकर पीने से त्रिदोषजन्य शूल अच्छा होता है ॥ ५२ ॥

एरण्डद्वादशकम् ।

एरण्डफलमूलानि बृहतीद्वयगोक्षुरम् । पर्णिन्यः सहदेवा च सिंहपुच्छीक्षुवालिका ॥ ५३ ॥ तुल्यैरेतैः शृतं तोयं यवक्षारयुतं पिबेत् । पृथग्दोषभवं शूलं हन्यात्सर्वभवं तथा ॥ ५४ ॥

अंडी का फल, अंडी की जड़, छोटी कटेरी, बड़ी कटेरी, गोखुरू, शालपर्णी, पृश्निपर्णी, मुद्गपर्णी माषपर्णी, सहदेवा ( वृक्षोत्पलविशेष ), इक्षुवालिका ( लताविशेष ), पृश्निपर्णीभेद, मिलाकर २ तोले, पाक के लिये जल ३२

तोला, बचा हुआ क्राथ ८ तोले। इस क्वाथ में जवाखार ४ रत्ती डालकर पीने से वातजन्य, पित्तजन्य, कफजन्य, त्रिदोषजन्य शूल अच्छे हो जाते हैं ॥ ५३-५४ ॥

दग्धमनिर्गतधूमं मृगशृङ्गं गोघृतेन सह लीढम्। हृदयनितम्बजशूलं हरति शिखी दारुनिवहमिव ॥ ५५ ॥

हरिणशृङ्गं सङ्कुट्य अन्तर्धूमेन दग्ध्वा तद्भस्म घृतेन सह लेह्यम्।

हरिन के सींग को कूटकर, अन्तर्धूम भस्म करके घृत के साथ सेवन करने से हृदय और नितम्ब (चूतड़) के शूल को इस प्रकार नष्ट करता है, जैसे अग्नि लकड़ी के ढेर को भस्म कर देती है ॥ ५५ ॥ मात्रा—३ रत्ती

शूलरोग में पथ्य।

छर्दिस्वेदोलङ्घनपांशुवर्तिबस्तिर्निद्रारेचनं पाचनं च। अब्दोत्पन्नाः शालयो वा यवा मण्ड-स्तप्तक्षीरं जाङ्गलानां रसाश्च ॥ ५६ ॥ पटोलशोभाञ्जनकारवेल्लवार्ताकुमाम्राणि-पक्वोलिमानि। द्राक्षाकपित्थं रुचकं पियालं शालिञ्चपत्राणि च वास्तुकानि ॥ ५७ ॥ सामुद्रसौवर्चलहिङ्गु विश्वं विडं शताह्वा लशुनं लवङ्गम्। एरण्डतैलं सुरभीजलं च तप्ताम्बु जम्बीररसोऽपि कुष्ठम् ॥ ५८ ॥ लघूनि च क्षारजाः सिकेति वर्गो हितः शूल-गदार्दितेभ्यः ॥ ५९ ॥

वमन, स्वेदन, लंघन, गुदामें बत्ती (सपोज़िटरी) लगाना, बस्तिकर्म, सोना, जुलाब, पाचनद्रव्य साल भर पुराने चावल, गर्म दूध, जंगली जीवों का मांस रस, परवल, सहजना, करेला, बैंगन, पका आम, मुनक्का, कैथ, कालानमक चिरौंजी शालिंच शाकके पत्ते बथुआ समुद्रनमक सौवरनमक हींग सोंठ विड़नमक, सौंफ, लहसन अंडी का तेल, गौमूत्र गर्मजल जमीरी नींबू, कूठ इनके खारों का चूर्ण शूल रोग में पथ्य है।

शूल में अपथ्य।

विरुद्धान्यन्नपानानि जागरं विषमा-शनम्। रूक्षतिक्तकषायाणि शीतलानि-गुरूणि च ॥ ६० ॥ व्यायामं मैथुनं मद्यं लवणं कटु वैदलम्। वेगरोधं शुचं क्रोधं वर्जयेच्छूलवान्नरः ॥ ६१ ॥

परस्पर विरोधी अन्नपान रात में जागना विषम भोजन रूखा कड़वा कसैला शीतल और गुरुपाकी अन्न, व्यायाम, मैथुन, मद्य, लवण, कटु पदार्थ और वैदल (दाल) का सेवन, मल-मूत्रादि वेगों का रोकना, शोक और क्रोध करना शूल-रोगीके लिए त्याज्य हैं ॥ ६१ ॥

माषादि शिम्बीधान्यानि मद्यानि-वनितादिकम्। आतपं जागरं क्रोधं शुचं सन्धानमम्लकम् वर्जयेत्पक्तिशूलार्तस्तथा-ऽजीर्णं तिलानपि।

परिणामशूल के रोगी को उड़द आदि शिम्बीधान्य अनेक प्रकार की शराब, स्त्रीसंभोग शीतल पदार्थ (बरफ आदि) का सेवन धूप में चलना, जागना, क्रोध, शोक, संधान की हुई खट्टी चीजें (अचार कांजी आदि) भोजन और तिल का सेवन नहीं करना चाहिए ॥ ५९-६० ॥

अथ परिणामशूलचिकित्सा।

वमनं तिक्तमधुरैर्विरेकश्चात्र शस्यते। बस्तयश्च हिताः शूले परिणामसमुद्भवे ६२

परिणाम-शूल में कड़वे और मधुर-द्रव्य के द्वारा, विरेचन और बस्ति-क्रिया विशेष लाभ-दायक होती है ॥ ६२ ॥

नागरतिलगुडकल्कं पयसा संसाध्य यःशुमानद्यात्। उग्रं परिणतिशूलं तस्यापैति सप्तरात्रेण ॥ ६३ ॥

शुण्ठीचूर्णगुडयोः प्रत्येकं कर्षः तिला ४ पलमिताः एतयोः पायसं कृत्वा भक्षयेत्।

सोंठ का चूर्ण एक तोला, गुड़ एक तोला, तिल १६ तोला, दूध में पकाकर ( यवागू की तरह ) सेवन करने से बलवान् परिणाम-शूल सात दिन में अच्छा हो जाता है ॥ ६३ ॥

परिणामशूल में शम्बूकभस्म।

शम्बूकजं भस्मपीतं जलेनोष्णेन तत्क्षणात्। पक्तिजं विनिहन्त्येतत् शूलं विष्णुरिवासुरान् ॥ ६४ ॥

निर्मांसीकृतशम्बूकभस्म माषमेकं द्वयं वा घृताक्तमुखकुहरेण उष्णाम्बुना मेलयित्वा पेयम्।

छोटी शंखी ( घोंघा ) के भीतर का मांस अलग करके शंखी का भस्म बना लेवे। उसको गरम जल में मिलाकर सेवन करने से, यह परिणाम-शूल को इस प्रकार नष्ट करता है जैसे विष्णु भगवान् असुरों को नष्ट करते हैं। इसे ½ माशा की मात्रा में सेवन करे किन्तु पहिले मुख को घी से चिकना कर लेना चाहिए ॥ ६४ ॥ ( मुख को जला देता है इसलिए अधिक मधु या घृत मिलाकर ले। )

दध्नाऽप्यनुसरेणाथात् सतीनयवसक्तुकान्। अचिरान्मुच्यते शूलाद्रोऽन्नपरिवर्जनात् ॥ ६५ ॥

अन्न भोजन का परित्याग करके मलाई-सहित दही के साथ मटर और जौ के सत्तू के सेवन करने से शूल-रोग शीघ्र शान्त हो जाता है ॥ ६५ ॥

तिलनागरपथ्यानां भागं शम्बूकभस्मनाम्। द्विभागगुडसंयुक्तां गुटीं शाणैकसम्मिताम् ॥६६॥ शीताम्बुपानात् प्रत्यहं भक्षयेत् क्षीरभोजनः। सायाह्ने रसकं पीत्वा नरो मुच्येत दुर्जयात् ॥ ६७ ॥ परिणामसमुत्थाच्च शूलाच्चिरभवादपि॥६८॥

तिल, सोंठ, हरड़ और छोटे शंख ( घोंघा ) की भस्म प्रत्येक एक-एक भाग और गुड़ आठ भाग; सबको मिलाकर तीन-तीन माशे की गोलियाँ बना लेवे और शीतल जल के साथ सेवन करे। प्रातःकाल दुग्ध और सायंकाल में मांस के रस का पान करना पथ्य है। इसके द्वारा प्राचीन परिणाम-शूल भी तत्काल नष्ट हो जाता है ॥ ६७-६८ ॥

शम्बूकादि गुटिका।

शम्बूकं त्र्यूषणञ्चैव पञ्चैव लवणानि च। समांशा गुटिकाः कार्य्याः कलम्बकरसेन च ॥ ६९ ॥ प्रातर्भोजनकाले वा भक्षयेच्चयथाबलम्। शूलाद्विमुच्यते जन्तुः सहसा परिणामजात् ॥ ७० ॥

सर्वं समांशं कलम्बकरसेन मर्दयित्वा माषकचतुष्टयमिता वटिकाः कार्य्याः। तत एकामुष्णजलेन पिबेत्।

छोटे शंख ( घोंघा ) की भस्म १ तोला, त्रिकटु एक तोला और पाँचों नमक मिलाकर १ तोला; इन सबको एकत्र कर केरमुआ के साग के रस में घोट करके चार-चार माशे की गोलियाँ बना लेवे। प्रातःकाल अथवा भोजन के पूर्व एक-एक गोली, गरम जल के साथ सेवन करने से परिणामशूल अवश्य शान्त हो जाता है[1] ॥ ६९-७० ॥

शंखरस गुटिका।

पलानि चिञ्चाक्षारस्य पञ्च पञ्च पलानि च। लवणानां क्षिपेत् मध्यद्वयं जम्बीरवारिणः ॥ ७१ ॥ पलद्वादश शङ्खस्य भस्मीभूतं क्षिपेत् पुनः। पूर्वद्रवेण संमर्द्य हिङ्गुव्योषचतुःपलम् ॥ ७२ ॥ रसामृतसुगन्धानां पलार्द्धञ्च पृथक् पृथक्। दद्यात् समस्तं संमर्द्य जम्बीराम्ले दिन-

---

[1] मात्रा १॥ माशे होनी चाहिए।

भयम् ॥७३॥ बदरास्थिप्रमाणेन गुटिकाः कारयेद्भिषक् । भक्षयेत् प्रातरुत्थाय तोयमुष्णं पिबेदनु ॥ ७४ ॥ शूलञ्च सर्वगुल्मञ्च अजीर्णपरिणामजम् अन्त्रशूलं परिशूलं हृच्छूलञ्च विशेषतः ॥ ७५ ॥ कुक्षिशूलं पार्श्वशूलं पृथग्वातादिसम्भवम् । आमशूलमुदावर्त्तं नाशयेन्नात्र संशयः ॥ ७६ ॥

तिन्तिडीत्वग्भस्म पञ्चपलानि पञ्चलवणं प्रत्येकं पलं शङ्खभस्म १२ पलानि जम्बीररसांशं अष्टपलानि शनैः शनैः पक्त्वा पश्चात् हिङ्गुशुण्ठीपिप्पलीमरिचानां चूर्णं प्रत्येकं पलमितं रसगन्धकामृतानां प्रत्येकं ४ तोलकानि सर्वमेकीकृत्य जम्बीररसेन मर्दयित्वा दिनत्रयं रौद्रे शोषयेत्ततो बदरास्थिमिता वट्यः कार्य्याः तत एकामुष्णजलेन भक्षयेत् ।

इमली का क्षार २० तोला, पांचों नमक प्रत्येक चार चार तोला, शंखभस्म ४८ तोला, नींबू का रस ३ सेर १६ तोला; इनको धीमी आंच में पकाकर, हींग, सोंठ, पीपर और मिर्च चार-चार तोला, और पारा, गन्धक और विष प्रत्येक दो-दो तोला; इन द्रव्यों को नींबू के रस में घोट करके दो दिन घाम में सुखाकर झरबेर की गुठली के समान गोलियां बनाकर, गरम जल के साथ एक-एक गोली खा लेने से परिणामशूल आदि अवश्य नष्ट हो जाते हैं ॥ ७३-७६ ॥

परिणामजशूल में सक्तुप्रयोग।

यः पिबति सप्तरात्रं सक्तूनेकान् कलाययूषेण । स जयति परिणामजं शूलं चिरजमपि किमुत नूतनजम् ॥ ७६ ॥

सात रात्रि तक केवल सत्तू, मटर के यूष के साथ पीने से, प्राचीन और नवीन परिणामशूल अच्छा हो जाता है ॥ ७६ ॥

लौहचूर्णं वरायुक्तं विलीढं मधुसर्पिषा । परिणामशूलं शमयेत्तन्मलं वा प्रयोजितम् ॥ ७७ ॥

असमान मात्रा में घृत और मधु के साथ लोह-भस्म या मंडूर भस्म २।३ रत्ती और त्रिफलाचूर्ण १ मा० के सेवन करने से परिणामशूल नष्ट हो जाता है ॥ ७७ ॥

कृष्णामयालोहचूर्णं लिह्यात्समधुशर्करम् । परिणामभवं शूलं सद्यो हन्ति सुदारुणम् ॥ ७८ ॥ मधुशर्करेति स्थाने गुडदानाघोषान्तरं भवति ।

पीपल, हरड़, लोहभस्म इन्हें बराबर मात्रा में मिलाकर शहद तथा खाँड के साथ चाटने से कठिन परिणामशूल अच्छा होता है। मात्रा ३।६ रत्ती ॥ ७८ ॥

पथ्या लोहरजः शुण्ठीचूर्णं माक्षिकसर्पिषा । परिणामरुजां हन्ति वातपित्तकफात्मिकाम् ॥ ७९ ॥

हरड़, लोहभस्म, सोंठ इन्हें बराबर मात्रा में मिलाकर शहद तथा घृत के साथ सेवन करने से वातजन्य, पित्तजन्य, कफजन्य, परिणामशूल अच्छा हो जाता है मात्रा ३।४ रत्ती ॥ ७९ ॥

दधिकघृत।

पिप्पली नागरं बिल्वं कारवीचव्यचित्रकम् । हिंगुदाडिमवृक्षाम्लं वचासाराम्लवेतसम् ॥ ८० ॥ वर्षाभूकृष्णलवणमजाजीबीजपूरकम् । दधि त्रिगुणितं सर्पिस्तत्सिद्धं दाधिकं घृतम् ॥ ८१ ॥ गुल्मार्शःप्लीहहृत्पार्श्वशूलयोनिरुजापहम् । दोषसंशमनं श्रेष्ठं दाधिकं परमं स्मृतम् ॥८२॥

गाय का घी ४ सेर, दही १२ सेर, कल्क के लिये—पीपल, सोंठ, बेल की जड़, काला जीरा, चव्य, चित्रक, हींग, अनारदाना, बिजौरा, वच,

जवाखार, अम्लवेत; सोंठी, कालानमक, जीरा बिजौरे की जड़ मिलाकर १ सेर, विधिपूर्वक घृत सिद्ध करके रोगी को सेवन कराना चाहिए। इस घृत के सेवन से गुल्म, अर्श, प्लीहा, हृदयशूल तथा पसवाड़े का शूल अच्छा हो जाता है। दोषोंको शमन करने के लिये यह घृत परम उत्तम औषध है। मात्रा—१ माशे से १ तोला तक ॥ ८०-८२ ॥

### हिंग्वादि चूर्ण ।

सहिंगुतुम्बुरुव्योषयमानीचित्रकाभयाः। सक्षारलवणाश्चूर्णं पिबेत्मातः सुखाम्बुना ॥८३॥ विष्मूत्रानिलशूलघ्नं पाचनं वह्निदीपनम् ॥ ८४ ॥

हींग, धनियाँ, त्रिकटु, अजवाइन, चित्रक, हरड़, जवाखार, सैंधानमक इनको बराबर मात्रा में मिलाकर चूर्ण करे, चूर्ण को प्रातः गुनगुने पानी से सेवन करावें। (मात्रा—१ माशा) यह चूर्ण पाचक, अग्निदीपक तथा शूल को मन्द करनेवाला है ॥ ८३-८४ ॥

### विडङ्गादिमोदक ।

विडंगतण्डुलव्योषं त्रिवृद्दन्ती सचित्रकम्। सर्वाण्येतानि संहृत्य सूक्ष्मचूर्णानि कारयेत् ॥ ८५ ॥ गुडेन मोदकं कृत्वा खादेदुष्णेन वारिणा। जयेत् त्रिदोषजं शूलं परिणामसमुद्भवम् ॥ ८६ ॥

छिले हुए बिडङ्ग, त्रिकुटा, निसोत, दन्ती की जड़, चित्रक, इनका महीन चूर्ण करके चूर्ण से दुगुने गुड़ से विधिपूर्वक लड्डू बनावे। मात्रा ३ माशे। अनुपान—गरम जल। इसके सेवन से सान्निपातिक तथा परिणामशूल अच्छा हो जाता है ॥ ८५-८६ ॥

### लौहगुटिका ।

लौहस्य रजसो भागस्त्रिफलायास्त्रयस्तथा। गुडस्याष्टौ तथा भागा गुडान्मूत्रं चतुर्गुणम् ॥ ८७ ॥ एतत्सर्वञ्च विपचेद् गुडपाकविधानवित्। लिहेच्च तद्यथाशक्ति वातजे शूले च पाकजे ॥ ८८ ॥

लोहभस्म १ भाग, त्रिफला ३ भाग, गुड़ ८ भाग, गोमूत्र ३२ भाग इसे गुड़पाक की विधि से पकाकर रोगी को शक्ति के अनुसार सेवन कराना चाहिए। मात्रा—१॥ माशा। इसके सेवन से वात एवं परिणामज शूल अच्छा होता है ॥ ८७-८८ ॥

### भीमवटकमण्डूर ।

कोलाग्रन्थिकसहितैर्विश्वौषधमागधीयवक्षारैः। मस्थमयोरजसां पलिकांशैश्चूर्णितैर्मिश्रैः ॥ ८९ ॥ अष्टगुणमूत्रयुक्तं क्रमपाकात् पिण्डतां नयेत्सर्वम्। कोलप्रमाणवटिकास्तिस्रो भोज्यादिमध्यविरतौ च ॥ ९० ॥ रससर्पिर्यूषपयोमांसैरनघरो निवारयति। अन्नविवर्त्तनशूलं प्लीहागुल्माग्निसादांश्च ॥ ९१ ॥

मण्डूरभस्म ६४ तोला को ४ सेर ३२ तोला गोमूत्र में पाक करे, जब पकने पर आवे तो चव्य, पीपलामूल, सोंठ, पीपल, जवाखार इन एक के ४ तोला चूर्ण को डालकर अच्छी तरह मथकर पिण्डाकार होने पर गोली बना ले। मात्रा—२ रत्ती से ४ रत्ती, इन्हें भोजन के पहिले, बीच में तथा आखिर में सेवन कराना चाहिए। पथ्य—मांसरस, घृत मूँग आदि का यूष, दूध, मांस। इस प्रकार इस औषधि-सेवन से परिणामशूल, प्लीहा तथा मन्दाग्नि रोग अच्छे होते हैं ॥ ८९-९१ ॥

### लौहामृत ।

तनूनि लोहपत्राणि तिलोत्सेधसमानि च। काशिकामूलकल्केन संलिप्य सर्पपेण वा ॥ ९२ ॥ विशोष्य सूर्यकिरणैः पुनरेवावलेपयेत्। त्रिफलायाः जले ध्मातं

यापयेच्च पुनः पुनः ॥ ९३ ॥ ततः सञ्चूर्णितं कृत्वा कर्पटेन तु छानयेत् । भक्षयेन्मधुसर्पिर्भ्यां यथाऽग्न्येतत्प्रयोजयेत् ९४॥ गुञ्जार्द्धं गुञ्जकं वाथ द्विगुञ्जकमथापि वा । छागस्य पयसः कुर्यादनुपानममावतः ॥९५॥ गवां घृतेन दुग्धेन चतुःपञ्चगुणेन च । पक्तिशूलं निहन्त्येतन्मासेनैकेन निश्चितम् ॥ ९६ ॥ लोहामृतमिदं श्रेष्ठं ब्रह्मणा निर्मितं पुरा । ककारपूर्वकं यच्च यच्चाम्लं परिकीर्तितम् ॥ ९७ ॥ सेव्यं तन्न भवेदत्र मांसं चानूपसम्भवम् ॥९८॥

सूचीवेध्य लोह के पत्र को मदार की जड़ के कल्क से अथवा सफेद सरसों के कल्क से लपेटकर धूप में सुखावे, पीछे अग्नि से तपाकर त्रिफलाक्वाथ में बुझावे। इसी प्रकार बार-बार करें जब तक कि ठीक भस्म न हो जाय। पुनः अच्छी प्रकार पीसकर कपड़े से छान ले, यदि त्रिफलाक्वाथ से टिकिया बनाकर पुट दे दी जाय और विधिपूर्वक भस्म कर ले तो भस्म उत्तम हो जिससे बिना पुट लगे हुए लोहे से उत्पन्न होनेवाले जो रोग हैं वह उत्पन्न न हों। इस लोहभस्म को शहद तथा घृत के साथ रोगी की अग्नि के अनुसार सेवन करावें। मात्रा आधी रत्ती से दो रत्ती तक। अनुपान—बकरी का दूध, अभाव में औषध की मात्रा से ४५ गुना गोघृत अथवा गोदूध के साथ सेवन करावे। इसके सेवन से एक मास में ही परिणामशूल अच्छा होता है। अपथ्य—पेठा ककड़ी, करेला आदि (ककारात्मक द्रव्य), आनूप मांस तथा अम्लपदार्थ ॥ ९२–९८ ॥

अथान्नद्रवशूलचिकित्सा।

अन्नद्रवे च तत्कार्यं जरत्पित्ते यदीरितम्। आमपक्वाशये शुद्धे गच्छेदन्नद्रवः शमम् ॥ ९९ ॥ धात्रीफलभवं चूर्णमयश्चूर्णसमन्वितम् । यष्टीचूर्णेन वा युक्तं लिह्यात् क्षौद्रेण तद्गदे ॥ १०० ॥

अन्नद्रव नामक शूल में वही चिकित्सा करनी चाहिए जो अम्लपित्त रोग में कही गई है। आमाशय तथा पक्वाशयके वमन तथा विरेचन द्वारा शुद्ध होने पर अन्नद्रवशूल बहुत शीघ्र ही अच्छा होता है। आँवले के चूर्ण में लोहभस्म को अथवा मुलहठी के चूर्ण को मिलाकर शहद के साथ इस रोग में चाटना चाहिए ॥९९-१००॥

गुडमण्डूर

गुडामलकपथ्यानां चूर्णं प्रत्येकशः पलम् । त्रिपलं लौहकिट्टस्य तत्सर्वं मधुसर्पिषा ॥ १०१ ॥ समालोड्य समश्नीयाच्चतुर्गुञ्जाप्रमाणतः । आदिमध्यावसानेषु भोजनस्य निहन्ति तत् ॥ १०२ ॥ अन्नद्रवं जरत्पित्तमम्लपित्तं सुदारुणम् । परिणामसमुत्थञ्च शूलं संवत्सरोत्थितम् ॥ १०३ ॥

गुड़, आँवले और हरड़ का चूर्ण हर एक ४ तोला मण्डूरभस्म १२ तोला, इन्हें इकट्ठाकर शहद तथा घी में मिलाकर सेवन करना चाहिए। मात्रा-४ रत्ती। भोजन के प्रथम, मध्य तथा अन्त में सेवन करने से अन्नद्रवशूल, अम्लपित्त, जरत्पित्त तथा १ वर्ष का पुराना परिणामशूल अच्छा हो जाता है ॥१०१--१०३॥

समुद्राद्य चूर्ण।

सामुद्रं सैन्धवं क्षारौ रुचकं रोमकं विडम् । दन्ती लौहरजः किट्टं त्रिवृच्चूर्णकं समम् ॥ १०४ ॥ दधिगोमूत्रपयसा मन्दपाके विपाचितम् । तद्यथाग्निबलं चूर्णं पिबेदुष्णेन वारिणा ॥ १०५ ॥ जीर्णेऽजीर्णे तु भुञ्जीतमांसादिघृतसाधितम्। नाभिशूलं मीहशूलं यकृद्गुल्मकृतञ्च यत्॥ १०६॥ विद्रध्यष्ठीलिकां हन्ति कफवातोद्भवां तथा । शूलानामपि सर्वेषामौषधं

नास्ति तत्परम् ॥ परिणामसमुत्थस्य विशेषेणान्तकृन्मतम् ॥ १०७ ॥

समुद्रादीनां प्रत्येकं समभागचूर्णमेकीकृत्य दधिदुग्धगोमूत्राणां समभागेन यावता आलोडितं भवति तावद्दत्वा मन्दानलेन पचेत् आचूर्णीभावात्ततः कदुष्णोदकेन यथायोग्यं प्रयोज्यम्। अन्ये तु समुदितचूर्णात् दध्यादीनां मिलितानां चातुर्गुण्यमाहुः।

सामुद्रलवण, सैंधव, यवक्षार, सज्जीखार, काला नमक, सांभर नमक, बिड नमक, दन्ती (जमालगोटा) की जड़, लोह-चूर्ण, मंडूर, निसोत और सूरन (जिमीकंद) समभाग, स्निग्ध पशु की दही, गोमूत्र और दूध के साथ पकावे। अग्नि और बल के अनुसार मात्रा का प्रयोग करना चाहिए। उष्ण जल के साथ इसका सेवन करना चाहिए। इस औषध का सेवन करनेवाला रोगी घृत-पय मांसादि का भी सेवन कर सकता है। यह 'सामुद्राद्य चूर्ण' हर प्रकार के शूल-रोग की, विशेषकर परिणाम-शूल की महौषध है। सामान्यतया १ मासे की मात्रा उचित है ॥ १०४–१०७ ॥

नारिकेल लवण।

नारिकेलं सतोयञ्च लवणेन प्रपूरितम्। विपक्वमग्निना सम्यक् परिणामजशूलनुत् ॥ १०८ ॥ पिप्पल्या[1] भक्षितं हन्ति शूलं विविधहेतुजम्। वातिकं पैत्तिकञ्चापि श्लैष्मिकं सान्निपातिकम् ॥ १०९ ॥

जल-युक्त नारियल के भीतर सेंधा नमक भरकर और नारियल के ऊपर मिट्टी का लेप करके धूप में सुखाकर अग्नि में भस्म करे। इसके अन्दर मृत्तिका को अलग करके सैंधव-युक्त नारिकेल की भस्म में पीपरि मिलाकर उचित मात्रा में सेवन करने से वात-पित्त-कफ त्रिदोष अन्य शूल तथा परिणाम-शूल नष्ट हो जाते हैं। मात्रा १–मासा ॥ १०८–१०९ ॥

1—पिप्पलीसहितमिति वृन्दमतम्।

सप्तामृतलौह।

मधुकं त्रिफलाचूर्णमयोरजः समं लिहन्। मधुसर्पिर्युतं सम्यक् गव्यं क्षीरं पिबेदनु ॥ ११० ॥ छर्दिं सतिमिरं शूलमम्लपित्तं ज्वरं क्लमम्। आनाहं मूत्रसङ्गञ्च शोथञ्चैव निहन्ति सः ॥ १११ ॥

घृत और शहद के साथ मुलेठी, त्रिफला और लोह-भस्म का सेवन करने के बाद दूध पीने से छर्दि, तिमिर, शूल, अम्ल-पित्त, ज्वर, क्लम, आनाह, मूत्राघात और शोथरोग, ये सब नष्ट हो जाते हैं। मात्रा २ रत्ती ॥ ११०–१११ ॥

गुडपिप्पली घृत।

सपिप्पली गुडं सर्पिः पचेत् क्षीरे चतुर्गुणे। विनिहन्त्यम्लपित्तञ्च शूलञ्च परिणामजम् ॥ ११२ ॥

चौगुने दूध में पीपरि, गुड़ और घृत को पकाकर सेवन करने से अम्लपित्त और परिणाम-शूल समूल नष्ट हो जाते हैं ॥ ११२ ॥

पिप्पलीघृत।

क्वाथेन कल्केन च पिप्पलीनां सिद्धं घृतं माक्षिकसंप्रयुक्तम्। क्षीरानुपानस्य निहन्त्यवश्यं शूलं प्रवृद्धं परिणामसंज्ञम् ॥ ११३ ॥

सुशीते मधुपादिकं कल्कवन्मधुशर्करेति वचनात्। दुग्धपलमनुपिबेत्।

पीपरि के कल्क और क्वाथ के साथ सिद्ध किये हुए घृत में मधु मिलाकर दूध के साथ सेवन करने से प्रबल परिणाम-शूल निःसंदेह नष्ट हो जाता है। घृत की मात्रा ६ मासे से १ तोला तक। दूध की मात्रा ४ तोला की होनी चाहिए ॥ ११३ ॥

बीजपूराद्यघृत।

बीजपूरकमेरण्डं रास्नां गोक्षुरकं बलाम्।

पृथक् पञ्चपलान् भागान् यवप्रस्थसमायुतान् ॥ ११२ ॥ वारिद्रोणेन संसाध्यं यावत् पादावशेषितम् । घृतप्रस्थं पचेत्तेन कल्कं दत्त्वाक्षसंमितम् ॥ ११५ ॥ तुम्बुरूण्यभयाव्योषं हिङ्गुसौवर्चलं विडम् । सैन्धवं यावशूकञ्च सर्जिकामम्लवेतसम् ॥ ११६ ॥ पुष्करं दाडिमञ्चैव वृक्षाम्लं जीरकद्वयम् । मस्तु प्रस्थद्वयं दत्त्वा सर्वं मृद्वग्निना पचेत् ॥११७॥ घृतमेतत् प्रशंसन्ति शूलं हन्ति त्रिदोषजम् । वातशूलं पक्वच्छूलं गुल्मं प्लीहापहं परम् ॥ ११८ ॥ हृच्छूलं पार्श्वशूलञ्च देहशूलञ्च नाशयेत् । बलवर्णकरं हृद्यमग्निसन्दीपनं परम् ॥११९॥

घृत १२८ तोला, बिजौरे नींबू की जड़, एरण्ड की जड़, रास्ना, गोखुरू और खरेंटी, प्रत्येक बीस-बीस तोला, छिले हुए यव १२८ तोला, इनको २५ सेर ४८ तोला जल में पकावे। ६ सेर ३२ तोला शेष रहने पर इस क्वाथ में घृत और निम्नलिखित द्रव्यों का एक एक तोला कल्क मिलावे।

कल्कार्थ द्रव्य—धनिया, हरीतकी, त्रिकटु, हींग, कालानमक, बिड नमक, सैंधव, यवक्षार, सज्जीक्षार, अमलबेत, पुहकरमूल, अनारदाना, इमली की छाल और दोनों जीरे। तदनन्तर तीन सेर १६ तोला दही का पानी डाल कर मन्द-मन्द आँच में पकावे। इस 'शूलघ्ना' घृत के सेवन करने से विविध प्रकार के शूल-रोग जैसे त्रिदोषजन्य शूल, वातशूल, पक्वशूल, गुल्म, प्लीहा, हृदयशूल, पसवाड़े का शूल, शरीर का शूल नष्ट होता है। यह बल और वर्ण की उज्ज्वलता की वृद्धि करनेवाला, हृदय को हितकारी तथा अग्निदीपक है ॥ ११४-११९ ॥

कोलादिमण्डूर।

कोलाग्रन्थिकनागरैश्चपलाक्षारैः समं चूर्णितं, मण्डूरं सुरभीजलेऽष्टगुणिते पक्त्वाथ सान्द्रीकृतम् । तत् खादेदशनादिमध्यविरतौ प्रायेण दुग्धान्नभुक्, जेतुं वातकफामयान् परिणतौ शूलञ्च शूलानि च ॥ १२० ॥

शुद्ध मंडूर की मात्रा २ भाग, चव्य, पिपरामूल, सोंठ, पीपरि और यवक्षार प्रत्येक एक-एक भाग, गोमूत्र ५० भाग।

पहले मंडूर को गोमूत्र में पकावे। पाकशेष में-पूर्वोक्त औषधियों का चूर्ण मिलावे, भोजन के पूर्व, मध्य और अन्त में इस औषध का सेवन करना चाहिए। जब तक औषध सेवन करे, तब तक दुग्धान्न भोजन करना चाहिए। इस 'कोलादिमंडूर' के सेवन करने से परिणाम-शूल तथा अन्यान्य शूल-रोग नष्ट होते हैं। मात्रा—२ रत्ती से ४ रत्ती तक ॥१२०॥

क्षीरमण्डूर।

लौहकिट्टपलान्यष्टौ गोमूत्रार्द्धाढके पचेत् । क्षीरप्रस्थेन तत् सिद्धं पक्तिशूलहरं परम् ॥ १२१ ॥

३ सेर १६ तोला गोमूत्र और १२८ तोला दूध में ३२ तोला मण्डूर को पकाकर सिद्ध करे। इस 'क्षीर-मण्डूर' के सेवन करने से परिणामज शूल नष्ट हो जाता है ॥ १२१ ॥

तारामण्डूरगुड।

विडङ्गं चित्रकं चव्यं त्रिफला त्र्यूषणानि च । नवभागानि चैतानि लौहकिट्टसमानि च ॥ १२२ ॥ गोमूत्रं द्विगुणं दत्त्वा मूत्राद्धिकगुडान्वितम् । शनैर्मृद्वग्निना पक्त्वा सुसिद्धं पिण्डतां गतम् ॥ १२३॥ स्निग्धे भाण्डे विनिःक्षिप्य गुञ्जात्रितयमात्रया । प्राङ्मध्यान्तक्रमेणैव भोजनस्य प्रयोजितम् ॥ १२४ ॥ योगोऽयं शमयत्याशु पक्तिशूलं सुदारुणम् । कामलां पाण्डुरोगञ्च शोथं मन्दाग्निता-

मपि ॥ १२५ ॥ अर्शांसि ग्रहणीरोगं क्रिमिगुल्मोदराणि च। नाशयेदम्लपित्तञ्च स्थौल्यञ्चापि नियच्छति ॥ १२६ ॥ वर्जयेच्छुष्कशाकानि विदाह्यम्लकटूनि च। पक्तिशूलान्तको ह्येष गुडो मण्डूरसंज्ञितः ॥ शूलार्त्तानां कृपाहेतोस्तारया परिकीर्त्तितः ॥ १२७ ॥

६ भाग मडूर, १८ भाग गोमूत्र और ६ भाग गुड़ में आवश्यकतानुसार जल डाल कर पकावे। पाक के समय एक एक भाग वायविडंग, चीता की जड़, चव्य, त्रिफला और त्रिकटु के चूर्ण का प्रक्षेप करे। धीमी आँच में धीरे धीरे पकावे। पिंड बाँधने योग्य होने पर चिकने पात्र में रख देवे। मात्रा ४ रत्ती से ८ रत्ती तक। भोजन के पूर्व, मध्य और अन्त में इसका सेवन करना चाहिए। इससे अति दारुण परिणामशूल, कामला, ग्रहणी, पाण्डुरोग, मन्दाग्नि, सूजन, बवासीर, कृमिरोग, गुल्म, उदर, अम्लपित्त और स्थूलता रोग ये सब नष्ट होते हैं। इस 'तारा-मडूर-गुड़' सेवन करनेवाले रोगी को शुष्क शाक व विदाही पदार्थ, खट्टे और चटुए पदार्थों का भोजन में परित्याग कर देना चाहिए। इस 'तारा-मडूरगुड़' को शूल रोगियों पर कृपा करके *भगवती तारा ने प्रकाशित किया है* १२२–१२७

शतावरीमण्डूर।

संशोध्य चूर्णितं कृत्वा मण्डूरस्य पलाष्टकम्। शतावरीरसस्याष्टौ दध्नश्च पयसस्तथा ॥१२८॥ पलान्यादाय चत्वारि तथा गव्यस्य सर्पिषः। विपचेत् सर्वमेकत्र यावत् पिण्डत्वमागतम् ॥ १२९ ॥ सिद्धन्तु भक्षयेन्मध्ये भोजनस्याग्रतोऽपि वा। वातात्मकं पित्तभवं शूलञ्च परिणामजम् ॥ निहन्त्येव हि योगोऽयं मण्डूरस्य न संशयः ॥ १३० ॥

शुद्ध किया हुआ मडूर-भस्म ३२ तोला, शतावरि का रस ३२ तोला, दधि ३२ तोला, दुग्ध ३२ तोला, घृत १६ तोला; इनको एकत्रित कर पाक पकावे। पिण्ड के समान होने पर उतार लेवे। इस 'शतावरीमडूर' के सेवन करने से वातिक शूल, पैत्तिक शूल और परिणाम-शूल निश्चय आराम होते हैं १२८–१३० मात्रा—४–२ रत्ती।

बृहच्छतावरीमण्डूर।

मण्डूरस्याग्नितप्तस्य वराक्वाथप्लुतस्य च चूर्णीकृतस्य पलान्यष्टौ शतावरीरसस्य च ॥ १३१ ॥ दध्नश्च पयसश्चाष्टावामलक्या रसस्य च। चतुष्पलं घृतस्यापि शाणमात्रं विनिःक्षिपेत् ॥ १३२ ॥ सिद्धे प्रत्येकमेतेषामजाजीधान्यमुस्तकम्। त्रिजातकं कणा पथ्या उपयुक्तं निहन्ति च ॥ १३३ ॥ शूलं दोषत्रयोद्भूतमम्लपित्तञ्च दारुणम्। अरुचिञ्च वमिञ्चैव कासं श्वासञ्च नाशयेत् ॥ १३४ ॥

त्रिफलाक्वाथनिर्वापितमण्डूरपलानि ८ पाकार्थं शतमूलीरसपलानि ८ दधिपलानि ८ दुग्धपलानि ८ आमलकीरसपलानि ८ घृतपलानि ४ सिद्धे पाके प्रक्षेपार्थं अजाज्यादीनां चूर्णं प्रत्येकं माषकाः ४ अत्र अजाजी जीरकम्।

पहले मडूर को तपा-तपा करके त्रिफला के क्वाथ में बुझावे। इस प्रकार शुद्ध किया हुआ मडूर ३२ तोला, शतावरि का रस ३२ तोला, दही ३२ तोला, दूध ३२ तोला, आँवले का रस ३२ तोला और घृत १६ तोला, इनको पकावे। पाक सिद्ध होने पर तीन तीन माशे जीरा, धनियाँ, नागरमोथा, दालचीनी, तेजपात, इलायची, पीपरि और हरीतकी का चूर्ण मिलावे। इस 'बृहच्छतावरीमडूर' को भोजन के आदि और

मध्य में सेवन करने से सान्निपातिक शूल और अम्लपित्त, अरुचि, वमन, कास और श्वासप्रभृति विविध रोग नष्ट होते हैं। मात्रा—४ रत्ती से ८ रत्ती तक ॥ १३१-१३४ ॥

चतुःसममण्डूर।

सद्यो लौहमलाज्यमाक्षिकसिता भागाः समा मानतः, पात्रे लौहमये दिनान्तमश्रितं संस्थापयेदातपे। पश्चात्तद्घनतां प्रणीय रजनीमेकां बहिः स्थापयेत्, पात्रे ताम्रमये निधेयमथवा पात्रे हविर्भाविते ॥ १३५ ॥ पश्चान्माषकसंमितं प्रतिदिनं जग्ध्वा जलं शीतलं, पेयं भोजनपूर्वमध्यविरतौ स्वच्छन्दभोज्यैर्नरैः। जेतं शूलहुताशमान्द्यकसनश्वासाम्लपित्तज्वरोन्मादापस्मृतिमेहसर्वजठराजीर्णादिसर्वा रुजः ॥ १३६ ॥

सद्योत्थित मण्डूर भस्म ४ तोला, घृत ४ तोला, मधु ४ तोला और शक्कर ४ तोला लेवे। इनको लोहे के खरल में लोह दण्ड से घोटकर दिन भर धूप में और रात भर ओस में रक्खे। तदनन्तर किसी ताँबे या घृत के पात्र में रख देवे। शीतल जल के साथ प्रति दिन १ माशे सेवन करे। भोजन के पूर्व, मध्य और अन्त में इसका सेवन करना चाहिए। इसके सेवन से शूल, अग्निमान्द्य, कास, श्वास, अम्लपित्त, ज्वर, उन्माद, अपस्मार, प्रमेह, सब उदररोग तथा अजीर्ण आदि रोग नष्ट हो जाते हैं। इस 'चतु सम-मण्डूर' की मात्रा चार माशे लिखी है—इसके तीन भाग कर लेवे। उनमें एक भाग भोजन के पूर्व, एक भाग मध्य और एक भाग अन्त में सेवन करे। यह वृद्ध वैद्यों की सम्मति है ॥ १३५-१३६ ॥

रसमण्डूर।

कुडवं पथ्याचूर्णं द्विपलं गन्धाश्मलौहकिट्टश्च। शुद्धरसस्यार्द्धपलं भृङ्गस्य रसं सकेशराजस्य ॥१३७॥ प्रस्थोन्मितञ्च दत्त्वा पात्रे लौहेऽथ दण्डसंघृष्टम्। शुष्कं घृतमधुयुक्तं मृदितं स्थाप्यञ्च भाजने स्निग्धे ॥ १३८ ॥ उपयुक्तमेतदचिरान्निहन्ति कफपित्तजान् रोगान्। शूलं तथाम्लपित्तं ग्रहणीञ्च कामलामुग्राम् ॥ १३९ ॥

१६ तोला हरीतकी का चूर्ण, ८ तोला शुद्ध गन्धक, चार तोला पारा, ८ तोला शुद्ध मण्डूर, १ सेर १६ तोला भाँगरा का रस, १ सेर १६ तोला केशराज का रस (कोई-कोई कहते हैं कि १२८ तोला भृंगराज का रस और १२८ तोला केशराज का रस) लोहे के खरल में लोह-दण्ड द्वारा घोट करके धूप में सुखा कर, चूर्ण के समान कर स्निग्ध-पात्र में रक्खे। इस 'रस-मण्डूर' की मात्रा ४ रत्ती से १ माशे तक है। इसका सेवन घृत और मधु मिलाकर करना चाहिए। इसके द्वारा कफज और पित्तज शूल और अम्लपित्त, संग्रहणी और अति उग्र कामला रोग का विनाश हो जाता है ॥ १३७-१३९ ॥

धात्रीलौह।

धात्रीचूर्णस्याष्टौ पलानि चत्वारि लौहचूर्णस्य। यष्टीमधुकरजश्च द्विपलं दद्यात् पटे घृष्टम् ॥ १४० ॥ अमृताक्वाथेन तच्चूर्णं भाव्यञ्च सप्तसप्ताहम्। चण्डातपेषु शुष्कं भूयः पिष्ट्वा नवे घटे स्थाप्यम् ॥ १४१ ॥ घृतमधुना संयुक्तं भक्तादौ मध्यतश्चान्ते च। त्रीनपि वारान् खादेत् पथ्यं दोषानुबन्धेन ॥ १४२ ॥ भक्तस्यादौ शमयति रोगान् पित्तानिलोद्भूतान्। मध्येऽन्ने विष्टम्भं जयति नृणां विद्यते नाशम् ॥ १४३ ॥ पानान्नकृतान् दोषान् भुक्तान्ते शीलितं जयति। एवं जीर्यति चान्ने शूलं नृणां सुकष्टमपि ॥ १४४ ॥ हरति च सहसा युक्तो योग-

श्चायं जरत्पित्तम् । चक्षुष्यः पलितघ्नः कफपित्तसमुद्भवान् जयति[1] ॥ १४५ ॥

अत्र अमृता आमलकीति भानुदासः । अन्ये तु गुडूचीमाहुः ।

सप्ताहं सप्तभावनाः । औषधस्य माषकत्रयं भोजनादिमध्यान्तेषु घृतमधुभ्यां मर्दितं भक्षयमिति त्रिपुरारिः ॥

आँवले का चूर्ण ३२ तोला, लोह की भस्म १६ तोला और मुलेठी का चूर्ण ८ तोला लेवे। इनमें गिलोय के क्वाथ की ७ दिन में, ७ भावनाएँ देवे। फिर, धूप में सुखाकर, खरल करके नवीन पात्र में रख देवे। घृत और मधु मिलाकर प्रतिदिन भोजन के पूर्व, मध्य और अन्त में तीन बार खावे और दोषों के अनुसार पथ्य करे। भोजन के आदि में इस 'धात्री-लौह' के सेवन करने से वातज और पित्तज रोग, भोजन के मध्य में सेवन करने से विष्टम्भ नष्ट होता है और खाया हुआ अन्न विदग्ध नहीं होता। और भोजन के अन्त में इस औषध के सेवन करने से अन्नपान और भोजन करने से उत्पन्न हुए रोग विनष्ट होते हैं। एवं यह औषध खाये हुए अन्न को भस्म करता है और कष्ट-साध्य शूल, ज्वर, पित्त-शूल, पलित रोग और कफ और पित्तज शूल, इन सबको नष्ट कर देता है एवम् आँखों के लिये हितकारक है॥ १४०-१४५ ॥ मात्रा ४ रत्ती।

## धात्रीलौह।

षट्पलं शुद्धमण्डूरं यवस्य कुडवं तथा। पाकाय नीरमस्थार्द्धं दद्यात् पादावशेषितम् ॥ १४६ ॥ शतमूलीरसस्याष्टौ आमलक्या रसस्तथा। तथा दधि पयो-भूमिकूष्माण्डस्य चतुःपलम् ॥ १४७ ॥ चतुष्पलं सर्पिरिक्षुरसं दद्याद्भिषग्वरः। प्रक्षिपेद् जीरधन्याकं त्रिजातं करिपिप्पलीम् ॥ १४८ ॥ मुस्तं हरीतकीश्चैव लौहमभ्रं कटुत्रिकम्। रेणुकं त्रिफलाश्चैव तालीशं नागकेशरम्[1] ॥ १४९ ॥ एतेषां कार्षिकं भागं चूर्णयित्वा विनिःक्षिपेत्। भोजनाग्रवसाने च मध्ये चैव समाहितः ॥ १५० ॥ माषैकं भक्षयेच्चानु पेयं नित्यं पयस्तथा। शूलमष्टविधं हन्ति साध्यासाध्यमथापि वा ॥ १५१ ॥ वातिकं पैत्तिकञ्चापि श्लैष्मिकं सान्निपातिकम्। परिणामभवं शूलमन्नद्रवभवं तथा ॥ १५२ ॥ द्वन्द्वजानपि शूलांश्च अम्लपित्तं सुदारुणम् सर्वशूलहरं श्रेष्ठं धात्रीलौहमिदं शुभम् ॥ १५३ ॥

जौ १६ तोले ६४ तोला जल में क्वाथ करे जब १६ तोला जल शेष रहे तो छान ले। यह क्वाथ तथा शतावरी का रस ३२ तोला, आँवले का रस ३२ तोला, दही १६ तोला, दूध १६ तोला, पेठे का रस १६ तोला, घी १६ तोला, ईख का रस १६ तोला (अभाव में खाँड) मिलाकर विधिपूर्वक पाक करे, अधपकी दशा में २४ तोला शुद्ध मण्डूर और एक-एक तोले जीरा, धनियाँ, दालचीनी, इलायची, तेजपात, गजपीपरि, नागरमोथा, हरीतकी, लौह-भस्म, अभ्रक-भस्म, त्रिकटु, सँभालू के बीज, त्रिफला, तालीशपत्र और नागकेशर का प्रक्षेप करे। यथाविधि पाक तैयार करके प्रतिदिन भोजन के पूर्व, मध्य और अन्त में एक माशा की मात्रा से इस औषध को दुग्ध के साथ सेवन करना चाहिए। इस "धात्री-लौह" के द्वारा साध्य और असाध्य वातिक शूल, पैत्तिक शूल, कफज शूल, सान्निपातिक शूल, परिणाम शूल, द्वंद्वज शूल और अन्नद्रव-जन्य शूल तथा अम्लपित्तरोग। ये सब रोग नष्ट हो जाते हैं। यह "धात्री-लौह"

1—जयेद्रोगान् इति पाठान्तरम्।

1—इतः परं कचित्पाठे कटुकं मधुकं रास्ना पाठकगन्धा सपञ्चकैरित्यधिक पाठः।

सब प्रकार के शूलरोग के दूर करने के लिये महान् औषध है ॥ १५१-१५२ ॥

### शर्करालौह।

शतावरीरसमस्थे मस्थे च सुरभीजले। अजायाः पयसः मस्थे मस्थे धात्रीरसस्य च ॥ १५४ ॥ लौहमलपलान्यष्टौ शर्करा पलषोडश। दत्त्वाज्यकुडवं तत्र शनैर्मृद्वग्निना पचेत् ॥ १५५ ॥ सिद्धशीते घनीभूते द्रव्याण्येतानि दापयेत्। विडङ्गं त्रिफलाव्योषं यमानी गजपिप्पली॥ १५६ ॥ द्विजीरकं घनं लौहमभ्रं कर्षद्वयं पृथक्। खादेदग्निबलापेक्षी भोजनादौ विचक्षणः ॥ १५७ ॥ शूलं सर्वभवं हन्ति पित्तशूलं विशेषतः। हृच्छूलं पार्श्वशूलञ्च कुक्षिवस्तिगुदे रुजम् ॥ १५८ ॥ कासं श्वासं तथा शोथं ग्रहणीदोषमेव च। यकृत् प्लीहोदरानाहराजयक्ष्मविनाशनम्॥ १५६ ॥ विष्टम्भमामं दौर्बल्यमग्निमान्द्यञ्च यच्छ्येत्। एतान् रोगान् निहन्त्याशु भास्करस्तिमिरं यथा ॥ १६० ॥

शतावरी का रस या क्वाथ १२८ तोला, गोमूत्र १२८ तोला, बकरी का दूध १२८ तोला, आँवले का रस १२८ तोला, शुद्ध मंडूर ३२ तोला, शक्कर ६४ तोला, घृत ३२ तोला। इन सबको धीमी आँच में पकावे। गाढ़ा होने पर उतार लेवे। जब शीतल हो जावे तो दो-दो तोले वायविडंग, त्रिफला, त्रिकटु, अजवायन, गजपीपरि, स्याह जीरा, सफेद जीरा, नागरमोथा, लौह-भस्म और अभ्रक-भस्म मिलाकर रख लेवे। रोगी के अग्नि और बल के अनुसार मात्रा में प्रयोग करना चाहिये। भोजन के पूर्व इस औषध का सेवन करना चाहिए। इसके द्वारा सब प्रकार के शूल विशेषतः पित्त शूल शीघ्र विनष्ट होता है। यह "शर्करा-लौह" हृच्छूल, पार्श्व-शूल, कुक्षि-शूल, बस्ति-शूल, गुद-शूल, खाँसी, श्वास, सूजन, संग्रहणी, यकृत्-रोग, तिल्ली-रोग, उदर-रोग, अफरा, राजयक्ष्मा, विष्टम्भ-रोग, आम-दोष, दुर्बलता और मन्दाग्नि इन सब रोगों को इस प्रकार विनष्ट करता है, जैसे सूर्यदेवजी अंधकार को नष्ट कर देते हैं। मात्रा ३ माशे से ६ माशे तक ॥ १५४-१६० ॥

### खण्डामलकी।

स्विन्नपीडितकूष्माण्डात् तुलार्द्धं भृष्टमाज्यतः। प्रस्थार्द्धे खण्डतुल्यन्तु पचेदामलकीरसात् ॥ १६१ ॥ प्रस्थे सुस्विन्नकूष्माण्डरसमस्थे विघट्टयन्। दर्व्या पाकं गते तस्मिंश्चूर्णीकृत्य विनिःक्षिपेत् ॥ १६२ ॥ द्वे द्वे पले कणाजाजीशुण्ठीनां मरिचस्य च। पलं तालीशधन्याकचातुर्जातकमुस्तकम् ॥१६३॥ कर्षप्रमाणं प्रत्येकं प्रस्थार्द्धं माक्षिकस्य च। पक्तिशूलं निहन्त्येतद्दोषत्रयकृतञ्च यत् ॥१६४॥ छर्द्यम्लपित्तमूर्च्छाश्च श्वासं कासमरोचकम्। हृच्छूलं पृष्ठशूलञ्च रक्तपित्तञ्च नाशयेत् ॥ रसायनमिदं श्रेष्ठं खण्डामलकसंज्ञितम् ॥ १६५ ॥

छर्द्यम्लपित्तयोः पित्तोत्तरशूले च दृष्टफलोऽयं योगः।

स्विन्न (कुछ पकाया हुआ अर्थात् उबाला हुआ) एवं निष्पीडित तथा शिलापिष्ट सूखा पेठा २॥ सेर लेकर ६४ तोला घृत में भूनकर २॥ सेर शक्कर, १२८ तोला आँवले का रस और १२८ तोला पेठा रस जो प्रथम निचोड़कर रख लिया गया हो मिलाकर पकावे। उसमें आठ-आठ तोला पीपरि, जीरा और सोंठ और ४ तोला मिर्च का चूर्ण डाले। तथा एक-एक तोला तालीशपत्र, धनियाँ, दालचीनी, तेजपात, इलायची, नागकेशर और नागरमोथा

मिलाकर यथाविधि पाक सिद्ध करे। तदनन्तर ३२ तोला मधु मिलाकर रख लेवे। इस 'खण्डामलकी' के सेवन करने से परिणामशूल, सान्निपातिकशूल, छर्दि, अम्लपित्त, मूर्च्छा, श्वास, खाँसी, अरुचि, हृच्छूल, पृष्ठ-शूल और रक्तपित्त; ये सब रोग शान्त हो जाते हैं। यह 'खण्डामलक' संज्ञक प्रयोग रसायन वमन, अम्लपित्त और पित्तप्रधान शूलरोग में अनुभूत है॥ १६१-१६५॥

नारिकेलखण्ड।

कुडवमितमिह स्यान्नारिकेलं सुपिष्टं, पलपरिमितसर्पिः पाचितं खण्डतुल्यम्। निजपयसि तदेतत् प्रस्थमात्रे विपक्वं गुडवदथ सुशीते शाणभागान् क्षिपेच्च १६६॥ धन्याकपिप्पलिपयोदतुगाद्विजीरान्, शाणं त्रिजातमिभकेशरवह्निचूर्णम्। हन्त्यम्लपित्तमरुचिं क्षयमस्रपित्तं, शूलं वमिं सकलपौरुषकारि हारि॥ १६७॥

भली भाँति पिसी हुई नारियल की गिरी १६ तोला लेकर ४ तोला घृत में भून करके उसमें १२८ तोला नारियल का जल और १६ तोला खाँड मिलाकर पका लेवे। पाक सिद्ध होने पर धनियाँ, पीपरि, नागरमोथा, वंशलोचन, स्याह जीरा और सफेद जीरा तीन-तीन माशे तथा दालचीनी, तेजपात, इलायची और नागकेसर चारों मिलाकर ३ माशा रख लेवे। यह 'नारिकेल-खण्ड' अम्लपित्त, अरुचि, क्षय-रोग, रक्त-पित्त, शूल और वमनरोग शान्त करता है तथा बलवर्धक है॥ १६६-१६७॥

वृहत् नारिकेलखण्ड।

नारिकेलपलान्यष्टौ शर्करा प्रस्थसंमिता। तज्जलं पात्रमेकन्तु सर्पिः पञ्चपलानि च॥ १६८॥ शुण्ठीचूर्णस्य कुडवं[1] प्रस्थार्द्धं क्षीरमेव च। सर्वमेकीकृतं पात्रे शनैर्मृद्वग्निना पचेत्॥१६९॥ तुगा त्रिकटुकं मुस्तं चातुर्जातं सधान्यकम्। द्विकणा जीरकञ्चैव कर्षयुग्मं पृथक् पृथक्॥१७०॥ श्लक्ष्णचूर्णं विनिःक्षिप्य स्थापयेद्भाजने मृदः। खादेत् प्रतिदिनं शाणं यथेष्टाहारवानपि॥ १७१॥ सर्वदोषभवं शूलमेकजं द्वन्द्वजं तथा। परिणामभवं शूलमम्लपित्तञ्च नाशयेत्॥ १७२॥ बलपुष्टिकरं हृद्यं वाजीकरणमुत्तमम्। रक्तपित्तहरं श्रेष्ठं छर्दिहृद्रोगनाशनम्॥ धन्वन्तरिकृतञ्चैतन्नारिकेलरसायनम्॥ १७३॥

नारियल की गिरी ३२ तोले, नारियल का जल ६४ तोले, चीनी १४ तोले, घृत ४० तोले, सोंठ का चूर्ण १६ तोले और दूध ६४ तोले मिलाकर धीमी आँच में पकावे। पाक सिद्ध हो जाने पर वंशलोचन, त्रिकटु (सोंठ मिर्च और पीपरि), नागरमोथा, दालचीनी, तेजपात, इलायची, नागकेसर, धनियाँ, पीपरि, गजपीपरि और जीरे का चूर्ण दो दो तोले मिलाकर मिट्टी के पात्र में रख देवे। मात्रा ३ माशे से १ तोला तक। इस 'वृहन्नारिकेल खण्ड' के सेवन करने से सर्वदोषज शूल, वात, पित्त, कफ, द्वन्द्वज और परिणाम शूल, अम्ल-पित्त, रक्तपित्त, वमन और हृद्रोग का नाश तथा बल की वृद्धि होती है। इस रसायन का निर्माण श्रीधन्वन्तरिजी ने किया॥ १६८-१७३॥

नारिकेलामृत।

नारिकेलफलप्रस्थं सुपिष्टं भर्जितं घृते। प्रस्थे प्रस्थं समादाय शुण्ठीचूर्णन्तु तत् समम्॥ १७४॥ द्विप्रस्थं नारिकेलाम्बु तत् समं क्षीरमेव च। धात्र्याश्च स्वरसप्रस्थं खण्डस्यापि तुलां न्यसेत्॥ १७५॥ एकीकृत्य पचेत् सर्वं शनैर्मृद्वग्निना भिषक्। सिद्धशीते प्रदातव्यं चूर्णमेषां सुशोभनम्॥ १७५॥ कटुत्रयं चतुर्जातं

[1] भागमिति पाठान्तरम्।

प्रत्येकञ्च पलोन्मितम्। धात्रीजीरकयुग्मञ्च धन्याकं ग्रन्थिपर्णकम् ॥ १७७ ॥ तुगापयोदचूर्णानि त्रिकर्षाणि पृथक् पृथक्। चतुःपलानि मधुनः स्निग्धे भाण्डे निधापयेत् ॥ १७८ ॥ शिवं प्रणम्य सगणं धन्वन्तरिमथापरम्। कर्षप्रमाणं कर्षैर्व्य[1] मुद्गयूषं पिबेदनु ॥ १७९ ॥ अम्लपित्तं निहन्त्युग्रं शूलञ्चैव सुदारुणम्। परिणाममवं शूलं पृष्ठशूलञ्च नाशयेत् ॥ १८० ॥ अन्नद्रवभवं शूलं पार्श्वशूलं सुदुस्तरम्। अग्निसन्दीपनकरं रसायनमिदं शुभम् ॥ १८१॥ मूत्राघातानशेषांश्च रक्तपित्तं विशेषतः। पीनसञ्च प्रतिश्यायं नाशयेन्नित्यसेवनात् ॥ १८२ ॥ रोगानीकविनाशाय लोकानुग्रहहेतवे। अश्विभ्यां निर्म्मितं श्रेष्ठं नारिकेलामृतं शुभम् ॥ १८३ ॥

अत्रनारिकेलफलमस्थं द्वात्रिंशत्पलमार्द्रत्वात्। शुण्ठीचूर्णस्य पुनः षोडशपलमेव मस्थसाम्यात्। पात्रं चतुःषष्टिपलं द्विपात्रं अष्टाविंशत्यधिकशतपलं स्यात्किन्तु द्रवद्वैगुण्येन नारिकेलजलदुग्धधात्रीरसा ग्राह्याः।

१२८ तोले पिसी हुई नारियल की गिरी को १२८ तोले घृत में भून करके, सोंठ का चूर्ण ६४ तोले, नारियल का जल १२ सेर १६ तोला, गाय का दूध 11 सेर १६ तोला, आँवले का रस १२८ तोले और चीनी ४०० तोले मिलाकर धीरे-धीरे मन्द-मन्द अग्नि में पकावे। जब पाक सिद्ध हो जावे, तो उतार लेवे। शीतल होने पर त्रिकटु, दालचीनी, तेजपात, इलायची और नागकेसर प्रत्येक चार तोले तथा आँवला, सफेद जीरा, स्याह जीरा, धनियाँ, गठिवन, वंशलोचन और नागरमोथा, तीन-तीन तोले लेकर चार पल (१६ तोले) मधु मिलाकर चिकने पात्र में रख लेवे। मूँग की दाल के जूस के साथ प्रतिदिन ६ माशे से एक तोला तक की मात्रा में खावे। इस 'नारिकेलामृत' नाम औषध को सेवन करने से उग्र अम्लपित्त, दारुण शूल, परिणाम-शूल, पृष्ठ-शूल, अन्नद्रवशूल, दुस्तर पसली-शूल, सब प्रकार के मूत्राघात रोग, रक्तपित्त, पीनस और जुकाम; इन अम्लपित्तादि अनेक रोगों का विनाश हो जाता है। श्रीअश्विनीकुमार ने जनता पर कृपा करके रोगसमूह के नाश के लिये इसको बनाया था ॥ १७४—१८३ ॥

1—"प्रत्यहं च 'कर्षमात्रं भोज्यं च' और मूद्ग पिबेदनु' इति पाठः।

हरीतकीखण्ड

त्रिफलाब्दं चतुर्जातं यमानी कटुकत्रयम्। धान्यं मधुरिका चैव शतपुष्पा लवङ्गकम् ॥ १८४ ॥ प्रत्येकं कार्षिकं ग्राह्यं त्रिवृता स्वर्णपत्रिका। पलद्वन्द्वप्रमाणेन सर्वतुल्या हरीतकी ॥ १८५ ॥ यावन्त्येतानि चूर्णानि सिता तद् द्विगुणा मता। दद्यात्तानि विधानेन क्षीरेणाप्येन सम्पिबेत् ॥ १८६ ॥ हन्त्यम्लपित्तं शूलञ्च षडशींस्यनिलामयम्। कोष्ठगतं कटीशूलमानाहमपि दारुणम् ॥ १८७ ॥

त्रिफला, नागरमोथा, दालचीनी, तेजपात, इलायची, नागकेसर, अजवाइन, त्रिकटु, धनियाँ, सोया, सौंफ और लौंग एक एक तोला निसोथ और सनाय आठ-आठ तोले, हरीतकी का चूर्ण ३२ तोले और चीनी १२८ तोले लेकर यथाविधि पाक करे। मात्रा १ तोला। अनुपान—उष्ण दुग्ध। इस 'हरीतकी-खण्ड' के सेवन करने से अम्लपित्त, शूल, ६ प्रकार का बवासीर, वात-रोग, कोष्ठगत, कटिशूल और अफारारोग शान्त हो जाता है ॥ १८४—१८७ ॥

### हरीतकीखण्ड ।

चतुःपलं हरीतक्यास्त्रिवृतायाश्चतुःपलम् । चतुर्जातं समुस्तञ्च तालीशं जीरकं तथा ॥ १८८ ॥ जातीकोषं लवङ्गञ्च लौहमभ्रञ्च टङ्कणम् । प्रत्येकं कर्षमानेन श्लक्ष्णचूर्णानि कारयेत् ॥ १८९ ॥ प्रस्थेन गव्यदुग्धस्य पचेन्मृद्वग्निना भिषक् । शर्करायाःदशपलं पाकसिद्धिविधानवित् ॥ १९० ॥ दर्वीप्रलेपावस्थायां क्षिपेच्चूर्णं विचक्षणः । पूजयेद्भास्करं शम्भुं द्विजातीनभिवादयेत् ॥ १९१ ॥ शूलमष्टविधं हन्ति अम्लपित्तं सुदुर्जयम् । अन्नद्रवभवं शूलं कासं श्वासं तथा वमिम् ॥ १९२ ॥ कान्तिपुष्टिकरो हृद्यो बलमेधाग्निवर्द्धनः । ख्यातो हरीतकीखण्डः सर्वशूलनिकृन्तनः ॥ १९३ ॥

हरड़ १६ तोला, निसोत १६ तोला, दालचीनी, छोटी इलायची, तेजपात, नागकेसर, मोथा, तालीशपत्र, जीरा, जावित्री, लौंग, लौहभस्म, अभ्रकभस्म, सुहागा हरएक का बारीक चूर्ण २ तोले, गोदुग्ध १२८ तोले, खाँड ४० तोला, इन्हें विधिपूर्वक मन्दी आँच पर पकाकर दर्वीप्रलेपावस्था में (गाढ़ा होने पर) ऊपर लिखे हुए चूर्ण को डाल दे। इसके सेवन से आठों प्रकार का शूल, अम्लपित्त, अन्नद्रव-शूल, खाँसी, श्वास, वमन आदि रोग अच्छे होते हैं, कान्ति, पुष्टि, बल, बुद्धि तथा जठराग्नि को बढ़ाता है और हृदय को बलकारक है। मात्रा—६ माशा १ तोला ॥१८८-१९३॥

### पूगखण्ड ।

छिन्नं पूगफलं दृढं परिणतं पयस्वा च दुग्धाम्बुभिः प्रक्षाल्यातपशोषितं वसुपलं ग्राह्यं ततश्चूर्णितात् । तत् सर्पिः कुडवे विपाच्य हि धात्रीशतावरीरसौ द्व्यञ्जली, द्वे प्रस्थे पयसः प्रदाय विपचेन्मन्दं तुलार्द्धां सिताम् ॥ १९४ ॥ हेमाम्भोधरचन्दनं त्रिकटुकं धात्रीमियालास्थिजौ मज्जानौ त्रिसुगन्धिजीरकयुगं शृङ्गाटकं वंशजा । जातीकोषफले लवङ्गमपरं धन्याककङ्कोलकं नाकुलीतगराम्बुवीरणशिफामृङ्गाश्वगन्धे तथा ॥ १९५ ॥ सर्वं द्व्यक्षमितं विचूर्ण्य विधिना पाके तु मन्दे ततः, मक्षिप्याथ विघट्टयन् मुहुरिदं दाव्योर्नवार्य्य क्षणात् । सिद्धं शीत्य विधारयेदचरितस्निग्धेऽथ मृद्भाजने, खादेत् प्रातरिदं ज्वरामयहरं हृद्यं बुधः कार्षिकम् ॥१९६॥ शूलाजीर्णगुदप्रवाहरुधिरं दुष्टाम्लपित्तं जयेद्, यक्ष्मक्षीणहितं महाग्निजननं तृट्छर्दिमूर्च्छापहम् । पाण्डुघ्नं बलवर्णदृष्टिकरणं गर्भप्रदं योषितामेतत् पूगरसायनं प्रदरक्षुद्रिणमूत्रसङ्गापहम् ॥ १९७ ॥

अच्छी पकी बढ़िया सुपारी के छोटे-छोटे टुकड़े करके जलमिश्रित दुग्ध में पकावे। तदनन्तर जल से धोकर, धूप में सुखाकर चूर्ण कर लेवे। इस प्रकार बनाया हुआ सुपारी का चूर्ण ३२ तोले लेकर १२ तोले घृत में पका लेवे। उसके बाद आँवले का रस ६४ तोले, शतावरी का रस ६४ तोले, दुग्ध १ सेर १६ तोले और चीनी २॥ सेर मिलाकर पाक करे। पाक सिद्ध हो जाने पर नागकेसर, नागरमोथा, चन्दन, त्रिकटु, आँवले की गिरी, चिरौंजी, दालचीनी, तेजपात, इलायची, सफेद जीरा, काला जीरा, सिंघाड़ा, वंशलोचन, जावित्री, जायफल, लौंग, धनियाँ, कंकोल, रास्ना, तगर, सुगंधबाला, खस, भाँगरा और असगंध का चूर्ण दो-दो तोला छोड़कर कलछुल से भली भाँति मिलाकर उतार लेवे और शीतल होने पर मिट्टी के चिकने पात्र में रख लेवे। प्रतिदिन

प्रातःकाल आधा तोला से एक तोला की मात्रा में सेवन करे। यह 'पूग-खंड' औषध शूल, अजीर्ण, गुदामार्ग से रक्त जाना, दुष्ट अम्लपित्त, राजयक्ष्मा, क्षयरोग, तृषा-रोग, छर्दि, मूर्च्छा-रोग, पाण्डु-रोग, प्रदर-रोग, विड्बंध (मलावरोध) और मूत्रबंध (मूत्रावरोध); इन सब रोगों को निःसंदेह आराम करता है। यह औषध अत्यन्त अग्निवर्द्धक, बल-वर्ण और दृष्टि की वृद्धि करनेवाला एवम् स्त्रियों को गर्भदायक है ॥ १९४—१९७ ॥

अपर पूगखण्ड।

प्रस्थैकं पूगचूर्णस्य पयसश्चाढकं क्षिपेत्। शर्करायाः पलशतं घृतस्य कुडवद्वयम् ॥ १९८ ॥ चातुर्जातं त्रिकटुकं देवपुष्पं सचन्दनम्। मांसी तालीशपत्रञ्च बीजं कमलसम्भवम् ॥ १९९ ॥ नीलोत्पलं तथा वांशी शृङ्गाटं जीरकं तथा। विदारीकन्दश्चैव गजोगोक्षुरसम्भवम् ॥ २०० ॥ शतमूलीरजश्चैव मालतीकुसुमं तथा। धात्रीचूर्णं समं कर्षं कर्पूरं शुक्तिमानतः ॥ २०१ ॥ पक्वेऽस्मिन् विपचेद्वैद्यः स्निग्धे भाण्डे निधापयेत्। खादेच्च प्रातरुत्थाय कोलमेकं प्रमाणतः ॥ २०२ ॥ छर्द्यम्लपित्तहृद्दाहभ्रममूर्च्छापहं नृणाम्। सर्वशूलहरं श्रेष्ठमामवातविनाशनम् ॥ २०३ ॥ मेदमेदोविकारघ्नं प्लीहपाण्डुगदापहम्। अश्मरीं मूत्रकृच्छ्रञ्च गुदजं रुधिरं जयेत् ॥ २०४ ॥ रेतोवृद्धिकरं हृद्यं पुष्टिदं कामदं तथा। वन्ध्यापि लभते पुत्रं वृद्धोऽपि तरुणायते ॥ प्रातः परतरं श्रेष्ठं विधत्ते वाजिकर्म्मसु २०५

पारा, गन्धक, अभ्रकभस्म, स्वर्णमाक्षिक भस्म, लौहभस्म, प्रत्येक १ तोला, वैक्रान्त भस्म ३ माशा, स्वर्ण भस्म १॥ माशा, चाँदी की भस्म १ तोला, इन्हें इकट्ठा कर अडूसा, भारंगी छोटी कटेरी, बड़ी कटेरी, अदरख, ब्राह्मी, इनके रस से अलग-अलग भावना देकर २-२ रत्ती की गोलियाँ बनावें और छाया में सुखा लें। इसके सेवन से सब स्वरभेद, खाँसी,

कठिन श्वास सम्पूर्ण कफज एवं वातकफजन्य रोग नष्ट होते हैं। इसके सेवन से कण्ठ किन्नरों के समान हो जाता है॥ २६-३३॥

रुजा विविधयार्त्तानां बलासाद्रससेवनात्। कासार्त्तानां यक्ष्मिणाञ्च जायन्ते प्रायशो नृणाम्॥ ३४॥ कण्ठेऽनुबन्धभावेन ये च शोथक्षतादयः। ते चिकित्स्याः पृथङ् नैव जिगीषेन्मुख्यमामयम्॥ ३५॥ सहैव वा तथा शान्तिरिति वृद्धमतं स्मृतम्। ते चापि कण्ठशोथाद्या विरुद्धा जनयन्त्यपि॥ ३६॥ अनन्यहेतुकं तेषां स्वरभेदं सुदारुणम्। अनुबन्ध्यांश्चिकित्सेत तत्र पूर्वं भिषग्वरः॥ ३७॥ शान्तेऽनुबन्ध्ये शाम्यन्ति स्वयमेवानुबन्धकाः। प्रभूतशाखोऽपि तरुश्छिन्ने मूले विशुष्यति॥ ३८॥ अतः पूर्वं परीक्षेतनिदानगतिभिः पृथक्। अनुबन्ध्यानुबन्ध्यान्वै ततः कुर्याच्चिकित्सितम्॥ ३९॥

विविध प्रकार के रोगों से पीड़ित मनुष्यों को कफवृद्धि से, पारा के सेवन से तथा खाँसी एवं यक्ष्मा से पीड़ित रोगी के उपद्रवरूप से कण्ठ में जो सूजन एवं क्षत आदि हो जाते हैं उनकी अलग चिकित्सा की आवश्यकता नहीं होती वहाँ प्रधान (अनुबन्ध्य) रोग की ही चिकित्सा करनी चाहिये अथवा मुख्य रोग के साथ ही साथ चिकित्सा करें तो इन उपद्रवों की शान्ति स्वयं हो जाती है, यह वृद्ध वैद्यों का मत है। ये कण्ठशोथ आदि बढ़कर उन उन रोगियों में स्वरभेद को पैदा कर देते हैं। ऐसी अवस्था में स्वरभेद का कोई दूसरा कारण नहीं होता। ऐसे रोगियों में पहिले अनुबन्ध्य (प्रधान) की चिकित्सा करनी चाहिये। अनुबन्ध्य के शान्त होने पर अनुबन्धक स्वयं शान्त हो जाते हैं, जैसे बहुशाखायुक्त वृक्ष की जड़ को काटने से सारा वृक्ष ही सूख जाता है। अतः स्वरभेद की चिकित्सा से पहिले निदान आदि द्वारा अनुबन्ध्य एवं अनुबन्धक की परीक्षा कर लेनी चाहिये। परीक्षा के बाद ही चिकित्सा लाभदायक होती है॥ ३४-३९॥

किङ्किराटाद्य कवल

किङ्किराटं स्थूलपत्रं तिन्दुकं जातिकां तथा। समभागां समादाय तत्षोडशगुणेऽम्भसि॥ ४०॥ पचेदर्द्धावशिष्टः स कवलो धार्यते यदि। स्वरभेदं क्षतं हन्याद् व्यथाञ्च शोणितस्रुतिम्॥ ४१॥

बबूल, जामुन, तेन्दुक तथा चमेली, इनकी छाल को बराबर मात्रा में लेकर १६ गुने पानी में उबाले। जब जल आधा रह जाय तो उतार ले और छानकर गुनगुने क्वाथ का ही कवल धारण करें। इस प्रकार स्वरभेद, मुखक्षत, कण्ठक्षत, वेदना तथा रक्तस्राव बन्द हो जाता है॥ ४०-४१॥

क्वाथं यश्च हरीतक्या धारयेत् सह शुभ्रया। रक्तस्रावादिकं सोऽपि जयेदाशु विनिश्चितम्॥ ४२॥

*तथा हरड़ के क्वाथ में फिटकिरी फिटकरी को घोलकर कवल धारण करने से शीघ्र ही रक्तस्राव आदि बन्द हो जाते हैं॥ ४२॥*

ऊर्णानिर्मितपट्टेन कण्ठो वर्त्यः सदा नरैः॥ ४३॥

स्वरभेद के रोगी को सदा ऊन के बने गुलूबन्द से कण्ठ को ढके रहना चाहिये॥ ४३॥

त्र्यम्बक अभ्रक।

अभ्रं मेचकमारितं पलमितं व्याघ्री बला गोक्षुरं, कन्यापिप्पलिमूलभृङ्गरपकाः पत्रं तथा बादरम्। धात्रीशक्रिगुडूचिकाः पृथगतः सर्वैः पलांशैर्युतं, सम्मर्द्यातिमनोरमं सुवटितं कृत्वा यदा सेवितम्॥ ४४॥ वातोत्थं कफपित्तजं स्वरगदं यञ्च

त्रिदोषात्मकम् अत्युग्रं वदतो हतं बहुविधं पानीयदोषोद्भवम्। कासं श्वासशिरोग्रहं सयक्ष्मं हिक्कां तृषां कामलामर्शांसि ग्रहणीं ज्वरं बहुविधं शोथं तथा चार्बुदम्॥ ४५॥ हन्ति त्र्यम्बकमभ्रमद्भुततरं वृष्यातिवृष्यं परं वह्निवृद्धिकरं रसायनवरं सर्वामयध्वंसि तत्॥ ४६॥

चार तोला अभ्रक भस्म को कटेरी, खरेटी, गोखरू, घृतकुमारी, चिरायता, भांगरा, अडूसा, बेर के पत्ते, आँवला, हल्दी और गिलोय के चार-चार तोला रस में क्रमशः भावना देकर एक-एक रत्ती की गोली बनावे। इस 'त्र्यम्बकाभ्र' का सेवन करने से सब प्रकार के स्वरभङ्ग, खाँसी, श्वास, शिरोग्रह, यक्ष्मा, हिचकी, तृषा, कामला, अर्श, ग्रहणी, ज्वर, शोथ तथा अर्बुद आदि अनेक रोग नष्ट होते हैं। यह अत्यन्त वीर्यवर्धक, अग्निदीपक तथा रसायन है। मात्रा १ रत्ती-२ रत्ती॥४४-४६॥

स्वरभेद में पथ्य

स्वेदो बस्तिधूमपानं विरेकः कवलग्रहः नस्यं भाले शिरावेधो यवा लोहितशालयः॥ ४७॥ हंसाद्यश्चीलाम्रचूडकेकिमांसरसाः सुरा। गोक्षुरकः काकमाची जीवन्ती बालमूलकम्॥ ४८॥ द्राक्षा पथ्या मातुलुङ्गं लशुनं लवणार्द्रकम्। ताम्बूलं मरिचं सर्पिः पथ्यानि स्वरभेदिनः॥ ४९॥

स्वेद, बस्ति, आयुर्वेदोक्त स्वरभेदनाशक धूमपान, विरेचन, कवलधारण, नस्य, मस्तक पर शिरावेध, जौ, लाल शालिचावल; हंस, जंगली मुर्गा और मोर के मांस का रस, शराब, गोखरू, मकोय, जीवन्ती, कच्ची मूली, अंगूर, मुनक्का, हरड़, बिजौरा, लहसन, नमकसहित अदरख, पान, कालीमिर्च, घी ये सब स्वरभेदियों के लिये पथ्य हैं॥ ४७-४९॥

अपथ्य।

आमं कपित्थं बकुलं शालूकं जाम्बवानि च। तिन्दुकानि कषायाणि वमिं स्वप्नं प्रजल्पनम्। अम्लं दधि च यत्नेन स्वरभेदी विवर्जयेत्॥ ५०॥

इति भैषज्यरत्नावल्यां स्वरभेदाधिकारः समाप्तः।

कच्चे फल, कच्चे कैथ, बकुल, जलीय कन्द, जामुन, तेन्दू, कसैले द्रव्य, वमन, स्वप्न, अधिक बोलना, खटाई, दही, इनका यत्नपूर्वक परित्याग कर देना चाहिये॥ ५०॥

इति श्री॰सरयूप्रसादत्रिपाठिविरचितायां भैषज्यरत्नावल्या रत्नप्रभाभिधायां व्याख्यायां स्वरभेदाधिकारः समाप्तः।

## हृद्रोगाधिकारः।

वातज हृद्रोगचिकित्सा।

वातोपसृष्टे हृदये वामयेत् स्निग्धमातुरम्। द्विपञ्चमूलीक्वाथेन सस्नेहलवणेन च॥ १॥

मदनादिचूर्णयुक्तेन द्विपञ्चमूलीक्वाथेन वमनं कर्त्तव्यम्। अत्र विरेचनमपि कर्त्तव्यं लङ्घनञ्च। यदुक्तं—हृद्रोगिणं स्नेहयित्वा वामयेत् स्रंसयेत्तथा। लङ्घयेदचिरोत्थञ्च हृद्रोगं वातिकं विना इति।

वातप्रधान हृद्रोग में स्नेहन करने के बाद मैनफल आदि के चूर्ण से युक्त दशमूल के क्वाथ में स्नेह और लवण मिलाकर पान करके वमन कराना चाहिये। इसमें विरेचन और लंघन भी करना चाहिए, क्योंकि लिखा है कि हृद्रोगी को स्नेहन कराके वमन और विरेचन करावे। यदि हृद्रोग नूतन हो, तो लंघन करावे, किन्तु वातिक हृद्रोग में लंघन कराना उचित नहीं है॥ १॥

पिप्पल्यादि चूर्ण

पिप्पल्येला वचा हिङ्गु यवक्षारोऽथ सैन्धवम् । सौवर्चलमथोशुण्ठी अजमोदा च चूर्णितम् ॥ २ ॥ फलधान्याम्लकौलत्थदधिमद्यासवादिभिः । पाययेच्छुद्धदेहञ्च स्नेहेनान्यतमेन वा ॥ ३ ॥

पहिले स्नेहन अथवा वमन आदि के द्वारा शरीर को शुद्ध करके पीपरि, इलायची, बच, हींग, जवाखार, सेंधानमक, कालानमक, सोंठ और अजमोद का चूर्ण बनाकर नींबू का रस, काँजी, कुलथी का जूस, दही, मद्य अथवा आसव आदि के साथ पान कराना चाहिये ॥ २–३ ॥ मात्रा ११२ माशा ॥

नागरं वा पिबेदुष्णं कषायञ्चाग्निवर्द्धनम् । कासश्वासानिलहरं शूलहृद्रोगनाशनम् ॥ ४ ॥

सोंठ का गरम-गरम काढ़ा पीने से अग्नि की वृद्धि होती है। कास, श्वास, वायु, शूल और हृद्रोग नष्ट होते हैं ॥ ४ ॥

पित्तज हृद्रोगचिकित्सा।

श्रीपर्णी मधुकं क्षौद्रं सितागुडजलैर्वमेत् । पित्तोपसृष्टे हृदये सेवेन्मधुरकैः शृतम् । घृतं कषायांश्चोद्दिष्टान् पित्तज्वरविनाशनान् ॥ ५ ॥

पैत्तिक हृद्रोग में गम्भारी का फल और मुलेठी के अधोनिशिष्ट ( आधा रह गया हो ) क्वाथ में मधु, शक्कर, पुराना गुड़ और मैनफल का चूर्ण मिलाकर वमन करना चाहिये। मधुर द्रव्यों से सिद्ध किये हुए क्वाथ, घृत तथा पित्तज्वराधिकारोक्त क्वाथों का सेवन कराना चाहिये ॥ ५ ॥

शीताः प्रदेहाः परिषेचनानि तथा विरेको हृदि पित्तदुष्टे। द्राक्षा सिता क्षौद्रपरूषकैः स्याच्छुद्धे च पित्तापहमन्नपानम् ॥ ६ ॥

पैत्तिक हृद्रोग में शीतल प्रलेप, सेचन और विरेचन कराना चाहिये। वमन और विरेचन द्वारा देह शुद्ध कराके मुनक्का, चीनी, मधु और फालसा के साथ पित्तनाशक अन्नपान की व्यवस्था करनी चाहिये ॥ ६ ॥

पिष्ट्वा पिबेद्वापि सिताजलेन यष्ट्याह्वयं तिक्तकरोहिणीञ्च ॥ ७ ॥

अथवा चीनी के शर्बत में मुलेठी और कुटकी पीसकर पान करना चाहिये ॥ ७ ॥

अर्जुनस्य त्वचा सिद्धं क्षीरं योज्यं हृदामये । सितया पञ्चमूल्या वा बलया मधुकेन वा ॥ ८ ॥

अर्जुन की छाल से सिद्ध लघुपञ्चमूल और शक्कर के साथ सिद्ध अथवा खरेटी और मुलेठी के साथ सिद्ध किये हुए दुग्ध को पीना चाहिये ॥ ८ ॥

अर्जुनत्वक्चूर्ण।

घृतेन दुग्धेन गुडाम्भसा वा पिबन्ति चूर्णं ककुभत्वचो ये। हृद्रोगजीर्णज्वररक्तपित्तं हत्वा भवेयुश्चिरजीविनस्ते ॥ ९ ॥

घृत, दुग्ध अथवा गुड़ के शर्बत के साथ जो अर्जुन की छाल का चूर्ण सेवन करते हैं वे हृद्रोग, जीर्णज्वर और रक्तपित्त रोग को नष्ट करके दीर्घायु होते हैं ॥ ९ ॥

वचानिम्बकषायाभ्यां वान्तं हृदि कफोत्थिते । वातहृद्रोगहृच्चूर्णं पिप्पल्यादिञ्च पाययेत् ॥ १० ॥

पिप्पल्यादिचूर्णं पिप्पल्येलावचा हिङ्गु इत्यादि यदुक्तम् ।

कफजन्य हृद्रोग में बच और नीम की छाल का क्वाथ पिलाकर वमन कराना चाहिये। वातहृद्रोगनाशक 'पिप्पल्येलावचाहिङ्गु' इत्यादि श्लोक के द्वारा पीछे कहे हुए पिप्पल्यादि चूर्ण का सेवन कराना चाहिये ॥ १० ॥

### त्रिदोषहृद्रोगचिकित्सा ।

त्रिदोषजे लंघनमादितः स्यादन्नञ्च सर्वेषु हितं विधेयम् । हीनातिमध्यत्वमवेक्ष्य चैव कार्यं त्रयाणामपि कर्मशस्तम् ॥ ११ ॥

सान्निपातिक हृद्रोग में पहिले लंघन के द्वारा दोषों को क्षीणबल करके पश्चात् तीनों दोषों में हितकर भोजन देना चाहिये तथा दोषविशेष की प्रबलता, मध्यता और हीनावस्था का विचार कर यथोचित चिकित्सा करनी चाहिये ॥ ११ ॥

### पुष्करमूलचूर्ण ।

चूर्णं पुष्करजं लिह्यान्माक्षिकेण समायुतम् । हृच्छूलश्वासकासघ्नं क्षयहिक्कानिवारणम् ॥ १२ ॥

१।२ माशा पुष्करमूल के चूर्ण का मधु के साथ सेवन करने से हृदयशूल, श्वास, कास, क्षय और हिक्कारोग दूर होते हैं ॥ १२ ॥

तैलाज्यगुडविपक्वं चूर्णं गोधूमपार्थजं वापि । पिबति पयोऽनु च स भवेज्जितसकलश्वासकासहृदामयः पुरुषः ॥ १३ ॥

पार्थोऽर्जुनः पार्थगोधूमाभ्यां समो गुडः तैलाज्ये अल्पमात्रया देये किञ्चिज्जलं दत्त्वा पिबेत् वा शब्दः पूर्वयोगापेक्षया ।

गोधूमचूर्ण १ भाग, अर्जुन की छाल का चूर्ण १ भाग और गुड़ २ भाग एकत्र कर थोड़े से तिलतैल और घृत में पकाकर उसमें थोड़ा जल मिलाकर पान करे और ऊपर से थोड़ा दूध पिये, तो प्रबल हृद्रोग, श्वास और कासरोग दूर होते हैं । मात्रा–१॥ माशा ॥ १३ ॥

गोधूमककुभचूर्णं छागपयो गव्यसर्पिषा पक्वम् । मधुशर्करासमेतं शमयति हृद्रोगमुद्धतं पुंसाम् ॥ १४ ॥

गोधूमचूर्ण १ भाग, अर्जुन की छाल का चूर्ण १ भाग, बकरी का दूध ४ भाग, इन्हें एकत्र पाक करके किंचित् गोघृत से भून ले । शीतल होने पर थोड़ा शहद या शक्कर मिलाकर सेवन करने से प्रबल हृद्रोग नष्ट होता है । मात्रा १।२ तोला ॥ १४ ॥

### नागबलाचूर्ण ।

मूलं नागबलायास्तु चूर्णं दुग्धेन पाययेत् । हृद्रोगश्वासकासघ्नं ककुभस्य च वल्कलम् ॥ १५ ॥ रसायनं परं बल्यं वातजिन्मासयोजितम् । संवत्सरप्रयोगेण जीवेद्वर्षशतं ध्रुवम् ॥ १६ ॥

नागबला के मूल के ३ माशा चूर्ण को दूध के साथ सेवन करे, तो हृद्रोग, श्वास और कासरोग आराम होता है । तथा अर्जुन की छाल के ३ माशा चूर्ण को दुग्ध के साथ एक मास पर्यन्त सेवन से हृद्रोग नष्ट होता है । यह वातनाशक, बलकारक परम रसायन है । एक वर्ष पर्यन्त निरन्तर सेवन करने से निःसंदेह सौ वर्ष तक जीता है ॥ १५-१६ ॥

### हिंग्वादिचूर्ण ।

हिङ्गूग्रगन्धाबिडविश्वकृष्णाकुष्ठाभयाचित्रकयावशूकम् । पिबेत् ससौवर्चलपुष्कराढ्यं यवाम्भसा शूलहृदामयघ्नम् ॥ १७ ॥

हींग, मीठी बच, बिड नमक, सोंठ, पीपरि, कूट, हड़, चीता की जड़, जवाखार, काला नमक और पुष्करमूल के चूर्ण को जौ के क्वाथ के साथ सेवन करने से शूल और हृद्रोग नष्ट होते हैं । मात्रा–१।२ माशा ॥ १७ ॥

दशमूलकषायस्तु लवणक्षारयोजितः । कासं श्वासञ्च हृद्रोगं गुल्मं शूलञ्च नाशयेत् ॥ १८ ॥

दशमूल के क्वाथ में सेंधा नमक और जवाखार मिलाकर पान करे तो कास, श्वास, हृद्रोग, गुल्म और शूल नष्ट होते हैं ॥ १८ ॥

### पाठाद्यचूर्ण ।

पाठां वचां यवक्षारमभयां चाम्लवेतसम् । दुरालभां चित्रकञ्च त्र्यूषणञ्च फल-

त्र्यम् ॥ १९ ॥ शटीं पुष्करमूलञ्च तिन्तिडीकं सदाडिमम्। मातुलुङ्गस्य मूलानि श्लक्ष्णचूर्णानि कारयेत् ॥ २० ॥ सुखोदकेन मद्यैर्वा प्लुतान्येतानि पाययेत्। अर्शः शूलञ्च हृद्रोगं गुल्मञ्चाशु नियच्छति २१

पाढ़ी, बच, जवाखार, हरड़, अमलवेत, जवासा, चीता की जड़, त्रिकुट, त्रिफला, कचूर, पुष्करमूल, इमली की छाल, अनार की छाल और बिजौरे नींबू के मूल की छाल के १ माशा चूर्ण को गुनगुने जल अथवा मद्य के साथ सेवन करे तो बवासीर, शूल, हृद्रोग और गुल्म रोग नष्ट होते हैं ॥ १९-२१ ॥

पुष्करमूलादिचूर्ण।

सपुष्कराख्यं फलपूरमूलं महौषधं शटयभया च कल्कः। क्षाराम्लसर्पिर्लवणैर्विमिश्रः स्याद् वातहृद्रोगहरो नराणाम् ॥ २२ ॥

पोहकरमूल, बिजौरे की जड़, सोंठ, कचूर, हरड़, इनके चूर्ण को दूध, काँजी, घृत अथवा नमक के साथ सेवन करने से सम्पूर्ण हृद्रोग शान्त होते हैं। मात्रा—१ माशा ॥ २२ ॥

हरीतक्यादि चूर्ण।

हरीतकी वचा रास्ना पिप्पली नागरोद्भवम्। शटीपुष्करमूलोत्थं चूर्णं हृद्रोगनाशनम् ॥ २३ ॥

हरड़, बच, रास्ना, पीपल, सोंठ, कचूर, पोहकरमूल, इनके चूर्ण को बराबर मात्रा में मिलाकर सेवन करने से सब हृद्रोग शान्त होते हैं। मात्रा—२ माशा ॥ २३ ॥

त्रिवृतादि चूर्ण।

त्रिवृत्शटी बला रास्ना शुण्ठी पथ्या सपौष्करा। चूर्णिता वा शृता मूत्रे पातव्या कफहृद्गदे ॥ २४ ॥

कफज हृद्रोग में निसोत, कचूर, खरैटी, रास्ना, सोंठ, हरड़, पोहकरमूल, इनके मिले हुए चूर्ण को अथवा गोमूत्र से सिद्ध क्वाथ को सेवन कराना चाहिये। चूर्ण की मात्रा १ माशे से २ माशे तक ॥ २४ ॥

सूक्ष्मैलादि चूर्ण।

सूक्ष्मैला मागधीमूलं मलीढं सर्पिषा सह। नाशयेदाशु हृद्रोगं कफजं सपरिग्रहम् ॥ २५ ॥

*छोटी इलायची तथा पीपलामूल* के चूर्ण को घृत के साथ मिलाकर चाटने से शीघ्र ही उपद्रवयुक्त कफज हृद्रोग नष्ट होता है। मात्रा ४ रत्ती से ८ रत्ती तक ॥ २५ ॥

पुटदग्धमश्मपिष्टं हरिणविषाणं च सर्पिषा पिबेत्‌। हृत्पृष्ठशूलमुपशमुपयात्यचिरेण कष्टमपि ॥ २६ ॥

गजपुटदग्ध (गजपुट में फूँके हुए) *हरिणशृङ्ग* को पीसकर घृत के साथ सेवन करे तो हृदय और पृष्ठ का शूल तत्काल नष्ट होता है २६

कृमिहृद्रोगिणं स्निग्धं भोजयेत् पिशितौदनम्। दध्ना च पललोपेतं त्र्यहं पश्चाद्विरेचयेत् ॥ २७ ॥ सुगन्धिभिः सलवणैर्योगैः साजाजिशर्करैः। विडङ्गाढ्यैर्धान्याम्लं पाययेद्धितमुत्तमम् ॥ २८ ॥

अत्र पिशितौदनं कृमीणामुत्क्लेशार्थं पिशितप्रधानमोदनं पिशितौदनं दध्ना पललेन च संयुक्तं त्र्यहं भोजयेत्। पललं पिष्टकमिति जेज्जडः तिलचूर्णमिति चक्रः। अन्ये तु शुष्कमांसचूर्णमाहुः। एते कृमिघातकाः। सुगन्धिभिः सलवणैर्योगैरिति विरेचनयोगैः चातुर्जातेन सुगन्धीकरणञ्च वान्तिशङ्कानिरासार्थं धान्याम्लमनुपेयम्।

कृमिजन्य हृद्रोग में पहिले ३ दिन पर्यन्त दही और तिलपिष्टक के साथ मांसयुक्त भात खिलावे। पश्चात् दालचीनी, तेजपात, नागकेसर,

इलायची आदि ओषधियों द्वारा सुगन्धित सैंधव, जीरा, शक्कर और अधिक वायविडंग सहित विरेचक औषधों से विरेचन कराना चाहिये। अनुपान—धान्याम्ल (काँजी)। यहाँ मांसप्रधान भात का दही और पलल के साथ जो विधान किया गया है वह कृमियों के निकालने के लिये है। यहाँ पलल पद से पिष्टक का ग्रहण करना चाहिए, ऐसा जेज्जटजी कहते हैं। तिलचूर्ण का ग्रहण करे ऐसा चक्रदत्तजी कहते हैं। और लोगों का मत है कि शुष्क मांस के चूर्ण का ग्रहण करना चाहिए। ये सब वस्तु कृमिनाशक हैं। सुगन्धिभिः लवणयौगैः इस विरेचन के योग में वायुजाति से सुगन्धित जो करना है, वह वमन की शङ्का दूर करने के लिये है। धान्याम्ल का अनुपान रखना चाहिए ॥ २७-२८ ॥

कृमिजे च पिबेन्मूत्रं विडङ्गामयसंयुतम् । हृदि स्थिताः पतन्त्येवमधस्तात् क्रमयो नृणाम् । यवान्नं वितरेच्चास्मै स विडङ्गमतः परम् ॥ २९ ॥

कृमिजन्य हृद्रोग में विडंग और कूट के चूर्ण के साथ गोमूत्र पान करे तो हृदयस्थित कृमि गिर जाते हैं। तदनन्तर रोगी को विडङ्गचूर्ण मिलाकर जौ का भात खिलाना चाहिये ॥ २९ ॥

वल्लभक घृत ।

पुरुयं शताद्धंञ्च हरीतकीनां सौवर्चलस्यापि पलद्वयञ्च । पक्वं घृतं वल्लभकेति नाम्ना हृच्छ्वासशूलोदरमारुतघ्नम् ॥ ३० ॥

हरड़ पचास नग और काला नमक ८ तोला एकत्र कर, इन दोनों को एक साथ घी में पकावे। यह वल्लभक नाम घृत मतलो, शूल, उदररोग और वातरोग का नाशक है ॥ ३० ॥

श्वदंष्ट्राद्य घृत ।

श्वदंष्ट्रोशीरमञ्जिष्ठा बलाकाश्मर्यकट्फलम् । दर्भमूलं पृथक् पर्णी पलाशर्षभकौ स्थिरा ॥ ३१ ॥ पलिकां साधयेत्तेषां रसे क्षीरे चतुर्गुणे । कल्कैः स्वगुप्तर्षभकमेदा जीवन्तिजीरकैः ॥ ३२ ॥ शतावर्यृद्धि मृद्वीका शर्करा श्रावणीबिसैः । प्रस्थ सिद्धो घृतात्पापि पित्तहृद्रोगशूलनुत् ३३ मूत्रकृच्छ्रप्रमेहार्शः श्वासकासक्षयापहः । धनुः स्त्रीमद्यभाराध्वखिन्नानां बलमांसदः ॥ ३४ ॥

घृत १२८ तोला, क्वाथार्थ गोखुरू, खस, मजीठ, खरेटी, खम्भारी की छाल, कतृण (सुगन्धित तृणविशेष), कुशमूल, पृष्ठिपर्णी, पलाश की छाल, ऋषभक और शालपर्णी चार-चार तोला, पाकार्थ जल ६ सेर ३२ तोला, शेष १ सेर ४८ तोला, दुग्ध ६ सेर ३२ तोला, कल्कार्थ कौंच के बीज, ऋषभक, मेदा, जीवन्ती, जीरा, शतावरी, ऋद्धि, मुनक्का, शक्कर, गोरखमुण्डी और कमलनाल कुल मिलाकर १२ तोला ले, घृत, क्वाथ, दुग्ध और कल्क एकत्र कर धीमी आँच से पकाकर घृत सिद्ध करे। यह घृत पैत्तिक हृद्रोग, शूल, मूत्रकृच्छ्र, प्रमेह, अर्श, श्वास कास और क्षय रोगों को नष्ट करता है। यह घृत धनुष, स्त्री, मदिरा, बोझा, मार्ग में अधिक चलना इत्यादि कारणों से खिन्न पुरुषों के मांस और बल को बढ़ानेवाला है मात्रा ६ माशा से १ तोला ॥ ३१-३४ ॥

बलाद्य घृत ।

घृतं बलानागबलार्जुनाम्बु सिद्धं सयष्टीमधुकल्कपादम् । हृद्रोगशूलक्षतरक्तपित्तकासानिलासृक् शमयत्युदीर्णम् ३५

घृत २ सेर, क्वाथार्थ खरियारा, नागबला (गुलसकरी) और अर्जुन की छाल कुल मिलाकर ४ सेर, जल ३२ सेर, शेष ८ सेर। कल्कार्थ मुलेठी सब द्रव्यों की चौथाई। यथाविधि पाककर घृत सिद्ध करे। इस घृत का पान करने से हृद्रोग, शूल, उरःक्षत, रक्तपित्त, खाँसी और वातरक्त आदि रोग शमन होते हैं ॥ ३५ ॥ मात्रा ६ माशा से १ तोला।

### अर्जुन घृत ।

पार्थस्य कल्कस्वरसेन सिद्धं शस्तं घृतं सर्वहृदामयेषु ॥ ३६ ॥

घृत २ सेर, क्वाथार्थ अर्जुन की छाल ४ सेर, जल ३२ सेर, शेष ८ सेर। कल्कार्थ अर्जुन-छाल आधसेर। यथाविधि पाककर घृत सिद्ध करे। यह घृत हर प्रकार के हृद्रोग के लिये लाभदायक है ॥ ३६ ॥ मात्रा ६ माशा से १ तोला।

### ककुभादि चूर्ण ।

ककुभत्वग्वचा रास्ना बलानागबलाभया । शटीपुष्करमूलञ्च पिप्पली विश्वभेषजम् ॥ ३७ ॥ सर्वाण्येतानि सञ्चूर्ण्य सर्पिषा शाणमात्रया। भक्षयेत् प्रातरुत्थाय सर्वहृद्रोगशान्तये ॥ ३८ ॥

अर्जुन की छाल, वच, रास्ना, खरियारा, नागबला, हरड़, कचूर, पुष्करमूल, पीपरि और सोंठ का चूर्ण बनाकर तीन-तीन माशे घृत के साथ प्रतिदिन प्रातःकाल सेवन करे। यह चूर्ण हर प्रकार के हृद्रोग को शान्त करता है ॥३७-३८॥

### कल्याणसुन्दर रस ।

सिन्दूरमभ्रं तारञ्चताम्रं हेमंचमाक्षिकम्। सर्वं खल्लतले क्षिप्त्वा मर्दयेद् वह्निवारिणा ॥ ३६ ॥ हस्तिशुण्ड्यम्भसा पश्चाद्भावयित्वा च सप्तधा । गुञ्जामात्रां वटीं कृत्वा कोष्णतोयेन दापयेत् ॥ ४० ॥ उरस्तोयञ्च हृद्रोगं वक्षो वातपुरोऽस्रकम् । फौप्फुसान् हन्ति रोगांश्च रसः कल्याणसुन्दरः ॥ ४१ ॥

रससिन्दूर, अभ्रकभस्म, चाँदी की भस्म, ताम्रभस्म, स्वर्णभस्म और स्वर्णमाक्षिक समभाग लेकर चीता के रस में एक बार और सात बार हाथीशुंडा के रस की भावना दे एक-एक रत्ती की गोली बनावे। थोड़े गरम जल के साथ सेवन करे। इस 'कल्याणसुन्दर रस' के सेवन से उरस्तोय, हृद्रोग उरोवात और उरोरुधिर (वक्षःस्थल के रक्तसंचय) तथा फुप्फुस सम्बन्धी रोग नष्ट होते हैं ॥ ३६-४१ ॥ मात्रा १ रत्ती।

### चिन्तामणि रस ।

पारदं गन्धकञ्चाभ्रं लौहं वङ्गं शिलाजतु । समं समं गृहीत्वा च स्वर्णं सूताङ्घ्रिसम्मितम् ॥ ४२ ॥ स्वर्णस्य द्विगुणं रौप्यं सर्वमेकत्र मर्दयेत् । चित्रकस्य द्रवेणापि भृङ्गराजाम्भसा ततः ॥ ४३ ॥ पार्थस्याथ कषायेण सप्तकृत्वो विभावयेत्। ततो गुञ्जामिताः कुर्याद्वटीश्छायाप्रशोषिताः ॥ ४४ ॥ एकैकां दापयेदासां गोधूमक्वाथवारिणा । हृद्रोगान्निखिलान् हन्ति व्याधीन् फुप्फुसजानपि ॥ ४५ ॥ प्रमेहान् विंशतिं श्वासान् कासानपि सुदुस्तरान् । बलपुष्टिकरो हृद्यो रसश्चिन्तामणिः स्मृतः ॥ ४६ ॥

पारा, गन्धक, अभ्रक, लौह, बङ्ग और शिलाजीत एक एक तोला, स्वर्णभस्म ३ माशे, चाँदी की भस्म आधा तोला एकत्र कर क्रमशः चीता के रस में, भाँगरे के रस में और अर्जुन की छाल के क्वाथ में सात-सात भावना देकर एक-एक रत्ती की गोली बनावे। प्रतिदिन एक एक गोली गेहूँ के क्वाथ के साथ सेवन करे। इसका सेवन करने से हृद्रोग, फेफड़े के रोग, प्रमेह, श्वास कास आदि विविध रोग शान्त होते हैं। बल वीर्य की वृद्धि होती है तथा हृदय के लिए अत्यन्त हितकारी है ॥ ४२-४६ ॥ मात्रा १ रत्ती।

### प्रभाकरवटी ।

माक्षिकं लौहमभ्रञ्च तुगाक्षीरी शिलाजतु । क्षिप्त्वा खल्वोदरे पश्चाद्भावयेत् पार्थवारिणा ॥४७॥ गुञ्जाद्वयमितां कुर्याद्वटीं छायाविशोषिताम् । प्रभाकरवटी सेयं हृद्रोगान्निखिलान् जयेत् ॥ ४८ ॥

स्वर्णमाक्षिक, लौह, अभ्रक, वंशलोचन और शिलाजीत समभाग लेकर अर्जुन के क्वाथ की भावना देकर २-२ रत्ती की गोलियां बना छाया में शुष्क कर ले। इस प्रभाकरवटी के सेवन से सब प्रकार के हृद्रोग आराम होते हैं ॥ ४७--४८ ॥ मात्रा १ वटी।

विश्वेश्वर रस।

स्वर्णाभ्रलौहवङ्गानां रसगन्धकयोरपि। वैक्रान्तस्य च संगृह्य भागांस्तोलकसम्मितान् ॥ ४९ ॥ पार्थस्य सलिलेनाथ भावयित्वा यथाविधि। रक्तिकैकप्रमाणेन विदध्याद्वटिकास्ततः ॥ ५० ॥ अयं विश्वेश्वरो नाम रसः फुफ्फुसजान् गदान्। हृद्रोगांश्च जयेत् सर्वान् संशयोऽत्र न विद्यते ॥ ५१ ॥

स्वर्णभस्म, अभ्रकभस्म, लौहभस्म, वङ्गभस्म, पारद, शुद्ध गन्धक और वैक्रान्त एक-एक तोला एकत्र कर अर्जुन के क्वाथ की भावना दे एक-एक रत्ती की गोली बनावे। इसका सेवन करने से हृद्रोग और फेफड़े के समस्त रोग नष्ट होते हैं ॥ ४९--५१ ॥ मात्रा ½-१ रत्ती।

हृदयार्णवरस।

सूतार्कगन्धकं क्वाथे वराया मर्दयेद्दिनम्। काकमाच्या वटीं कृत्वा गुञ्जामात्रां भक्षयेत् ॥ हृदयार्णवनामायं हृद्रोगदलनो रसः ॥ ५२ ॥

पारा, ताम्र और शुद्ध गन्धक को क्रमशः त्रिफला के क्वाथ और मकोय के स्वरस में एक-एक दिन खरल करके एक-एक रत्ती की गोली बनावे। इसका सेवन करने से हृद्रोग शान्त होता है ॥ ५२ ॥ मात्रा १ रत्ती।

शङ्करवटी।

रसस्य भागाश्चत्वारो बलेरष्टौ तथा मताः। त्रयो लौहस्य नागस्य द्वावित्येकत्र मर्दयेत् ॥ ५३ ॥ भावयेत् काकमाच्याश्च चित्रकस्यार्द्रकस्य च। स्वरसेन जयन्त्याश्च वासाया बिल्वपार्थयोः ॥ ५४ ॥ ततो गुञ्जाद्वयमिता विदध्याद्वटिका भिषक्। एकां दापयेदासामीषदुष्णेन वारिणा ॥ ५५ ॥ जयेदियं फुफ्फुसजान रोगान् हृदयसम्भवान्। जीर्णज्वरं तथा घोरं प्रमेहानपि विंशतिम् ॥ ५६ ॥ कासश्वासामवातांश्च ग्रहणीमपि दुस्तराम्। वटी श्रीशङ्करप्रोक्ता बलपुष्टिविवर्द्धिनी ॥ ५७ ॥

पारा ४ भाग, शुद्ध गन्धक ८ भाग, लौहभस्म ३ भाग और शीशा २ भाग एकत्र कर क्रमशः मकोय, चीता, अदरख, जयन्ती, अडूसा, बिल्व और अर्जुन के स्वरस में भावना देकर दो-दो रत्ती की गोली बनावें। यह शिवजी की कही हुई शङ्करवटी गुनगुने जल के साथ सेवन करने से फेफड़े के रोग, हृद्रोग, जीर्णज्वर, प्रमेह, कास, श्वास, आमवात, ग्रहणी आदि विविध रोगों को दूर कर बल और पुष्टि को देती है ॥ ५३--५७ ॥ मात्रा १ वटी।

चिन्तेश्वरस।

रसगन्धाभ्रभस्मानि पार्थत्वक्सत्वगस्तुना। एकविंशतिधा घर्मे भावितानि विधानतः ॥ ५८ ॥ वटीं गुञ्जामितां कृत्वा मधुना सह लेहयेत्। वातजं पित्तजं श्लेष्मसम्भूतं वा त्रिदोषजम् ॥ कृमिजं चापि हृद्रोगं निहन्त्येव न संशयः ॥ ५९ ॥

पारा, गन्धक, अभ्रकभस्म इन्हें इकट्ठा कर बराबर मात्रा में मिला अर्जुन की छाल के क्वाथ से २१ बार भावना दे और १ रत्ती की गोली बनावे। अनुपान—शहद। इसके सेवन से वातिक, पैत्तिक, श्लैष्मिक, त्रिदोषज तथा कृमिज हृद्रोग अच्छा होता है। मात्रा १-२ रत्ती ॥ ५८—५९ ॥

नागार्जुनाभ्र।

सहस्रपुटनैः शुद्धं वज्राभ्रमर्जुनत्वचः। सत्त्वैर्विमर्दितं सप्तदिनं रात्रौ विशोषितम् ॥

६० ॥ छायाशुष्का वटी कार्या नाम्नेदमर्जुनाद्वयम् । हृद्रोगं सर्वशूलाशों हृल्लासच्छर्दिरोचकम् ॥ ६१ ॥ अतीसारमग्निमान्द्यं रक्तपित्तं क्षतक्षयम् । शोथोदराम्लपित्तञ्च विषमज्वरमेव च ॥ हन्त्यन्यानपि रोगांश्च बल्यं वृष्यं रसायनम् ॥ ६२ ॥

सहस्रपुटी अभ्रकभस्म को अर्जुन के क्वाथ से सात दिन भावना देकर १ रत्ती की गोली बनाकर छाया में सुखा ले। इसके सेवन से हृद्रोग, शूल, बवासीर, हृल्लास ( जी मतलाना ), वमन, अरुचि, अतिसार, मन्दाग्नि रक्तपित्त, क्षतक्षय, शोथ, उदररोग, अम्लपित्त, विषमज्वर आदि रोग नष्ट होते हैं। यह बलकारक, वीर्यवर्द्धक तथा रसायन है। मात्रा १-२ रत्ती ॥ ६०—६२ ॥

पञ्चाननरस ।

सूतगन्धौ द्रवैर्धात्र्या मर्दयेद् गोस्तनोद्रवैः । यष्टिखर्जूररससलिलैर्दिनञ्च परिमर्दयेत् । धात्रीचूर्णं सिताज्यानुपिबेद् हृद्रोगशान्तये ॥ ६३ ॥

पारा तथा गन्धक की कजली को आँवला, दाख, मुलहठी, खजूर इनरसके के क्वाथ में १ दिन घोटकर गोली बनावे। मात्रा—२ रत्ती। अनुपान—आँवले का चूर्ण तथा खाँड। इससे हृद्रोग शान्त होता है ॥ ६३ ॥

पार्थाद्यरिष्ट ।

पार्थत्वचस्तुलामेकां मृद्वीकार्द्धतुलां तथा । मार्गं मधुकपुष्पस्य पलविंशतिसम्मितम् ॥६४॥ चतुर्द्रोणेऽम्भसः पक्त्वा द्रोणमेषावशेषयेत् । धातक्या विंशतिपलं गुडस्य च तुलां क्षिपेत् ॥६५॥ मासमात्रं स्थितो भाण्डे भवेत् पार्थाद्यरिष्टकः । हृत्फुफ्फुसगदान् सर्वान् हन्त्ययं बलवीर्यकृत् ॥ ६६ ॥

अर्जुन की छाल ४ सेर, मुनक्का २½ सेर, महुआ के फूल १ सेर एकत्र कर ४१ सेर १६ तोला जल में पकावे। १२ सेर ६४ तोला जल शेष रहने पर उतारकर छान ले। इस क्वाथ में ४ सेर गुड़ और १ सेर धाय के फूल का चूर्ण मिलाकर पात्र में बन्द कर एक मास तक रख छोड़े, पश्चात् छान ले। इसको पार्थाद्यरिष्ट कहते हैं। इसके सेवन से हृदय और फेफड़े के कुल रोग आराम होते हैं तथा बल वीर्य की वृद्धि होती है मात्रा १-२ तोला ॥ ६४—६६ ॥

हृद्रोग में पथ्य ।

शालिमुद्गा यवा मांसं जाङ्गलं मरिचान्वितम् । पटोलं कारवेल्लञ्च पथ्यं प्रोक्तं हृदामये ॥ ६७ ॥

शालि चावल, मूँग, जौ, मरिचयुक्त जाङ्गल पशु-पक्षियों का मांस, परवल तथा करेला ये हृद्रोग में पथ्य हैं ॥ ६७ ॥

अपथ्य ।

तैलाम्लतक्रगुर्वन्नकषायश्रममातपम् । रोषं स्त्रीनर्म चिन्तां च भाष्यं हृद्रोगवांस्त्यजेत् ॥ ६८ ॥

इति भैषज्यरत्नावल्यां हृद्रोगाद्यधिकारः समाप्तः ।

तैल, खटाई, छाछ, भारी अन्न, कषाय द्रव्य, थकावट, धूप, क्रोध, स्त्री गोष्ठ, चिन्ता, अधिक बोलना ये हृद्रोग में त्याग देने चाहिये ॥ ६८ ॥

इति श्रीसरयूप्रसादत्रिपाठिविरचितायां भैषज्यरत्नावल्यां रत्नप्रभाभिधायां व्याख्यायां हृद्रोगाद्यधिकारः समाप्तः ।

## वायुरोगाधिकारः

सामान्यवायुरोगचिकित्सा ।

स्वाद्वम्ललवणैः स्निग्धैराहारैर्वातरोगिणः । अभ्यङ्गस्नेहबस्त्याद्यैः सर्वानेवोपपादयेत् ॥ १ ॥

वातव्याधियुक्त रोगी को मधुर, खट्टा, नमकीन और स्निग्ध आहार तथा तैलादि मर्दन, स्नेहपान और बस्तिक्रिया आदि से चिकित्सा करनी चाहिये ॥ १ ॥

कोष्ठस्थवायुचिकित्सा ।

विशेषतस्तु कोष्ठस्थे वाते क्षीरं पिबेन्नरः ॥ २ ॥

कोष्ठस्थ वायु में दुग्धपान विशेष लाभदायक होता है ॥ २ ॥

आमाशयस्थ वायुचिकित्सा ।

आमाशयस्थे शुद्धस्य यथा रोगहरी क्रिया । आमाशयगते वाते छर्दिताय यथाक्रमम् । रूक्षः स्वेदो लङ्घनञ्च कर्त्तव्यं वह्निदीपनम् ॥ ३ ॥

आमाशयगत वायु हो तो वमन और विरेचन आदि के द्वारा शुद्ध करके रोगानुसार चिकित्सा करनी चाहिये । तथा रूक्ष, स्वेद, लङ्घन और अग्निवर्धक क्रिया करनी चाहिये ॥ ३ ॥

पक्वाशयस्थवायुचिकित्सा ।

पक्वाशयगते वाते हितं स्नेहविरेचनम् । कार्यो बस्तिगते वापि विधिर्बस्तिविशोधनः ॥ ४ ॥

पक्वाशयगत वायु हो तो स्नेह विरेचन विशेष लाभदायक है । यदि बस्तिगत वायु हो तो बस्ति को शुद्ध करना चाहिये ॥ ४ ॥

रसादिगत वायुचिकित्सा ।

त्वङ्मांसासृक्शिराप्राप्ते कुर्याच्चासृग्विमोक्षणम् ।

त्वक्शब्देनात्र रस इति भानुः ।

स्नेहोपनाहाग्निकर्मबन्धनोन्मर्दनानि च । स्नायुसन्ध्यस्थिसंप्राप्ते कुर्याद्वाते विचक्षणः ॥ ५ ॥

रस, मांस, रुधिर और शिरागत वायु हो तो रक्तमोक्षण करना लाभदायक होता है । स्नायु, सन्धि और अस्थिगत वायु होने पर स्नेह, उपनाह, अग्निकर्म, बन्धन और मर्दन क्रिया श्रेष्ठ होती है ॥ ५ ॥

त्वग्गतवायुचिकित्सा ।

स्वेदाभ्यङ्गावगाहांश्च हृद्यं चान्नं रसाश्रिते ॥ ६ ॥

त्वचागत वायु हो तो स्वेद, तैलादि मर्दन, स्नान और हृद्य अन्नभोजन लाभदायक होता है ॥ ६ ॥

रक्त, मांस, मेद और अस्थिगत वायुचिकित्सा ।

शीताः प्रदेहा रक्तस्थे विरेको रक्तमोक्षणम् । विरेको मांसमेदःस्थे निरूहाः शमनानि च । बाह्याभ्यन्तरतः स्नेहैरस्थिमज्जगतं जयेत् ॥ ७ ॥

रक्तगत वायु में शीतल प्रलेप, विरेचन और रक्तमोक्षण करे । मांस तथा मेदोगत वायु में विरेचन, निरूहबस्ति (पिचकारी देना) और वायुशमनकारक औषधि देना लाभप्रद होता है । अस्थिगत तथा मज्जाश्रित वायु में स्नेहपान और तैलादि मर्दन करना चाहिये ॥ ७ ॥

शुक्रगतवायुचिकित्सा ।

हर्षोऽन्नपानं शुक्रस्थे बलशुक्रकरं हितम् । विबद्धमार्गं शुक्रं तु दृष्ट्वा दद्याद्विरेचनम् ॥ ८ ॥

शुक्रगत वायु हो तो हर्ष (खुशखुर), बलवर्द्धक और वीर्यवर्द्धक अन्नपान देना हितकर होता है । यदि शुक्र का मार्ग अवरुद्ध हो गया हो तो विरेचन कर[illegible] ॥ ८ ॥

गर्भशोषचिकित्सा।

गर्भे शुष्के तु वातेन बालानाञ्चापि शुष्यताम्। सितामधुककाश्मर्यैर्हितमुत्थापने पयः॥ ९॥

वायु के द्वारा गर्भ शुष्क हुआ हो अथवा वायु के द्वारा बच्चा कृश हुआ जाता हो तो मुलेठी, खम्भारि और शक्कर के साथ पकाया हुआ-दुग्ध विशेष लाभदायक होता है॥ ९॥

शिरोगतवायुचिकित्सा।

शिरोगतेऽनिले वाऽथ शिरोरोगहरी क्रिया॥ १०॥

वायु शिरोगत हो तो वायुजन्य शिरोरोग की चिकित्सा करनी चाहिये॥ १०॥

व्यादितास्य चिकित्सा।

व्यादितास्ये हनुं स्विन्नामंगुष्ठाभ्यां प्रपीड्य च। प्रदेशिनीभ्याञ्चोन्नम्य चिबुकोन्नमनं हितम्॥ ११॥

व्यादितास्यरोग (जिसमें मुख खुला ही रह जाय) में हनु अवदारिथ प्रदेश में स्वेदन करके अँगूठे से दबाकर तर्जनी उँगलियों से चिबुक (ठुड्डी) को ऊपर उठाना लाभदायक होता है॥ ११॥

अर्दितरोगचिकित्सा।

रसोनकल्कं नवनीतमिश्रं खादेन्नरो योऽर्दितरोगयुक्तः। तस्यार्दितं नाशयतीह शीघ्रं वृन्दं घनानामिव मातरिश्वा॥१२॥

अर्दित रोग में जो रोगी मक्खन मिलाकर लहसुन के कल्क का सेवन करता है उसका अर्दितरोग उसी प्रकार नष्ट होता है, जैसे प्रबल वायु से मेघों का समूह नष्ट हो जाता है॥१२॥

अर्दिते नवनीतेन खादेन्माषेण्डरीं नरः। क्षीरमांसरसैर्भुक्त्वा दशमूलीरसं पिबेत्॥ १३॥

अर्दितरोग में उड़द की पीठी के बड़े बनाकर मक्खन के साथ खाय अथवा दूध या मांस रस के साथ भोजन करके दशमूल के क्वाथ का सेवन करे तो अर्दितरोग आराम होता है॥ १३॥

स्वेदाभ्यङ्गशिरोबस्तिपाननस्यपरायणः। अर्दितं स जयेत् सर्पिः पिबेदौत्तरभक्तिकम्॥ १४॥

स्वेद, तैलमर्दन, शिरोबस्ति, स्नेहपान, नस्य और भोजन के पश्चात् घृतपान करना अर्दित रोग में विशेष लाभदायक होता है॥ १४॥

मन्यास्तम्भचिकित्सा।

पञ्चमूलीकृतः क्वाथो दशमूलीकृतोऽथवा। रूक्षः स्वेदस्तथा नस्यं मन्यास्तम्भे प्रशस्यते॥ १५॥

मन्यास्तम्भ रोग में बृहत् पञ्चमूल अथवा दशमूल का क्वाथ तथा रूक्ष स्वेद और नस्य विशेष लाभप्रद होता है॥ १५॥

ग्रीवास्तम्भचिकित्सा।

कटुतैलेनाभ्यक्ते लिप्ते कल्केन वाजिगन्धायाः। शाम्येद् ग्रीवास्तम्भं शूलं महदप्यनायासम्॥ १६॥

कड़वा तेल मलने तथा असगन्ध की जड़ को पीसकर लेप करने से ग्रीवास्तम्भ और शूल नष्ट होता है।

वातधमनीदोषचिकित्सा।

वाताद्वाग्धमनीदुष्टौ स्नेहगण्डूषधारणम्॥ १७॥

वायु के द्वारा यदि स्वरवाहिनी धमनी दूषित हो गई हो तो घृत और तैलादि का गंडूष धारण करना चाहिए॥ १७॥

कुब्जता चिकित्सा।

वातघ्नैर्दशमूल्या च नवं कुब्जमुपाचरेत् स्नेहैर्मांसरसैर्वापि अप्रदं नं विवर्जयेत्॥ १८॥

वायु के द्वारा मनुष्य कुबड़ा हो जाय तो वातनाशक औषध, दशमूल क्वाथ, स्नेहपान और मांसरस आदि से चिकित्सा करनी चाहिये। यदि कुबड़ापन प्राचीन हो तो उसको त्याग देना चाहिये ॥ १८ ॥

आध्मान चिकित्सा।

आध्माने लंघनं पाणितापश्च फलवर्त्तयः दीपनं पाचनञ्चैव बस्तिश्चाप्यत्र शोधनः ॥ १९ ॥

उदराध्मान में लंघन, हाथ गरम करके उसके द्वारा स्वेदन, फलवर्ति[1], दीपन और पाचन औषध प्रदान तथा शोधनबस्ति क्रिया की व्यवस्था करनी चाहिये ॥ १९ ॥

प्रत्यष्ठीलाष्ठीलिक चिकित्सा।

प्रत्यष्ठीलाष्ठीलिकयोरन्तर्विद्रधिगुल्मवत् ॥ २० ॥

अष्ठीला और प्रत्यष्ठीला रोग में अन्तर्विद्रधि और गुल्म के समान चिकित्सा करनी चाहिए ॥ २० ॥

गृध्रसीचिकित्सा।

तैलमेरण्डजं वापि गोमूत्रेण पिबेन्नरः। मासमेकं प्रयोगोऽयं गृध्रस्यूरुग्रहापहः ॥ २१ ॥

२ तोला गोमूत्र के साथ २ तोला एरण्ड के तेल को एक महीना पीने से गृध्रसी और ऊरुस्तम्भ रोग नष्ट होते हैं ॥ २१ ॥

शेफालिकादलक्वाथो मृद्वग्निपरिसाधितः। दुर्वारं गृध्रसीरोगं पीतमात्रं समुद्धरेत् ॥ २२ ॥

धीमी आँच से पकाये हुए, ४ तोला सँभालू की पत्तियों के क्वाथ को पीने से गृध्रसी रोग तत्काल आराम होता है ॥ २२ ॥

पिष्ट्वैरण्डफलं क्षीरे सविश्वं वा ख्वोः फलम् प्राग्वशो भक्षितः सिद्धो गृध्रसीकटिशूलनुत् ॥ २३ ॥

केवल एरण्ड के फल २ तोला को दूध में पीसकर सेवन करने से अथवा समान भाग सोंठ और एरण्ड के फल को दूध के साथ सेवन करने से गृध्रसी और कमर की पीड़ा नष्ट होती है ॥ २३ ॥

वातकण्टकचिकित्सा।

रक्तावसेचनं कार्यमभीक्ष्णं वातकण्टके। पिबेदेरण्डतैलं वा दहेत् सूचीभिरेव वा ॥ २४ ॥

वातकण्टक रोग में बार-बार पादप्रदेश में रुधिर निकालना (फस्द खोलना), गरम सलाई से दागना अथवा एरण्ड के तैल का पान करना चाहिए ॥ २४ ॥

खल्लीचिकित्सा।

खल्ल्यां स्निग्धाम्ललवणैः स्वेदोन्मर्दोपनाहनम् ॥ २५ ॥

खल्ली रोग में स्निग्ध, अम्ल और लवण द्रव्य के द्वारा स्वेद, मर्दन तथा बन्धन करना चाहिए ॥ २५ ॥

क्रोष्टुशीर्ष चिकित्सा।

गुग्गुलं क्रोष्टुशीर्षे तु गुडूचीत्रिफलाम्भसा। क्षीरेणैरण्डतैलं वा पिबेद्वा वृद्धदारकम् ॥ २६ ॥

क्रोष्टुशीर्ष में गिलोय तथा त्रिफला के ४ तोला क्वाथ से गुग्गुल १ मासा दूध के साथ अथवा एरण्ड के तैल अथवा दूध एवं गरम जल के साथ विधारा का सेवन कराना हितकारक है ॥ २६ ॥

वायुनाशक लेप।

कोलं कुलत्थाः सुरदारुरास्नामाषातसीतैलफलानि कुष्ठम्। वचाशताह्वायवचूर्णमम्लपिष्टानि वातामयिनां प्रदेहः ॥ २७ ॥

बेर की मींगी, कुलथी, देवदार, रास्ना, उड़द,

1—वायु अनुलोमन के लिए लवणमिश्रित घृत-तैलादि से भिगोई हुई कपड़े की वर्ति गुदा में दी जाती है।

अलसी का तैल, त्रिफला कूट, वच, सोया और जौ के आटे को काँजी में पीसकर गरम करके लेप करने से वातरोग की शान्ति होती है ॥ २७ ॥

तैलकाञ्जिकद्रोणी ।

पक्षाघातं कटिहनुशिरःकर्णनासाक्षितालुग्रीवाग्रन्थिप्रबलमनिलं सार्दितं सापतानम् । मूत्राघातं ग्रहणिगलरुक्श्वाससर्वाङ्गकम्पं तैलद्रोणी हरति न चिरात् काञ्जिकद्रोणिका च ॥ २८ ॥

किसी टब या नाँद में एक द्रोण ( १२ सेर ६४ तोला ) तिलतैल अथवा काँजी भरकर उसमें बैठकर स्नान करने से पक्षाघात, कटि, हनु, मस्तक, कर्ण, नासिका, चक्षु, तालु, ग्रीवा और ग्रन्थिस्थित प्रबल वायु, अर्दित, अपतानक, मूत्राघात, ग्रहणी, गलरोग, श्वास और सर्वाङ्गकम्परोग शीघ्र निवृत्त होते हैं ॥ २८ ॥

माषबलादिपाचन ।

माषबलाशुकशिम्बीकतृणरास्नाश्वगन्धोरुबूकाणाम् । क्वाथो नस्यनिपीतो रामठलवणान्वितः कोष्णः ॥ २९ ॥ अपहरति पक्षाघातं मन्यास्तम्भं सकर्णनादरुजम् । दुर्जयमर्दितवातं सप्ताहाज्जयति चावश्यम् ॥ ३० ॥

उड़द, खरेंटी की जड़, कौंच के बीज, गन्धतृण, रास्ना, असगन्ध, अरण्डी की जड़; इनके ४ तोला क्वाथ में हींग तथा सेंधा नमक २।२ रत्ती डालकर नासिका द्वारा पीने से पक्षाघात, मन्यास्तम्भ, कर्णनाद तथा अर्दितरोग शीघ्र नष्ट होते हैं ( आजकल इसे मुख द्वारा ही देते हैं ) २९-३०॥

माषात्मगुप्तैरण्डं शृतं वाट्यालकं पिबेत् । हिंगुसैन्धवसंयुक्तं पक्षाघातनिवारणम् ॥ ३१ ॥

उड़द, कौंच के बीज, अरण्डी की जड़ तथा खरैटी की जड़; इनके ४ तोला क्वाथ में हींग तथा सेंधानमक २।१ रत्ती डालकर पीने से पक्षाघात नष्ट हो जाता है ॥ ३१ ॥

शाल्वण स्वेद ।

काकोल्यादिः सवातघ्नः सर्वाम्लद्रव्यसंयुतः सानूपमांसः सुस्निग्धः सर्वस्नेहसमन्वितः ॥ ३२ ॥ सुखोष्णः स्पष्टलवणः शाल्वणः परिकीर्तितः । तेनोपनाहं कुर्वीत सर्वदा वातरोगिणाम् ॥ ३३ ॥ वातघ्नो भद्रदार्वादिः काकोल्यादिस्तु सौश्रुतः । मांसेनाम्रौषधं तुल्यं यावताम्लेन चाम्लता ॥ ३४ ॥ पट्टी स्यात् स्वेदनार्थञ्च काञ्जिकाद्यम्लमिष्यते । साधनश्च चतुःस्नेहाः स्निग्धत्वं च यथा भवेत् ॥ ३५ ॥

उपनाहः कोष्णो बहुलो लेपः ॥

सुश्रुतसंहिता में वर्णित काकोल्यादिगण तथा वातघ्न भद्रदार्वादिगण, आनूप मांस, काँजी, सुरा आदि अम्लद्रव्य, चारों स्नेह ( घृत, तैल, वसा, मज्जा ), लवणवर्ग सबको मिलाकर गर्म करके किञ्चित् गुनगुना उपनाह करना चाहिये । इस स्वेद में चक्रपाणि के अनुसार काकोल्यादिगण तथा भद्रदार्वादि दोनों गणों की औषधों के वज़न के बराबर आनूप मांस लेना चाहिये । अम्लस्नेह, लवण पदार्थ अनुमान से ही डालने चाहिये, जिससे अधिक न हों । वृन्द के अनुसार काकोल्यादि, भद्रदार्वादि तथा आनूप मांस, तीनों की आवश्यकता होने से समान भाग में ग्रहण करना चाहिये ॥३२-३५॥

रूक्षपरास्नादि क्वाथ ।

रास्नामिरयष्टिदारूणि रूवकत्रिफला तथा । दशमूलपृथक् श्यामा क्वाथो वातामयापहः ॥ ३६ ॥ अर्दिते च शिरःशूले ज्वरेऽपस्मार एव च । मनोभ्रंशे च विविधे कथितश्च शुभप्रदम् ॥ ३७ ॥

रास्ना, सोंठ, बायविडङ्ग, अरण्डी की जड़, त्रिफला, दशमूल, काली शारिवा; इनका क्वाथ अर्दित आदि वातरोगों को नष्ट करता है। यह शिरःशूल, ज्वर, अपस्मार, उन्माद आदि में भी हितकारक है मात्रा—४ तोला ॥३६-३७॥

पलमर्द्धपलञ्चैव रसोनस्य सुकुट्टितम्। हिंगुमीरकसिन्धूत्थसौवर्चलकटुत्रिकैः ३८॥ चूर्णितैर्माषकोन्मानैरवघृष्य विलोडितम्। यथाग्निभक्षितं प्रातरुबुकाथानुपानतः ॥ ३९ ॥ दिने दिने प्रयोक्तव्यं मासमेकं निरन्तरम्। वातरोगं निहन्त्याशु अर्दितं सापतन्त्रकम् ॥ ४० ॥ एकाङ्गरोगिणे चैव तथा सर्वाङ्गरोगिणे। ऊरुस्तम्भे च गृध्रस्यां कृमिदोषे विशेषतः ॥ कटिपृष्ठामयं हन्यादुदरञ्च विनाशयेत् ४१॥

छः तोले लहसुन को पीसकर उसमें हींग, जीरा, लाहौरी नमक, काला नमक, सोंठ, मिरच और पीपरि का चूर्ण एक-एक माशा मिलाकर रख ले। अग्नि के अनुसार उचित मात्रा में प्रतिदिन प्रातःकाल इस चूर्ण को खाकर अरण्डी के मूल के क्वाथ का एक मास तक सेवन करे तो अर्दित, अपतन्त्रक, एकांगवात, सर्वांगवात, ऊरुस्तम्भ, गृध्रसी, कटिशूल, पृष्ठशूल, कृमिदोष, उदररोग आदि वातरोग नष्ट होते हैं। मात्रा—२ माशे ॥ ३८-४१ ॥

कट्यादिवातनाशकयोग।

तैलं घृतञ्चार्द्रकमातुलुङ्ग्या रसं सचुक्रं सगुडं पिबेद्वा। कटीघूरुपृष्ठत्रिकगुल्मशूलगृध्रस्युदावर्त्तहरः प्रयोगः ॥ ४२ ॥

तिलतैल, घृत, अदरख के रस और बिजौरा नींबू के रस का चूक या गुड़ के साथ सेवन करे तो कटि, ऊरु, पीठ और त्रिक की पीड़ा गुल्म, शूल, गृध्रसी और उदावर्त रोग नष्ट होते हैं ॥ ४२ ॥

पञ्चमूलीबलासिद्धं क्षीरं वातामये हितम् ॥ ४३ ॥

वातरोग में बृहत्पञ्चमूल और खरेंटी के साथ सिद्ध किया दुग्ध लाभदायक होता है ४३ ॥

त्रयोदशाङ्गगुग्गुलु।

आभाश्वगन्धा हपुषा गुडूची शतावरी गोक्षुरवृद्धदारकम्। रास्ना शताह्वा सशठी यमानी सनागरा चेति समैश्च चूर्णम् ॥ ४४ ॥ तुल्यं भवेत् कौशिकमत्र मध्ये देयं तथा सर्पिरथार्द्धभागम्। कोलार्द्धमात्रं तु ततः प्रयोगात् कृत्वानुपानं सुरयाथ यूषैः ॥ ४५ ॥ मद्येन वा कोष्णजलेन वाथ क्षीरेण वा मांसरसेन वापि। कटिग्रहे गृध्रसि बाहुपृष्ठे हनुग्रहे जानुनि पादयुग्मे ॥ ४६ ॥ सन्धिस्थिते चास्थिगते च वाते मज्जाश्रिते स्नायुगते च कुष्ठे। रोगान् जयेद्वातकफानुविद्धान् वातेरितान् हृद्ग्रहयोनिदोषान् ॥ ४७ ॥ भग्नास्थिविद्धेषु च खञ्जवाते त्रयोदशाङ्गं प्रवदन्ति सन्तः ॥ ४८ ॥

गुग्गुलोरर्द्धभागं घृतम्। वृद्धवैद्यास्तु यावता घृतेन गुग्गुलुपिष्टं भवति तावदेव घृतं गृह्णन्ति।

बबूल की छाल, असगन्ध, हाऊबेर, गिलोय, शतावरि, गोखरू, विधारा, रास्ना, सौंफ, कचूर, अजवाइन और सोंठ का चूर्ण एक-एक तोला गूगुल १२ तोला और घृत ६ तोला एकत्र कर घोटकर रख ले। मदिरा, यूष, गरम जल, दूध अथवा मांसरस आदि के यथोचित अनुपान से कमर की पीड़ा, बाहु, पृष्ठ, जाँघ, पाँव, सन्धि, अस्थि, मज्जा और स्नायुगत वायु, हनुग्रह, हृद्ग्रह, कुष्ठ, योनिदोष, अस्थिभंग, खंजवात, वातकफजरोग आदि शान्त होते हैं। मात्रा १-३ माशा।

घी गुग्गुल से आधा होना चाहिए। वृद्ध वैद्यगण जितने घृत में गुग्गुल घोटा जाय, उतना ही घृत लेते हैं ॥ ४४-४८ ॥

### तैलमूर्च्छा विधि।

आदौ तैलं कटाहे दृढतरविमले मन्दमन्दानलैस्तत्, पक्वं निष्फेनभावं गतमिह हि यदा शैत्यभावं तदैतत्। मञ्जिष्ठा रात्रिलोध्रैर्जलधरनलुकैः सामलैः, साक्षपथ्यैः, सूचीपुष्पांघ्रिनीरैरुपहितमथितैर्गन्धयोगं जहाति ॥ ४९ ॥ तैलस्येन्दुकलांशिकैस्तु विकषाभागा हि मूर्च्छाविधौ, ये चान्ये त्रिफलापयोदरजनीह्रीवेरलोध्रान्विताः। सूचीपुष्पवटावरोहनलिकास्तस्याश्च पादांशिका, दुर्गन्धं विजहात्यतीव सुरभिं कुर्वन्ति धर्णारुणम् ॥ ५० ॥

पहले ४ सेर तिल्ली के तैल को एक लोहे की कड़ाई में डालकर मन्दी-मन्दी अग्नि से पकावे। पकाते-पकाते जब तैल झाग से रहित हो जाय तब आम आदि के पत्तों से उसकी परीक्षा करे, अर्थात् उस तैल में आम के एक नरम पत्ते को डाले। यदि वह पत्ता डालने के साथ ही तल जाय और तोड़ने पर सहज में भुर जाय तो समझना चाहिये कि यह तैल मूर्च्छा पाक के योग्य हो गया है। अब तैल को अग्नि पर से उतारकर ठंडा होने दे। किञ्चित् ठंडा होने पर २ तोला हल्दी को पीसकर जल के साथ घोलकर डाल दें। तत्पश्चात् मजीठ २० तोला एवं लोध, मोथा, नालुका, आँवला, बहेड़ा, हरड़, केवड़ा, बड़ की दाढ़ी, गन्धबाला, हरएक २ तोला, सबको कूटकर १६ सेर जल में मिलाकर तैल में डाल दे और मन्द-मन्द अग्नि पर पकावे। थोड़ा सा जल बाकी रहते-रहते उतार ले। इस प्रकार मूर्च्छापाक करने से दुर्गन्ध नष्ट होकर तैल सुगन्धित और लाल रंग का हो जाता है ॥ ४९-५० ॥

### वातहर तैलों की विशेषमूर्च्छा विधि।

आम्रजम्बूकपित्थानां बीजपूरकबिल्वयोः। गन्धकर्मणि सर्वत्र पत्राणि पञ्चपल्लवम्। पञ्चपल्लवतोयेन गन्धानां क्षालनं मतम् ॥ ५१ ॥

आम, जामुन, कैथा, बिजौरा नींबू और बेल की पत्तियों को पञ्चपल्लव कहते हैं। इस पञ्चपल्लव से गन्धद्रव्यों का शोधन करना चाहिए। इसको चौगुने जल में पकावे, चतुर्थांश शेष रहने पर उतारकर छान ले। इस क्वाथ के साथ तैल को पकाने से उसकी गन्ध दूर हो जाती है ॥ ५१ ॥

### गन्धद्रव्यों का कथन

एलाचन्दनकुङ्कुमागुरुमुरा कक्कोलमांसी शटी, श्रीवासच्छदग्रन्थिपर्णशशभृत् चौणीधूप्रोशीरकम्। कस्तूरीनखपूतितैलजलमुङ्मेथीलवङ्गादिकं गन्धद्रव्यमिदं प्रदेयमखिलं श्रीविष्णुतैलादिषु ५२

इलायची, श्वेत चन्दन, कुंकुम, अगर, मुरा, कंकोल, जटामांसी, कचूर, सरल काष्ठ, गठिवन, कपूर, शिलारस, (छरीला), खस, कस्तूरी, नखी, [1]पूति (गंधमार्जारअण्ड), नागरमोथा, मेथी और लौंग आदि गन्धद्रव्य हैं। विष्णुतैल आदि सब तैलों में ये डाले जाते हैं ॥ ५२ ॥

### तन्त्रान्तर में।

कुष्ठञ्च नलिका पूतिरुशीरं श्वेतचन्दनम्। जटामांसी तेजपत्रं नखी मृगमदः फलम् ॥ ५३ ॥ कपोलं कुङ्कुमं चोचं लताकस्तूरिका वचा। सूक्ष्मैलागुरुमुस्ताश्च कर्पूरं ग्रन्थिपर्णकम् ॥ ५४ ॥ श्रीवासा कुन्दुरुर्देवकुसुमं गन्धमातृका। सिह्लको मिषिका मेथी भद्रमुस्तं तथा शटी ॥ ५५ ॥

---

1—पूति से बंगाल के कविराज गन्धमार्जारअण्ड का ग्रहण करते हैं।

जातीकोषं शैलजञ्च देवदारु सजीरकम्। एतानि गन्धद्रव्याणि तैलपाकेषु युक्तितः ॥ ५६ ॥

मूर, चाङ्गेरीशाक, पूति ( गन्धमार्जारभाण्ड ), खस, श्वेतचन्दन, जटामांसी, तेजपात, नखी, कस्तूरी, जायफल, कंकोल, केसर, दालचीनी, लता कस्तूरी ( वेदमुश्क ), कुष्ठवच, छोटी इलायची, अगर, नागरमोथा, कपूर गठिवन, राल ( सरल वृक्ष ), गिरोजा ( कुंदुरु ), लौंग, गन्धमातृका, शिलारस, सोया, मेथी, भद्रमोथा, कपूर, जावित्री, शैलज, देवदारु और जीरा ये गन्धद्रव्य कहे जाते हैं। यथा नियम तैलों में इनका प्रयोग होता है ॥ ५३–५६ ॥

स्वल्पविष्णुतैल।

शालपर्णी पृश्निपर्णी बला च बहुपुत्रिका। एरण्डस्य च मूलानि बृहत्योः पूतिकस्य च ॥ ५७ ॥ गवेधुकस्य मूलानि तथा सहचरस्य च। एतेषां पलिकैर्भागैस्तैलप्रस्थं विपाचयेत् ॥ ५८ ॥ आजं वा यदि वा गव्यं क्षीरं दद्याच्चतुर्गुणम्। अस्य तैलस्य पक्वस्य शृणु वीर्यमतः परम् ॥ ५९ ॥ अश्वानां वातभग्नानां कुञ्जराणां तथैव च। अपुमांश्च नरः पीत्वा निश्चयेन पुमान् भवेत् ॥ ६० ॥ हृच्छूले पार्श्वशूले च तथैवार्धावभेदके। कामलापाण्डुरोगेषु शर्करास्वश्मरीषु च ॥ ६१ ॥ क्षीणेन्द्रिया नरा ये च जरया जर्जरीकृताः। येषाञ्चैव क्षयो व्याधिरन्त्रवृद्धिश्च दारुणा ॥ ६२ ॥ अर्दितं गलगण्डञ्च वातशोणितमेव च। स्त्रियो या न प्रसूयन्ते तासाञ्चैव प्रदापयेत् ॥ ६३ ॥ गर्भमश्वतरी विन्द्यात् किं पुनर्मानुषी नरः। एतत्तैलवरञ्चैव विष्णुना परिकीर्तितम् ॥ ६४ ॥

तिलतैल ११८ तोला, गाय या बकरी का दूध ९ सेर ३२ तोला, कल्क के लिये सरिवन, पिठवन, खरेंटी, शतावरि, एरण्डमूल, बड़ी कटेरी का मूल, बड़ी कटेरी का मूल, नागबला का मूल और पियावासा का मूल ये सब चार-चार तोले, तैल, दुग्ध और कल्क एकत्र कर यथाविधि तैल सिद्ध करना चाहिए। इस तैल के पान से नपुंसक मनुष्य पुरुषत्व प्राप्त करता है। यह वातपीड़ित हाथी, घोड़ों के लिए भी हितकर है। मर्दन से इन्द्रियशैथिल्य, अर्दित, गलगण्ड, वातरक्त की पीड़ा, पार्श्वशूल, अन्त्रवृद्धि, रतिशक्तिहीनता, अधकपारी, ( आधे माथे में दर्द ) वातरक्त, कामला, पीलिया, सिकतामेह और पथरी आदि अनेक रोग अच्छे होते हैं। शरीर में बलवीर्य की वृद्धि होती है। जिस गर्भिणी स्त्री को प्रसवकाल में अतिकष्ट होता हो, उसे भी देना चाहिए। इस तैल का सेवन करने से खच्चरी भी गर्भ धारण करती है और मरती नहीं, तो फिर वन्ध्या स्त्री का कहना ही क्या। इस सर्वोत्तम तैल का उपदेश विष्णु ने किया था, अतः इसको विष्णुतैल कहते हैं ॥ ५७-६४ ॥

मध्यम विष्णुतैल।

शतावरी चांशुमती पृश्निपर्णी शटी बला। एरण्डस्य च मूलानि बृहत्योः पूतिकस्य च ॥ ६५ ॥ गवेधुकस्य मूलानि तथा सहचरस्य च। एषां द्विपलिकान् भागान् जलद्रोणे विपाचयेत् ॥ ६६ ॥ पादशेषे च पूते च गर्भञ्चैनं[1] समावपेत्। पुनर्नवा वचा दारु शताह्वा चन्दनागुरु ॥ ६७ ॥ शैलेयं तगरं कुष्ठमेला मांसी स्थिरा बला। अश्वाह्वा सैन्धवं रास्ना पलार्द्धानि च पेषयेत् ॥ ६८ ॥ गव्याजपयसोः प्रस्थौ द्वौ दत्त्वा प्रदापयेत्।

1—गर्भं द्रव्यकम्।

शतावरीरसप्रस्थं तैलप्रस्थं विपाचयेत् ६९ अस्य तैलस्य सिद्धस्य शृणु वीर्यमतः परम् । अश्वानां वातभग्नानां कुञ्जराणां तथा नृणाम् ॥ ७० ॥ तैलमेतत् प्रयोक्तव्यं सर्ववातविकारनुत् अपुमांश्च नरः पीत्वा निश्चयेन पुमान् भवेत् ॥ ७१ ॥ गर्भमश्वतरी विन्धात् किं पुनर्मानुषी तथा । हृच्छूलं पार्श्वशूलञ्च तथैवार्द्धावभेदकम् ॥ ७२ ॥ अपचीं गण्डमालाञ्च वातरक्तं गलग्रहम् । कामलां पाण्डुरोगञ्च अश्मरीञ्च विनाशयेत् ॥७३॥ तैलमेतद्भगवता विष्णुना परिकीर्त्तितम् । विष्णुतैलमिदं ख्यातं वातान्तकरणं शुभम् ॥ ७४ ॥

तिलतैल १२८ तोला, क्वाथ के लिये शतावरि, शालपर्णी, पृष्ठपर्णी, कचूर, खरेटी, एरंड का मूल, छोटी कटेरी का मूल, बड़ी कटेरी का मूल, करंजे का मूल, नागबला का मूल और अडूसे की जड़, प्रत्येक आठ-आठ तोले, जल २५ सेर ४८ तोला, शेष ६ सेर १२ तोला, कल्क के लिये पुनर्नवा, वच, देवदारु, सौंफ, रक्तचन्दन, अगर शैलज ( छरीला ), तगर, कूट, इलायची, जटामांसी, शालपर्णी, खरेटी की जड़, असगन्ध, सेंधा नमक और रास्ना ये दो-दो तोले, गाय का दूध ३ सेर १६ तोला, बकरी का दूध ३ सेर १६ तोला, शतावरि का रस १२८ तोला, तैल, क्वाथ, कल्क और दुग्ध इन पूर्वोक्त सब वस्तुओं को एकत्र कर यथाविधि तैल सिद्ध करे। इसका गुण पूर्वोक्त स्वल्प विष्णुतैल के समान ही है। इसमें उससे अपेक्षा अपची, गण्डमाला और गलग्रह को नाश करने की विशेष शक्ति है ॥ ६९-७४ ॥

## बृहद्विष्णुतैल ।

अश्वगन्धा जलधरो जीवकर्षभकौ शटी । काकोली क्षीरकाकोली जीवन्ती मधुयष्टिका ॥ ७५ ॥ देवदारुं मधुरिका पद्मकाष्ठञ्च शैलजम् । मांसी चैला त्वचं कुष्ठं वचा चन्दनकुङ्कुमम् ॥ ७६ ॥ मञ्जिष्ठा मृगनाभिश्च श्वेतचन्दनरेणुकम् । पर्णिनी कुन्दुरुकोटिश्च ग्रन्थिकञ्च नखी तथा ॥ ७७ ॥ एतेषां पलिकैर्भागैस्तैलस्यापि तथाढकम् । शतावरीरससमं दुग्धञ्चापि समं पचेत् ॥ ७८ ॥ विष्णुतैलमिदं श्रेष्ठं सर्ववातविकारनुत् । ऊर्ध्ववातं तथा वातमङ्गुलिग्रहमेव च ॥ ७९ ॥ शिरोमध्यगतं वातं मन्यास्तम्भं गलग्रहम् । हन्ति नानाविधं वातं सन्धिमज्जागतं तथा ॥८०॥ यस्य शुष्यति चैकाङ्गं गतिर्यस्य च विह्वला । ये वातप्रभवा रोगा ये च पित्तसमुद्भवाः । सर्वांस्तान् नाशयत्याशु सूर्यस्तम इवोदितः ॥ ८१ ॥

कल्क के लिये नागरमोथा, असगन्ध, जीवक, ऋषभक, कचूर, काकोली, क्षीरकाकोली, जीवन्ती, मुलेठी, सौंफ, देवदारु, पद्माख, शैलज ( छरीला ), जटामांसी, इलायची, दालचीनी, कूट, वच, रक्त चन्दन, केसर, मजीठ, कस्तूरी, श्वेत चन्दन, सँभालु के बीज, शालपर्णी, पृष्ठपर्णी, गोपिरोजा, गठिवन, ३ सेर १२ तोला और नखी चार-चार तोले । तिलतैल ६ सेर १२ तोला, शतावरि का रस ६ सेर १२ तोला, दुग्ध ६ सेर १२ तोला, जल २५ सेर ४८ तोला, एकत्र कर यथाविधि पाक कर तैल सिद्ध करे। इस तैल का मर्दन करने से ऊर्ध्ववात, अङ्गुलिग्रह, शिरदर्द, मन्यास्तम्भ, गलग्रह, सन्धिगत वायु, मज्जागत वायु तथा एकाङ्गशोथ, कंपवायु और वातपित्तज रोग उसी प्रकार नष्ट होते हैं जिस प्रकार सूर्य द्वारा अंधकार नष्ट होता है ॥ ७५-८१ ॥

## मध्यम नारायणतैल ।

बिल्वाग्निमन्थश्योनाकपाटलापारिभ-

द्रकम् । प्रसारण्यश्वगन्धा च बृहती कण्टकारिका ॥ ८२ ॥ बला चातिबला चैव श्वदंष्ट्रा सपुनर्नवा । एषां दशपलान् भागांश्चतुर्द्रोणेऽम्भसः पचेत् ॥ ८३ ॥ पादशेषं परिस्राव्य तैलपात्रं प्रदापयेत् । शतपुष्पा देवदारु मांसी शैलेयकं वचा ॥ ८४ ॥ चन्दनं तगरं कुष्ठमेला पर्णीचतुष्टयम् । रास्ना तुरगगन्धा च सैन्धवं सपुनर्नवम् ८५ एषां द्विपलिकान् भागान् पेषयित्वा विनिक्षिपेत् । शतावरीरसञ्चैव तैलतुल्यं प्रदापयेत् ॥ ८६ ॥ आजं वा यदि वा गव्यं क्षीरं दद्याच्चतुर्गुणम् । पाने बस्तौ तथाभ्यङ्गे भोज्ये चैव प्रशस्यते ॥ ८७ ॥ अश्वो वा वातभग्नो वा गजो वा यदि वा नरः । पङ्गुश्च पीठसर्पी च तैलेनानेन सिध्यति ८८ अधोभागे च ये वाताः शिरोमध्यगताश्च ये । मन्यास्तम्भे हनुस्तम्भे दन्तरोगे गलग्रहे ॥ ८९ ॥ यस्य शुष्यति चैकाङ्गं गतिर्यस्य च विह्वला । क्षीणेन्द्रियाः क्षीणशुक्रा ज्वरक्षीणाश्च ये नराः ॥ ९० ॥ बधिरा लल्लजिह्वाश्च मन्दमेधस एव च । अल्पप्रजा च या नारी या च गर्भं न विन्दति ९१ वातार्त्तौ वृषणौ येषामन्त्रवृद्धिश्च दारुणा । एतत्तैलवरं तेषां नाम्ना नारायणं स्मृतम् ॥ ९२ ॥

बिल्वतैल १ सेर ३२ तोला, क्वाथार्थ बेल की जड़, अग्निमन्थ ( अरणी ), श्योनाक, पाढल, नीम की छाल, गन्धप्रसारणी, असगन्ध, बड़ी कटेरी, कटेरी, खरेंटी, कंघी, गोखरू और साँठी चालीस-चालीस तोले, पाकार्थ जल १ मन २९ सेर ३२ तोला, कल्कार्थ सौंफ, देवदारु, जटामांसी, छरीला, वच, रक्तचन्दन, तगर, कूठ, छोटी इलायची, शालपर्णी, पृश्निपर्णी, मुद्गपर्णी, माषपर्णी, रास्ना, असगंध, सेंधा नोन और पुनर्नवा ये आठ-आठ तोले, शतावरि का रस ६ सेर ३२ तोला, बकरी या गाय का दूध २४ सेर ४८ तोला, इन सब वस्तुओं को एकत्र कर यथाविधि तैल सिद्ध करे । इस तैल का पान करने से परिसर्म और मर्दन करने से वातभग्न हाथी, घोड़े एवं मनुष्यों के वातरोग नष्ट होते हैं । तथा पङ्गुता पीठ के बल चलना, अधोवात, शिरोरोग, मन्यास्तम्भ, हनुस्तम्भ, दन्तरोग, गलग्रह, एकाङ्गशोष, कम्पयुक्त गति, इन्द्रियदौर्बल्य, शुक्र की क्षीणता, ज्वर के कारण क्षीणता और बहिरापन, तोतलापन आदि अनेक रोग नष्ट होते हैं । जिस स्त्री के अल्प सन्तान हो, गर्भ गिर जाया करता हो उसके लिये यह तेल लाभदायक है । वातजन्य अण्डवृद्धि और दारुण अन्त्रवृद्धि के लिये भी हितकर है । इस श्रेष्ठ तैल का नाम नारायण है ॥८२-९२॥

## महान्नारायणतैल ।

बिल्वाश्वगन्धा बृहती श्वदंष्ट्रा श्योनाकवाट्यालकपारिभद्रम् । क्षुद्राकटिल्लातिबलाग्निमन्थं मूलानि चैषां सरणीयुतानाम् ॥ ९३ ॥ मूलं विदध्यादथ पाटलीनां प्रस्थं सपादं विधिनोद्धतानाम् । द्रोणैरपामष्टभिरेव पक्त्वा पादावशेषेण रसेन तेन ॥ ९४ ॥ तैलाढकाभ्यां सममेव दुग्धमाजं निदध्यादथवापि गव्यम् । एकत्र सम्यग्विपचेत् सुबुद्धिर्दद्याद्रसं चैव शतावरीणाम् ॥ ९५ ॥ तैलेन तुल्यं पुनरेव तत्र रास्नाश्वगन्धामिसिदारुकुष्ठम् । पर्णीचतुष्कागुरुकेशराणि सिन्धूत्थमांसीरजनीद्वयं च ॥ ९६ ॥ शैलेयकं चन्दनपुष्कराणि एलाप्रयष्टीतगराब्दपत्रम् । भृङ्गाह्वजीवकर्षभकवचा पलाशं स्थौणेयवृश्चीरकचोरकाख्यम् ॥ ९७ ॥ पृथक् द्विपलप्रमाणं रालोड्य गर्भे विधिना विपक्वम् । कर्पूर-

कास्मीरमृगाण्डजानां चूर्णीकृतानांत्रिपलप्रमाणम् ॥ ९८ ॥ प्रस्वेददौर्गन्ध्यानिवारणाय दद्यात् सुगन्धाय वदन्ति केचित्। नारायणं नाम महच्च तैलं सर्वप्रकारैर्विधिवत्प्रयोज्यम् ॥ ९९ ॥ आश्वेव पुंसां पवनार्दितानामेकाङ्गहीनार्दितवेपनानाम्। ये पङ्गवः पीठविसर्पिणश्च वाधिर्यशुक्रक्षयपीडिताश्च॥१००॥ मन्याहनुस्तम्भशिरोरुजार्त्ता मुक्तामयास्ते बलवर्णयुक्ताः। संसेव्य तैलं सहसा भवन्ति वन्ध्या हि नारी लभते च पुत्रम् ॥ १०१ ॥ धीरोपमं सर्वगुणोपपन्नं सुमेधसं श्रीविनयान्वितं च। शाखाश्रिते कोष्ठगते च वाते वृद्धौ विधेयं पवनार्दितानाम् ॥ १०२ ॥ जिह्वानिले दन्तगते च शूले उन्मादकौब्जज्वरकर्शितानाम्। प्राप्नोति लक्ष्मीं प्रमदाप्रियत्वं वपुः प्रकर्षं विजयं च नित्यम् ॥ १०३ ॥ तैलोपसेवी जरयाभिभूतोजीवेच्चिरञ्चापिभवेत् युवेव। देवासुर युद्धापरे समीक्ष्य स्नाय्वस्थिभग्नान् सुरैः सुरांश्च ॥ १०४ ॥ नारायणेनापि सुवृंहणार्थं स्वनामतैलं विहितं च तेषाम् ॥ १०५ ॥

बिल्व, असगन्ध, बड़ी कटेरी, गोखरू, श्योनाक, खरेंटी, फरहटी की छाल, कटेरी, पुनर्नवा, कंघी, अरणी और गन्धप्रसारणी का मूल तथा पाढल का मूल एक-एक सेर लेकर २ मन ४ सेर ६४ तोला पानी में पकावे। चतुर्थांश शेष रहने पर छानकर रख ले। इस क्वाथ में १२ सेर ६४ तोला तेल और १२ सेर ६४ तोला बकरी या गाय का दूध मिलावे। फिर रास्ना, असगन्ध, सौंफ, देवदारु, कूट, शालपर्णी, पृष्णपर्णी मुद्गपर्णी, माषपर्णी, अगर, नागकेशर, सेंधा नमक, जटामांसी, हल्दी, दारुहल्दी, शिलाजतु, मंजिष्ठा, रक्तचन्दन, पुष्करमूल, इलायची, मजीठ, मुलेठी, तगर, नागरमोथा, तेजपात, भांगरा, जीवक, ऋषभक, काकोली, क्षीरकाकोली, ऋद्धि, वृद्धि, मेदा, महामेदा, सुगन्धवाला, वच, ढाँक की जड़, गठिवन, सफेद सांठी और चोरक (भटेउर), ये आठ-आठ तोले लेकर कल्क बनाकर मिला दे। बाद में विधि अनुसार पाक करे। पाक सिद्ध होने पर छानकर पश्चात् बारह तोले कपूर, केसर और कस्तूरी का चूर्ण मिलाकर सुगन्धित करे। किसी के मत में कपूरादि का चूर्ण पसीना के दुर्गन्ध को दूर करने के लिये और किसी के मत में तैल को सुगन्धित करने के लिये मिलाया जाता है। यह तैल भी पूर्वोक्त तैल के समान विविध रोगों को दूर करता है। पहले देवासुरसंग्राम में असुरों द्वारा स्नायु-अस्थिभंगवाले देवताओं को देखकर उनकी पुष्टि के लिये नारायणजी ने यह अपने नाम का तैल बनाया है ॥ ९९-१०५ ॥

## चन्दनाद्य तैल।

चन्दनाम्बु नखं वाप्ययष्टीशैलेयपद्मकम्। मञ्जिष्ठा सरलं दारु शट्येला पूतिकेशरम् ॥ १०६ ॥ पत्रं तैलं मुरामांसी कक्कोलं वनिताम्बुदम्। हरिद्रे शारिवे तिक्ता लवङ्गागुरुकुङ्कुमम् ॥ १०७ ॥ त्वग्रेणु नालुका चैभिस्तैलं मस्तुचतुर्गुणम् लाक्षारससमं सिद्धं ग्रहघ्नं बलवर्णकृत् ॥ १०८ ॥ आयुःपुष्टिकरञ्चैव वशीकरणमुत्तमम्। अपस्मारज्वरोन्मादकृत्यालक्ष्मीविनाशनम् ॥ १०९ ॥

तिल का तैल १२८ तोला, दही का पानी ६ सेर ३२ तोला, लाख का क्वाथ १२८ तोला, कल्क के लिये लालचन्दन, गन्धबाला, नखी, कूट, मुलहठी, शैलज (भूरिछरीला), पद्माख, मजीठ, सरलकाष्ठ, देवदारु, कचूर, इलायची, गठौनी (गंधमार्जार), नागकेशर, तेजपात, शिलारस, मुरामांसी, कंकोल, प्रियंगु,

मोथा, हलदी, दारुहलदी, अनन्तमूल, काली शारिवा, कुटकी, लौंग, तगर, केसर, दालचीनी, सँभालू के बीज, मालुआ, सब मिलाकर ३२ तोला। इस तैल को पकाकर मालिश करने से मद अपस्मार, ज्वर, उन्माद, कृत्या तथा वातव्याधियाँ अच्छी होती हैं। यह बलकारक, वर्ण को सुन्दर करनेवाला, आयु की वृद्धि करनेवाला, शरीर को पुष्ट करनेवाला एवं वशीकरण है ॥ १०६--१०९ ॥

## सिद्धार्थक तैल।

शतावरीं तु निष्पीड्य रसं प्रस्थद्वयं हरेत्। तिलतैलं पचेत् प्रस्थं क्षीरं दत्त्वा चतुर्गुणम् ॥ ११० ॥ शतपुष्पा देवदारु मांसी शैलेयकं बला। चन्दनं तगरं कुष्ठ-मेला चांशुमती तथा ॥ १११ ॥ रास्ना तुरगगन्धा च समङ्गा सारिवाद्वयम्। पृश्निपर्णी वचा चैव तथा गन्धर्वहस्तकम् ॥ ११२ ॥ सिन्धूत्थं समं दद्यात् विश्वभेषजमेव च। एभिस्तैलं पचेद्धीमान् दत्त्वार्द्रकरसं समम् ॥ ११३ ॥ कुब्जाश्च वामना ये च पङ्गुपादाश्च ये नराः। महावातेन ये रुग्णा भग्नसङ्कुचिताश्च ये ॥ ११४ ॥ तेषां हितमिदं तैलं सन्धिवाते च शस्यते। येषां शुष्यति चैकाङ्गं गतिर्येषां च विह्वला ॥ ११५ ॥ क्षीणेन्द्रिया नष्टशुक्रा जरया जर्जरीकृताः। अंधसश्च बधिरास्तेषामपि परं हितम् ॥ ११६ ॥ मासमेकं पिबेद्यस्तु यौवनस्थः पुनर्भवेत्। सिद्धार्थकमिति ख्यातं नरनारीहिताय वै ॥ ११७ ॥

तिलतैल १२८ तोला, शतावरी का रस, ३ सेर १६ तोला, दुग्ध ६ सेर ३२ तोला, अदरख का रस १२८ तोला, कल्कार्थ सौंफ, देवदारु, जटामांसी, छरीला, खरेटी, रक्तचन्दन, तगर, कूठ, इलायची, शालपर्णी, रास्ना, असगन्ध, लज्जावन्ती (छुईमुई), काली सारिवा, सफेद सारिवा, पृश्निपर्णी, वच, एरण्डमूल, सेंधा नमक और सोंठ एक सेर तैलादि कल्कपर्यन्त सब वस्तुओं को एकत्र कर यथाविधि तैल सिद्ध करे। इस तैल से कुबड़ापन, वामता, पंगुता, एकाङ्गशोष, महावातरोग, अंगसिकुड़न, कम्पवात, इन्द्रियक्षीणता, नष्टवीर्यता, वृद्धावस्था की शिथिलता, बुद्धिहीनता, बधिरता और सन्निपात आदि अनेक रोग नष्ट होते हैं। यदि इस तैल को वृद्ध मनुष्य एक मास तक निरंतर उचित मात्रा से पिये, तो पुनः युवावस्था को प्राप्त हो। यह सिद्धार्थक तैल स्त्री-पुरुष दोनों के लिये हितकारी है ॥ ११०--११७ ॥

## हिमसार तैल।

शतावरीरसप्रस्थे विदार्याः स्वरसे तथा। कूष्माण्डकरसप्रस्थे धात्र्याश्च स्वरसे तथा ॥ ११८ ॥ शाल्मल्याः स्वरसप्रस्थे तथा गोक्षुरकस्य च। नारिकेलरसप्रस्थे तिलतैलस्य प्रस्थतः ॥ ११९ ॥ कदल्याः स्वरसप्रस्थे क्षीरप्रस्थचतुष्टये। अस्यौषधस्य कल्कस्य प्रत्येकं कर्षसम्मितम् ॥ १२० ॥ चन्दनं तगरं वाप्यं मञ्जिष्ठा सरलागुरु। मांसी मुरा च शैलेयं यष्टी दारु नखी शिवा ॥ १२१ ॥ पूतिका पीतिका पत्रं कुन्दुरुर्नलिका तथा। वरी लोध्रं तथा मुस्तं स्पृगेला पत्रकेशरम् ॥ १२२ ॥ लवङ्गं जातिकोषश्च तथा मधुरिका शटी। चन्दनं ग्रन्थिपर्णं च कर्पूरं लाभतः क्षिपेत् ॥ १२३ ॥ अस्य तैलस्य सिद्धस्य शृणु वीर्यमतः परम्। ऊर्ध्वं प्रपततो वायोर्गतो वाजिनस्तथा ॥ १२४ ॥ च्युतो लोष्ट्रपाताच्च पङ्गूनां पीठसर्पिणाम्। एकाङ्ग-

शोषिणां चैव तथा सर्वाङ्गशोषिणाम् ॥ १२५ ॥ क्षतानां क्षीणशुक्राणामत्यन्तक्षयरोगिणाम् । हनुमन्याहतानां च दुर्बलानां तथैव च ॥ १२६ ॥ शोषिणां स्खलजिह्वानां तथा भिन्नभाषिणाम् । अत्यन्तदाहयुक्तानां क्षीणानां वातरोगिणाम् ॥ १२७ एतत्तैलं परं श्रेष्ठं विष्णुना परिकीर्तितम् । हिमसागरमाख्यातं सर्ववातविकारनुत् ॥ १२८ ॥ ये वातप्रभवा रोगा ये च पित्तसमुद्भवाः । शिरोमध्यगता ये च शाखामाश्रित्य ये स्थिताः । ते सर्वे प्रशमं यान्ति तैलस्यास्य प्रसादतः १२९

शतावरि का रस १२८ तोला, विदारीकंद का रस १२८ तोला, सेमर के मूल का स्वरस १२८ तोला, गोखरू का रस १२८ तोला, नारियल का पानी १२८ तोला, तिलतैल १२८ तोला, केला के मूल का रस १२८ तोला, दूध ६ सेर ३२ तोला और निम्नलिखित ओषधियों का कल्क एकत्र कर यथाविधि तैल सिद्ध करें। कल्कद्रव्य—रक्तचन्दन, तगर, कूट, मजीठ, सरलकाष्ठ, अगर, जटामांसी, मुरामांसी, परीला, मुलेठी, देवदारु, नखी, हरीतकी, करंज, हल्दी, तेजपात, कुन्दरू, नाड़ीशाक, शतावरि, लोधा नागरमोथा, दालचीनी, इलायची, तेजपात, नागकेसर, लौंग, जावित्री, सौंफ, कचूर, लाल चन्दन, गठिवन और कपूर ये प्रत्येक एक-एक तोला। इस तैल में गन्धद्रव्य जितने मिल सकें डाल देने चाहिये। वायुरोग के लिये यह तैल उत्तम वस्तु है। इस तैल का मर्दन करने से ऊँचे स्थान और हाथी, घोड़ा आदि ऊँची सवारी से गिरने की चोट, पंगुता, पीठ से चलना, बाहुशोष, वीर्यक्षय, शुक्रक्षय, क्षयरोगी, हनु और मन्या (हनुस्तम्भ और मन्यास्तम्भ), तोतलापन, मिनमिना कर बोलना, गात्रदाह और अन्यान्य अनेक प्रकार के रोग शान्त होते हैं। यह वातज, पित्तज, शिरोमध्यगत एवं शाखागत वातरोगों को शान्त करता है ॥ ११८—१२९ ॥

### वायुच्छायासुरेन्द्र तैल।

वाट्यालकं पलशतं तत्समं दशमूलकम् । जलषोडशिकेपक्त्वा पादशेषं समुद्धरेत् ॥ १३० ॥ एतत्क्वाथे पचेत्तैलं द्वात्रिंशत्पलमेव च । कल्कार्थे दीयते तत्र मञ्जिष्ठा रक्तचन्दनम् ॥ १३१ ॥ कुष्ठमेला देवदारु शैलजं सैन्धवं वचा । कक्कोलं पद्मकाष्ठञ्च शृङ्गी तगरपादिका ॥ १३२ ॥ गुडूची मुद्गपर्णी च माषपर्णी शतावरी । नागजिह्वा श्यामलता शतपुष्पा पुनर्नवा ॥ १३३ ॥ एषां तोलद्वयं भागं दत्त्वा तैलं तु पाचयेत् । एतत्तैलवरं नाम्ना वायुच्छायासुरेन्द्रकम् ॥ १३४ ॥ सर्ववातविकारेषु हितं पुंसां च योषिताम् । क्षीणशुक्रार्त्तवानां च नारीणां च विशेषतः ॥१३५॥ चेतोविकारं[1] हन्त्याशु वायुमाक्षेपसम्भवम् । मर्मघातं श्रमकृतं गात्रकम्पादिकं तथा ॥ १३६ ॥ हिक्कां श्वासं च कासं च वातपित्तसमुद्भवम् । अपस्मारे महोन्मादे हितं लेपे च भक्षणे । श्रीमद्गहननाथेन रचितं विश्वसम्पदे ॥ १३७ ॥

जलषोडशिके तैलात् षोडशगुणे जले इत्यर्थः।

खरेटी की जड़ और दशमूल पाँच-पाँच सेर लेकर दो मन जल में क्वाथ बनावे। चतुर्थांश शेष रहने पर उतारकर छान ले। इस क्वाथ में ६ सेर १६ तोला तैल और निम्नलिखित औषधों का कल्क मिलाकर तैल सिद्ध करें। कल्कार्थ— मजीठ, लाल चन्दन, कूठ, इलायची, देवदारु, छरीला, सेंधा नमक, वच, कंकोल, पद्माख, काकड़ासिंगी, तगर गिलोय, मुद्गपर्णी, माषपर्णी, शतावरि, अनन्तमूल, काली

1—रेतोविकार इत्यपि पाठान्तरम्।

सारिवा, सौंफ और पुनर्नवा दो-दो तोला ले। क्षीणशुक्र पुरुषों और क्षीणार्तव स्त्रियों के लिये तथा धातुविकारों में पान एवं मर्दन से यह तैल विशेष हितकारी है। तथा शुक्रविकार, अपस्मार, उन्माद, आक्षेप, वायु और सर्वांगवात, गात्रकम्प, वात-पित्तज हिचकी, श्वास और कास आदि अनेक प्रकार के रोगों को शान्त करता है। यह संसार के हित के लिए श्रीगहननाथ ने बनाया है॥ १३०—१३७॥

## लघु विषगर्भ तैल।

धत्तूरस्य रसस्यप्रस्थकुडवं तैलं तथाकाञ्जिकम्। प्रस्थानां च चतुष्टयं गदवचा त्रिंशत्परं शाणकाः॥ १३८॥ वृद्धाद्धात्रीमरिचात्पृथङ्नवनिपाद् पट्स्वर्णबीजात् पटोः। स्युः सप्ताधिकविंशतिः परिमितं सीमानिलध्वंसनम्॥ १३९॥ पक्षाघातं हनुस्तम्भं मन्यास्तम्भं कटिग्रहम्। पृष्ठत्रिकशिरःकम्पं सर्वाङ्गग्रहणं तथा॥ १४०॥

तिलतैल ६ सेर ३२ तोला, धतूरे का रस ७० तोला, काञ्जी ६ सेर २४ तोला, कल्क के लिये कूठ, वच, हरएक ७ ॥ तोला, भुईंआँवला, कालीमिर्च, अलग-अलग २७ माशा, वच्छनाग १ तोला, धतूरे के बीज तथा सेंधा नमक हरएक ६ तोले ४ माशा। यह तैल तीव्र वातरोगों को नष्ट करता है। इसकी मालिश से पक्षाघात, हनुस्तम्भ, मन्यास्तम्भ, कटिग्रह, पृष्ठकम्प, त्रिकम्प, शिरःकम्प, सर्वाङ्गग्रह आदि रोग नष्ट होते हैं॥ १३८—१४०॥

## महाविषगर्भ तैल

कनकस्य च निर्गुण्डी तुम्बिनी च पुनर्नवा। वातारिश्वगन्धा च प्रपुन्नाडं सचित्रकम्॥ १४१॥ साञ्जनं काकमाची कलिकारी च निम्बकम्। महानिम्बेश्वरी चैव दशमूलं शतावरी॥ १४२॥ कारवल्ली सारिवा च श्रावणी च विदारिका। वज्राकौ मेषशृङ्गी च करवीरद्वयं वचा॥ १४३॥ काकजङ्घा स्वयमार्गो बला चातिबलाद्वयम्। व्याघ्री महाबला वासा सोमवल्ली प्रसारिणी॥ १४४॥ पलोन्मितानि चैतानि द्रोणेऽम्भसि विनिक्षिपेत्। पचेत्पादावशेषेऽस्मिन् कल्कस्य कुडवं क्षिपेत्॥ १४५॥ त्रिकटु विषतिन्दुं च रास्ना कुष्ठं विषं घनम्। देवदार्वेलसनाभो द्वौ क्षारौ लवणानि च॥ १४६॥ तुत्थकं कट्फलं पाठा भार्गी च नवसादरम्। शाखन्ती धन्वयासं च जीरकं चेन्द्रवारुणी॥ १४७॥ तैलप्रस्थं समादाय पाचयेन्मृदुवह्निना। विषगर्भमिदं नाम्ना सर्वान् वातान् व्यपोहति॥ १४८॥ पक्षोरुकटिजङ्घानां सन्धानं श्रेष्ठमेव च। गृध्रसीं च महावातान् सर्वाङ्गग्रहणं तथा॥ १४९॥ दण्डापतानकं चैव कर्णनादं च शून्यताम्। वनमध्ये यथा सिंहात्पलायन्ते महामृगाः॥ १५०॥ तथाश्वगजभग्नानां वराणां च चतुष्पदाम्। नाशयेन्नात्र सन्देहो विषगर्भस्य लेपनात्॥ १५१॥

तिल का तैल १२८ तोला, क्वाथ के लिये धतूरा, सँभालू, कड़वी तूमरी, सांठी की जड़, असगन्ध, पँवाड़ के बीज, चित्रक, सोहंजना, मकोय, कलिहारी, नीम, महानिम्ब (बकायन), ईश्वरी (रुद्रजटा अथवा शिवलिंगी), दशमूल, शतावरि, करेली, अनन्तमूल, मुसली, विदारीकन्द, थूहर की जड़, आक की जड़, मेढासिंगी, दोनों कनेर, वच, काकजङ्घा, अपामार्ग, बला, अतिबला, नागबला, दोनों कटेरी, महाबला, अडूसा, सोमवल्ली (गिलोय), प्रसारिणी हरएक ४ तोला, जल २५ सेर ४८ तोला. बचा हुआ क्वाथ ६ सेर ३२ तोला, कल्क

के लिये त्रिकुटा, कुचला, रास्ना, कूठ, मोथा, देवदार, वत्सनाग, जवाखार, सज्जीखार, पाँचों नमक, नीला तूतिया, जायफल, पाठा, भारंगी, नौसादर, माषपर्णी, धमासा, जीरा, इन्द्रायण की जड मिलाकर १६ तोला, विधि-पूर्वक मन्द अग्नि पर पकावे। यह तैल सब वात-विकारों को नष्ट करता है। छाती, ऊरु, कमर, जंघा की सन्धि-भंग में यह सन्धियों को जोड़ने-वाला है। गृध्रसी, अर्दित, सर्वाङ्गवात, पक्षा-घातक, कर्णनाद, कर्णशून्यता आदि रोग इस तैल के प्रयोग से नष्ट होते हैं। जिस प्रकार जङ्गल में सिंह को देखकर हिरन आदि पशु भाग जाते हैं उसी प्रकार इस तैल की मालिश से घोड़े, हाथी, मनुष्य तथा चौपायों के वात-जन्य रोग, सन्धिभग्न आदि नष्ट हो जाते हैं॥ १४१—१५१॥

शतावरी तैल।

कुष्ठदारुद्रुटिकाभिप्रियङ्गुतगरत्वक्पत्रकौन्तीनखैः मांसीसर्जरसाम्बुचन्दनवचाशैलेयलामज्जकैः ॥ १५२ ॥ मञ्जिष्ठा सरलागुरूद्धिपचला रास्नाश्वगन्धा वरी वर्षाभूमिसिसिन्धुभिश्च सकलैरेभिः पचेत्कल्कितैः ॥ १५३ ॥ तुल्यं गोपयसा वरीरससमं तैलं विपक्वं मृदु स्याद्वातघ्नमिदं नृणामिति वरी तैलं भिषक् पूजितम् ॥ १५४ ॥

तिल का तैल ४ सेर, शतावरी का रस ४ सेर, गौ का दूध ४ सेर, कल्क के लिये कूट, देवदारु, छोटी इलायची, प्रियङ्गु तगर, दार-चीनी, तेजपात, सँभालू के बीज, नखी, जटा-मांसी, राल, गंधबाला, चन्दन, वच, छार-छबीला, उशीरभेद, मजीठ, चीड की लकडी, अगर, नागबला, रास्ना, असगन्ध, शतावरि, साँठी, सौंफ, सेंधा नमक मिलाकर १ सेर, इसे विधिपूर्वक मन्दी अग्नि पर पकावे। वैद्यों द्वारा माना हुआ यह तैल वात को नष्ट करता है॥ १५२—१५४॥

महाबला तैल।

बलामूलकषायस्य दशमूलीकृतस्य च। यवकोलकुलत्थानां क्वाथस्य पयसस्तथा॥ अष्टावष्टौशुभाभागास्तैलादेकस्तदेकतः। पचेदवाप्य मधुरं गणं सैन्धवसंयुतम्॥ १५५॥ तथागुरुः सर्जरसं सरलं देवदारु च। मञ्जिष्ठां चन्दनं कुष्ठमेलां कालानुशारिवाम्॥ १५६॥ मांसी शैलेयकं पत्रं तगरं सारिवां वचाम्। शतावरीमश्वगन्धां शतपुष्पां पुनर्नवाम्॥ १५७॥ तत्साधुसिद्धं सौवर्णे राजते मृण्मयेऽपि च। प्रक्षिप्य कलशे सम्यगात्मगुप्ते निधापयेत्॥ १५८॥ बलातैलमिदं नाम्ना सर्ववातविकारनुत्। यथाबलमतो मात्रां सूतिकायै प्रदापयेत्॥ १५९॥ या च गर्भार्थिनी नारी क्षीणशुक्रश्च यः पुमान्। क्षीणवाते मर्महतेऽभिहते मर्दितेऽथवा॥ १६०॥ भग्ने श्रमाभिपन्ने च सर्वथैवोपयोजयेत्। सर्वानाक्षेपकादींश्च वातव्याधीन् व्यपोहति॥ १६१॥ हिक्कां कासमधीमन्थं गुल्मं श्वासंसुदारुणम्। षण्मासानुपयुज्यैतदन्त्रवृद्धिमपोहति॥ १६२॥ अत्यगधातुः-पुरुषो भवेच्च स्थिरयौवनः। एतद्धि राज्ञा कर्त्तव्यं राजमात्राश्च ये नराः॥ १६३॥ सुखिनः सुकुमाराश्च बलिनश्चैव ये नराः॥ १६४॥

तिलतैल २ सेर, खरेटी का क्वाथ १६ सेर, दशमूल का क्वाथ १६ सेर तथा इन्द्रजौ, बेर की मींगी और कुलथी का क्वाथ १६ सेर, दूध १६ सेर, कल्कार्थ—जीवक, ऋषभक, मेदा, महामेदा, काकोली, क्षीरकाकोली, मुद्गपर्णी, माषपर्णी, जीवन्ती, मुलेठी, सेंधा नमक, अगर,

रास, चीड़ की लकड़ी, देवदारु, मजीठ, चन्दन, कूट, इलायची, पीला चन्दन, जटामासी, खरैंटी, तेजपात, तगर, सारिवा, वच, शतावरि, असगन्ध, सौंफ और पुनर्नवा, इन सब द्रव्यों को एक सेर एकत्र कर यथाविधि तैलपाक करके सोने, चाँदी या काँच लिये हुए मिट्टी के पात्र में भरकर सुरक्षित रक्खे। यह महाबलातैल सब प्रकार के वात-विकार, हिचकी, खाँसी, अधिमन्थ, गुल्म, श्वास आदि रोगों को नष्ट करता है बल के अनुसार उचित मात्रा में प्रसूता (जच्चा) को, गर्भधारण करने की इच्छावाली स्त्री और नष्टवीर्य पुरुष को सेवन करना चाहिए। वायाघात, जिसके मर्म में चोट लगी हो, चोट खाये हुए, हड्डी कुचल गई हो, हड्डी टूट गई हो, अथवा क्षीण हो गई हो तो भी हितकर है। यदि छ मास निरन्तर सेवन किया जाय तो अन्त्रवृद्धि रुक जाती है। इस तैल के सेवन से क्षीण धातुवाला पुरुष स्थिर यौवनवाला हो जाता है यह तैल राजा, राजा के समान (राजक) सुखी और सुकुमार मनुष्यों के सेवन करने योग्य है ॥ १५४-१६४ ॥

पुष्पराजप्रसारणी तैल।

प्रसारणीपलशतं मूलश्चैवाश्वगन्धजम्। पञ्चाशत्पलमानं तु जलद्रोणे विपाचयेत् ॥ १६५ ॥ पादशेषे हरेत् क्वाथं क्वाथांशं तिलतैलकम्। तैलाच्चतुर्गुणं क्षीरं गव्यं वामाहिषं तथा ॥ १६६ ॥ पुण्डरीकरसस्तत्र शतावर्या रसस्तथा। तैलसम प्रदातव्यः पाचयेत् मृदुवह्निना ॥ १६७ ॥ शतपुष्पा कणा चैला कुष्ठश्च कण्टकारिका। शुण्ठी यष्टी देवदारुः शालपर्णी पुनर्नवा ॥ १६८ ॥ मञ्जिष्ठा पत्रकं रास्ना वचा पुष्करमूलकम्। यमानी भूतिकं मांसी निर्गुण्डी च तथा बला ॥ १६९ ॥ चविकाचुरकञ्चैव मृणालं मधुसिन्धका। मतिरर्पमिदं योज्यं सर्वमेकत्र पाचयेत् ॥ १७० ॥ तैलशेषं समुद्धृत्य पुष्पराजप्रसारणीम्। अभ्यङ्गे योजयेत् पाने नस्यकर्मणि सर्वदा ॥ १७१ ॥ भग्नानां खञ्जपङ्गूनां शिरोरोगे हनुग्रहे। समस्तान् वातजान् रोगान्तूर्णं नाशयतिध्रुवम् ॥ १६२ ॥

खिलौल ८ सेर, यथार्थ गन्धप्रसारणी १०० तोले असगन्ध १०० तोले, जल २५ सेर ४८ तोला, शेष ६ सेर ३२ तोला, गौ या भैंस का दूध २५ सेर ४८ तोला, कमल और शतावरि का रस ६ सेर ३२ तोला, कल्क के लिये सौंफ, पीपरि, इलायची, कूट, कटेरी, सोंठ, मुलेठी, देवदारु, शालपर्णी, पुनर्नवा, मजीठ, तेजपात, रास्ना, वच, पुष्करमूल अजवाइन, गन्धतृण, जटामांसी, सँभालू, खरैंटी, चीता, गोखरू, मृणाल और शतावरि, ये सब एक एक तोला ले यथाविधि तैल सिद्ध करे। यह पुष्पराजप्रसारिणी तैल पान, मर्दन तथा नस्य में उपयुक्त होता है। अस्थि-भंग, खञ्ज एवं पङ्गुओं के लिए हितकर है। शिरोरोग तथा हनुग्रह आदि सब प्रकार के वायुरोगों को तत्काल नष्ट करता है ॥ १६५-१७२ ॥

महामाषपुष्टमांसतैल।

माषस्याढकं देयं दशमूलात्तुलार्द्धकम्। छागमूलश्च तस्यार्द्धं रेतसीनां तथैव च ॥ १७३ ॥ छागमांसपलत्रिंशत् भिषग्विदद्यात् पश्चाशितिः। जलद्रोणद्वये पक्त्वा पादशेषेऽवतारिते ॥ १७४ ॥ तिलतैलस्य च प्रस्थं पयो दत्त्वा चतुर्गुणम्। जीवनीयानि सर्वाणि मञ्जिष्ठा चव्यकट्फलम् ॥ १७५ ॥ व्याधिघातन्ना कणामूलं मधुकं पुष्करं तथा। मागारनगुन्ने सैरण्डा नखादा लवणत्रयम् ॥ १७६ ॥ रुष्णाश्वगन्धा यमुना यमानीन्द्रवारुणी शटी। नागरं मागधी कुष्ठं वपां रजनीद्वयम् ॥ १७७ ॥ मनाश्री मूर्वा च

एतैरससमन्वितैः । पक्षाघातेषु सर्वेषु अर्दिते च हनुग्रहे ॥ १७८ ॥ मन्दश्रुतौ चाश्रवणे तिमिरे च त्रिदोषजे । हस्तकम्पे शिरःकम्पे गात्रकम्पे शिरोग्रहे ॥ १७९ ॥ शस्तं कलायखञ्जे च गृध्रस्यामपबाहुके बाधिर्ये कर्णनादे च सर्ववातविकारनुत् ॥ १८० ॥ दण्डापतानके चैव मन्यास्तम्भे विशेषतः । हनुस्तम्भे प्रशस्तं स्यात् सूतिकातङ्कनाशनम् ॥ १८१ ॥ स्वर्यं मांसप्रदञ्चैव शुक्राग्निबलवर्द्धनम् । अण्डवृद्ध्यन्त्रवृद्धिं वा वातरक्तञ्च नाशयेत् ॥ १८२ ॥

तिलतैल १२८ तोला, क्वाथार्थ उर्द १२८ तोला, दशमूल अर्धकुटा (२०० तोले), एरंडी की जड़ १०० तोले, केतकी की जड़ १०० तोले मुर्गा का मांस १२० तोले, कटसरैया १०० तोले, पाकार्थ जल १ मन ११ सेर १६ तोला, शेष १२ सेर १४ तोला, दूध ६ सेर ३२ तोला, कल्क के लिये जीवक दि अष्टवर्ग, मजीठ, चव्य, कायफल, कूट, रास्ना, पिपरामूल, मुलेठी, पुहकरमूल, उर्द, कौंच के बीज, एरण्डमूल, सौंफ, बिड़नमक, सेंधा, काला नमक, पोखरि, असगन्ध, गिलोय, अजवाइन, इन्द्रजौ, नरकचूर, सोंठ, पीपल नागरमोथा, साठी, दोनों हल्दी, शतावरि और कटेरी, ये सब एक-एक तोला का कल्क डालकर विधिपूर्वक तैल सिद्ध करना चाहिये। इस तैल का मर्दन करने से पक्षाघात, अर्दित, हनुग्रह, श्रवणशक्ति की न्यूनता ( कम सुनना ), कम देख पड़ना, हाथ का काँपना, शिर का काँपना, बदन का काँपना, शिरोग्रह, कलायखञ्ज, गृध्रसी, अपबाहुक, बधिरता, कर्णनाद, दण्डापतानक, मन्यास्तम्भ, हनुस्तम्भ तथा सूतिका रोग, अण्डवृद्धि, अन्त्रवृद्धि और वातरक्त आदि सब रोग नष्ट होते हैं। यह स्वर्य के लिए हितकर, मांसप्रद तथा शुक्र, अग्नि और बल का वर्धक है १७२–१८२

नकुलतैल।

मधुकं जीरकं रास्ना सैन्धवं शतपुष्पिका । यमानी मरिचं कुष्ठं विडङ्गं गजपिप्पली ॥ १८३ ॥ सौवर्चलश्चाजमोदा वचा षड्ग्रन्थिका तथा । ग्रन्थिकं शैलजं मांसी कर्षांशैः पृथक् पृथक् ॥ १८४ ॥ विनीय पाचयेत् तैलं प्रस्थं खुकसम्भवम् । प्रस्थे नकुलमांसस्य क्वाथे च दशमूलजे ॥ १८५ ॥ प्रस्थे च काञ्जिकस्यापि मस्तुप्रस्थे तथैव च । सिद्धं तैलमिदं हन्ति कम्पवातं सुदारुणम् ॥ १८६ ॥ हस्तकम्पं शिरःकम्पं बाहुकम्पञ्च नाशयेत् । आमवातं सशूलञ्च सर्वोपद्रवसंयुतम् ॥ १८७ ॥ पानाभ्यञ्जनबस्तीभिर्नाशयेत्यत्र संशयः । आढ्यवातं कटीपृष्ठजानुजङ्घाश्रितं तथा ॥ १८८ ॥ सन्धिस्थं वातमाश्वेव जयेन्नकुलसंज्ञकम् । हारीतभाषितमिदं तैलं हितचिकीर्षया ॥ १८९ ॥ वैद्यानां सारभूतानां शतेनापि सगुम्फितम् । वातव्याधिं निहन्त्याशु कम्पवातं विशेषतः ॥ १९० ॥ अशीतिं वातजान् रोगान् नाशयेदाशु देहिनाम् ॥ १९१ ॥

नकुलमांस १२८ तोला, जल ६ सेर ३२ तोला, शेष १२८ तोला, दशमूल १२८ तोला, जल ६ सेर ३२ तोला, शेष १२८ तोला कांजी १२८ तोला, दही का तोद १२८ तोला, एरण्डतैल १२८ तोला, कल्कार्थ मुलेठी, जीरा, रास्ना, सैंधवनमक, सौंफ, अजवाइन, मिर्च, कूट, वायविडंग, गजपीपरि, कालानमक, अजमोद, ओरेठी, वच, पिपरामूल, दरौड़ा और जटामासी, ये सब दो-दो तोले। इन सब वस्तुओं द्वारा तैल सिद्ध

करे । इस तैल का पान, मर्दन और वस्तिक्रिया में उपयोग होता है । यह तैल कम्पवात, हस्तकम्पन, शिरःकम्प, बाहुकम्प, शूलयुक्त आमवात, सन्धिवात, आढ्यवात, कमर, पीठ और अवस्थित वायु, और सैकड़ों वैद्यों से असाध्य कहे हुए रोगियों के भी इसी प्रकार वातरोगों को यह नकुलतैल नष्ट करता है । यह हारीत ऋषि का कहा हुआ है ॥ १८३–१९१ ॥

## माषतैल ।

माषातसीयवकुरुण्टककण्टकारीगोकण्टुण्टुकजटाकपिकच्छुतोयैः । कार्पासकास्थिशणबीजकुलत्थकोलक्वाथेन बस्तपिशितस्य रसेन चापि ॥ १९२ ॥ शुण्ठ्या समागधिकया शतपुष्पया च सैरण्डमूलसपुनर्नवया सरण्या । रास्नाबलामृतलताकटुकैर्विपक्वं माषाख्यमेतदपबाहुहरञ्च तैलम् ॥ १९३ ॥अर्द्धाङ्गशोषमपतानकमाढ्यवातमाक्षेपकं सभुजकम्पशिरः प्रकम्पम् । नस्येन वस्तिविधिना परिषेचनेन हन्यात् कटीजघनजानुरुजः समीरात् १९४ ॥

तिल तैल २ सेर, क्वाथार्थ उर्द, अलसी, जौ, कुश, कटेरी, गोखरू, श्योनाक, जटामांसी, कौंच के बीज १६-१६ तोले, पाकार्थ जल ३२ सेर शेष ८ सेर । कपास के बीज, सन के बीज, कुलथी और बेर की मींगी १२ तोले, पाकार्थ जल ३२ सेर शेष ८ सेर । छाग के मांस का रस ४ सेर, जल १२ सेर शेष ८ सेर । कल्कार्थ सोंठ, पीपरि, सौंफ, एरण्डमूल, पुनर्नवा, गन्धप्रसारिणी, रास्ना, खरेटी, गिलोय और कुटकी एक सेर । इनसे सिद्ध किया हुआ यह तैल अपबाहु, अर्धाङ्गशोष, अपतानक, आढ्यवात, आक्षेपक, ऊरुस्तम्भ, बाहुकम्प, शिरःकम्प कमर, ऊरु और जाँघ के वातरोगों को नस्य, वस्ति तथा मर्दन से नष्ट करता है ॥ १९२-१९४ ॥

## स्वल्पमाषतैल ।

माषप्रस्थं समावाप्य पचेत् सम्यग् जलाढके । पादशेषे रसे तस्मिन् क्षीरं दद्याच्चतुर्गुणम् ॥ १९५ ॥ प्रस्थञ्च तिलतैलस्य कल्कं दद्याच्चसम्मितम् । जीवनीयानि यान्यष्टौ शतपुष्पां ससैन्धवाम् ॥ १९६ ॥ रास्नात्मगुप्ता मधुकं बलाव्योषत्रिकण्टकम् । पक्षाघातेऽर्दिते वाते कर्णशूले च दारुणे ॥ १९७ ॥ मन्दश्रुतौ चाश्रवणे तिमिरे च त्रिदोषजे । हस्तकम्पे शिरःकम्पे विश्वाच्यामपबाहुके ॥ १९८ ॥ शस्तं कलायखञ्जे च पानाभ्यञ्जनवस्तिभिः । माषतैलमिदं श्रेष्ठमूर्ध्वजत्रुगदापहम् ॥ १९९ ॥

तिलतैल २ सेर, क्वाथार्थ उर्द १ सेर, जल ८ सेर, शेष २ सेर । दूध ८ सेर, कल्कार्थ अष्टवर्ग, सौंफ, लाहौरी नमक, रास्ना, केवांच, मुलेठी, खरेटी, त्रिकटु और गोखरू ये दो-दो तोले । इनसे सिद्ध किया हुआ यह स्वल्पमाष तैल पक्षाघात, अर्दित, कर्णशूल, श्रवणशक्ति की अल्पता, बधिरता, मूर्च्छा, त्रिदोषज तिमिर, हस्तकम्पन, शिरःकम्पन, विश्वाची, अपबाहुक एवं कलायखञ्ज आदि विविध वातरोगों में पान, मर्दन तथा वस्ति के द्वारा प्रयोग करना चाहिये । यह माषतैल हंसुली के ऊपर के रोगों को नष्ट करने में श्रेष्ठ है ॥ १९५-१९९ ॥

## बृहन्माषतैल ।

माषक्वाथे बलाक्वाथे रास्नाया दशमूलजे । यवकोलकुलत्थानां छागमांसभवे पृथक् ॥ २०० ॥ प्रस्थे तैलस्य च प्रस्थं क्षीरं दत्त्वा चतुर्गुणम् । रास्नात्मगुप्तासिन्धूत्थशताह्वैरण्डमस्तकैः ॥२०१॥ जीवनीयबलाव्योषैः पचेदक्षसमैर्भिषक् ।

हस्तकम्पे शिरःकम्पे बाहुशोषेऽपबाहुके ॥ २०२ ॥ बाधिर्ये कर्णशूले च कर्णनादे च दारुणे । विश्वाच्यां अर्दिते कुब्जे गृध्रस्यामपतानके ॥ २०३ ॥ बस्त्यभ्यञ्जनपानेषु नावने च प्रयोजयेत् । एतत्तैलमिदं श्रेष्ठमूर्ध्वजत्रुगदापहम् । क्वाथमस्थाः षडेवात्र विभक्तं तेन दर्शिताः ॥ २०४ ॥

तैलेन सह सप्तप्रस्थमितस्मादस्य सप्तप्रस्थमाषतैलमिति संज्ञान्तरम् ।

क्वाथार्थ उर्द ६४ तोला, जल ६ सेर ३२ तोला, शेष १२८ तोला, खरेटी ६४ तोला, जल ६ सेर ३२ तोला, शेष १२८ तोला, रास्ना ६४ तोला, जल ६ सेर ३२ तोला, शेष १२८ तोला, दशमूल ६४ तोला, जल ६ सेर ३२ तोला, शेष १२८ तोला, जौ, बेर की मींगी, कुलथी ६४ तोला जल ६ सेर ३२ तोला, शेष १२८ तोला, छागमांस ६४ तोला, जल ६ सेर ३२ तोला, शेष १२८ तोला, दूध ६ सेर ३२ तोला, कल्क के लिये रास्ना, कौंच के बीज, सेंधा नमक, सौंफ, एरण्डमूल, नागरमोथा, जीवनीयवर्ग, खरेटी और त्रिकटु, ये सब एक-एक तोला। इनसे यथाविधि तैल सिद्ध करे। यह तैल हस्तकम्प, शिरःकम्प, बाहुशोष, अपबाहुक, बधिरता, कर्णशूल, कर्णनाद, विश्वाची, अर्दित वायु, कुब्जरोग, गृध्रसी और अपतानक आदि अनेक रोगों को नष्ट करता है। इस तैल का नस्य, मर्दन, पान एवं बस्ति में प्रयोग करना चाहिए। यह महामाषतैल ऊर्ध्वजत्रुरोगों को दूर करता है ॥ २००-२०४ ॥

### महामाषतैल ।

माषस्यार्द्धाढकं दत्त्वा तुलार्द्धं दशमूलतः । पलानि छागमांसस्य त्रिंशद् द्रोणेऽम्भसः पचेत् ॥ २०५ ॥ पूतशीते कषाये च चतुर्थांशावशेषिते । प्रस्थं च तिलतैलस्य पयो दत्त्वा चतुर्गुणम् ॥ २०६ ॥ आत्मगुप्ता रुबूकश्च शताह्वा लवणत्रयम् । जीवनीयानि मञ्जिष्ठा चव्यचित्रककट्फलम् ॥ २०७ ॥ सव्योषं पिप्पलीमूलं रास्ना मधुकसैन्धवम् । देवदार्वमृता कुष्ठं वाजिगन्धा वचा शटी ॥ २०८ ॥ एतैरक्षसमैर्भागैः साधयेत् मृदुनाग्निना । पक्षाघातेऽर्दिते वाते बाधिर्ये हनुसंग्रहे ॥ २०९ ॥ कर्णमन्याशिरःशूले तिमिरे च त्रिदोषजे । पाणिपादशिरोग्रीवाभ्रमणे मन्दचङ्क्रमे ॥ २१० ॥ कलायखञ्जे पाङ्गुल्ये गृध्रस्यामपबाहुके ॥ पाने बस्तौ तथाभ्यङ्गे नस्ये कर्णाक्षिपूरणे । तैलमेतत् प्रशंसन्ति सर्ववातरुजापहम् ॥ २११ ॥

पोटली में बँधे उर्द १२८ तोला, दशमूल २½ सेर, पोटली में बँधा छागमांस १२० तोला, २५ सेर ४८ तोला जल में पकाकर चतुर्थांशावशिष्ट रहने पर छान ले। इस क्वाथ में १२८ तोला तिल का तैल, ६ सेर ३२ तोला दूध और निम्नलिखित औषधियों का कल्क मिलाकर यथाविधि तैल सिद्ध करे। कौंच का मूल, एरण्डमूल, सौंफ, सेंधानोन, विड़नमक, कालानमक, जीवनीयवर्ग, मँजीठ, चव्य, चीतामूल, कायफल, त्रिकटु, पिपरामूल, रास्ना, मुलेठी, सेंधानमक, देवदारु, गिलोय, कूठ, असगन्ध, वच और कचूर ये सब एक-एक तोला। यह तैल पक्षाघात, अर्दित, बधिरता, हनुग्रह, कर्णशूल, मन्यास्तम्भ, शिरोवेदना, त्रिदोषज तिमिर, हाथ-पाँव सिर और ग्रीवा आदि का काँपना, कलायखंज, पंगुता, गृध्रसी, अपबाहुक आदि सब प्रकार की वातपीड़ाओं को पान, बस्ति, मर्दन, नस्य, कर्णपूरण और नेत्रपूरण से नष्ट करता है ॥२०५-२११॥

### निरामिषमहामाषतैल ।

दशमूलाढकं पक्त्वा जलद्रोणेऽङ्घ्रिशेषिते । तद्वन्माषाढककाथे तैलप्रस्थं पयः समम् ॥ २१२ ॥ कल्कैस्तैश्च मतिमान्

साधयेन् मृदुनाग्निना । अश्वगन्धा शटी दारुबला रास्ना प्रसारणी ॥ २१३ ॥ कुष्ठं परूषकं भार्गी द्वे विदार्यौ पुनर्नवा । मातुलुङ्गफलाजाज्यौ रामठं शतपुष्पिका ॥ २१४ शतावरी गोक्षुरकं पिप्पलीमूलचित्रकौ । जीवनीयगणं सर्वं संहृत्यैव ससैन्धवम् ॥ २१५ ॥ तत्साधुसिद्धं विज्ञाय माषतैलमिदं महत् । बस्त्यभ्यञ्जनपानेषु नावनेषु प्रशस्यते ॥ २१६ ॥ पक्षाघाते हनुस्तम्भे अर्दिते सापतन्त्रके । अवबाहुकविश्वाच्योः खाञ्ज्यपाङ्गुल्ययोरपि ॥ २१७ ॥ शिरोमन्याग्रहे चैव अधिमन्थे च वातिके । शुक्रक्षये कर्णनादे कर्णक्ष्वेडे च दारुणे । कलायखञ्जशमने भैषज्यमिदमादिशेत् ॥ २१८ ॥

१ सेर १६ तोला दशमूल को २५ सेर ४८ तोला जल में पकावे, ६ सेर ३२ तोला शेष रहने पर छान ले। इसी प्रकार ३ सेर १६ तोला उर्द का, जल २५ सेर ४८ तोला का ६ सेर ३२ तोला क्वाथ तैयार करे। इन क्वाथों को एकत्र कर उसमें ६ सेर ३२ तोला दूध, १२८ तोला तैल और निम्नलिखित औषधियों का कल्क मिलाकर यथाविधि तैल सिद्ध करे। असगन्ध, कचूर, देवदारु, खरेटी, रास्ना, गन्धप्रसारणी, कूट, फालसा, भारंगी, विदारीकन्द, वाराहीकन्द, पुनर्नवा, बड़ा नींबू, जीरा, हींग, सौंफ, शतावरि, गोखरू, पिपरामूल, चीता, जीवनीयगण और सेंधानमक कुल मिलाकर ३२ तोला। इस तैल का उपयोग बस्तिक्रिया, मर्दन, अभ्यङ्ग और पान में होता है। यह पक्षाघात, हनुस्तम्भ, अर्दित, अपतन्त्रक, अपबाहुक, विश्वाची, खञ्जता, पङ्गुता, शिरोग्रह, मन्यास्तम्भ, वातिक अधिमन्थ, शुक्रक्षय, कर्णनाद, कर्णक्ष्वेड और कलायखञ्ज आदि विविध वातरोगों को नष्ट करता है ॥ २१२-२१८ ॥

कुब्जप्रसारणीतैल ।

प्रसारणीशतं क्षुण्णं पचेत्तोयार्मणे शुभे । पादशेषे समं तैलं दधि दद्यात् सकाञ्जिकम् ॥ २१९ ॥ द्विगुणञ्च पयो दत्त्वा कल्कान् द्विपलिकांस्तथा । चित्रकं पिप्पलीमूलं मधुकं सैन्धवं वचाम् ॥ २२० ॥ शतपुष्पां देवदारुं रास्नां वारणपिप्पलीम् । प्रसारण्याश्च मूलानि मांसीभल्लातकानि च ॥ २२१ ॥ पचेन्मृद्वग्निना तैलं वातश्लेष्मामयान् जयेत् । अशीतिं नरनारीस्थान् वातरोगान् व्यपोहति ॥ २२२ ॥ कुब्जस्तिमितपङ्गुत्वं गृध्रसी खुडकार्दितम् । हनुपृष्ठशिरोग्रीवास्तम्भं चाशु नियच्छति ॥ २२३ ॥

२ सेर गन्धप्रसारिणी को २५ सेर ४८ तोला जल में पकाकर चतुर्थांशावशिष्ट क्वाथ करे। इसमें तिलतैल ६ सेर ३२ तोला, दही का पानी ६ सेर ३२ तोला, कांजी ६ सेर ३२ तोला, दूध १२ सेर ६४ तोला और निम्नलिखित औषधियों का कल्क मिश्रित कर यथाविधि कोमल अग्नि से तैल सिद्ध करे। कल्कार्थ द्रव्य—चीता, पिपरामूल, मुलेठी, सेंधानमक, खरेटी, सौंफ, देवदारु, रास्ना, गजपीपरि, गन्धप्रसारणी का मूल, जटामासी और भिलावाँ के सब चार-चार तोला। यह तैल गृध्रसी, हनुस्तम्भ, कुब्जता, पंगुता, खुड्डवात, अर्दितवात तथा हनुस्तंभ, पीठस्तम्भ, शिरोग्रह और ग्रीवास्तम्भ एवं स्त्री-पुरुषों के अस्सी प्रकार के वातरोगों और कफरोगों को दूर करता है ॥ २१९-२२३ ॥

सप्तशतिकप्रसारणीतैल ।

समूलपत्रामुत्पाट्य शरत्काले प्रसारणीम् । शतं ग्राह्यं सहचराच्छतावर्याः शतं तथा ॥ २२४ ॥ बलात्मगुप्ताश्वगन्धा-

केतकीनां शतं शतम् । पचेच्चतुर्गुणे तोये द्रव्यैस्तैलाढकं भिषक् ॥ २२५ ॥ मस्तुमांसरसं चुक्रं पयश्चाढकमाढकम् । दध्याढकसमायुक्तं पाचयेन्मृदुनाग्निना ॥ २२६ ॥ द्रव्याणां तु प्रदातव्या मात्रा चार्द्धपलांशिका । तगरं मदनं कुष्ठं केशरं मुस्तकं त्वचम् ॥ २२७ ॥ रास्नासैन्धवपिप्पल्यौ मांसीमञ्जिष्ठयष्टिकाः । तथा मेदा महामेदा जीवकर्षभकौ पुनः ॥ २२८ ॥ शतपुष्पा व्याघ्रनखं शुण्ठी देवाह्वमेव च । काकोली क्षीरकाकोली वचा भल्लातकं तथा ॥ २२९ ॥ पेषयित्वा समानेतान् साधनीया प्रसारणी । नातिपक्वं न हीनञ्च सिद्धं पूतं निधापयेत् ॥ २३० ॥ यत्र यत्र प्रदातव्या तन्मे निगदतः शृणु । कुब्जानामथ पङ्गूनां वामनानां तथैव च ॥ २३१ ॥ यस्य शुष्यति चैकाङ्गं ये च भग्नास्थिसन्धयः । वातशोणितदुष्टानां वातोपहतचेतसाम् ॥ २३२ ॥ स्त्रीमद्यक्षीणशुक्राणां वाजीकरणमुत्तमम् । वस्तौ पाने तथाऽभ्यङ्गे नस्ये चैव प्रयोजयेत् । प्रयुक्तं शमयत्याशु वातजान् विविधान् गदान् ॥ २३३ ॥

मूल-पत्र सहित शरद् ऋतु में उखाड़ी हुई गन्धप्रसारणी २ सेर, सहचर ( पियाबासा ) २ सेर, शतावरि २ सेर, खरैटी २ सेर, श्योनाक के मूल की छाल २ सेर, असगन्ध २ सेर और केतकी का मूल २ सेर लेकर चौगुने जल में पृथक् पृथक् चतुर्थांशावशिष्ट क्वाथ करे। उसमें तिलतैल ६ सेर १२ तोला, दही का पानी ६ सेर १२ तोला, छागमांस का क्वाथ ६ सेर १२ तोला, चुक्र ६ सेर १२ तोला, दूध ६ सेर १२ तोला, दही ६ सेर १२ तोला, और निम्नलिखित औषधियों का कल्क मिलाकर तैल सिद्ध करे। तगर, मैनफल, कूट, नागकेसर, नागरमोथा, दालचीनी, रास्ना, सेंधानमक, पीपरि, जटामांसी, मजीठ, मुलेठी, मेदा, महामेदा, जीवक, ऋषभक, सौंफ, नखी, सोंठ, देवदारु, काकोली, क्षीरकाकोली, वच और भिलावाँ, ये दो-दो तोले लेकर कोमल अग्नि से तैल पाक करे। पाक में ध्यान रखना चाहिए कि खरपाक या मंदपाक न हो जाय। यह तैल पान, वस्ति, मर्दन और नस्य में उपयुक्त होता है और अनेक प्रकार के वातज रोगों को नाश करता है तथा कुब्ज ( कुबड़े ) पङ्गु ( पँगुले ), वामन ( छोटे ) अङ्गवाले, एकाङ्गशोषवाले, अस्थिभंग या सन्धिभङ्गवाले, वातरक्त और वायु से उपहत चित्तवाले, स्त्री-संग और मदिरापान से क्षीण वीर्यवाले रोगियों को हितकर और वाजीकरण है ॥ २२४-२३३ ॥

### एकादशशतिकमहाप्रसारणीतैल।

शाखामूलदलैः प्रसारणितुलास्तिस्रः कुरण्टीतुले छिन्नायाश्च तुले तुले स्यु-कतो रास्ना शिरीषात्तुलाम् । देवाह्वाच्च सकेतकात् पटशते निःक्वाथ्य कुम्भांशिके तोये तैलघटं तुषाम्बुकलशौ द्व्याढकं मस्तुनः ॥ २३४ ॥ शुक्राच्छागरसाद्धेक्षुरसतः क्षीराच्च दध्याढकं पृक्का कर्कटजीवकाद्यविकपाकाकोलिकाकच्छुराः । सूक्ष्मैलाघनसारकुन्दुसरला काश्मीरमांसीनलैः कालीयोत्पलपद्मकाह्वनिशाकक्कोलकग्रन्थिकैः ॥ २३५ ॥ चाम्पेयाभयचोचपूगकटुका जातीफला भीरुभिः श्रीवासामरदारुचन्दनवचाशैलेयसिन्धूद्भवैः । तैलाम्भोदकटम्भराङ्घ्रिनलिनाह्वश्रीरकचोरकैः कस्तूरी दशमूलकेतकनलध्यामारव्यगन्धाम्बुभिः ॥ २३६ ॥ कौन्तीतार्क्ष्यभवाब्जकीफललतुरयामाशताह्वामयै -

भल्लातत्रिफलाब्जकेशरसहाख्यामालनद्धान्वितैः । सव्योषैस्त्रिपलैर्महीयसिपचेन्मन्देन पात्रेऽग्निना पानाभ्यञ्जनबस्तिनस्यविधिनातान्मारुतान्नाशयेत् २३७॥ सर्वाङ्गैकाङ्गगतं तथावयवगं सन्ध्यस्थिमज्जागतं श्लेष्मोत्थानथ पैत्तिकांश्च शमयेन्नानाविधानामयान् । धातून् बृंहयति स्थिरञ्च कुरुते पुंसां नवं यौवनं वृद्धस्यापि बलं करोति सुमहद्वन्ध्यासु गर्भप्रदम् ॥ २३८ ॥ पीत्वा तैलमिदं जरस्यपि सुतं सूतेऽमुना मूरुहाः सिक्ताः शोषमुपागताश्च मलिनाः स्निग्धा भवन्ति स्थिराः । भग्नाङ्गाः सुदृढा भवन्ति मनुजा गावो हयाः कुञ्जराः ॥ २३९ ॥

शाखा, मूल और पत्र सहित गन्धप्रसारणी १२ सेर, पियाबासा की जड़ १० सेर, शिरीष १० सेर, एरण्डमूल १० सेर, रास्ना और शिरीष दोनों मिलाकर २ सेर और देवदारु, केतकी की जड़ मिलाकर २ सेर लेकर ३२ मन जल में पकावे, शतांश (सौवाँ हिस्सा) शेष रहने पर उतारकर छान ले। इसमें तिल तैल २५ सेर ४८ तोला, काँजी १ मन ११ सेर १६ तोला, दही का पानी ६ सेर ३२ तोला, गुड़ ६ सेर ३२ तोला, धानमाम का काथ ६ सेर ३२ तोला, इक्षुरस ६ सेर ३२ तोला, दुग्ध ६ सेर ३२ तोला मिलावे और निम्नलिखित औषधियों का कल्क मिलाकर यथाविधि तैल सिद्ध करे। रक्तचन्दन, लाक्षा, काकड़ासिंगी, जीवनीयगण, मजीठ, काकोली, क्षीरकाकोली, कौंच के मूल की छाल, छोटी इलायची, कपूर, कुङ्कुम, सोंठ, केसर, जटामांसी, सठी, तगर, कमल, पद्माख, हरड़, चमेली, पिपरामूल, नागकेसर, लाख, तालीसपत्र, सुपारी, मुरा, जायफल, शतावरी, नखशीतल, देवदारु, रक्तचन्दन, वच, हरिद्रा, सेंधानमक, शिलारस, नागरमोथा, गन्धप्रसारणी, बालुका, पुनर्नवा, गठिवन, कस्तूरी, दशमूल, केतकी, तगर, गन्धतृण, असगन्ध, सुगन्धवाला, सँभालू के बीज, रसौत, शालपर्णी (सर्जभेद), मैनफल, अगर, काली निसोथ, सौंफ, कूट, भिलावाँ, त्रिफला, कमल, नागकेसर, काली सारिवा, लौंग, निग्दु ये सब द्रव्य १२-१२ तोले एकत्रकर किसी पात्र में रख मन्द मन्द अग्नि से पाक करे। यह तैल पान, मर्दन आदि तथा नस्य के प्रयोग से सर्वाङ्गवात, अर्द्धाङ्गवात, अंगसन्धि तथा अस्थिमज्जागत वायु को तथा पित्त एवं नाना प्रकार के कफज रोगों को नष्ट करता है। धातुओं को बढ़ाता, यौवन का स्थिर करता, वृद्ध को बल देता, वन्ध्या को गर्भ देता तथा प्रसूता को प्रसव में सुख देता है। इसके सींचने से सूखे वृक्ष हरे हो जाते हैं। इस तैल से भग्नाङ्ग मनुष्य, गौ, घोड़े, हाथी आदि दृढ़ अंगवाले होते हैं ॥ २३४-२३९ ॥

### अष्टादशशतिकप्रसारणीतैल।

समूलदलशाखायाः प्रसारण्याः शतत्रयम् । शतमेकं शतावर्या अश्वगन्धाशतं तथा ॥ २४० ॥ केतकीनां शतं चैकं दशमूलात्पृथक् शतम् । शतं बाट्यालकस्यापि शतं सहचरस्य च ॥ २४१ ॥ जलद्रोणशतं दत्त्वा शतभागावशेषितम् । तस्मिन्नेन कषायेण कषायद्विगुणेन च ॥ २४२ ॥ शुक्तेनारनालेन दधिमस्त्वाढकेन च । क्षीरशुक्तेक्षुनिर्यासच्छागमांसरसाढकैः ॥ २४३ ॥ तैलद्रोणं समायुक्तं दृढे पात्रे निधापयेत् । द्रव्याणि यानि पेष्याणि तानि वक्ष्याम्यतः परम् ॥ २४४ ॥ भल्लातकं नतं शुण्ठी पिप्पली चित्रकं शठी । वचा पृथक् प्रसारण्याः पिप्पल्या मूलमेव च ॥ २४५ ॥ देवदार्वेलवालुका च मूर्वालतागरम् । कुङ्कुमं मदमञ्जिष्ठा तुरुष्कं

नखिकागुरु ॥ २४६ ॥ कर्पूरकुन्दुरुनिशा लवङ्गं श्यामचन्दनम् । कक्कोलं नलिकागुरुत्तं कालीयोत्पलपत्रकम् ॥ २४७ ॥ शटीहरेणु शैलेयं श्रीवासश्च मकेतकम् । त्रिफला कच्चुराभीरु सरलं पद्मकेशरम् २४८ प्रियङ्गूशीरनलदं जीवकार्यपुनर्नवा । दशमूलश्वगन्धे च नागपुष्पं रसाञ्जनम् २४९ कटुका जातिपूगानां फलानि शल्लकीरसम् । भागांस्त्रिपलिकान् दत्त्वा शनैर्मृद्वग्निना पचेत् ॥ २५० ॥ विस्तीर्णे सुदृढे पात्रे पाच्येषा तु प्रसारणी । प्रयोगः षड्विधश्चात्र रोगाणां विधीयते ॥ २५१ ॥ अभ्यङ्गात् त्वग्गतं हन्ति पानात् कोष्ठगतं तथा । भोजनात् सूक्ष्मनाडीस्थान् नस्यादूर्ध्वगतं तथा ॥ २५२ ॥ पक्वाशयगते वस्तिर्निरूहः सर्वगात्रिके । एतद्धि वडवारवानां किशोराणां यथामृतम् ॥ २५३ ॥ एतदेव मनुष्याणां कुञ्जराणां गवामपि । अनेनैव च तैलेन शुष्यमाणा महाद्रुमाः ॥ २५४ ॥ सिक्ताः पुनः प्ररोहन्ति भवन्ति फलशालिनः । वृद्धोऽप्यनेन तैलेन पुनश्च तरुणायते ॥ २५५ ॥ न प्रसूते च या नारी सापि पीत्वा प्रसूयते । अप्रजः पुरुषो यस्तु सोऽपि पीत्वा लभेत् सुतम् ॥ २५६ ॥ अशीतिं वातजान् रोगान् पैत्तिकान् श्लैष्मिकानपि । सन्निपातसमुत्थांश्च नाशयेत् क्षिप्रमेव हि ॥ २५७ ॥ एतेनान्धकवृष्णीनां कृतं पुंसवनं महत् । कृतं विष्णोर्बलिश्चापि तैलमेतत् प्रयोजयेत् ॥ २५८ ॥

भावार्थ मूल, पत्र और शाखासहित गन्धप्रसारणी १२ सेर, शतावरि ५ सेर, असगन्ध ५ सेर, केवड़ा का मूल ५ सेर, दशमूल की प्रत्येक औषधि पाँच पाँच सेर, खरैटी ५ सेर और खियाबासा ५ सेर लेकर ६४ मन जल में पकावे। जब २५ सेर ४८ तोला शेष रहे तो उतारकर छान ले। २५ सेर ४८ तोला काथ, १ मन ११ सेर १६ तोला काँजी, ६ सेर ३२ तोला दही के पानी, ६ सेर ३२ तोला दूध, ६ सेर ३२ तोला शुक्त, ६ सेर ३२ तोला ईख के रस और ६ सेर ३२ तोला छाग के मांस के रस के साथ २५ सेर ४८ तोला तिल तैल एक दृढ़ पात्र में रखकर पकावे। पश्चात् पकाते समय भिलावाँ, तगर, सोंठ, पीपरि, चीता, कचूर, बच, शुक्ल (पुरीशाक) गन्धप्रसारणी का मूल, पिपरामूल, देवदारु, सौंफ, छोटी इलायची, दालचीनी, सुगन्धबाला, केसर, कस्तूरी, मजीठ, शिलारस, नखी, अगर, कपूर, कुन्दुरू (कुन्दुरुखोटी), हल्दी लौंग, गन्धतृण, रक्तचन्दन, कंकोल, नाड़ीशाक, नागरमोथा, काली अगर, कमल, तेजपात, कपूर, सँभालू के बीज चोर, श्रीवास, केवड़ा, त्रिफला, कौंच, शतावरि, सरलकाष्ठ, पद्मकाष्ठ, नागकेसर, फूलप्रियंगु, खस, जटामांसी, जीवनीयगण, सोंठी, दशमूल, असगन्ध, नागकेसर, रसौत, कुटकी, जायफल, सुपारी और शल्लकीरस (राल) प्रत्येक बारह-बारह तोले पीसकर मिलावे और धीमी आँच से पकाकर यथाविधि तैल सिद्ध करे। इस तैल के मर्दन करने से चमड़े के रोग, पीने से कोष्ठगत रोग, भोजन से सूक्ष्म नाड़ीगत रोग और नस्य से ऊर्ध्वगत रोग नष्ट होते हैं। वस्तिक्रिया से पक्वाशय के और निरूहवस्तिक्रिया से संपूर्ण शरीर के रोगों का नाश करता है। यह तैल घोड़े, हाथी, गाय और मनुष्य आदि सब जीवों के लिये अमृत के तुल्य लाभदायक होता है। इस तैल से सूखते हुए बड़े-बड़े वृक्ष सिंचकर हरे भरे और फलसम्पन्न हो जाते हैं। वृद्ध मनुष्य भी इस तैल का मर्दन करने से तरुण के समान हो जाता है। जिस स्त्री या पुरुष के सन्तान न होती हो उसको इस तैल के पीने

से अवश्य सन्तान होती है । यह तैल ८० प्रकार के वात रोग, सब प्रकार के पैत्तिक, श्लैष्मिक और सान्निपातिक रोगों को तत्काल नष्ट करता है । इस तैल से अन्धक और वृष्णियों ( यादव आदि) को पुंसवन हुआ था । विष्णु को बलि देकर इस तैल का प्रयोग करना चाहिए ॥ २४०–२४८ ॥

टिप्पणी—केशर कस्तूरी आदि सुगन्धित द्रव्य तैल बन जाने के बाद फिर डालने चाहिये । यही विधि सब घृतों में बरतनी चाहिए ।

### त्रिशतीप्रसारणीतैल ।

समूलपत्रशाखाञ्च जातसारां प्रसारणीम् । कुट्टयित्वा पलशतं दशमूलशतं तथा ॥ २५९ ॥ अश्वगन्धापलशतं कटाहे समधिक्षिपेत् । वारिद्रोणे पृथक्कृत्वा पादशेषेऽवतारितम् ॥ २६० ॥ कषायसममात्रं तु तैलमत्र प्रदापयेत् । दध्नस्तथाढकं दत्त्वा द्विगुणञ्चाम्लकाञ्जिकात् ॥ २६१ ॥ चतुर्द्रोणेन पयसा जीवनीयैः पलोन्मितैः । मृद्वीकापलान् पञ्च मिशाज्ञातकानि च ॥ २६२ ॥ द्वे पले पिप्पलीमूलात् चित्रकाच्च पलद्वयम् । यवक्षारपले द्वे च सैन्धवस्य पलद्वयम् ॥ २६३ ॥ सौवर्चलपले द्वे च मञ्जिष्ठायाः पलद्वयम् । प्रसारणीपले द्वे च मधुकस्य पलद्वयम् ॥ २६४ ॥ सर्वाण्येतानि संहृत्य शनैर्मृद्वग्निना पचेत् । एतदभ्यञ्जने श्रेष्ठं बस्तिकर्मनिरूहणे ॥ २६५ ॥ पाने नस्ये च दातव्यं न क्वचित् प्रतिहन्यते । अशीतिं वातजान् रोगांश्चत्वारिंशच्च पैत्तिकान् ॥ २६६ ॥ विंशतिं श्लैष्मिकांश्चैव सर्वानेतान् व्यपोहति । गृध्रसीमस्थिभङ्गञ्च मन्दाग्नित्वमरोचकम् ॥ २६७ ॥ अपस्मारं तथोन्मादं विभ्रमं मन्दगामिताम् । शाखगताश्चापि ये वाताः शिरःसन्धिगताश्च ये ॥ २६८ ॥ जानुसन्धिगताश्चैव पादपृष्ठगताश्च ये । प्रभग्नो वा वातसंभग्नो भग्नो वा यदि वा नरः ॥ २६९ ॥ प्रसारयति यस्मात्तु तस्मादेषा प्रसारणी । इन्द्रियाणाञ्च जननी वृद्धानाञ्च सूयनी ॥ २७० ॥ एतेनान्धककृष्णीनां कृतं पुंसवनं महत् । प्रसारणीतैलमिदं बलवर्णाग्निवर्द्धनम् ॥ २७१ ॥ अपनयति जरां पलितं शोषयति रुजामुत्पादयति तारुण्यम् ॥ २७२ ॥ पक्षाघातं सर्वाङ्गहतं वातगुल्मञ्च नाशयेत् । एतदुपयुज्यमानः प्रसन्नवर्णेन्द्रियो भवेत् ॥ २७३ ॥

२ सेर मूल, पत्र और शाखासहित गन्धप्रसारणी तथा २ सेर दशमूल की ओषधियाँ और २ सेर असगन्ध प्रत्येक को कूटकर २५ सेर ४८ तोला जल में पकाकर चतुर्थांश शेष रहने पर छान ले । इन काढ़ों में ६ सेर ३२ तोला तिलतैल, ६ सेर ३२ तोला दही, १२ सेर ६४ तोला कांजी और २ मन २२ सेर ३२ तोला जल डालकर पकावे । पश्चात् पकाते समय चार-चार तोले जीवनीयगण की प्रत्येक ओषधि, चार तोले अङ्गूर, १४० तोला भिलावा, और पिपरामूल, चीता, जवाखार, सेंधानमक, कालानमक, मजीठ, प्रसारणी और मुलेठी ये सब आठ आठ तोले लें । कल्क बनाकर डाल दे और धीमी-धीमी आँच पर यथाविधि तैल सिद्ध करे । इस तैल को अभ्यङ्ग, बस्तिक्रिया, निरूहण, पान और नस्य में देना चाहिए । यह कहीं भी विफल नहीं होता । यह तैल ८० प्रकार के वातिक, ४० प्रकार के पैत्तिक और २० प्रकार के श्लैष्मिक रोगों को नष्ट करता है । गृध्रसी, अस्थिभङ्ग, मन्दाग्नि, अरोचक, अपस्मार, उन्माद, विभ्रम और मन्दगामिता को तथा शाखागत, शिरोगत, सन्धिगत, जानुसन्धिगत, पाद और

पृथगल वातरोगों को नष्ट करता है। वातरोग से पीड़ित घोड़ा, हाथी या मनुष्य हो, सबको यह रोगमुक्त कर देता है, इसलिये इसका नाम प्रसारणी है। यह तैल इन्द्रियों की शक्ति को बढ़ाता और वृद्धों को सन्तान देता है। इसने अन्धक और वृष्णियों को परम शक्ति दी थी। यह बल, वर्ण और अग्नि का वर्धक है, बुढ़ापे को मिटाता है, पलित रोग तथा अनेक पीड़ाओं को दूर करता है। तरुणता उत्पन्न करता है। पक्षाघात, सर्वाङ्गहत और वातगुल्म को नष्ट कर इन्द्रिय कान्ति को निर्मल करता है॥ २५६-२७३॥

### महाराजप्रसारणीतैल

शतत्रयं प्रसारण्या द्वे च पीतसहाचरात्। अश्वगन्धैरण्डबला वरी रास्ना पुनर्नवा॥ २७४॥ केतकी दशमूलञ्च पृथक्त्वक्पारिभद्रतः। प्रत्येकमेषां तु तुलां तुलार्द्धं किलिमात्तथा॥ २७५॥ तुलार्द्धं स्यान्छिरीषाच्च लाक्षायाः पञ्चविंशतिः। पलानि लोध्राच्च तथा सर्वमेकत्र साधयेत्॥ २७६॥ जलपञ्चाढकशते सपादे तत्र शेषयेत्। द्रोणद्वयं काञ्जिकस्य षड्विंशत्याढकोन्मितम्॥ २७७॥ क्षीरदध्नोः पृथक्प्रस्था दशमस्त्वाढकं तथा। इक्षो रसाढकं चापि छागमांसतुलात्रये॥ २७८॥ जलपञ्चचत्वारिंशत् प्रस्थे पक्वे तु शेषयेत्। सप्तदशरसप्रस्थान् मञ्जिष्ठायाश्च एव च॥ २७९॥ कुडवी नाढकोन्मानो द्रव्यैरेभिस्तु साधयेत्। सुशुद्धं तिलतैलस्य द्रोणं प्रस्थेन संयुतम्॥ २८०॥ आद्य एभिर्द्रव्यैः पाकः कल्को भल्लातकं कणा। नागरं मरिचञ्चैव प्रत्येकं षट्पलोन्मितम्॥ २८१॥ भल्लातकासहस्रे तु रक्तचन्दनमिष्यते। पथ्याक्षधात्र्यः सरलं शताह्वा कर्कटी वचा॥ २८२॥ चोरपुष्पी शटी मुस्तद्वयं पद्मकञ्च सोत्पलम्। पिप्पलीमूलमञ्जिष्ठा साश्वगन्धा पुनर्नवा॥ २८३॥ दशमूलं समुदितं चक्रमर्दो रसाञ्जनम्। गन्धतृणं हरिद्रा च जीवनीयो गणस्तथा॥ २८४॥ एषां द्विपलिकैर्भागैराद्यः पाको विधीयते। देवपुष्पीगोलपत्रं शल्लकीरसशैलजे॥ २८५॥ प्रियङ्गुपूतीरमधुरी मांसी दारु एला चला। श्रीवासो नलिका खोटिः सूक्ष्मैला कुन्दुरुर्मुरा॥ २८६॥ नखीत्रयश्च स्पृक्पत्री पामरापूतिचम्पकम्। मदनं रेणुका पृक्का मरुवञ्च पलत्रयम्॥ २८७॥ प्रत्येकं गन्धतोयेन द्वितीयः पाक इष्यते। गन्धोदकन्तु स्पृक्पत्री पत्रकोशीरमुस्तकम्॥ २८८॥ प्रत्येकं सरलामूलं पलानि पञ्चविंशतिः। कुष्ठार्द्धं भागोऽत्र जलप्रस्थास्तु पञ्चविंशतिः॥ २८९॥ अर्द्धविंशिताः कर्त्तव्याः पाके गन्धाम्बुकर्मणि। गन्धाम्बुचन्दनाम्बुभ्यां तृतीयः पाक इष्यते॥ २९०॥ कल्कोऽत्र केशरं कुष्ठं त्वक् कालीयककुङ्कुमम्। भद्रश्रियं ग्रन्थिपर्णं लवा कस्तुरिका तथा॥ २९१॥ लवङ्गागुरुकक्कोलजातीकोषफलानि च। एला लवङ्गवल्ली च प्रत्येकं त्रिपलोन्मितम्॥ २९२॥ कस्तूरी षट्पला चन्द्रात् पलं सार्द्धञ्च गृह्यते। वेधनार्थं पुनश्चन्द्रमेतौ देयौ तयोन्मितौ॥ २९३॥ महाप्रसारणी सेयं राजभोग्या प्रकीर्तिता। गुणान् प्रसारणीनां तु वहत्येषा बलोत्तमान्॥ २९४॥ काञ्जिकं मानतो द्रोणःशुद्रेनात्र विधीयते। अत्र शुद्धिर्विर्भण्डः प्रस्थः

पश्चाढकोन्मितः ॥ २९५ ॥ काञ्जिकं कुडवो दध्नो गुडमस्थोऽम्लमूलकात्। पलान्यष्टौ शोधितार्द्रात्पलषोडशिकं तथा॥ २९६ ॥ कणाजीरकसिन्धूत्थहरिद्रा मरिचं तथा। द्विपलं भाविते भाण्डे घृतेनाष्टदिनं स्थितम्॥ २९७ ॥ सिद्धं भवति तच्छुक्तं यदावतार्य गृह्यते। तदा देयं चतुर्जातं पृथक्कर्षत्रयोन्मितम्॥ २९८ ॥

यद्यपि काञ्जिकस्य षड्विंशतिराढकानीत्युक्तं तथापि काञ्जिकद्रोणमात्रेण व्यवहारः अन्यथा काञ्जिकस्यैव गन्धः स्यादिति अतएव चक्रो वक्ष्यति काञ्जिकं मानतो द्रोण इति। चन्दनाम्बुसाधनविधिर्यथा, कुट्टितचन्दनपलम् ५०, पाकार्थं जलशरावम् ५०, शेषशरावम् २५। घृष्टचन्दनं गोलयित्वा वा दातव्यमिति।

१५ सेर प्रसारणी, १० सेर पीले फूल का पियावासा, पाँच-पाँच सेर (सौ सौ पल) असगन्ध, एरण्ड, खरेटी, शतावरि, रास्ना, पुनर्नवा, केवड़ी, दशमूल और फाहद २॥ सेर, देवदारु २॥ सेर, सिरिस १। सेर, सोंठ और जारुल १। सेर को ४० मन जल में पकाकर १ मन ११ सेर १६ तोला जल शेष रक्खे। इसमें २५ सेर ४८ तोला कांजी, १६ सेर दूध और १६ सेर दही, ६ सेर १६ तोला दही का तोड़, १२ सेर ६४ तोला ईख का रस मिलावे। १५ सेर छागमांस को १ मन १२ सेर जल में काढा करके शेष २० सेर १६ तोला ६ सेर ३२ तोला मजीठ का क्वाथ और २५ सेर ४८ तोला शुद्ध तिलतैल तथा निम्नलिखित द्रव्यों के कल्क के साथ प्रारम्भिक पाक करे। कल्कार्थ द्रव्य—चौबीस-चौबीस तोला भिलावाँ, पीपरि, सोंठ और मिर्च, (यदि भिलावाँ सह्य न हो तो भिलावाँ के बदले रक्तचन्दन ले)। चार-चार तोला हड़, बहेड़ा, आँवला, चीड़, सौंफ, काकड़ासिंगी, बच, चोर-पुष्पी (शंखिनी), कचूर, मोथा, नागरमोथा, पद्माख, कमल के पुष्प, पीपरामूल, मजीठ, असगंध, सरेठी, दशमूल (मिलित), चकवँड़ (पँवार) रसौत, गन्धतृण, हलदी और जीवनीयगण ले। पूर्वोक्त, द्रवद्रव्यों और कल्कों के साथ पाक होने पर निम्नलिखित द्रव्यों के कल्क और गन्धोदक के साथ दुबारा पाक करना चाहिए। कल्कार्थ द्रव्य—लौंग, चोल (गन्धरस), तेजपात, धूप, धरीला, प्रियंगु, खस, सौंफ, जटामांसी, देवदारु, खरेंटी, शिलारस, लोबान, मालिका (चमारी), नवनीतखोटि, छोटी इलायची, कुन्दुरू मुरामांसी, तीनों शटी, दालचीनी, तेजपात, बच, रुद्राक्षी (मुश्कबिलाई के अंडे), चम्पा के पुष्प, दौना, सँभालु के बीज, शुक्ला (पुरीशाक) और मल्या प्रत्येक बारह-बारह तोले ले।

गन्धोदक विधि।

तेजपात, पत्रक (तेजपात के सदृश पत्र-विशेष), खस, नागरमोथा और सुगन्धबाला का मूल १००-१०० तोले, कूट ४० तोला लेकर १ मन जल में पकावे, २० सेर शेष रहे तो छान लें। यह क्वाथ गन्धोदक कहा जाता है। पूर्वोक्त कल्क और गन्धोदक के साथ पाक सिद्ध होने पर गन्धोदक चन्दनाम्बु और निम्नलिखित कल्कों के साथ तृतीय पाक करें—कल्कार्थ द्रव्य— नागकेशर, कूट, दालचीनी, कालीयक (पीलाचन्दन), कुंकुम, रक्तचन्दन, गठिवन, लताकस्तूरी, लौंग, अगर, कंकोल, जावित्री, जायफल, इलायची और वायु की छाल बारह-बारह तोले। गन्धोदक, चन्दनाम्बु और इस कल्क के साथ पाक सिद्ध होने पर फिर कस्तूरी २५ तोले और कपूर ६ तोला मिलावे। यह महाराजप्रसारणीतैल राजाओं के सेवन करने योग्य है। इसमें अन्यान्य प्रसारणी तैलों की अपेक्षा बहुत शक्तिशाली गुण हैं।

शुक्तसाधनविधि

यहाँ शुक्त बनाने की विधि लिखते हैं। जैसे—भात का माँड़ १२८ तोला, कांजी ३२ सेर

दही ६४ तोला, गुड़ ६४ तोला, अम्लमूलक ( कांजी का अधःस्थित द्रव्य ) ३२ तोला, अदरख ६४ तोला, पीपर, जीरा, लाहौरी नमक, हल्दी और काली मिरिच आठ-आठ तोला ले। इन सब द्रव्यों को घृत से स्निग्ध किये हुए पात्र में ८ दिन तक मुँह ढककर रक्खे। पश्चात् उसमें दालचीनी, तेजपात, इलायची और नागकेसर का तीन-तीन तोला चूर्ण मिला लेना चाहिए। इसको शुक्र कहते हैं।

यद्यपि इस महाराजप्रसारणीतैल के साधन में कांजी २६ आढक लिखी है तथापि एक ही द्रोण ली जाती है। नहीं तो तैल में कांजी की ही गन्ध आने लगती। अतएव चक्रपाणिदत्त ने भी एक ही द्रोण ( १२ सेर ६४ तोला ) काँजी लेने को लिखा है।

## चन्दनाम्बुसाधनविधि।

२॥ सेर चन्दन का चूर्ण अथवा घिसे हुए चन्दन की गोलियों को ४० सेर जल में पकावे। २० सेर जल शेष रहने पर छान ले। इस काथ को चन्दनाम्बु कहते हैं॥ २७७–२९८॥

## मृगमदादिकों के उत्कर्ष और अपकर्ष के लक्षण।

### मृगमद

या गन्धं केतकीनां वहति परिमलं वर्णतः पिञ्जराभा स्वादे तिक्ता कटुर्वा परिलघुतुलना मर्दिता चिक्कणा सा। दग्धा नो याति भस्मं मिपिमिमिपि कुरुते चर्मगन्धा तु चान्ते सा भद्रा लोभनीया वरमृगतनुजा राजयोग्या प्रदिष्टा॥ २९९॥ पीतः किञ्चिल्लघुरतिशयं केतकीपुष्पगन्धः स्निग्धो दग्धो मिपिमिमिपिकरो भस्मभावं न याति। ईषत्तिक्तः कटुरपि मनाक्चर्मगन्धानुविद्धः सम्यक् शुद्धो मद इह महीपालयोग्यो मनोज्ञः॥ ३००॥

जिस कस्तूरी का गन्ध केवड़े के पुष्प के समान हो, वर्ण पीला हो स्वाद में तिक्त या कटु हो, हल्की हो, मलने पर चिकनी हो, आग में डालने पर शीघ्र दग्ध न हो, केवल मिप-मिप करके सङ्कुचित हो जाय और अन्त में इससे चमड़े की-सी गन्ध आने लगे। वही कस्तूरी श्रेष्ठ और राजाओं के योग्य है। यही तात्पर्य 'पीतः किञ्चिल्लघुरतिशयम्' इत्यादि ग्रन्थान्तरोक्त श्लोक का भी है॥ २९९–३००॥

### कर्पूर

पक्वात्कर्पूरतः प्राहुरपक्वं गुणवत्तरम्। तत्रापि स्याद् यदस्फुटं स्फटिकाभं तदुत्तमम्॥ ३०१॥ पक्वं च सदलं स्निग्धं हरितद्युति चोत्तरम्। भङ्गे मनागपि न चेन्निपतन्ति ततः कणा॥ ३०२॥ हस्ते निघृष्य कर्पूरं रेखां हस्तस्य लक्षयेत्। यदि सा दृश्यते विद्धि कर्पूरमतिभद्रकम् ३०३

पक्व कर्पूर की अपेक्षा अपक्व कर्पूर अधिक गुणवाला होता है। अपक्व कर्पूर से भी जो चूर्णित न किया गया हो तथा स्फटिक की तरह स्वच्छ हो वह उत्तम है। पक्व कर्पूर में जो सदल ( पत्र अथवा दानेदार ) स्निग्ध और हरे रंग की प्रभावाला हो तथा तोड़ने पर यदि कण पृथक्-पृथक् होकर न गिरें तो वह उत्कृष्ट है। कर्पूर को हथेली पर घिसकर हाथ की रेखाओं को देखे, यदि उन रेखाओं में कर्पूर दीखे तो समझना चाहिए कि वह कर्पूर अत्यन्त श्रेष्ठ है॥ ३०१–३०३॥

### कुष्ठ

मृगमदाकृति कुष्ठं कीटदोषविवर्जितम्॥ ३०४॥

कुष्ठ की आकृति यदि हरिण के सींग के

समान हो तथा कीट आदि से दूषित न हो तो श्रेष्ठ है ॥ ३०४ ॥

चन्दन

श्वेतचन्दनमत्यन्तं स्निग्धं गुरु सुगन्धि च । भेदश्चन्दनं रक्तपीतसारं तदुत्तमम् । यत्पाण्डुरमसारञ्च न भद्रं प्रवदन्ति तत् ॥ ३०५ ॥

श्वेत चन्दन अति चन्दन स्निग्ध हो, भारी हो तथा सुगन्धयुक्त हो तो श्रेष्ठ है। जिस चन्दन के भीतर की लकड़ी लाल अथवा पीली हो वह चन्दन उत्तम है। जो पाण्डुवर्ण का हो तथा असार (कमजोर) हो वह चन्दन श्रेष्ठ नहीं है ॥ ३०५ ॥

अगुरु

काकतुण्डाकृतिः स्निग्धो गुरुश्चैवोत्तमोऽगुरुः । असारं पाण्डुरं रूक्षं लघु चाधममादिशेत् ॥ ३०६ ॥ नादेयं नाप्युपादेयं तित्तिरीपत्त्रकागुरु । शाल्मलीकाष्ठसङ्काशो नैव ग्राह्यः कदाचन ॥ ३०७ ॥

जो अगर आकृति में कौवे की चोंच के समान, तथा स्निग्ध और भारी हो वह उत्तम है। जो असार, पाण्डुवर्ण तथा हल्का हो उसे निकृष्ट समझो। नदी के किनारे उत्पन्न हुआ अथवा तीतर के पङ्ख के सदृश वर्णवाला और सेमर की लकड़ी सदृश रूपवाला अगर ग्रहण करने के योग्य नहीं है ॥ ३०६-३०७ ॥

कुंकुम

पाण्डुरैः केशरैर्युक्तं रक्तं कुंकुममुत्तमम् । हीनं द्विवर्णं काश्मीरं खरपाण्डुरकेशरम् ॥ ३०८ ॥

जिस केसर में पाण्डु रंग की केसर न हो तथा जिसका वर्ण लाल हो वह उत्तम है। जिसमें दो रंग हों तथा खुरदरे और पाण्डुवर्ण के केसर हों वह अधम है ॥ ३०८ ॥

खट्टास

खट्टासोऽनूपजः श्रेष्ठो वर्त्तुलो मांसलश्च यः । सम्मतो मध्यदेशीयो मध्यमो मरुजोऽधम ॥ ३०९ ॥

जलमय देश में उत्पन्न, गोल और मांसल खट्टासी (मुश्कबिलाव के अण्ड) श्रेष्ठ है, मध्य देश में उत्पन्न मध्यम और मरुस्थल में उत्पन्न अधम होता है ॥ ३०९ ॥

मुरामांसी और रेणुक

किञ्चित् पीता मुरा शस्ता मांसी पिङ्गजटाकृतिः । रेणुको मुद्गतुल्यो यो भद्रः स सम्मतः सताम् । स्थूलो मरिचसङ्काशो गन्धकर्मणि गर्हितः ॥ ३१० ॥

मुरामांसी कुछ पीले रंग की, जटामांसी (बालछड़) पिङ्गल वर्ण की जटा के सदृश तथा रेणुका मूँग के समान हो तो श्रेष्ठ है। कालीमिर्च के समान तथा मोटी रेणुका गन्धकर्म (तैलादि सुगन्धित करने के लिये) में निन्दित है ॥ ३१० ॥

मुस्तक

आनूपदेशसम्भूतो मुस्तः स्यादतिशोभनः । मिश्रिते मध्यमः प्रोक्तो जाङ्गलस्त्वधमो मतः ॥ ३११ ॥

अनूप देशोत्पन्न मोथा उत्तम, मिश्रित देश (अनूप तथा जाङ्गलमिश्रित) का मध्यम और जाङ्गल देश का अधम होता है ॥ ३११ ॥

जातीफल

जातीफलं सशब्दञ्च स्निग्धं गुरु च शस्यते । लघुकं शब्दहीनञ्च रूक्षाङ्गमतिनिन्दितम् ॥ ३१२ ॥

शब्दयुक्त, स्निग्ध तथा गुरु जायफल श्रेष्ठ है। लघु, शब्दहीन तथा रूक्ष जायफल अति निन्दित है ॥ ३१२ ॥

एला

एला कक्कोलनीजाभा सा ग्राह्या

कोद्रवाकृतिः । या कक्कोलसमाकारा कर्पूररेणुसंयुता । सरला सा त्रुटिः श्रेष्ठा विपरीता तु नेष्यते ॥ ३१३ ॥

जो इलायची कंकोल के बीज तथा कोदों के आकारवाली हो वह श्रेष्ठ है। जो इलायची कंकोल के समान दानेवाली, कर्पूर के सदृश रेणुयुक्त और सरल हो वह छोटी इलायची श्रेष्ठ है। इससे विपरीत आकारवाली अग्राह्य है ॥ ३१३ ॥

प्रियङ्गु

या किञ्चित्पाण्डुरा श्यामा कीटदोषविवर्जिता । सा प्रियंगुर्मता भद्रा विपरीता तु निन्दिता ॥ ३१४ ॥

जो श्यामवर्ण तथा किञ्चित् पाण्डुवर्ण की हो, कीड़ों से न खाई गई हो वह प्रियङ्गु श्रेष्ठ है तथा इससे विपरीत लक्षणवाली निन्दित है ॥ ३१४ ॥

नखी

नखी पञ्चविधा ज्ञेया गन्धार्थं गन्धतत्परैः । काचिदुदुम्बरपत्राभा तथोत्पलदलाकृता ॥ ३१५ ॥ काचिदश्वखुराकारा गजकर्णसमा परा । वराहकर्णसङ्काशा गन्धकर्मणि गर्हिता ॥ ३१६ ॥

गन्धकर्म के लिये नखी पाँच प्रकार की है। गूलर के पत्र के सदृश, कमल के पत्र के सदृश, घोड़े के खुर के सदृश और हाथी के कान के सदृश होती है तथा शूकर के कान के सदृश आकारवाली नखी गन्धकर्म में निन्दित है ॥ ३१५-३१६ ॥

ग्रन्थिक

ग्रन्थिकः पाण्डुरः किञ्चित् कनिष्ठः सर्वसम्मतः । उत्तमः कृष्णवर्णो यः स्थूलोऽतीव च निन्दितः ॥ ३१७ ॥

किञ्चित् पाण्डुवर्णयुक्त तथा पतला ग्रन्थिक उत्तम है। काले रंगवाला और मोटा निन्दित है ॥ ३१७ ॥

उशीर

दीर्घमूलं दृढं सूक्ष्ममुत्तमं गन्धसंयुतम् । देशे साधारणे जातं लामज्जं भद्रकं भवेत् ॥ ३१८ ॥

लम्बे मूलवाला, दृढ, पतला, उत्तम गन्धवाला और साधारण देश ( न जांगल न आनूप ) में उत्पन्न खस उत्तम है ॥ ३१८ ॥

नलिका

मध्ये सारविहीना या सरसा कीटवर्जिता । नलिका सा भवेद्भद्रा विपरीता तु निन्दिता ॥ ३१९ ॥

मध्य में खोखली, सरस तथा कीड़ों से न खाई गई नलिका प्रशस्त है। इससे विपरीत लक्षणवाली निन्दित है ॥ ३१९ ॥

शिलारस

निर्मलः कपिलः स्वच्छः सिह्लकोऽसितरो नवः । मधुवाभो मलयुक्तश्च वर्जितो गन्धकर्मणि ॥ ३२० ॥

मल-रहित, कपिल वर्णवाला और नवीन शिलारस उत्तम है। मलयुक्त और शहद के सदृश वर्णवाला शिलारस गन्धकर्म में वर्जित है ॥ ३२० ॥

श्रीवास और लाक्षा

श्रीवासो भद्रकः प्रोक्तो मलकाष्ठविवर्जितः । लाक्षा च नूतना ग्राह्या मृत्तिकादिविवर्जिता ॥ ३२१ ॥

मल और काष्ठ से रहित गन्धाबिरोजा उत्तम है। इसी प्रकार मिट्टी तथा लकड़ी से रहित नवीन लाक्षा उत्तम है ॥ ३२१ ॥

पद्मक और त्वक्पत्र

पद्मकं सरलं भद्रं कीटदोषविवर्जितम् । जलदोषविहीनश्च त्वक्पत्रश्च तथैव च ॥ ३२२ ॥

कीड़े से न खाये हुए पत्राज श्रेष्ठ हैं। सरस काष्ठ श्रेष्ठ है। जलदोषरहित दालचीनी और तेजपात श्रेष्ठ है ॥ ३२२ ॥

वालक

सूक्ष्ममूलो वरः केशोऽनूतनः सरसस्तथा। नूतनः स्थूलमूलश्च वर्जनीयः प्रयत्नतः॥ ३२३ ॥

पतली जड़वाली, पुरानी तथा सरस सुगन्ध वाला श्रेष्ठ है। नवीन और मोटी जड़वाली निन्दित है ॥ ३२३ ॥

कङ्कोल

कङ्कोलकं शुभं विद्धि वेष्टितं सूक्ष्मया त्वचा। स्निग्धं गुरुकमत्यन्तमन्यथातीव निन्दितम् ॥ ३२४ ॥

पतली त्वचा से वेष्टित, स्निग्ध तथा गुरु (भारी) शीतलचीनी को उत्तम और विपरीत लक्षणवाली को निकृष्ट समझना चाहिए ॥ ३२४ ॥

वच

अत्युग्रापि सरागापि ग्रन्थिला चापि सम्मिता। अन्तःशुचित्वमात्रेण वचा ग्राह्यत्वमृच्छति ॥ ३२५ ॥

उग्र, कुछ लालवर्ण तथा अत्यन्त गांठवाली वच उत्तम है। परन्तु इन लक्षणों के होते हुए भी यदि इसका भीतरी भाग शुभ्र वर्ण का हो तो वह वच कर्म में निन्दित है ॥ ३२५ ॥

हिमुस्त और चोरपुष्पी

हिमुस्तं नूतनं पुष्टं गन्धाढ्यं परमं विदुः। चोरपुष्पीं नवां श्यामामामनन्ति मनीषिणः ॥ ३२६ ॥

नवीन, पुष्ट तथा उत्तम गन्धवाले मोथा और नागरमोथा श्रेष्ठ कहे जाते हैं। चोरहुली नवीन और श्यामवर्ण की उत्तम होती है ॥ ३२६ ॥

चम्पककलिका और नागकेसर

ग्राह्या मतोप्य सम्यक् चम्पककलिका प्रदीपकलिकेव। कीटादिकेन रहितमभिनवमिह केशरं ग्राह्यम् ॥ ३२७ ॥

दीपक की शिखा के समान आकृतिवाली चम्पक की कली को सुखाकर ग्रहण करना चाहिए। तथा कीटादि से रहित नागकेसर ग्रहण करनी चाहिये ॥ ३२७ ॥

मांसी और देवदारु

ससूक्ष्मकेशरा स्निग्धा मांसी पिङ्गजटाकृतिः। सुगन्धि लघु रूक्षञ्च सुरदारु प्रकीर्तितम् ॥ ३२८ ॥

पतले केसरवाली, चिकनी, पिङ्गल वर्ण की जटा के समान आकारवाली[1] जटामासी ग्रहण करनी चाहिए। इसी प्रकार सुगन्धित, लघु और रूक्ष देवदारु ग्रहण करना चाहिए ॥ ३२८ ॥

रक्तचन्दन।

आकृष्णमुत्तमं नूनं रक्तश्वेतञ्च मध्यमम्। आरक्तमधमं विद्धि रक्तचन्दनकं त्रिधा ॥ ३२९ ॥

रक्तचन्दन तीन प्रकार का है—जिसमें कुछ कृष्णवर्णवाले को सर्वोत्तम, लालरंगवाले को मध्यम और थोड़े रक्तवर्णवाले को अधम जानना चाहिए ॥ ३२९ ॥

टिप्पणी—किन्तु इसमें सुगन्ध होना आवश्यक है सुगन्धहीन ग्राह्य नहीं है।

हरिद्रा।

हरिद्रा शस्यते स्थूला छेदे या कुङ्कुमच्छविः।

जो हल्दी स्थूल हो तथा तोड़ने पर भीतर से केसर के रंग की हो वह श्रेष्ठ है।

अधिवासनपुष्प।

केतकी यूथिका जाती चम्पकश्चाति-

मुद्गकः। कदम्बो मल्लिका नागपुष्पश्च कुटजं तथा ॥ ३३० ॥ पाटलावरुणौ सैरीपुष्पैरेभिः समाचरेत् ॥ वासनं कुसुमैरन्यैस्तथान्यैरतिशोभनैः ॥ ३३१ ॥

केवड़ा, जूही, जाती, चमेली, माधवी, कदम्ब, मल्लिका, नागकेसर, कुड़ा के पुष्प, पाटल के फूल, वरना, प्यास तथा अन्यान्य अति सुगन्धित पुष्पों से अधिवासन करना चाहिए ॥ ३३०-३३१ ॥

कालानमक, सैन्धवनमक, मैनशिल और स्वर्णमाक्षिक।

सौवर्चलं तु केशाभं सैन्धवं स्फटिकप्रभम्। जवाकुसुमसङ्काशा मनोह्वा चोत्तमा मता। सुवर्णवच्च विज्ञेयं स्वर्णमाक्षिकमुत्तमम् ॥ ३३२ ॥

बालों के समान काला सौंचलनमक, स्फटिक के सदृश स्वच्छ सेंधानमक, गुड़हल के फूल के सदृश लालरंग की मैनशिल तथा सोने के सदृश चमकवाला स्वर्णमाक्षिक उत्तम होता है ॥ ३३२ ॥

शिलाजतु।

श्रेष्ठं शिलाजतु ज्ञेयं यत्तु क्षिप्तं न शीर्यते। तोयपूर्णे यदा पात्रे मतान्येव विरुध्यते ॥ ३३३ ॥ माद्रक्यं कीर्तितं येषां विरुद्धत्वं न कीर्तितम्। तेषां तद्विपरीतत्वाद् विरुद्धत्वञ्च लक्षयेत् ॥ एतेषामपरेषां च नवता प्रवरो गुणः ॥ ३३४ ॥

जलपूर्ण पात्र में शिलाजीत को डालने से यदि वह छिन्न-भिन्न न हो, किन्तु तन्तु छोड़े, तो वह शिलाजीत उत्तम है तथा इससे विपरीत लक्षणवाला खराब है ॥ ३३३ ॥

जहाँ-जहाँ माहात्म्य बताया गया है और खराबी नहीं बताया गया है, उन्हें उन गुणों से विपरीत होने पर खराब समझना चाहिए। इन सब द्रव्यों में और अन्य द्रव्यों में नवीनता एक प्रधान गुण है ॥ ३३४ ॥

महासुगन्धितैल और लक्ष्मीविलासतैल।

जिङ्गीचोरकदेवदारुसरलव्याघ्रीनचाचेलकस्पृक्पर्णैः सह गन्धपत्रकशटीपथ्याधात्रीघनैः। एतैः शोधितसंस्कृतैः पलयुगैस्याख्यातया संख्यया तैलप्रस्थमवस्थितैः स्थिरमतिः कल्कैः पचेद्गन्धकैः ॥ ३३५ ॥ मांसीमुराटगलचम्पकसुन्दरीत्वग्ग्रन्थाम्बुरुङ्मरुवकैर्द्विपलैःसपृक्कैः। श्रीवासकुन्दुरुनखीनलिकामिषीणां प्रत्येकतः पलयुगाद्य पुनः पचेत्तु ॥ ३३६ ॥ एलालवङ्गचलचन्दनजातिपूतिकक्कोलका - गुरुलताद्युस्रपर्णैः पलार्द्धैः। कस्तूरिकाघसहितामलदीप्तियुक्तैः पक्तवा च मन्दशिखिनैव महासुगन्धम् ॥ ३३७ ॥ पञ्चद्विकेन चार्द्धेन मदात्कर्पूरमिष्यते। मधुक्तौ शुद्धिसंस्कारौ गन्धानामिहतैःपुनः। कर्पूरमदयोरर्द्धं पत्रकल्कादिहेष्यते ॥ ३३८ ॥ द्विगुणैर्लक्ष्मीविलासः स्यादयं तु तैलसत्तमः। पञ्चपत्राम्बुना चाद्यो द्वितीयो गन्धवारिणा ॥ ३३९ ॥ तृतीयोऽपि च तेनैव पाको वा धूपिताम्बुना। तैलयुग्मभिदं मृगं विकारान् वातसम्भवान्। तर्पयेञ्जनयेत्पुष्टिं कान्तिं मेधां धृतिं धियम् ॥ ३४० ॥

पञ्चद्विकेनेतिपञ्चश त्रिभक्तस्य कस्तूरी-

1—पत्रपूतेऽम्बुपूर्णाय एरनावर् वेदगार्थितम्।
हीरपते गन्धपूजायं पत्रककं मधुरपके ॥

तेल सिद्ध हो जाने पर छानने के बाद गरम गरम में ही सुगन्ध बढ़ाने के लिये पत्ती तरह से पिसा विधित् तैल मिला जो कल्क डाला जाता है उसे पत्रकल्क कहते हैं।

कस्यैको भागो रक्तिद्वयाधिकत्रिमापको भवति तथा मानेन कर्पूरस्य द्वौ भागौ किंवा अर्द्धेन कस्तूरीकर्पात्कर्पूरस्याष्टौ मापकाः।

मजीठ चोरपुष्पी ( चोरक ), देवदार, चीड़, ध्यामी ( छोटी कटेरी, गन्धद्रव्य विशेष ) वच, चोलक ( सुपारी के वृक्ष की छाल ) दालचीनी, तेजपात, गन्धतृण, कचूर, हरीतकी, बहेड़ा, आँवला और नागरमोथा प्रत्येक आठ २ तोला, इन गन्धद्रव्यों के कल्क द्वारा प्रथम १२८ तोला तिलतैल को पकावे। तदनन्तर जटामांसी, मुरामांसी, दौना, चम्पक-पुष्प, प्रियङ्गु, दालचीनी, गठिवन, सुगन्धवाला, कूठ, मरुआ के पुष्प और पिण्डीशाक आठ २ तोले। गन्धाबिरोजा, कुंदुरू, नखी, नलिका ( पवारी ) और सौंफ चार २ तोले, इन कुल द्रव्यों के कल्क द्वारा द्वितीय पाक करे। इलायची, लौंग, शिलारस, श्वेत चन्दन, जायफल या चमेली के फूल, खट्टाशी ( मुश्कबिलाई-अण्ड ) शीतलचीनी, अगर, लताकस्तूरी और केसर दो-दो तोला, कस्तूरी १ तोला, कर्पूर ६ माशा एकत्र कर, इन कुल द्रव्यों के कल्क के साथ मन्द-मन्द अग्नि से तृतीय पाक करना चाहिए। पूर्वोक्त तैल के समान इस तैल में कहे गये गन्धद्रव्यों का शोधन और संस्कार कर लेना चाहिए। नियमानुसार प्रतिबार कल्कपाक के लिये चौगुना जल डाला जाता है। कस्तूरी और कपूर मिले हुए तृतीयकल्क से आधे लिये जाते हैं। यह ध्यान रहे कि प्रथम कल्कपाक बिल्वादि पञ्चपल्लव के क्वाथ द्वारा करना चाहिए। गन्धाम्बु द्वारा द्वितीय कल्कपाक करे। अगर से धूपित किये हुए गन्धाम्बु द्वारा तृतीय कल्क-पाक करे। इस तैल का नाम महासुगन्धि तैल है। यह तैल सब प्रकार के वातरोगों को नष्ट कर शरीर को पुष्ट करता है। कान्ति, मेधा, धैर्य और बुद्धि को बढ़ाता है।

पूर्वोक्त समस्त कल्कों को द्विगुणित परिमाण में डालकर जो तैल सिद्ध किया जाता है उस को लक्ष्मीविलास तैल कहते हैं महासुगन्धि तैल के जो गुण हैं वे ही गुण अधिक रूप में इस तैल के हैं ॥ ३१२–३४० ॥

पञ्चपल्लव।

शोधनञ्चापि संस्कारो विशेषश्चात्र कथ्यते।
आम्रजम्बुकपित्थानां बीजपूरकबिल्वयोः॥
गन्धकर्माणि सर्वत्र पत्राणि पञ्चपल्लवम् ३४१

अब यहाँ पर तैल में कहे हुए गन्धद्रव्यों का शोधन और संस्कार कहा जायगा। आम, जामुन, कैथ, बिजौरा, बेल, इन पाँचों पत्तों को पञ्चपल्लव कहते हैं। गन्धकर्म में सर्वत्र पञ्चपल्लव शब्द से इन्हीं का ग्रहण करना चाहिए ॥३४१॥

नखीशुद्धि।

चण्डीगोमयतोयेन यद्वि वा तिन्तिडी-दलैः। नखं संक्वाथयेदेभिरलाभे मृण्मयेन तु ॥ ३४२ ॥ पुनरुद्धृत्य प्रक्षाल्य भर्जयित्वा निषेचयेत्। गुडाभयाम्बुना ह्येवं शुद्ध्यते नात्र संशयः ॥ ३४३ ॥

चण्डीगोमयेत्यादि—हयखुरोत्पलपत्र-करिकर्णनखीत्रयं ग्राह्यं तत्रोत्तमा सदना मांसला स्निग्धा। महिषीगोमयजले तत्स्वेदनीया। महिषीगोमयजलाभावे तिन्तिडीजलेन वा। ततो मृण्मये पात्रे वालुकायां भर्जयित्वा गुडहरीतकीजलेन सेचनीयम्, ततो रौद्रे शोषयित्वा सित-चन्दनागुरुकल्केन कुंकुमतोलकद्वय-मितेन कुष्ठामलकीदेवदारूणां प्रत्येकं द्विपलपरिमितेन कल्केन यत्नेन पुनः पुनर्मर्दयेत्। ततो गन्धोदकेन प्रक्षाल्य पुनः पुनरातपे शोषयेत्। ततो मल्लिका-मालत्यादिकुसुमैरामृण्मयपात्रे अधः ऊर्ध्वं पुष्पं दत्त्वा संस्थाप्य पुनरुद्धृत्य ग्राह्य तिसृणां प्रत्येकम्। इति नखीशुद्धिः। एवम् प्रकारेणैव समुद्राकर्कटस्य शुद्धस्य त्रिपलम्।

नखी पाँच प्रकार की है। उनमें से १—घोड़े के खुर के समान, २—कमल के पत्ते के समान, ३—हाथी के कान के समान, यह तीनों ग्रहण करने के योग्य हैं। इनमें भी जो मोटी तथा चिकनी है वह बहुत श्रेष्ठ है। इन्हें प्रथम भैंस के गोबर के रस में अथवा इमली के जल में स्वेदन करना चाहिए, पश्चात् एक मिट्टी के पात्र में बालू में भूनकर गुड़ मिलाकर हरड़ के क्वाथ में सेचन करना चाहिए। इसके बाद धूप में सुखाकर सफेद चन्दन, अगर तथा केसर २ तोला एवं कूट, आँवला, देवदारु, हरएक ८ तोला, इनके कल्क से नखी को बारबार मले। इसके बाद गन्धोदक से धोकर धूप में सुखा ले और एक मिट्टी के बर्तन में ऊपर नीचे मल्लिका तथा मालती आदि के सुगन्धित फूल रखकर बीच में इसे रख दें, पश्चात् इसे निकाल तीनों को अलग-अलग ऊपर कहे हुए तैल के लिये ग्रहण करें। इसी प्रकार समुद्रफल (मुनष्टी केकड़ी) का भी शोधन कर १२ तोला लेना चाहिए ॥ ३४२-३४३ ॥

## हरिद्रावचाशुद्धि।

गोमूत्रे चाम्लयूषके पक्त्वा पञ्चदलोदके।
पुनः सुरभितोयेन बाष्पस्वेदेन स्वेदयेत् ॥
गन्धोग्रा शुद्ध्यते शीघ्रं रजनी च विशेषतः ॥

गोमूत्र इत्यादि—पर्वरहिता। ग्रन्थिमधुरतरा या वचा ग्राह्या। जर्जरीकृत्य गोमूत्रे मुण्डरीसहितजले च पक्त्वा पुनरुद्धृत्य पञ्चपल्लवजलेन पचेत्। उद्धृत्य संशोध्य गन्धोदकेन प्रक्षाल्य शोषयित्वा तदनु गन्धोदकहण्डिकायां वचां प्रक्षिप्य पिधाय अधो ज्वाला दातव्या। इति बाष्पस्वेदः। ततश्च गोमूत्रे क्षणमेकं प्रक्षिप्य शोभाञ्जनवल्कलक्वाथेन प्रक्षाल्य गन्धोदकेन क्षालयेत्। ततो मल्लिकामल्लिकादिकुसुमैरधिवासयेत्। ततः संचूर्ण्य सर्जरसकुन्दुरुनखिकादि-भिर्धूपयित्वा ग्राह्या। इति वचाशुद्धिः। एवं हरिद्राया अपि। अस्या विशेषशुद्धिः मातुलुङ्गरसकाञ्जिकाभ्यां टङ्कणक्षारतोलकेन उत्स्वेदनीया यावद्रसम् तदनु शोषणीयं ततो निर्मलतिलतैलचतुःपलानि गन्धोदकेन मृद्वग्निना दिनत्रयं उत्स्वेदयेत्। हरिद्रां धूपयित्वा धूपितभाण्डे दिनत्रयं स्थापयेत् एवं कुङ्कुमवर्णा भवेत् हरिद्रा।

जिसमें पर्व न हों और गांठें बहुत-सी हों ऐसी वच का ग्रहण करना चाहिए। वच को कूटकर गोमूत्र में तथा गोरखमुण्डीयुक्त जल में पकाकर पुनः इसका पञ्चपल्लव के क्वाथ से पाक करें और सुखाकर गन्धोदक से धोकर सुखा लें। इसके बाद एक हाँडी में गन्धोदक डाल दूसरी सछिद्र हाँडी में वच को डाल दें और हाँडी के मुख पर रख नीचे से अग्नि दें। इसके बाद वच गोमूत्र में रख सहिजने की छाल के क्वाथ से धोकर गन्धोदक से धोवें और मल्लिका तथा मल्लिका आदि फूलों से सुगन्धित करें। अन्त में वच का चूर्ण कर राल, कुन्दरू तथा नखी आदि के धूप से धूपित करके ग्रहण करें। इसी प्रकार हल्दी को शुद्ध करें। हल्दी की विशेष शुद्धि—१ तोले सुहागे को बिजौरे के रस तथा काञ्जिक में मिलावें और इसके द्वारा हल्दी का उत्स्वेदन करें और सुखा लें। इसके बाद १६ तोला शुद्ध तिल के तैल को गन्धोदक से मिलाकर तीन दिन तक हल्दी का स्वेदन कर, तदनन्तर हल्दी को धूपित कर तीन दिन तक धूपित पात्र में रक्खें। इस प्रकार हल्दी केसरिया रंग की हो जाती है ॥ ३४४ ॥

## मुस्तकशुद्धि।

मुस्ताकन्दमनाकुलं काञ्जिके विनिक्षिप्तम्। पञ्चपल्लवतोयेन स्विन्नमातपशोषितम् ॥ ३४५ ॥ गुडाम्बुना सिच्यमानं

भर्जयेच्चूर्णयेत्ततः। आजशोभाञ्जनजलैर्भावयेच्चेति शुद्ध्यति ॥ ३४६ ॥

मुस्तकमित्यादि—मनाक् खण्डखण्डं कृत्वा काञ्जिके दिनत्रयं संस्थाप्य, प्रक्षाल्य पञ्चपल्लवतोयेन स्वेदयेत्। अथातपे संशोष्य खोलके भृष्ट्वा चूर्णयेत्। ततश्छागमूत्रशोभाञ्जनजलेन भावयेत्। तदनु चम्पकादिकुसुमैरधिवासयेत्। ततः पश्चाद् धूपयित्वा संचूर्ण्य त्रिपलं ग्राह्यमिति मुस्तकशुद्धिः।

मोथे के छोटे-छोटे टुकड़े कर काँजी में तीन दिन रखकर पानी से धो लें और पञ्चपल्लव क्वाथ से स्वेदन करें। स्वेदन के अनन्तर गुड़ मिले हुए जल से सेचन कर धूप में सुखाकर भाड़ में भूनकर चूर्णित कर लें। तदनन्तर बकरी के मूत्र एवं सहिजन के क्वाथ से भावना दें और अन्त में चमेली आदि फूलों से इसे सुगन्धित कर धूपित करें, इसके बाद चूर्ण कर १२ तोला की मात्रा में लें ॥ ३४५-३४६ ॥

शैलजशुद्धि।

काञ्जिके क्वथितं शैलं भृष्टा पश्चा गुडाम्बुना। सिञ्चेदेवं ततः पुष्पैर्विविधैरधिवासयेत् ॥ ३४७ ॥

शैलजं काञ्जिके पचेत्। ततः प्रक्षाल्य पञ्चपल्लवजलेन वाष्पस्वेदनमित्युपदेशः। भृङ्गहरीतकीजलेनाभिषिच्य सुगन्धिपुष्पैरधिवासयेत्।

अथवा—काञ्जिके क्वथितं शैलं छागमूत्रेण भावितम्। शिग्रुतोयेन क्षौद्रेण मर्दितं धूपयेत्ततः। धूपितं लगुसर्जाभ्यां वासितं कुसुमैर्नरैः ॥ ३४८ ॥

शैलजं काञ्जिके निक्षिप्य पचेत् तदनु प्रक्षाल्य छागमूत्रेण भावयेत्। ततः शोभाञ्जनक्वाथे। ततो मधुना मर्दयेत्। ततोऽगुरुधूमकाभ्यां धूपयित्वा कुसुमैरधिवासयेत् ॥ इति शैलजशुद्धिः।

शैलज (भूरछरीला) को काँजी में पकाकर जल से धोवें और पञ्चपल्लव क्वाथ से वाष्प स्वेदन करें। इसके बाद गुड़ और भुनी हरड़ के जल से सेचन कर सुगन्धित फूलों द्वारा इसे सुगन्धित करें। अथवा—पहिले काँजी में शैलज को अच्छी प्रकार उबालें, पश्चात् धोकर बकरी के दूध से भावना दें। भावना देने के बाद क्रमशः सहिजने के क्वाथ से तथा शहद से घोटें। तदनन्तर अगर तथा राल से धूपन कर इसे फूलों द्वारा सुगन्धित करें ॥ ३४७-३४८ ॥

खट्टाशी शुद्धि।

यथालाभमपामार्गस्नुह्यादिक्षारलेपितम्। वाष्पस्वेदेन संस्वेद्य पूर्ति निर्लोमतां नयेत् ॥ ३४९ ॥ दोलापाकं पचेत्पश्चात् पञ्चपल्लववारिणि। खलः सम्यु मिश्रोत्पीड्य ततोनिःस्नेहतां नयेत् ॥ ३५० ॥ आजशोभाञ्जनजलैर्भावयेच्च पुनः पुनः। शिग्रुमूले च केतक्याः पुष्पपत्रपुटे च तम्। पचेदेवं विशुद्धिश्च मृगनाभिसमो भवेत् ॥ ३५१ ॥

यथालाभमित्यादि—अपामार्गाम्लिकास्नुहीक्षारैः खट्टाशी लिप्त्वा सजलस्थाल्यभ्यन्तरे (काष्ठाम्बुपरिपिण्डिक) पक्त्वा निर्लोमतां नयेत्। तदनु वस्त्रेण पट्टोलं बद्ध्वा पञ्चपल्लवतोयेन दोलायन्त्रे पचेत्। ततो गाढं निष्पीड्य निःस्नेहतां नयेत्। ततश्छागमूत्रेण शोभाञ्जनक्वाथेन बहुधा भावयेत्। इति खट्टाशीशुद्धिः।

अपामार्ग, पाठा तथा थूहर के क्षार से खट्टाशी पर लेप करके एक हँडिया में जल भर कर वाष्पस्वेदन कर खट्टाशी के बालों को उतार लें। पश्चात् इसे कपड़े की पोटली में बाँध

कर पञ्चपल्लवक्वाथ से दोलायंत्र में पकावे। पकाकर इसे अच्छी प्रकार निचोड़कर चिकनाई दूर कर ले। अन्त में बकरी के मूत्र तथा सहिंजने के क्वाथ से सात बार भावना दें। इसके बाद सहिंजने की जड़ तथा केवड़े के फूलों का पाक करना चाहिए। इस प्रकार यह कस्तूरी के समान हो जाती है॥ ३४६-३५१॥

शिलारस, कुंकुम, अगर, ग्रन्थिपर्ण और मधुरी की शुद्धि।

तुरुष्कं मधुना भाव्यं काश्मीरञ्चापि सर्पिषा। रुधिरेणागुरुं भाव्यं गोमूत्रैर्ग्रन्थिपर्णकम्॥ मधूदकेन मधुरीं पत्रकं तण्डुलाम्बुना॥ ३५२॥

तुरुष्कमित्यादि—सिल्हकं प्रक्षाल्य मधुना वारत्रयं भावयेत्। ततो गन्धोदकेन प्रक्षालयेत्। ततः शोधितधूपेन धूपयेत्। चम्पकादिकुसुमैरधिवासयेत्—इति शिलारसशोधनम्।

कुंकुमं गन्धोदकेन प्रक्षाल्य संशोष्य दुग्धघृतभाण्डे कृत्वा तत्र कुंकुमं प्रक्षाल्य वस्त्रेण भाण्डमुखं रुद्ध्वा वाष्पस्वेदेन स्वेदयित्वा गन्धाम्बुना प्रक्षाल्य पूर्वोक्तकुसुमैरधिवासयेत्॥ इतिकुंकुमशुद्धिः।

अगुरुं गन्धोदकेन प्रक्षाल्यातपे शोषणीयम्। ततो विशुद्धकुंकुमजलेनाप्लाव्य शोषणीयम्। ततो गन्धोदकेन वारत्रयं प्रक्षाल्य संशोष्य विपक्वं ग्राह्यम्। इत्यगुरुशोधनम्।

ग्रन्थिपर्णं गोमूत्रे विपाच्य प्रक्षालयेत्। पुनर्गन्धोदकेन प्रक्षाल्य संशोष्य कुसुमैरधिवासयेत्। इति ग्रन्थिपर्णशुद्धिः।

मधुरीं मधुमिश्रितजलेन प्रक्षाल्य पुनर्मधूदकेन वारत्रयं भावयेत्। पुनः संशोष्य पुष्पैरधिवासयेत्। तण्डुलाम्बुना मधुरीवत्तेजपत्रशोधनम्।

शिलारस को धोकर शहद से तीन बार भावना दें। इसके बाद गन्धोदक से धोकर धूपित और चमेली आदि के फूलों से सुगन्धित करें।

केसर को गन्धोदक से धोकर सुखा लें और दूध तथा घृतयुक्त पात्र में इसे रख वहाँ धोवे और वस्त्र द्वारा पात्र के मुख को बन्द कर भाप से स्वेदन करें, पश्चात् गन्धोदक से धोकर चमेली आदि के फूलों से सुगन्धित करें।

अगर को गन्धोदक से धोकर धूप में सुखावें। तत्पश्चात् शुद्ध केसर के जल में डुबो करके पुनः सुखावें और गन्धोदक से तीन बार धोकर पहले की तरह सुखा लें। यह अगर-शोधन-विधि है।

गठिवन को गोमूत्र में पकाकर गन्धोदक से धोवें और धूप में सुखावें। चमेली आदि फूलों से इसे सुगन्धित करें। यह गठिवन-शोधनविधि है।

सौंफ को शहदयुक्त जल से धोकर पुनः शहदयुक्त जल से तीन बार भावना दें और सुखाकर फूलों द्वारा सुगन्धित करें। इसी प्रकार तेजपत्र को तण्डुलोदक से शुद्ध करना चाहिए॥ ३५२॥

कुष्ठशुद्धि।

कुष्ठं पञ्चदलस्विन्नं मूर्वाकुन्दुरुधूपितम्। वासितं कुसुमैरेभिः शुद्धिमाप्नोति निर्मलाम्॥ ३५३॥

पञ्चपल्लवक्वाथेन कुष्ठं पक्त्वा परिशोष्य मूर्वाकुन्दुरुभ्यां सन्धूप्य जात्यादिकुसुमैरधिवासयेत्। इति कुष्ठशोधनम्।

पञ्चपल्लव क्वाथ से कूठ का स्वेदन कर सुखा लें और मूर्वा की जड़ तथा कुन्दरू के धूप से धूपित कर चमेली आदि के फूलों से सुगन्धित करना चाहिए॥ ३५३॥

गन्धतृणशोधन।

ध्यामकं चूर्णितं शुद्धिं शर्कराजलसंप्लुतम्। घृतगुग्गुलधूपेन याति चन्दनवासितम् ॥ ३५४ ॥

गन्धतृणं चूर्णयित्वा शर्करामिश्रितजलेन प्रक्षाल्य परिशोष्य श्रीखण्डचन्दनपङ्केन मर्दयेत्। इति गन्धतृणशोधनम्।

गन्धतृण का चूर्ण कर शर्करोदक ( शरबत ) से धोकर सुखावें और सफेद चन्दन को जल में घिस उससे मलना चाहिए ॥ ३५४ ॥

कुन्दुरुशुद्धि।

कुन्दुरुश्चूर्णितोऽत्यर्थं कुंकुमेन च मर्दितः। धूपितो गुडसर्जाभ्यां वासितः शुद्ध्यतेतराम् ॥ ३५५ ॥

कुन्दुरुं गन्धोदकेन प्रक्षाल्य शोषयित्वा कुंकुमपङ्केन मिश्रयित्वा गाढं मर्दयेत्। अथ गुडसर्जाभ्यां धूपयित्वा सुगन्धिकुसुमैरधिवासयेत्। इति कुन्दुरुशोधनम्।

कुन्दरू को गन्धोदक से धोकर सुखावें, पश्चात् केसर को जल में पीसकर उसके साथ इसे मिलाकर अच्छी तरह घोटें। तदनन्तर गुड़ तथा राल से धूपित और फूलों से सुगन्धित करें ॥ ३५५ ॥

रेणुकाशोधन।

रेणुको भावितस्त्वादौ मधुना शर्कभावितः। आतपे शोषयित्वैवं पुष्पैरप्यधिवासयेत् ॥ ३५६ ॥

रेणुकं गन्धोदकेन प्रक्षाल्य मधूदकेन पुनर्भाव्यम्। आतपे संशोष्य गन्धकुसुमैरधिवासयेत्। इति रेणुकशोधनम्।

सम्भालू के बीजों को पहिले गन्धोदक से धोकर शहद तथा खांड से क्रमशः भावना देनी चाहिये। भावना के बाद फूलों से सुगन्धित करें इस प्रकार रेणुका शुद्ध हो जाती है ॥ ३५६ ॥

चोरपुष्पीशोधन।

क्षौद्रेण भावितं चोरपुष्पमातपशोषितम्। धूपितं गुडसर्जाभ्यां वासितं शुध्यते ध्रुवम् ॥ ३५७ ॥

चोरपुष्पं मधुना संभाव्यातपे शोषयित्वा गुडधूनकाभ्यां धूपयित्वा सुगन्धिकुसुमैरधिवासयेत्। इति चोरपुष्पीशोधनम्।

चोरहुली को शहद से भावना देकर धूप में सुखा गुड़ तथा राल से धूपित और फूलों से सुगन्धित करें। ३५७ ॥

नवनीतखोटि शोधन।

नवनीतखोटिं गन्धोदकेन प्रक्षाल्य संशोष्य शर्करोदकेनपुनर्भाव्यम्। प्रक्षाल्य संशोष्य सञ्चूर्ण्य घृतगुग्गुलधूपेन धूपयित्वा जात्यादिकुसुमचन्दनाभ्यां वासयेत्।

नवनीतखोटि ( गन्धाविरोजा ) को गन्धोदक से धो सुखाकर शरबत से भावना दें और पुनः गन्धोदक से धोकर सुखा लें। पश्चात् इसे चूर्णित कर घी तथा गूगल के धूप से धूपित और चमेली आदि के फूल तथा चन्दन से सुगन्धित करें।

सामान्यशोधन।

सर्वेषामेव सुगन्धिद्रव्याणां गन्धवारिणा प्रक्षाल्यातपे संशोष्य भर्जनं सेचनं गुडोदकेन।

सामान्यतः सब सुगन्धित द्रव्यों को गन्धोदक से धोकर धूप में सुखाना चाहिए। तत्पश्चात् किञ्चित् भूनकर गुडोदक ( गुड़ के शरबत ) से द्रव्य को सिञ्चित करें।

शोधितं शोधितं द्रव्यं न कुर्यादेकपात्रतः। यस्माद्धि काकसंसर्गात् कृष्णो भवति कोकिलः ॥ ३५८ ॥

शुद्ध किये हुए अलग-अलग द्रव्यों को इकट्ठा कर एक पात्र में न रक्खें, क्योंकि कौए के संग में कोयल भी काली हो जाती है, अर्थात् हीन द्रव्यों के संग से उत्तम द्रव्य भी दुर्गुणयुक्त हो जाते हैं ॥ ३५८ ॥

### नकुलाद्यघृत।

नकुलस्य च मांसस्य पचेत् प्रस्थं जलाढके। तत्समं दशमूलञ्च पक्वं माषबलान्वितम् ॥ ३५९ ॥ घृतप्रस्थं पचेत्तत्र चतुर्भागावशेषिते । शतावरीरसप्रस्थं गव्यदुग्धञ्च तत्समम् ॥ ३६० ॥ अष्टौ वर्गाश्च काकोल्यौ जीवन्ती मधुयष्टिका। एलात्वचञ्च पत्रञ्च त्रिकटु त्रिफला तथा ॥ ३६१ ॥ मुस्तकं नागजिह्वा च कर्षं कर्षं प्रदापयेत् । सर्ववातविकारेषु अपस्मारे विशेषतः ॥ ३६२ ॥ पक्षाघाते महोन्मादे चाध्माने कोष्ठनिग्रहे । हस्तकम्पे शिरःकम्पे बाधिर्ये मूकमिन्मिने ॥ ३६३ ॥ ऊर्ध्वजत्रुगते वाते जङ्घापार्श्वादिसंस्थिते । नकुलाद्यमिदं नाम्ना ऊर्ध्वजत्रुगदापहम् ॥ ३६४ ॥

घृत १२८ तोला। पाकार्थ नेवले का मांस ६४ तोला, पाकार्थ जल ६ सेर ३२ तोला, शेष १२८ तोला दशमूल ६४ तोला जल ६ सेर ३२ तोला, शेष १२८ तोला। उरद ६४ तोला, जल ६ सेर ३२ तोला, शेष १२८ तोला। खरैंटी ६४ तोला, जल ६ सेर ३२ तोला शेष १२८ तोला। इस प्रकार चारों को ले शतावरि का रस १२८ तोला, दुग्ध १२८ तोला मिलाकर कल्कार्थ अष्टवर्ग (जीवक, ऋषभक, काकोली, क्षीरकाकोली, ऋद्धि, वृद्धि, मेदा, महामेदा), काकोली, क्षीरकाकोली, जीवन्ती, मुलेठी, इलायची, दालचीनी, तेजपात, त्रिकटु, त्रिफला, नागरमोथा और अनन्तमूल प्रत्येक एक एक तोला लेकर घृत सिद्ध करें। इस घृत का पान करने से अपस्मार, उन्माद, पक्षाघात, आध्मान, मलबद्धता, हस्तकम्प, शिरःकम्प, बधिरता, मूकत्व, अस्पष्टभाषण, हँसुली के ऊपर के रोग तथा जाँघ, पसुली आदि में स्थित वात रोग और नाना प्रकार की वातज पीड़ायें शान्त होती हैं ॥ ३५९--३६४ ॥ मात्रा ६ माशा से १ तोला ॥

### छागलाद्यघृत।

आजं चर्मविनिर्मुक्तं त्यक्तशृङ्गनखादिकम्। पञ्चमूलीद्वयञ्चैव जलद्रोणे विपाचयेत् ॥ ३६५ ॥ तेन पादावशेषेण घृतप्रस्थं विपाचयेत्। जीवनीयैः सयष्ट्याह्वैः क्षीरञ्चैव शतावरी ॥ ३६६ ॥ छागलाद्यमिदं नाम्ना सर्ववातविकारनुत्। अर्दिते कर्णशूले च बाधिर्ये मूकमिन्मिने ॥ ३६७ ॥ जडगद्गदपङ्गूनां खञ्जे गृध्रसिकुब्जयोः। अपतानेऽपतन्त्रे च सर्पिरेतत् प्रशस्यते ॥ ३६८ ॥ पृथगर्द्धतुलां पञ्चमूलद्वन्द्वाजमांसयोः। निष्क्वाथ्य सलिलद्रोणे क्वाथे पादावशेषिते ॥ ३६९ ॥

### घृतारम्भ में मन्त्र।

ॐ कालि अजेश्वरि अमुकस्य फलसिद्धिं देहि रुद्रवचनेन स्वाहा। स्नापयित्वा छागमादौ मधु दत्त्वा ललाटके। उदङ्मुखः प्राङ्मुखो वा भिषगेनमुपालभेत् ॥ ३७० ॥

### छागमारणमन्त्र।

ॐ ह्रां ॐ ग्लौं गणपतये स्वाहा ॥ ३७१ ॥ अत्र यष्टिमधुभागद्वयमिति शिवदासः।

बकरे का घृत १२८ तोला, सींग और खुर आदि से रहित बकरे का मांस २॥ सेर, दशमूल मिश्रित २॥ सेर, जल २५ सेर ४८ तोला, शेष ६ सेर ३२ तोला। दूध १२८ तोला, शतावरि का रस १२८ तोला। कल्कार्थ—जीवक,

ऋषभक, मेदा, महामेदा, काकोली, क्षीरकाकोली, मुद्गपर्णी, माषपर्णी, जीवन्ती और मुलेठी मिलाकर १४ तोला लेकर फिर विधिपूर्वक घृत सिद्ध करे। इस छागलाद्य घृत का पान करने से अर्दित, कर्णशूल, बधिरता, गूँगापन, अस्पष्टभाषण, जड़ता, पङ्गुता, खञ्जता, गृध्रसी, कुब्जता, अपतानक और अपतन्त्रक आदि वातरोग नष्ट होते हैं। इस घृत के कल्कद्रव्यों में मुलेठी दो भाग लेनी चाहिए। यह शिवदास का मत है।

इस घृत के बनाने के समय 'ॐ नमः' इत्यादि सूक्तोक्त मन्त्र पढ़कर बकरे को स्नान कराकर उसके मस्तक पर शहद लगाना चाहिए। पश्चात् उत्तराभिमुख बैठ ॐ ह्रीं इत्यादि मन्त्र से बकरे को मारे॥ ३६२-३७१॥

वृहच्छागलाद्यघृत।

छागमांसतुलां गृह्य दशमूल्याः पलं शतम्। अश्वगन्धापलशतं वाट्यालकशतं तथा॥ ३७२॥ घृताढकं पचेत्तोयैश्चतुर्भागावशेषितैः। क्षीरं स्नेहसमं दद्यात् शतावर्या रसं तथा॥ ३७३॥ ताम्रपात्रे दृढे चैव शनैर्मृद्वग्निना पचेत्। अस्यौषधस्य कल्कस्य प्रत्येकं शुक्तिसम्मितम्॥ ३७४॥ जीवन्ती मधुकं द्राक्षाकाकोल्यौ नीलमुत्पलम्। मुस्तं सचन्दनं रास्ना पर्णिनीद्वयशारिवे॥ ३७५॥ मेदे द्वे च तथा कुष्ठं जीवकर्षभकौ शटी। दार्वी प्रियङ्गुस्त्रिफला नतं तालीशपद्मकौ॥ ३७६॥ एलापत्रं वरी नागं जातीकुसुमधान्यकम्। मञ्जिष्ठा दाडिमं दारु रेणुके शैलबालुकम्॥ ३७७॥ विडङ्गं जीरकञ्चैव पेषयित्वा विनिक्षिपेत्। वस्त्रपूते च शीते च शर्कराप्रस्थसंयुतम्॥ ३७८॥ निधापयेत् स्निग्धभाण्डे धान्ये वा भाजने शुभे। अस्यौषधस्य सिद्धस्य शृणु वीर्यमतः परम्॥ ३७९॥ देवदेवं नमस्कृत्य संपूज्य गणनायकम्। पिबेत्पाणितलं तस्य व्याधिं वीक्ष्यानुपानतः॥ ३८०॥ सर्ववातविकारेषु अपस्मारे विशेषतः। पक्षाघाते तथोन्मादे आध्माने कोष्ठनिग्रहे॥ ३८१॥ कर्णरोगे शिरोरोगे बाधिर्ये चापतन्त्रके। मूकोन्मादे च गृध्रस्यां लोहारे चाक्षिपाकजे॥ ३८२॥ पार्श्वशूले च हृच्छूले नाडयामार्दिते तथा। वातरक्तकहृद्रोगमूत्रकृच्छ्रे सपङ्गुके॥ ३८३॥ क्रोष्टुशीर्षे तथा खञ्जे कुब्जे चाध्मनि मिन्मिने। अपतानेऽन्तरायामे रक्तपित्ते तथोर्ध्वगे॥ ३८४॥ आनाहेऽर्शोविकारेषु चातुर्थकज्वरेऽपि च। हनुग्रहेतथा शोषेत्तीणेचैवापराहुके॥ ३८५॥ दण्डापतानके भग्ने दाहे चाक्षेपके तथा। जीर्णज्वरे विषे कुष्ठे शोफःस्तम्भे मदात्यये॥ ३८६॥ आढ्यवातेऽग्निमान्द्ये च वातरक्तगदेषु च। एकाङ्गरोगिणे चैव तथा सर्वाङ्गरोगिणे॥ ३८७॥ हस्तकम्पे शिरःकम्पे जिह्वास्तम्भे जडे भ्रमे। क्षीणेन्द्रियेनष्टशुक्रेशुक्रनिःसरणेतथा॥ ३८८॥ क्षीणधातुसपाते च पटले चाक्षिस्पन्दने। एकाङ्गस्पन्दने चैव सर्वाङ्गस्पन्दने तथा ३८९ नगादिपतिते वाते क्षीणमभ्राभिहेतुके। आभिचारिकदोषे च धनसन्तापसम्भवे॥ ३९०॥ ये वातप्रभवा रोगा ये च पित्तसमुद्भवाः। शिरोमध्यगता ये च जङ्घापादादिसन्धिताः॥ ३९१॥ मातृग्रहाभिभूतश्चाशिशुर्यश्चाशिशुष्यति। मक्षी-

गावलर्गासश्च नवर्त्मगमनक्षमः ॥ ३६२ ॥ घृतेनानेन सिध्यन्ति वज्रमुक्तिरिवासुरान् । निहन्ति सकलान् रोगान् घृतं परमदुर्लभम् ॥ ३६३ ॥ रसायनं वह्निबलप्रदञ्च सपुंसकपं विदधाति रूपम् । यथा बलेन्द्रेण समानतेजा दीर्घायुषं पुत्रशतं करोति ॥ ३६४ ॥ स्त्रीणां शतं गच्छति चातिरेकं न याति तृप्तिं सरसः समाङ्गः । अपुत्रिणी पुत्रशतं करोति शतायुषं कामसमं बलिष्ठम् ॥ ३६५ ॥ महद्घृतं नाम तु छागलाद्यं विनिर्मितं वातनिषूदनञ्च । शिवं शुभं रोगभयापहञ्च चकार हारीतमुनिर्विशिष्टः ॥ ३६६ ॥ मृगालयबर्हिणोः पाके पुमांसं तत्र दापयेत् । मयूरी जम्बुकी छागी वीर्यहीनाः स्वभावतः ॥ भाषितं काशिराजेन छाग एव नपुंसकः ॥३६७ ॥

गाय का घृत ६ सेर ३० तोला, क्वाथार्थ नपुंसक छाग-मांस ९ सेर, पाकार्थ जल ४९ सेर ४८ तोला, शेष १२ सेर ६४ तोला । दशमूल मिलित ४ सेर, पाकार्थ जल २४ सेर ४८ तोला, शेष ६ सेर ३२ तोला । असगन्ध ४ सेर, जल २४ सेर ४८ तोला, शेष ६ सेर ३२ तोला । खरेटी ४ सेर, पाकार्थ जल २४ सेर ४८ तोला, शेष ६ सेर ३२ तोला । दुग्ध ६ सेर ३२ तोला । शतावरि का रस ६ सेर ३२ तोला, इन सब पदार्थों को मिलाकर कल्कार्थ—जीवन्ती, मुलेठी, दाख, काकोली, क्षीरकाकोली, नीलोत्पल, नागरमोथा, रक्तचन्दन, रास्ना, मुद्गपर्णी, माषपर्णी, पृश्निपर्णी, शालपर्णी, श्यामालता ( कालीसर ), अनन्तमूल ( सफेद सारिवा ), मेदा, महामेदा, कूट, जीवक, ऋषभक, कपूर, दारुहल्दी, प्रियंगु, त्रिफला, तगर, तालीसपत्र, पद्माख, इलायची, तेजपात, गन्धबाला, नागकेसर, चमेली के फूल, धनिया, मजीठ, अनार के बीज, देवदारु, सँभालू के बीज, एलुवालुक ( सुगन्ध द्रव्य ) वायविडङ्ग और जीरा प्रत्येक दो-दो तोले लेकर रांगे कलई किये हुए ताम्रपात्र में धीमी आँच से इस तैल का यथाविधि पाक करना चाहिए। पाक सिद्ध हो जाने पर घृत को छानकर उसमें ६४ तोला शक्कर मिलाकर चिकने पात्र में रख लें। इस औषध के गुणों को कहते हैं—श्रीगणेश का पूजन करके व्याधि के अनुसार अनुपान के साथ एक तोला की मात्रा में इसका सेवन करना चाहिए। बृहच्छागलाद्य घृत उचित अनुपान से वातव्याधि की सर्वोत्तम महौषध है। इसके सेवन से अपस्मार, उन्माद, पक्षाघात, आध्मान, कोष्ठरोध, कर्णरोग, शिरोरोग, बधिरता, अपतन्त्रक, भूतोन्माद, गृध्रसी, उदररोग, नेत्रवातरोग, पसली का शूल, हृदयशूल, बाह्यायाम, अर्दित, वातकण्टक, मूत्रकृच्छ्र, पङ्गुरोग, क्रोष्टुशीर्ष, खञ्ज, कुब्जापन, भग्नानि ( बहुत मार्ग चलने से कुबड़ापन ) मिन्मिन भाषण, (मिनमिनाना), अपतानक, अन्तरायाम, ऊर्ध्वांग रक्तपित्त, आनाह, अर्शोविकार, चातुर्थिक ज्वर, हनुग्रह, शोष, क्षीण, अपबाहुक, दण्डापतानक, अस्थिभग्न, दाह, आक्षेपक, जीर्णज्वर, विषदोष, कुष्ठ, लिंगस्तम्भ ( शिश्नेन्द्रिय का जकड़ जाना ), मदात्यय, खञ्जवात, मन्दाग्नि, वातरक्त, एकांगवात, सर्वांगवात, हस्तकम्प, शिरःकम्प, जिह्वास्तम्भ, जड़ता, भ्रम, क्षीणेन्द्रियता, वीर्यक्षय, स्वरदोष, स्त्रियों का वातप्रदर, योनि फड़कना, एकांग फड़कना, सब शरीर फड़कना, पर्वतादि से गिर पड़ने से उत्पन्न वातरोग, इच्छा होने पर स्त्री के प्राप्त न होने से उत्पन्न वातरोग, अभिचार दोष से उत्पन्न वातरोग, अभिघातोत्पन्न वातरोग तथा नाना प्रकार के वातज, पित्तज, शिरोमज्जगत तथा पसली जंघा आदि में प्राप्त वातरोग और आयुमदशून्य बच्चों का सूखा रोग, बल मांस की क्षीणता, चलने की शक्ति का अभाव आदि बीमारियों को ऐसे नष्ट करता है जैसे इन्द्र का वज्र दैत्यों का नाश करता है। यह घृत अत्यन्त दुर्लभ है। यह घृत रसायन है। अग्नि, बल, शरीर में

कान्तिवर्द्धक है। इसके प्रयोग से मनुष्य सुन्दर, सुडौल, तेजस्वी, दीर्घायु तथा सन्तानयुक्त होता है। इसके प्रयोग से सौ स्त्रियों से भी रमण करने से तृप्ति नहीं होती, अर्थात् रतिशक्ति बढ़ती है। वपुत्रिणी को इन्द्र के समान दीर्घायु कामदेव के समान रूपवान्, सैकड़ों बलिष्ठ पुत्रों का देनेवाला है। सभी वातरोगों का नाश करनेवाले इस कल्याणकारक बृहच्छागलाद्यघृत को हारीत मुनि ने बनाया था।

पाक के वर्णन में-स्यार और मोर का मांस ही ग्राह्य है। स्यारिन, मोरिन और बकरी का नहीं, क्योंकि ये हीनवीर्य होती है। काशिराज का मत है कि छागमांस में नपुंसक बकरे का मांस लेना चाहिए॥ ३७१-३६७॥

अश्वगन्धाद्य घृत।

अश्वगन्धाकषाये च कल्के क्षीरं चतुर्गुणम्। घृतं पक्वन्तु वातघ्नं वृष्यं मांसविवर्द्धनम्॥ ३९८॥

गोघृत ४ सेर, असगन्ध का क्वाथ १६ सेर, दूध १६ सेर, असगन्ध का कल्क १ सेर, यह घृत वातनाशक, वीर्य तथा मांसवर्द्धक है। मात्रा आधा तोला॥ ३९८॥ मात्रा १ तो०।

दशमूलाद्य घृत

दशमूलस्य निर्यूहे जीवनीयैः पलोन्मितैः। क्षीरेण च घृतं पक्वं सर्पिषं पवनार्तिजित्॥ क्वाथोऽत्र त्रिगुणः सर्पिः प्रस्थः साध्यः पयः समम्॥ ३९९॥

गौ का घी ४ सेर, दशमूल का क्वाथ १२ सेर, कल्क के लिये—जीवक, ऋषभक, मेदा, महामेदा, काकोली, क्षीरकाकोली, जीवन्ती, मुलहठी, ऋद्धि, वृद्धि मिलाकर १ सेर। यह घृत तृप्तिकारक तथा वातवेदना को नष्ट करता है॥ ३९९॥ मात्रा १ तो०।

महावात विध्वंसन रस।

रसं गन्धकं नागवङ्गे च लोहं तथा ताम्रजं व्योम निश्चन्द्रकञ्च क्रमाद्वृद्धे पोषणं नागरं च। पृथग्भागमेकं विषस्यैकयामम् ततो वत्सनाभं चतुःसार्धभागं॥ ४००॥ दृढं मर्दयेद्भावना व्योषजाभिः वराचित्रकैर्मार्कवैः कुष्ठतोयैस्तथा काकमाच्यैः सनिर्गुण्डि तोयैः॥ ४०१॥ मनोयाग्निकैराद्रके निम्बुनीरैस्त्रिभिर्भावयेद्वात विध्वंसनोऽयम्। समीरे च शूले महाश्लेष्मरोगे। ग्रहण्यां तथा सन्निपासे च मौढ्ये॥ ४०२॥ अपस्मार मान्द्ये सशोथे सपित्तोदर प्लीहकुष्ठार्शो स्त्रीगदे च। निषेवेत गुञ्जाद्वयं चास्य तत्र तद्वदनाऽनुपानैरयं रोगजित्स्यात्॥ ४०३॥

शुद्ध पारा गन्धक नाग बङ्ग लोह ताम्र अभ्रक इनकी भस्म पीपल भुना सुहागा मरिच सोंठ ये सब 1-1 भाग १ भाग विष लेकर महीन चूर्ण कर क्रमशः में त्रिकटु, त्रिफला, त्रिफला, चित्रक, भंगरा, कूठ, धतूरा, निर्गुण्डी, अमलोनिया, अदरख, नीबू, इन सबके रसों में तीन बार घोट कर २-२ रत्ती की गोलियां बना लेवे, दशानुसार इनमें से १ से ४ गोली तक समय तथा रोगानुसार अनुपान के साथ देने से भयंकर वात, शूल, उत्कट श्लेष्मरोग, ग्रहणी, सन्निपात, मूढ़ता, अपस्मार, मन्दाग्नि शोथपित्त उदररोग प्लीहा कुष्ठ बवासीर स्त्री रोग इन सबको नष्ट करता है। विशेष अनुभूत है॥ ४००-४०३॥

चतुर्मुखरस।

रसगन्धकलौहाभ्रं समं मृताद्धि हेम च। सर्वं खल्वतले क्षिप्त्वा कन्यास्वरसमर्दितम्॥ ४०४॥ एरण्डपत्रैरावेष्ट्य धान्यराशौ दिनत्रयम्। संस्थाप्य च तदुद्धृत्य सर्वरोगेषु योजयेत्॥ ४०५॥ एतद्रसायनवरं त्रिफलामधुयोजितम्। तद्यथा-

ग्निबलं खादेद्वलीपलितनाशनम् ॥४०६॥ क्षयमेकादशविधं पाण्डुरोगं प्रमेहकम्। कासं शूलञ्च मन्दाग्निं हिक्काञ्चैवाम्लपित्तकम् ॥ ४०७ ॥ व्रणान् सर्वानाढ्यवातं विसर्पं विद्रधिं तथा। अपस्मारं महोन्मादं सर्वार्शांसि त्वगामयान् ॥ ४०८ ॥ क्रमेण शीलितं हन्ति वृक्षमिन्द्राशनिर्यथा। पौष्टिकं धन्यमायुष्यं स्त्रीणां प्रसवकारणम्॥ चतुर्मुखेन देवेन कृष्णात्रेयस्यसूचितम् ॥ ४०९ ॥

शुद्ध पारा, शुद्ध गन्धक, लोहभस्म और अभ्रकभस्म एक-एक तोला, स्वर्ण भस्म १ माशा। इन द्रव्यों को एकत्र कर घृतकुमारी के रस, में मर्दन करे। फिर एरण्ड के पत्तों में लपेटकर तीन दिन तक धान्यराशि में पड़ा रहने दे। तदनन्तर वहाँ से निकालकर इसका सब रोगों में प्रयोग करना चाहिए। अनुपान त्रिफला का रस और मधु। अग्नि और बल का विचार कर मात्रा की यथोचित व्यवस्था करनी चाहिए। इसका सेवन करने से वलीपलित ग्यारह प्रकार का क्षय, पाण्डु, प्रमेह, कास, शूल, अग्निमांद्य, हिचकी, अम्लपित्त, सब प्रकार के व्रण, आढ्यवात, विसर्प, विद्रधि, अर्श, त्वचा के रोग एवं अपस्मार और उन्माद आदि नाना प्रकार के रोग शान्त होते हैं। यह रसायन पौष्टिक और आयु का देनेवाला है। यह स्त्रियों के प्रसव में सुख देनेवाला है। इसे चतुर्मुख महाराज ने कृष्णात्रेयजी को बतलाया था। मात्रा-१ रत्ती ॥ ४०४-४०९ ॥

## चिन्तामणिचतुर्मुख।

विशुद्धं रससिन्दूरं तदर्द्धं लौहमभ्रकम्। तदर्द्धं कनकं खल्ले कन्यारसमर्दितम् ॥ ४१० ॥ एरण्डपत्रैरावेष्ट्य धान्यराशौ निधापयेत्। त्रिदिनान्ते समुद्धृत्य सर्वरोगेषु योजयेत् ॥४११॥ एतद्रसायनवरं त्रिफलामधुसंयुतम्। तद्यथाग्निबलं खादेद्वलीपलितनाशनम् ॥४१२॥ अपस्मारं महोन्मादं रोगान् वातसमुद्भवान्। क्रमेण शीलितं हन्ति वृक्षमिन्द्राशनिर्यथा॥४१३॥

शुद्ध रससिन्दूर ४ तोला, लोहभस्म २ तोला, अभ्रकभस्म २ तोला, स्वर्णभस्म १ तोला, इन्हें घृतकुमारी के रस में मर्दन कर एरण्ड के पत्रों में लपेट कर तीन दिन धान्य की राशि में रक्खे। तदनन्तर उसे निकालकर दो रत्ती की मात्रा में प्रयोग करे। अनुपान त्रिफला का स्वरस तथा मधु। यह रसायन है। अग्नि और बल का विचार कर खाने से वली, पलित, अपस्मार, उन्माद तथा अन्य वातज रोगों को यह ऐसे नष्ट करता है जैसे इन्द्र का वज्र वृक्षों को नष्ट कर देता है ॥ ४१०-४१३ ॥

## अमरसुन्दरी वटी या विजय भैरवरस।

सूतकं गन्धकं लोहं चित्रकमभ्रकम् विडङ्गं रेणुका मुस्ता द्राविणीपत्रकेशरम् ॥ ४१४ ॥ फलत्रयं त्रिकटुकं शुल्व भस्म तथैव च एतानि समभागानि द्विगुणो दीयते गुडः ॥ ४१५ ॥ कासे श्वासे क्षये गुल्मे प्रमेहे विषमज्वरे ॥४१६॥ सूतायां ग्रहणी मान्द्ये शूले पाण्डुभये तथा हस्तपादादि रोगेषु गुटिकेयं प्रशस्यते ॥ ४१७ ॥

शुद्ध पारा गन्धक और विष लोह और अभ्रक भस्म चित्रक मूल विडङ्ग सँभालू के बीज नागरमोथा इलायची पत्रज नागकेशर त्रिफला त्रिकुटा ताम्रभस्म ये समान भाग लेकर महीन चूर्ण कर १ २ प्रहर तक मूसा की पोट पर दूने गुड़ या खाँड की चाशनी कर ४ रत्ती अथवा १ माशे की गोलियाँ बनाकर रख देवे इसमें से 1-1 गोली रोगानुसार अनुपान के साथ देने से श्वास कास, क्षय, गुल्म, प्रमेह विषम ज्वर, सूतिका रोग,

ग्रहणी, मन्दाग्नि शूल, पाण्डु और हलीमकादि रोग इन सबका विनाश करता है ॥ ४१४-४१७ ॥

पक्षाघात।

शुद्धगन्धं मृतं सूतं कान्तं वङ्गञ्च नागकम् ताम्रं चाभ्रं मृतं तीक्ष्णं नागरं मरिचं कणाम् ॥ ४१८ ॥ सर्वमेकत्र सञ्चूर्ण्य भावयेत्त्रिः पृथक्-पृथक् वराव्योषक निर्गुण्डीवह्निकार्द्रकजैर्द्रवैः ॥ ४१९ ॥ शिग्रुद्रवेणापि ततो धात्र्या द्रवेण च। विषमुष्ट्यार्क द्रावश्च आर्द्रकस्य रसैस्तथा ॥ ४२० ॥ रसश्चैकाङ्ग वीरोऽसौ सुसिद्धो रसराड् भवेत् पक्षाघातं चार्दितञ्च धनुर्वातं तथैव च ॥ ४२१ ॥ अर्धाङ्ग गृध्रसी वायुं विश्वाचीमपबाहुकम् सर्वान्वाता-मयान्हन्ति सत्यं सत्यं न संशयः ॥४२२॥

शुद्ध गन्धक और पारा कान्तलोह बङ्ग नाग पीपल ये सब बराबर लेकर सबको मिला घोटे फिर त्रिफला, त्रिकटु, निर्गुण्डी चित्रक अदरख कूठ, आंवला, जहर कुचिला आक की जड़ की छाल अकलकरा और अदरख इनके रस से पृथक् तीन ३ बार घोट २-२ रत्ती की गोलियां बना ले। वात को नाश करने वाले अनुपान के साथ देने से अर्दित पक्षाघात धनुर्वात अर्धाङ्गवात गृध्रसी विश्वाची अपबाहुक आदि सब वात रोगों का नाश करती है। विशेष अनुभूत ॥ ४१८—४२२ ॥

तालकेश्वर रस।

एकभागो रसस्य स्याच्छुद्धतालैकभागिकः। अष्टौ स्युर्विजयायाश्च गुडिका गुडतश्चरेत् ॥ ४२२ ॥ एकैकां भक्षयेन्मातश्छायायामुपवेशयेत् । तालकेश्वरनामायं योगोऽस्पर्शविनाशनः ॥ ४२३ ॥

रससिन्दूर १ भाग, शुद्ध हरताल १ भाग, भांग ८ भाग, गुड़ २० भाग। इन्हें इकट्ठा अच्छी तरह मिलाकर १ माशे के परिमाण में सेवन करावें। प्रातः औषध के सेवन के पश्चात् रोगी को छाया में बैठे रहने का आदेश देना चाहिए। वात के दुष्ट होने से पैदा हुआ स्पर्श ज्ञान का अभाव इसके सेवन से नष्ट होता है ॥ ४२२-४२३ ॥

चिन्तामणि रस।

कर्षैकं रससिन्दूरं तत्समं मृतमभ्रकम्। तदर्धं मृतलोहञ्च स्वर्णं शाणं क्षिपेद् बुधः ॥ ४२४ ॥ कन्यारसेन सम्मर्द्य गुञ्जामानां वटीं चरेत्। अनुपानादिकं दद्याद् बुद्ध्वा दोषं बलाबलम् ॥४२५॥ हन्ति श्लेष्मान्वितं वातं केवलं पित्तसंयुतम्। हृल्लासमरुचिं दाहं वान्तिं भ्रान्तिं शिरोग्रहम् ॥ ४२६ ॥ प्रमेहं कर्णनादञ्च ज्वरगद्गदमूकताम्। बाधिर्यं गर्भिणीरोगमश्मरीसूतिकामयम् ॥ ४२७ ॥ प्रदरं सोमरोगञ्च यक्ष्माणं ज्वरमेव च। बलवर्णाग्निदः सम्यक् कान्तिपुष्टिप्रसाधकः ॥ चिन्तामणिरसश्चायं चिन्तामणिरिवापरः ॥ ४२८ ॥

रससिन्दूर १ तोला, अभ्रकभस्म १ तोला, लोहभस्म ½ तो०, स्वर्णभस्म ३ माशे, इन्हें घीकुआर के रस से घोटकर १ रत्ती की गोली बनाकर दोष और बलाबल को देखकर इसे उचित अनुपान के साथ सेवन करावें। इससे कफजात-जन्य, वातजन्य और वात-पित्त-जन्य रोग नष्ट होते हैं। इसके सेवन से हृल्लास, अरुचि, जलन, वमन, भ्रम, शिरोवेदना, प्रमेह, कर्णनाद, ज्वर, मूकता, बधिरता, गर्भिणी रोग, अश्मरी, सूतिका रोग, प्रदर, सोमरोग तथा यक्ष्मा आदि रोग नष्ट होते हैं। यह रस बल, वर्ण तथा अग्नि को बढ़ानेवाला है ॥ ४२४-४२८ ॥

वातगजांकुश।

मृतं सूतं मृतं लोहं ताप्यं गन्धकतालकम्। पथ्याः शृङ्गी विषं व्योषमग्नि-

मन्थश्च टङ्कणम् ॥ ४२९ ॥ तुल्यं खल्ले दिनं मर्द्यं मुण्डीनिर्गुण्डिकाद्रवैः । द्विगुञ्जां वटिकां खादेत् सर्ववातप्रशान्तये ॥४३०॥ कणाचूर्णयुतं चैव जिङ्गीक्वाथं पिबेदनु । साध्यासाध्यं निहन्त्याशु रसो वातगजाङ्कुशः ॥ ४३१ ॥ सर्वाङ्गवातगृध्रसीं हन्ति दारुणं सान्निपातिकम् । क्रोष्टुशीर्षक वातश्चाप्यपबाहुकसंज्ञकम् ॥ ४३२ ॥ मन्यास्तम्भमुरुस्तम्भं वातरोगं विनाशयेत् । पक्षाघातादिरोगेषु कथितः परमोत्तमः ४३३

पारा, लोहभस्म, सोनामाखीभस्म, गन्धक, हरताल, हड़, काकड़ासिंगी, बच्छनाग, त्रिकुटा, अरणी, सुहागा, इन्हें बराबर मात्रा में मिलाकर गोरखमुण्डी तथा सम्भालू के रस से अलग-अलग एक दिन घोटें और २ रत्ती की गोली बनायें। अनुपान पीपली का चूर्ण तथा मजीठ का क्वाथ। इसके सेवन से गृध्रसी, क्रोष्टुशीर्ष, अपबाहुक, मन्यास्तम्भ, ऊरुस्तम्भ, तथा पक्षाघात आदि वातरोग नष्ट होते हैं ॥ ४२९—४३३ ॥ मात्रा २ रत्ती ॥

### बृहद्वातगजाङ्कुश ।

सूताभ्रलोहकान्तानि ताम्रतालकगन्धकम् । स्वर्णं शुण्ठी बला धान्यं कट्फलञ्चाभया विषम् ॥ ४३४ ॥ पथ्या शृङ्गी पिप्पली च मरिचं टङ्कणं तथा । तुल्यं खल्ले दिनं मर्द्यं मुण्डीनिर्गुण्डिजैर्द्रवैः ॥ ४३५ ॥ द्विगुञ्जां वटिकां खादेत्सर्ववातप्रशान्तये । साध्यासाध्यं निहन्त्याशु बृहद्वातगजांकुशः ॥ ४३६ ॥

पारा, अभ्रकभस्म, लोहभस्म, कान्तलोहभस्म, तांबे की भस्म, हरताल, गन्धक, सोने की भस्म, सोंठ, खरेंटी, धनिया, कट्फल, हड़, बच्छनाग, हड़, काकड़ासिंगी, पीपल, कालीमिर्च, सुहागा, इन्हें बराबर मात्रा में मिलाकर गोरखमुण्डी तथा सम्भालू के रस से अलग-अलग एक दिन घोटकर २ रत्ती की गोली बनाकर वात रोग में सेवन कराना चाहिए ॥ ४३४—४३६ ॥ मात्रा २ रत्ती ।

### महावातगजाङ्कुश ।

मृताभ्रलोहताम्रञ्च सूततालकगन्धकम् । भार्गी शुण्ठी बला धान्यं कट्फलञ्चाभया विषम् ॥ ४३७ ॥ सम्पिष्य चपलाद्रावैर्द्विगुञ्जां भक्षयेद्वटीम् । वातश्लेष्महरो ह्येष महावातगजांकुशः ॥४३८॥

अभ्रक भस्म, लोहभस्म, ताम्रभस्म, पारा, हरताल, गन्धक, भारंगी, सोंठ, बला, धनिया, कट्फल, हड़, बच्छनाग, इन्हें बराबर मात्रा में मिलाकर पीपल के क्वाथ से घोटकर २ रत्ती की गोली बनावे। यह रस वात तथा कफ को नष्ट करता है ॥ ४३७—४३८ ॥ मात्रा २ रत्ती ॥

### लक्ष्मीविलास रस ।

पलं कृष्णाभ्रचूर्णस्य तदर्धौ रसगन्धकौ । बला नागबला भीरु विदारीकन्दमेव च ॥ ४३९ ॥ कृष्णधुस्तूरनिचुलं मोचकं हृद्दारकम् । बीजं ग..... जातीकोषफले तथा ॥ ४४० ॥ कर्पूरकर्षेन कर्षांशं श्लक्ष्णचूर्णं पृथक्-पृथक् । गृहीत्वा चाष्टमांशेन स्वर्णं पर्णरसेन च ॥ ४४१ ॥ गुञ्जाचतुष्टयमितां वटिकां कारयेद्भिषक् । रसो लक्ष्मीविलासोऽयं पूर्ववद् गुणकारकः ॥ ४४२ ॥

अभ्रकभस्म ४ तो०, पारा २ तो०, गन्धक २ तो०, बला, नागबला (गङ्गेरन), शतावरी, विदारीकन्द, काले धतूरे के बीज, समुद्रफल, गोखरू के बीज, विधाराबीज, भांग के बीज, जावित्री, जायफल, कपूर, हरएक १ तो० स्वर्णभस्म ६ मासे इन्हें इकट्ठा मिलाकर पान के रस से भावना दें और ४ रत्ती की गोली

बनावें। चतुर्मुख रस के समान ही इस रस के गुण हैं ॥ ४३९--४४२ ॥ मात्रा २-३ रत्ती ॥

## योगेन्द्ररस।

विशुद्धं रससिन्दूरं तदर्द्धं शुद्धहाटकम्। तत्समं कान्तलौहञ्च तत्र समञ्चाभ्रमेव च ॥ ४४३ ॥ विशुद्धं मौक्तिकञ्चैव वङ्गञ्च तत्समं मतम्। कुमारिकारसैर्भाव्यं धान्यराशौ दिनत्रयम् ॥ ४४४ ॥ ततो रक्तिद्वयमितां वटीं कुर्याद्विचक्षणः। योगवाही रसो ह्येष सर्वरोगकुलान्तकः ॥ ४४५ ॥ वातपित्तभवान् रोगान् प्रमेहान् बहुमूत्रताम्। मूत्राघातमपस्मारं भगन्दरगुदामयम् ॥ ४४६ ॥ उन्मादं मूर्च्छां यक्ष्माणं पक्षाघातं हतेन्द्रियम्। शूलाम्लपित्तकं हन्ति भास्करस्तिमिरं यथा ॥ ४४७ ॥ त्रिफलारसयोगेन शुभया सितयापि वा। भक्षयित्वा भवेद्रोगी कामरूपी सुदर्शनः ॥ ४४८ ॥ रात्रौ सेव्यं गवां क्षीरं कृशानाञ्च विशेषतः। योगेन्द्राख्यो रसो नाम्ना कृष्णात्रेयविनिर्मितः ॥ ४४९ ॥

रससिन्दूर १ तोला, स्वर्ण, लोह तथा अभ्रक भस्म, मुक्ता और वङ्ग प्रत्येक आधा-आधा तोला ले। इन सबको घृतकुमारी के रस में मर्दन कर धान्य की राशि में तीन दिन रख दे। पश्चात् दो-दो रत्ती की गोली बना ले। यह रस योगवाही है, सब रोगों को नष्ट करता है। त्रिफला के स्वरस, वंशलोचन या मिस्री के साथ इसका सेवन करे। विशेषतः रात में गोदुग्ध पान करना चाहिए। यह योगवाही रस है। यह सभी रोगों का नाशक है। विशेष कर वात पित्तजन्य रोग, प्रमेह, बहुमूत्रता, मूत्राघात, अपस्मार, भगन्दर, बवासीर, उन्माद, मूर्च्छा, यक्ष्मा, पक्षाघात, इन्द्रियों की शक्तिहीनता, शूल और अम्लपित्त को ऐसे नष्ट करता है जैसे सूर्य अन्धकार को नष्ट करते हैं। इसके सेवन से कामदेव के समान रूप हो जाता है। यह दुर्बलों को विशेषकर लाभदायक है। इसका नाम योगेन्द्र रस है। इसको कृष्णात्रेयजी ने बनाया था ॥ मात्रा-२ रत्ती ॥४४३-४४९॥

## रसराजरस

पलैकं मूर्च्छितं सूतं व्योमसत्त्वञ्च कार्षिकम्। सुवर्णं तत्समं ज्ञेयं कन्यारसविमर्दितम् ॥ ४५० ॥ लौहं रूप्यं मृतं वङ्गं वाजिगन्धां लवङ्गकम्। जातीकोषं तथा क्षीरकाकोलीञ्च तदर्द्धकम् ॥ ४५१ ॥ काकमाचीरसेनैव सर्वं सम्मर्द्दयेद् दृढम्। गुञ्जाद्वयप्रमाणेन वटिकां कारयेद्भिषक् ॥ क्षीरञ्च शर्करातोयमनुपानं प्रकल्पयेत् ४५२ पक्षाघातेऽर्दिते वाते हनुस्तम्भेऽपतन्त्रके। मन्युस्तम्भेऽपताने च बाधिर्ये मस्तकभ्रमे ॥ ४५३ ॥ सर्ववातविकारेषु रसराजः प्रकीर्त्तितः। बल्यो वृष्यश्च भोग्यश्च वाजीकरण उत्तमः ॥ ४५४

रससिन्दूर ४ तोले, अभ्रकभस्म १ तोला, स्वर्णभस्म १ तोला। इनको घृतकुमारी के रस में घोटकर उसमें लौहभस्म, रौप्यभस्म, वङ्गभस्म, असगन्ध, लौंग, जावित्री तथा क्षीरकाकोली प्रत्येक आधा-आधा तोला मिलाकर काकमाची (मकोय) के रस में घोटकर दो-दो रत्ती की गोली बनावे। अनुपान दुग्ध या शक्कर का शर्बत। पक्षाघात, अर्दित, वात, हनुस्तम्भ, अपतन्त्रक, मन्युस्तम्भ, अपतानक, बाधिर्य और मस्तकभ्रम आदि समस्त वातरोगों में इस रसराज का प्रयोग कहा गया है। यह श्रेष्ठ बलकारक, वीर्यवर्द्धक, भोग्य और वाजीकरण है ॥ मात्रा २ रत्ती ॥४५०-४५४॥

## बृहद्वातचिन्तामणि।

भागत्रयं स्वर्णभस्म द्विभागं रौप्यमभ्रकम्। लौहात् पञ्च प्रवालञ्च मौक्तिकं त्रयसम्मितम् ॥४५५॥ [illegible]

कन्यारसविमर्दितम् । वल्लमात्रा वटी कार्या भिषग्भिः परियत्नतः ॥ ४५६ ॥ यथा व्याध्यनुपानेन नाशयेद्रोगसंकुलम् । वातरोगं पित्तकृतं निहन्ति नात्र चिन्तनम् ॥ ४५७ ॥ वृद्धोऽपि तरुणस्पर्द्धी कन्दर्पसमविक्रमः दृष्टः सिद्धफलश्चायं वातचिन्तामणिरिह ॥ ४५८ ॥

स्वर्णभस्म ३ भाग, चाँदी की भस्म २ भाग, अभ्रकभस्म २ भाग, लोहभस्म ५ भाग, प्रवालभस्म ३ भाग, मुक्ता ३ भाग और रससिन्दूर ७ भाग। इनको घृतकुमारी के रस में घोटकर दो-दो रत्ती की गोली बनावे। व्याधिविशेष में अनुपानविशेष के साथ प्रयोग करना चाहिए। यह रस वातजन्य तथा पित्तजन्य विविध रोगों को निःसन्देह नष्ट करता है। इस रस का सेवन करने से वृद्ध पुरुष भी तरुण पुरुष के समान पराक्रमयुक्त हो जाता है और कामदेव के समान पराक्रमी होता है। यह वातचिन्तामणि रस अनुभूत है मात्रा—२ रत्ती ॥ ४५६—४५८ ॥

### बलारिष्ट ।

बलाश्वगन्धयोर्ग्राह्यं पृथक् पलशतं शुभम् । चतुर्द्रोणे जले पक्त्वा द्रोणशेषावशेषयेत् ॥४५९॥ शीते तस्मिन् रसे पूते क्षिपेद् गुडतुलात्रयम् । धातकीं षोडशपलां पयस्यां द्विपलांशिकाम् ॥४६०॥ पञ्चाङ्गुलपलद्वन्द्वं रास्नामेलां प्रसारणीम् । देवपुष्पमुशीरञ्च श्वदंष्ट्राञ्च पलांशिकाम् ॥४६१॥ मासं भाण्डे स्थितस्त्वेष बलारिष्टो महाफलः । हन्त्युग्रान् वातजान् रोगान् बलपुष्ट्यग्निवर्द्धनः ॥ ४६२ ॥

खरेटी ५ सेर, असगन्ध ५ सेर, क्वाथार्थ जल १०२ सेर ३२ तोला, शेष २५ सेर ४८ तोला। गुड़ १५ सेर, धाय के फूल ६४ तोला, क्षीरकाकोली ८ तोला, अरण्डमूल ८ तोला, रास्ना, इलायची, गन्धप्रसारिणी, लौंग, खस और गोखरू प्रत्येक चार-चार तोला। इन सब वस्तुओं को एक महीना पात्र में बन्द रक्खे। यह बलारिष्ट बहुत लाभदायक है; उग्र वात-रोगों का नाशक है तथा बलवर्धक, पौष्टिक और अग्निवर्धक है मात्रा—२ तोला ॥ ४५९-४६२ ॥

### वातव्याधि में पथ्य ।

अभ्यङ्गो मर्दनं वस्तिः स्नेहः स्वेदोऽवगाहनम् । संवाहनं संशमनं शाक्यवातप्रवर्जनम् ॥ ४६३ ॥ कुलत्थमाषगोधूमा रक्ताभाः शालयो हिताः । पटोलं शिग्रुवार्ताकं दाडिमञ्च परूषकम् ॥ ४६४ ॥ मत्स्यपिण्डका घृतं दुग्धं किलाटं दधिकूर्चिका । बदरं लशुनं द्राक्षा ताम्बूलं लवणं तथा ॥ ४६५ ॥ चटकः कुक्कुटो बर्हिस्तित्तिरश्चेति जाङ्गलाः । शिलीन्द्रः पर्वतो नक्रो गर्गरः खुडिशो झषः ॥४६६॥ यथाश्रयं यथावस्थं यथाचरणमेव च । वातव्याधौ समुत्पन्ने पथ्यमेतन्नृणां भवेत् ॥ ४६७ ॥

अभ्यङ्ग ( तैल मलना ), मर्दन ( मींजना ) वस्ति, स्नेह ( घृत आदि ), स्वेद, वातहर क्वाथ में अवगाहन ( स्नान ), संवाहन ( दबाना ), संशमन औषध, सीधी आती हुई वायु तथा आँधी का परित्याग, कुलथी, उड़द, गेहूँ लाल शालि चावल, परवल, सहिजना, बैंगन, अनार, फालसा, मत्स्यपिण्डका ( डालेदार खाँड अथवा राब ), घी, दूध, किलाट ( फटे हुए दूध का घन भाग ), दही, कूर्चिका ( दही के साथ दूध को पकाने से जो बनता है ), बेर, लहसुन, मुनक्का, पान, नमक, चिड़िया, मुर्गा, मोर, तीतर, जङ्गली पशु, पक्षी, शिलीन्द्र ( मत्स्यभेद ), पर्वत ( मत्स्यभेद ), नाक, गर्गर, खुडिश, झष इत्यादि मत्स्य, इनका वातव्याधि के आश्रय के अनुसार दोष अथवा रोगी की अवस्था के अनुसार अथवा जैसे हुए प्रयोग

कराते हैं, पैसा वातव्याधि के उत्पन्न होने पर ये पथ्य होते हैं ॥ ४६३-४७० ॥

वातव्याधि में अपथ्य।

चिन्ता प्रजागरणवेगविधारणानि छर्दिः श्रमोऽनशनता चणकाः कलायाः। श्यामाकचूर्णं कुरुविन्दनिवारकंगु-मुद्रास्तडागतटिनीसलिलं करीरम् ॥४६८॥ क्षौद्रं कषायकटुतिक्तरसा व्यवायो हस्त्यश्वयानमपि चङ्क्रमणं च खट्वा। आध्मानिनोऽर्दिंतवतोऽपि पुनर्विशेषात् स्नानं प्रदुष्टसलिलाद् द्विजघर्षणं च ॥ निःशेषतन्त्रपरिकीर्तित एष वर्गो नृणां समीरणगदेषु मुदं नयते ॥ ४६९ ॥

इति श्रीभैषज्यरत्नावल्यां वायुरोगा-
धिकारः समाप्तः।

चिन्ता, रात में जागना, वेगों को रोकना, वमन, थकावट, उपवास, चने, मटर, समा-धान्य का आटा, कोदो, नीवार, धान्य, कगुनी, मूँग, तालाब एवं नदी का जल, करीर, शहद, कषाय, कटु एवं तिक्त रस, मैथुन, हाथी, घोड़े की सवारी, अधिक चलना, सोये रहना, ये वात-व्याधि में अपथ्य हैं। आध्मान तथा अर्दित रोगी के लिये विशेषतः दुष्ट जल से स्नान एवं दातुन वर्जित है। यह सम्पूर्ण तन्त्रों में बताया गया वर्ग वातरोग में हानिकारक है ॥ ४६८-४६९ ॥

इति श्रीपण्डितसरयूप्रसादत्रिपाठिविरचितायां भैषज्यरत्नावल्या रत्नप्रभाभिधायां व्याख्यायां वायुरोगाधिकारः समाप्तः।

---

## आमवाताधिकारः।

आमवातरोग में क्रियाक्रम।

लङ्घनं स्वेदनं तिक्तं दीपनानि कटूनि च। विरेचनं स्नेहपानं बस्तयश्चाममारुते ॥ १ ॥

आमवात रोग में लंघन, स्वेदन, कड़वे द्रव्य, अग्निप्रदीपन द्रव्य, चरपरे द्रव्य, विरेचन, घृत आदि स्नेहपान तथा बस्तिकर्म करना चाहिये ॥ १ ॥

आमवात में पथ्य।

आमवाते पञ्चकोलसिद्धयानादमिष्यते। पटोलं गोक्षुरश्चैव वरुणं कारवेल्लकम् ॥२॥ यवकोद्रवशाल्यादि मधुराणां सतिक्तकम्। लावादीनां तथा मांसं तक्रेण मधुना हितम् ॥ ३ ॥

आमवात में पीपर, पिपरामूल, चव्य, चीता, सोंठ से सिद्ध जल तथा पथ्य लाभदायक होता है। पटोलपत्र, गोखरू, वरना, करेला, कड़वे द्रव्य सहित पुराने जौ, कोदों तथा शालि एवं तक्र तथा मधु के योग के साथ लावा आदि पक्षियों का मांस आमवात में पथ्य है ॥ २-३ ॥

शङ्करस्वेद।

कार्पासास्थिकुलत्थका तिलयवैरेरण्ड-मूलातसी वर्षाभूशणबीजकाञ्जिकयुतैरेकी-कृतैर्वा पृथक्। स्वेदः स्यादिति कूर्परोदर-शिरः स्फिक्पाणिपादाङ्गुलीगुल्फस्कन्ध-कटीरुजो विजयते सामाः समीरानुगः ॥४॥ एतानि सपुदितानि एकैकशो वा संकुट्य काञ्जिकेन संसिच्य वस्त्रेण पोट्टली-द्वयं बद्ध्वा दीप्ताग्निचुल्लघुपरिस्थितका ञ्जिकस्थाल्युपरिलिप्तसच्छिद्रशरावस्थं वा-ष्पतप्तमेकैकमानीय वेदनास्थाने स्वेदयेत्।

बिनौले, कुलथी, तिल, जौ, एरण्डमूल, अलसी, पुनर्नवा और सन के बीज, इन समस्त द्रव्यों को अथवा किसी एक को दोषानुसार काँजी में भिगोकर दो पोटली बनावे। पश्चात् एक हाँडी में भरकर आग पर रखने और उसका मुख छिद्रयुक्त ढक्कन से बन्द कर दे।
[illegible]

पोटलियों को रख दें। जब भाप से पोटलियाँ गरम हो जायें तब उनसे क्रमशः रुग्ण अंग पर स्वेदन करे। इस प्रकार स्वेदन करने से कूर्पर, उदर शिर, स्फिक्, हाथ, पाँव, अँगुली, गुल्फ स्कन्ध तथा कमर की आमवातजनित वेदना शान्त होती है॥ ४॥

रूक्षस्वेदो विधातव्यो वालुकापुटकैस्तथा॥ ५॥

आमवात में वालू की पोटली द्वारा रूक्ष स्वेदन करने से भी रोगी को लाभ होता है॥ ५॥

हिंस्रादिलेप।

गोजलपिष्टं हिंस्राकेमुकशिग्रूद्भवं मूलम्। भाकुयुतं परिलेपात् सामसमीरणः क्षुत्र॥ ६॥

एषां समभागं गोमूत्रेण पिष्ट्वा वेदनास्थाने प्रलेपः।

छोटी कटेरी, केउआँ, सहिंजने की जड़, वल्मीकमृत्तिका (बामी की मिट्टी), इन्हें समभाग लेकर गोमूत्र से पीसकर वेदना के स्थान में लेप करने से आमवातजनित पीड़ा शान्त होती है॥ ६॥

शतपुष्पादि लेप।

शतपुष्पा वचा शिग्रुश्वदंष्ट्राथरुणस्तथा। सहदेवी च वर्षाभूः शठी च संप्रसारिणी॥ ७॥ सतकारीफलं हिङ्गु शुक्तकाञ्जिकपेषितम्। आमवातहरं श्रेष्ठं सुखोष्णं लेपनं हितम्॥ ८॥

सौंफ, बच, सहिंजने की छाल, गोखरू, वरुना की छाल, सरेटी पुनर्नवा, कचूर, गन्धप्रसारिणी, लक्ष्मीफली और हींग इनको समभाग लेकर सिर्का या काँजी में पीसकर थोड़ा गरम करके शोथ के स्थान में गुनगुना लेप करना चाहिए। यह लेप आमवातनाशक है॥ ७-८॥

रास्नादिदशमूल।

दशमूलयमृतैरण्डरास्नानागरदारुभिः। क्वाथोरुबूकतैलेन सामं हन्त्यनिलं गुरुम्॥ ९

दशमूल, गिलोय, एरण्डमूल, रास्ना, सोंठ और देवदारु ये सब मिलाकर दो तोले। पाकार्थ जल आध सेर, शेष आधपाव। एरण्ड के तैल के साथ इस क्वाथ का पान करने से आमवात शान्त होता है॥ ९॥

रास्नासप्तक।

रास्नामृतारग्वधदेवदारुत्रिकण्टकैरण्डपुनर्नवानाम्। क्वाथं पिबेन्नागरचूर्णमिश्रं जङ्घोरुपार्श्वत्रिकपृष्ठशूली॥ १०॥

रास्ना, गिलोय अमिलतास का गूदा, देवदारु, गोखरू, एरण्डमूल और पुनर्नवा ये सब मिलाकर दो तोले। जल आधा सेर, शेष आध पाव। इस क्वाथ में सोंठ का चूर्ण मिलाकर पान करे तो जंघा ऊरु, पसली, त्रिक और पीठ का शूल आराम होता है॥ १०॥

रास्नापञ्चक।

रास्ना गुडूचीमेरण्डं देवदारु महौषधम्। पिबेत्सार्वाङ्गिके वाते सामे सन्ध्यस्थिमज्जगे॥ ११॥

रास्नापञ्चके रास्नासप्तके च उक्ते भेदार्थमेरण्डतैलं प्रक्षिपन्ति वृद्धाः।

रास्ना, गिलोय एरण्डमूल देवदारु और सोंठ का क्वाथ सन्धिगत, अस्थिगत, मज्जाश्रित और सार्वाङ्गिक आमवात व्याधि में हितकर है॥ ११॥

रास्नादिपञ्चक या रास्नादिसप्तक के उक्त क्वाथ में विरेचनार्थ एरण्डतैल मिलाना चाहिए, ऐसा वृद्ध वैद्य कहते हैं।

दशमूलीकषायेण पिबेद्वा नागराम्भसा। कुक्षिबस्तिकटीशूले तैलमेरण्डसम्भवम्॥ १२॥

दशमूल या सोंठ के उष्ण क्वाथ के साथ एरण्डतैल के पीने से कुक्षिशूल, बस्तिशूल तथा कटिशूल शान्त होते हैं ॥ १२ ॥

आमवातगजेन्द्रस्य शरीरवनचारिणः । एक एव निहन्तासावेरण्डस्नेहकेसरी ॥ १३ ॥

शरीररूपी वन में विचरते हुए आमवातरूपी हाथी को मारनेवाला केवल एरण्डतैलरूपी सिंह ही है। अर्थात् एरण्डतैल आमवात में अत्यन्त लाभदायक है । मात्रा ½ तोले से २½ तोले तक है ॥ १३ ॥

एरण्डतैलयुक्तां हरीतकीं भक्षयेन्नरो विधिवत् । आमानिलार्त्तियुक्तो गृध्रसिवृद्ध्यर्दितो नित्यम् ॥ १४ ॥

आमवात, गृध्रसी तथा वृद्धिरोग से पीड़ित मनुष्य को एरण्डतैल के साथ हड़ का सेवन करना चाहिए ॥ १४ ॥

भृष्ट्वाथवा कटुतैलेऽग्नेः सहारग्वधपल्लवम् । किंवाम्लकाञ्जिके पक्त्वा खादेदामानिलापहम् ॥ १५ ॥

अमलतास के पत्तों को सरसों के तैल में भूनकर भोजन के साथ खाने से अथवा पत्तों को खट्टी काँजी में पकाकर सेवन करने से आमवात नष्ट होता है । मात्रा एक तोला से दो तोला तक ॥ १५ ॥

माषं नागरचूर्णस्य काञ्जिकेन पिबेत् सदा । आमवातप्रशमनं कफवातहरं परम् ॥ १६ ॥

१ माशा सोंठ का चूर्ण काँजी के साथ पीने से आमवात और कफवात शान्त होते हैं ॥ १६ ॥

त्रिवृत्सैन्धवशुण्ठीनामारनालेन चूर्णितम् । पीत्वा विरिच्यते जन्तुरामवातहरं परम् ॥ १७ ॥

निसोथ, सेंधानमक और सोंठ इनके चूर्ण को काँजी के साथ पीने से विरेचन होकर आमवात शान्त हो जाता है ॥ १७ ॥

सप्ताहं त्रिवृतश्चूर्णं त्रिवृत्क्वाथेन भावितम् । काञ्जिकेन तु तत्पीतं रेचयेदामवातिनम् ॥ १८ ॥

आमवात के रोगी को विरेचन देने के लिए निसोथ के चूर्ण को सात दिन तक निसोथ के क्वाथ से भावित कर काँजी के साथ सेवन कराना चाहिए ॥ १८ ॥ मात्रा ४ माशा ॥

शट्यादि क्वाथ ।

शटी शुण्ठ्यभया चोग्रा देवाह्वातिविषामृता । कषायमामवातस्य पाचनं रूक्षभोजनम् ॥ १९ ॥

कचूर, सोंठ, हड़, वच, देवदारु, अतीस, गिलोय मिलकर ४ तोला, क्वाथ के लिये जल ३२ तोला शेष ४ तोला । यह क्वाथ आमवात में पाचन है। पथ्य—रूक्ष द्रव्यों का भोजन ॥ १९ ॥

रास्नादि क्वाथ ।

रास्नैरण्डशतावरीसहचरा दुःस्पर्शवासामृता देवाह्वातिविषाभयाघनशटीशुण्ठीकषायः कृतः । पीतः सोरुबुतैल एष विहितः सामे सशूलेऽनिले जङ्घोरुत्रिकपार्श्वपृष्ठजठरक्रोडेषु वातार्त्तिजित् ॥२०॥

रासना, एरण्डमूल, शतावरी, पियाबासा, धमासा, अडूसा, गिलोय, देवदारु, अतीस, हड़, मोथा, कचूर, सोंठ मिलाकर ४ तोला, पाक के लिये जल ३२ तोला, शेष ४ तोला इस क्वाथ को अण्डी के तैल के साथ पीने से शूलयुक्त आमवात तथा जंघा, उरु, त्रिकसन्धि, पार्श्व पृष्ठ, उदर एवं कुक्षिगत वातवेदना शान्त होती है ॥ २० ॥

महारास्नादि पाचन ।

रास्ना वाजारिमूलञ्च वासकञ्च दुरालभम् । शटी दारु बला मुस्तं नागराति-

विपाभया ॥२१॥ श्वदंष्ट्रा व्याधिघातश्च मिसिधान्यपुनर्नवाः । अश्वगन्धा मृता कृष्णा वृद्धदारः शतावरी ॥ २२ ॥ वचा सहचरश्चैव चविका बृहतीद्वयम् । सम-भागान्वितैरेतैः रास्नाद्विगुणभागिकैः २३ कषायं पाचयेत्सिद्धमष्टभागावशेषितम् । शुण्ठीचूर्णसमायुक्तमाभाग्येन युतं तथा २४ अलम्बुषादिसंयुक्तमजामोदादिसंयुतम् । यथादोषं यथाव्याधिः प्रक्षेपं कारयेद्भिषक् ॥२५॥ सर्वेषु वातरोगेषु सन्धिमज्जगतेषु च । आनाहेषु च सर्वेषु सर्वगात्रानुकम्पने ॥ २६ ॥ कुब्जके वामने चैव पक्षाघाते तथार्दिते । जानुजङ्घास्थिपीडासु गृध्रस्यां च हनुग्रहे ॥२७॥ सर्वेषां पाचनानान्तु श्रेष्ठमेतद्धि पाचनम् । महारास्नादिकं नाम प्रजापतिविनिर्मितम् ॥ २८ ॥

चव्यकी की जड़, अडूसा, धमासा, कचूर, देवदारु, खरेटी, मोथा, सोंठ, अतीस, हड़, गोखरू, अमिलतास, सौंफ, धनिया, सांठी, असगन्ध, गिलोय, पीपल, विधारे की जड़, शतावर, बच, पीले फूल का पियावासा, चव्य, छोटी कटेरी, बड़ी कटेरी हरएक १ भाग, रास्ना २ भाग। इसमें १६ गुना जल डालकर पकावे, जब आठवाँ भाग बाकी रहे तब उतार कर छान ले और रोगी को पिलावे तथा व्याधि के अनुसार इस क्वाथ में शुण्ठीचूर्ण, आभायचूर्ण, अलम्बुषादि चूर्ण एवं अजमोदादि चूर्ण डालकर सेवन कराना चाहिए। इसके सेवन से सन्धिगत एवं मज्जागत वातव्याधि, आनाह, सर्वाङ्गकम्प, कुब्जरोग, पक्षाघात, अर्दित तथा जानुजङ्घास्थिगत पीड़ा, गृध्रसी, हनुस्तम्भ आदि रोग नष्ट होते हैं। सब पाचनों में प्रजापतिनिर्मित यह महारास्नादि पाचन सबसे उत्तम है ॥ २१–२८ ॥

शुण्ठीगोक्षुरकक्वाथः प्रातःप्रातर्निषेवितः। सामे वाते कटीशूले पाचनो रुग्विनाशनः॥ यवक्षारसमायुक्तो मूत्रकृच्छ्रविनाशनः २९॥ प्रचाराच्छुण्ठीभागमेकं गोक्षुरकभागत्रयं गृहीत्वा कर्षार्द्धस्य क्वाथः विरेचनार्थं पुनर्यवक्षारप्रक्षेपेणाप्ययं पेयः।

सोंठ १ भाग, गोखरू ३ भाग, इनका क्वाथ कर प्रातःकाल सेवन करने से आमवात तथा कटिशूल नष्ट होते हैं। यह क्वाथ पाचन तथा वेदना नाशक है। इस क्वाथ में जवाखार डालकर पीने से मूत्रकृच्छ्र नष्ट होता है। मलविरेचन तथा मूत्रविरेचन के लिये जवाखार डालना चाहिए ॥ २९ ॥

शटीविश्वौषधीकल्कं वर्षाभूक्वाथसंयुतम् । सप्तरात्रं पिबेज्जन्तुरामवातविपाचनम् ॥ ३० ॥

पुनर्नवा के क्वाथ के साथ कचूर तथा सोंठ के १ माशे चूर्ण को सात दिन तक आमवात में सेवन करने से आमरस का परिपाक होता है ॥ ३० ॥

आमवाते कणायुक्तं दशमूली जलं पिबेत् ३१

आमवात में दशमूल के क्वाथ में पीपल डाल कर रोगी को पिलाना चाहिए ॥ ३१ ॥

रसोनादि क्वाथ।

रसोनविश्वनिर्गुण्डीक्वाथमामार्दितः पिबेत्। नातः परतरं किञ्चिदामवातस्य भेषजम् ३२

लहसुन, सोंठ तथा सँभालू मिलाकर आधा तोला, जल १२ तोला, शेष ८ तोला, यह क्वाथ आमवात में अत्यन्त हितकर है ॥ ३२ ॥

चित्रकादि चूर्ण और देवदार्वादि चूर्ण।

चित्रकं कटुका पाठा कलिङ्गातिविषामृताः। देवदारु वचा मुस्तनागरातिविषाभयाः॥३३॥ पिबेदुष्णाम्बुना नित्यमामवातस्य भेषजम्॥

( १ ) चित्रक, कुटकी, पाठा, इन्द्रजौ, अतीस,

गिलोय, या (२) देवदारु, वच, मोथा, सोंठ, अतीस, हड़, इन दोनों योगों में से किसी एक चूर्ण को (रोगी की अवस्था के अनुसार) गरम जल से प्रतिदिन सेवन कराना चाहिए। मात्रा ३ माशे से ६ माशे तक ॥ ३३ ॥

### अमृतादि चूर्ण ।

अमृतानागरगोक्षुरमुण्डितिकावरुणकैः कृतं चूर्णम् । मस्त्वारनालपीतमामानिलनाशनं ख्यातम् ॥ ३४ ॥

गिलोय, सोंठ, गोखरू, गोरखमुण्डी, वरना इनके चूर्ण को दही के पानी अथवा कांजी के साथ सेवन कराने से आमवात अच्छा होता है। मात्रा—३ माशे से ६ माशे तक ॥ ३४ ॥

### शतपुष्पाद्य चूर्ण ।

शतपुष्पाविडङ्गानि सैन्धवं मरिचं समम् । चूर्णमुष्णाम्बुना पीतमग्निसन्दीपनं परम् ३५

सोया, वायविडङ्ग, सेंधा नमक, कालीमिर्च इनके चूर्ण को गरम जल के साथ पीने से अग्नि प्रदीप्त होकर आमवात नष्ट होता है। मात्रा—३ माशा ॥ ३५ ॥

### हिङ्ग्वाद्य चूर्ण ।

हिंगु चव्यं विडं शुण्ठी कृष्णाजाजी सपौष्करम् । भागोत्तरमिदं चूर्णं पीतं वातामजिद् भवेत् ॥ ३६ ॥

हींग १ भाग, चव्य २ भाग, बिड नमक ३ भाग, सोंठ ४ भाग, पीपल ५ भाग, काला जीरा ६ भाग, पोहकरमूल ७ भाग, इन चूर्ण को गरम जल के साथ पीने से आमवात अच्छा होता है। मात्रा—३ माशा ॥ ३६ ॥

### वैश्वानरचूर्ण ।

मणिमन्थस्य भागौ द्वौ यमान्यास्तद्वदेव हि । भागास्त्रयोऽजमोदाया नागराद्भागपञ्चकम् ॥ ३७ ॥ दश द्वौ च हरीतक्याः श्लक्ष्णचूर्णीकृताः शुभाः । मस्त्वारनालतक्रेण सर्पिषोष्णोदकेन वा ॥ ३८ ॥ पीतं जयत्यामवातं गुल्मं हृद्बस्तिजान् गदान् । प्लीहानं ग्रन्थिशूलादीनर्शांस्यानाहमेव च ॥ ३९ ॥ विबन्धं वातजान् रोगांस्तथैव हस्तपादजान् । वातानुलोमनमिदं चूर्णं वैश्वानरं स्मृतम् ॥ ४० ॥

अजमोदा यमानी एवं सर्वत्रान्तःपरिमार्जके बहिःसम्मार्जने पुनरजमोदैव । उक्तं हि—"अन्तः सम्मार्जने ज्ञेयोऽजमोदा यमानिका । बहिःसम्मार्जने ज्ञेया चाजमोदाजमोदिका ॥")

सैंधवनमक २ भाग, अजवाइन २ भाग, अजमोद ३ भाग (अजवाइन के दो पाँच भाग से), सोंठ ५ भाग और बड़ी हड़ १२ भाग, इन सबके चूर्ण को दही के पानी, कांजी, तक्र, घृत और उष्ण जल इनमें से किसी एक के साथ सेवन करावे। मात्रा चूर्ण का ३ माशा। इस चूर्ण के सेवन से आमवात गुल्म, हृद्रोग, बस्तिरोग, प्लीहा, ग्रन्थि, शूल, अर्श, आनाह, मलबद्धता, वातजन्यरोग तथा हाथ और पाँव के रोग नष्ट होते हैं। यह वैश्वानर चूर्ण वातानुलोमन है ॥ ३७-४० ॥

### पुनर्नवादि चूर्ण ।

पुनर्नवामृता शुण्ठी शताह्वा वृद्धदारकम् । शटी मुण्डितिकाचूर्णमारनालेन पाययेत् ॥ ४१ ॥ आमाशयोत्थवातघ्नं चूर्णं पेयं सुखाम्बुना । आमवातं निहन्त्याशु गृध्रसीमुद्धतामपि ॥ ४२ ॥

सफेद सांठी, गिलोय, सोंठ, सोया, विधारा, कचूर तथा गोरखमुण्डी इनके चूर्ण को बराबर मात्रा में मिलाकर यथायोग्य कांजी अथवा गरम जल के साथ रोगी को सेवन करावें। मात्रा ३ माशे। इसके सेवन से आमाशय में पैदा हुआ वात, आमवात एवं गृध्रसी आदि रोग नष्ट होते हैं ॥ ४१-४२ ॥

पथ्याद्य चूर्ण।

पथ्याविश्वयमानीभिस्तुल्याभिश्चूर्णितं पिबेत्। तक्रेणोष्णोदकेनापि काञ्जिकेनाथवा पुनः॥४३॥ आमवाते निहन्त्याशु शोथं मन्दाग्नितामपि। पीनसं कासहृद्रोगं स्वरभेदमरोचकम्॥ ४४॥

बड़ी हड़, सोंठ, अजवाइन, इनके चूर्ण को बराबर मात्रा में मिलाकर छाँछ, गरम जल अथवा काँजी से सेवन करावें। मात्रा ३ माशे। इस चूर्ण के प्रयोग से आमवात, सूजन, मन्दाग्नि, पीनस, खाँसी, हृद्रोग, स्वरभेद तथा अरुचि आदि रोग अच्छे होते हैं॥ ४३-४४॥

आमाद्य चूर्ण।

आभारास्ना गुडूची च शतमूली महौषधम्। शतपुष्पाश्वगन्धा च हबुषा वृद्धदारकः॥ ४५॥ यमानी चाजमोदा च समभागानि कारयेत्। सूक्ष्मचूर्णमिदं कृत्वा द्विमाषकमितं पिबेत्॥ ४६॥ मद्यमांसरसैर्यूषैस्तक्रैरुष्णोदकेन वा। सर्पिषा वापि लेह्यन्तु दधिमण्डेन वा पुनः॥ ४७॥ अस्थिसन्धिगतं वायु स्नायुमज्जाश्रितञ्च यत्। कटिग्रहं गृध्रसीञ्च मन्यास्तम्भं हनुग्रहम्॥४८॥ ये च कोष्ठगता रोगास्तांश्च सर्वान् प्रणाशयेत्। आभाद्येनामचूर्णोऽयं सर्वव्याधिनिबर्हणः॥ ४९॥

बबूल की छाल, रास्ना, गिलोय, शतावर, सोंठ, मोथा, असगन्ध, हाऊबेर, विधारा, अजवाइन तथा अजमोदा, हरएक के चूर्ण को बराबर मात्रा में मिलाकर रोगी को यथायोग्य मात्रा में सेवन करावें। मात्रा—२ माशे। अनुपान शराब, मांसरस का जूस, छाँछ, गरम जल, घृत अथवा दधिमण्ड (मस्तु)। इसके सेवन से अस्थिगत, सन्धिगत, स्नायुगत तथा मज्जा में आश्रित वात, कमर में दर्द, गृध्रसी, मन्यास्तम्भ, हनुग्रह तथा अन्य जो भी कोष्ठ में होनेवाले वातज रोग हैं, वे अच्छे होते हैं। यह आमाद्य चूर्ण सम्पूर्ण रोगों का नाश करनेवाला है। इस चूर्ण में इसके अन्तःपरिमार्जक होने के कारण अजमोदा का अर्थ अजवाइन ही करना चाहिए। इसी प्रकार अन्यत्र भी समझना। इस साधारण नियम के अनुसार इस चूर्ण में अजवाइन के दो भाग लेने चाहिए॥ ४५-४९॥

अलम्बुषाद्य चूर्ण।

अलम्बुषां गोक्षुरकं गुडूचीं वृद्धदारकम्। पिप्पलीं त्रिवृतां मुस्तं वरुणां सुपुनर्नवम्॥ ५०॥ त्रिफलां नागरञ्चैव श्लक्ष्णचूर्णानि कारयेत्। मस्त्वारनालतक्रेण पयोमांसरसेन वा॥५१॥ आमवातं निहन्त्याशु श्वयथुं सन्धिसंस्थितम्। प्लीहगुल्मोदरानाहदुर्नामानि विनाशयेत्॥५२॥ अग्निश्च कुरुते दीप्तं तेजोवृद्धिं बलं तथा। वातरोगान् जयत्येष सन्धिमज्जगतानपि॥ ५३॥

गोरखमुण्डी, गोखरू, गिलोय, विधारे की जड़, पीपल, निसोत, मोथा, बरना की जड़ की छाल, सफेद साँठी, हड़, बहेड़ा, आँवला, सोंठ, इनका महीन चूर्ण कर बराबर मात्रा में मिलाकर सेवन करावे। मात्रा—२ माशे। अनुपान—दही का पानी, काँजी, छाछ, दूध, अथवा मांसरस। इसके सेवन से आमवात, सन्धिस्थित सूजन, प्लीहा, गुल्म, उदर रोग, अफरा, बवासीर तथा सन्धिगत एवं मज्जागत वातरोग अच्छे होते हैं। यह चूर्ण अग्नि को तीव्र करता है। तथा तेज और बल को बढ़ाता है॥ ५०-५३॥

अपरअलम्बुषाद्य चूर्ण।

अलम्बुषागोक्षुरकत्रिफलानागरामृताः। यथोत्तरं भागवृद्धाश्श्यामाचूर्णं तु तत्समम्॥ ५४॥ पिबेन्मस्तुसुरातक्रकाञ्जिकोष्णोदकेन वा। पीतं नयत्यामवातं

सशोफं वातशोणितम् ॥ ५५ ॥ त्रिकजानूरुसन्धिस्थं ज्वरारोचकनाशनम् । अलम्बुषाद्यमिदं चूर्णं रोगानीकविनाशनम् ॥ ५६ ॥ हरीतक्यक्षधात्रीभिः प्रसिद्धा त्रिफलाक्रमात् । प्रत्येकं तेन चामुष्माद्भागवृद्धिर्यथोत्तरम् ॥ ५७ ॥

अत्र श्यामा वृद्धदारक इति चक्रदत्तटीकायां शिवदासः

गोरखमुण्डी १ भाग, गोखरू २ भाग, हर्र ३ भाग, बहेड़ा ४ भाग, आँवला ५ भाग, सोंठ ६ भाग, गिलोय ७ भाग, विधारे की जड़ २८ भाग, इनके महीन चूर्ण को मिलाकर दही के पानी, शराब, दूध, कांजी अथवा गरम जल आदि के अनुपान से यथायोग्य मात्रा में सेवन करने से आमवात, ज्वर, अरुचि और त्रिकसन्धि, जानु तथा ऊरु, सन्धिस्थ, शोथयुक्त वातरक्त अच्छा होता है। मात्रा-३ माशा ॥ ५५-५७ ॥

### अजमोदादिवटक।

अजमोदामरिचपिप्पलीविडङ्गसुरदारुचित्रकशताह्वाः । सैन्धवपिप्पलीमूलं भागा नवकस्य पलिकाः स्युः ॥ ५८ ॥ शुण्ठी दशपलिका स्यात्पलानि तावन्ति वृद्धदारस्य । पथ्या पञ्च पलानि च सर्वाण्येकत्र सञ्चूर्ण्य ॥ ५९ ॥ समगुडवटकानदतश्चूर्णं वाप्युष्णवारिणा पिबतः । नश्यन्त्यामानिलजाः सर्वे रोगाः सुकष्टाश्च ॥ ६० ॥ विसूचिका प्रतितूनी हृद्रोगा गृध्रसी चोग्रा । कटिबस्तिगुदस्फुटनञ्चैवास्थिजङ्घयोस्तीव्रम् ॥ ६१ ॥ श्वयथुस्तथाङ्गसन्धिषु ये चान्येऽप्यामवातसम्भूताः । सर्वे प्रयान्ति नाशं तम इव सूर्यांशुविध्वस्तम् ॥ ६२ ॥

अजमोदादिवटके सर्वचूर्णसमे… किञ्चिदुदकं दत्त्वा वह्नौ गुडं द्रवीकृत्य तत्र चूर्णं प्रक्षिप्य वटकाः कार्याः चूर्णं वेति गुडं विहाय केवलमुष्णोदकादिभिः पेयमिति भानुः।

अजमोद, कालीमिर्च, पीपरि, वायविडङ्ग, देवदारु, चीता, सौंफ, सैन्धवलवण और पिपरामूल चार-चार तोले, सोंठ आध सेर, विधारा के बीज आध सेर, हर्र पाव भर, इन सबका चूर्ण एकत्र करे। पश्चात् सम्पूर्ण चूर्ण के समान गुड़ मिलाकर वटक बनावें। वटक की मात्रा ३ से ६ माशे की है। अनुपान उष्ण जल। यह वटक आमवात, आमवातजन्य अन्यान्य रोग, विसूचिका, प्रतितूनी, हृद्रोग, उग्र गृध्रसी, कटिशूल, बस्तिशूल, गुदा, अस्थि एवं जङ्घा आदि की तीव्र वेदना तथा सन्धिशोथ और आमवात से उत्पन्न अनेक रोगों को ऐसे नष्ट करता है जैसे भगवान् भास्कर की किरणें अन्धकार को नष्ट करती हैं। जो लोग वटक न बनाना चाहें वे बिना गुड़ के चूर्ण को ही उष्ण जल के साथ सेवन कर सकते हैं। चूर्ण की मात्रा ३ माशे। वटक बनाने की विधि यह है कि प्रथम गुड़ में थोड़ा जल डालकर आग पर रक्खे। जब उसकी वटक बनाने योग्य चाशनी हो जाय तो उसमें चूर्ण मिलाकर अच्छी से अच्छी प्रकार मिलाकर वटक बना ले ॥ ५८-६२ ॥

### आमगजसिंहमोदक।

शुण्ठीचूर्णस्य प्रत्येकं यमान्याश्च पलाष्टकम् । जीरकस्य पलद्वन्द्वं धन्याकस्य पलद्वयम् ॥ ६३ ॥ पलैकं शतपुष्पाया लवङ्गस्य पलं तथा । बृहणस्य पलं ग्राह्यं मरिचस्य पलं भवेत् ॥ ६४ ॥ त्रिवृतात्रिफलाक्षारपिप्पलीनां पलं पलम् । एतेषां सर्वचूर्णानां खण्डं दद्याच्चतुर्गुणम् ॥ ६५ ॥ घृतेन गुडकीकृत्य मोदको मधुना कृतः । [illegible]

त्वचः ॥ ६६ ॥ चतुर्भिरधिवासोऽस्य तोलिकं खादयेद् बुधः। शरीरं वीक्ष्य मात्रास्य युक्त्या वा बुद्धिवर्द्धनम् ॥ ६७ ॥ आमवातप्रशमनः कटीग्रहविनाशनः। शूलघ्नोरक्तपित्तघ्नश्चाम्लपित्तविनाशनः ६८ श्रीमता चन्द्रनाथेन गुरुणा भाषितं मयि। श्रीमद्गहननाथोऽयं कृतवान् मोदकं शुभम् ॥ ६९ ॥ गर्जत्यामगजेन्द्रोऽयम-जीर्णवनमागतः। यथासिंहो वने हन्ति दन्तिनं बलिनं शुभम् ॥ तथामराजकरिणं निहन्त्येव न संशयः ॥ ७० ॥

शट्यादीनां चतुर्णां प्रत्येकमेककर्षं सुगममन्यत्।

सोंठ का चूर्ण ६४ तोले, अजवायन ३२ तोले, जीरा ८ तोले, धनियां ८ तोले, सौंफ ४ तोले, लौंग ४ तोले, सुहागा ४ तोले, कालीमिर्च ४ तोले तथा निसोत, हड़, बहेड़ा, आंवला, उयाखार और पीपरि चार-चार तोले और सम्पूर्ण चूर्ण से चौगुनी खाँड़। घृत और मधु के साथ इनके मोदक ( लड्डू ) बनाकर छोटी इलायची, तेजपात तथा दालचीनी इनका एक-एक तोले चूर्ण लेकर उन मोदकों पर छिड़ककर इनको सुगन्धित कर दे। मात्रा ६ माशे से १ तोला पर्यन्त। रोगी के बलाबल के अनुसार मात्रा में न्यूनाधिक्य भी हो सकता है। पहले छोटी मात्रा से आरम्भ कर क्रमशः बढ़ाना अच्छा है। यह मोदक आमवात, कटि-ग्रह, शूल, रक्तपित्त तथा अम्लपित्त को नष्ट करता है। अजीर्णवन में आया हुआ आम-वातरूपी गजराज तब तक गर्जता है जब तक यह मोदकरूपी सिंह नहीं आता। जैसे सिंह वन में बलवान् गजराज को मार डालता है वैसे ही यह मोदकरूपी सिंह आमवातरूपी गजराज को निःसंदेह मार डालता है। यह श्रीगहननाथ का बनाया हुआ मोदक श्रीमान् चन्द्रनाथ ने कहा है ॥ ६६–७० ॥

रसोनपिण्ड।

रसोनस्य पलशतं तिलस्य कुडवं तथा। हिङ्गु त्रिकटुकं क्षारौ द्वौ पञ्च लवणानि च ॥ ७१ ॥ शतपुष्पा तथा कुष्ठं पिप्पलीमूलचित्रकौ। अजमोदा यमानी च धन्याकश्चापि बुद्धिमान ॥ ७२ ॥ प्रत्येकं तु पलञ्चैषां श्लक्ष्णचूर्णानि कारयेत्। घृतभाण्डे दृढे चैतत् स्थापयेद्दिन-षोडशम् ॥ ७३ ॥ प्रक्षिप्य तैलमानीञ्च प्रस्थार्द्धं काञ्जिकस्य च। खादेत्कर्षप्रमाणं तु तोयं मद्यं पिबेदनु ॥ ७४ ॥ आमवाते तथा वाते सर्वाङ्गैकाङ्गसंश्रये। अपस्मारेऽनले मन्दे कासश्वासगरेषु च। उन्मादे वातभग्ने च शूले जन्तोः प्रशस्यते ॥ ७५ ॥

छिलका दूर किया लहसुन ५ सेर, तिल (छिलका-रहित) तिल पावभर, हींग त्रिकटु, यवखार, सज्जी खार, पञ्चलवण, सौंफ, कूठ, पिपरामूल, चीता, अजमोद, अजवायन और धनिया चार-चार तोले। इन सब औषधियों के चूर्ण को किसी घृत के पात्र में रखकर उसमें आध सेर तिलतैल और आध सेर काँजी मिलाकर १६ दिन तक धान्य की राशि में रक्खे, पश्चात् एक एक तोला इसका सेवन करे और ऊपर से जल या मद्य पिये। इसके द्वारा आमवात, सर्वाङ्गवात, एकाङ्गवात, अपस्मार, अग्निमान्द्य, कास, श्वास, विष, उन्माद, वातभग्न, और शूल आदि रोग नष्ट होते हैं ॥ ७१–७५ ॥

महारसोनपिण्ड।

रसोनपलशतं शुण्ठ्या तदर्द्धं निस्तुषात्तिलात्। पात्रे गव्यस्य तक्रस्य पिष्ट्वा चैतानि संक्षिपेत् ॥ ७६ ॥ त्रिकटु धान्यकं पथ्यं चित्रकं गजपिप्पली। अजमोदा त्वगेला च ग्रन्थिकञ्च पलांशिकम् ॥ ७७ ॥ शर्करायाः पलान्यष्टौ पलांशं मरिचस्य

च। कुष्ठाजाज्योश्च चत्वारि मधुनः कुडवं तथा ॥ ७८ ॥ आर्द्रकस्य च चत्वारि सर्पिषोऽष्टौ पलानि च। तिलतैलस्य तावन्ति शुक्तकस्यापि विंशतिः ॥ ७९ ॥ सिद्धार्थकस्य चत्वारि राजिकायास्तथैव च। कर्षप्रमाणं दातव्यं हिङ्गु लवणपञ्चकम् ॥ ८० ॥ एकीकृत्य दृढे कुम्भे धान्यराशौ निधापयेत्। द्वादशाहात् समुद्धृत्य प्रातः खादेद् यथाबलम् ॥ ८१ ॥ सुरां सौवीरकं सीधुं चीरश्चानुपिबेन्नरः। जीर्णे यथेप्सितं भोज्यं दधि पिष्टान्नवर्जितम् ॥ ८२ ॥ एकमासप्रयोगेण सर्वान् व्याधीन व्यपोहति। अशीतिं वातजान् रोगान् चत्वारिंशच्च पैत्तिकान् ॥ ८३ ॥ विंशतिं श्लैष्मिकांश्चैव प्रमेहानपि विंशतिम्। अर्शांसि षट्प्रकाराणि गुल्मं पञ्चविधं तथा ॥ ८४ ॥ अष्टादशविधं कुष्ठमेकादशविधं क्षयम्। श्वयथुं योनिशूलञ्च सर्वमाशु विनाशयेत् ॥ ८५ ॥ क्षतसन्ध्यस्थिभग्नानां सन्धानकरणः परः। हृद्योऽग्निकरो हृद्य आयुष्यो बलवर्द्धनः ॥ महारसोनपिण्डोऽयमामवातकुलान्तकः ॥ ८६ ॥

सर्वमेकीकृत्य चण्डातपे शोषयित्वा स्निग्धभाण्डे संस्थाप्य धान्यराशौ द्वादशदिनानि स्थाप्यं तत उद्धृत्य आकृष्य खाद्यं मापं ८ उक्तमनुपानम्।

छिला हुआ लहसुन २ सेर, छिलकारहित तिल २॥ सेर, गाय के दूध का तक्र १ सेर १२ तोले, त्रिकटु, धनिया, वच, चित्रक, गजपीपरि, अजमोद, दालचीनी, इलायची और पिपरामूल चार-चार तोले, जीरा ३१ तोले, हिंग ४ तोले, घृत १६ तोले, जीरा १६ तोले, मधु १२ तोले, अदरख १६ तोले, घृत १६ तोले, तिल-तैल १६ तोले, काँजी ८० तोले, श्वेत सरसों १६ तोले, राई १६ तोले, हींग १ तोला, पाँचों नमक एक-एक तोला। इन सब औषधियों में जो-जो कूटने-पीसने के योग्य हैं उनको कूट-पीस ले। पश्चात् पूर्वोक्त सब औषधियों को एक चिकने पात्र (घड़े) में रखकर तीव्र धूप में कुछ समय तक रक्खे। पश्चात् पात्र का मुख बन्द कर धान्यराशि में १२ दिन तक रक्खे। फिर निकालकर प्रातःकाल रोगी का बलाबल देखकर ८ माशे तक की मात्रा दे और ऊपर से सुरा, सौवीर, सीधु या दूध पीवे। औषधि के जीर्ण होने पर दधि और पीठी के बने पदार्थों के अतिरिक्त अन्यान्य वस्तुओं को यथेष्ट खावे। एक मासपर्यन्त सेवन करने से यह सब प्रकार के रोगों को नष्ट करता है। ८० प्रकार के वात रोग, ४० प्रकार के पैत्तिक रोग, २० प्रकार के श्लैष्मिक रोग २० प्रकार के प्रमेह, ६ प्रकार के अर्श (बवासीर), ५ प्रकार के गुल्म, १८ प्रकार के कुष्ठ, ११ प्रकार के क्षय, शोथ तथा योनिशूल आदि सब रोगों को शीघ्र नष्ट करता है। संधिभंग तथा अस्थिभंग को जोड़नेवाला, हृदय को हितकारी, आयुष्कार तथा बलवर्धक और दृष्टिवर्धक है। यह महारसोनपिण्ड आमवात को समूल नाश करता है ॥ ७६—८६ ॥

## वातारिगुग्गुलु।

वातारितैलसंयुक्तं गन्धकं पुरसंयुतम्। फलत्रययुतं कृत्वा पिष्टयित्वा चिरं रुजी ॥ ८७ ॥ भक्षयेत् प्रत्यहं प्रातरुष्णतोयानुपानतः। दिने दिने प्रयोक्तव्य मासमेकं निरन्तरम् ॥ ८८ ॥ सामवातं कटीशूलं गृध्रसीं खञ्जपङ्गुताम्। वातरक्तं सशोथञ्च महार्दं क्रोष्टुशीर्षकम् ॥ शमयेद्बहुलो दृष्टमपि पथ्यविवर्जितम् ॥ ८९ ॥

एरण्डतैल, गन्धक, गुग्गुलु और त्रिफला एकत्र पीसकर प्रतिदिन प्रातःकाल एक मास तक उष्ण जल के साथ सेवन करे। यह 'वातारि गुग्गुलु' आमवात, कटिशूल, गृध्रसी, खञ्जता,

पंगुता, शोथयुक्त वातरक्त तथा दाहयुक्त क्रोष्टुशीर्ष आदि रोगों को नष्ट करता है ॥ ८७-८९ ॥

### योगराजगुग्गुलु।

चित्रकं पिप्पलीमूलं यमानी कारवी तथा। विडङ्गान्यजमोदा च जीरकं सुरदारु च ॥ ९० ॥ चव्यैला सैन्धवं कुष्ठं रास्ना गोक्षुरधान्यकम्। त्रिफलामुस्तकं व्योषं त्वगुशीरं यवाग्रजम् ॥ ९१ ॥ तालीशपत्रं पत्रञ्च श्लक्ष्णचूर्णानि कारयेत्। यावन्त्येतानि चूर्णानि तावन्मात्रं तु गुग्गुलुम् ॥ ९२ ॥ सम्मर्द्य सर्पिषा गाढं स्निग्धे भाण्डे निधापयेत्। अतो मात्रां प्रयुञ्जीत यथेष्टाहारवानपि ॥ ९३ ॥ योगराज इति ख्यातो योगोऽयममृतोपमः। आमवाताढ्यवातादीन् कृमिदुष्टव्रणानि च ॥ ९४ ॥ प्लीहगुल्मोदरानाहदुर्नामानि विनाशयेत्। अग्निञ्च कुरुते दीप्तं तेजोवृद्धिं बलं तथा॥ वातरोगान् जयत्येष सन्धिमज्जगतानपि ॥ ९५ ॥

आदौ सिद्धगुग्गुलुं घृतेन पिष्टयित्वा पश्चात् सर्वचूर्णेन सह घृतेन पिष्टयित्वा स्निग्धभाण्डे स्थापयेत्ततोऽष्टौ माषकानुष्णोदकेन भक्षयेत्।

चीते की जड़, पिपरामूल, अजवाइन, कलौंजी, वायविडङ्ग, अजमोद, जीरा, देवदारु, चव्य, इलायची, सैंधव, कूठ, रास्ना, गोखरू, धनियाँ, त्रिफला, नागरमोथा, त्रिकटु, दालचीनी, खस, जवाखार, तालीशपत्र और तेजपात सम भाग इन सब औषधियों को चूर्णित कर ले। पूर्ण जितना हो उतना ही गुग्गुलु लेकर पहिले घृत में मर्दित करे पश्चात् उक्त चूर्ण में मिलाकर फिर घृत के साथ घोटकर स्निग्धपात्र में रख दे। मात्रा ८ माशे तक [illegible] जल से खावे। यथेष्ट आहारवाला रोगी उचित मात्रा में इसका सेवन करे। यह योग अमृत के समान है। इसके सेवन से आमवात, ऊरुस्तम्भ, कृमि दुष्टव्रण, प्लीहा, गुल्म, उदररोग, आनाह, अर्श एवं सन्धि तथा मज्जागत वातरोग नष्ट होते हैं। यह योगराज गुग्गुलु अग्नि का दीपक तथा तेज और बल का बढ़ानेवाला है ॥ ९०-९५ ॥

### बृहद्योगराजगुग्गुलु।

त्रिकटु त्रिफला पाठा शताह्वा रजनीद्वयम्। अजमोदा वचा हिङ्गु हवुषा हस्तिपिप्पली ॥ ९६ ॥ उपकुञ्चिका शटी धान्यं विडं सौवर्चलं तथा। सैन्धवं पिप्पलीमूलं त्वगेला पत्रकेशरम् ॥ ९७ ॥ फणिज्झकञ्च लौहञ्च सर्जकञ्च त्रिकण्टकम्। रास्ना चातिविषा शुण्ठी यवक्षाराम्लवेतसम् ॥ ९८ ॥ चित्रकं पुष्करं चव्यं वृक्षाम्लं दाडिमं त्रुटि। अश्वगन्धा त्रिवृद्दन्ती बदरं देवदारु च ॥ ९९ ॥ हरिद्रा कटुका मूर्वा त्रायमाणा दुरालभा। विडङ्गं मृतवङ्गञ्च यमानी वासकाभ्रकम् ॥ १०० ॥ एतानि समभागानि श्लक्ष्णचूर्णानि कारयेत्। शोधितं गुग्गुलञ्चैव सर्वचूर्णसमं नयेत् ॥ १०१ ॥ घृतेन पिष्टयित्वा च स्निग्धे भाण्डे निधापयेत्। रसवातेन ये भग्नाः कटिभग्नाश्च ये जनाः ॥ १०२ ॥ एकाङ्गं शुष्यते येषां कुब्जं वापि क्षतोत्तरम्। पाटौ विस्तारितौ येषां येषां च गृध्रसीग्रहः ॥ १०३ ॥ सन्धिवातं क्रोष्टुशीर्षं वातं सर्वशरीरगम्। अशीतिं वातजान् रोगांश्चत्वारिंशच्च पैत्तिकान् ॥ १०४ ॥ विंशतिं श्लैष्मिकांश्चैव हन्त्यवश्यं न संशयः। अयं बृहद्योगराजगुग्गुलुः सर्ववातहा ॥ १०५ ॥

त्रिकटु, त्रिफला, चाब, सौंफ, हल्दी, दारुहल्दी, अजमोद, बच, हींग, हाऊबेर, गजपीपरि, कलौंजी, कचूर, धनिया, बिडनमक, कालानमक, सेंधानमक, पिपरामूल, दालचीनी, छोटी इलायची, तेजपात, नागकेसर, मदना, लोहभस्म, राल, गोखरू, रास्ना, अतीस, सोंठ, जवाखार, अमलवेत, चीता, पुहकरमूल, चव्य, विधाविल (चूक), अनारदाना, एरण्डमूल, असगन्ध, निसोथ, दन्ती का मूल, बेर के बीज की मींगी, देवदारु, हल्दी, कुटकी, मूर्वा, त्रायमाणा, जवासा, वायविडङ्ग, वङ्गभस्म, अजवाइन, अडूसे की छाल और अभ्रकभस्म प्रत्येक समभाग लेकर महीन चूर्ण करे। इन सम्पूर्ण चूर्ण के बराबर विशुद्ध गुग्गुलु को घृत योग से कूट करके चूर्ण में उत्तम रीति से मिलाकर घृतपात्र में रख ले। मात्रा ४ रत्ती से २ माशे तक। इस बृहद्योगराजगुग्गुलु के सेवन से रक्तवातजन्य भगन्दर, कटिभग्न, एकाङ्गशोष, क्षतकुष्ठ, पैरों का फैल जाना, गृध्रसी, सन्निपात, क्रोष्टुशीर्ष, सर्वाङ्गवात तथा सम्पूर्ण वातज, पित्तज एवं श्लैष्मिक रोग नष्ट होते हैं ॥ ९९-१०५ ॥

### सिंहनादगुग्गुलु।

पिष्टितां गुग्गुलोर्मात्रां कटुतैलपलाष्टकम्। प्रत्येकं त्रिफलाप्रस्थौ सार्द्धद्रोणे जले पचेत् ॥ १०६ ॥ पादशेषञ्च पूतञ्च पुनरेतद्विमिश्रयेत्। त्रिकटुत्रिफलामुस्तविडङ्गामरदारुकम् ॥ १०७ ॥ गुडूच्यग्नित्रिवृद्दन्ती चवी शूरणमाणकम्। पारदं गन्धकञ्चैव प्रत्येकं शुक्तिसम्मितम् ॥ १०८ ॥ सहस्रं कानकफलं सिद्धे सञ्चूर्ण्य निक्षिपेत्। ततो माषद्वयं जग्ध्वा पिबेदुष्णजलादिकम् ॥ १०९ ॥ अग्निञ्च कुरुते दीप्तं वडवानलसन्निभम्। धातुवृद्धिं वयोवृद्धिं बलं सुविपुलं तथा ॥ ११० ॥ आमवातं शिरोवातं सन्धिवातं सुदारुणम्। जानुजङ्घाश्रितं वातं सकटिग्रहमेव च ॥ १११ ॥ अश्मरीं मूत्रकृच्छ्रञ्च भग्नञ्च तिमिरोदरे। अम्लपित्तं तथा कुष्ठं प्रमेहं गुदनिर्गमम् ॥ ११२ ॥ कासं पञ्चविधं श्वासं क्षयञ्च विषमज्वरम्। प्लीहानं श्लीपदं गुल्मं पाण्डुरोगं सकामलम् ॥ ११३ ॥ शोथान्त्रवृद्धिशूलानि गुदजानि विनाशयेत्। मेदःकफामसञ्जातं व्याधिवारणदर्पहा ॥ सिंहनाद इति ख्यातो योगोऽयममृतोपमः ॥ ११४ ॥

कटुतैलेन गुग्गुलुं पिष्टयित्वा क्वाथजलेन सह पक्त्वा आसन्नपाके प्रक्षेपार्थं त्रिकट्वादीनां चूर्णतो ४ तो० शोधित जयपालबीज गोटा १००० रसगन्धकौ कज्जलीकृत्य शीतीभूते दातव्यौ इति वृद्धाः।

हर्र, आँवला और बहेड़ा प्रत्येक १२८ तोले, शिथिल पोटली में बँधा हुआ गुग्गुल ३२ तोले, पाकार्थ जल ३८ सेर ३२ तोले, शेष ९ सेर ४८ तोले। पोटली में बँधे हुए गुग्गुल को अलग कर ३२ तोले कटु तैल के साथ मर्दित कर क्वाथ में डालकर पकावे। जब ठीक पाक हो जाय तब त्रिकटु, त्रिफला, नागरमोथा, वायविडङ्ग, देवदारु, गिलोय, चीता, निशोथ, दन्ती, चव्य, सूरन (जमीकन्द), मानकन्द, प्रत्येक दो-दो तोले, पारद[1] और गन्धक की कज्जली ४ तोले, शुद्ध जमालगोटा के १००० दाने, इन औषधियों को भलीभाँति चूर्णित कर डाले और अच्छी तरह मिला दे। मात्रा-एक माशे से दो माशे तक। अनुपान-उष्ण जल या उष्ण दुग्ध। यह 'सिंहनादगुग्गुल' बडवानल के समान अग्नि को दीप्त करता है तथा धातु, आयु और बल को बढ़ाता है। आमवात, शिरोगतवात, दारुण

१ पारद और गन्धक की कज्जली औषध के ठंडे होने पर मिलावे।

सन्धिवात, जानु एवं जानुस्थितवात, कटिग्रह (कमर की पीड़ा), अश्मरी, मूत्रकृच्छ्र, भगन्दर, तिमिर, उदररोग, अम्लपित्त, कुष्ठ, प्रमेह, गुदभ्रंश, कास, श्वास, क्षय, विषमज्वर, प्लीहा, रक्तपित्त, गुल्म, पाण्डु, कामला, शोथ, अन्त्रवृद्धि, शूल और अर्श आदि रोगों को नष्ट करता है। यह गुग्गुलु व्याधिरूपी हाथी के मद को चूर करता है, अतः 'सिंहनाद गुग्गुलु' नाम से ख्यात हुआ है। यह योग अमृत-तुल्य लाभदायक है॥ १०६--११४॥

## अपर सिंहनाद गुग्गुलु

पलत्रयं कषायस्य त्रिफलायाः सुचूर्णितम्। सौगन्धिकपलञ्चैकं कौशिकस्य पलन्तथा॥ ११५॥ कुडवं चित्रतैलस्य सर्वमादाय यत्नतः। पाचयेत् पाकविद्वैद्यः पात्रे लौहमये दृढे॥ ११६॥ हन्ति वातं तथा पित्तं श्लेष्माणं खञ्जपंगुताम्। श्वासं सुदुर्जयं हन्ति कासं पञ्चविधन्तथा॥ ११७॥ कुष्ठानि वातरक्तानि गुल्मशूलोदराणि च। आमवातं जयेदेतदपि वैद्यविवर्जितम्॥ ११८॥ एतदभ्यासयोगेन जरापलितनाशनम्। सर्पिस्तैलरसोपेतमश्नीयाच्छालिषष्टिकम्॥ ११९॥ सिंहनाद इति ख्यातो रोगवारणदर्पहा। वह्निवृद्धिकरः पुंसां भाषितो दण्डपाणिना॥ १२०॥

हड़, बहेड़ा, आंवला, इनका क्वाथ १२ तोले, शुद्ध गन्धकचूर्ण ४ तोले, गुग्गुलु ४ तोले, अरण्डी का तैल ३२ तोले ले। एक लौह के पात्र में पहिले अरण्डी का तैल तथा गुग्गुलु डालकर पकावें। जब गुग्गुलु तैल में मिल जाय तब त्रिफला का क्वाथ डालकर पुनः पाक करे। जब ठीक पक जाय तब उसे नीचे उतारकर थोड़ी देर ठंडा होने पर गन्धक डालकर चलावे। इस औषध के सेवन से वातजन्य रोग, कफजन्य रोग, लूलापन, लँगड़ापन, श्वास, खाँसी कुष्ठ, वातरक्त, गुल्मशूल, उदररोग, शूल तथा कठिन आमवात रोग अच्छा होता है। इसके निरन्तर उपयोग से जरा एवं पलित नष्ट होता है। पथ्य--घृत, तैल-वसायुक्त शालि एवं साँठी के चावल आदि। यह सिंहनाद गुग्गुलु अग्नि को दीप्त करता है। मात्रा २ रत्ती से ६ रत्ती तक॥ ११५--१२०॥

## शिवागुग्गुलु

शिवाविभीतामलकीफलानां प्रत्येकशो मुष्टिचतुष्टयञ्च। तोयाढके तत्क्वथितं विधाय पादावशेषे त्ववतारणीयम्॥ १२१॥ एरण्डतैलं द्विपलं निधाय त्रिवृत्त्रयं गन्धकनामकस्य। पचेत् पुरस्यात्र पलद्वयञ्च पाकावशेषे च विचूर्ण्य दद्यात्॥ १२२॥ रास्ना विडङ्गं मरिचं कणा च दन्तीजटा नागरदेवदारु। प्रत्येकशः कोलमितं तदेषां विचूर्ण्य निक्षिप्य नियोजयेच्च॥ १२३॥ आमवाते कटीशूले गृध्रसी क्रोष्टुशीर्षके। न चान्यदस्ति भैषज्यं यथायं गुग्गुलुः स्मृतः॥ १२४॥

हड़, बहेड़ा, आंवला प्रत्येक १६ तोले, क्वाथ के लिये जल ४ सेर १६ तोले, बचा हुआ क्वाथ १२८ तोले। इस क्वाथ में अरण्डी का तैल ८ तोले तथा गुग्गुलु ८ तोले डालकर पाक करें। जब पाक ठीक हो जाय तब गन्धक का चूर्ण ३ तोले और रास्ना, वायविडङ्ग, काली मिर्च, पीपल, दन्तीमूल, सोंठ, देवदारु हर एक १ तोला डाल दें और अच्छी तरह मिलावें। मात्रा--४ रत्ती से ८ रत्ती तक। आमवात, कटिशूल, गृध्रसी, क्रोष्टुशीर्ष आदि रोगों में इससे बढ़कर और कोई औषधि नहीं है॥ १२१-१२४॥

## शुण्ठीघृत

नागरक्वाथकल्काभ्यां घृतप्रस्थं विपाचयेत्। चतुर्गुणेन तेनाथ केवलेनोदकेन

वा ॥ १२५ ॥ वातश्लेष्मप्रशमनमग्नि-सन्दीपनं परम् । नागरं घृतमित्युक्तं कट्यामशूलनाशनम् ॥ १२६ ॥

गौ का घी ८ सेर, सोंठ का क्वाथ अथवा केवल जल १६ सेर, कल्क के लिये कुटी हुई सोंठ १ सेर। इस घृत का विधिपूर्वक पाककर रोगी को सेवन करावें। यह घृत वात और कफ को शान्त तथा अग्नि को तीव्र कर कटिशूल एवं आमशूल को नष्ट करता है। मात्रा-२ माशे से ६ माशे तक ॥ १०६--१२६ ॥

## शृङ्गवेराद्य घृत।

शृङ्गवेरयवक्षारपिप्पलीमूलपिप्पलीः । पिष्ट्वा विपाचयेत् सर्पिरारनालं चतुर्गुणम् ॥ १२७ ॥ शूलं विबन्धमानाहमामवातं कटिग्रहम् । नाशयेद् ग्रहणीदोषमग्निसन्दीपनं परम् ॥१२८॥

गोघृत ४ सेर, कांजी १६ सेर कल्क के लिये सोंठ, जवाखार, पीपलामूल, पीपल यह सब मिलाकर १ सेर। इस घृत को विधिपूर्वक पकाकर रोगी को सेवन कराने से शूल, मलबन्ध, अफरा, आमवात, कटिशूल तथा ग्रहणीरोग नष्ट होते हैं और अग्नि तीव्र होती है। मात्रा—आधा तोला ॥ १२७-१२८ ॥

## काञ्जिकषट्पल घृत।

हिङ्गुत्रिकटुकं चव्यं माणिमन्थं तथैव च। कल्कान् कृत्वा तु पलिकान् घृतप्रस्थं विपाचयेत् ॥ १२९ ॥ आरनालाढकं दत्त्वा तत्सर्पिर्जठरापहम्। शूलं विबन्धमानाहमामवातं कटिग्रहम् ॥ १३० ॥ नाशयेद् ग्रहणीदोषं मन्दाग्नेर्दीपनं परम्। पुष्ट्यर्थं पयसा साध्यं दध्ना विण्मूत्रसंग्रहे ॥ १३१ ॥ दीपनार्थं मतिमता मस्तुना च प्रकीर्तितम् ।

गौ का घृत १२८ तोले, कांजी ६ सेर ३२ तोले, कल्क के लिये—हींग, त्रिकुटा, चव्य, सेंधा नमक, हरएक ४ तोले। विधिपूर्वक घी पकाकर सेवन करने से शूल, मलबन्ध, अफरा, आमवात, कटिशूल तथा ग्रहणी आदि रोग नष्ट होते हैं। यह मन्द हुई अग्नि को तीव्र करता है। मात्रा—आधा तोला। पुष्टि के लिये कांजी के स्थान पर दूध के साथ, मलबन्ध तथा मूत्रग्रह में दही के साथ तथा दीपन के लिये दही के पानी के साथ इस घृत को सिद्ध करना चाहिए ॥ १२९-१३१ ॥

## प्रसारणी तैल

प्रसारण्या रसैः सिद्धं तैलमेरण्डजं पिबेत् । सर्वदोषहरञ्चैव कफरोगहरं परम् ॥१३२॥

अंडी का तैल ४ सेर, पसरन का रस १६ सेर। तैल को विधिपूर्वक पकाकर रोगी को सेवन करावें। मात्रा—१ तोले से २ तोले तक। यह सब दोषों को नष्ट तथा कफज रोगों को अच्छा करता है ॥ १३२ ॥

## द्विपञ्चमूलाद्य तैल।

द्विपञ्चमूलीनिर्यूहकल्कदध्यम्लकाञ्जिकैः । तैलं कट्यूरुपार्श्वार्त्तिकफवातामयान् ग्रहान् ॥ हन्ति बस्तिप्रदानेन करोत्यग्निबलं महत् ॥१३३॥

दशमूल के क्वाथ और कल्क एवं दही तथा कांजी से विधिपूर्वक तैल पकाकर रोगी को बस्ति देने से कटिशूल, पसवाड़े का दर्द एवं अन्य कफवातजन्य शूल नष्ट होते हैं। यह अग्नि को तीव्र करता है ॥ १३३ ॥

## बृहत् सैन्धवाद्य तैल।

सैन्धवं श्रेयसी रास्ना शतपुष्पा यमानिका। सर्जिका मरिचं कुष्ठं शुण्ठी सौवर्चलं विडम् ॥ १३४ ॥ वचाजमोदा मधुकं जीरकं पौष्करं कणा। एतान्यर्द्धपलांशानि श्लक्ष्णपिष्टानि कारयेत् १३५ प्रस्थमेरण्डतैलस्य प्रस्थाम्बुजातपुष्पजम् ।

काञ्जिकं द्विगुणं दत्त्वा तथा मस्तु शनैः पचेत् ॥ १३६ ॥ सिद्धमेतत् प्रयोक्तव्य-मामवातहरं परम् ॥ पानाभ्यञ्जनवस्तौ च कुरुतेऽग्निबलं भृशम् ॥ १३७ ॥ वाता-र्त्तस्त्रणे शस्तं कटिजानूरुसन्धिजे। शूले हृत्पार्श्वपृष्ठेषु कृच्छ्रेऽश्मरिनिपीडिते १३८ याह्यायामार्दितानाहे अन्त्रवृद्धिनिपीडिते। अन्यांश्चानिलजान् रोगान् नाशयत्याशु देहिनाम् ॥१३९॥

एरण्ड तैल १२८ तोले, सौंफ का काढ़ा १२८ तोले, काँजी २५६ तोले, दही का तोड़ २५६ तोले। कल्कार्थ—सैंधव, गजपीपरि, रास्ना सौंफ, अजवाइन, शाल, मिर्च, कूट, सोंठ, काला नमक, बिड़नमक, बच, अजमोद, मुलेठी, जीरा, पुहकरमूल और पीपरि दो-दो तोले। इस तैल को मन्द अग्नि से सिद्ध करके पान, अभ्यङ्ग तथा वस्ति द्वारा प्रयोग करे। इसके प्रयोग से आमवात, कमर, जानु (घुटने), ऊरु तथा सन्धिगत वात, हृच्छूल, पार्श्वशूल, पृष्ठशूल, मूत्रकृच्छ्र, अश्मरी, बाह्यायाम, अर्दित, आनाह, अन्त्रवृद्धि तथा अन्यान्य वातरोग शीघ्र नष्ट होते हैं और अग्नि प्रदीप्त होती है ॥ १३५-१३९ ॥

द्वितीय सैन्धवाद्य तैल।

सैन्धवं देवकाष्ठञ्च वचा शुण्ठी च कट्फलम्। शताह्वा मुस्तकं चव्यं मेदे मलहरं त्रिवृत् ॥ १४० ॥ हिज्जलस्य त्वचं वालं चित्रकं भ्रद्मयष्टिका। शटी-विडङ्गमधुकं रेणुकातिविषा रुजु ॥ १४१ ॥ अम्लपर्णी नीलिनी दन्तीमूलं मरिचमेव च। अजमोदा पिप्पली च कुष्ठं रास्ना च ग्रन्थिकम् ॥ १४२ ॥ एषां कर्षमितैः कल्कैः शनैर्मृद्वग्निना पचेत्। प्रस्थञ्च कटुतैलस्य मूर्च्छितस्य यथाविधि ॥१४३॥ एतत् तैलवरं श्रेष्ठमभ्यङ्गात् सर्ववातनुत्। विशेषेणामवातेषु कटिजानूरुसन्धिषु १४४ हृत्पार्श्वसर्वगात्रेषु शूलञ्चैव विनाशयेत्। वातश्लेष्मणि बाह्यायामन्त्रवृद्धौ भगन्दरे॥ १४५ ॥ शस्तं नाडीव्रणान् सर्वान् नाशयत्यथ देहिनाम्। अन्यांश्च विविधान् रोगान् वृक्षमिन्द्राशनिर्यथा। सैन्धवाद्य-मिदं तैलं सर्वामयनिषूदनम् ॥१४६॥

यथाविधि मूर्च्छित कटु तैल १२८ तोले। कल्कार्थ—सेंधानमक, देवदारु, बच, सोंठ, कायफल, सौंफ, नागरमोथा, चव्य, मेदा, महामेदा, अपमार्ग, निसोथ, समुद्रफल का छिलका, सुगन्धबाला, चीते का मूल, भारगी, कचूर, वायविडङ्ग, मुलेठी, रेणुका बीज, अतीस, एरण्डमूल, पाढ़ी, नीली का मूल, दन्ती का मूल, कालीमिर्च, अजमोद, पीपरि, कूट, रास्ना और पिपरामूल एक एक तोला। इस तैल को यथाविधि मन्द अग्नि से सिद्ध कर मालिश करने से सम्पूर्ण वातविकार नष्ट होते हैं। विशेषकर आमवात, कटिशूल, जानुशूल, ऊरुशूल, सन्धिशूल, हृच्छूल, पार्श्वशूल तथा सर्वाङ्गशूल को शान्त करता है। यह तैल वात और कफ के विकार, बाह्या-याम, अन्त्रवृद्धि, भगन्दर और नाडीव्रण तथा अन्यान्य विविध रोगों को इस प्रकार ध्वंस करता है जैसे इन्द्र का वज्र वृक्षों को। यह 'सैंधवाद्य तैल' सम्पूर्ण रोगों का नाशक है ॥ १४०-१४६ ॥

आमवातारिवटिका।

रसगन्धकलौहार्कतुत्थटङ्कनसैन्धवान्। समभागैर्विचूर्ण्याथ चूर्णद्विगुणगुग्गुलुः ॥ १४७ ॥ गुग्गुलोः पादिकं देयं त्रिवृता-चूर्णमुत्तमम्। तत्समं चित्रकस्याथ घृतेन वटिकां कुरु ॥ १४८ ॥ खादेन्माषद्वयं चैषां त्रिफलाजलयोगतः। आमवातारि-वटिका पाचिका भेदिका मता ॥ १४९ ॥ आमवातं निहन्त्याशु गुल्मशूलोदराणि

च। यकृत्प्लीहोदराष्ठीलां कामलां पाण्डुरोगकम् ॥ १५० ॥ हलीमकं चाम्लपित्तं श्वयथुं श्लीपदार्बुदौ । ग्रन्थिशूलं शिरःशूलं वातरोगं च गृध्रसीम् ॥ १५१ ॥ गलगण्डं गण्डमालां कृमिं कुष्ठं च नाशयेत्। विद्रधिं गर्दभानाहावन्त्रवृद्धिं च दारुणाम् ॥ १५२ ॥

शुद्ध पारा, गन्धक, लोहभस्म, ताम्रभस्म, तूतिया, सोहागा और सैन्धव, प्रत्येक समभाग। सबसे दूना शुद्ध गुग्गुलु, उस का चतुर्थांश निसोथ का चूर्ण, निसोथ के चूर्ण के बराबर चीते के मूल का चूर्ण, इन सबको एकत्र कर घृत में मर्दन कर दो-दो माशे की गोलियाँ बनावे। अनुपान-त्रिफला का जल। यह आमवातारिवटिका, पाचक और भेदक है। इस वटी के सेवन से आमवात, गुल्म, शूल, उदररोग, यकृत, तिल्ली, अष्ठीला, कामला, पाण्डु, हलीमक, अम्लपित्त, शोथ, श्लीपद, अर्बुद, ग्रन्थिशूल, शिरःशूल, वातरोग, गृध्रसी, गलगण्ड, गण्डमाला, कृमिरोग, कुष्ठ, विद्रधि, पाषाणगर्दभ, आनाह तथा अन्त्रवृद्धि आदि रोग नष्ट होते हैं ॥ १४७-१५२ ॥

आमवातारि रस।

रसो गन्धो वरा वह्निर्गुग्गुलुः क्रमवर्द्धितः। एतदेरण्डतैलेन श्लक्ष्णचूर्णमपेपयेत् ॥ १५३ ॥ कर्षोऽस्यैरण्डतैलेन हन्त्युष्णजलपायिनाम् । आमवातमतीवोग्रं दुग्धमुद्गादि वर्जयेत् ॥ १५४ ॥

पारद १ भाग, गन्धक २ भाग, त्रिफला ३ भाग, चित्रक ४ भाग, गुग्गुलु ५ भाग, इनको थोड़े से रेंडी के तेल के साथ घोटकर रख ले। मात्रा—एक कर्ष[1]। इसे रेंडी के तैल के साथ सेवन कर पश्चात् उष्णजल का पान करे। यह अत्यन्त आमवातनाशक है। इस औषध के सेवन-काल में दूध तथा मूँग आदि अपथ्य हैं ॥ १५३-१५४ ॥

आमवातेश्वर रस।

शुद्धगन्धपलार्द्धं च मृतताम्रं च तत्समम्। ताम्रार्द्धं पारदं देयं रसतुल्यं मृतायसम् ॥ १५५ ॥ सर्वपञ्चाङ्गुलदले ढालयेन्निपुणो भिषक्। संचूर्ण्य पञ्चकोलस्य सर्वं क्वाथे विमर्दयेत् ॥ १५६ ॥ रौद्रे विंशतिवारांश्च गुडूचीनां रसैर्दश। भृष्टटङ्कनचूर्णेन तुल्येन सह मेलयेत् ॥ १५७ ॥ टङ्कनार्द्धं विडं देयं मरिचं विडतुल्यकम्। तिन्तिडीबीजचूर्णं तु सूततुल्यं चदन्तिका ॥ १५८ ॥ त्रिकटु त्रिफला चैव लवङ्गं चार्द्धभागिकम्। आमवातेश्वरो नाम विष्णुना परिकीर्तितः ॥ १५९ ॥ महाग्निकारको ह्येष आमवातकुलान्तकः। स्थूलानां कुरुते कार्श्यं कृशानां स्थौल्यकारकम् ॥ १६० ॥ अनुपानविशेषेण सर्वरोगकुलान्तकः। साध्यासाध्यं निहन्त्याशु चामवातं सुदारुणम् ॥ १६१ ॥ गुरुरूक्षान्नपानानि पयोमांसरसा हिताः। भोजयेत् कण्ठपर्यन्तं चतुर्गुञ्जमितं रसम् ॥ १६२ ॥ कट्वम्लतिक्तरहितं पिबेत्तदनुपानकम्। शीघ्रं जीर्यति तत्सर्वं जायते दीपनः परः ॥ १६३ ॥ अनेन सदृशो नास्ति वह्निसन्दीपनो रसः। गुल्मार्शोग्रहणीरोगशोथपाण्डूदरापहः ॥ १६४ ॥

सर्वतोभद्रश्चायमुच्यते। गन्धकादिलौहान्तानां यथोक्तभागं सर्वमेकीकृत्य चूर्णयित्वा लौहपात्रे घृतं किञ्चिद्दत्त्वा तत्र चूर्णं द्रवीभूतं सद्यो गोमयोपरि-

---

1 यद्यपि मूल में कर्षप्रमाण मात्रा लिखी है तथापि इसकी मात्रा बलानुसार देनी चाहिये। आजकल के अल्पसत्त्व प्राणियों के लिए १ रत्ती से ६ माशे तक मात्रा योग्य है।

निहितैरण्डपत्रोपरि ढालयेत् । अथ पर्पटीभूतं संचूर्ण्य पत्रकोलक्वाथेन विंशतिधारान् भावयेत्ततो गुडूचीरसेन पूर्ववत् क्वाथेन वा दशधा भावयेत्, रक्तिद्वयं खादेत्, माषैकमिति विप्रेन वद्वेन काञ्जिकं कोष्णं पिबेत्, दशरक्तिकपर्यन्तं वर्द्धयेदित्युपदेशः ।

शुद्ध गन्धक २ तोले ताम्रभस्म २ तोले, पारा १ तोला और लोहभस्म १ तोले, इन सब औषधियों को एकत्र घोट ले । पश्चात् एक लोहे की कड़ाही में थोड़ा घृत डालकर आँच पर रक्खे, उसमें पूर्वोक्त चूर्ण डालकर पिघला ले, तदनन्तर गोबर पर रक्खे हुए रेंडी के पत्ते पर डालकर पर्पटी तैयार कर ले । पश्चात् इसको चूर्णित कर पञ्चकोल क्वाथ में २० बार और गुर्च के क्वाथ में १० बार घोटकर घाम में सुखा ले । पश्चात् इसमें कुल मिलित औषधियों के बराबर भुने हुए सोहागे का चूर्ण मिलावे । सोहागे के चूर्ण का आधा विडनमक । विड नमक के बराबर कालीमिर्च । पारे के बराबर इमली के बीज की मींगी और दन्ती के मूल का चूर्ण । त्रिकटु, त्रिफला और लौंग प्रत्येक का चूर्ण पारद का अर्धभाग । इन सब औषधियों को एकत्र मर्दन कर चार-चार रत्ती की गोलियाँ बना ले । यह 'आमवातेश्वररस' विष्णु नाम के आचार्य ने कहा है । यह महान् अग्निवर्धक और आमवात-कुल-नाशक है । स्थूल पुरुषों को कृश और कृश पुरुषों को स्थूल करता है । अनुपानविशेष से सब रोगों को नष्ट करता है । साध्य, असाध्य तथा दारुण आमवात को शीघ्र नष्ट करता है । इस रस का सेवन करनेवाला रोगी गुड़, पुष्प, फल, पान, दुग्ध और हितकारी मांसरस तृप्तिपर्यन्त खा सकता है । कटु, अम्ल और तिक्त रस अनुपान में वर्जित हैं । यह रस गुरु पदार्थ को शीघ्र पचाता है । गुल्म, अर्श, प्लीहारोग, शोथ, पाण्डु और उदर रोगों को नष्ट करता है । इसके समान अग्निदीपक और कोई रस नहीं । इसको 'सर्वतोभद्ररस' भी कहते हैं । वृद्ध वैद्यों की सम्मति है कि दो रत्ती से दस रत्तीपर्यन्त मात्रा बढ़ावे ॥ १५५-१६४ ॥

### त्रिफलादि लौह ।

त्रिफला मुस्तकं व्योषं विडङ्गं पुष्करं वचा । चित्रकं मधुकं चैव पलांशं श्लक्ष्णचूर्णितम् ॥ १६५ ॥ अयश्चूर्णपलान्यष्टौ गुग्गुलोस्तावदेव हि । आलोड्य मधुनोपेतं पलद्वादशकेन च ॥ १६६ ॥ प्रातर्विलिह्य भुञ्जानो जीर्णे तस्मिन् जयेद्रुजः । दुःसाध्यमामवातं च पाण्डुरोगं हलीमकम् । जीर्णान्नसम्भवं शूलं श्वयथुं विषमज्वरम् ॥ १६७ ॥

त्रिफला, नागरमोथा, त्रिकटु, वायविडंग, पुष्करमूल, बच, चीते का मूल और मुलेठी का चूर्ण चार-चार तोले, लोहभस्म ३२ तोले, गुग्गुलु ३२ तोले । इन सब औषधियों को ४८ तोले मधु के साथ घोटकर रख ले । प्रतिदिन प्रातःकाल सेवन करे । इसके पचने पर भोजन करनेवाला मनुष्य दुःसाध्य आमवात, पाण्डुरोग, हलीमक, परिणामशूल, शोथ और विषमज्वर आदि अनेक रोगों से मुक्त होता है ॥ १६५-१६७ ॥

### विडङ्गादि लौह ।

चक्रपाण्यादिलौहानां ग्राह्यं पञ्चपलं शुभम् । चूर्णं मृताभ्रकस्यापि लौहार्द्धं पारदं तथा ॥ १६८ ॥ त्रिगुणा त्रिफला ग्राह्या लौहाभ्रात् षोडशैर्जलैः । पक्त्वाष्टभागशेषं तु ग्राह्यं क्वाथजलं ततः ॥ १६९ ॥ तेन लौहाभ्रचूर्णं च पुनः पाच्यं समं घृतम् । शतावर्या रसं चैव क्षीरं च द्विगुणं रसात् ॥ १७० ॥ लौहमय्या पचेद् दर्व्या पात्रे चायसि ताम्रके । पचेत् पाकविधि-

इस्तु वह्निना मृदुना शनैः ॥ १७१ ॥ सिद्धे च प्रक्षिपेदेतान् विडङ्गादि यथोदितान्। विडङ्गं नागरं धान्यं गुडूचीसत्त्वजीरकम् ॥ १७२ ॥ पलाशबीजं मरिचं पिप्पली हस्तिपिप्पली। त्रिवृता त्रिफला दन्ती एला चैरण्डकं तथा ॥ १७३ ॥ चविका ग्रन्थिकं चित्रं मुस्तकं वृद्धदारकम्। सर्वेषां चूर्णमेतेषां लौहाभ्रकसमं भवेत् ॥ १७४ ॥ आमवातगजेन्द्रस्य केशरी विधिनिर्मितः। आमवातं च शोथं चाप्यग्निमान्द्यं हलीमकम् ॥ १७५ ॥

हन्तीति शेषः। अत्र गन्धकमपि पारदसमं दत्त्वा कज्जलीं कुर्वन्ति।

फौलाद आदि लोह की भस्म २० तोले, अभ्रकभस्म १० तोले, शुद्ध पारद १० तोले, त्रिफला ६० तोले, क्वाथार्थ जल १८ सेर, शेष २४ सेर, २० तोले। इस क्वाथ में लोहभस्म, अभ्रकभस्म, गाय का घृत ३० तोले, शतावरि का रस ३० तोले, दूध ६० तोले डालकर लोहपात्र या कलई किए ताम्रपात्र में लोहे की कलछी से मन्द-मन्द आँच में पकावे। पाक सिद्ध हो जाने पर वायविडंग, सोंठ, धनिया, गिलोय का सत, जीरा, ढाक के बीज, कालीमिर्च, पीपरि, गजपीपरि, निसोथ, त्रिफला, दन्तीमूल, छोटी इलायची, एरण्डमूल, चव्य, पिपरामूल, चित्रक, नागरमोथा और विधारा; इनके समभाग मिश्रित चूर्ण ६० तोले का प्रक्षेप देकर अच्छी प्रकार मिला दे। मात्रा—४ रत्ती। इसका सेवन करने से आमवात, शोथ, अग्निमान्द्य, हलीमक, कामला और पाण्डु आदि रोग नष्ट होते हैं। इस योग में यद्यपि गन्धक उक्त नहीं है तथापि पारद के समान परिमाण में गन्धक मिलाकर कज्जली करके पाक के शीतल होने पर उसमें मिला दे ॥ १६८–१७५ ॥

पञ्चाननरस लौह।

जारितं पुटितं लौहचूर्णं पञ्चपलं गुभम्। गुग्गुलोश्च पलं पञ्च लौहार्द्धं मृतमभ्रकम् ॥ १७६ ॥ शुद्धसूतमभ्रसमं गन्धकं तत्समं भवेत्। त्रिगुणामयसरचूर्णाद् कृत्वा तां त्रिफलां पचेत् ॥ १७७ ॥ द्विरष्टभागं पानीयमष्टभागावशेषितम्। तेन चाष्टावशेषेण पचेत् लौहाभ्रगुग्गुलुम् ॥ १७८ ॥ घृततुल्यं शतावर्या रसं दत्त्वा तथा शुभम्। प्रस्थं प्रस्थं च दुग्धस्य शनैर्मृद्वग्निना पचेत् ॥ १७९ ॥ लौहमय्या पचेद्दर्व्या पात्रेचायसि मृण्मये। ततः पाकविधिज्ञस्तु पाकसिद्धौ विनिक्षिपेत् ॥१८०॥ विडङ्गं नागरं धान्यं गुडूचीसत्त्वजीरकम्। पञ्चकोलं त्रिवृद्दन्ती त्रिफलैला च मुस्तकम् ॥ १८१ ॥ सुचूर्णितं च प्रत्येकमेषामर्द्धपलं क्षिपेत्। रसस्य कज्जलीं कृत्वा ईषदुष्णे विमर्दयेत् ॥१८२॥ उत्तार्य स्थापयेद्भाण्डे स्निग्धे चापि सुरक्षितम्। घृतेन मधुना पश्चान्मर्दयित्वाऽनुपानवः ॥१८३॥ गुडूचीनागरैरण्डं क्वाथयित्वा जलं पिबेत्। भक्षयेच्छुद्धदेहस्तु शुभेऽहनि सुरार्चकः ॥ १८४ ॥ आमवातमहाव्याधिविनाशायैष देवताम्। सन्धिवातं कटीशूलं कुक्षिशूलं सुदारुणम् ॥ १८५ ॥ जङ्घापादाङ्गुलीशूलं गृध्रसीं हन्ति पङ्गुताम्। गुल्मशोथं पाण्डुरोगं सन्निपातं च दुःसहम्। आमवातगजेन्द्रस्य केशरी विधिनिर्मितः १८६॥

लोहभस्म २० तोले, शुद्ध गुग्गुलु ५० तोले, अभ्रकभस्म १० तोले, पारद १० तोले, शुद्ध गन्धक १० तोले। क्वाथार्थ—त्रिफला मिलित ६० तोले, जल २४ सेर, अवशिष्ट क्वाथ ६ सेर। इस क्वाथ में लोहभस्म, अभ्रकभस्म और गुग्गुलु (पूर्वोक्त), गाय का घृत १२८ तोले,

शतावरि का रस १२८ तोले और दुग्ध १ सेर २½ पाव डालकर लोह के अथवा मिट्टी के पात्र में लोह की कलछी से मन्द-मन्द आंच पर पकावे। आसन्न पाक होने पर वायविड़ंग, सोंठ, धनिया, गिलोय का सत्व, जीरा, पीपरि, पिपरामूल, चव्य, चीता, सोंठ, निसोथ, दन्तीमूल, त्रिफला, छोटी इलायची और नागरमोथा प्रत्येक का दो-दो तोला चूर्ण लेकर उसमें मिलादे। पारद गंधक की कज्जली कर किञ्चित् उष्ण अवस्था में ही मिला दे। पश्चात् घृत के स्निग्ध पात्र में इसको रखदे। इस लौह में घृत और मधु मिलाकर गिलोय, सोंठ और एरण्ड के क्वाथ के साथ सेवन करे। शुभ दिन में शुद्धदेह होकर आमवात रोग के नाश के लिये इष्टदेवता का पूजन कर इसका सेवन करे। मात्रा—२ माशे। यह लौह सन्धिवात, कटिशूल, दारुण कुक्षिशूल, जंघाशूल, पादाङ्गुलीशूल, गृध्रसी, पंगुता, गुल्म, शोथ और पाण्डुरोग आदि अनेक रोगों को नष्ट करता है। आमवातरूपी हाथी के लिये यह सिंहरूप है॥ १७९–१८६॥

वातगजेन्द्रसिंह ।

अभ्रं लौहं रसंगन्धं ताम्रं नागं सटङ्कनम्। विषं सिन्धुं लवङ्गं च हिंगु जातीफलं समम्॥ १८७॥ तदर्द्धं त्रिसुगन्धं च त्रैफलं जीरकं तथा। कन्यारसेन संपिष्य वटी कार्या त्रिरक्तिका॥ १८८॥ सेव्या पयोऽनुपानेन सदा प्रातः सुखान्वितैः। अशीतिं वातजान् रोगान् चत्वारिंशच्च पैत्तिकान्॥ १८९॥ विंशतिं श्लैष्मिकान् रोगान् सेवनादेव नाशयेत्। अभिघातेन ये क्षीणा क्षीणाश्चापि व्यवायतः॥ १९०॥ व्याधिक्षीणा वयःक्षीणाः स्त्रीक्षीणाश्चापि ये नराः। क्षीणेन्द्रिया नष्टशुक्रा यद्विरोगाश्च मानवाः॥ १९१॥ तेषां वृष्यश्च बल्यश्च वयःस्थापन एव च। खञ्जानां पङ्गुकुब्जानां क्षीणानां मांसवर्धनः॥ १९२॥ अरोगी सुखमाप्नोति रोगी रोगाद्विमुच्यते। रसस्यास्य प्रसादेन नास्ति रोगाद्भयं क्वचित्। वातगजेन्द्रसिंहोऽयं रसो रोगविनाशकः॥ १९३॥

अभ्रकभस्म, लौहभस्म, पारद शुद्ध गन्धक, ताम्रभस्म, सीसकभस्म, सुहागा, मीठा विष, सेंधानमक, लौंग, हींग और जायफल प्रत्येक १ भाग। दालचीनी, तेजपात, छोटी इलायची, त्रिफला और जीरा प्रत्येक आधा भाग। इनको एकत्र कर घृतकुमारी के रस में घोटकर दो-दो या तीन-तीन रत्ती की गोलियाँ बनावे। प्रातःकाल दुग्ध के साथ इसका सेवन करे। इसके सेवन से ८० प्रकार के वातज, ४० प्रकार के पित्तज तथा २० प्रकार के कफज रोग नष्ट होते हैं। यह रस अभिघातादि कारणों से क्षीण हुए पुरुषों की क्षीणता को नष्ट करता और वृष्य, बलकारि तथा आयुवर्द्धक है। यह खञ्जता, पंगुता तथा कुब्जरोग को नष्ट करता है। अग्नि को दीप्त करता है। पुरुषों के मांस को बढ़ाता है। नीरोग पुरुष इसके सेवन से स्वस्थ रहता तथा रोगी रोग से मुक्त हो जाता है। इस रस की कृपा से रोगों का डर नहीं रहता। यह वातरूपी हाथी के लिये सिंहरूप है॥ १८७–१९३॥

हिंगुलेश्वर रस ।

तुल्यांशं मर्दयेत्खल्वे पिप्पलीं हिंगुलं विषम्। गुञ्जार्द्धं मधुना देयमामवातनिवृत्तये॥ १९४॥

पीपल, शिंगरफ तथा वत्सनाग को बराबर मात्रा में मिलाकर खरल में घोटकर आधी रत्ती की मात्रा में तीव्र ज्वरयुक्त नवीन आमवात के रोगी को सेवन कराने से लाभ होता है। यह हमारा रोगियों पर अनुभव किया हुआ प्रयोग है॥ १९४॥

अमृतमञ्जरी ।

हिंगुलं च विषञ्चैव कणा मरिचटङ्क-

णम् । जातीकोषं समं सर्वं जम्बीररसमर्दितम् ॥ १९५ ॥ रक्तिमात्रां वटीं कुर्यादार्द्रकद्रवसंयुताम् । अग्निमान्द्यमजीर्णं च सामवातं सुदारुणम् ॥ १९६ ॥ उष्णतोयानुपानेन सर्वं व्याधिं नियच्छति । कासं पञ्चविधं श्वासं सर्वाङ्गग्रहमेव च ॥ १९७ ॥

सिंगरफ, वत्सनाग, पीपल, कालीमिर्च, सुहागा, जावित्री इन्हें बराबर मात्रा में मिलाकर जम्बीरी नींबू के रस से घोटकर एक-एक रत्ती की गोली बनावे। अनुपान—अदरख का रस। इस गोली के सेवन से आमवातयुक्त मन्दाग्नि एवं अजीर्ण तथा तरुण आमवात में पैदा होनेवाला तीव्र ज्वर नष्ट होता है। गरम जल के अनुपान से यह गोली पांचों प्रकार की खांसी, श्वास तथा सर्वाङ्गशूल आदि सब रोग अच्छे करती है ॥ १९५—१९७ ॥

### आमप्रमाथिनी वटिका।

सोरकं रविमूलञ्च गन्धकं लौहमभ्रकम् । व्याधिघातरसैः पिष्ट्वा कुर्याद्रक्तिमितां वटीम् ॥१९८॥ निर्गुण्डीस्वरसैः[1] सेव्या कफामयनिषूदिनी । आमवातप्रशमनी वटिकामप्रमाथिनी ॥ १९९ ॥

शोरा, आक की जड़, गन्धक, लौहभस्म, अभ्रकभस्म, इन्हें बराबर मात्रा में मिलाकर अमलतास के पत्तों के रस से भावना देकर दो रत्ती की गोली बनावे। अनुपान—सँभालू के पत्तों का रस। इसके सेवन से आमवात तथा कफरोग नष्ट होते हैं ॥ १९८—१९९ ॥

### आमवाताद्रि वज्ररस।

रसगन्धकलौहाभ्रमहिफेनं समं समम् । यवक्षारं सप्तभागं मर्दयित्वार्कपत्रजैः ॥ २०० ॥ रसैर्वल्लद्वयमितां विदध्याद्वटिकां भिषक् । सिन्दुवारदलद्रावैः दद्यादामवातिने ॥२०१॥ आमवातं महाघोरं वेदनां वातसम्भवाम् । आमवाताद्रिवज्राख्यरसो हन्ति न संशयः ॥२०२॥

पारा, गन्धक, लौहभस्म, अभ्रकभस्म, अफीम, हरएक १ भाग, जवाखार, ७ भाग। इन्हें आक के पत्तों के रस से घोटकर ४ रत्ती की गोली बनावे। आमवात से पीड़ित रोगी को यह गोली सँभालू के पत्तों के रस के साथ देनी चाहिए। इसके सेवन से कठिन आमवात तथा अन्य वातजन्य कष्ट नष्ट होते हैं ॥ २००—२०२ ॥

### आमवात में पथ्य।

यवाः कुलत्थाः श्यामाकाः कोद्रवा रक्तशालयः । वास्तुकं शिग्रु वर्षाभूः कारवेल्लं पटोलकम् ॥ २०३ ॥ आर्द्रकं तप्तनीरञ्च लशुनं तक्रसंस्कृतम् । जाङ्गलानां तथा मांसं सामवातगदे हितम् ॥ २०४ ॥ मन्दारगोक्षुरैरण्डकवृद्धदारं भल्लातकं गोजलमार्द्रकञ्च । कटूनि तिक्तानि च दीपनानि स्युरामवातामयिने हितानि ॥२०५॥

जौ, कुलथी, सावाँ, कोदों लालशालि चावल, बथुआ, सहजने की फली, सफेद सोंठी, करेला, परवल, अदरक, गरम जल, मट्ठे से सिद्ध लहसन, जाङ्गल पशु-पक्षियों का मांस आमवात के रोगी के लिये लाभदायक है। मन्दार गोखरू, विधारा, भिलावा, गोमूत्र, अदरक, कटु, तिक्त एवं अग्निदीपक द्रव्य आमवात के रोगी के लिये हितकारी हैं ॥ २०३-२०५ ॥

### आमवातरोग में अपथ्य।

दधिमत्स्यगुडक्षीरपोतकीमाषपिष्टकान् । वर्जयेदामवातार्तो मांसं चानूपसम्भवम् ॥ २०६ ॥ अभिष्यन्दकरा ये च ये चान्ये

[1] त्रिवृत्क्वाथेन सा इति पाठान्तरम् अर्थात् निशोथ क्वाथ के साथ सेवन करने का भी विधान है।

गुरुपिच्छिलाः । वर्जनीयाः प्रयत्नेन आमवातार्दितैर्नरैः ॥ २०७ ॥

दही, मछली, गुड़, खीर, पोई का शाक, उर्द, पिष्टक, अनूपमांस, अभिष्यन्दी, गुरु और पिच्छिल भोजन आमवात से पीड़ित पुरुष को यत्नपूर्वक छोड़ देने चाहिए ॥२०६–२०७ ॥

विजयभैरव तैल ।

रसगन्धशिलातालं सर्वं कुर्यात् समांशकम् । चूर्णयित्वा ततः सूक्ष्ममारनालेन पेषयेत् ॥ २०८ ॥ तैलकल्केन संलिप्य सूक्ष्मवस्त्रं ततः परम् । तैलार्धं कारयेद्वर्त्तिमूर्ध्वभागे च दीपयेत् ॥ २०९ ॥ वर्त्यधःस्थापिते पात्रे तैलं पतति शोभनम् । लेपयेत्तेन गात्राणि भक्षणाय च दापयेत् ॥ २१० ॥ नाशयेत् सूततैलं तद्वातरोगानशेषतः । बाहुकम्पं शिरःकम्पं जङ्घाकम्पं ततः परम् । एकाङ्गं च तथा वातं हन्ति लेपान्न संशयः ॥ २११ ॥

शुद्ध पारद, शुद्ध गन्धक, मैनसिल और हरताल समभाग लेकर चूर्णित करके कांजी में अच्छी प्रकार घोट ले । इस कल्क से एक पतले कपड़े को लिप्त कर बत्ती बनाकर सुखा ले । पश्चात् इस बत्ती को तिलतैल में भिगोकर सँडसी से पकड़ कर सिरे पर आग लगाये और नीचे एक स्वच्छ पात्र रक्खे जिससे तैल उसमें गिरता रहे । रोगी इस तैल को अपने अवयवों पर मर्दन करे तथा इस तैल से लिप्त पान के पत्ते को खाय । मात्रा–२ बूँद से ५ बूँद पर्यन्त । यह तैल लगाने से सम्पूर्ण वातरोगों को तथा विशेषकर बाहुकम्प, शिरःकम्प, जङ्घाकम्प तथा एकाङ्ग वात को नष्ट करता है ॥ २०८–२११ ॥

महाविजयभैरव ।

अहिफेनयुतश्चैतन्महाविजयभैरवम् ॥ २१२॥

विजयभैरव तैल में ही यदि अफीम मिला दी जाय तो इसका नाम महाविजय भैरव तैल होता है ॥ २१२ ॥

महासैन्धवाद्य तैल ।

सिन्धुरुग्विश्ववचा सोग्रा भार्गी यष्टिस्थिरा फलैः । दारु विश्वशटी धान्यकृष्णा कट्फलपौष्करैः ॥ २१३ ॥ दीप्यकात्तिविषैरण्डनीली नीलाम्बुजैः पचेत् । तैलं सकाञ्जिकं हन्ति पानाभ्यञ्जननावनैः ॥ २१४ ॥ आमवातं कृमीन् गुल्मान् प्लीहोदरशिरोरुजः । मन्दाग्निं पक्षसन्ध्यण्डवातस्तम्भगदानपि ॥ २१५ ॥

इति भैषज्यरत्नावल्यामामवाताधिकारः समाप्तः ।

तैल ४ सेर, कांजी १६ सेर, कल्क के लिये—सेंधानमक, कूठ, सोंठ, वच, भारंगी, मुलहठी, शालपर्णी, जायफल, देवदारु, सोंठ, कचूर, धनिया, पीपल, कायफल, पोहकरमूल, अजवाइन, अतीस, अरण्डी की जड़, नील की जड़, नीलकमल मिलाकर १ सेर । इस तैल को विधिपूर्वक पकाकर पिलाना, मालिश करना और नस्य देना चाहिये । इसके प्रयोग से आमवात, कृमि, गुल्म, प्लीहा ( तिल्ली ), उदररोग, शिर का दर्द, मन्दाग्नि, पक्षाघात, सन्धिवात, अण्डवात तथा ऊरुस्तम्भ आदि रोग नष्ट होते हैं ॥ २१३-२१५ ॥

इति श्रीपण्डितकालप्रसादत्रिपाठिविरचितायां भैषज्यरत्नावल्या रत्नप्रभाभिधायां व्याख्यायामामवाताधिकारः समाप्तः ।

## अथ मूत्रकृच्छ्राधिकारः

वातिक मूत्रकृच्छ्र की चिकित्सा।

अभ्यञ्जन स्नेहनिरूहवस्तिस्वेदोपनाहोत्तरबस्तिसेकान्। स्थिरादिभिर्वातहरैश्च सिद्धान् दद्याद्रसांश्चानिलमूत्रकृच्छ्रे ॥ १ ॥

तैलाभ्यङ्ग, स्नेहपान, निरूहबस्ति, स्वेद, उपनाह, उत्तरबस्ति (पिचकारी), परिषेक तथा शालपर्णी प्रभृति वातनाशक औषधों से सिद्ध मांसरस वातज मूत्रकृच्छ्र में हितकारी हैं ॥ १ ॥

पैत्तिक मूत्रकृच्छ्र की चिकित्सा।

सेकावगाहाः शिशिराः प्रदेहा ग्रैष्मो विधिर्बस्तिपयोविकाराः। द्राक्षा विदारीक्षुरसैर्घृतैश्च कृच्छ्रेषु पित्तप्रभवेषु कार्याः ॥ २ ॥

पैत्तिक मूत्रकृच्छ्र में शीतल परिषेक, स्नान तथा प्रलेप, ग्रीष्मोचित ऋतुचर्या, बस्तिकर्म, दुग्धविकार (दूध से बने पदार्थ), मुनक्का, विदारीकन्द, ईख के रस और घृत आदि की व्यवस्था करे ॥ २ ॥

श्लैष्मिक मूत्रकृच्छ्र की चिकित्सा।

क्षारोष्णतीक्ष्णौषधमन्नपानं स्वेदो यवान्नं वमनं निरूहाः। तक्रं सतिक्तौषधसिद्धतैलमभ्यङ्गपानं कफमूत्रकृच्छ्रे ॥ ३ ॥

श्लैष्मिक मूत्रकृच्छ्र में क्षार, उष्ण और तीक्ष्ण औषध, अन्नपान, स्वेद, जौ का भोजन, वमन, निरूहबस्ति, छाछ तथा तिक्तरसयुक्त औषधियों से सिद्ध तैल का अभ्यङ्ग एवं कफनाशक द्रव्यों का पान करना चाहिए ॥ ३ ॥

सान्निपातिक मूत्रकृच्छ्र की चिकित्सा।

सर्वं त्रिदोषप्रभवे च वायोः स्थानानुपूर्व्या प्रसमीक्ष्य कार्यम्। त्रिभ्योऽधिके प्राग्वमनं विरेकः पित्ते कफे स्यात् पवने च बस्तिः ॥ ४ ॥

त्रिदोषजन्य मूत्रकृच्छ्र में तीनों दोषों की मिलित चिकित्सा करनी चाहिए। किन्तु बस्ति के वातस्थानीय होने से प्रथम प्रकुपित वात की ही शान्ति करनी चाहिए। वाताधिक्य में बस्ति, पित्ताधिक्य में विरेचन और कफाधिक्य में वमन कराना चाहिए ॥ ४ ॥

अभिघातज मूत्रकृच्छ्र की चिकित्सा।

तथाभिघातजे कुर्यात् सद्यो व्रणचिकित्सितम्।

अभिघातज मूत्रकृच्छ्र में सद्योव्रणाधिकार में कही हुई चिकित्सा करनी चाहिए।

पुरीषविघातज मूत्रकृच्छ्र की चिकित्सा।

स्वेदचूर्णक्रियाभ्यङ्गबस्तयः स्युः पुरीषजे ॥ ५ ॥

पुरीषजन्य मूत्रकृच्छ्र में स्वेद, चूर्णक्रिया, अभ्यङ्ग और बस्तिक्रिया करनी चाहिए ॥ ५ ॥

अश्मरीजात मूत्रकृच्छ्र की चिकित्सा।

क्रिया हिता स्यादश्मर्यां शर्करायां या मूत्रकृच्छ्रे कफमारुतोत्थे ॥ ६ ॥

अश्मरी तथा शर्कराजन्य मूत्रकृच्छ्र में कफवातज मूत्रकृच्छ्रोक्त चिकित्सा करनी चाहिए ॥ ६ ॥

शुक्रविबन्धज मूत्रकृच्छ्र की चिकित्सा।

लेह्यं शुक्रविबद्धोत्थे शिलाजतु समाक्षिकम्। वृष्यैर्बृंहितधातूत्थे विधेया प्रमदोत्तमा ॥ ७ ॥

शुक्रविबन्धजन्य मूत्रकृच्छ्र में मधु के साथ शिलाजीत का सेवन कराना चाहिए। वृष्य प्रयोगों द्वारा बढ़ी धातु से उत्पन्न शुक्रविबन्धज मूत्रकृच्छ्र में सुन्दर स्त्री लाभदायक होती है ॥ ७ ॥

शोणित मूत्रकृच्छ्र की चिकित्सा।

यन्मूत्रकृच्छ्रे विहितञ्च पैत्ते तत्कारयेच्छोणितमूत्रकृच्छ्रे ॥ ८ ॥

रक्तज मूत्रकृच्छ्र में पैत्तिक मूत्रकृच्छ्र की चिकित्सा करनी चाहिए ॥ ८ ॥

कूष्माण्डकरसं पीत्वा सयवक्षारशर्करम्। मूत्रकृच्छ्राद्विमुच्येत शीघ्रं च लभते सुखम् ॥ ९ ॥

पेठे के रस में यवक्षार तथा खाँड मिलाकर पीने से रोगी मूत्रकृच्छ्र से शीघ्र मुक्त होता और सुख पाता है ॥ ९ ॥

तृणपञ्चमूल

कुशः काशः शरो दर्भ इक्षुश्चेति तृणोद्भवम्। पित्तकृच्छ्रहरं पञ्चमूलं बस्तिविशोधनम् ॥ १० ॥

कुश, काश, शर, दर्भ और इक्षु ( गन्ना ) का क्वाथ पैत्तिक मूत्रकृच्छ्र का नाशक तथा बस्ति ( मूत्राशय ) का शोधक होता है ॥ १० ॥

पञ्चतृण क्षीर।

एतत्सिद्धं पयः पीतं मेढ्रजं हन्ति शोणितम् ॥ ११ ॥

पञ्चतृणमूल से यथाविधि सिद्ध किया हुआ दुग्ध मूत्रमार्ग से प्रवृत्त हुए रक्त में लाभदायक होता है ॥ ११ ॥

त्रिकण्टकादि।

त्रिकण्टकारग्वधदर्भकाशदुरालभापर्वतभेदपथ्या। निहन्ति पीडां मधुनाश्मरीञ्च संप्राप्तमृत्योरपि मूत्रकृच्छ्रम् ॥ १२ ॥

गोखरू, अमलतास, दर्भ, काश, दुरालभा ( धमासा ), पाषाणभेद और हरीतकी के क्वाथ में मधु मिलाकर पान करने से आसन्नमृत्युरोगी का भी मूत्रकृच्छ्र और मूत्रकृच्छ्रजन्य पीड़ा शान्त होती है ॥ १२ ॥

गोक्षुरक्वाथ।

क्वाथं गोक्षुरबीजस्य यवक्षारयुतं पिबेत्। मूत्रकृच्छ्रं तथा रक्तं पीतः शीघ्रं निवारयेत् ॥ १३ ॥

गोखरू के बीज के क्वाथ में जवाखार मिलाकर पान करे तो मूत्रकृच्छ्र तथा मूत्रमार्ग से प्रवृत्त हुआ रुधिर शीघ्र निवृत्त होता है ॥ १३ ॥

धात्र्यादि।

धात्री द्राक्षा विदारी च यष्ट्याह्वं गोक्षुरं तथा। एभिः कषायं विपचेत् पिबेच्छीतं सशर्करम् ॥ अपि योगशतासाध्यं मूत्रकृच्छ्रं जयेद्ध्रुवम् ॥ १४ ॥

आँवला, मुनक्का, विदारीकन्द, मुलेठी और गोखरू के क्वाथ को शीतल कर उसमें शक्कर मिलाकर पान करे। यह सैकड़ों योगों से असाध्य मूत्रकृच्छ्र को भी आराम करता है ॥ १४ ॥

बृहद्धात्र्यादि।

धात्री द्राक्षा च यष्ट्याह्वं विदारी सत्रिकण्टका। दर्भेक्षुमूलमभयाः क्वाथयित्वा जलं पिबेत् ॥ ससितं मूत्रकृच्छ्रघ्नं रुजोदाहहरं परम् ॥ १५ ॥

आँवला, मुनक्का, मुलेठी, विदारीकन्द, गोखरू, दर्भमूल, काण्डेक्षु ( ईख ) का मूल और हड़ के क्वाथ में खाँड मिलाकर पीने से मूत्रकृच्छ्र की वेदना तथा दाह नष्ट होता है ॥ १५ ॥

वातिक कृच्छ्र में अमृतादि।

अमृता नागरं धात्री वाजिगन्धा त्रिकण्टकम्। प्रपिबेद्वातरोगार्त्तः सशूलो मूत्रकृच्छ्रवान् ॥ १६ ॥

गिलोय, सोंठ, आँवला, असगन्ध और गोखरू का क्वाथ पीने से वेदनायुक्त मूत्रकृच्छ्र आराम होता है ॥ १६ ॥

शतावर्यादि।

शतावरीकाशकुशः श्वदंष्ट्रावि-

रिशालीक्षुकशेरुकाणाम् । क्वाथं सुशीतं मधुशर्करीक्तं पिबन् जयेत् पैत्तिकमूत्रकृच्छ्रम् ॥ १७ ॥

शतावरि, काश, कुश, गोखरू, विदारीकन्द, शालिधान, इक्षु ( ईख ) और कसेरू के क्वाथ में मधु और खाँड मिलाकर शीतल होने पर पान करे तो पैत्तिक मूत्रकृच्छ्र आराम होता है ॥ १७ ॥

गुडेनामलकं वृष्यं श्रमघ्नं तर्पणं परम् । पित्तासृग्दाहशूलघ्नं मूत्रकृच्छ्रनिवारणम् ॥ १८ ॥

आँवले का क्वाथ गुड़ मिलाकर पान करने से वृष्य, श्रमनाशक और अत्यन्त तर्पण होता है तथा यह रक्तपित्त, दाह, शूल और मूत्रकृच्छ्र को नष्ट करता है ॥ १८ ॥

एर्वारुबीजं मधुकं सदार्वि पैत्ते पिबेत्तण्डुलधावनेन । दार्वीं तथैवामलकीरसेन समाक्षिकां पैत्तिकमूत्रकृच्छ्रे ॥ १९॥

पैत्तिक मूत्रकृच्छ्र में ककड़ी के बीज, मुलेठी और दारुहल्दी के चूर्ण को चावल के धोवन के साथ अथवा केवल दारुहल्दी के चूर्ण को आँवले के रस में घोलकर मधुमिश्रित कर पान करे तो पैत्तिक मूत्रकृच्छ्र आराम होता है ॥ १९ ॥

हरीतक्यादि ।

हरीतकीगोक्षुरराजवृक्षपाषाणभिद्धन्वयवासकानाम् । क्वाथं पिबेन्माक्षिकसंप्रयुक्तं कृच्छ्रे सदाहे सरुजे विबन्धे ॥२०॥

हड़, गोखरू, अमलतास, पाषाणभेद, धमासा और जवासा के क्वाथ को मधुमिश्रित कर पान करे तो दाह, वेदना, मूत्राघात और मूत्रकृच्छ्र रोग नष्ट होते हैं ॥ २० ॥

सितातुल्यो यवक्षारः सर्वकृच्छ्रविनाशनः । मूर्यावर्तभवं बीजं श्लक्ष्णं दृषदि पेषितम् ॥२१॥ व्युषितोदकसम्पीतं कृच्छ्रं हन्ति सुदारुणम् । मधुना यवक्षारं मूत्रकृच्छ्राश्मरीहरम् ॥ २२ ॥

जवाखार और मिसरी सम भाग मिश्रित कर सेवन करने से मूत्रकृच्छ्र रोग आराम होता है। सूर्यावर्त ( सूर्यमुखी ) के बीज को सिल पर महीन पीसकर बासी जल के साथ सेवन करने या मधु के साथ जवाखार का सेवन करने से दारुण मूत्रकृच्छ्र और पथरी रोग नष्ट होते हैं ॥ २१-२२ ॥

सगन्धकयवक्षारां शर्करां तक्रतः पिबेत् । मूत्रकृच्छ्राद्विमुच्येत साध्यासाध्यान्न संशयः ॥ २३ ॥

शुद्ध गन्धक, जवाखार और शक्कर समभाग मिश्रित कर तक्र के साथ सेवन करे तो साध्य और असाध्य सब प्रकार के मूत्रकृच्छ्र निःसंदेह आराम होते हैं ॥ २३ ॥

नारिकेलोद्भवं पुष्पं तण्डुलोदकसंयुतम् । रक्तजं मूत्रकृच्छ्रं हि पीतं हन्ति न संशयः ॥ २४ ॥

नारियल के फूल को तण्डुलोदक के साथ पीस कर पीने से रक्तज मूत्रकृच्छ्र निःसंदेह नष्ट होता है ॥ २४ ॥

कफमूत्रकृच्छ्र में एलायोग ।

मूत्रेण सुरया वापि कदलीस्वरसेन वा । कफकृच्छ्रविनाशाय श्लक्ष्णां पिष्ट्वा त्रुटिं पिबेत् ॥ २५ ॥

छोटी इलायची के बारीक चूर्ण को गोमूत्र, शराब अथवा केले की जड़ के रस के साथ कफज मूत्रकृच्छ्र को नष्ट करने के लिये सेवन करना चाहिए ॥ २५ ॥

एरण्डमूलादि कषाय ।

एरण्डमूलं मधुकाश्मभेदश्वदंष्ट्रा कृतमालकृष्णाः । एलाशिलादित्ययुतः कषायः समूत्रकृच्छ्रं हरति प्रमह्य ॥ २६॥

पखड़ी की जड़, मुलहठी, पाषाणभेद, अडूसा, गोखरू, अमलतास, पीपल, इनके क्वाथ में छोटी इलायची, शिलाजीत तथा कुलहुल के बीजों के चूर्ण को डालकर पीने से मूत्रकृच्छ्र नष्ट होता है॥ २६ ॥

अश्मरीजन्य मूत्रकृच्छ्र में एलादि क्वाथ।

एलोपकुल्या मधुकाश्मभेदकौन्ती-श्वदंष्ट्रामधुकोरुबूकैः। शृतं पिबेदश्मजतु मगाढं सशर्करं साश्मरिमूत्रकृच्छ्रे ॥२७॥

छोटी इलायची, पीपल, मुलहठी, पाषाणभेद, सँभालू, गोखरू, मुलहठी, अरण्डी की जड़, सब मिलाकर २ तोले, पाक के लिये जल ३२ तोले, शेष हुआ क्वाथ ८ तोले। इनके क्वाथ में शीतल होने पर शिलाजीत और खाँड़ डालकर पीने से अश्मरीयुक्त मूत्रकृच्छ्र नष्ट होता है॥ २७ ॥

दुरालभादि कषाय।

दुरालभाश्मभित्पथ्याव्याघ्रीमधुकधान्यकैः। कृतः क्वाथः सितापीतो मूत्रकृच्छ्रविबन्धनुत् ॥ दाहं शूलं निहन्त्याशु तमः सूर्योदये यथा ॥ २८ ॥

दुरालभा, पाषाणभेद, हड़, छोटी कटेरी, मुलहठी, धनिया सब मिलाकर २ तोले। पाक के लिए जल ३२ तोले, शेष हुआ क्वाथ ८ तोले। इस क्वाथ में खाँड़ डालकर पीने से मूत्रकृच्छ्र और मूत्राघातरोग नष्ट होता है तथा इसकी दाह एवं वेदना शान्त होती है॥ २८ ॥

पाषाणभेदादि क्वाथ।

पाषाणभेदो मधुयष्टिरेला कृष्णा शिवैरण्डसितावरपाः। श्वदंष्ट्राकार्यदंष्ट्रा च शिवासमेतैः क्वाथो हरेद् दुःसहमूत्रकृच्छ्रम् ॥ २९ ॥

पाषाणभेद, मुलहठी, छोटी इलायची, पीपलामूल, अरण्डी की जड़, अडूसा, स्पृक्का (असबर्ग) गोखरू, हड़ इनका क्वाथ पीने से कठिन मूत्रकृच्छ्र नष्ट होता है॥ २९ ॥

एलादिचूर्ण।

एलाश्मभेदकशिलाजतुपिप्पलीनां चूर्णानि तण्डुलजलैस्तु लितानि पीत्वा। यद्वा गुडेन सहितान्यवलिह्य चैवासन्न-मृत्युरपि जीवति मूत्रकृच्छ्री ३० ॥

छोटी इलायची, पाषाणभेद, शिलाजीत, पीपल, इनके चूर्ण को इकट्ठा कर बराबर मात्रा में मिलाकर तण्डुलोदक के साथ पीने अथवा इस चूर्ण को गुड़ के साथ मिलाकर चाटने से मरणासन्न मूत्रकृच्छ्र का रोगी भी पुनः जीवन प्राप्त करता है। चूर्ण की मात्रा—१२ रत्ती ॥ ३० ॥

तारकेश्वर।

शुद्धसूतं समं गन्धं लौहं वङ्गं मृताभ्रकम्। दुरालभां यवक्षारं बीजं गोक्षुरजं शिवाम् ॥ ३१ ॥ समांशं भावयेत्सर्वं कूष्माण्डफलवारिणा। पञ्चतृणभवक्वाथे रसे गोक्षुरजे तथा ॥ ३२ ॥ सम्पिष्य वटिका कार्या द्विगुञ्जाफलमानतः। मधुना भक्षं विलिहेत् मूत्रकृच्छ्रविनाशनम् ३३ ॥ उदुम्बरफलं पक्वं चूर्णितं कर्षमात्रकम्। लेहयेत् मधुना सार्द्धमनुपानं सुखावहम् ॥ ३४ ॥ अजाक्षीरं भवेत् पथ्यं शर्करेक्षुरसो हितः ॥ ३५ ॥

शुद्ध पारा, शुद्ध गन्धक, लोहभस्म, वङ्गभस्म, अभ्रकभस्म, धमासा, जवाखार गोखरू के बीज और हड़ इन सब औषधियों को समभाग लेकर पेठे के रस, पंचतृण के क्वाथ तथा गोखरू के रस की भावना देकर दो-दो रत्ती की गोलियाँ बनावे। शहद में मिलाकर गोली को सेवन करावे पश्चात् पके हुए गूलर के फलों का चूर्ण एक तोला शहद के साथ चाटे, तो मूत्रकृच्छ्र रोग नष्ट हो। पथ्य—बकरी का दूध, खाँड़ तथा गन्ने का रस ॥ ३१–३५ ॥

### मूत्रकृच्छ्रान्तक ।

सूतं ताम्रं च कान्तं गन्धतुल्यं विमर्दयेत् । चाण्डाली रक्तमीद्रावैर्दिनयामान्ते तु गोलकम् ॥ ३६ ॥ शुष्कं बद्ध्वा पुटेद्वाह्नः करीषाग्नौ महापुटे । माषमात्रं लिहेत् क्षौद्रैर्मूत्रकृच्छ्रप्रशान्तये ॥ ३७ ॥

पारद, ताम्रभस्म, कान्तभस्म और शुद्ध गन्धक, इन्हें सम परिमाण में एकत्र कर चाण्डालिनीकन्द और मुशलीके रस से दो पहर मर्दन करके गोलाकार कर ले । पश्चात् सम्पुट में बंद कर महापुट दें और स्वाङ्गशीतल होने पर औषध को निकाल लें । मात्रा—आधी रत्ती, अनुपान—मधु । इसका सेवन करने से मूत्रकृच्छ्ररोग शान्त होता है ॥ ३६-३७ ॥

### त्रिकण्टकाद्य घृत ।

त्रिकण्टकैरण्डकुशाद्यभीरु
कर्कारुकेक्षुस्वरसेन सिद्धम् ।
सर्पिर्गुडार्द्धांशयुतं प्रपेयं
कृच्छ्राश्मरीमूत्रविघातहेतोः ॥ ३८ ॥

गाय का घृत २ सेर, क्वाथार्थ गोखरू १ सेर, जल ८ सेर, शेष क्वाथ २ सेर, एरण्डमूल १ सेर, तृणपञ्चमूल मिलित १ सेर, जल ८ सेर, शेष क्वाथ २ सेर, शतावरी का रस २ सेर, कूष्माण्डरस २ सेर और ईख का रस २ सेर, इन सबको एकत्रकर पाक करे । सिद्ध हो जाने पर उतारकर गरम-गरम ही छान ले और सेर भर गुड़ मिलाकर यथारीति कर ले । इसके सेवन करने से मूत्रकृच्छ्र तथा अश्मरीरोग नष्ट होता है । मात्रा—आधा तोला ॥ ३८ ॥

### मूत्रकृच्छ्रहर ।

विदारी गोक्षुरं यष्टी केशरं च समं पचेत् । तत्कषायं पिबेत् क्षौद्रे रसभस्मयुतं पुनः ॥ मूत्रकृच्छ्रं हरेत् सर्वं सप्ताहात् पित्तसम्भवम् ॥ ३९ ॥

विदारीकन्द, गोखरू, मुलेठी और नागकेसर इनका क्वाथ मधु मिलाकर पारदभस्म के साथ सेवन करे तो एक सप्ताह में पैत्तिक मूत्रकृच्छ्ररोग नष्ट हो ॥ ३९ ॥

### श्वदंष्ट्रादि लेप ।

पिष्ट्वा श्वदंष्ट्रा फलमूलिकाभिरेर्वारुबीजानि सकाञ्जिकानि । आलिप्यमानानि समानि बस्तौ मूत्रस्य संशुद्धिकराणि सद्यः ॥ ४० ॥

गोखरू के बीज, गोखरू की जड़, ककड़ी के बीज इन्हें इकट्ठा कर काँजी में पीसकर बस्तिस्थल पर लेप करने से मूत्र मूत्राशय से बाहर निकल आता है ॥ ४० ॥

### बृहद्गोक्षुराद्यवलेह ।

गोक्षुरस्य पलशतं दशमूलं तथैव च । पाषाणभेदोऽष्टपलं गुडूचीपलपञ्चकम् ॥ ४१ ॥ एरण्डोऽभीरुरष्टौ च मूलं दशपलं पृथक् । पञ्चमूलं चाश्वगन्धा प्रत्येकं पलविंशतिः ॥ ४२ ॥ सर्वमेकत्र संकुट्य जलद्रोणे विपाचयेत् । पादशेषन्तु संग्राह्य वस्त्रपूतं समाक्षिपेत् ॥ ४३ ॥ घनीभूते तु सञ्जाते द्रव्याणीमानि दापयेत् । गन्धाभ्रं मत्स्यमेकन्तु शिलाजञ्च तथा स्मृतम् ॥ ४४ ॥ तालमूली शतावा च त्रिकटु त्रिफला तथा । सूक्ष्मैला भूतकेशी च ह्रीवेरं नागकेशरम् ॥ ४५ ॥ पद्मकं जातिपत्रत्वक् मधुयष्टी सरोचना जातीफलमुशीरञ्च त्रिवृता रक्तचन्दनम् ॥ ४६ ॥ धान्यकं कटुकाजाजी नागवल्ली च शृङ्गिका । पुष्कराह्वं शटी दारु सीसलोहं च वङ्गकम् ॥ ४७ ॥ द्रव्याणीमानि संचूर्ण्य प्रत्येकं पलमात्रकम् । स्निग्धभाण्डे नि-

धायाथ नित्यं माषद्वयोन्मितम् ॥ ४८ ॥ खादेद् बलाग्निं सम्प्रेक्ष्य पथ्यं सेवेत मानवः । अश्मरीं मूत्रकृच्छ्रञ्च मूत्राघातं विबद्धताम् ॥ ४९ ॥ प्रमेहा विंशतिश्चैव शुक्रदोषस्तथैव च । धातुक्षयश्चोष्णवातो वातकुण्डलिकादयः ॥ ५० ॥ ते सर्वे प्रशमं यान्ति भास्करेण तमो यथा । नातः परतरं किञ्चित् कृष्णात्रेयेण पूजितम् ॥५१॥

गोखरू २ सेर, पाषाणभेद ३२ तोले, गिलोय २० तोले, खरैटी की जड़ ६२ तोले, शतावरि ४० तोले, कमल की जड़ ८० तोले, असगन्ध ८० तोले, इन्हें इकट्ठा कर कूटकर २५ सेर ४८ तोले जल में पकावें जब ६ सेर ३२ तोले बाकी रह जाय तब उतार कर कपड़े से छान लें और पुनः अग्नि पर रक्खें। जब गाढ़ा हो जाय तब गोखरू १२८ तोले, शिलाजीत ६४ तोले, मूलकी सोया, त्रिकुटा, त्रिफला, छोटी इलायची, भूतकेशी, गन्धमाला, नागकेशर, पद्माख, सावित्री, दारचीनी, मुलहठी, गोरोचन, जायफल, खस, निसोत, लालचन्दन, धनिया, कुटकी, जवाखार, सज्जीखार, पान की जड़, काकड़ासिंगी, पोहकरमूल, कचूर, देवदारु, सीसकभस्म, लोहभस्म, वङ्गभस्म, हरएक ४ तोले डालकर अच्छी तरह चलाकर घी के चिकने बर्तन में रक्खें। मात्रा--२ माशे। इसके सेवन से अश्मरी, मूत्रकृच्छ्र, मूत्राघात, मूत्रविबन्ध, प्रमेह, वीर्यदोष, धातुक्षय, उष्णवात और वातकुण्डलिका आदि रोग नष्ट होते हैं ॥ ४१-५१ ॥

सुकुमारकुमारक घृत ।

पुनर्नवामूलतुला दशमूलं शतावरी । बला तुरगगन्धा च तृणमूलं त्रिकण्टकम् ॥ ५२ ॥ विदारिगन्धा नागाह्वा गुडूच्यतिबला तथा । पृथग्दशपलान् भागान् जलद्रोणे विपाचयेत् ५३ ॥ तेन पादावशेषेण घृतस्याढ्ढकं पचेत् । मधूकं शृङ्गवेरञ्च द्राक्षासैन्धवपिप्पलीः ॥ ५४ ॥ द्विपलिकाः पृथग् दद्याद्यमान्याः कुडवं तथा । त्रिंशद् गुडपलान्यत्र तैलस्यैरण्डजस्य च ॥ ५५ ॥ प्रस्थं दत्त्वा समालोड्य सम्यङ्मृद्वग्निना पचेत् ॥ एतदीश्वरपुत्राणां प्राग्भोजनमनिन्दितम् ॥ ५६ ॥ राज्ञां राजसमानाञ्च बहुस्त्रीपतयश्च ये । मूत्रकृच्छ्रे कटिस्तम्भे तथा गाढपुरीषिणाम् ॥ ५७ ॥ मेढ्रवङ्क्षणशूले च योनिशूले प्रशस्यते । यथोक्तानाञ्च गुल्मानां वातशोणितिकाश्चये ॥ ५८ ॥ बल्यं रसायनं शीतं सुकुमारकुमारकम् ॥ पुनर्नवाशते द्रोणो देयोऽन्येषु तथापरः ॥ ५९ ॥

सोंठ २ सेर, पाक के लिए जल २५ सेर ४८ तोले, बचा हुआ क्वाथ ६ सेर ३२ तोले। दशमूल, शतावरि, खरैटी की जड़, असगन्ध, पञ्चतृणमूल, गोखरू, शालिपर्णी, नागबला, गिलोय, अतिबला, हरएक ४० तोले। इन्हें इकट्ठा कर २५ सेर ४८ तोले जल में पकावें। जब चौथाई भाग बाकी रह जाय तब उतारकर कपड़े से छान लें। दोनों क्वाथ, गाय का घृत ३ सेर १६ तोले, गुड़ १२० तोले, अंडी का तैल १२८ तोले। कल्क के लिए मुलहठी, अदरख, दाख, सेंधानमक, पीपली हरएक ८ तोले, अजवाइन १६ तोले। इसे विधिपूर्वक मन्द आँच पर पकावें। इसे भोजन से पहिले ही सेवन करना चाहिए। इसके सेवन से मूत्रकृच्छ्र, कटिस्तम्भ, शिश्नेन्द्रियशूल, वंक्षणशूल ( रान का दर्द ), योनिशूल, गुल्म, वातरक्त आदि रोग नष्ट होते हैं। जिनको दस्त में कड़ा मल आता हो उनके लिए भी लाभदायक है। यह घृत बलकारक, वीर्यवर्द्धक तथा रसायन है। सुकुमार पुरुषों तथा बच्चों के लिए लाभदायक होने से

इस घृत का नाम सुकुमारकुमारकघृत है। मात्रा—½-१ तोला ॥ ५२-५९ ॥

शतावर्यादिसर्पि।

शतावरी काशकुशश्च दंष्ट्रा विदारिकेक्ष्वामलकेषु सिद्धम् । सर्पिः पयो वा सितया विमिश्रं कृच्छ्रेषु पित्तप्रभवेषु योज्यम् ॥ ६० ॥

घृत ४ सेर, कल्क के लिए शतावरि, कांस की जड़, कुश की जड़, गोखरू, विदारीकन्द, गन्ने की जड़, आँवला सब मिलाकर १ सेर। पाक के लिए जल १६ सेर। इस घृत को मन्द आँच पर पकावें। प्रयोग के समय इस घृत में खांड मिलाकर सेवन करें। मात्रा—आधा तोला। अथवा इन्हीं द्रव्यों द्वारा दूध को सिद्ध कर पीयें अर्थात् शतावरि आदि मिलाकर २ तोले, दूध १६ तोले, जल ६४ तोले। जब पकाते-पकाते दूध मात्र बाकी बच रहे तब उतारकर छान लें और खांड मिलाकर सेवन करावें ॥ ६० ॥

त्रिनेत्राख्य रस।

वङ्गं सूतं गन्धकं भावयित्वा लौहे पात्रे मर्दयेदेकयामम् । दूर्वा यष्टी गोक्षुरैः शाल्मलीभिः मूषामध्ये भूधरे पाचयित्वा ॥ ६१ ॥ तत्तद् द्रावैर्भावयित्वास्य वल्लं दद्याच्छीतं पायसं पथ्यमाशम् । दूर्वा यष्टी शाल्मलीतोयदुग्धैस्तुल्यैः कुर्यात्पायसं तद्दीव । प्रातःकाले शीतपानीयपानात् मूत्रे जाते स्यात्सुखी च क्रमेण ॥ ६२ ॥

वङ्गभस्म, पारा, गन्धक इन्हें इकट्ठाकर बराबर मात्रा में मिलाकर दूब, मुलहठी, गोखरू तथा सेमल की जड़ के रस से लोहे के खरल में घोटें। पश्चात् सूख जाने पर एक मूषा में बन्द कर भूधरयन्त्र में पकावें। शीतल होने पर फिर ऊपर कही हुई औषधियों के रस से भावना दें और २ रत्ती की गोली बनावें। रोगी को इस गोली का सेवन कराकर पीछे ठंढी हुई शीतल खीर खाने को दें। दूब, मुलहठी, सेमल की जड़ इनके क्वाथ से बराबर मात्रा में दूध को सिद्ध करें और दूध से खीर तैयार करें। प्रातःकाल शीतल जल के साथ इसे पीने से मूत्र के प्रवृत्त होने पर रोगी क्रमशः अच्छा हो जाता है ॥ ६१-६२ ॥

वरुणाद्य लौह।

द्विपलं वरुणं धात्र्यास्तदर्द्धं धातकीकुसुमम् । हरीतक्याः पलार्द्धञ्च पृश्निपर्णी तदर्धकम् ॥ ६३ ॥ कर्षमानञ्च लोहाभ्रं चूर्णमेकत्र कारयेत् । भक्षयेन्माषमेकं वा माषकौ द्वौ विधानवित् ॥ ६४ ॥ मूत्राघातं तथा घोरं मूत्रकृच्छ्रञ्च दारुणम् । अश्मरीं विनिहन्त्याशु प्रमेहं विषमज्वरम् ॥ ६५ ॥ बलपुष्टिकरञ्चैव वृष्यमायुष्यमेव च । वरुणाद्यमिदं लौहं चरकेण विनिर्मितम् ॥ ६६ ॥

वरना की छाल ८ तोले, आँवले ८ तोले, धाय के फूल ४ तोले, हड़ ४ तोले, पृश्निपर्णी २ तोले, लोहभस्म २ तोले, अभ्रकभस्म २ तोले, इन्हें इकट्ठा कर मिलावें। मात्रा—१ माशा से २ माशे तक। इसके सेवन से मूत्राघात, मूत्रकृच्छ्र, अश्मरी, प्रमेह, विषमज्वर आदि रोग नष्ट होते हैं। यह बलवर्द्धक, पुष्टिकारक, वीर्यवर्द्धक तथा आयुवर्द्धक है ॥ ६३-६६ ॥

चन्द्रकला रस।

प्रत्येकं कर्षमात्रं स्यात्सूतं ताम्रं तथाभ्रकम् । द्विगुणं गन्धकञ्चैव कृत्वा कज्जलिकां शुभाम् ॥ ६७ ॥ मुस्तादाडिमदूर्वोत्थैः केतकीस्तनकद्रवैः । सहदेव्याः कुमार्याश्च पर्पटस्य च वारिणा ॥ ६८ ॥ रामशीतलिकातोयैः शतावर्या रसेन च ।

भावयित्वा प्रयत्नेन दिवसे दिवसे पृथक् ॥ ६९ ॥ तिक्ता गुडूचिकासत्त्वं पर्पटोशीरमाधवी। श्रीगन्धं सारिवा चैषां समानं सूक्ष्मचूर्णितम् ॥ ७० ॥ द्राक्षाफलकषायेण सप्तधा परिभावयेत्। ततः पोताश्रयं कृत्वा वट्यः कार्यश्चणोपमाः ॥ ७१ ॥ अयं चन्द्रकला नाम्ना रसेन्द्रः परिकीर्तितः। सेव्यः पित्तगदध्वंसी वातपित्तगदापहः ॥ ७२ ॥ अन्तर्बाह्यमहादाहविध्वंसनमहाघनः। ग्रीष्मकाले शरत्काले विशेषेण प्रशस्यते ॥ ७३ ॥ कुरुते नाग्निमान्द्यं च महातापं ज्वरं हरेत्। भ्रममूर्च्छाहरश्चाशु स्त्रीणां रक्तं महास्रवम् ॥ ७४ ॥ ऊर्ध्वाधो रक्तपित्तञ्च रक्तवान्तिं विशेषतः। मूत्रकृच्छ्राणि सर्वाणि नाशयेन्नात्र संशयः ॥ ७५ ॥

पारा २ तोला, ताम्रभस्म २ तोले, अभ्रकभस्म २ तोले, गन्धक २ तोले। इसमें पहिले पारा तथा गन्धक की कज्जली करके तत्पश्चात् ताम्रभस्म और अभ्रकभस्म मिलावें। इसके बाद मोथा, अनार, दूब, केवड़ा, सहदेई, ग्वारपाठा, पित्तपापड़ा, आरामशीतलिका और शतावरि इनके रस से अलग-अलग एक-एक भावना दें। तदनन्तर सूख जाने पर कुटकी, गिलोय का सत, पित्तपापड़ा, खस, माधवी, सफेदचन्दन, सारिवा हरएक दो-दो तोले, बारीक चूर्ण को मिलाकर दाख के काढ़े से सात बार भावना देकर चने के बराबर गोलियां बना लें। इसे चन्द्रकला रस कहते हैं। यह पित्तरोग तथा वातपित्तरोगों को नष्ट करता है। यह बाहिरी तथा भीतरी दाह नष्ट करने के लिए परमश्रेष्ठ है। ग्रीष्म तथा शरद्ऋतु में अर्थात् जब पित्त का संचय अथवा प्रकोप होता है, यह विशेषतया लाभकारक है। इसके सेवन से भ्रम, मूर्च्छा, रक्तप्रदर, ऊर्ध्वगरक्तपित्त, अधोगत रक्तपित्त, रक्तवमन तथा सब प्रकार के मूत्रकृच्छ्र नष्ट होते हैं। यह रस ज्वर की बढ़ी हुई गरमी को हरता है। यद्यपि यह पित्त को नष्ट करता, परन्तु इसके सेवन से मन्दाग्नि नहीं होती, अर्थात् यह चन्द्रकला रस बढ़े हुए पित्त को ठीक अवस्था में लाता है ॥ ६७-७५ ॥

### मूत्रकृच्छ्र में पथ्य।

पुरातनालोहितशालयश्च धन्वामिषं मुद्गरसः सिता च। तक्रं पयो गौरच दधिप्रभूतं पुराणकूष्माण्डफलं पटोलम् ॥ ७६ ॥ ऊर्वारुखर्जूरकनारिकेलं तण्डुलियं चामलकञ्च सर्पिः। प्रतीरनीरं हिमवालुका च मित्रं नृणां स्यात्सति मूत्रकृच्छ्रे ॥ ७७ ॥

रससिन्दूर, वङ्गभस्म, अर्जुन की छाल और शक्कर समभाग लेकर सेमर के मूसरा के रस के साथ दिन भर घोटकर एक-एक माशे की गोलियाँ बनावे। इसका नाम 'इन्द्रवटी' है। मधुमेह की शान्ति के लिये इलायची, सेमर के मूसला का चूर्ण और मधु के साथ मिश्रित कर सेवन करावे ॥ मात्रा—२ रत्ती ॥ २२०-२२१ ॥

मेहमुद्गरवटिका।

रसाञ्जनं विडं दारु बिल्वगोक्षुरदाडिमाः मूनिम्बः पिप्पलीमूलं त्रिकटुत्रिफला त्रिवृत् ॥ २२२ ॥ प्रत्येकं तोलकं देयं लौहचूर्णं तु तत्समम्। पलैकं गुग्गुलुं दत्त्वा घृतेन वटिकां कुरु ॥ २२३ ॥ माषैका निर्मिता चेयं मेहमुद्गरसंज्ञिनी। श्रीमद्गहननाथेन लोकनिस्तारकारिणा ॥ २२४ ॥ अनुपानं प्रकर्त्तव्यं छागीदुग्धं जलं च वा। विंशन्मेहान् निहन्त्याशु मूत्रकृच्छ्रं हलीमकम् ॥ २२५ ॥ अश्मरीं कामलां पाण्डुं मूत्राघातमरोचकम्। षडशीतिविध्यं कुष्ठं भगन्दरमसृग्दरम्। सुखिनो यदि कर्त्तव्या त्रिसुगन्धिसमन्विता ॥ २२६ ॥

रसौत, विड्लवण, देवदारु, बेलगिरी, गोखरू के बीज, अनारदाने, चिरायता, पिपरामूल, त्रिकटु, त्रिफला और निसोथ प्रत्येक एक-एक तोला। सर्व समान लौहचूर्ण तथा गुग्गुलु ४ तोले मिलाकर घी के साथ घोटकर एक-एक माशे की गोलियाँ बनावे। 'मेहमुद्गर' नाम की इस वटी को लोकोपकारपरायण श्रीमान् गहननाथजी ने बनाया था। बकरी के दूध या जल के साथ सेवन करना चाहिए। यह बीस प्रकार के प्रमेह, मूत्रकृच्छ्र, हलीमक, अश्मरी, कामला, पाण्डु, मूत्राघात, अरोचक छः प्रकार के ज्वरों, व्रण, कुष्ठ, भगन्दर और मसूरिका रोगों को तत्काल नष्ट करती है। यदि सुखी (स्वस्थ) मनुष्य के लिये देना हो तो त्रिसुगंधि (दालचीनी, इलायची और तेजपात) के साथ देना चाहिए ॥ मात्रा—२ रत्ती ॥ २२२-२२६ ॥

बृहत् सोमनाथ रस।

हिङ्गुलसम्भवं सूतं पालिधारसमर्दितम्। रसदाशोधितगन्धं च तेनैव कज्जलीकृतम् ॥ २२७ ॥ तद्द्वयोर्द्विगुणं लौहं कन्यारसविमर्दितम्। अभ्रकं वङ्गकं रौप्यं खर्परं माक्षिकं तथा ॥ २२८ ॥ सुवर्णं च

समं सर्वं प्रत्येकं च रसार्द्धकम्। तत्सर्वं कन्यकाद्रावैर्मर्दयेत्भावयेत् तथा ॥ २२९ ॥ भेकपर्णीरसेनैव गुञ्जाद्वयवटीं हिताम्। मधुना भक्षयेच्चापि सोमरोगनिवृत्तये ॥ २३० ॥ प्रमेहान् विंशतिं हन्ति बहुमूत्रं च सोमकम्। मूत्रातिसारमत्युग्रं मूत्राघातं सुदारुणम् ॥ २३१ ॥ मूत्रदोषं बहुविधं प्रमेहं मधुसंज्ञकम्। हस्तिमेहमिक्षुमेहं नानामेहान् विनाशयेत् ॥ २३२ ॥ वातिकं पैत्तिकं चैव श्लैष्मिकं सोमसंज्ञितम्। नाशयेद् बहुमूत्रं च प्रमेहमविकल्पतः ॥ २३३ ॥ सोमनाथरसश्चायं चरकेण विनिर्मितः। तृष्णाद्युत्पद्यतमो ह्येष मूत्रदोषकुलान्तकृत् ॥ २३४ ॥

निम्बपत्र के रस में शोधित हिंगुलोत्थ पारद और मूसाकानी के रस में शोधित गन्धक एक-एक तोला लेकर दोनों की कज्जली करे। उस कज्जली में ४ तोला लोहभस्म मिलाकर कुमारी के रस में मर्दित करे। पश्चात् उसमें अभ्रकभस्म, बङ्गभस्म, रौप्य, खर्पर, स्वर्णमाक्षिक तथा सुवर्ण प्रत्येक २ माशे मिश्रित कर फिर क्रमशः कुमारी और मण्डूकपर्णी के स्वरस की भावना दे-देकर दो-दो रत्ती की गोलियाँ बनावे। सोमरोग की निवृत्ति के लिये इस परम लाभदायक रस का मधु के साथ सेवन करे। यह रस बीस प्रकार के प्रमेह, बहुमूत्र, सोमरोग, अत्युग्र मूत्रातिसार, दारुण मूत्राघात, विविध प्रकार के मूत्रदोष, मधुप्रमेह, हस्तिमेह, इक्षुमेह तथा अन्यान्य विविध प्रकार के प्रमेहों को नष्ट करता है। वातिक, पैत्तिक और श्लैष्मिक सोमनामक बहुमूत्र या मूत्रप्रमेह को निःसन्देह नष्ट करता है। अत्यन्त बलवीर्य-वर्धक और मूत्र दोषों के समूह को नष्ट करनेवाला है। इस 'सोमनाथरस' को चरकजी ने बनाया था ॥ २२७-२३४ ॥

देवदार्वरिष्ट

तुलार्द्धं देवदारोः स्याद्वासायाः पलविंशतिः। मञ्जिष्ठेन्द्रयवा दन्ती तगरं रजनीद्वयम् ॥ २३५ ॥ रास्ना कृमिघ्नं मुस्तं च शिरीषं खदिरार्जुनौ। भागान् दशपलान् दद्याद्यवान्या मुस्तकस्य च ॥ २३६ ॥ चन्दनस्य गुडूच्याश्च रोहिण्यश्चित्रकस्य च। भागानष्टपलानेतानष्टद्रोणेऽम्भसः पचेत् ॥ २३७ ॥ द्रोणशेषे कषाये च पूते शीते प्रदापयेत्। धातक्याः षोडशपलं माक्षिकस्य तुलात्रयम् ॥ २३८ ॥ व्योषस्य द्विपलं दद्यात् त्रिजातकचतुष्पलम्। चतुष्पलं प्रियङ्गोश्च द्विपलं नागकेशरम् ॥ २३९ ॥ सर्वाण्येतानि संचूर्ण्य घृतभाण्डे निधापयेत्। मासादूर्ध्वं पिबेदेनं प्रमेहं हन्ति दुस्तरम् ॥ २४० ॥ वातरोगग्रहण्यर्शोमूत्रकृच्छ्राणि नाशयेत्। देवदार्वादिकोऽरिष्टोदद्रुकुष्ठविनाशनः ॥ २४१ ॥

देवदारु २½ सेर और अडूसे के मूल की छाल १ सेर। मजीठ, इन्द्रजौ, दन्ती, तगर, हल्दी, दारुहल्दी, रास्ना, वायविडङ्ग, नागरमोथा, सिरस की छाल, खदिरकाष्ठ (खैर की लकड़ी) और अर्जुन की छाल आध-आध सेर तथा अजवाइन, कुड़ा की छाल, लाल चन्दन, गुर्च, रोहिड़ा और चीत चालीस-चालीस तोले ले। इनको ४ मन ४ सेर १६ तोले पानी में पकावे। २५ सेर ४८ तोले जल अवशिष्ट रहने पर उतार कर छान ले। शीतल हो जाने पर इस क्वाथ में धाय के फूल ६४ तोले, मधु १२ सेर। त्रिकटु (सोंठ, मिर्च, पीपरि) मिश्रित ८ तोले, त्रिजातक (दालचीनी, इलायची और तेजपात) मिश्रित १६ तोले, प्रियङ्गु के फूल १६ तोले और नागकेशर ८ तोले। इन सबको चूर्णित कर मिला दे और घृत के चिकने पात्र में बन्द करके रख दे। एक मास के अनन्तर छानकर इसका पान करे। यह अरिष्ट दुस्तर प्रमेह, वातरोग,

भगन्दरी, अर्श और मूत्रकृच्छ्र को नष्ट करता है। यह देवदार्व्यादिघृत दद्रु और कुष्ठ का नाशक है॥ २३९-२४१॥

प्रमेहरोग में पथ्य।

श्रमलङ्घनानि वमनानि विरेचनानि भोद्वर्तनानिशमनानि च दीपकानि, नीवार कङ्गु यवर्वेणव करुदूष श्यामाकजीर्ण कुरु-विन्द मुकुन्दकाश्च ॥ २४४॥ गोधूम-शालिक लमाश्चिरजाः कुलत्थ मुद्गाढकी चणक यूषरसास्तिलाश्च लाजाः पुरा-तनसुरा मधुवाल्यमण्डस्तक्रं च रासभजलं महिषीजलं च ॥ २४३॥ शशा-कपोतशश तित्तिरि लावबर्हि भृङ्गैणवर्त्तक-शुकादिक जाङ्गलाश्च शोभाञ्जनानि कुलकानि कटिल्लकानि कर्कोटकानि तलकानि च वार्हतानि ॥ २४४॥ औदुम्बराणि लशुनानि नवीनमोचं पत्तूर गोक्षुरक मूषिक पर्णि शाकम् मन्दार पत्रममृता त्रिफलाकपित्थं जम्बूः कशेरु कमलोत्पलकन्द बीजम् ॥ २४५॥ खर्जू-रलार्ङ्गलिकतालतरूत्तमाङ्गं व्योषं च तिन्दुकफलं खदिरः कलिङ्गः तिक्तानि चापि सकलानि कषायकाणि, हस्त्यश्व-वाहनमतिभ्रमणं रविस्विट् ॥ २४६॥ व्यायाम इत्यपिगणो भवति प्रकामंभिषं प्रमेह गदपीडितमानवानाम् ॥ २४७॥

प्रमेह रोग के होते ही प्रथम लङ्घन वमन विरेचन उबटना प्रमेह को शान्त करने वाले तथा अग्नि दीपन पदार्थों का उपयोग करना चाहिये और नीवार कागुनी जौ बाँस का चावल कोदो सावा पुरानी जवारि कुरथी और मुकुन्दक (साठी चावल का भेद) चावल पुराना गेहूँ शालि चावल कलमीधान का चावल कुलथी मूँग अरहर चना इनका यूष तिल धान का लावा पुरानी शराब शहद बाल्यमण्ड (बालु चावल सिद्ध जौ का मांड) मट्ठा गधे का मूत्र भैंस का मूत्र और छोटा कबूतर। खरगोश तीतर लवा मोर भृङ्गराजपक्षी हरिण वत्तक तोता आदिक जंगली पशु पक्षियों का मांस और सहजन परवल करेला खेकसा तालफल करेरी का फल गूलर का फल लहसुन नवीन केले का फल पत्तूर का शाक मूषाकर्णी के पत्तों का शाक आक के पत्ते गिलोय त्रिफला कैथ जामुन कसेरू कमल, कमल कन्द, कमल गट्टा खजूर कलिहारी ताड़की कोपल त्रिकुटा तेंदुफल खैर तरबूज सभी प्रकार तिक्त तथा कसैले रस वाले पदार्थ हाथी घोड़े पर चढ़कर चलना अत्यन्त भ्रमण करना सूर्य की धूप में फिरना कसरत कुश्ती ये सब प्रमेहरोग में अत्यन्त हितकर हैं॥ २४२-२४७॥

प्रमेह में अपथ्य।

सदासनं दिवानिद्रा नवान्नानि दधीनि च। मूत्रवेगं धूमपानं स्वेदं शोणितमोक्ष-णम् ॥ २४८॥ सौवीरकं सुरां शुक्तं तैलं क्षारं घृतं गुडम्। अम्ले क्षुरसपिष्टान्ना-नूपमांसानि वर्जयेत् ॥ २४९॥

तुम्बी तालास्थिमज्जानं विरुद्धान्यश-नानि च। कूष्माण्डमिक्षु दुग्धाम्बु स्वा-द्वम्ललवणानि च॥ अभिष्यन्दि प्रय-त्नेन प्रमेही परिवर्जयेत् २५०॥

इति भैषज्यरत्नावल्यां प्रमेहाधिकारः समाप्तः।

---

सदा बैठे रहना, दिन में सोना, नये शालि आदि धान्य, दही, मूत्रवेग को रोकना, धूमपान, स्वेदन, रक्तनिर्हरण (फस्द खोलना), सौवीर, मदिरा, शुक्त (सिरका) तैल, क्षार, घी, गुड़, खटाई ईख का रस, पीठी के भोज्य तथा जल-प्रधान देश के पशु पक्षियों का मांस लौकी,

ताड़ का गूदा, विरुद्ध भोजन, पेठा, ईख, दूषित जल, मीठे खट्टे और नमकीन रस तथा अभिष्यन्दी पदार्थ, ये सब प्रमेह रोग में त्याज्य हैं ॥ २४८-२५० ॥

इति श्रीसरयूप्रसादत्रिपाठिविरचितायां
भैषज्यरत्नावल्या रत्नप्रभाभिधायां
व्याख्यायां प्रमेहाधिकारः
समाप्तः।

---

## सोमरोगाधिकारः

स्त्रीणामतिप्रसङ्गाद्वा शोकाद्वापि श्रमादपि। आभिचारिकदोषाच्च गरदोषात्तथैव च ॥ १ ॥ आपः सर्वशरीरेभ्यः क्षुभ्यन्ति प्रस्रवन्ति च। तस्मात्ताः प्रच्युताः स्थानान्मूत्रमार्गं व्रजन्ति च ॥२॥ प्रसन्ना विमलाः शीता निर्गन्धा नीरुजः सिताः। स्रवन्ति चातिमात्रं तु दौर्बल्यं रतिहीनता ॥ ३ ॥ शिरसः शिथिलत्वं च मुखतालुविशोषणम्। सोमरोग इति ज्ञेयो देहे सोमक्षयान्नृणाम् ॥ ४ ॥ सोऽतिक्रान्तः क्रमेणैव स्रवेन् मूत्रमभीक्ष्णशः। मूत्रातिसारमप्येवं समाहुर्बलनाशनम्। तेन तृष्णाभिभूतोऽसौ जलं पिबति चाधिकम् ॥ ५ ॥

अत्यन्त स्त्रीप्रसङ्ग करने से, शोक से, अधिक श्रम करने से, आभिचारिक दोष से ( दोषितोषमण्डप स्त्री के साथ सङ्गम से ) और विषदोष से सम्पूर्ण शरीर से जलीय पदार्थ क्षुब्ध होकर प्रस्रुत होने लगते हैं। जल अपने स्थान से च्युत होकर मूत्रमार्ग में प्राप्त होते हैं। तब स्वच्छ, निर्मल, शीतल, निर्गन्ध, व्यथारहित श्वेतमूत्र अत्यधिक मात्रा में गिरने लगता है। इससे शरीर में दुर्बलता, रतिशक्तिहीनता, शिर की शिथिलता, मुख और तालु का शुष्क होना, ये सब लक्षण उपस्थित होते हैं। इस रोग से मनुष्यों के शरीर में सोम ( जल ) का क्षय हो जाता है। अतः इसका नाम सोम रोग है। अधिक समय व्यतीत होने पर जब मूत्र क्रमशः थोड़ी-थोड़ी देर में अधिक गिरने लगता है तब उसको मूत्रातिसार भी कहते हैं। यह बल का नाशक है जलीय पदार्थ के अत्यधिक गिर जाने से रोगी तृषार्त होकर अत्यधिक जल पीता है ॥ १-५ ॥

कदलीनां फलं पक्वं धात्रीफलरसं मधु। शर्करा पयसा पीतमपां धारणमुत्तमम् ॥ ६ ॥

केले का परिपक्व फल, आँवले का स्वरस १ तोला, मधु ४ माशे, शक्कर ४ माशे और दूध पावभर लेवे। इनको मिश्रित कर पान करे। यह बहुमूत्र को रोकने के लिये उत्तम औषध है ॥ ६ ॥

कदलीनां फलं पक्वं विदारीं च शतावरीम् क्षीरेण पाययेत्प्रातरपां धारणमुत्तमम् ॥ ७ ॥

केले का पका फल, विदारीकंद और शतावर को दूध में मिलाकर प्रातःकाल पान करे। यह बहुमूत्र को रोकने के लिए उत्तम औषध है ॥ ७ ॥ मात्रा 1-२ तोला ॥

धात्रीफलस्य रसकं मधुना च पिबेत्सदा। बहुमूत्रक्षयं कुर्यात् क्षारेण वासकस्य च ॥८॥

प्रतिदिन मधुयुक्त आँवले के अथवा अडूसे के क्षार के स्वरस का पान करे। ये योग बहुमूत्र को नष्ट करते हैं ॥ मात्रा १।२ तोला ॥ ८ ॥

तालकन्दं च तरुणं खर्जूरं कदलीफलम्। पयसा पाययेत्प्रातर्मूत्रातीसारनाशनम् ॥९॥

तालवृक्ष के तरुणकन्द, खजूर और केले के फल को दूध में मिश्रित कर प्रातःकाल पिलावे। यह मूत्रातिसार को नष्ट करता है। मात्रा—१।२ तोला ॥ १० ॥

माषचूर्णं समधुकं विदारी शर्करा मधु । पयसा पाययेत्प्रातः सोमरोगविनाशनम् ॥१०॥

उर्द का चूर्ण, मुलेठी, विदारीकंद, शक्कर और मधु को दूध में मिलाकर प्रातःकाल पान करावे। यह योग सोमरोग का नाशक है ॥ मात्रा—१।२ तोला ॥ १० ॥

त्रिफलादि योग।

त्रिफलावेणुपत्राब्दपाठामधुघृतैः कृतः। कुम्भयोनिरिवाम्भोधिं बहुमूत्रन्तु शोषयेत् ॥११॥

त्रिफला, बाँस के पत्ते, मोथा और पाढ़ के चूर्ण को शहद तथा घी के साथ सेवन करने से यह रोग शीघ्र नष्ट होता है। अगस्त्य मुनि ने जिस प्रकार समुद्र को सुखा दिया था उसी प्रकार यह योग बहुमूत्र को सुखा देता है ॥ ११ ॥

बृहद्धात्री घृत।

धात्रीफलरसप्रस्थं विदारीस्वरसं तथा। क्षीरस्यापि शतावर्याः प्रस्थं प्रस्थं रसस्य च ॥ १२ ॥ तृणपञ्चरसप्रस्थं दत्त्वा प्रस्थं घृतस्य च। पचेन्मृद्वग्निना वैद्यः पाकं ज्ञात्वा विधानतः ॥ १३ ॥ एलालवङ्गत्रिफला कपित्थफलमेव च। सजलं सरलं मांसी कदलीकन्दमेव च ॥ १४ ॥ उत्पलस्य च कन्दानि कल्कं दत्त्वा विचक्षणः। ततः कल्कं परिस्राव्य चूर्णं दद्यात्पलं पलम् ॥ १५ ॥ मधुकं त्रिवृता चैव क्षारकं वृद्धदारकम्। शर्करायाः पलान्यष्टौ मधुनश्च पलाष्टकम् ॥ १६ ॥ चूर्णं दत्त्वा सुमथितं स्निग्धभाण्डे निधापयेत्। सोमरोगं निहन्त्याशु तृष्णां दाहप्ररोचकम् ॥ १७ ॥ मूत्राघातं मूत्रकृच्छ्रं नाशयेद् बहुमूत्रकम्। पित्तजान् विविधान्-व्याधीन् वातजांश्च सुदारुणान् ॥ १८ ॥ करोति शुक्रोपचयं बलवर्णकरं परम्। नानारूपविकारघ्नं विशेषाद् बहुमूत्रनुत् ॥१९॥

आँवले का स्वरस १२८ तोले, विदारीकंद का स्वरस १२८ तोले, दूध १२८ तोले, शतावरि का स्वरस १२८ तोले, तृणपञ्चमूल का स्वरस या क्वाथ १२८ तोले, और घृत १२८ तोले एकत्र कर धीमी आँच पर पकावे। वैद्य विधिवत् पाक की परीक्षा कर चार चार तोले इलायची, लवङ्ग, आँवला, हर, बहेड़ा, कैथा के फल, सुगन्धबाला, सरलकाष्ठ, जटामांसी, केले का कन्द और भसीड़ा के कल्क के साथ पाक करे। पश्चात् घृत को कपड़े से छानकर इसमें चार-चार तोले मुलेठी, निसोथ, यवक्षार और विधारा का चूर्ण मिलावे। शक्कर ३२ तोले और मधु ३२ तोले मिलाकर घोटकर घी के चिकने पात्र में रख दे। यह घृत सोमरोग को तत्काल नष्ट करता है। तृष्णा, दाह, अरुचि मूत्राघात, मूत्रकृच्छ्र, बहुमूत्र तथा अन्यान्य विविध प्रकार के पित्तज और दारुणवातज, व्याधियों को नष्ट करता है। शुक्र, बल और कान्ति को बढ़ाता है तथा अन्यान्य नाना प्रकार के रोगों को, विशेषकर बहुमूत्र रोग को नष्ट करता है ॥ मात्रा—६ माशा से १ तोला ॥ १२-१९ ॥

स्वल्पधात्री घृत।

विना कल्कं स्वल्पधात्रीघृतमेतन्निगद्यते। सर्वं तुल्यं गुणैरेव पथ्यापथ्यं तदेव हि ॥२०॥

पूर्वोक्त घृत को कल्क के बिना ही सिद्ध करे, तो यह 'स्वल्पधात्रीघृत' कहा जाता है। शेष सब विधि बृहद्धात्रीघृत के तुल्य ही है। गुण और पथ्यापथ्य सब उसी के तुल्य हैं ॥ २० ॥

कदल्यादि घृत।

कदलीकन्दनिर्यासे सत्यमूलतुलां पचेत्। चतुर्भागावशेषेऽस्मिन् घृतप्रस्थं विपाचयेत् ॥ २१ ॥ चन्दनं सरलं मांसी

कदलीमूलकं तथा । एला लवङ्गत्रिफला कपित्थफलमेव च ॥ २२ ॥ औदकानि च कन्दानि न्यग्रोधादिगणस्तथा । कल्केनानेन संसिद्धं सोमरोगनिवारणम् ॥ २३ ॥ मूत्ररोगानशेषांश्च प्रमेहान् शुक्रपिच्छिलान् । प्रमेहान् विंशतिं चैव मूत्राघातांस्त्रयोदश ॥ २४ ॥ बहुमूत्रं विशेषेण मूत्रकृच्छ्रं तथाश्मरीम् । पीतं घृतं निहन्त्याशु विष्णुचक्रमिवासुरान् । कदल्यादिघृतं नाम विष्णुना परिकीर्तितम् ॥ २५ ॥

२४ सेर ४८ तोले केले के मूल के स्वरस में ४ सेर केले के फूल पकावे। ६ सेर ३२ तोले शेष रहने पर इस क्वाथ में १२८ तोले घृत पकावे। पश्चात् रक्तचन्दन, सरलकाष्ठ, जटामांसी, केले का मूल, इलायची, लौंग, आँवला, हड़, बहेड़ा, कैथा का फल, पद्ममूल, नीलोत्पलमूल आदि जलोत्पन्न कन्द तथा न्यग्रोधादिगण का कल्क मिलाकर यथाविधि घृत सिद्ध करे। यह घृत सोमरोग का नाशक है। शुक्र मिश्रित होने से पिच्छिल तथा सब प्रकार के मूत्रविकारों को, बीस प्रकार के प्रमेह और तेरह प्रकार के मूत्राघातों को, विशेषकर बहुमूत्र रोग को, मूत्रकृच्छ्र तथा अश्मरी रोग को ऐसे शीघ्र विनष्ट करता है जैसे विष्णुचक्र असुरों का संहार करता है। यह 'कदल्यादि घृत' विष्णु करके कहा गया है। मात्रा—६ माशा से १ तोला ॥ २१-२५ ॥

### सिद्धफल न्यग्रोधादिगण।

न्यग्रोधोदुम्बराश्वत्थपियालप्लक्षपेतसम् । आम्रो जम्बूद्वयं कोलं मधुकं तिन्दुकोऽर्जुनः । तिनकः ककुभो नीपो गर्दभाण्डोऽथ किंशुकः ॥ २६ ॥

बड़, गूलर, पीपल, पियाल ( चिरौंजी ), पाकड़, बेंत, आम, जामुन, बनजामुन, बेर, महुआ, लोध, अर्जुन, तिनक, कुटकी, कदम्ब, सिरस और पलाश इनको न्यग्रोधादिगण कहते हैं ॥ २६ ॥

### हेमनाथ रस।

सूतं गन्धं हेमताप्यं प्रत्येकं कोलसम्मितम् । अयश्चन्द्रं प्रवालं च वङ्गं चार्द्धं विनिक्षिपेत् ॥ २७ ॥ फणिफेनस्य तोयेन कदलीकुसुमेन च । उदुम्बररसेनापि सप्तधा परिमर्दयेत् ॥ २८ ॥ वल्लमात्रां वटीं खादेद्यथाव्याध्यनुपानतः । प्रमेहान् विंशतिर्हन्ति बहुमूत्रं सुदारुणम् ॥ २९ ॥ सोमरोगं क्षयं चैव श्वासं कासमुरःक्षतम् । हेमनाथरसो नाम्ना कृष्णात्रेयेण भाषितः ॥ ३० ॥

पारा, गन्धक, स्वर्ण और स्वर्णमाक्षिक छह-छह माशे तथा लोह, कपूर, प्रवाल और बङ्गभस्म तीन-तीन माशे डाले। सात-सात बार अफीम के जल, केले के फूल के रस और गूलर के स्वरस के साथ घोटकर तीन-तीन रत्ती की गोलियाँ बनावे व्याधि के अनुसार अनुपान की व्यवस्था करे। यह रस बीस प्रकार के प्रमेह, बहुमूत्र, दारुण सोमरोग, क्षय, श्वास, कास और क्षत को नष्ट करता है। कृष्णात्रेयजी ने इसका 'हेमनाथरस' कहा है। मात्रा—३ रत्ती ॥ २७-३० ॥

### वसन्तकुसुमाकर रस।

वैक्रान्तस्य च भार्गकं द्विभागं हेमभस्मनः । अभ्रकस्य च भागौ द्वौ मुक्ताविद्रुमयोस्तथा ॥ ३१ ॥ वङ्गभस्म त्रिभागं स्यात् रसस्य भस्मनस्तथा । चत्वारोऽस्य च भागाश्च सर्वमेकत्र मर्दितम् ॥ ३२ ॥ जम्बीराद्भिश्चणोदुग्धक्षीरोत्पलवारिभिः । इपद्मैरिक्षुनीरैः सप्तधा भावयेत्पृथक् ॥ ३३ ॥ भावितो रसराजः स्याद् वसन्तकुसुमाकरः । वल्लोऽस्य मधुना लीढः सोमरोगं

क्षयं नयेत् ॥ ३४ ॥ मूत्रातिसारं मेहांश्च मूत्राघाताश्मरीरुजम् । तृष्णां दाहं तालुशोषं नाशयेन्नात्र संशयः ॥ ३५ ॥ बल्यः पुष्टिकरो वृष्यः सर्वरोगनिबर्हणः । हन्त्यजीर्णं ज्वरं श्वासं क्षयरोगं कृशाङ्गताम् ॥ नातः परतरं किञ्चिद्रसायनमिहेष्यते ॥ ३६ ॥

रसभस्म तदभावे मूर्च्छितरसः । मूत्रातिसारे सोमरोगे च रसायनम् ।

वैक्रान्त ( हीराभस्म ) १ भाग, स्वर्णभस्म, अभ्रकभस्म, मोतीभस्म, और प्रवालभस्म दो-दो भाग । वङ्गभस्म, ३ भाग, और रससिन्दूर ४ भाग इन सबको मिलाकर घोट लें । पश्चात् क्रम से नींबू के रस, गोदुग्ध, खस के क्वाथ, कमल के स्वरस और इक्षुरस की सात-सात भावनाएँ दें । इस रसराज का नाम 'वसन्तकुसुमाकर' है । यह मधु के साथ तीन-तीन रत्ती सेवन करने से सोमरोग, मूत्रातिसार, प्रमेह, मूत्राघात, अश्मरी, तृष्णा दाह और तालुशोष को नष्ट करता है, इसमें कोई संदेह नहीं । यह रस वीर्यवर्द्धक, पौष्टिक और अन्यान्य सब प्रकार के रोगों का नाशक है । अजीर्ण ज्वर, श्वास, क्षयरोग और कृशाङ्गता को नष्ट करता है । इससे बढ़कर और कोई रसायन नहीं है ॥ ३१-३६ ॥

यहाँ रसभस्म के अभाव में मूर्च्छित पारद लेना चाहिए । मूत्रातिसार और सोमरोग में यह रसायन है ॥ मात्रा—२ रत्ती ।

तारकेश्वर रस ।

मृतसूताभ्रगन्धञ्च मर्दयेन्मधुना दिनम् । तारकेश्वरनामायं गहनानन्दभाषितः ॥ ३७ ॥ गुञ्जामात्रं भजेत्क्षौद्रैर्बहुमूत्रप्रशान्तये । उदुम्बरफलं पक्वं चूर्णितं कर्षमात्रकम् ॥ संलिह्यान्मधुना सार्द्धमनुपानं सुखावहम् ॥ ३८ ॥

रससिन्दूर, अभ्रकभस्म, गन्धक इन्हें इकट्ठा कर शहद के साथ घोटकर १ रत्ती की मात्रा में बहुमूत्र रोग की शान्ति के लिये शहद के साथ सेवन कराना चाहिए । इस रस का सेवन करने के पश्चात् पके गूलर का चूर्ण १ तोला तथा शहद मिलाकर अनुपान रूप से चाटना चाहिए ॥ ३७-३८ ॥

तालकेश्वर रस ।

तालं सूतं समं गन्धं मृतलौहाभ्रवङ्गकम् । मर्दयेन्मधुना चैव रसोऽयं तालकेश्वरः ॥ ३९ ॥ गुञ्जामात्रं लिहेत्क्षौद्रैर्बहुमूत्रप्रशान्तये । उदुम्बरफलं पक्वं चूर्णितं कर्षमानतः ॥ संलेह्यं मधुना सार्द्धमनुपानं सुखावहम् ॥ ४० ॥

शुद्ध हरताल, पारा, गन्धक, लोहभस्म, अभ्रकभस्म और वङ्गभस्म, इन्हें इकट्ठा कर बराबर मात्रा में मिला शहद से घोटे । मात्रा १ रत्ती से २ रत्ती तक, इसे बहुमूत्र की शान्ति के लिये शहद के साथ सेवन कराना चाहिए । अनुपान पके गूलर के फल का चूर्ण १ तोला और शहद ॥ ३९-४० ॥

सोमनाथ रस ।

कर्षं जारितलौहञ्च तदर्द्धं रसगन्धकम् । एलापत्रं निशायुग्मं जम्बूजीरकगोक्षुरम् ॥ ४१ ॥ विडङ्गं जीरकं पाठा धात्री दाडिमवत्कलम् । चन्दनं गुग्गुलुः लोध्रशालार्जुनरसाञ्जनम् ॥ ४२ ॥ छागीदुग्धेन वटिकां कारयेच्छाणक्रिकाम् । निर्मिता नित्यनाथेन सोमनाथरसस्त्वयम् ॥ ४३ ॥ सोमरोगं बहुविधं प्रदरं हन्ति दुर्जयम् । योनिशूलं मेढ्रशूलं सर्वजं चिरकालजम् ॥ बहुमूत्रं विशेषेण दुर्जयं हन्त्यसंशयम् ॥४४॥

लोहभस्म १ तोला, पारा, गन्धक, छोटी

इलायची, तेजपात, हल्दी, दारुहल्दी, जामुन की गिरी, खस, नीलरू, नागकेशर, जीरा, पाढ, आँवला, अनारदाना, सुहागा, लालचन्दन, शुद्ध गूगुल, लोध, शाल की छाल, अर्जुन की छाल और रसौंत हरएक आधा आधा तोला। इन्हें बकरी के दूध से घोटकर गोली बनावे। मात्रा—२ रत्ती से १० रत्ती तक। इसके सेवन से अनेक प्रकार का सोमरोग, प्रदर, योनिशूल, मेदशूल तथा त्रिदोषज और पुराना बहुमूत्र ये अवश्य ही अच्छे हो जाते हैं। यह सोमनाथ रस नित्यनाथ का बताया हुआ है॥ ४१-४४॥

गगनादि लौह।

गगनं त्रिफला लौहं कुटजं कटुकत्रयम्। पारदं गन्धकञ्चैव विषटङ्कणसञ्जिकाः॥ ४५॥ त्वगेला तेजपत्रञ्च वङ्गं जीरकयुग्मकम्। एतानि समभागानि श्लक्ष्णचूर्णानि कारयेत्॥ ४६॥ तदर्धं चैत्रकं चूर्णं माषार्द्धं मधुना लिहेत्। अवश्यं विनिहन्त्याशु मूत्रातीसारसोमकम्॥४७॥

अभ्रकभस्म, त्रिफला, लोहभस्म, कुरज की छाल, त्रिकुटा, पारा, गन्धक, बच्छनाग, सुहागा, सज्जी, दालचीनी, छोटी इलायची, तेजपात, बङ्गभस्म, सफेद जीरा और काला जीरा हरएक १ तोला, चित्रक का चूर्ण सबका आधा। इन्हें एकत्र मिलाकर रोगी को सेवन करावे। मात्रा—२ रत्ती से ४ रत्ती तक। इसके सेवन से मूत्रातीसार तथा सोमरोग नष्ट होता है ४५-४७

बहुमूत्रान्तक रस।

सिन्दूरञ्च तथा लौहो वङ्गाहिफेनसारकौ। उदुम्बरभवं बीजं बिल्वमूलं सुरप्रिया॥ ४८॥ सर्वं समं जन्तुफलरसैः सम्मर्दितं भवेत्। रक्तिद्वयमितां खादेद्वटिकामनुपानतः॥ ४९॥ दद्यादौदुम्बरफलरसं पथ्यविधिं शृणु। मांसप्रधानं भक्ष्यञ्च तथा गोधूमपिष्टकम्॥५०॥ बहुमूत्रान्तकरसो नाशयेदविकल्पतः। बहुमूत्रं तथा चान्यान् रोगांश्चैव तदुद्भवान्॥ ५१॥ तृष्णाधिक्ये प्रदातव्यं शृतशीतमिदं शुभम्॥ सारिवा मधुकं द्राक्षा दर्भः सरलचन्दने॥ ५२॥ पथ्या मधूकपुष्पञ्च सर्वञ्च समभागकम्। जले संस्थाप्य रजनी पराह्ने वस्त्रगालितम्। प्रोक्तं गहननाथेन सद्यस्तृष्णाहरं परम् ५३

रससिन्दूर, लोहभस्म, वङ्गभस्म, अफीम, गूलर के बीज, बेल की जड़, कबाबचीनी इन्हें इकट्ठा कर बराबर मात्रा में गूलर के रस से घोटकर २ रत्ती की गोली बनावे। अनुपान—गूलर के फल का रस। पथ्य—मांसप्रधान भोजन, गेहूँ का आटा। इस औषध के सेवन से बहुमूत्र तथा उससे पैदा होनेवाले अन्य रोग नष्ट होते हैं। यदि रोगी को बहुमूत्र रोग के कारण अत्यन्त पिपासा हो तो नीचे लिखे हुए शीत कषाय को पिलाना चाहिए। कषाय—अनन्तमूल, मुलहठी, दाख, डाभ की जड़, चीड़ की लकड़ी लाल चन्दन, हड़, महुए के फूल मिलाकर १ तोला। इसे कूटकर १२ तोले पानी में रात्रि को भिगो दे। अगले दिन प्रात कपड़े से छान रोगी को पिलावे यह तत्काल तृष्णा को नष्ट करता है॥ मात्रा २ रत्ती॥ ४८-५३॥

अन्य बहुमूत्रान्तक रस।

रसश्च शाल्मलीमूलचूर्णं कदलिमूलजम्। उदुम्बरबीजचूर्णं लौहो वङ्गञ्च विद्रुमम्॥ ५४॥ मुक्ताहिफेनसारौ च प्रत्येकं समभागिकम्। मर्दयेन्मालतीपुष्परसेन कुशलो भिषक्॥ ५५॥ रक्तिद्वयमितां कुर्याद्वटिकामतिशोभनाम्। बहुमूत्रान्तको नाम रसः परमशोभनः॥ मधुमेहं सोमरोगं हन्ति भास्वान् यथा तमः॥ ५६॥

रससिन्दूर, सेमल की जड़, केले की जड़, गूलर के बीज, लोहभस्म, मूँगाभस्म, मोतीभस्म और अफीम इन्हें बराबर मात्रा में मिलाकर मालतीफूल के रस से घोटें और दो-दो रत्ती की गोलियाँ बनावे। यह बहुमूत्रान्तक रस मधुमेह तथा सोमरोग को नष्ट करता है मात्रा २ रत्ती ॥ ५४-॥ ५६ ॥

हिमांशु रस।

रसस्य कर्षमादाय खल्ले निक्षिप्य बुद्धिमान्। रक्तागस्त्यप्रसूनस्य स्वरसेन विमर्दयेत् ॥ ५७ ॥ सप्तवारं तथा साधु श्वेतदूर्वारसेन च। निष्कद्वयं टङ्कणञ्च कर्षं खादिरसारतः ॥ ५८ ॥ कर्पूरं रसतुल्यञ्च सर्वमेकत्र मर्दयेत्। यावच्चिक्कणतां याति युक्त्या चन्दनवारिणा ॥ ५९ ॥ हरेणुमात्रान् वटकान् छायायां परिशोषितान्। प्रातः प्रातश्च सेवेत मध्याह्ने च विशेषतः ॥ ६० ॥ निशायाञ्च विशेषेण सेवनीयः प्रयत्नतः। एतद्धि मेहतुद्-द्रव्यं मुखशोषहरं परम् ॥ सोमरोगहरं सर्वपिटिकानाशनं परम् ॥ ६१ ॥

रससिन्दूर १ तोला खरल में डालकर लाल अगस्तिया के फूल के रस से सात बार भावना दे। इसी प्रकार श्वेत दूब के रस से भी सात बार अच्छी तरह घोटें। पश्चात् सुहागा १ मासा, कत्था १ तोला, कपूर १ तोला डालकर अच्छी तरह चन्दन के जल से घोटें और मटर के बराबर गोली बनावे। इसे प्रातः मध्याह्न तथा रात्रि के समय सेवन करना चाहिये। यह प्रमेहनाशक है, मुखशोष को हटाता है, सोमरोग तथा सम्पूर्ण पिडिकाओं को नष्ट करता है मात्रा ॥ २-२ रत्ती ॥ ५७-६१ ॥

पथ्य।

मासानि यवगोधूमाः क्षीरमुद्धृतसारकम्। विविधानि च कन्दानि कदल्यादिफलानि च ॥ ६२ ॥ पादग्रहीनं भ्रमणं व्यायामः श्रम एव च। चलः प्रसक्तिः पथ्यं स्यात् सोममूत्रातिसारिणाम् ॥ ६३ ॥

उड़द, जौ, गेहूँ, मक्खन निकाला हुआ दूध विविध कन्द, केला, गूलर आदि फल, नंगे पैर भ्रमण, व्यायाम, परिश्रम, मन का प्रसन्न रहना, ये सोमरोग एवं मूत्रातिसारियों के लिये पथ्य हैं ॥ ६२-६३ ॥

अपथ्य।

इक्षोर्विकारा भृशमम्बुपानं फलान्यपक्वानि सुखासनञ्च। दिवा तु निद्रां भयकोपशोकान् विवर्जयेन्मूत्रपदी प्रयत्नात् ॥ ६४ ॥

इति भैषज्यरत्नावल्यां सोमरोगाधिकारः समाप्तः।

---

ईख से बने गुड़, खाँड आदि द्रव्य, अत्यन्त जलपान, कच्चे फल, सुख से बैठे रहना, दिन में सोना, अत्यन्त सोना, भय, क्रोध एवं शोक इनसे मूत्ररोगी को बचाना चाहिए ॥ ६४ ॥

इति सरयूप्रसादत्रिपाठिविरचितायां भैषज्यरत्नावल्या रसप्रभाभिधायां व्याख्यायां सोमरोगाधिकारः समाप्तः।

---

## अथौपसर्गिकमेहाधिकारः

औपसर्गिकमेहोऽथ पूयमेहस्तथैव च। सर्वनागम्बुमश्चापि व्रणमेहोऽपि कथ्यते ॥ १ ॥

औपसर्गिक मेह, पूयमेह, भगन्दुम मेह तथा व्रणमेह ये पर्यायवाचक हैं। इसे साधारण भाषा में सूजाक (Gonorpheea) कहते हैं ॥ १ ॥

निदान।

क्लिन्नयोनिः ऋतुमती पद्मसुप्ता तथैव

या । कामान्धस्तत्र गमनाद् गदमाप्नोति दारुणम् ॥ २ ॥

मद्य आदि के मदाद से गीली योनिवाली-ऋतुमती तथा वेश्याओं के साथ संभोग करने से कामान्ध पुरुष को यह कष्टदायक रोग होता है । परन्तु यह बात अवश्य है कि जिस स्त्री को यह रोग होगा उसके साथ सम्भोग करने से ही यह रोग हुआ करता है अन्यथा नहीं ।

रोगी के अधोवस्त्र ( धोती-पाजामा आदि ) जिस पर इस रोगी का पीब लगा हुआ हो उसके परिधारण करने से मूत्रेन्द्रिय आदि पर स्पर्श होकर भी यह रोग हो सकता है । इसी प्रकार जिस पुरुष को यह रोग हो वह यदि स्त्री-सम्भोग करेगा तो उस स्त्री को भी यह रोग हो सकता है, अर्थात् यह रोग संसर्ग से फैलनेवाला है ॥ २ ॥

बहुसङ्करसम्भोगप्रक्लिष्टेन्द्रिययापुमान् । स्त्रिया सङ्गम्य संमूढो गदमाप्नोति दारुणम् ॥ ३ ॥ मूत्रनाड्यन्तरस्थानात् त्वगस्य श्लेष्मवाहिनी । व्रणिता वाहयेत् क्लेदं व्रणमेहः स उच्यते ॥ ४ ॥ औपसर्गिकमेहश्च तस्य नामान्तरं मतम् । मेह आगन्तुकश्चापि स कैश्चित्परिभाष्यते ॥ ५ ॥ आरभ्य सङ्गमनिशा संख्या या च सप्तमी । एतद्व्यवहिते काले प्रायशो जायते गदः ॥ ६ ॥ कण्डूः शिश्नाग्रतस्तस्य समुत्थानं मुहुर्मुहुः । तीव्रवेदनया चापि मुहुर्मूत्रप्रवर्तनम् ॥ ७ ॥ स्फीतिर्लिङ्गस्य लौहित्यं कोपे ग्रन्थे च वेदना । कदाचित् क्लेदसंरुद्धमार्गत्वादतिरुक् स्रवेत् ॥ ८ ॥ मूत्रं दाहेन घोरेण द्विधारं वा प्रवर्तते । क्षरेद्वा लवनं मेढ्रान्मूत्रकाले कदाचन ॥ ९ ॥ सन्ततं तनुरास्रावः स्रवेदादौ ततोऽनुः । स तावत्पुनरानुपूर्व्येण प्रतिमानं प्रयाति च ॥ १० ॥ कालो लब्धो व्यथां कुर्याद्व्याधिं च दुष्प्रतिक्रियम् । आमवातादिरोगाद्या ज्ञेयश्चास्य ह्युपद्रवाः ॥ ११ ॥

बहुत से पुरुषों के साथ सम्भोग करने से विकृत योनिवाली स्त्री के साथ सङ्गम (सम्भोग) करनेवाला मूढ़ पुरुष भयङ्कर रोग को प्राप्त होता है । मूत्रनली के भीतरी स्थान से इसकी श्लेष्मवाहिनी त्वक् व्रणयुक्त होने के कारण क्लेद को बहाती है अतः इसको व्रणमेह कहते हैं । इसका दूसरा नाम औपसर्गिक मेह भी माना गया है । कुछ आचार्य इसे आगन्तुक मेह भी कहते हैं । विकृत योनिवाली स्त्री के साथ सम्भोग की रात से आरम्भ करके एक सप्ताह के भीतर ही प्रायः यह रोग उत्पन्न हो जाता है । इस रोगी के शिश्न के अग्रभाग में खुजली, बार-बार उत्थान, तीव्र वेदना से बार-बार मूत्र की प्रवृत्ति, लिङ्ग में शोथ, लालिमा, अण्डकोष और वङ्क्षण (वाघी) में वेदना, कभी-कभी क्लेद से मूत्रमार्ग अवरुद्ध हो जाने से अत्यन्त पीड़ा और घोर दाह के साथ मूत्र का निकलना अथवा दो धार से मूत्र का प्रवृत्त होना इत्यादि लक्षण होते हैं । अथवा कभी-कभी लघुशङ्का करने के समय लिङ्ग से खून गिरने लगता है । पहिले निरन्तर थोड़ा-थोड़ा गिरता है, पश्चात् बहुत अधिक गिरने लगता है । यह क्रमशः शुष्क होता हुआ सारूप्य को प्राप्त हो जाता है । कालान्तर में व्यथा कर हो जाती है । परन्तु यह रोग असाध्य हो जाता है । आमवात और अधिरोग आदि इसके उपद्रव जानने चाहिए ॥ ३-११ ॥

औपसर्गिकमेहचिकित्सा ।

व्रणमेही त्यजेद्यावद्व्याधं सोऽहितो यतः । स्त्रियाश्च परिमुक्तायाः आमयं जनयेच्च तम् ॥ १२ ॥ भेषजं पानमत्र च निषेवेतानुलोमनम् । व्रणघ्नं मूत्रजननं क्रियामुग्रां विवर्जयेत् ॥ १३ ॥

व्रणमेही यत्नपूर्वक मैथुन का परित्याग करे

क्योंकि यह अहित है। तथा परिभुक्ता स्त्री को भी यही रोग उत्पन्न हो जाता है। वातानुलोमन, व्रणघ्न और मूत्रोत्पादक औषध और अन्न पान का सेवन करे तथा अन्य क्रिया का परित्याग करे ॥ १२-१३ ॥

कोष्णे जात्या वराया वा क्वाथे शिश्नं निमज्जयेत् । वेदनोपशमस्तेन व्याधेश्च बलसंक्षयः ॥ १४ ॥

चमेली या त्रिफला के गुनगुने क्वाथ में लिङ्ग को डुबावे। उससे पीड़ा की शान्ति होती है और व्याधि का बल क्षीण होता है ॥ १४ ॥

आभानिर्यासतोयं च यवक्षारयुतं पिबेत् । सजलं क्षीरमामं वा व्रणमेह-निवृत्तये ॥ १५ ॥

बबूल के गोंद को पानी में भिगो दे, जब वह घुल जावे तो उसमें जवाखार मिलाकर पान करे। अथवा कच्चे दूध में पानी मिलाकर पान करे तो व्रणमेह रोग निवृत्त होता है ॥ १५ ॥ मात्रा १ माशा ॥

पिबेद्वा क्षारिवाक्वाथं सक्षारं नरसार-कम् । श्यामामनन्तां कद्वीं च बीजं गोक्षुर-संभवम् ॥ १६ ॥ गन्धाश्मनरसाराभ्यां क्वाथयित्वा जलं पिबेत् । एकं सुरभियफलं मेहमागन्तुकं हरेत् ॥ १७ ॥

अनन्तमूल के ४ तोला क्वाथ में एक माशा यव-क्षार और नवसादर मिलाकर पान करे। अथवा श्यामालता, अनन्तमूल, कुटकी और गोखरू के बीज का क्वाथ बनाकर ४ तोले में गन्धक १ रत्ती और नवसादर १ रत्ती मिलाकर पान करे। अकेली कबाबचीनी आगन्तुक मेह का हरण करती है ॥ १६-१७ ॥

वराभापिप्पलीनां च व्रणमेहनिवृत्तये । कुर्यादुत्तरवस्तिं च कषायेण प्रयत्नतः ॥ १८ ॥

त्रिफला, बबूल की छाल और पीपर की छाल के क्वाथ से पिचकारी देवे तो व्रणमेह की निवृत्ति होती है ॥ १८ ॥

उत्तरवस्ति।

कणाभात्रिफलाक्वाथं दद्यादुत्तरवस्तिना। प्रयोगादस्य सततं व्रणमेहः प्रशाम्यति १९

पीपली, बबूल की छाल तथा त्रिफला इनके क्वाथ से व्रणमेही को उत्तरवस्ति दे। इस प्रकार शीघ्र ही व्रणमेह शान्त हो जाता है ॥ १९ ॥

सितं तुत्थस्य भसितं कर्षकद्वयसम्मि-तम् । मृद्दारशृङ्गदरदं प्रत्येकं रसमापि-कम् ॥ २० ॥ दध्नः स्वच्छं जलं प्रस्थं त्रिफलाक्वाथपादिकम् । सर्वं सम्मिश्र्य विधिवद् दद्यादुत्तरवस्तिना ॥ २१ ॥

तूतिया की श्वेत भस्म २ तोला, मुर्दासंग ६ माशे, हिंगुल ६ माशे, दही का स्वच्छ पानी १२८ तोला, त्रिफला क्वाथ ३२ तोला, इन्हें विधिपूर्वक मिलाकर उत्तरवस्ति देने से व्रणमेह नष्ट होता है ॥ २०-२१ ॥

व्रणमेहहर चूर्ण।

श्रीवेष्टसत्त्वं शुद्धं स्यात् कक्कोलं केशरं तथा । स्फुटी शुद्धा सोरकश्च शालो जम्बू च जीरकम् ॥ २२ ॥ सर्वं समं समादाय भक्षयेत् सन्ध्ययोर्द्वयोः । दुग्धाम्बुना पूय-मेहः ध्रुवं पक्षाद्विनश्यति ॥ २३ ॥

शुद्ध गन्धाविरोजा, शीतलचीनी, नागकेशर, शुद्ध फिटकरी, शोरा, राल, काकजङ्घ और श्वेत जीरा इन्हें बराबर मात्रा में मिलाकर दोनों सन्ध्या समय रोगी को सेवन करावें। मात्रा— १ माशे से २ माशे तक। अनुपान- कच्चे दूध की लस्सी। इस चूर्ण के सेवन से पूयमेह १५ दिन के अन्दर ही नष्ट हो जाता है ॥ २२-२३ ॥

महाभ्रवटिका।

त्रिःसप्तकृत्वः सम्भाव्य भृङ्गराजाम्भ-साभ्रकम् । तेन गन्धं रसं लौहं हेम चाभ्राद्ध-सम्मितम् ॥ २४ ॥ वराक्वाथेन संमर्द्य वटिकां रक्तिकोन्मिताम् । औपसर्गिक-मेहस्य नाशाय दापयेद्भिषक् ॥ २५ ॥

भाँगरे के रस में इक्कीस बार भावित अभ्रक-भस्म और इससे अर्धभाग गन्धक, पारा, लोहभस्म और स्वर्णभस्म लेकर सबको एकत्र कर त्रिफला के क्वाथ के साथ घोट कर एक-एक रत्ती की गोली बनावे। वैद्य औपसर्गिक प्रमेह के नाश के लिये एक-एक गोली दे ॥ २४-२५ ॥

### कन्दर्परस।

रसं गन्धं प्रवालं च काञ्चनं गिरिमृत्तिका। वैक्रान्तं रजतं शङ्खं मौक्तिकं च समं समम् ॥ २६ ॥ न्यग्रोधस्य कषायेण भावयित्वा च सप्तधा। वल्लोन्मानां वटीं कृत्वा त्रिफलाक्वाथवारिणा ॥ २७ ॥ सुरभियवार्जुनस्य क्वाथेनाम्भसापि वा। औपसर्गिकमेहस्य शान्त्यर्थं विनियोजयेत् ॥ २८ ॥

इति भैषज्यरत्नावल्यामौपसर्गिक-मेहाधिकारः समाप्तः।

---

पारा, गन्धक, प्रवाल, स्वर्णभस्म, गेरू, हीरकभस्म, रजतभस्म, शङ्खभस्म और मौक्तिक भस्म के सब बराबर-बराबर लेकर एकत्र कर बरगद की छाल के क्वाथ के साथ सात बार भावित कर तीन-तीन रत्ती की गोली बनावे। त्रिफला के क्वाथ के साथ अथवा कचनारकी और अर्जुन की छाल के क्वाथ के साथ औपसर्गिक प्रमेह के शान्त्यर्थ इसका प्रयोग करे ॥ २६--२८ ॥

इति श्रीपण्डितदत्तरामत्रिपाठिविरचितायां भैषज्यरत्नावल्या रत्नप्रभाभिधायां भाषाटीकायां औपसर्गिकमेहाधिकारः समाप्तः।

---

## अथ शुक्रमेहाधिकारः

### शुक्रमेह का निदान।

योऽनाभावनविधिना कुरुते रेतसो व्ययम्। शुक्रमेहाभिधस्तस्य गदो भवति दारुणः ॥ १ ॥

अविधिना अतिसङ्गमेन करकर्मणा वा।

जो मूर्ख व्यक्ति (अपनी इन्द्रियों को वश में न रख के) हानिकारक अनुचित भावों (अति मैथुन, हस्तमैथुन आदि) से वीर्य नष्ट करता है उसके भयङ्कर कष्टकारक वीर्यमेह रोग हो जाता है ॥ १ ॥

### शुक्रमेह लक्षण।

मलमूत्रातिवेगेन तथा कामस्य वेगतः। स्त्रीस्पर्शाद्दर्शनस्मरणादपि रेतः पतेत्तथा ॥ २ ॥ निद्रायां रमणीसङ्गानुभावात् संपतेदपि। रोगेऽतिप्रबले शिश्ने शिथिलेऽपि च तत्पतेत् ॥ ३ ॥ तन्द्रावेशेऽथ शयने तत्पतेदत एव च। न शक्नुयाद्दृढीं नारीं सन्तोषयितुमण्वपि ॥ ४ ॥ ततो यायात्क्षयदीनो ध्वजभङ्गाख्यमामयम्। वृथा जीवति स क्लीबो मरणस्तस्य जीवनम् ॥ ५ ॥ अग्निमान्द्यं कोष्ठरोधः शिरसः परिघूर्णनम्। अजीर्णमस्तिभारश्च दृष्टेर्दुर्बलता तथा ॥ नेत्रान्ते नीलिमा शुक्रमेहस्योपद्रवा इमे ॥ ६ ॥

मलमूत्र के अधिक वेग से तथा काम वेग से स्त्री के स्मरण, स्पर्श और दर्शन से वीर्यपतन हो जाता है या निद्रा में (सोते समय) स्त्री सम्भोग का अनुभव होकर भी वीर्यपात हो जाता है। रोग की अति प्रबलता से शिश्नेन्द्रिय शिथिल हो जाती है। किंचित् उत्तेजना होकर फिर गिर जाती है। तन्द्रा में, शैय्या में (बिना स्त्री के) भी वीर्यपात हो जाता

है। यह रोगी सम्भोग में स्त्री को सन्तोष नहीं कर सकता। उस भाग्यहीन व्यक्ति को ध्वज भङ्ग (नपुंसकता) नामक रोग हो जाता है। वह व्यक्ति व्यर्थ जीता है। उसकी मृत्यु ही उसका जीवन है मन्दाग्नि, मलावरोध, शिर में घूमना (चक्कर लगना), अजीर्ण, अतिसार, दृष्टि की दुर्बलता, नेत्रों के नीचे नीली झाई पड़ जाना शुक्रमेह के उपद्रव हैं॥ २–६॥

त्रिवारं वा चतुर्वारं दिवारात्रौ यतेत्क्वचित्। एवं सद्धगदो मूढः ध्वजशैथिल्यमेति च॥ ७॥

कहीं कहीं दिन और रात में तीन अथवा चार बार भी वीर्यपात होते देखा गया है। इस प्रकार रोग के अधिक बढ़ जाने से अन्त में इन्द्रियों में शिथिलता हो जाती है॥ ७॥

न शक्नुयान्मर्दयितुं कदाचिन्मदं स्मरस्मेरविलासिनीनाम्। पतद्ध्वजस्तीव्रवियोगदुःखः कदाचिदिच्छेन्मरणं विरक्तः॥ ८

शुक्रमेह रोग के बढ़ जाने पर पुरुष मैथुन करने में असमर्थ हो जाता है अर्थात् उसका वीर्य मैथुन से पहिले ही निकल पड़ता है। जिससे रोगी अत्यन्त दुःखी रहने लगता है, यहाँ तक कि उदासीन होकर आत्महत्या का विचार भी कर लेता है॥ ८॥

शुक्रमेह के उपद्रव।

ध्वजभङ्गः प्रतिश्यायस्त्रिकदेशे च वेदना। विषण्णतागदोद्वेगः कासो यक्ष्मारतिस्तथा॥ ९॥ कोष्ठावरोधः शिरसश्च घूर्णनं वह्निविनाशस्त्वतिसार एव। ह्रासश्च दृष्टेर्नयनं नीलिमा दृशोरजीर्णमेते प्रभवन्त्युपद्रवाः॥ १०॥

ध्वजभङ्ग (शिश्नेन्द्रिय का खड़ा न होना), जुकाम, त्रिकदेश (कमर) में दर्द, विषण्णता (सदा दुःखी अथवा ग्लानियुक्त रहना), गदोद्वेग नामक मिथ्या काल्पनिक व्याधि, खाँसी, राजयक्ष्मा तथा अरति (किसी भी कार्य करने में रुचि न होना), मलमर्दता (कब्ज), सिर का घूमना, मन्दाग्नि, अतिसार, दृष्टि-शक्ति का कम होना, आँखों का नीलापन तथा अजीर्ण आदि उपद्रव हो जाते हैं॥ ९–१०॥

शुक्रमेह प्रथमतः क्रिया संशोधनी हिता। रेतसो रक्षणं तत्र कार्यं चातिप्रयत्नतः॥ ११॥

शुक्रमेह में संशोधन क्रिया हितकर होती है। उसमें वीर्य की रक्षा का विशेष प्रयत्न करना चाहिए॥ ११॥

अन्नपानौषधैः सर्वैर्धातुपुष्टिकरैर्भृशम्। रेतसो रक्षणं तत्र कार्यञ्चातिप्रयत्नतः॥ १२॥

इस रोग में वीर्य आदि को पुष्ट करनेवाले अन्नपान एवं औषध आदि द्वारा अत्यन्त प्रयत्नपूर्वक वीर्य की रक्षा करनी चाहिये॥ १२॥

प्रायशः शयने तेषां च्युतिः शुक्रस्य जायते। ब्राह्मे मुहूर्ते उत्थानं तेषामावश्यकं मतम्॥ १३॥

जिन्हें प्रायः सोते हुए बिस्तर पर ही वीर्यपात हो जाता है उनके लिये ब्राह्ममुहूर्त में उठना अत्यन्त आवश्यक है, क्योंकि इस समय निद्रा का स्वाभाविक वेग समाप्त हो जाता है और तन्द्रायुक्त होता है। इस समय स्वप्न अधिक आते हैं और इसी समय मूत्राशय और पक्वाशय भी भरे होते हैं जिससे वीर्यपात होने की सम्भावना रहती है और देखा भी गया है प्रायः इसी समय ही रोगियों का वीर्यपतन भी होता है। अतः इस समय आलस्य को त्यागकर जागना और नित्यकर्म में लग जाना चाहिए॥ १३॥

चन्दनादि कषाय।

चन्दनं त्रिफलां देवदारु मुस्तं कशेरुका। शैवालमर्जुनं दूर्वां निशेऽगुरु वला तथा॥ क्वाथमेषां पिबेच्छुक्रमेहे शर्करया युतम्॥ १४॥

लाल चन्दन, त्रिफला, देवदारु, मूर्व, कसेरू,

सेवार, अर्जुन की छाल, दूब, हल्दी, दारुहल्दी, चगर और सरैंटी की जड़ मिलाकर २ तोले, क्वाथ के लिए जल ३२ तोले, बचा हुआ क्वाथ ४ तोले। इस क्वाथ में खाँड डालकर शुक्रमेह में पिलाना चाहिए॥ १४॥

दूर्वा च मूर्वा कुशकाशमूलं दन्ती समङ्गा सहशाल्मली च। शुक्रप्रमेहे कथितं जलेन पानं हितं वा रुधिरप्रमेहे॥ १५॥

दूब, मूर्वामूल, कुश की जड़, काश की जड़, दन्तीमूल, मजीठ, सेमल की जड़, इनके ४ तोले क्वाथ को शुक्रमेह तथा रक्तमेह रोग में पीने से रोगी अच्छा हो जाता है॥ १५॥

शाल्मल्याः स्वरसो ज्ञेयः शुक्रमेहनिषूदनः। शुक्रमेहहरो दृष्टः क्षौद्रेणामलकीरसः॥ १६॥

सेमल की जड़ का रस १-२ तो० शुक्रमेह को हरता है। आँवले के रस में १-२तो० शहद मिलाकर सेवन करने से भी शुक्रमेह नष्ट हो जाता है॥ १६॥

स्वप्ने शुक्रच्युतिर्नस्याद्यदि चाद्यात् सुरभिधाम्। सकर्पूराहिफेनस्य सेवनञ्च तदर्थकृत्॥ १७॥

यदि शीतलचीनी के चूर्ण को सेवन किया जाय तो स्वप्न में शुक्रक्षय नहीं होता। मात्रा—१ माशा। अफीम और कपूर को मिलाकर उचित मात्रा में सेवन करने से भी रात्रिमेह नष्ट होता है। मात्रा-१ रत्ती॥ १७॥

त्रिफला दारु दार्व्यब्दं पार्थत्वग्रक्तचन्दनम्। त्रिफला मुस्तदारुकुष्ठागुरुकशेरुकम्॥ १८॥ ताम्बूलामयशैवालं श्लोकपादसमापनाः। कषायाः शमयन्त्याशु शुक्रमेहं न संशयः॥ १९॥

त्रिफला, देवदारु, दारुहल्दी, नागरमोथा, अर्जुन की छाल और लाल चन्दन। त्रिफला, नागरमोथा, देवदारु, कूट, काली अगर और कसेरू। पान, वायविडंग और सेवार। इन तीनों क्वाथों में से कोई क्वाथ ४ तोले पीना चाहिए। ये सब क्वाथ शुक्रमेह को तत्काल शान्त करते हैं, इसमें कोई सन्देह नहीं॥ १८-१९॥

कामधेनु रस।

सिन्दूरमभ्रं नागं च कर्पूरं हेममाक्षिकम्। खर्परं रजतं चापि मर्दयेत्कमलाम्भसा॥ २०॥ ततो गुञ्जामिताः कृत्वा वटीश्छायाप्रशोषिताः। एकैकां दापयेद्दासां कसेरुस्वरसेन च॥ २१॥ प्रमेहान् विंशतिं हन्ति शुक्रमेहं विशेषतः। ज्वरं जीर्णं च यक्ष्माणं कामधेन्वभिधो रसः॥ २२॥

रससिन्दूर, अभ्रक, नागभस्म, कपूर, स्वर्णमाक्षिक, खपरिया और चाँदी की भस्म एकत्र कर कमल के पुष्प के रस की भावना देकर मर्दन करे। पश्चात् एक एक रत्ती की गोली बनाकर छाया में शुष्क करके इनमें से एक-एक गोली कसेरू के स्वरस के साथ दे। यह बीस प्रकार के प्रमेह, विशेषकर शुक्रमेह, जीर्णज्वर और राजयक्ष्मा को नष्ट करता है। इसका नाम 'कामधेनुरस' है॥ २०-२२॥

शिलाजत्वादिवटी।

शिलाजत्वभ्रहेमानि लौहगुग्गुलुटङ्कणम्। केशराजस्य तोयेन मर्दयेद्दिवसद्वयम्॥ २३॥ यक्षमानां वटीं कृत्वा शैवालसलिलेन च। पीतः प्रातः प्रयुञ्जीत शुक्रमेहनिवृत्तये॥ २४॥

शिलाजीत, अभ्रकभस्म, स्वर्णभस्म, लौहभस्म, गुग्गुल और सोहागा को एकत्र कर भाँगरे के स्वरस के साथ दो दिन तक घोटकर तीन-तीन रत्ती की गोली बनावे। उनको सेवार के जल के साथ प्रतिदिन प्रातःकाल

सेवन करे तो शुक्रमेह रोग निवृत्त हो जाता है। मात्रा २ रत्ती ॥ २३–२४ ॥

### चन्दनादिचूर्ण।

चन्दनं शाल्मलीपुष्पं त्रिजातं रजनीद्वयम्। अनन्तां शारिवां मुस्तमुशीरं यष्टिकामले ॥ २५ ॥ स्वर्णपत्रीं शुभा भार्गीं देवदारु हरीतकीम्। सर्वं द्विगुणितं लौहं चैकत्र परिमर्दयेत् ॥ २६ ॥ प्रमेहा विंशतिः श्वासः कासो जीर्णज्वरस्तथा। भाशनादस्य नश्यन्ति दुर्नामानि च कामला ॥ २७ ॥

### चन्दनमत्र श्वेतम्।

चन्दन, सेमर के फूल, त्रिजात (दालचीनी, छोटी इलायची, तेजपात), हल्दी, दारुहल्दी, अनन्तमूल, सारिवा, नागरमोथा, खस, मुलेठी, आंवला, सनाय, वंशलोचन, भारंगी, देवदारु और हड़ ये समभाग ले तथा इन सबका द्विगुण लोहभस्म मिश्रित कर मर्दन करे। बीस प्रकार के प्रमेह, श्वास, कास, जीर्णज्वर, अर्श और कामला रोग इस चूर्ण के सेवन से विनष्ट होते हैं। मात्रा-१॥ रत्ती ॥ २५–२७ ॥

इसमें चन्दन श्वेत लेना चाहिए।

### माक्षिकादिचूर्ण।

माक्षिकं पारदं गन्धं खर्परं गिरिमृत्तिकाम्। शिलाजत्वभ्रलोहानि शाल्मल्याः कुसुमं त्वचम् ॥ २८ ॥ विदारीं गोक्षुरं बीजं चैकत्र परिमर्दयेत्। माषमात्रं मधुप्लीत शुक्रमेहनिवृत्तये ॥ २९ ॥

सोनामाखी, पारा, गन्धक, खपरिया, गेरू, शिलाजीत, अभ्रकभस्म, लोहभस्म, सेमर के फूल, दालचीनी, विदारीकंद और गोखरू के बीज को एकत्र कर घोट ले। शुक्रमेह की निवृत्ति के लिये एक-एक माशा सेवन करे ॥ २८–२९ ॥

### शाल्मलीघृत।

शाल्मलीद्रवसंयुक्तं सर्पिश्छागीपयोऽन्वितम्। अश्वगन्धां वरीं रास्नां मुशलीं विश्वभेषजम् ॥ ३० ॥ अनन्तां मधुकं द्राक्षां दत्त्वा च पलमानतः। पचेन्मन्दाग्निना वैद्यः पात्रे मृत्परिनिर्मिते ॥ ३१ ॥ प्रमेहान्निखिलान् हन्ति शुक्रमेहं विशेषतः। क्लैब्यं धातुक्षयं शोषं कासं चैतद्वरं घृतम् ॥ ३२ ॥

सेमर की छाल का रस १२८ तोले और बकरी का दूध १२८ तोले, घृत १२८ तोले। असगन्ध, शतावरि, रास्ना, मुसली, सोंठ, अनन्तमूल, मुलेठी और मुनक्का का कल्क चार-चार तोले मिलाकर वैद्य धीमी आँच से मिट्टी के पात्र में पकावे। यह श्रेष्ठ घृत सब प्रकार के प्रमेह, विशेषकर शुक्रमेह, नपुंसकता धातुक्षीणता शोष और कास को नष्ट करता है॥ मात्रा ६ माशा या १ तोला ॥ ॥३०–३२ ॥

### चन्दनासव।

चन्दनं वालकं मुस्तं गम्भारीं नीलमुत्पलम्। प्रियङ्गुं पद्मकं लोध्रं मञ्जिष्ठां रक्तचन्दनम् ॥ ३३ ॥ पाठां किराततिक्तं च न्यग्रोधं पिप्पलं शटीम्। पर्पटं मधुकं रास्नां पटोलं काञ्चनारकम् ॥ ३४ ॥ आम्रत्वचं मोचरसं प्रत्येकं पलमात्रकम्। धातकीं षोडशपलां द्राक्षायाः पलविंशतिम् ॥ ३५ ॥ जलद्रोणद्वये क्षिप्त्वा शर्करायास्तुलां तथा। गुडस्यार्द्धतुलां चापि मासं भाण्डे निधापयेत् ॥ ३६ ॥ चन्दनासव इत्येष शुक्रमेहविनाशनः। बलपुष्टिकरो हृद्यो वह्निसन्दीपनः परः ॥ ३७ ॥

सफेद चन्दन, सुगन्धबाला, नागरमोथा, गम्भारि, नीलकमल, प्रियंगु फूल, पद्माख, लोध, मजीठ, लालचन्दन, पाठा, चिरायता,

बरगद, पीपल, कचूर, पित्तपापड़ा, मुलेठी, रास्ना, परवल की पत्ती, कचनार की छाल, आम की छाल और मोचरस। ये सब चार-चार तोले, धायँ के फूल ६४ तोले और मुनक्का ८० तोले। इनको २१ सेर १६ तोले जल में डाले तथा उसी में ४ सेर शक्कर और २½ सेर शुद्ध डालकर मृत्पात्र में एक मास तक बन्द रक्खे। इसका नाम 'चन्दनासव' है। यह शुक्रमेह का नाशक, बलवर्धक, पौष्टिक, हृदय के लिए हितकारक तथा परम अग्निसन्दीपन है। मात्रा—२ तोला ॥ ३३-३७ ॥

शुक्रमेह में अपथ्य।

अभिष्यन्द्यतितीक्ष्णं च पानान्नं वह्निसूर्ययोः। सन्तापं स्त्रीप्रसक्तिं च वेगरोधं प्रजागरम् ॥ ३८ ॥ क्रोधं शोकं दिवानिद्रां लङ्घनं चातिचिन्तनम्। अत्यालस्यमसत्सङ्गं शुक्रमेहे विवर्जयेत् ॥ ३९ ॥

शुक्रमेह में कफजनक और अतितीक्ष्ण अन्नपान, अग्नि और सूर्य की गरमी, स्त्रीप्रसङ्ग, मल-मूत्रादि के वेग का अवरोध, रात्रि-जागरण, क्रोध, शोक, दिन में शयन, उपवास, अधिक चिन्ता, आलस्य और दुर्जन-संसर्ग परित्याज्य हैं ॥ ३८-३९ ॥

शुक्रमेह में पथ्य।

सुपाच्यं शुक्रकृच्चान्नं सत्संसक्तिश्च सत्कथा। शान्तिग्रन्थस्याध्ययनं हितान्यत्रेशचिन्तनम् ॥ ४० ॥

इति भैषज्यरत्नावल्यां शुक्रमेहाधिकारः समाप्तः।

---

इस रोग में सुपाच्य और शुक्रवर्धक आहार, सत्पुरुषों का संसर्ग, सत्कथा, शान्तिप्रद ग्रन्थों का अध्ययन और ईश्वरोपासना में समय यापन हितकारक होते हैं ॥ ४० ॥

इति सरयूप्रसादत्रिपाठिविरचितायां भैषज्यरत्नावल्याः रत्नप्रभाभिधायां व्याख्यायां शुक्रमेहाधिकारः समाप्तः।

---

## अथ लसीकामेहाधिकारः।

लसीका मेह का निदान और लक्षण।

मधुराणां फलानाञ्च मूलानाञ्च गुडोद्भवम्। द्रव्याणाञ्चातियोगाच्च तथैवातिपरिश्रमात् ॥ १ ॥ मानसश्रमशीलानां वर्जयित्वा तु कायिकम्। गुरुपर्युषितक्लिन्नाभिष्यन्दिद्रव्यभोजनात् ॥ २ ॥ आनूपमत्स्यमांसादिभोजनादतिभोजनात्। एभिर्निदानैः संदुष्टो यकृत्पक्वाशयस्तथा ॥ ३ ॥ वृक्कयोर्मूत्रकोषे च जनयित्वाक्षतं क्षतम्। मूत्रमार्गेण तरलं पूयरक्तादिसन्निभम् ॥ ४ ॥ समेदस्कं सलसिकं नराणां स्रावयेन्मुहुः। लालक्तकपयस्तुल्यं मूत्रं सम्यक् प्रवर्त्तयेत् ॥ ५ ॥ कदाचिज्जायते मूत्रं पूयरक्तादिभिर्घनम्। स्थूलं सूत्रनिभं तस्मादधिका जायते व्यथा ॥ ६ ॥ दोषदूष्यादिभेदेन मूत्रस्य ह्रासवर्द्धने। तथा वर्णविभेदश्च जायते मोहिनः सदा ॥ ७ ॥

मीठे फल, मूल और गुड़ से बने पदार्थों के अतिसेवन से, अधिक परिश्रम से, मानसिक श्रम करनेवाले किन्तु शारीरिक श्रम न करनेवाले व्यक्तियों के यह लसीका मेह होता है। भारी बासी, क्लिन्न ( गीला, सड़ा सा ), अभिष्यन्दी द्रव्यों के सेवन से, आनूप देश के मांस और मछली आदि के अतिभोजन से यकृत् और पक्वाशय दूषित हो जाते हैं जिससे वृक्क और मूत्राशय में क्षत हो जाते हैं और मूत्रमार्ग से पूय, रक्त, मेदा, लसीका आदि मिला हुआ पेशाब बार-बार आता है। मूत्र का रंग लाख के जल जैसा भी होता है। कभी कभी पेशाब, पीब और रक्त गाढ़े भी आते हैं। कभी सूत-जैसे मोटे तन्तु भी आते हैं। कभी इस प्रकार के प्रमेहरोगी के दोष दूष्य आदि

के भेद से पेशाब की मात्रा घटती-बढ़ती रहती है। इसी प्रकार रंग में भी भेद होता है ॥ १-७ ॥

वातिकलसीका मेह के लक्षण।

वातजो लसिकामेहो चाम्लगन्धि सशोणितम्। आभिन्नाजलवन्मूत्रं मुहुर्मूत्रयते नरम्॥ विश्लिष्टाः सन्धयस्तस्मिन् मलं सम्यक् न निःसरेत् ॥ ८ ॥

वातजन्य लसीका मेह में मूत्र में खटास (खटाई के द्रव्यों की सी) और रुधिर की सी गन्ध आती है और जल की तरह बार-बार पेशाब आता है। उसकी सन्धियाँ ढीली सी खिसकी सी रहती हैं एवम् दस्त साफ नहीं होता ॥ ८ ॥

पैत्तिक के लक्षण।

घनं सपूयं मूत्रञ्च पैत्तिकेऽधिकपूतिमत्। जायते चास्य वैरस्यं सन्तापः करपादयोः ॥ ९ ॥

पैत्तिक लसीका मेह में गाढ़ा पूययुक्त अधिक दुर्गन्धित मूत्र आता है। मुख का स्वाद बिगड़ जाता है और हाथ पैरों में दाह होता है ॥ ९ ॥

श्लैष्मिक के लक्षण।

श्लैष्मिके लसिकामेहे मूत्रं शुक्लं तथाऽविलम्। तथा पर्युषिते तस्मिन्नुपर्य्यच्छमधोघनम्। चुन्नाशो वङ्क्षणकटिव्यथा सम्यक् प्रजायते ॥ १० ॥

कफजन्य लसीका मेह में मूत्र में थोड़ा वीर्य मिला होता है। बासी मूत्र में नीचे कुछ जम जाता है और ऊपर स्वच्छ मूत्र रहता है। भूख कम हो जाती है और कमर-अण्डकोष आदि स्थानों में दर्द होता रहता है ॥ १० ॥

दो तीन दोषों के लक्षण।

द्वित्रिदोषभवे मेहे मिश्रं लक्षणमीक्ष्यते ॥ ११ ॥

दो या तीन दोषजन्य लसीका मेह में प्रमेह के मिश्रित लक्षण होते हैं ॥ ११ ॥

साध्यासाध्य विचार।

सुसाध्योऽसौ भवेद् यूनामल्पकालभवो गदः। नोचेदसाध्यो दुःसाध्यो भवेदेव न संशयः ॥ १२ ॥ कदाचित् प्रबलीभूय प्रशाम्येत् पथ्यसेवनात्। ततः पुनर्वर्द्धमानः कालात् कालवशं नयेत् ॥ १३ ॥

जवान रोगी के थोड़े दिन का उत्पन्न लसीका मेह साध्य है, अन्यथा दुःसाध्य (कठिनता से आराम होनेवाला) और असाध्य ही है। कभी कभी प्रबल होकर भी पथ्यसेवन से शान्त हो जाता है और बाद में फिर बढ़कर मार डालता है ॥ १२-१३ ॥

लसीकामेह की चिकित्सा।

बिन्दुकादि।

बिन्दुबिल्वं विडङ्गञ्च व्याघ्री धात्री च जाम्बली। बब्बूलं लोहितञ्चैव खदिरं रक्तचन्दनम् ॥ १४ ॥ एषां क्वाथो हरेन्मेहान् लसिकाख्यं सुदारुणम्। तथा माञ्जिष्ठमेहादि नानोपद्रवसंयुतम् ॥ १५ ॥

तेन्दू, बेल, वायविडंग, छोटी कटेरी, आँवला, मालदमन, बबूल, रोहेड़ा, खैर और लाल चन्दन, इन सबका ४ तोला क्वाथ कष्टदायक लसीकामेह और अनेक उपद्रवयुक्त मञ्जिष्ठमेह को नष्ट करता है ॥ १४-१५ ॥

चन्दनादि चूर्ण।

रक्ताङ्गनव्बूलरसः प्रियङ्गु जम्ब्वाम्रबीजेन्द्रयवं यमानी। वन्या च सा मोचरसो गुडूची लौहस्य भस्म सममेव सर्व्वम् ॥ १६ ॥ माषैकमापप्रमिता निषेव्या प्रोक्तं महेशेन च चन्दनादि। चूर्णं प्रमेहान् सकलांश्च तूर्णं सपूय-

रक्तं लसिकाख्यमेहम् । सोपद्रवं हन्ति तथाग्निमान्द्यं तृष्णाज्वरारोचकरोगसंघान् ॥ १७ ॥

केसर, बबूल, लोध प्रियंगु जामुन और आम की गुठली की मींगी, इन्द्रजौ, अजवाइन, असगन्ध, मोचरस, गिलोय और लौहभस्म सबको समान भाग लेकर चूर्ण कर ले। इस चूर्ण को १ माशा की मात्रा में सेवन कराने से सब प्रकार के प्रमेह, पूय और रक्तयुक्त लसीकामेह, मन्दाग्नि, ज्वर, अरुचि आदि अनेक उपद्रवयुक्त प्रमेह नष्ट होते हैं ॥ १६-१७ ॥

सोमनाथ रसो हेमनाथो वङ्गेश्वरस्तथा। चन्द्रप्रभाख्या गुटिका तथैव चन्दनासवः ॥ १८ ॥ तैलं पल्लवसाराख्यं श्रीगोपालाभिधं तथा । युञ्ज्यात् युक्त्यनुसारेण व्याधौ चास्मिन् प्रयत्नतः ॥ १९ ॥

सोमनाथरस, हेमनाथरस, वङ्गेश्वररस, चन्द्रप्रभावटी श्रीगोपाल तैल सबको युक्ति के अनुसार प्रयुक्त करना चाहिये। इससे लसीकामेह में लाभ होता है ॥ १८-१९ ॥

पथ्य ।

रक्तशाल्योदनं मुद्गं यवा वास्तुकमेव च । पालंकी चैव वेत्राग्रं कर्कोटी कदली तथा ॥ २० ॥ हिमालयप्रदेशे च वासो वा सुस्थचित्तता । हितान्येतान् निषेवेत गुर्वभिष्यन्दिभोजनम् ॥ २१ ॥ मत्स्यं मांसं तथा रौद्रसेवाध्वा परिश्रमम् । धर्जयेत् यत्नतो धीमान् आयुरारोग्यवृद्धये ॥ २२ ॥

इति श्रीभैषज्यरत्नावल्यां लसीकामेहाधिकारः समाप्तः ।

---

लालशाली चावल का भात, मूँग, जौ, बथुआ, पालक, बेंत की कोंपल, ककोड़ा, केला, हिमालय की तराई में निवास, चित्त की शान्ति यह सब लसीकामेह के रोगी के लिये पथ्य है। भारी, अभिष्यन्दी भोजन, मछली, मांस, क्रोध, धूप, परिश्रम,मैथुन और मार्ग चलना यह सब यत्नपूर्वक छोड़ देना चाहिए; क्योंकि ये अपथ्य हैं ॥२०-२२ ॥

इति श्रीभैषज्यरत्नावल्यां भाषाटीकायां लसीकामेहाधिकारः समाप्तः ।

---

## अथ प्रमेहपिडिकाधिकारः

प्रमेहपिडिकायां तु हितं शोधनमुच्यते । सर्पिस्तैलं च कुष्ठघ्नं विविच्यात्र च योजयेत् ॥ १ ॥

प्रमेहपिडिका में शोधन औषध हितकारक होती है। कुष्ठनाशक घृत और तैल का भी विचार कर इसमें प्रयोग करे ॥ १ ॥

अनन्तां शारिवां द्राक्षां त्रिवृतां स्वर्णपत्रिकाम् । कट्वीं हरीतकीं वासां पिचुमर्दनिशायुगम् ॥ २ ॥ बीजं गोक्षुरजं चापि क्वाथयित्वा जलं पिबेत् । नाशं यान्ति प्रमेहोत्था अनेन पिडिका ध्रुवम् ॥ ३ ॥

अनन्तमूल, शारिवा, मुनक्का, निशोथ, सनाय, कुटकी, हड़ अडूसे की जड़ की छाल, नीम की छाल, हल्दी, दारुहल्दी और गोखरू के बीज के क्वाथ का पान करे । इससे प्रमेहपिडिकाएँ अवश्य नष्ट हो जाती हैं ॥ २-३ ॥

मुद्गपर्णी माषपर्णी त्रिवृद्दारग्वधः शटी । वृद्धदारकबीजं च नीलिन्येला हरीतकी ॥ ४ ॥ श्यामानन्ता देवपुष्पमित्येषां साधुसाधितः । क्वाथो हन्यात् प्रमेहोत्थाः पिडिकाः क्षिप्रमेव हि ॥ ५ ॥

मुद्गपर्णी, माषपर्णी, निशोथ, अमलतास, कचूर, विधारा के बीज, नील, इलायची, हड़, श्यामालता, अनन्तमूल और लौंग का उत्तम

रीति से सिद्ध किया हुआ ४ तोला क्वाथ प्रमेहजन्य पिडिकाओं को शीघ्र ही नष्ट करता है ॥ ३-५ ॥

मकरध्वज रस।

सिन्दूरं हेमलौहं च देवपुष्पं सचन्द्रकम्। जातीफलं मृगमदं चैकत्र परिमर्दयेत् ॥ ६ ॥ पर्णाम्भसा ततः कुर्याद्वटिकां वल्लसम्मिताम्। सेवितश्छागपयसा प्रमेहांस्तत्कृतान् गदान् ॥ ७ ॥ क्लैब्यं धातुक्षयं कासं जीर्णं च विषमज्वरम्। रसोऽयं क्षपयेत्तूर्णं मकरध्वजसंज्ञकः ॥ ८ ॥

रससिन्दूर, स्वर्णभस्म, लोहभस्म, लौंग, कपूर, जायफल और कस्तूरी समभाग एकत्र कर पान के रस में घोटकर तीन-तीन रत्ती की गोली बनावे। बकरी के दूध के साथ सेवित होने पर यह रस सब प्रकार के प्रमेहों और तज्जन्य अन्यान्य रोगों को तथा क्लीवता, धातुक्षय, कास, जीर्णज्वर और विषमज्वर को शीघ्र नष्ट करता है। इसका नाम 'मकरध्वज रस' है। मात्रा २ रत्ती ॥६-८॥

शारिवादिलौह।

शारिवा नीलिनी रास्ना गुडूच्येला च चित्रकः। माणशूरणशङ्खिन्यस्थिसंहृल्लातकाभयाः ॥ ९ ॥ एभिर्युतमयो हन्ति प्रमेहपिडिका दश। वातरक्तं पडर्शांसि त्वग्गदान् निखिलानपि ॥ १० ॥

शारिवा, नील की मूल, रास्ना, गुर्च, इलायची, चीता की जड़, मानकन्द, जमीकन्द, शङ्खपुष्पी, गिलोय, भिलावाँ और हड़, इनसे युत लोहभस्म दश प्रकार की प्रमेहपिडिका, वातरक्त, छह प्रकार के अर्श और सब प्रकार के चर्मरोग नष्ट करता है ॥ ९-१० ॥

बृहत्श्यामाघृत।

श्यामा दारा बला पद्मं विदारी नीलमुत्पलम्। अष्टवर्गं च मधुकमश्वगन्धा शतावरी ॥ ११ ॥ अजमोदा हरिद्रे द्वे मञ्जिष्ठा चन्दनद्वयम्। द्राक्षा प्रसारणीमूलं सविश्वा कटुरोहिणी ॥ १२ ॥ एषां कर्षमितैर्भागैर्घृतमस्थं पचेद्भिषक्। श्यामाशतावरीचूर्णं विदार्याः स्वरसं तथा ॥ १३ ॥ छागीपयश्च तत्तुल्यं दत्वा मन्देन वह्निना। सिद्धमेतघृतं पात्रे स्थापयेदथ मृण्मये ॥ १४ ॥ प्रमेहांस्तत्कृतान् व्याधीन् क्लीबतां वातशोणितम्। शुक्रक्षयं रक्तपित्तं हृद्रोगं धातुशोषणम् ॥ १५ ॥ नाशयेन्नात्र सन्देहः श्यामाघृतमिदं बृहत्। बालानां पुष्टिजननं गर्भदोषहरं परम् ॥ १६ ॥

कल्क के लिये श्यामालता, त्रिफला, धरिवारा, पदुमकाठ, विदारीकंद, नीलकमल, अष्टवर्ग (जीवक, ऋषभक, मेदा, महामेदा, ऋद्धि, वृद्धि, काकोली क्षीरकाकोली), मुलेठी, असगन्ध, शतावरि, अजमोद, हल्दी, दारुहल्दी, मजीठ, सफेद चन्दन, रक्तचन्दन, मुनक्का, प्रसारणीमूल, सोंठ और कुटकी। घृत १२८ तोले श्यामालता, शतावरि, ईख और विदारीकंद प्रत्येक का १२८ तोले स्वरस तथा बकरी का दूध १२८ तोले मिलाकर धीमी आँच से घृत पकावे। इस प्रकार सिद्ध हुए इस घृत को मिट्टी के पात्र में रख दे। यह घृत सब प्रकार के प्रमेह, तज्जन्य अन्यान्य रोग, क्लीवता, वातरक्त, शुक्रक्षय, रक्तपित्त, हृद्रोग और धातुशोष को निःसंदेह नष्ट करता है। इसका नाम 'बृहत् श्यामाघृत' है। बालकों के शरीर को परिपुष्ट करने और गर्भ के दोषों को हरने के लिये यह उत्कृष्ट औषध है। मात्रा—६ मासे—१ तोला ॥ ११-१६ ॥

शारिवाद्यासव।

शारिवां मुस्तकं लोध्रं न्यग्रोधं पिप्पलीं शटीम्। अनन्तां पद्मकं भार्गीं पाठां धात्रीं-

गुडूचिकाम् ॥ १७ ॥ उशीरं चन्दनद्वन्द्वं यमानीं कटुरोहिणीम्। पत्रमेलाद्वयं कुष्ठं स्वर्णपत्रां हरीतकीम् ॥ १८ ॥ एषां चतुष्पलान् भागान् सूक्ष्मचूर्णीकृतान् शुभान्। जलद्रोणद्वये क्षिप्त्वा दद्याद् गुडतुलात्रयम् ॥ १९ ॥ पलानि दशधातक्या द्राक्षां षष्टिपलां तथा। मासं संस्थापयेद्भाण्डे संवृत्ते मृण्मये शुभे ॥ २० ॥ शारिवाद्यासवस्यास्य पानात् मेहाश्च विंशतिः। शराविकाद्यः सर्वाः पिडिकास्तत्कृताश्च याः ॥ २१ ॥ औपदंशिकरोगाश्च वातरक्तं भगन्दरम्। सर्व एते शमं यान्ति व्याधयो नात्र संशयः ॥ २२ ॥

शारिवालता, नागरमोथा, लोध, बरगद की छाल, पीपर की छाल, कचूर, अनन्तमूल, पद्माकाठ, सुगन्धवाला, पाढ़रि, आँवला, गुर्च, खस, सफ़ेदचन्दन, लालचन्दन, अजवाइन, कुटकी, तेजपात, छोटी इलायची, बड़ी इलायची, कूट, सनाय और हड़ इनका सोलह-सोलह तोले सूक्ष्म उत्तम चूर्ण लेकर ४१ सेर १६ तोले पानी में डाले तथा उसमें १५ सेर गुड़, ४० तोले धाय के फूल और ३ सेर मुनक्का मिलाकर मिट्टी के पात्र में मुख बन्द करके एक मासपर्यंन्त रक्खे। इसका नाम 'शारिवाद्यासव' है। इस आसव के सेवन से बीस प्रकार के प्रमेह तथा प्रमेहजन्य शराविका आदि पिडिकाएँ, औपदंशिक रोग, वातरक्त और भगन्दर ये सब रोग शान्त हो जाते हैं, इसमें कोई सन्देह नहीं ॥ १७—२२ ॥

प्रमेहपिडिका में अपथ्य

पानमन्नमभिष्यन्दि रूक्षं तीक्ष्णं च दुर्जरम्। वेगरोधं व्यवायं च व्यायामं निशि जागरम् ॥ २३ ॥ सुरां सुतीक्ष्णां मत्स्यं च पलाण्डुं च रसोनकम्। त्यजेत् सूर्याग्निसन्तापं प्रमेहजगदातुरः ॥ २४ ॥

इति भैषज्यरत्नावल्यां प्रमेहपिडिकाधिकारः समाप्तः।

---

कफजनक, रूक्ष, तीक्ष्ण और गुरुपाक अन्न-पान, वेगरोध, मैथुन, व्यायाम, रात्रिजागरण, तीक्ष्ण, मदिरा, मछली, प्याज, लहसुन, सूर्य और अग्नि की गरमी, ये सब प्रमेहपिडिकारोग में परित्याज्य हैं। मात्रा ६ मासे—१ तोला ॥ २३-२४ ॥

इति भैषज्यरत्नावल्यां प्रमेहपिडिकाधिकारः समाप्तः

---

## अथ ध्वजभङ्गाधिकारः

नपुंसक के लक्षण, संख्या और निदान।

क्लीबः स्यात् सुरताशक्तस्तद्भावः क्लैब्यमुच्यते। तच्च सप्तविधं प्रोक्तं निदानं तस्य कथ्यते ॥ १ ॥ तैस्तैर्भावैरहृद्यैस्तु रिरंसोर्मनसि क्षते। ध्वजः पतत्यधो नृणां क्लैब्यं समुपजायते ॥ २ ॥ द्वेष्यस्त्रीसम्प्रयोगाच्च क्लैब्यं तन्मानसं स्मृतम्। कटुकाम्लोष्णलवणैरतिमात्रोपसेवितैः ॥ ३ ॥ पित्ताच्छुक्रक्षयो दृष्टः क्लैब्यं तस्मात् प्रजायते। अतिव्यवायशीलो यो न च वाजीक्रियारतः ॥ ४ ॥ ध्वजभङ्गमवाप्नोति स शुक्रक्षयहेतुकम्। महता मेढ्ररोगेण चतुर्थी क्लीबता भवेत् ॥ ५ ॥ वीर्यवाहिशिराच्छेदात् मेहनानुन्नतिर्भवेत्। बलिनः क्षुब्धमनसो निरोधाद् ब्रह्मचर्यतः ॥ ६ ॥ षष्ठं क्लैब्यं स्मृतं तत्तु शुक्रस्तम्भनिमित्तजम् ॥ ७ ॥

बलिनः पुंसस्य, क्षुब्धमनसः कामात् सञ्चलितमनसः, ब्रह्मचर्यममैथुनं तस्मात् निरोधात् शुक्रस्य क्लैब्यं भवति।

रति-शक्तिहीन पुरुष को क्लीब कहते हैं और रतिविषयक अशक्ति क्लीबता कही जाती है। यह क्लीबता सात प्रकार की कही गई है। उसका निदान कहते हैं।

भय, शोक आदि तथा अन्यान्य अहृद्य कारणों से रमणोत्सुक पुरुष का मन व्याकुल हो जाने से मनुष्यों का शिश्न पतित हो जाता है, उससे नपुंसकता हो जाती है। द्वेष्यमाण स्त्री के साथ सङ्गम करने से भी क्लीबता होती है। इसका नाम मानस (मनोविघातक) क्लीबता है।

कड़वे, खट्टे उष्ण और नमकीन पदार्थ के अधिक सेवन से पित्त की वृद्धि होती है, उससे शुक्र का क्षय होता देखा गया है। उस शुक्रक्षय से भी क्लीबता हो जाती है।

जो मनुष्य अधिक स्त्रीप्रसङ्ग करता है, परन्तु वाजीकरण औषधादि का सेवन नहीं करता, उसको शुक्रक्षयजन्य ध्वजभङ्ग रोग हो जाता है।

अति कठिन लिङ्गरोग से भी क्लीबता हो जाती है। यह चौथी है।

वीर्यवाहिनी शिरा के छिन्न हो जाने से क्लीबता होती है। तथा कामातिभाव के कारण संयमितचित्त बलवान् पुरुष को मैथुन का प्रसङ्ग न होने से शुक्रस्तम्भजन्य क्लीबता हो जाती है। यह छठी क्लीबता है॥ १—७॥

जन्मप्रभृति यत् क्लैब्यं सहजं तद्धि सप्तमम्। असाध्यं सहजं क्लैब्यं मर्मच्छेदाच्च यद्भवेत्॥ ८॥

मर्मच्छेदात् वीर्यवाहिशिराच्छेदात्

जन्म काल से जो क्लीबता होती है, उसको सहज क्लीबता कहते हैं। यह सातवीं क्लीबता है।

सहज क्लीबता और वीर्यवाहिनी शिरा के छिन्न होने से जो क्लीबता होती है वे दोनों असाध्य होती हैं॥ ८॥

### क्लैब्यचिकित्सा।

क्लैब्यानामिह साध्यानां कार्यो हेतुविपर्ययः। मुख्यं चिकित्सितं यस्मान्निदानपरिवर्जनम्॥ ९॥

जो-जो साध्य क्लीबताएँ हैं, उनमें निदान का विपर्यय करना चाहिए, अर्थात् जिस कारण से क्लीबता उत्पन्न हो, उससे विपरीत क्रिया करनी चाहिए, क्योंकि निदानपरिवर्तन मुख्य चिकित्सा मानी गई है॥ ९॥

### अश्वगन्धाघृत।

अश्वगन्धापलशतं शुभदेशे समुत्थितम्। पुण्येऽहनि समुद्धृत्य साधयेत् श्लक्ष्णचूर्णितम्॥ १०॥ द्रोणेऽम्भसि पचेत्तावद्यावत् पादावशेषितम्। सर्पिःप्रस्थं पचेत्तेन गव्यं क्षीरं चतुर्गुणम्॥ ११॥ कषायं छागमांसस्य दद्याच्छतद्रवस्य च। कल्कानि श्लक्ष्णपिष्टानि कर्षमात्राणि योजयेत्॥ १२॥ काकोलीद्वयमृद्वीका द्वे मेदे चाथ जीरकम्। स्वयंगुप्ता ऋषभको वेला मधुकमेव च॥ १३॥ मृद्वीकामुद्गपर्ण्यौ च जीवन्ती चपला रसा। नारायणी विदारी च दत्त्वा सम्यग्विपाचयेत्॥ १४॥ सिता चतुष्पलं शीते क्षिपेन्मधु पलाष्टकम्। लीढ्वा कर्षं पयः शीतं शीतं चानुपिबेज्जलम्॥ १५॥ वृद्धबालकृतक्षीणाः क्षीणमांसबलेन्द्रियाः। पुष्टिमोजोबलारोग्यं लभन्ते ह्यस्य मानवाः॥ १६॥ भवेत् सप्तविधोऽपि युवेव स्त्रीसहस्रगः। वन्ध्यातीतनयाः स्त्री च लभते पुत्रमुत्तमम्॥ १७॥ एतन्निर्मितम्-

शिवभ्यामश्वगंधाघृतं महत् । क्षीणे रेतसि कर्त्तव्या सर्वा शुक्रकरी क्रिया ॥१८॥

उत्तम स्थान में उत्पन्न हुई असगन्ध किसी पवित्र दिन में उखाड़कर २ सेर ले । उसका सूक्ष्म चूर्ण करके २५ सेर ४८ तोले जल में पकावे । ६ सेर ३२ तोले जल अवशिष्ट रहने पर छानकर इस क्वाथ के साथ १२८ तोले घृत पकावे । इस क्वाथ के साथ पाक होने पर ६ सेर ३२ तोले गाय के दूध के साथ पाक करे । पश्चात् १० सेर बकरी के मांस को अष्टगुण जल में पकाकर उसके चतुर्थावशिष्ट क्वाथ के साथ पाक करे । कल्कार्थ द्रव्य—काकोली, क्षीरकाकोली, मुनक्का, मेदा, महामेदा, जीवक, केवांच के बीज, ऋषभक, इलायची, मुलेठी, मुनक्का, मुद्गपर्णी, जीवन्ती, पीपरि, रसरैंठी, मालाबरि और विदारीकन्द । इन प्रत्येक एक-एक तोला ओषधियों के महीन पिसे हुए कल्क के साथ घृत सिद्ध कर उतार ले । शीतल हो जाने पर १६ तोला शक्कर और ३२ तोला मधु मिलाकर रख ले । शीतल दुग्ध के साथ एक-एक तोला यह घृत चाटकर पश्चात् शीतल जल पिये । वृद्ध, बालक, क्षतक्षीण, क्षीणमांस, क्षीणबल और क्षीणेन्द्रिय मनुष्य इस घृत का प्राशन कर पुष्टि, तेज बल और आरोग्य को प्राप्त करते हैं । ७० वर्ष की अवस्थावाला भी नवयुवक के समान हजार स्त्रियों के साथ प्रसङ्ग कर सकता है । वन्ध्या तथा मृतवत्सका स्त्री भी उत्तम पुत्र को पाती है । अश्विनीकुमारों ने इस महत् अश्वगन्धा घृत को बनाया था । वीर्य के क्षीण हो जाने पर समस्त शुक्रवर्धक क्रिया करनी चाहिए । मात्रा—६ माशा से १ तोला ॥ १०-१८ ॥

अमृतप्राश घृत ।

छागमांसतुलां चैव वाजिगन्धां तथैव च । जलद्रोणे विपक्तव्यं कुर्यात्पादावशेषितम् ॥ १९ ॥ घृतप्रस्थं पचेत्तेन छागीक्षीरं चतुर्गुणम् ॥ मूर्च्छनार्थं प्रदातव्यं कुंकुमं च द्विकार्षिकम् ॥ २० ॥ मलामूलं च गोधूमं चाश्वगन्धा तथामृता । गोक्षुरं च कशेरुश्च त्रिकटु च सधन्यकम् ॥ २१ ॥ तालांकुरं मैफलं च कस्तूरी बीजशाल्मरी । मेदे द्वे च तथा कुष्ठं जीवकर्षभकौ शटी ॥ २२ ॥ दार्वी प्रियंगुर्मञ्जिष्ठा नतं तालीशपत्रकम् । एलापत्रत्वचं नागं जातीकुसुमरेणुकम् ॥ २३ ॥ सरलं जातिकोषं च सूक्ष्मैलोत्पलसारिवा । मूलं बिम्बस्य जीवन्ती ऋद्धिर्वृद्धी उदुम्बरम् ॥ २४ ॥ प्रत्येकं कर्षमात्राणि पेषयित्वा विनिक्षिपेत् । वस्त्रपूते सुशीते च सितां दद्याच्छरावकम् ॥ २५ ॥ कर्षमात्रं ततः खादेदुष्णदुग्धानुपानतः । बृंहणीयं विशेषेण बलपुष्टिकरं सदा ॥ २६ ॥ प्रमेहान् ध्वजभङ्गांश्च नाशयेदविकल्पतः । एतद् वृष्यकरं सर्पिः काशिराजेन निर्मितम् ॥ २७ ॥ इदं सिद्धफलं होतद्वाजीकरणमुत्तमम् । अमृतप्राशनामेदं सर्वामयनिषूदनम् ॥ २८ ॥ शिरोरोगे नष्टशुक्रे स्त्रीषु नष्टासु च । न च शुक्रं क्षयं याति बलं ह्रासं न च व्रजेत् ॥ २९ ॥ दश स्त्रीणां रमेन्नित्यमानन्दमुपजायते । कासाशॅश्वासशूलघ्नं वद्धकोष्ठहरं परम् ॥ सिद्धघृतप्रयोगेण स्थिरं भवति यौवनम् ॥ ३० ॥

५ सेर बकरी का मांस और क्वाथ के लिए जल २५ सेर ४८ तोले, अवशिष्ट जल ६ सेर ३२ तोले, ५ सेर असगन्ध, क्वाथ के लिए जल २५ सेर ४८ तोले, अवशिष्ट जल ६ सेर ३२ तोले । इन क्वाथों के साथ १२८ तोले घृत को पकावे । क्वाथ के साथ पाक होने पर घृत के चौगुने ( ६ सेर ३२ तोले ) दूध के साथ पकावे । मूर्च्छा के लिये दो तोले

केसर डालना चाहिए। एक-एक तोला खरियारे के फूल, गेहूँ, असगन्ध, गिलोय, गोखरू, कसेरू, त्रिकटु, धनिया, ताडांकुर, त्रिफला कस्तूरी, केवाँच के बीज, मेदा, महामेदा, कूट, जीवक, ऋषभक, कपूर, शतावरी, प्रियंगुफूल, मजीठ, तगर, तालीशपत्र, इलायची, तेजपात, दालचीनी, नागकेसर, जावित्री, लौंग, रेणुका के बीज, सरलकाष्ठ, जायफल, छोटी इलायची, कमल, सारिवा, कुँदरू (कन्दूरी) का मूल, जीवन्ती, ऋद्धि, वृद्धि और गूलर पिसवा कर कल्क कर डाल दे। घृत सिद्ध होने पर वस्त्र से छान ले। ठंडा होने पर इस घृत में ३२ तोले शक्कर मिला दे। प्रतिदिन उष्ण दुग्ध के साथ एक-एक तोला खाय। यह विशेष कर बृंहण और सदा बलपुष्टिवर्धक है। यह सब प्रकार के प्रमेह आदि ध्वजभङ्ग रोगों को निःसंदेह नष्ट करता है। इस मत्त वीर्यवर्धक घृत को काशिराज ने बनाया था। यह घृत दृष्ट-सिद्धफल है। उत्तम वाजीकरण है। इसका नाम 'अमृतप्राश' है। सब रोगों को दूर करता है। शिरोरोग, मन्दशुक्र पुरुष और वन्ध्या स्त्री के लिये लाभदायक है। इसके सेवन से न वीर्य नष्ट होता है और न बल ही क्षीण होता है। प्रतिदिन दस स्त्री के साथ रमण करे, तो भी आनन्द प्राप्त होता है। कास, अर्श, आमशूल और कोष्ठबद्धता को हरने के लिए यह उत्कृष्ट औषध है। इस सिद्ध घृत के सेवन से यौवन स्थिर रहता है। मात्रा—६ माशा से १ तोला तक ॥ १६-२० ॥

श्रीमदनानन्दमोदक।

सूतो गन्धस्तथा लौहं त्रिसमं शुद्धमभ्रकम्। कर्पूरं सैन्धवं मांसी धात्र्येला च कटुत्रयम् ॥ ३१ ॥ जातीकोषफलं पत्रं लवङ्गं जीरकद्वयम्। यष्टी मधु वचा कुष्ठं हरिद्रा देवदारुकम् ॥ ३२ ॥ ऐज्जलं टङ्कनं भार्गी नागरं पुष्पकेशरम्। शृङ्गी तालीशपत्रं च द्राक्षाग्निर्दन्तिबीजकम् ॥ ३३ ॥ बला चातिबला चोचं धनिकेभकणा शटी। सजलं जलदं गन्धा विदारी च शतावरी ॥ ३४ ॥ अर्कं वानरिबीजं च गोक्षुरं वृद्धदारकम्। त्रैलोक्यविजयाबीजं समांशं पेषयेद्भिषक् ॥ ३५ ॥ शतावरीरसं दत्त्वा श्लक्ष्णचूर्णं समाचरेत्। शाल्मलीमूलचूर्णं तु चूर्णाङ्घ्रिसममाहरेत् ॥ ३६ ॥ चूर्णार्द्धं विजयाचूर्णं विशुद्धं तत्र दापयेत्। सर्वमेकत्र संयोज्य छागीक्षीरेण पेषयेत् ॥ ३७ ॥ मोदकार्थे सिता देया पाकयोग्या तथा मधु। नातिपाकं च धूमान्ते पाचयेन्मन्दवह्निना ॥ ३८ ॥ चातुर्जातं सकर्पूरं सैन्धवं सकटुत्रयम्। संचूर्ण्य च ततो देयं द्रव्यं किञ्चिन्निधापयेत् ॥ ३९ ॥ पाकं ज्ञात्वा कर्षमितं मोदकं परिकल्पयेत्। भूतनाथे सुरपतौ रतिनाथे तथैव च ॥ ४० ॥ हुतभुक्के गणपतौ मोदकाग्रं निवेदयेत्। मूलमन्त्रं समुच्चार्य हुताशने समर्पयेत् ४१ काञ्चने राजते काचे मृद्भाण्डे वा निधापयेत्। प्रातःकाले शुचिर्भूत्वा हरगौरीं प्रपूजयेत् ॥ ४२ ॥ कालानलभवं बीजं सतिलं घृतसंयुतम्। गव्यक्षीरं सितायुक्तमनुपेयं च पायसम् ॥ ४३ ॥ विलासार्थे प्रदोषे च मोदकं परिषेवयेत्। त्रिसप्ताहप्रयोगेण कामान्धो जायते नरः ॥ ४४ ॥ कामज्वरो भवेत्तावद्यावन्नारीं न गच्छति। स सहस्रं वरारोहा रमयत्यपि सोऽक्षमः ॥४५॥ न च लिङ्गस्य शैथिल्यं वेगवीर्यं विवर्द्धयेत्। प्रमदाप्राणवल्लभ्यं मत्तवारणविक्रमः ॥ ४६ ॥ वशमावश्यकरो रम्य

ऊर्ध्वरेता भवेन्नरः । कामतुल्यं भवेद्रूपं स्वरः परभृतोपमः ॥ ४७ ॥ खगतुल्या भवेद्दृष्टिर्वृद्धोऽपि तरुणायते । अष्टोत्तरं भजेद्वर्षं तु भवेत्तस्य सुधोपमम् ॥ ४८ ॥ वीर्यवृद्धिकरं श्रेष्ठं जरामृत्युविनाशनम् । अपस्मारज्वरोन्मादक्षयानिलगदापहम् ॥ ४९ ॥ कासं श्वासं सशोथं च भगन्दरगुदामयम् । अग्निमान्द्यमतीसारं विविधं ग्रहणीगदम् ॥ ५० ॥ बहुमूत्रं प्रमेहं च शिरोरोगमरोचकम् । हन्ति सर्वान् गदान् घोरान् वातपित्तबलासजान् ॥ ५१ ॥ वन्ध्या च मृतवत्सा च नष्टपुष्पा च या भवेत् । बहुपुत्रा जीववत्सा भवेदस्य निषेवणात् ॥ ५२ ॥ हरते सूतिकारोगं हुत्तमिन्द्राशनिर्यथा । मोदकं मदनानन्दं सर्वरोगे महौषधम् । कथितं देवदेवेन रावणस्य हितार्थिना ॥ ५३ ॥

पारा, गन्धक, लोहभस्म एक-एक तोला, अभ्रक भस्म १ तोला । कपूर, सेंधानमक, जटामांसी, आंवला, इलायची, सोंठ, मिर्च, पीपर, जायफल, तेजपात, लौंग, सफेद जीरा, स्याह जीरा, मुलेठी बच, कूट, हल्दी, देवदारु, समुद्रफेन, सोहागा, भारंगी, सोंठ नागकेसर, काकड़ासिंगी, तालीशपत्र, मुनक्का, चीता, इन्द्र जौ, धवा (धरिहारा), अविपत्ता (कंघी), दालचीनी, धनियां, गजपीपरि, कपूर, सुगन्धवाला, नागरमोथा, असगन्ध, विदारीकन्द, शतावरि, मदार का मूल, केवाँच के बीज, गोखरू, विधारा और भाँग के बीज प्रत्येक एक-एक तोला, एकत्र कूट पीसकर चूर्ण करे। फिर शतावरि के रस में घोटकर बहुत महीन चूर्ण करे और सब चूर्ण का चौथाई भाग सेमर की जड़ का चूर्ण उसमें और मिलावे। तदनन्तर चूर्ण का अर्ध भाग विशुद्ध भाँग का चूर्ण डालकर सबको एक में मिलाकर बकरी के दूध के साथ पीसे। पश्चात् मोदक बनाने के निमित्त पाक-योग्य (समष्टि चूर्ण से द्विगुण) शक्कर को बकरी के दूध में घोलकर मन्द अग्नि से चाशनी करे। चाशनी ठीक हो जाने पर उतार कर उसमें पूर्वोक्त चूर्ण को मिला दे। पश्चात् दालचीनी, इलायची, तेजपात, नागकेसर, कपूर, सेंधानमक, सोंठ मिर्च और पीपरि तथा घृत और मधु उपयुक्त परिमाण में मिला दें। पाक ठीक हुआ जानकर एक-एक तोले का लड्डू बनावे। मोदक तैयार हो जाने पर भूतनाथ, इन्द्र, कामदेव और गणेशजी को भोग लगाकर, मूलमन्त्र का उच्चारण करके कुछ अग्नि में डाले। पश्चात् मोदकों को सोने, चाँदी, काँच या मिट्टी के पात्र में रख दे। प्रातःकाल पवित्र होकर शिव और पार्वती की पूजा करे। पूजनोत्तर एक-एक लड्डू खाकर स्याह जीरा, तिल, गोदुग्ध और घृतयुक्त पायस का पान करे। विलासार्थ प्रदोष काल में मोदक का सेवन करे। तीन सप्ताह के प्रयोग से मनुष्य कामान्ध हो जाता है। वह जब तक स्त्रीप्रसङ्ग नहीं करता, तब तक कामज्वर से पीड़ित रहता है। वह पुरुष हजार स्त्री के साथ रमण करने पर भी उत्साहित रहता है। लिङ्ग की शिथिलता नहीं होती। स्फूर्ति और वीर्य को बढ़ाता है। रतिकाल में प्रमदा की अपेक्षा अधिक शक्ति होती है। मत्तहस्ती के समान पराक्रमी, स्त्री को वश करनेवाला, सुन्दर और ऊर्ध्वरेता होता है। कामदेव के समान रूप, कोकिला के समान स्वर और गृद्ध के समान दृष्टि हो जाती है। वृद्ध भी तरुण के समान हो जाता है। एकसौ आठ वर्ष की उसकी आयु हो जाती है। यह मोदक अमृत के समान श्रेष्ठ है, वीर्य को बढ़ाता है। जरा और मृत्यु का नाशक है। अपस्मार, ज्वर, उन्माद, क्षय, शोथ, भगंदर, बवासीर, वातरोग, खाँसी, श्वास, अग्निमान्द्य, अतिसार, विविध प्रकार के ग्रहणीरोग, बहुमूत्र, प्रमेह, शिरोरोग और अरुचि को नष्ट करता है। यह अन्यान्य सब वातिक, पैत्तिक और श्लैष्मिक, घोर रोगों को नष्ट करता है। वन्ध्या

के पहुत से पुत्र होते हैं। मृतवत्सा की संतान जीवित होती है। जिसका मासिक होना रुक गया हो, उसको मासिक होने लगता है। जैसे इन्द्र का वज्र वृक्ष को नष्ट करता है वैसे ही यह मोदक सूतिकारोग को नष्ट करता है। 'मदनानन्दमोदक' सब रोगों के लिये महौषध है। गणेश के पिता देवदेव (शिवजी) ने इसका उपदेश किया था ॥ ३१-३३ ॥

कामिनीदर्पघ्न।

कज्जलीकृतसुगन्धकरम्भोस्तुल्यमेव कनकस्य हि बीजम्। मर्दयेत्कनकतैलयुतं स्यात् कामिनीमदविधूनन एषः ॥ ५४ ॥ अस्य वल्लकमथो सितयाक्तं सेवितं हरति मेहगदौधान्। वीर्यदार्ढ्यकरणं कमनीयं द्रावणं निधुवने वनितानाम् ॥ ५५ ॥

एक-एक तोले पारा और गन्धक की कज्जली करके उसमें २ तोले धतूरे के बीज का चूर्ण मिश्रित कर धतूरे के बीज के तैल के साथ मर्दन करके रस ले। यह रस स्त्रियों के मद को नष्ट करनेवाला है। तीन-तीन रत्ती की मात्रा में इस रस को शक्कर के साथ सेवन करे। यह रस सब प्रकार के प्रमेहों को हरता है, वीर्य को दृढ़ करता है और रतिकाल में स्त्रियों के मद को दूर करता है ॥ ५४-५५ ॥

स्वल्पचन्द्रोदयमकरध्वज

जातीफलं लवङ्गं च कर्पूरं मरिचं तथा। प्रत्येकं तोलकं दत्त्वा सुवर्णस्य च माषकम् ॥ ५६ ॥ अण्डजं माषमानं च सर्वं तुल्यमथेश्वरम्। यत्नतो मर्दयेत् खल्वे चतुर्गुञ्जां वटीं चरेत् ॥ ५७ ॥ एष चन्द्रोदयो नाम रसो वाजीकरः परः। हन्ति रोगानशेषांश्च बलवीर्याग्निवर्धनः ॥५८॥

एक-एक तोला जायफल, लौंग, कपूर और कालीमिर्च। एक-एक माशा सोने की भस्म और कस्तूरी तथा सबके का समभाग अर्थात् ४ तोला और २ माशे रससिन्दूर मिलाकर अच्छे प्रकार घोटकर चार-चार रत्ती की गोलियाँ बना ले। इसका नाम 'चन्द्रोदय रस' है। यह परम उत्तम वाजी करण स्वल्पचन्द्रोदय सब प्रकार के रोगों को नष्ट करता है। बल, वीर्य और अग्नि को बढ़ाता है ॥ ५६-५८ ॥

बृहच्चन्द्रोदयमकरध्वज।

पलं मृदुस्वर्णदलं रसेन्द्रात् पलाष्टकं षोडश गन्धकस्य। शोणैः सुकार्पाससभवैः प्रसूनैः सर्वं विमर्द्याथ कुमारिकाद्भिः ५९ तत्काचकुम्भे निहितं सुगाढे मृत्कर्पटैभिर्दिवसत्रयं च। पचेत् क्रमाग्नौ सिकताख्ययन्त्रे ततो रजःपल्लवरागरम्यम् ॥६० ॥ निगृह्य चैतस्य पलं पलानि चत्वारि कर्पूररजांसि तद्वत्। जातीफलं सोषणमिन्दुपुष्पं कस्तूरिकायाः इह शाणमेकम् ॥ ६१ ॥ चन्द्रोदयोऽयं कथितोऽस्य मात्रो भुक्तोऽहिवल्लीदलमध्यवर्ती। मदोन्मत्तानां प्रमदाशतानां गर्वाधिकत्वं श्लथयत्यकाण्डे ॥ ६२ ॥ घृतं घनीभूतमतीवदुग्धं मृदूनि मांसानि समस्तकान्ति। माषान्नपिष्टानि भवन्ति पथ्यान्यानन्ददायीन्यपराणि चात्र ॥ ६३ ॥ वलीपलितनाशनस्तनुभृतां वयःस्तम्भनः समस्तगदखण्डनः प्रचुररोगपञ्चाननः। गृहेऽपि गृहभूपतिर्भवति यस्य चन्द्रोदयः स पञ्चशरदर्पितो मृगदृशां भवेद्वल्लभः ॥ ६४ ॥

कोमल स्वर्णदल ४ तोला, पारा ३२ तोला और गन्धक ६४ तोले ले। इनमें पारा और गन्धक की कज्जली करके उसी में उक्त स्वर्णदल को मिलाकर मर्दन करे। फिर लाल कपास के फूल के स्वरस के साथ मर्दन करे। उसके पश्चात् ग्वारपाठा के स्वरस के साथ मर्दन

करके, दृढ़ कपड़मिट्टी की हुई काँच की शीशी में भरकर, शीशी को बालुकायन्त्र में रखकर क्रमशः मन्द, मध्य और तीव्र अग्नि द्वारा तीन दिन पर्यन्त पकाकर स्वाङ्गशीतल होने पर शीशी को उतार ले। पश्चात् शीशी को तोड़कर उसकी नली में लगे हुए नवपल्लव के समान रक्तवर्ण के रस को निकाल ले। यह रस ४ तोले, कपूर का चूर्ण १६ तोले, जायफल १६ तोले तथा त्रिकटु (सोंठ, मिर्च, पीपरि) मिश्रित १६ तोले, लौंग १६ तोले, कस्तूरी २ माशे। इन सबको एकत्र घोंटकर रख ले। एक-एक माशा की मात्रा में पान के साथ सेवन करे। इस रस का सेवन करनेवाला पुरुष मदोन्मत्त सैकड़ों स्त्रियों के प्रबल मद को दूर करता है। घृत, गाढ़ा दुग्ध, समस्त प्रकार के लघुमांस, उड़द की पिट्ठी तथा अन्यान्य आनन्दप्रद आहार इसमें पथ्य होते हैं। यह रस मनुष्यों के वलीपलित को नष्ट करता है और वयःस्थापक है। समस्त रोगों को नष्ट करता है। प्रचुर रोगरूपी हाथियों को भगाने के लिये सिंहरूप है। जिस गृहस्थ के घर में यह रस रहता है वह कामदेव के बाणों से पीड़ित हो स्त्रियों का प्रिय होता है॥ ५३-६४॥

सिद्धसूत।

मुक्ताफलं शुद्धसूतं सुवर्णं रूप्यमेव च। यवक्षारं च तत्सर्वं तोलकैकं प्रकल्पयेत्॥ ६५॥ रक्तोत्पलपत्रतोयैर्मर्दयेत् पुत्तलीकृतम्। मर्दयेच्च पुनर्दत्त्वा गन्धकं तदनन्तरम्॥ ६६॥ क्षिप्त्वा काचघटीमध्ये सन्निरुध्य त्रियामकम्। सिकताख्ये पचेच्छीते सिद्धसूतं तु भक्षयेत्॥ ६७॥ पञ्चरक्तिप्रमाणेन मुशलीशर्करान्वितम्। शुक्रवृद्धिं करोत्येष ध्वजभङ्गं च नाशयेत्॥ ६८॥ दुर्बलं वपुरत्यर्थं बलयुक्तं करोत्यसौ। मुद्गगर्भं घृतं क्षीरं शालयः स्निग्धमामिषम्॥ पारावतस्य मांसन्तु तित्तिरस्य सदा हितः॥ ६९॥

मोती, शुद्ध पारा, स्वर्ण, रूप्य और यवक्षार एक-एक तोला ले। सबको एकत्र कर लाल कमल के पुष्पों के स्वरस के साथ घोटकर गोला बना ले। पश्चात् एक तोला गन्धक डालकर फिर घोटे। अच्छे प्रकार से घोटकर कपरौटी की हुई काँच की शीशी में भरकर बालुकायन्त्र में रखकर तीन पहर तक आँच दे। स्वाङ्गशीतल होने पर शीशी से सिद्ध पारद को निकालकर में मुशली के चूर्ण और शक्कर के साथ सेवन करे। यह रस *शुक्र को बढ़ाता और ध्वजभङ्ग को नष्ट करता* है। अतिदुर्बल शरीर को बलवान् बनाता है। इस रस का सेवन करनेवाले को घृतसिद्ध मूँग, दूध, शालिचावल के भात, स्निग्ध मांस, कबूतर और तित्तिर के मांस सदा हितकर होते हैं मात्रा ५ रत्ती॥ ६५-६९॥

कामदीपक।

सितं पुनर्नवामूलं शाल्मलीरसभावितम्। शाल्मलीरसनिर्यासं दद्यात्तेन समं समम्॥ ७०॥ गन्धकं सर्वतुल्यं च भक्षयेच्छाणमात्रकम्। अनुपानं प्रकुर्वीत ततः क्षीरं पलद्वयम्॥ ७१॥ अयं पाण्डालिनीयोगोऽगम्याप्यत्र हि गम्यते। निषेधान्निधनं याति करणाद् कामरूपधृक्॥ ७२॥

श्वेत पुनर्नवा की जड़ के चूर्ण को सेमर के मुसला के स्वरस से भावितकर उक्त चूर्ण के समान भाग मोचरस का चूर्ण और समष्टि के समान शुद्ध गन्धक मिलाकर उत्तम रीति से चूर्ण कर रख ले। चार-चार माशे की मात्रा में आठ-आठ तोले दूध के साथ सेवन करे। यह पाण्डालिनीयोग है। इसका सेवन करने पर अगम्या स्त्री के पास भी गमन किया जाता है। निषेध करने से मृत्यु को प्राप्त होता है। किन्तु अगम्या-गमन करने से कामदेव के समान कान्तिमान् हो जाता है॥ ७०-७२॥

सितशाल्मलीकल्प।

कूष्माण्डं तालमूली धात्री चैव पुनर्नवा। समभागं समाहृत्य भागार्द्धं गन्धकं तथा ॥ ७३ ॥ तदर्धं पारदं शुद्धं कज्जलीकृत्य निक्षिपेत्। श्वेतशाल्मलितोयेन सप्तधा भावयेत्ततः ॥ ७४ ॥ माहिषेण च दुग्धेन तच्चूर्णं भावयेत् पुनः। शुष्कं तच्चूर्णयेदरनाल्लेहयेन्मधुसर्पिषा ॥ ७५ ॥ अनेनाशीतिवर्षोऽपि शतधा रमते स्त्रियः। ऊर्ध्वलिङ्गः सदा तिष्ठेत कामदेव इव स्वयम् ॥ ७६ ॥ ज्वरादिरोगनिर्मुक्तः संसारसुखमश्नुते। शाणमेकं तु कर्त्तव्यं दुग्धमत्रानुपानकम् ॥ ७७

विदारीकन्द, स्याह मुसली, आँवला और गदहपुरैना एक-एक तोला मिश्रित कर उस में ६ माशे गन्धक और ३ माशे शुद्ध पारद की कज्जली करके मिला दे। पश्चात् श्वेत सेमर के मुसला के स्वरस से सात बार भावित करके फिर भैंस के दूध से उस चूर्ण को भावित करे घोटते-घोटते शुष्क कर डाले। इस चूर्ण को मधु और घृत में मिलाकर चाटे। इसके सेवन से ८० वर्ष का वृद्ध भी सौ स्त्रियों से रमण कर सकता है। सदा उत्थितलिङ्ग रहता है और कामदेव के समान कान्तिमान् हो जाता है। ज्वरादि रोगों से मुक्त हो संसार के सुख का उपभोग करता है। इसकी मात्रा ४ माशे और अनुपान दुग्ध है ॥ ७३-७७ ॥

पञ्चशर रस।

रसेन वा शाल्मलिजेन सूतं त्रिसप्तवाराणि बलिं विमर्द्य। पृथक तयोः कज्जलिकां विपक्वां घृते रसः पञ्चशरोऽयमुक्तः ॥ ७८ ॥ वल्योऽहिवल्लीदलसंप्रयुक्तो वीर्यातिवृद्धिं कुरुतेऽस्य नूनम्। मांसाचमद्यं गुरुपायसं च पयः पिबेन्माहिषमत्र सिद्धम् ॥ ७९ ॥

सेमर के मुसला के स्वरस के साथ पारा और गन्धक को अलग-अलग इक्कीस-इक्कीस बार घोटकर उनकी कज्जली करके घृत में पकाकर सिद्ध करे। इसका नाम 'पञ्चशररस' है। पान के साथ तीन-तीन रत्ती की मात्रा में सेवन करने से निःसंदेह अति वीर्यवृद्धि करता है। मांस, भात, मद्य, गुरुपाक पदार्थ, पायस और भैंस के दूध इसमें पथ्य होते हैं ॥ ७८-७९ ॥

त्रिकण्टकाद्य मोदक।

गोक्षुरेक्षुरबीजानि वाजिगन्धा शतावरी। मुशली वानरीबीजं यष्टिनागबला बला ॥ ८० ॥ एषां चूर्णं दुग्धसिद्धं गव्येनाज्येन भर्जितम्। सितया मोदकं कृत्वा भक्षयं वाजीकरं परम् ॥ ८१ ॥ चूर्णादष्टगुणं क्षीरं घृतं चूर्णसमं स्मृतम्। सर्वतो द्विगुणं खण्डं खादेदग्निबलं यथा ॥ ८२ ॥ वाजीकराणि भूरीणि संगृह्य रचितो यतः। तस्माद्बहुषु योगेषु योगोऽयं प्रवरो मतः ॥ ८३ ॥

गोखरू, तालमखाने के बीज, असगन्ध, शतावरि, स्याह मुसली, केवाँच के बीज, मुलेठी, गङ्गेरुई और खरेटी के चूर्ण को दुग्ध के साथ सिद्ध कर गाय के घी में भूने और शक्कर डालकर लड्डू बनाकर खाय। यह अत्यन्त वाजीकरण है। दूध चूर्ण से अठगुना, घृत चूर्ण के बराबर और शक्कर सबसे दूनी होनी चाहिए। अग्नि और बल का विचारकर इसका सेवन करना चाहिए। बहुत सी वाजीकरण औषधियों को संगृहीत कर यह चूर्ण बनाया जाता है, अतः यह बहुत योगों की अपेक्षा श्रेष्ठ माना गया है मात्रा—१।२ तोला ॥ ८०-८३ ॥

रसाला

दध्नोऽर्द्धाढकमीषदम्लमधुरं खण्डस्य चन्द्रद्युतेः, प्रस्थं चौडपलश्च पथ्य हविषः शुण्ठ्याश्चतुर्माषकान्। पलमापचतुर्थं

मरिचतः कर्षं लवङ्गं तथा, धृत्वा शुक्लपटे शनैः करतलेनोन्मथ्य विस्रावयेत् ॥८४॥ मृद्भाण्डे मृगनाभिचन्दनरसस्पृष्टेऽगुरुधूपिते, कर्पूरेण सुगन्धिकं तदखिलं संशोध्य संस्थापयेत्। स्वस्यार्थे मधुरेश्वरेण रचिता स्नेपा रसाला स्वयं, भोक्तुर्मन्मथदीपनी सुखकरी कान्तेव नित्यं प्रिया ॥ ८५ ॥

किञ्चित् खट्टा और मीठा दही १२८ तोले, श्वेत शक्कर ६४ तोले, मधु ४ तोले, घृत २० तोले, सोंठ का चूर्ण ५ माशे, इलायची का चूर्ण ४ माशे, कालीमिर्च का चूर्ण १ तोला और लौंग का चूर्ण १ तोला, सबको मिश्रित कर श्वेत वस्त्र में रखकर हाथ से धीरे-धीरे मलकर छान ले। पश्चात् कस्तूरी, सफेद चन्दन के रस से लिप्त और अगर के द्वारा धूपित मिट्टी के पात्र में उस दधि आदि मिश्रित पदार्थ को रखकर कपूर से सुगन्धित करके अच्छी तरह मिलाकर रख ले। मधुरेश्वर कृष्ण भगवान ने स्वयं अपने लिये इस रसाला को बनाया था। यह रसाला सेवन करनेवाले को कामोद्दीपन करती है, सुखकर होती है और कान्ता के समान नित्य प्रिय होती है ॥ ८४-८५ ॥

## चन्दनादितैल।

द्रव्याणि चन्दनादीनि चन्दनं रक्तचन्दनम्। पतङ्गमथ कालीयागुरुकृष्णागुरूणि च ॥ ८६ ॥ देवद्रुमः ससरलः पद्मकं तुरगिकोऽपि च। कर्पूरो मृगनाभिश्च लताकस्तूरिकापि च ॥ ८७ ॥ सिह्लकः कुङ्कुमं नव्यं जातीफलकमत्र च। जातीपत्रं लवङ्गश्च सूक्ष्मैला महती च सा ॥ ८८ ॥ कक्कोलफलकं त्वक् च पत्रकं नागकेशरम्। पालकञ्च तथोशीरं मांसी दारुसिताऽपि च ॥ ८९ ॥ मुरा कर्पूरकश्चापि शैलेयं भद्रमुस्तकम्। रेणुका च प्रियङ्गुश्च श्रीवासो गुग्गुलुस्तथा ॥ ९० ॥ लाक्षा नखश्च रालश्च धातकीकुसुमं तथा। ग्रन्थिपर्णञ्च मञ्जिष्ठा तगरं सिक्थकं तथा॥९१॥ एतानि शाणमानानि कल्कीकृत्य शनैः पचेत्। तैलं प्रस्थमितं सम्यगेतत्पात्रे शुभे क्षिपेत् ॥ ९२ ॥ अनेनाभ्यक्तगात्रस्तु वृद्धोऽशीतितमोऽपि यः। शुभ्रो भवति शुक्राढ्यः स्त्रीणामत्यन्तवल्लभः ॥ ९३ ॥ वन्ध्यापि लभते गर्भं षण्डोऽपि तरुणायते। अपुत्रः पुत्रमाप्नोति जीवेच्च शरदां शतम् ॥ ९४ ॥ चन्दनादिमहातैलं रक्तपित्तं क्षयं ज्वरम्। दाहप्रस्वेददौर्गन्ध्यं कुष्ठं कण्डुं विनाशयेत् ॥ ९५ ॥

श्वेतचन्दन, रक्तचन्दन, भाँगरा, पीतचन्दन, अगर, काली अगर, देवदारु, चीड़ की लकड़ी, पद्माख, तुम की छाल, कपूर, कस्तूरी, लताकस्तूरी, राल, नई केशर, जायफल, जावित्री, लौंग, छोटी इलायची, बड़ी इलायची, कंकोलफल (शीतलचीनी), दालचीनी, तेजपात, नागकेसर, सुगन्धबाला, खस, जटामांसी, दालचीनी, मुरामासी, कपूर, शैलज (छरीला), नागरमोथा, सँभालू के बीज, प्रियगुफूल, गन्धाबिरोजा, गूगुल, लाख, नख, राल, धाय के फूल, गठिवन, मजीठ, तगर और मोम प्रत्येक तीन तीन माशे एकत्र कर कल्क बनावे। इस कल्क के साथ १२८ तोले तैल उत्तम पात्र में धीमी आँच से पकावे। इस तैल का मर्दन करने से ८० वर्ष का वृद्ध मनुष्य भी कान्तिमान्, वीर्यवान् और स्त्रियों का मानमर्दन करनेवाला हो जाता है; वन्ध्या स्त्री भी गर्भ धारण करती है, नपुंसक भी तरुण पुरुष के समान आचरण करता है; अपुत्र मनुष्य पुत्र पाता है और सौ वर्ष जीता है। यह चन्दनादि महातैल रक्तपित्त, क्षय, ज्वर, दाह, स्वेददौर्गन्ध्य, कुष्ठ और कण्डू रोगों को नष्ट करता है ॥ ८६-९५ ॥

राक्षसरस।

पलद्वयं सूतसुशुद्धशोधितं चांकोटतोयेन पुनर्विभावितम्। दिनत्रयं तच्च विमर्द्य गाढं समानगन्धेन पुनर्विचूर्ण्य॥ ९६॥ यदा भवेदंजनसन्निकाशः पूर्वोक्ततोयेन पुनर्विभावयेत्। तत्कालछागस्य तु मांसमध्ये संक्षिप्य संलोडितचित्रकस्य॥ ९७॥ रसेन मुख्यं खलु तालमूली निर्यासयुक्तेन विमुद्रय गाढम्। तन्मांसपिण्डे त्वपरे निवेश्य माषस्य पिष्टेन लिपेत्प्रयत्नात्॥ ९८॥ तप्ततैले च निवेश्य चूल्यां मन्दाग्निना तद्विपचेत्प्रयत्नात्। पंचाक्षरं चात्र जपेद्विधिज्ञो देवीमिमां सिद्धरसेश्वरीञ्च॥ ९९॥ ततः सिंदूरवर्णाभं वटकं तं समुद्धरेत्। अष्टोत्तरसहस्रे तु जप्त्वा पंचाक्षरीमिमाम्॥ १००॥ ततस्तस्मात्समुद्धृत्य मुहूर्ते शोभने दिने। भिषजं तोष्य विप्रादीन् रक्तिकैकन्तु भक्षयेत्॥ १०१॥ मधुसर्पिर्युतं सेव्यं परचाद्भोजनमाचरेत्। अनुपाने पिबेद्दुग्धं रसायनमतानुगम्॥ १०२॥ यथेष्टं भोजनं कार्य्यं कषायकटुवर्जितम्। अनेन विधिना कृत्वा नरः स्यात्कामदेववत्॥ १०३॥ योपित्छतं भजेन्नित्यं सहस्रं काममोहितः। अकृत्वा मैथुनं रेतः स्फुटितं स्याल्लोचनं भजेत्॥१०४॥ स भवेन्मन्मथाकारो नात्र कार्य्या विचारणा। रसराक्षसमुद्भुज्य नृपतिः स्यादनंगवत्॥ १०५॥

शुद्ध पारा ८ तोला ले, उसको अंकोल के रस अथवा काढ़े की भावना दे। फिर तीन दिन खरल कर ८ तोले शुद्ध आमलासार गन्धक मिलाकर कज्जली करे, जब काजल के समान बारीक हो जाय तब फिर अंकोल के रस से घोटे। फिर तत्काल मारे हुए बकरे के मांस में इस कज्जली के गोले को रख चीते के रस में मलाबार के गोंद को घोटकर उस मांस के चारों तरफ लपेट कर उसे बंद कर दे। फिर उसको दूसरे मांसपिण्ड में रखकर उड़द का सना हुआ आटा उस पर लपेट दे। फिर उस गोले को गरम-गरम तैल में छोड़ दे और चूल्हे में उसके नीचे मन्द-मन्द आँच जलावे। पंचाक्षरी मन्त्र का जप करे तथा रसेश्वरी भगवती का ध्यान करे तो निस्सन्देह इस रस का सिन्दूर के वर्ण के समान गोला बनकर तैयार होगा। फिर अष्टोत्तर सहस्र पंचाक्षरी मन्त्र का जप करके शुभ मुहूर्त और तिथि में इस गोले को उक्त तैल में से निकालकर आटा और उसे मांसादिक को दूर करे और उस रस को निकाल ले। फिर वैद्य और ब्राह्मणों का पूजन कर एक या दो रत्ती शहद और गौ के घृत में मिलाकर खाय। फिर भोजन कर ऊपर से रसायन की विधि से दूध पिये और यथेष्ट भोजन करे, परन्तु कसैले और चरपर आदि पदार्थों को न खाय। इस विधि के करने से मनुष्य कामदेव के समान होता है। उसमें हजार स्त्रीसेवन की सामर्थ्य होती है। मनुष्य मैथुन न करेंगे तो वीर्य फूटकर नेत्रों में आ जायगा; इस कारण अवश्य मैथुन करे। इसमें विचार न करना चाहिए। इस राक्षसरस के सेवन से मनुष्य कामदेव के समान स्वरूपवान् हो जाता है॥ ९६-१०५॥

विलासिनीवल्लभ रस।

समानभागे बलिशूलिबीजे तयोः समानं कनकस्य बीजम्। धत्तूरतैलेन विमर्द्य सम्यक् विलासिनीवल्लभनामधेयः॥ १०६॥ मूलो भवेद्वल्लयुगप्रमाणः सितायुतो मेहसमूहहारी। वीर्य्यस्य यन्धं कुरुते नराणां निहन्ति दर्पं च सुलोचनानाम्॥ १०७॥

पारा १ तोला, गन्धक १ तोला, धतूरे के बीज २ तोले, सबका बारीक चूर्ण कर धतूरे के तेल में खूब घोटे तो यह विलासिनीवल्लभ नाम पारा बनकर तैयार हो जाता है। इसको ४ रत्ती की मात्रा में मिसरी के साथ सेवन करने से सम्पूर्ण प्रमेह नष्ट होते हैं। यह वीर्य का स्तंभन करता है और स्त्रियों के अभिमान को हरता है। मात्रा समयानुसार १-२ रत्ती की ही देनी चाहिए। ४ रत्ती की आजकल अधिक है ॥ १०६-१०७ ॥

मदनकामदेवरस।

तारं वज्रं सुवर्णञ्च ताम्रं सूतं सगन्धकम्। लौहञ्च क्रमवृद्धानि कुर्य्यादेतानि मात्रया ॥ १०८ ॥ विमर्द्य कन्यकाद्रावैः न्यसेत् काचमये घटे। विमुद्रय पिठरीं मुद्रय धारयेत्सैंधवे भृते ॥१०९॥ पिठरीं मुद्रयेत् सम्यक् ततश्चुल्यां निवेशयेत्। वह्निं शनैः शनैः कुर्य्याद्दिनैकं तत्समुद्धरेत् ॥ ११० ॥ स्वांगशीतं ततश्चूर्णं भावयेद्धर्कदुग्धतः। अश्वगन्धा च काकोली वानरी मुशली चरा ॥ १११ ॥ त्रिश्चिवल्ल-रसैरासां शताधर्य्या च भावयेम्। पद्मकन्द-कसेरूणां रसैरेका च भावना ॥ ११२ ॥ कस्तूरी व्योपकर्पूरं कंकोलैलालवंगकम्। पूर्णचूर्णादष्टमांशमेतच्चूर्णं विमिश्रयेत् ॥ ११३ ॥ सर्वैः समां शर्कराञ्च दत्वा शाणोन्मितं पिबेत्। गोदुग्धद्विपलेनैव मधुराहारसेवकः ॥ ११४ ॥ अस्य प्रभावात्सौन्दर्य्यम्बलं तेजोऽभिवर्द्धते। तरुणीरमयेद्बह्वीर्न च हानिः प्रजायते ॥ ११५ ॥

चाँदी की भस्म, हीरे की भस्म, सुवर्ण की भस्म, ताँबे की भस्म, शुद्ध पारा, शुद्ध गन्धक, लोह की भस्म, हरएक क्रम से अधिक भाग ले। सबको एकत्रकर घीग्वार के रस में खरल करे। फिर एक हाँडी में पिसा नमक भर बीच में शीशी को रख मुखपर्यन्त नमक भर दे और मुख को परिया से बन्द कर दे, फिर उसको चूल्हे पर चढ़ा धीरे-धीरे एक दिन बराबर अग्नि दे, फिर असगंध, कंकोल, कौंच, मुसली, तालमखाने, इन हरएक के रस की तीन-तीन बार भावना दे। फिर कमलकन्द और कसेरू के रस की एक-एक भावना दे। पश्चात् कस्तूरी, सोंठ, मिरच पीपल, भीमसेनी कपूर, कंकोल, छोटी इलायची, लौंग ये सब पहिले चूर्ण से अष्टमांश ले। फिर सबकी बराबर मिसरी मिलाकर ४ माशे को ८ तोले गौ के दूध के साथ पिये और इसके ऊपर मधुर आहार करे। इसके प्रभाव से सुन्दरता, बल और तेज की वृद्धि होती है और बहुत स्त्रियों से रमण कर सकता है तथा वीर्य की भी कभी हानि नहीं होती ॥ १०८-११५ ॥

कन्दर्पसुन्दर रस।

सूतो वज्रमहिं मुक्ता तारं हेम सिताभ्रकम्। रसैः कर्षांशकानेतान् मर्दयेदरिमेदजैः ॥ ११६ ॥ मयालं चर्णगन्धस्य द्विद्विकर्षं विमिश्रयेत्। मयालं चूर्णगन्धस्य विमर्द्य मृगशृंगके ॥ ११७ ॥ क्षिप्त्वा मृदुपुटे पक्त्वा भावयेद्धातकीरसैः। काकोली मधुकं मांसी बलात्रयविसेङ्गुदम् ॥ ११८ ॥ द्राक्षा पिप्पलिवन्दाकं धरीपर्णीचतुष्टयम्। परूषकं कसेरुश्च मधुकं वानरी तथा ॥ ११९ ॥ भावयित्वा रसैरेषां शोषयित्वा विचूर्णयेत्। एलात्वक् पत्रकं मांसी लवंगागुरुकेशरम् ॥ १२० ॥ मुस्तं मृगमदं कृष्णा जलं चन्द्रञ्च मिश्रयेत्। एतच्चूर्णैः शाणमितैः रसं कन्दर्पसुन्दरम् ॥ १२१ ॥ खादेच्छाणमितं रात्रौ सिता धात्री विदारिका। एतेषां कर्षचूर्णेन सर्पिष्कर्षेण सम्मितम् ॥

१२२ ॥ तस्यानुद्वियलं चोरं पिबेत्सुखितमानसः। रमणी रमयेद्वीर्यं हानिं क्वापि गच्छति ॥ १२३ ॥

शुद्ध पारा, हीरे की भस्म, सीसे की भस्म, मोती की भस्म, चाँदी की भस्म और सफेद अभ्रक की भस्म, इन सबको एक-एक तोला लेकर खैर के काढ़े से खरल करे। फिर मूँगा की भस्म २ तोले और गन्धक की भस्म २ तोले मिलाकर घोटकर हिरन के सींग में भर, ऊपर कपरमिट्टी कर, लघु संपुट में रख फूँक दे। फिर धाय के फूलों के काढ़े की भावना देकर काकोली, मुलहठी, जटामांसी, खरैटी-गुलसकरी और दंती, असगंध, हिंगोट, दारु, पीपल, बाँदा, सतावर, शालपर्णी, पृश्नपर्णी, मुद्गपर्णी, माषपर्णी कालसे, कसेरू, महुआ, और कौंच के बीज इन सबके रस की अलग-अलग भावना देकर धूप में सुखाता जाय। इलायची, तेजपात, जटामांसी, लौंग, गेरू, केशर, नागरमोथा, कस्तूरी, पीपल, नेत्रबाला, और भीमसेनी कपूर इन सबको मिलाकर चूर्ण करे तो यह कंदर्पसुन्दर रस बने। रात्रि के समय १ तोला मिसरी, १ तोला आँवला का चूर्ण, १ तोला बिदारीकन्द का चूर्ण और १ तोला घृत में ४ माशे इस रस को मिलाकर खाय और ऊपर से ८ तोले दूध पिये तथा प्रसन्नचित्त रहे तो अनेक स्त्रियों से संभोग करने की शक्ति हो तथा वीर्य की हानि भी न हो ॥ ११६-१२३ ॥

## स्तंभनकर्त्ता पारा।

शुद्धं सूतमिपुमवोलकमितं गन्धं तथा शुद्धिमत् पंचात्तं परिगृह्य संपक्षमुखां शुक्तिं समुद्घाट्य ताम्। तत्कीलं परिहृत्य शुक्तिजठरादन्तः क्षिपेद्गन्धकं मोक्षस्यार्द्धमथान्तरे विनिहितं सूतं समस्तं ततः ॥ १२४ ॥ सूतस्योपरिशेषगन्धकरजः संक्षिप्य तन्मध्यगं.सूतं शुक्तिकयान्यतोपरिगतासंमुद्रय मृद्वस्त्रकैः ॥ १२५ ॥ तां शुक्तिं परिशोष्य सूर्यकिरणात्संदीयतेऽग्निस्तुषैः धान्यानां गजसंज्ञके घरपुटे तत्स्वांगसंशीतलम् ॥ १२६ ॥ संचूर्ण्याँशुकगालितं किल भवेद्गुञ्जोन्मितं पुष्टिकृत् रसस्तम्भनकृत्पयोऽनु च पिबेत्सायं सिता संयुतम् ॥ १२७ ॥

शुद्ध पारा २ तोले, शुद्ध गन्धक ४ तोले लेकर मुक्तमुँही सीप के मुँह को खोलकर उसके भीतर के कीड़े को निकाल डाले, फिर उस गंधक के आधे चूर्ण को उसमें बिछाकर उस पर पारे को रख बाकी आधे चूर्ण से दबा दे। फिर इस सीप के पलड़े से बंद कर कपरमिट्टी करके धूप में सुखा ले और धान्य के तुषों के गजपुट में रखकर फूँक दे। जब स्वांगशीतल हो जाय तब निकालकर उसकी कपरमिट्टी को दूर करे और पारे की डली को निकाल चूर्ण कर कपरछान करे और किसी उत्तम शीशी आदि में भरकर रख छोड़े। इसमें से १ रत्ती रस मक्खन, मिसरी, दूध आदि के अनुपान से भक्षण करे तो पुष्टता करे और वीर्य का स्तंभन करे तथा सायंकाल में इसके ऊपर मिसरी मिला हुआ दूध पिये ॥ १२४-१२७ ॥

## स्तंभन।

कर्पूरं टंकणं सूतं तुल्यं मुनिरसं मधु। संमर्द्य लेपयेल्लिङ्गं स्थित्वायामं तथैव च ॥ १२८ ॥ ततः प्रक्षाल्य रमयेद्वनितानां शतं सुखम्। वीर्यस्तंभकरं पुंसां सम्यक् नागार्जुनोदितम् ॥ १२९ ॥

कपूर, सुहागा और पारा तीनों औषधियाँ बराबर मात्रा में लेकर पीस डाले, फिर अगस्तियों के रस में और शहद में घोट करके लिंग पर लेप करे, एक प्रहर के बाद उस लेप को धोकर स्त्री से रमण करे तो सौ स्त्रियों से भोग करे, वीर्य का स्तंभन करे। यह नागार्जुन सिद्ध का कहा हुआ प्रयोग है ॥ १२८-१२९ ॥

सौगतिगुटिका।

पारदगन्धकचम्पककेसरकुसुमकरहाटाः अजमोदाम्बुधिशोषी जातीपत्रञ्च जातिफलम् ॥ १३० ॥ प्रत्येकं भागैकं भागद्वितीयं च शुद्धमहिफेनम्। तेन बदरसदृशगुटिका कार्य्या मधुनाथ भक्षयेदेकाम् ॥ १३१ ॥ यामेऽतीते ललनां सविधे स्थित्वा जवानिकाकर्षम्। तैलाढ्यं भुंजीयादनुपानं चैतदेतस्य ॥ १३२ ॥ लिंगं कठिनतरं स्याद्वीर्यस्तंभं भवेद्यामम्। एषा सौगतिगुटिका सत्यं सत्यं च रोधकारी ॥ १३३ ॥

पारा, गन्धक, नागकेशर, केशर, लौंग, अकरकरा, अजमोद, समुद्रशोष, जावित्री और जायफल, हरएक एक-एक तोला, और शुद्ध अफीम २ तोला लेकर सबको घोटकर बेर की गुठली के बराबर गोलियाँ बनावे। एक गोली रात्रि के समय शहद के साथ खाय, फिर एक प्रहर बाद १ तोला (४ माशे ही पर्याप्त होगी) अजवाइन को तेल में मिलाकर सेवन करे। यह इसका पथ्य है। इससे लिंग कठिन होता है। वीर्य का एक पहर तक स्तंभन होता है। यह सौगतिगुटिका वीर्य्य को रोकनेवाली है ॥ १३०-१३३ ॥

कामदेव रस।

सूतो माषमितः स्वदोषरहितस्तत्तुर्य्यभागो बलिस्तन्मानस्तु भुजंगफेन उदितः क्षुद्राफलस्याम्बुना। एतद्गोलकमाकलय्य विपचेत्क्षुद्राफले हेमगे सावेरघ्रमितैर्भवेदिति रसः श्रीकामदेवाभिधः॥१३४॥ मात्रा सूर्य्योदये गुञ्जामेकं यामचतुष्टये। गुञ्जाचतुष्टयं देयं नागवल्लीदलान्वितम्। दुग्धोदनं सलवणं रात्रौ क्षीरं यथेच्छया ॥ १३५ ॥

पारा १ माशे, गन्धक ४ माशे, अफीम ४ माशे इन सबको कटेरी के फल के रस में घोटकर गोलियाँ बनावे। इनको कटेरी के फल में रखकर पकावे, फिर धतूरे के फल में रखकर उनको म लावक पुट दे तो यह कामदेव रस सिद्ध हो जाता है। इसमें से १ रत्ती मात्रा में प्रातःकाल दे। १ रत्ती दूसरे पहर। इस प्रकार चार पहर ४ रत्ती मात्रा पान में रखकर दे और दिन में दूध, भात का भोजन करावे। परन्तु नमक का पदार्थ न खाय और रात्रि को यथेष्ट दूध पिये तो यह गुटिका अत्यन्त स्तंभन करती है ॥ १३४-१३५ ॥

महानीलकण्ठ रस।

पलैकं नागभस्माथ भावयेत्त्रिविधितः। तन्मानं सुमृतं स्वर्णं तोलैकं वापि मिश्रयेत् ॥ १३६ ॥ द्विपलं भस्मसूतस्य त्रिपलं मृतमभ्रकम्। त्रिपलं लौहभस्माथ सर्वमेकत्र कारयेत् ॥ १३७ ॥ भावयेच्च पृथक् कन्या ब्राह्मी निर्गुंडिका शमी। मुण्डी शतावरी छिन्ना कोकिलाक्षस्य बीजकैः ॥ १३८ ॥ मुसली वृद्धदारोग्निद्रवैर्भिषग्वरः। ततः संचूर्णयेत्सर्वं तुल्यमेकादशाभिधम् ॥ १३९ ॥ वराव्योषाब्दवह्न्येलाः जातीफललवंगकम्। पूजयेद् धूपपुष्पाद्यैः नीलकण्ठं महेश्वरम् १४० द्विगुंजा भक्षयेदस्या मृत्युंजयमनुस्मरन्। क्षयमेकादशविधं ग्रहणीरक्तपित्तकम् ॥ १४१ ॥ त्रिविधान् वातजान् रोगान् चत्वारिंशच्च पैत्तिकान्। हन्ति सर्वामयानेव कामिनीनां शतं व्रजेत् ॥ १४२ ॥ एकविंशतिरात्राद्धं परिहार्य्य त्यजेदिह। यथेष्टाहारचेष्टो हि कंदर्पसदृशो नरः ॥ १४३ ॥ मेधावी बलवान् प्राज्ञो महाग्नी भीमविक्रमः। पुत्रार्थिनी

तथा नारी सैव पुत्रं प्रसूयते। अस्य सूतस्य माहात्म्यं वेत्ति शंभुर्न चापरः॥१४४॥

मछली के पित्ते में घोटा हुआ नागेश्वर ४ तोले लेकर उसी में १ तोला सोने की भस्म मिलावे। चन्द्रोदय ८ तोले, अभ्रकभस्म १२ तोले और लोहभस्म १२ तोले मिलाय सबको इकट्ठा कर घीकुवार, ब्राह्मी, निर्गुंडी, धोंकरा, गोरखमुंडी, शतावरि, गिलोय, तालमखाने, मुसली, भिधारा और चीता इनके रसों की अलग-अलग भावना दे, फिर हड़, बहेड़ा, आँवला, सोंठ, मिरच, पीपल, नागरमोथा, चीता, इलायची, जायफल और लौंग इनका चूर्ण मिलाकर रस सिद्ध करे। फिर गन्ध से के फल आदि से श्रीनीलकण्ठ शिवजी का पूजन करे, तब दो रत्ती सेवन कर श्रीमृत्युंजय शिव का स्मरण करे तो ग्यारह प्रकार का क्षयरोग, संग्रहणी, रक्तपित्त, अनेक वात के रोग और ४० पित्त के रोगों को नष्ट करे। सौ स्त्रियों के भोगने की सामर्थ्य हो। २१ रात्रि पथ्य सेवन करके फिर परिहार को त्याग दे, फिर यथेष्ट आहार और आचारों का सेवन करे। कामदेव के समान रूप होवे, बुद्धिमान्, बलवान्, शूर, बहुत भोजन करनेवाला, भीमसेन के समान पराक्रमी होवे तथा जिसको पुत्र की इच्छा हो उसके पुत्र हो। इस महानील कण्ठ रस की महिमा श्रीशिव ही जानते हैं, अन्य नहीं॥ मात्रा—४ रत्ती॥ ११९-१४४॥

पुष्पधन्वा रस।

हरजभुजगलौहश्चाभ्रकं वङ्गचूर्णं कनकविजययष्टी शाल्मली नागवल्ली। घृतमधुसितदुग्धं पुष्पधन्वा रसेन्द्रो रमयति शतरामा दीर्घमायुर्बलञ्च॥ १४५॥

कनकादिकाथेन भावयित्वा घृतादिभियो जयेत्।

रससिन्दूर, नागभस्म, लोहभस्म, अभ्रकभस्म, और बङ्गभस्म समान भाग एकत्र मिश्रित कर क्रमशः धतूरे के पत्ते, भाँग, मुलेठी, सेमर का मुसरा और पान के स्वरस में भावित कर रख ले। घृत, मधु और शक्कर में मिलाकर दूध के साथ सेवन करे। इस पुष्पधन्वा नामक रसेन्द्र के सेवन करने से सौ स्त्रियों के साथ रमण करने की शक्ति हो जाती है। आयु और बल की वृद्धि होती है। कनक (धतूर) आदि द्रव्यों के क्वाथ की भावना देकर घृत आदि के साथ मिश्रित कर सेवन करना चाहिए॥ मात्रा—२।४ रत्ती॥ १४५॥

पूर्णचन्द्र रस।

सूताभ्रलौहं सशिलाजतु स्याद् विडङ्गताप्ये मधुना घृतेन। पिष्टं प्रशस्तं खलु पूर्णचन्द्रो द्विगुञ्जयुक्तो भवति प्रशस्तः॥ १४६॥

रससिन्दूर, अभ्रक, लोहभस्म, शिलाजीत, वायविडंग और स्वर्णमाक्षिक समभाग मिश्रित कर घृत और मधु के साथ घोटकर दो-दो रत्ती की गोलियाँ बनावे। इसका नाम पूर्णचन्द्र रस है। यह शरीर की पुष्टि के लिये प्रशस्त है॥१४६॥

कामाग्निसन्दीपन रस।

पलपरिमितशुद्धं सूतकं गन्धतुल्यं दरदकुनटितुल्यं भावितं शृङ्गवेरैः। तदनु कनकबीजैर्भावितं सप्तवारान् तदनुसितजयन्त्या भृङ्गराजैश्च सर्वम्॥ १४७॥ पुटितमुपरि शुष्कं काचकूप्यां तु क्षिप्तं पटहमुपरि पाच्यं वालुकायन्त्रकेऽस्य १४८॥ एलाजातीन्द्रचन्द्रैर्मृगमदसहितैः सोपणैः साश्वगन्धैस्तुल्यैर्वर्ध्यमानं प्रतिदिनमशितं माषकस्याथ शुद्ध्यै। ओजःपुष्टिविवर्द्धनोऽतिबलकृत्सर्वेन्द्रियानन्दनः सर्वातङ्कहरो रसायनवरः कामाग्निसन्दीपनः॥ १४९॥

एक-एक तोला शुद्ध पारा, गन्धक, हिंगुल और मैनशिल को एकत्र कर क्रमशः अदरख,

धतूरे के बीज, श्वेत जयंती और भाँगरे के यथासम्भव स्वरस या क्वाथ के साथ सात-सात बार भावना देकर सुखा लेवे, पश्चात् काँच की शीशी में भरकर बालुकायन्त्र द्वारा ६ दिन पर्यन्त आँच देकर पकावे ; फिर स्वाङ्गशीतल होने पर उतारकर शीशी से रस को निकालकर रख ले। इलायची, जायफल, कपूर, कस्तूरी, कालीमिर्च और असगन्ध सम भाग लेकर चूर्ण कर उसमें मिला ले। दो-दो रत्ती इस कामाग्नि-सन्दीपन रस को प्रतिदिन प्रातःकाल शौचादि-क्रिया से शुद्ध होकर सेवन करे। कामाग्नि-सन्दीपन रस ओज को पुष्ट करता तथा बलवर्धक है। सम्पूर्ण इन्द्रियों को आनन्द देता है तथा सम्पूर्ण रोगों को हरता है और रसायनों में श्रेष्ठ है ॥ १२७--१४० ॥

ध्वजभङ्ग में पथ्य।

शालि षष्टिक गोधूम मसूर चणकादयः नवनीतं च दुग्धं च सुरासीधुश्च वर्त्तकः ॥ १५० ॥ चटकः कुक्कुटश्चैव तित्तिरिर्हरिणस्तथाशशकच्छागयोरेषांपललानि मृदूनितु ॥ १५१ ॥ द्राक्षाखर्जूराम्रजम्बू दाडिमानां फलानि च पथ्यान्येतानि प्रोक्तानि ध्वजभङ्गगदे बुधैः ॥ १५२ ॥

इति भैषज्यरत्नावल्यां ध्वजभङ्गा-धिकारः समाप्तः।

---

शालि तथा साठी धान्य का चावल गेहूँ मसूर चना आदि मक्खन दूध शराब सुरा सीधु बतक गौरैया मुर्गा तीतर हरिण खरगोश बकरा इन का कोमल मांस दाख खजूर आम जामुन तथा अनार के फल इन सबों का सेवन ध्वजभंग रोग में पथ्य है। ॥ १५०--१५२ ॥

इति सरयूप्रसादत्रिपाठिविरचितायां भैषज्य-रत्नावल्या रत्नप्रभाभिधायां व्याख्यायां ध्वजभङ्गाधिकारः समाप्तः।

---

# अथ मुष्कवृद्धिब्रध्नाधिकारः।

वातिक वृद्धिचिकित्सा।

वातवृद्धौ पिबेत्स्निग्धं यथाप्राप्तविरेचनम्। सक्षीरं वा पिबेत्तैलं मासमेरण्ड-सम्भवम् ॥ १ ॥ पुनर्नवायास्तैलं वा तैलं नारायणं तथा। पाने वस्तौ तयोस्तैलं पेयं वा दशकाम्भसा ॥ २ ॥

वातिक अण्डवृद्धि में यथावश्यक स्निग्ध विरेचन देना चाहिए। एक मासपर्यन्त दुग्ध में मिश्रित कर एरण्डतैल का पाक या पुनर्नवा के क्वाथ और कल्क के साथ सिद्ध किये हुए तैल का पान अथवा नारायण तैल का पान करना चाहिए। एरण्ड के तैल की पिचकारी देना अथवा दशमूल के क्वाथ के साथ एरण्ड-तैल का पान करना चाहिए ॥ १-२ ॥

पैत्तिक और रक्तवृद्धिचिकित्सा।

चन्दनं मधुकं पद्मुशीरं नीलमुत्पलम्। क्षीरपिष्टैः प्रलेपः स्याद्दाहशोथरुजापहः ॥ ३ ॥

चन्दन, मुलेठी, पद्माख, खस और नील-कमल इनको दूध में पीसकर लेप करने से दाह, शोथ और पीड़ा शान्त होती है ॥ ३ ॥

रक्तजाण्डवृद्धिचिकित्सा।

पञ्चवल्कलकल्केन सघृतेन प्रलेपनम्। सर्वपित्तहरं कार्यं रक्तजे रक्तमोक्षणम् ॥४॥

बड़, गूलर, पीपर, पाकड़ और बेत इन पाँच वृक्षों की छाल को पीसकर घृत मिलाकर लेप करने से सब प्रकार के पैत्तिक वृद्धिरोग नष्ट होते हैं। रक्तज वृद्धि में रक्तमोक्षण कराना चाहिए ॥ ४ ॥

श्लैष्मिकवृद्धिचिकित्सा।

श्लेष्मवृद्धिमुष्णवीर्य्यैर्मूत्रपिष्टैः प्रलेपयेत्। पीतदारुकषायञ्च पिबेत् मूत्रेण संयुतम् ॥ ५ ॥

श्लैष्मिक वृद्धिरोग में वृहत्पञ्चमूल आदि उष्णवीर्य औषधियों को गोमूत्र में पीसकर प्रलेप करे तथा देवदारु के क्वाथ को गोमूत्र मिश्रित कर पान करे ॥ ५ ॥

मेदजवृद्धिचिकित्सा।

स्विन्नं मेदःसमुत्थञ्च लेपयेत् सुरसादिना। शिरोविरेकद्रव्यैर्वा सुखोष्णैर्मूत्रसंयुतैः ॥ ६ ॥

मेदोज वृद्धि में स्वेदन करने के पश्चात् तुलसी और पुनर्नवा आदि द्रव्यों को पीसकर लेप करे। इस रोग में गोमूत्र के साथ सेंधव, पीपरि और कालीमिर्च आदि शिरोविरेचक द्रव्यों को पीसकर कुछ उष्ण करके प्रलेप करने से विशेष लाभ होता है ॥ ६ ॥

अन्त्रवृद्धिचिकित्सा।

रास्नायष्ट्यमृतैरण्डबलागोक्षुरसाधितः। क्वाथोऽन्त्रवृद्धिं हन्त्याशु रुबुतैलेन मिश्रितः ॥ ७ ॥

रास्ना, मुलेठी, गिलोय, अरंड की जड़, खरेटी और गोखरू, इनके काढ़े में अरंड का तेल डाल कर पीने से अन्त्रवृद्धिरोग नष्ट होता है ॥ ७ ॥

भृष्टो रुबुकतैलेन कल्कः पथ्यासमुद्भवः। कृष्णासैन्धवसंयुक्तो वृद्धिरोगहरः परः ॥ ८ ॥

हरीतकीं पेषयित्वा पिप्पलीं सैन्धवञ्च दत्त्वा एरण्डतैलेन भृष्ट्वा खादयम्। अनुपानमुष्णोदकेन करणीयं योगोऽयं सप्ताहं सेव्यः। तन्त्रान्तरसंवादादिति भानुः।

हरीतकी को जल के साथ पीसकर उसमें पीपरि और सेंधानमक मिलाकर तथा रेंडी के तेल में भून कर उष्ण जल के साथ इस योग को एक सप्ताहपर्यंत सेवन करना चाहिए, क्योंकि तन्त्रान्तर में ऐसा ही लिखा है और भानुजी का भी ऐसा ही मत है ॥ ८ ॥

वृद्धिहरलेप।

लज्जालुगृध्रमलाभ्याञ्च लेपो वृद्धिहरः परः ॥ ९ ॥

छुईमुई और गिद्ध के मल का लेप करने से वृद्धिरोग दूर होता है ॥ ९ ॥

ब्रध्न के लक्षण।

अत्यभिष्यन्दिगुर्वामसेवनान्निचयंगतः। करोति ग्रन्थिवत् शोथं दोषो वंक्षणसन्धिषु। ज्वरशूलाङ्गदाहाढ्यं तं ब्रध्नमिति निर्दिशेत् ॥ १० ॥

अत्यन्त अभिष्यन्दि, गुरु और आम पदार्थ का सेवन करने से सञ्चित दोष वंक्षण और सन्धियों में ग्रन्थि के समान शोथ उत्पन्न करता है। इस शोथ के साथ ज्वर, शूल और अङ्गदाह भी होते हैं ॥ १० ॥

बिल्वादिचूर्ण।

मूलं बिल्वकपित्थयोररलुकस्याग्नेर्बृहत्योर्द्वयोः श्यामापूतिकरञ्जशिग्रु कतरोर्विश्वौषधारुष्करम्। कृष्णाग्रन्थिकचव्यपञ्चलवणक्षाराजमोदान्वितं पीतं काञ्जिककोष्णतोयमथितं चूर्णीकृतं ब्रध्नजित् ११

बेल, कैथ, अरलू, चीता दोनों कटेरी अर्थात् कटेरी, श्यामालता, करञ्ज और सहिजन इनके मूल, सोंठ, भिलावा, पीपरि, गठिवन, चव्य, पञ्चलवण, यवक्षार, और अजमोद इन सबको सम भाग लेकर चूर्ण कर ले। फिर इसको काँजी या किञ्चित् उष्ण जल में घोलकर पान करे। यह चूर्ण ब्रध्नरोग को जीतता है ॥ ११ ॥

ब्रध्नशूलहरलेप।

अजाक्षीरेण गोधूमकल्कं कुन्दुरुकस्य वा। प्रलेपनं सुखोष्णं स्याद्ब्रध्नशूलहरं परम् ॥ १२ ॥

बकरी के दूध के साथ पीसकर गेहूँ के कल्क का अथवा कुन्दरू के कल्क का सुखोष्ण प्रलेप ब्रध्न और शूल को हरता है ॥ १२ ॥

मृतमात्रे तु वै काके विशस्ते तु प्रवेशयेत् ब्रध्नं मुहूर्तं मेधावी तत्क्षणादरुजं भवेत् ॥ १३ ॥

बुद्धिमान् पुरुष एक काक ( कौआ ) को मारकर तत्काल उसके भीतर की आँतें निकाल कर उसमें ब्रध्न को एक मुहूर्तपर्यन्त प्रविष्ट रक्खे। ऐसा करने से तत्काल नीरोग हो जाता है ॥ १३ ॥

अजाज्यादि लेप।

अजाजीहपुषाकुष्ठगोधूमवदराणि च। काञ्जिकेन समं पिष्ट्वा कुर्याद् ब्रध्ने प्रलेपनम् ॥ १४ ॥

जीरा, हाऊबेर, कूट, गेहूँ और बेर को काँजी के साथ पीसकर ब्रध्न के ऊपर लेप करना चाहिए ॥ १४ ॥

वृहत्सैन्धवाद्यतैल।

सैन्धवं मदनं कुष्ठं शताह्वां निचुलं वचाम्। ह्रीवेरं मधुकं भार्गीं देवदारु सनागरम् ॥ १५ ॥ कट्फलं पौष्करं मेदाश्चविकां चित्रकं शटीम्। विडङ्गातिविषे श्यामां रेणुकां नीलिनीं स्थिराम् ॥ १६ ॥ बिल्वाजमोदे कृष्णाश्च दन्तीं रास्नां प्रपिष्य च। साध्यमेरण्डजं तैलं तैलं वा कफवातनुत ॥ १७ ॥ब्रध्नोदावर्तगुल्मार्शःप्लीहामेहाढ्यमारुतान्। आनाहमश्मरीञ्चैव हन्यात्तदनुवासनात् ॥ १८ ॥

सेंधानमक, मैनफल, कूट, सौंफ, बेंत, वच, सुगन्धवाला, मुलेठी, भारंगी, देवदारु, सोंठ कायफल, पुष्करमूल, मेदा, चव्य चीते की जड़, कचूर, वायविडंग, अतीस, श्यामालता ( सारिवा ), सँभालू के बीज, नील, शालपर्णी, बेल की छाल, अजमोद, छोटी पीपरि, दन्ती और रास्ना ( सब मिलाकर ६४ तोले ) को पीसकर कल्क बनावे। इस कल्क के साथ पाक के लिये जल ६ सेर ३२ तोले और एरण्ड तैल १२८ तोले लेकर तैल सिद्ध करे। यह तैल कफ और वात का नाशक है। मर्दन करने से यह तैल ब्रध्न, उदावर्त, गुल्म, अर्श, प्लीहा, प्रमेह और वातरोगों को नष्ट करता है। अनुवासनवस्ति द्वारा आमाढ्ययुक्त अश्मरी रोग को नष्ट करता है ॥ १५-१८ ॥

गन्धर्वहस्ततैल।

शतमेरण्डमूलस्य पलं शुण्ठ्यायवाढकम्। जलद्रोणे विपक्तव्यं यावत् पादावशेषितम् ॥ १९ ॥ तेन पादावशेषेण पयसा तत्समेन च। प्रस्थमेरण्डतैलस्य तन्मूलाच्च चतुःपलम् ॥ २० ॥ त्रिपलं शृङ्गवेरश्च गर्भं दत्त्वा विपाचयेत्। तत् पिबेत्प्रयतः शुद्धो नरः क्षीरान्नभुक् सदा। अन्त्रवृद्धिं जयत्याशु तैलं गन्धर्वहस्तकम् ॥ २१ ॥

एरण्ड की जड़ ५ सेर, सोंठ ५ सेर और यव ३ सेर १६ तोले लेकर २५ सेर ४८ तोले पानी में पकावे। जब ६ सेर ३२ तोले अवशिष्ट रह जावे, तब उस क्वाथ और ६ सेर ३२ तोले दूध के साथ १२८ तोले एरण्ड का तैल पकावे। इसमें पकाते समय १६ तोले एरण्डमूल और १२ तोले अदरख का कल्क डाले। वमन, विरेचनादि द्वारा शुद्ध होकर यत्नपूर्वक इस तैल का पान करे। दूध और भात का भोजन करे तो यह गन्धर्वहस्त तैल अन्त्रवृद्धि को तत्काल जीतता है ॥ १९-२१ ॥

शतपुष्पाद्यघृत।

शतपुष्पामृता दारु चन्दनं रजनीद्वयम्। जीरके द्वे वचा नागं त्रिफला गुग्गुलुत्रयम् ॥ २२ ॥ मांसी सकुष्ठपत्रैला रास्ना भृङ्गी च चित्रकम्। कृमिघ्नमश्वगन्धा च शैलेयं कटुरोहिणी ॥ २३ ॥ सैन्धवं तगरञ्चैव कुष्ठ-

जातीविसैः समैः। एतैश्च कार्षिकैः कल्कैर्घृतमस्थं विपाचयेत्॥ २४॥ हपुषुण्डितिकैरण्डबिल्वपत्रभवो रसः। कण्टकार्यास्तथा मस्थं क्षीरमस्थं विनिक्षिपेत्॥ २५॥ सिद्धमेतद्घृतं पीतमन्त्रवृद्धिं व्यपोहति। वातवृद्धिं पित्तवृद्धिं मेदोवृद्धिमथापि वा॥ २६ मूत्रवृद्धिं श्लीपदञ्च यकृत्प्लीहानमेव च। शतपुष्पाद्यमेतद्धि घृतं हन्ति न संशयः २७

सौंफ, गिलोय, देवदारु, सफेद चन्दन, हल्दी, दारुहल्दी, सफेद जीरा, स्याह जीरा, बच, नागकेसर, त्रिफला, गूगुल, दालचीनी, जटामासी, कूट, तेजपात, छोटी इलायची रास्ना, काकड़ासिंगी, चीता की जड़, वायबिडंग असगन्ध, शिलाजीत, कुटकी, सेंधानमक, तगर, कूट, जायफल, और भसींडा; ये सब एक-एक तोला लेकर कल्क बनावे। इस कल्क के साथ दो सेर घृत सिद्ध करे। इस घृत को सिद्ध करते समय चकुसा मुंडी, एरण्ड और बिल्वपत्र का एक-एक प्रस्थ (६४-६४ तोले) रस या क्वाथ, और कटेरी का क्वाथ ६४ तोले तथा ६४ तोले दुग्ध डालकर यथाविधि घृत को सिद्ध करे। पान करने से यह घृत अन्त्रवृद्धि को नष्ट करता है। वातवृद्धि, पित्तवृद्धि, मेदोवृद्धि, मूत्रवृद्धि, श्लीपद, यकृत और प्लीहा को निःसंदेह नष्ट करता है॥ २२-२७॥

कफवातजवृद्धि में हरीतकी का प्रयोग।

हरीतकीं मूत्रसिद्धां सतैलां लवणान्विताम्। प्रातः प्रातश्च सेवेत कफवातामयापहम्॥ २८॥

गोमूत्र-सिद्ध हरीतकी को तैल और लवण के साथ प्रातःकाल सेवन करे। यह कफ और वात के रोगों को नष्ट करती है॥ २८॥

वातवृद्धिनाशक तैल।

गुग्गुलं रुबुतैलं वा गोमूत्रेण पिबेन्नरः। वातवृद्धिं निहन्त्याशु चिरकालानुबन्धिनीम्॥ २९॥

गूगुल या एरण्डतैल को गोमूत्र के साथ पान करे तो यह योग चिरकालोत्पन्न वातवृद्धि को तत्काल नष्ट करता है॥ २९॥

वृद्धिरोगनाशक प्रलेप।

निर्पिष्टमारनालेन रूपिकामूलवल्कलम्। लेपो वृद्ध्यामयं हन्ति बद्धमूलमपि ध्रुवम्॥ ३०

श्वेत पुष्पवाले मदार के मूल के छिलके को काँजी के साथ पीसकर लेप करने से बद्धमूल वृद्धिरोग भी नष्ट हो जाता है॥ ३०॥

कुरण्डनाशक योग।

गव्यं घृतं सैन्धवसंप्रयुक्तं शम्बूकभाण्डे निहितं तदेव। सप्ताहमादित्यकरैर्विपक्वं हन्यात्कुरण्डं चिरजं प्रवृद्धम्॥ ३१॥

सेंधवयुक्त गोघृत को शंख के भाण्ड में रखकर ७ दिन पर्यन्त सूर्य की किरणों द्वारा परिपक्व करें। यह घृत चिरकालोत्पन्न प्रवृद्ध कुरण्ड रोग को विनष्ट करता है॥ ३१॥

अपर कुरण्डनाशक योग।

सैन्धवञ्च घृताभ्यक्तं ताम्रभाजनमातपे। मेषशृङ्ग्या घृष्टं तन्मलञ्च समाहरेत्॥ ३२॥ कुरण्डं म्रक्षयेत्तेन सनिर्विघ्नं दिवानिशम्। कुरण्डं तेन संलिप्तं नास्तीत्याह पुनर्वसुः॥ ३३॥

ताम्रभाजने घृतं सैन्धवं दत्त्वा रौद्रे तप्तं कृत्वा मेषलोमतुण्डिकया घृष्ट्वा मलग्रहं कृत्वा तेन म्रक्षयेत्।

ताम्रपात्र को घृत से चुपड़ करके उसमें सेंधानमक डालकर और धूप में गरम करके ऊन से घिसे। उससे जो मल निकले उसका लण्ड पर निरन्तर रातदिन लेप करने से कुरण्ड नष्ट हो जाता है। ऐसा पुनर्वसुजी कहते हैं॥ ३२-३३॥

गोमूत्रसिद्धां रुबुतैलभृष्टां हरीतकीं सैन्धवसम्प्रयुक्ताम् पिबेन्नरः कोष्णजलानुपानात् निहन्ति वृद्धिं चिरजां मरुद्धाम् ॥ ३४ ॥

हरीतकी को पहले गोमूत्र में भिगोकर स्वादं कर लो, पश्चात् रेंडी (अरण्डी) के तैल में भूनकर सेंधानमक के साथ खाकर कुछ उष्ण जल का पान करे। यह योग चिरकालोत्पन्न मरुद्‌ वृद्धिरोग को नष्ट करता है ॥ ३४ ॥

ऐन्द्रीमूलभवं चूर्णं रुबुतैलेन मर्दितम्। त्र्यहाद् गोपयसा, पीतं सर्ववृद्धिहरं परम्॥ वचासर्षपकल्केन लेपो वृद्धिविनाशनः ३५

इन्द्रायण के मूल के चूर्ण को एरण्ड के तैल के साथ घोटकर गोदुग्ध के साथ तीन दिन सेवन करें। यह योग सब प्रकार के वृद्धिरोग का नाशक है तथा वच और सरसों के कल्क का लेप करने से वृद्धिरोग नष्ट होता है ॥ ३५ ॥

कुरण्ड पर लेप।

बहुवारस्य बीजञ्च पिष्ट्वा तथार्द्रकैः सह। कुरण्डं नाशयेद्भद्रे लेपनान्नात्र संशयः ॥ ३६ ॥

हे भद्रे! बहुवार बीज (लसोड़ा) को अदरख के साथ पीसकर लेप करने से कुरण्ड अवश्य विनष्ट हो जाता है ॥ ३६ ॥

घृतैर्नीलोत्पलं मूलं पिष्ट्वा लिम्पेत्कुरण्डकम्। अथवा लेपनं कुर्याद् गृहमण्डूकशोणितैः ॥ ३७ ॥

नीलकमल की जड़ को पीसकर घी में मिलाकर कुरण्ड पर लेप करे। अथवा गृहमण्डूक (घर में रहनेवाले मेंढक) के रक्त का लेप करे तो कुरण्ड रोग शान्त हो ॥ ३७ ॥

भक्तोत्तरीय।

अभ्रकं गन्धकञ्चैव पिप्पलीलवणानि च। त्रिक्षारं त्रिफला चैव हरितालं मनःशिला ॥ ३८ ॥ पारदश्चाजमोदा च यमानी शतपुष्पिका। जीरकं हिङ्गु मेथी च चित्रकं चविका वचा ॥ ३९ ॥ दन्ती च त्रिवृता मुस्तं शिला च मृतलोहकम्। अञ्जनं निम्बबीजानि पटोलं दृढदारकम् ॥ ४० ॥ सर्वाणि पालमात्राणि श्लक्ष्णचूर्णानि कारयेत्। शतं कनकबीजानि शोधितानि प्रयोजयेत् ॥ ४१ ॥ एतदग्निविवृद्ध्यर्थमृषिभिः परिकीर्त्तितम्। श्लीपदान्यन्त्रवृद्धिश्च वातवृद्धिश्च दारुणाम् ॥ ४२ ॥ अरुचिचामवातञ्च शूलं वातसमुद्भवम्। गुल्मञ्चैवोदरव्याधीन्नाशयत्याशु तत्क्षणात्। भक्तोत्तरमिदं चूर्णमश्विभ्यां निर्मितं पुरा ॥ ४३ ॥

अभ्रकभस्म, गन्धक, पीपरि, पाँचोंनमक, यवक्षार, सज्जीखार, सोहागा, भुना, आँवला, हड़, बहेड़ा हरिताल, मैनशिल, शुद्ध पारा, अजमोद, अजवाइन, सौंफ, सफेद जीरा, हींग, मेथी, चीत की जड़, चव्य, वच, दन्ती, निसोथ, नागरमोथा, शिलाजीत, लोहभस्म, रसौत, नीम के बीज, पटोलपत्र और चिरायता ये सब एक-एक तोला, तथा धतूरे के बीज १०० ले। पारा और गन्धक की कज्जली करे फिर इन सबको एकत्र कर कूट पीस कर महीन चूर्ण बना ले। इसको जठराग्नि की वृद्धि के लिए ऋषियों ने कहा है। यह श्लीपद, अन्त्रवृद्धि, दारुण, वातवृद्धि, अरुचि, आमवात, शूल, वातजन्य शूल, गुल्म और उदर-व्याधियों को तत्काल नष्ट करता है। इस भक्तोत्तर चूर्ण को पहिले अश्विनीकुमारों ने बनाया था। (भोजनोत्तर इस चूर्ण का सेवन किया जाता है अतः इसका नाम भक्तोत्तर चूर्ण रक्खा गया है। इसकी मात्रा एक माशे से दो माशे तक है) ॥ ३८-४३ ॥

वातारिरस।

रसभागो भवेदेको गन्धको द्विगुणो

मतः । त्रिगुणा त्रिफला ग्राह्या चतुर्भागश्च चित्रकः ॥ ४४ ॥ गुग्गुलुः पञ्चभागः स्यादेरण्डतैलमर्दितः । क्षिप्त्वाऽत्र पूर्वकच्चूर्णं तेनैव सह मर्दयेत् ॥४५॥ गुटिकां कर्षमात्रान्तु भक्षयेत् प्रातरेव हि । नागरैरण्डमूलानां क्वाथं तदनुपाययेत् ॥ ४६ ॥ अभ्यज्यैरण्ड तैलेन स्वेदयेत् पृष्ठदेशकम् । विरेके तेन सञ्जाते स्निग्धमुष्णञ्च भोजयेत् ॥ ४७ ॥ वातारिसंज्ञको ह्येष रसो निर्वातसेवितः । अन्त्रवृद्धिं निहन्त्येव ब्रह्मचर्यपुरः सरः ॥ अनुपानं च तिलजमार्द्रकद्रवसंयुतम् ॥ ४८ ॥

इति भैषज्यरत्नावल्यां मुष्कवृद्धि-ब्रध्नाधिकारः समाप्तः ।

---

शुद्ध पारा एक भाग, गन्धक दो भाग, त्रिफला तीन भाग, चीते की जड़ चार भाग और गूगुल पाँच भाग ले । पहिले गूगुल को एरण्ड के तेल के साथ मर्दित कर उसमें पूर्वोक्त औषधियों का चूर्ण मिश्रित कर एरण्ड के तेल के साथ ही मर्दन करके एक-एक तोला की गोली बनाकर प्रतिदिन प्रातःकाल सेवन करे । इस औषध के सेवन करने के पश्चात् सोंठ और एरण्ड के मूल का क्वाथ पिला पीठ पर एरण्ड का तेल मलकर स्वेदन करे । इस औषधि के सेवन करने से विरेचन हो जाने के पश्चात् स्निग्ध और उष्ण भोजन करावे । वातारि नाम का यह रस है । इसका सेवन निर्वात स्थान में करना चाहिए । यह रस ब्रह्मचर्यपूर्वक सेवित होने पर अन्त्रवृद्धि रोग को विनष्ट करता है । अदरख के रस में मिश्रित तिल तैल इसका अनुपान है ॥ ४४-४८ ॥

### वृद्धिब्रध्नरोग में पथ्य

संशोधनं बस्तिरसृग्विमोचः स्वेदः प्रलेपोऽरुणशालयश्च । एरण्ड तैलं सुरभीजलञ्च धन्वामिषंशिग्रुफलं पटोलम् ॥ ४९ ॥ पुनर्नवा गोक्षुरकाग्निमन्थं ताम्बूल पथ्या रसना रसोनम् । वातिङ्गनं शृङ्गनकं मधूनि कौम्भं घृतं तप्तजलञ्च तक्रम् ॥ ५० ॥ अर्धेन्दुवद्वङ्क्षणयाश्च दाहो व्यत्यासतो बाहुशिराव्यधश्च । यथामयंशास्त्र विधिश्चवर्गः स्याद्वृद्धिब्रध्नवतामयिनां सुखाय ॥ ५१ ॥ अनभिष्यन्दिपानान्नं नातिशीताक्रिया तथा । वृद्धिरोगे हिताय स्याद्विपरीतं विवर्जयेत् ॥ ५२ ॥

वमन विरेचनादिक संशोधन बस्तिकर्म रक्तमोक्षण स्वेदन प्रलेप लालशालि चावल एरण्ड तैल गौमूत्र जाङ्गल देश के पशु पक्षियों का मांस सहजन की फलियों का शाक पटोलपत्र शाक, पुनर्नवा शाक, गोखरू, अरणी, पान, हरड़, रास्ना, लहसुन, बैंगन, गाजर, शहद १० साल से १०० साल तक का पुराना घी, गरम जल, मट्ठा, वंक्षण प्रदेश पर अर्धचन्द्राकृति दाह उलटे क्रम से बाहु की शिरा का वेधन अर्थात् दक्षिणाण्ड वृद्धि में बायें बाहु की शिरा का वेधन तथा शास्त्र धर्म के सब रोगानुसार से ब्रध्न और वृद्धिरोगियों के लिए पथ्य हैं । अभिष्यन्द ( क्लेद ) नहीं करनेवाले पदार्थों का पानी तथा भोजन करना एवं अधिक शीतरहित औषधियों के द्वारा क्रिया तथा अधिक शीतरहित आहार विहारादिक क्रियाएँ वृद्धिरोग में हितकर हैं । तथा इनके विपरीत को छोड़ देना चाहिये ।

### ब्रध्नवृद्धिरोग में अपथ्य

विरुद्धपानान्नमसात्म्यसेवा संक्षोभणं हस्ति हयादियानम् । आनूप मांसानि दधीनि माषादुग्धानि पिष्टान्न मुपोदिकाच । गुरूणि शुक्रोत्थित वेगरोधाः स्यु-

ब्रघ्न वृद्ध्यामयिनाम मिश्राः ॥ ५३ ॥ वेगाहितिं पृष्ट यानं व्यायामं मैथुनं तथा। अत्यशनं तथाध्वानमुपवासं परित्यजेत् ॥ ५४ ॥

विरुद्ध और प्रतिकूल आहार विहार क्रोध, हाथी घोड़े आदि की सवारी, आनूप मांस दही उड़द पीठी, पोई शाक, भारी पदार्थ, वीर्य वेग रोकना, व्यायाम, मैथुन, अति भोजन, अधिक मार्ग चलना, और उपवास वर्ज्य है।

इति सरयूप्रसादत्रिपाठिविरचितायां भैषज्यरत्नावल्या रत्नप्रभाभिधायां व्याख्यायां मुष्कवृद्धिब्रध्नाधिकारः समाप्तः।

---

## अथ श्लीपदाधिकारः।

### श्लीपद में क्रियाकर्म।

लङ्घनालेपनस्वेदरेचनै रक्तमोक्षणैः। प्रायः श्लेष्महरैरुष्णैः श्लीपदं समुपाचरेत् ॥ १ ॥

लङ्घनं प्रथमतः लेपस्वेदादयो नवे पुराणे च।

लंघन, प्रलेप, स्वेदन, रेचन रक्तमोक्षण द्वारा तथा अधिकतर कफनाशक उष्ण क्रियाओं के द्वारा श्लीपद की चिकित्सा करे। नये या पुराने श्लीपद रोग में पहले लंघन कराकर लेप और स्वेदन करना चाहिए ॥ १ ॥

### कणादिचूर्ण।

कणावचादारुपुनर्नवानां चूर्णं सबिल्वं समहद्दारम्। सम्मर्घ चैतस्य निहन्ति पञ्चः सकाञ्जिकश्लीपदमुग्रवेगम् ॥ २ ॥

पीपल, वच, देवदारु, सोंठी और बेल की छाल हरएक समभाग, सबके समान विधारा के बीज का चूर्ण। इन्हें इकट्ठा मिलाकर और पीसकर कांजी के साथ सेवन करने से श्लीपद रोग नष्ट होता है। मात्रा—१ रत्ती ॥ २ ॥

### मदनादि लेप।

मदनञ्च तथा सिक्थं सामुद्रलवणं तथा। महिषीनवनीतेन सन्तप्ते लेपनं हितम्। सप्ताहात् स्फुटितौ पादौ जायेते कमलोपमौ ॥ ३ ॥

मैनफल, मोम और सामुद्र नमक इन्हें इकट्ठा कर भैंस के दूध के मक्खन में मिलाकर दाहयुक्त फटे हुए पाँवों पर एक सप्ताह तक लगाने से पैर कमल के समान मृदु हो जाते हैं ॥ ३ ॥

धुस्तूरैरण्डनिर्गुण्डीवर्षाभूशिग्रु सर्षपैः॥ प्रलेपः श्लीपदं हन्ति चिरोत्थमपि दारुणम् ॥ ४ ॥

धतूरे के बीज, एरण्डमूल, सिंगुवारी, पुनर्नवा के मूल, सहिंजन की छाल और सरसों को पीसकर प्रलेप करने से चिरकाल का भी दारुण श्लीपदरोग नष्ट करता है ॥ ४ ॥

निष्पिष्टमारनालेन रूपिकामूलवल्कलम्। प्रलेपात् श्लीपदं हन्ति बद्धमूलमपि स्थिरम् ॥ ५ ॥

श्वेत मदार (आक) के मूल की छाल को कांजी के साथ पीसकर प्रलेप करे। यह प्रलेप बहुत प्राचीन बद्धमूल श्लीपद को भी नष्ट करता है ॥ ५ ॥

पिण्डारकतरुसम्भववन्दाकशिफा जयति सर्पिषा पीता श्लीपदमुग्रं नियतं वा सूत्रेण जङ्घायाम् ॥ ६ ॥

पिण्डारकार के वृक्ष में उत्पन्न हुए बाँदा के मूल को पीसकर घृत में मिश्रित कर पान करने तथा सूत में लपेटकर जाँघ में बाँधने से उग्र श्लीपदरोग शीघ्र विनष्ट हो जाता है ॥ ६ ॥

हितस्त्वालेपने नित्यं चित्रको देवदारु वा। सिद्धार्थशिग्रु कल्को वा सुखोष्णो मूत्रपेषितः ॥ ७ ॥

चीते की जड़ अथवा देवदारु का लेप करना,

अथवा सरसों और सहिंजन की छाल को गोमूत्र में पीसकर किये हुए कल्क को कुछ गरम करके लेप करना श्लीपदरोग में लाभदायक होता है ॥ ७ ॥

स्नेहस्वेदोपनाहांश्च श्लीपदेऽनिलजे भिषक्। कृत्वा गुल्फोपरिसिरां विध्येत् तच्चतुरङ्गुले ॥ ८ ॥

वातिक श्लीपदरोग में स्नेहन, स्वेदन और उपनाह करके गुल्फों के ऊपर चार अंगुल की दूरी पर शिरावेधन करे ॥ ८ ॥

गुल्फस्याधःशिरां विध्येत् श्लीपदे पित्तसम्भवे। पित्तघ्नीश्च क्रियां कुर्यात् पित्तार्बुदविसर्पवत् ॥ ९ ॥

पैत्तिक श्लीपदरोग में गुल्फ के नीचे की शिरावेधन करे तथा पित्त अर्बुद और विसर्परोग के समान पित्तनाशक क्रियाओं को करे ॥ ९ ॥

मञ्जिष्ठां मधुकं रास्नां सहिंस्रां सपुनर्नवाम्। पिष्ट्वारनालैर्लेपोऽयं पित्तश्लीपदशान्तये ॥ १० ॥

मंजीठ, मुलेठी, रासन, भटकटैया और गदहपुरैना (सांठी) को कांजी में पीसकर लेप करने से पैत्तिक श्लीपद की शान्ति होती है ॥ १० ॥

शिरां सुविदितां विध्येदङ्गुष्ठे श्लेष्मश्लीपदे। मधुयुक्तानि वा तीक्ष्णकषायाणि पिबेन्नरः ॥ ११ ॥

भलीभाँति समझकर कफजन्य श्लीपद में अंगुष्ठ के ऊपर की शिरा का वेधन करे अथवा मधु मिश्रितकर तीक्ष्ण औषधियों के क्वाथ का पान करे ॥ ११ ॥

पिबेत्सर्षपतैलेन श्लीपदानां निवृत्तये। पूतिकरञ्जच्छदजं रसं वापि यथाबलम् १२

करंजे की पत्तियों के रस में सरसों का तैल मिलाकर बलानुसार न्यूनाधिक परिमाण में पान करे। इससे श्लीपदरोग की शान्ति होती है ॥ १२ ॥

अनेनैव प्रकारेण पुत्रञ्जीवकजं रसम्। काञ्जिकेन पिबेच्चूर्णं मूत्रैर्वा वृद्धदारुजम् ॥ १३ ॥

पूर्वोक्त रीति से सरसों के तैल के साथ पुत्रजीवक ( जियापोता ) के रस का पान करे तथा विधारे के चूर्ण को कांजी के साथ अथवा गोमूत्र के साथ पान करे ॥ १३ ॥

रजनीं गुडसंयुक्तां गोमूत्रेण पिबेन्नरः। वर्षोत्थं श्लीपदं हन्ति दद्रुकुष्ठं विशेषतः ॥ १४ ॥

गुडूचीं मधुकं द्राक्षां मोरटं दाडिमैः

सह । पाककाले तु दातव्यं भेषजं गुड-संयुतम् ॥ तेन पाकं व्रजत्याशु न च वायुः प्रकुप्यति ॥ २८ ॥

पाककाल में गिलोय, मुलेठी, दाख, ईख की जड़ और अनारदाना, इनके चूर्ण अथवा क्वाथ को गुड़ मिला कर सेवन करना चाहिए। इसके सेवन से मसूरिकाएँ शीघ्र पक जाती हैं और वायु का कोप नहीं होता है ॥ २८ ॥

लिहेद्वा बादरञ्चूर्णं पाचनार्थं गुडेन तु । अनेनाशु विपच्यन्ते वातपित्तकफात्मिकाः ॥ २९ ॥

मसूरिकाओं को पकाने के लिए बेर के चूर्ण में गुड़ मिलाकर खाना चाहिए। इससे वात, पित्त और कफ की मसूरिकाएँ शीघ्र पक जाती हैं ॥ २९ ॥

शूलाध्मानपरीतस्य कम्पमानस्य वायुना । धन्वमांसरसाः शस्ता ईषत्सैन्धव-संयुताः ॥ ३० ॥

मसूरिका रोग में शूल, अफरा और कम्प आदि वायु के उपद्रवों से युक्त रोगी को मरुदेश उत्पन्न पशु पक्षियों के मांसरस में थोड़ा सा सेंधानमक मिलाकर देना हितकर है ॥ ३० ॥

पिबेदम्भस्तप्तशीतं भावितं खदिरा-शनैः । शौचे वारि प्रयुञ्जीत गायत्री-बहुवारजम् ॥ ३१ ॥

खैर और असना (विजयसार) से सिद्ध किया हुआ जल ठंडा करके पीना चाहिए। और शौच के लिये खैर और लिसोढ़ा से सिद्ध किया हुआ जल देना चाहिए ॥ ३१ ॥

जातीपत्रं समञ्जिष्ठं दार्वीपूगफलं शमी ॥ ३२ ॥ धात्रीफलं समधुकं क्वथितं मधुसंयुतम् । मुखरोगे कण्ठरोगे गण्डूषार्थं प्रशस्यते ॥ ३३ ॥

जावित्री, मजीठ, दारुहल्दी, सुपारी, शमी (छोंकर, जांट) की छाल, आँवला और मुलेठी, इनके क्वाथ में शहद मिलाकर कुल्ला करने से मुखरोग और कण्ठ रोग (मुख और कण्ठ की मसूरिका) शान्त होता है ॥ ३२-३३ ॥

अक्ष्णोः सेकं प्रशंसन्ति गवेधुमधु-काम्बुना । पञ्चवल्कलचूर्णेन क्लेदिनीमव-चूर्णयेत् ॥ ३४ ॥ भस्मना केचिदिच्छन्ति केचिद्गोमयरेणुना । कृमिपातभयाच्चापि धूपयेत् सरलादिभिः ॥ ३५ ॥

गवेधुक (गुलसकरी) और मुलेठी के काढ़े से आँखों को सेंकने से आँखों की मसूरिकाएँ शान्त होती हैं। जिन मसूरिकाओं से पानी निकलता हो उन पर पञ्चवल्कल (पीपल, गूलर, पाकरिया, बरगद और बेतस) का चूर्ण छिड़कना हितकर है। किसी किसी का मत है कि गोबर की राख छिड़कना चाहिए तथा किसी किसी का मत है कि गोबर का चूर्ण छिड़कना हितकर है। मसूरिका को कीड़ों से बचाने के लिए कृमिनाशक सरल धूप आदि की धूप देना हितकर है ॥ ३४-३५ ॥

वेदनादाहशान्त्यर्थं स्रुतानां च विशु-द्धये । सगुग्गुलुं वराक्वाथं युञ्ज्याद्वा खदिराष्टकम् ॥ ३६ ॥

पीड़ा और दाह की शान्ति तथा जिन मसूरिकाओं से पीब बह गई हो उनकी शुद्धि के लिए गुग्गुलयुक्त त्रिफला का क्वाथ अथवा खदि-राष्टक का क्वाथ पीना चाहिए ॥ ३६ ॥

कृष्णाभयारजो लिह्यात् मधुना कण्ठ-शुद्धये । तथाष्टाङ्गावलेहश्च कवलश्चार्द्र-कादिभिः ॥ ३७ ॥

कण्ठ की शुद्धि के लिए पीपल और हड़ के चूर्ण को शहद के साथ चाटना चाहिए। अथवा अष्टाङ्ग अवलेह का चाटना और अदरख आदि का कवल धारण करना हितकर है ॥ ३७ ॥

पञ्चतिक्तं प्रयुञ्जीत पानाभ्यञ्जनभो-जनैः । कुर्याद् व्रणविधानं च तैलादीन् वर्जयेच्चिरम् ॥ ३८ ॥

पीने, खाने और मालिश करने के लिए पञ्चतिक्त कषाय देना चाहिए। अथवा व्रण की सी चिकित्सा करनी चाहिए और बहुत दिनों तक तैल आदि मर्दन कर देना चाहिए ॥ ३८ ॥

घण्टाकर्णं शिवं गौरीं विष्णुं विघ्नं च पूजयेत् । आचरेज्जपहोमादीन् व्रतं रोगहरं तथा ॥ ३९ ॥ अगदानि विषघ्नानि रत्नानि विविधानि च । धारयेद्वाचापि वैनतेयस्य संहिताम् ॥ ४० ॥

घण्टाकर्ण शिव, पार्वती और विष्णुजी का पूजन तथा जप और होम एवं शीतलानाशक व्रत करना चाहिए। और विषनाशक ओषधि तथा अनेक प्रकार के रत्न धारण करना चाहिए। एवं गरुडपुराण का पाठ कराना चाहिए ॥ ३९—४० ॥

दुष्टव्रणासु तास्त्रेण जलौकाभिर्हरेदसृक् । व्रणशोथहरं योगमाचरेत् तत्प्रशान्तये ॥ ४१ ॥

यदि फुन्सियाँ खराब हो जायँ तो जोंक लगाकर खून निकलवाना चाहिए और उनकी शान्ति के लिए व्रण और सूजन को हरनेवाले प्रयोग करने चाहिए ॥ ४१ ॥

विषघ्नैः सिद्धमन्त्रैश्च ममृज्यात्तु पुनः पुनः । भक्त्या पठेत्पाठयेद्वा शीतलायाः स्तवं शुभम् ॥ ४२ ॥

विषनाशक सिद्ध मन्त्रों से बार-बार मार्जन (झाड़-फूँक) करना चाहिए और शीतला के स्तोत्र का भक्ति से पाठ करना या कराना चाहिए ॥ ४२ ॥

### दुर्लभ रस।

अथ शुद्धस्य सूतस्य मूर्च्छितस्य मृतस्य च । त्रिवला पिप्पली धात्री रुद्राक्ष-घृतमाक्षिकैः ॥ ४३ ॥ मर्दनं कारयेत् खल्ले गुञ्जामानां वटीं चरेत् । पापरोगान्तको योगः पृथिव्यामेव दुर्लभः ॥ ४४ ॥

रससिन्दूर, पारा की भस्म, खरेटी, सहदेई, पीपल, आँवला, रुद्राक्ष, घी और शहद इन्हें एकत्र कर घोटे और एक एक रत्ती की गोलियाँ बनावे। यह दुर्लभ रस मसूरिका रोग को नष्ट करता है ॥ ४३-४४ ॥

### मसूरिका में पथ्य।

पूर्वं लङ्घनवान्तिरेचनसिरावेधाः शशाङ्कोज्ज्वला जीर्णाः षष्टिकशालयोऽपि चणका मुद्गा मसूरा यवाः ।

---

१ अथ शीतलास्तोत्रम् । स्कन्द उवाच । भगवन् देवदेवेश शीतलायाः स्तवं शुभम् । वक्तुमर्हस्यशेषेण विस्फोटकभयापहम् ॥

ईश्वर उवाच ।

वन्देऽहं शीतलां देवीं रासभस्थां दिगम्बराम् । यामासाद्य निवर्तेत विस्फोटकभयं महत् ॥ शीतले शीतले चेति यो ब्रूयाद्दाहपीडितः । विस्फोटकभयं घोरं क्षिप्रं तस्य प्रणश्यति ॥ यस्त्वामुदकमध्ये तु ध्यात्वा सम्पूजयेन्नरः । विस्फोटकभयं घोरं कुले तस्य न जायते ॥ शीतले ज्वरदग्धस्य पूतिगन्धगतस्य च । प्रणष्टचक्षुषः पुंसस्त्वामाहुर्जीवनौषधम् ॥ नमामि शीतलां देवीं रासभस्थां दिगम्बराम् । मार्जनीकलशोपेतां सूर्पालंकृतमस्तकाम् ॥ अस्य श्रीशीतलास्तोत्रस्य महादेव ऋषिरनुष्टुप् छन्दः । शीतला देवता शीतलोपद्रवशान्त्यर्थं जपे विनियोगः ॥ शीतले तनुजान् रोगान् नृणां हरसि दुस्तरान् । विस्फोटकविशीर्णानां त्वमेकामृतवर्षिणी ॥ गलगण्डग्रहा रोगा ये चान्ये दारुणा नृणाम् । त्वदनुध्यानमात्रेण शीतले यान्ति ते क्षयम् ॥ न मन्त्रं नौषधं किञ्चित् पापरोगस्य विद्यते । त्वमेका शीतले धात्रि नान्यां पश्यामि देवताम् ॥ मृणालतन्तुसदृशीं नाभिहृन्मध्यसंस्थिताम् । यस्त्वां सञ्चिन्तयेद्देवि तस्य मृत्युर्न जायते ॥ अष्टकं शीतलादेव्या यः पठेन्मानवः सदा । विस्फोटकभयं घोरं कुले तस्य न जायते ॥ श्रोतव्यं पठितव्यं च श्रद्धाभक्तिसमन्वितैः । उपसर्गविनाशाय परं स्वस्त्ययनं महत् ॥ शीतलाष्टकमेतद्धि न देयं यस्य कस्यचित् । किन्तु तस्मै प्रदातव्यं भक्तिश्रद्धान्वितो हि यः ॥

सर्वेऽपि प्रतुदाः कपोतचटकादास्त्वृह-क्रौञ्चादयो जीवञ्जीवशुकादयोऽपि कुलकं काठिल्लमापाढकम् ॥ ४५ ॥ इत्थं सर्वदशाविभागविहितं पथ्यं यथादोषतः संयुक्तं मुदमातनोति नितरां नृणां मसूरीगदे ॥ ४६ ॥

मसूरिका रोग में पहिले लङ्घन, वमन, विरेचन और शिरावेध करना चाहिए। चन्द्र के समान सफेद परन्तु पुराने साठी एवं शालि चावल, चने, मूँग, मसूर, जौ, सम्पूर्ण प्रतुद पक्षी, कबूतर, चिड़िया, जलकाक, क्रौञ्च आदि चकोर एवं तोता आदि का मांस, परवल, सांठी, आषाढफल ( ककड़ी-खीरा आदि ) इन्हें रोगी की अवस्था के अनुसार विभक्त करके दोषानुसार पथ्य देने से स्वास्थ्य लाभ होता है ॥ ४५—४६ ॥

मसूरिका में अपथ्य।

रक्तं स्वेदं श्रमं तैलं गुर्वन्नक्रोधमातपम्। दुष्टाम्बुदुष्टपवने विरुद्धान्यशनानि च ॥ ४७ ॥ निष्पावमालुकं शाकं लवणं विषमाशनम्। कट्वम्लं वेगरोधं च मसूरीगदवांस्त्यजेत् ॥ ४८ ॥

इति भैषज्यरत्नावल्यां मसूरिकाधिकारः समाप्तः।

---

स्त्रीसंभोग, स्वेदन कर्म ( पसीना लानेवाले कार्य ), थकावट पैदा करनेवाले कार्य, तैल की मालिश, भारी अन्न, क्रोध, धूप में बैठना, दुष्ट जल, दुष्ट पवन, विरुद्धभोजन, चौला ( लोबिया ), आलू, नमक, विषम भोजन, कटु-खट्टे पदार्थ, मलमूत्र आदि वेगों का रोकना ; इन सबको त्याग देना चाहिए ॥ ४७-४८ ॥

इति श्रीविद्योतिनीभाषाटीकायां भैषज्यरत्नावल्यां मसूरिकाधिकारः समाप्तः।

---

# अथ रोमान्तिकाधिकारः

उच्चैस्तरे प्रशस्ते च रोमान्तीगदपीडितः। गृहेऽनार्द्रे वसेन्नित्यं गुरूष्णाङ्गसनावृतः ॥ १ ॥

रोमान्तिका[1] ( क्षुद्रमसूरिका ) रोग से पीड़ित रोगी को अच्छे, ऊँचे और सीलनरहित गृह में भारी और गरम वस्त्र ओढ़कर नित्य निवास करना चाहिए ॥ १ ॥

शीतवायुं शीततोयं सन्तापं वह्निसूर्ययोः। त्यजेत्स्त्रियं दिवानिद्रामध्वानं निशि जागरम् ॥ सुखोष्णेनाम्बुना स्वेदो रोमान्तिज्वरहृन्मतः ॥ २ ॥

शीतल वायु, शीतल जल, अग्नि तापना और सूर्य का धूप, स्त्रीसंग, दिन का सोना, मार्ग चलना और रात्रिजागरण रोमान्तिक रोगी को त्याग देना चाहिए। सुखोष्ण ( सुहाते हुए ) जल से स्वेदन करना रोमान्तिकाजन्य ज्वर को हरण करता है ॥ २ ॥

मसूर्यां ये च कथिता इह क्वाथादयोऽपि ते। प्रयुज्यमाना गदिनं सुस्थीकुर्वन्ति सत्वरम् ॥ यथातथं प्रतीकार्या ज्वरकासादयश्च ते ॥ ३ ॥

मसूरिका रोग में कहे हुए क्वाथ आदिक रोमान्तिका रोग में देने से भी रोगी को शीघ्र ही स्वस्थता मिलती है। रोमान्तिका के उपद्रवरूप ज्वर, कास आदि की भी यथायोग्य चिकित्सा करनी चाहिए ॥ ३ ॥

---

[1] यह रोग शीतला का ही भेद है। इसमें ज्वर होकर बालों के छिद्र के तुल्य छोटी, छोटी-छोटी, लालवर्ण की शीतला की फुन्सियाँ हो जाती हैं तथा खाँसी और अरुचि हो जाती है। यथा—"रोमकूपोन्नतिसमा रागिण्यः कफपित्तजाः। कासारोचकसंयुक्ता रोमान्त्यो ज्वरपूर्विकाः ॥"

इन्दुकला वटिका ।

शिलाजत्वयसी हेम संमर्द्यार्जकवारिणा । गुञ्जामात्रा वटीः कृत्वा कुर्याच्छायाविशोषिताः ॥ ४ ॥ मसूरिकायां विस्फोटे ज्वरे लोहितसंज्ञके । एकैकां दापयेदासां सर्वव्रणगदेषु च ॥ ५ ॥

शुद्ध शिलाजीत, लोहभस्म और सुवर्णभस्म ; इन तीनों को समभाग ले तुलसी के रस में घोटकर एक-एक रत्ती की गोलियाँ बना ले और छाया में सुखाकर मसूरिका ( शीतला ), विस्फोटक, लोहितज्वर ( लालबुखार ) और सब प्रकार के व्रण रोगों में इसकी एक-एक गोली सेवन करना चाहिए ॥ ४–५ ॥

ऊषणादि चूर्ण

ऊषणं पिप्पलीमूलं कुष्ठं वारणपिप्पलीम् । मुस्तकंमधुकं मूर्वा भार्गी मोचरसं शुभाम् ॥६॥ यवजातिविषा वासा गोक्षुरं बृहतीद्वयम् । सञ्चूर्ण्य समभागानि मापमानेन योजयेत् ॥ ७ ॥ ऊषणाद्यमिदं चूर्णं विस्फोटं लोहितज्वरम् । रोमान्तिका ज्वरं जीर्णंहन्त्याद्यापि मसूरिकाम् ॥ ८ ॥

कालीमिर्च, पिपरामूल, कूट, गजपीपरि, नागरमोथा, मुलेठी, मूर्वा, भारंगी, मोचरस, वंशलोचन, जवाखार, अतीस, अड़ूसा की छाल, गोखुरू, बड़ी कटेरी और छोटी कटेरी ; इनको समभाग एकत्र कर चूर्ण बनावे । मात्रा—१ माशा । सेवन करने से यह ऊषणाद्य चूर्ण विस्फोटक, लोहितज्वर, रोमान्तिका, जीर्णज्वर और मसूरिका रोग को नष्ट करता है ॥ ६–८ ॥

सर्वतोभद्र रस ।

सिन्दूरमभ्रं रजतं च हेम समेन भागेन मनःशिलां च । द्विशस्तु वांशीं निखिलेन तुल्यं संमर्दयेद् गुग्गुलुकं प्रयत्नात् ॥ ९ ॥ ततस्तु गुञ्जाप्रमितां विधाय वटीं प्रयुञ्जीत यथानुपानम् । यं सर्वतोभद्ररसो न हन्ति न सोऽस्ति रोगः खलु देहिदेहे ॥ १० ॥

रससिन्दूर, अभ्रकभस्म, रजतभस्म, स्वर्णभस्म और मैनशिल ; प्रत्येक एक एक भाग तथा वंशलोचन २ भाग और सबके बराबर शुद्ध गूगुल; इन सबको एकत्र घोटकर एक एक माशा की गोलियाँ बनावे । दोषानुसार अनुपान के साथ सेवन करने से मनुष्य के शरीर में ऐसा कोई रोग नहीं है, जिसको यह सर्वतोभद्र रस नष्ट न कर दे ॥ ९–१० ॥

एलाद्यरिष्ट ।

पञ्चाशत्पलमेलाया वासायाः पलविंशतिम् । मञ्जिष्ठां कुटजं दन्ती गुडूचीं रजनीद्वयम् ॥ ११ ॥ रास्नामुशीरं मधुकं शिरीषं खदिरार्जुनौ । भूनिम्बनिम्बचक्रीश्च कुष्ठं मधुरिकां तथा ॥ १२ ॥ गृहीत्वा दिक्पलोन्मित्या जलद्रोणाष्टके पचेत् । द्रोणशेषे कषाये च पूते शीते विनिक्षिपेत् ॥ १३ ॥ धातक्याः षोडशपलं माक्षिकस्य तुलात्रयम् । चातुर्जातं त्रिकटुकं चन्दनं रक्तचन्दनम् ॥ १४ ॥ मांसीं मुरां मुस्तकं च शैलेयं शारिवाद्वयम् । पलप्रमाणतश्चात्र क्षिप्त्वा मासं निधापयेत् ॥ १५ ॥ एलाद्यरिष्टो हन्त्येष विसर्पांश्चमसूरिकाम् । रोमान्तिकां शीतपित्तं विस्फोटं विषमज्वरम् ॥ १६ ॥ नाडीव्रणं व्रणं दुष्टं कासं श्वासं च दारुणम् । भगन्दरोपदंशौ च प्रमेहपिडिकास्तथा ॥ १७ ॥

इति भैषज्यरत्नावल्यां रोमान्तिकाधिकारः समाप्तः ।

---

छोटी इलायची ६।। सेर, अड़ूसा की छाल २। सेर, मँजीठ, कुरैया ( कुड़ा की छाल ),

जमालगोटे की जड़, गिलोय, हल्दी, दारुहल्दी, रास्ना, खस, मुलेठी, सिरस की छाल, कत्था, अर्जुन की छाल, चिरायता, नीम की छाल, चीत की जड़, कूट और सौंफ ; प्रत्येक आठ-आठ छटाँक। क्वाथ के लिए जल २ मन २२ सेर ३२ तोले। अवशिष्ट जल २५ सेर ३८ तोले। इसको छानकर ठंडा कर ले और धाय के फूल ६४ तोले, शहद १६ सेर, चातुर्जात (छोटी इलायची, दालचीनी, तेजपात, नागकेशर), त्रिकटु (सोंठ, मिर्च, पीपरि) चन्दन, लाल चन्दन, जटामांसी, मुरामांसी, नागरमोथा, मारफरीला, अनन्तमूल और कासीशादिका ; प्रत्येक चार-चार तोले उसमें डालकर एक महीने तक मिट्टी के पात्र में बन्द करके रक्खे। पश्चात् निकालकर छान ले। मात्रा -१ तोले से २ तोले तक। यह एलाद्यरिष्ट विसर्प, मसूरिका, रोमान्तिका, शीतपित्त, विस्फोटक, विषमज्वर, नासूर, दुष्ट व्रण, खाँसी कठिनतर श्वास, भगन्दर, उपदंश (गरमी) और प्रमेह-पिडिकाओं को नष्ट करता है ॥ ११—१७ ॥

इति श्रीसरयूप्रसादत्रिपाठिविरचितायां भैषज्य-
रत्नावल्या रत्नप्रभाभिधायां व्याख्यायां
रोमान्तिकाधिकारः समाप्तः।

---

## अथ वातरक्ताधिकारः।

वातरक्त की संप्राप्ति।

वायुः प्रवृद्धो वृद्धेन रक्तेनावरितः पथि। क्रुद्धः सन्दूषयेद्रक्तं तज्ज्ञेयं वातशोणितम् ॥ १ ॥

बढ़े हुए रक्त द्वारा जब बढ़ा हुआ वायु मार्ग में रोक दिया जाता है तो वह वायु कुपित होकर रक्त को दूषित कर देता है तब उसको वातरक्त कहते हैं ॥ १ ॥

वातरक्त के दो भेद।

उत्तानमथ गम्भीरं द्विविधं वातशोणितम्। त्वङ्मांसाश्रयमुत्तानं गम्भीरं तूत्तराश्रयम् ॥ २ ॥

वातरक्त के दो भेद हैं। एक उत्तान और दूसरा गम्भीर। त्वचा और मांस के आश्रय उत्तान और शरीर के भीतर गम्भीर रहता है ॥ २ ॥

वातरक्तशमनविधि।

बाह्यं लेपाभ्यङ्गसेकोपनाहैर्वातशोणितम्। विरेकास्थापनस्नेहपानैर्गम्भीरमाचरेत् ॥ द्वयोर्मुञ्चेदसृक् शृङ्गसूच्यलाबुजलौकसा ॥ ३ ॥

बाह्य वातरक्त को प्रलेप, अभ्यङ्ग, सेंक, उपनाह (पुलटिस Poultice) आदि द्वारा तथा गम्भीर वातरक्त को विरेचन, आस्थापन स्नेहपान आदि क्रियाओं द्वारा शान्त करना चाहिए। दोषानुसार बाह्य तथा आभ्यन्तर वातरक्त में सींगी, सूची (सुई, इन्जेक्शन), अलाबु (तुम्बी) तथा जोंक द्वारा दुष्ट रक्त को निकालना चाहिए ॥ ३ ॥

शोधिस्तकषायं तु पाययेन्मधुना सह। वातरक्तं जयत्याशु त्रिदोषमपि दारुणम् ॥ ४ ॥

पीपल की छाल के क्वाथ में शहद डालकर पीने से कष्टदायक एवं त्रिदोषज वातरक्त भी शीघ्र नष्ट होता है ॥ ४ ॥

घृतेन वातं सगुडा विबन्धं पित्तं सिताढ्या मधुना कफञ्च। वातासृगुग्रं रुबुतैल मिश्रा शुण्ठ्यामवातं शमयेद् गुडूची ॥ ५ ॥

गिलोय को घृत के साथ सेवन करने से वातरोग, गुड़ के साथ सेवन करने से मलबन्ध, खाँड के साथ पित्तरोग, शहद के साथ कफज रोग, अण्डी के तेल के साथ कष्टदायक वातरक्त तथा सोंठ के साथ गिलोय का सेवन करने से आमवात नष्ट होता है ॥ ५ ॥

लोढरा पुण्डतिका चूर्णं मधुसर्पिः समायुतम्। छिन्नाकाथं पिबन् हन्ति वातरक्तं सुदुस्तरम् ॥ ६ ॥

गोरखमुण्डी के चूर्ण को शहद और घी के साथ चाटकर तत्पश्चात् गिलोय का क्वाथ पीने से कठिन वातरक्त भी नष्ट होता है ॥ ६ ॥

### तिलप्रलेप।

लेपे पिष्टास्तिलास्तद्वद् भ्रष्टाः पयसि निर्वृताः ॥ ७ ॥

वातरक्त रोग में भुने हुए तिलों को दूध में पीसकर लेप करना चाहिए ॥ ७ ॥

### मञ्जिष्ठादि क्वाथ।

मंजिष्ठा त्रिफला निम्बं वचा कटुकरोहिणी। वत्सादनी दारुनिशा कषायो वातरक्तनुद् ॥ ८ ॥ अन्यत्रायं नवकार्षिक इति नाम्ना ख्यातः।

मँजीठ, त्रिफला, नीम की छाल, बच, कुटकी, गिलोय, और दारुहल्दी मिलाकर २ तोले। क्वाथ के लिये जल ३२ तोले, बचा हुआ क्वाथ ८ तोले। यह क्वाथ वातरक्त को नष्ट करता है। अन्य ग्रन्थों में इसका नाम नवकार्षिक है। नवकार्षिक में पाँच रत्ती का मासा मानकर यह नौ चीजें अलग-अलग एक एक तोला भर ली जाती हैं। बाद में आठगुने जल में क्वाथ कर मात्रानुसार पिलाया जाता है, शेष छोड़ दिया जाता है। इसीलिये चक्रदत्त में लिखा है कि "चतुर्भिकषायेण कार्योऽयं नवकार्षिकः। किन्त्वयं साधिते क्वाथे योग्या मात्रा प्रदीयते।" परन्तु आजकल इस प्रकार उपयोग नहीं किया जाता। उपयोग पूर्वोक्त विधि से ही है। यह क्वाथ वातरक्त के अतिरिक्त कुष्ठ, पामा, रक्तमण्डल तथा कपालकुष्ठ आदि में भी हितकारक है ॥ ८ ॥

### एरण्डादि क्वाथ।

गन्धर्वहस्तरपगोक्षुरकामृताभिः मूर्वैर्येलेक्षुरकयोश्च पचेत्कषायम्। वातासृगाशु विनिहन्ति चिरप्ररूढमाजानुगं स्फुटितमूर्ध्वगतं तु पीतम् ॥ ९ ॥

अण्डी की जड़, अड़ूसे की जड़, गोखरू, गिलोय, खरैटी की जड़ और तालमखाने की जड़, इनका क्वाथ शीघ्र ही पुराने जानुपर्यन्त स्फुटित एवं ऊर्ध्वगत वातरक्त को नष्ट करता है ॥ ९ ॥

### एरण्डबीजादि प्रलेप।

एरण्डबीजममृतां शताह्वां जीरकं बलाम्। छागेन पयसा पिष्ट्वा लेपयेद्रक्तविप्लुक् ॥ १० ॥

अण्डी के बीज, गिलोय, सोया, जीरा तथा खरैटी को बकरी के दूध में पीसकर बराबर लेप देना चाहिए ॥ १० ॥

### रास्नादि प्रलेप।

रास्नां गुडूचीं मधुकं बलाञ्च पयसा सह। पिष्ट्वा प्रलेपयेत्तेन वातरक्तं प्रशाम्यति ॥ ११ ॥

रास्ना, गिलोय, मुलहठी, खरेटी, इनको बराबर मात्रा में लेकर दूध में पीस लेप करने से वातरक्त नष्ट होता है ॥ ११ ॥

### गृहधूमादि प्रलेप।

गृहधूमो वचा कुष्ठं शताह्वा रजनीद्वयम्। प्रलेपः शूलनुद् वातरक्ते वातकफोत्तरे ॥ १२ ॥

गृहधूम, बच, कूठ, सोया, हल्दी, दारुहल्दी इनका लेप करने से वातकफज वातरक्तशूल नष्ट होता है ॥ १२ ॥

### शतावरी घृत।

शतावरीकल्कगर्भं रसं तस्याश्चतुर्गुणे। क्षीरतुल्यं घृतं पक्वं वातशोणितनाशनम् ॥ १३ ॥

गोघृत ४ सेर, शतावर का रस १६ सेर, गौ का दूध ४ सेर। कल्क के लिये शतावर १ सेर। इस घृत को विधिपूर्वक पका कर सेवन कराने से वातरक्त नष्ट होता है। मात्रा—आधा तोला से १ तोला तक ॥ १३ ॥

### गुडूची घृत।

गुडूचीक्वाथकल्काभ्यां सपयस्कं घृतं

घृतम् । हन्ति वातं तथा रक्तं कुष्ठं जयति दुस्तरम् ॥ १४ ॥

गोघृत ४ सेर । गिलोय का क्वाथ अथवा रस १६ सेर । दूध ४ सेर, कल्क के लिये गिलोय १ सेर । इस घृत के सेवन से वातरक्त तथा कुष्ठरोग नष्ट होता है । मात्रा—½ तोला से १ तोला तक ॥ १४ ॥

### अमृताद्य घृत ।

अमृता मधुकं द्राक्षा त्रिफला नागरं बला । वासारग्वधवृक्षीरदेवदारु त्रिकण्टकम् ॥ १५ ॥ कटुका सवरी कृष्णा काश्मर्यस्य फलानि च । रास्ना क्षुरकगन्धर्ववृद्धदारघनोत्पलैः ॥ १६ ॥ कल्कैरेभिः समैः कृत्वा सर्पिः प्रस्थं विपाचयेत् । धात्रीरससमं दत्त्वा वारि त्रिगुणसंयुतम् ॥ १७ ॥ सम्यक् सिद्धन्तु विज्ञाय भोज्यपाने प्रशस्यते । बहुदोषान्वितं वातं रक्तेन सह मूर्च्छितम् ॥ १८ ॥ उत्तानञ्चापि गम्भीरं त्रिकजङ्घोरुजानुजम् । क्रोष्टुशीर्षे महाशूले चामवाते सुदारुणे ॥ १९ ॥ वातरोगोपसृष्टस्य वेदनाश्चापि दुस्तराम् । मूत्रकृच्छ्रमुदावर्त्तं प्रमेहं विषमज्वरम् ॥ २० ॥ एतान् सर्वान्निहन्त्याशु वातपित्तकफोद्भवान् । सर्वकालोपयोगेन वर्णायुर्बलवर्द्धनम् ॥ अश्विभ्यां निर्मितं श्रेष्ठं घृतमेतदनुत्तमम् २२

घी १२८ तोले, आँवले का रस १२८ तोले, जल ६ सेर १२ तोले । कल्क के लिये गिलोय, मुलहठी, दाख, त्रिफला ( प्रत्येक अलग ), सोंठ खरेटी की जड़, अडूसे की छाल, अमलतास, सफेद सरेंठी, देवदारु, गोखरू, कुटकी, शतावर, पीपल, गम्भारीफल, रास्ना, तालमखाना, पाठी की जड़, विधारा की जड़, मोथा, नील कमल सब मिलाकर १४ तोले । विधिपूर्वक घृत पकाकर रोगी को सेवन करावे । मात्रा—आधा तोला । यह घृत अत्यन्त दुष्ट एवं त्रिकसन्धि, टखना, ऊरु तथा जानुपर्यन्त प्रवृद्ध उत्तान तथा गम्भीर वातरक्त को नष्ट करता है । यह घृत क्रोष्टुशीर्ष शूल, दारुण आमवात, वातव्याधि, अत्यन्त वेदना, मूत्रकृच्छ्र, उदावर्त, प्रमेह, विषमज्वर आदि वात, पित्तज तथा कफरोगों में अत्यन्त हितकारक है । इस घृत के निरन्तर उपयोग से वर्ण, आयु एवं बल की वृद्धि होती है । अश्विनीकुमारों ने इस घृत का निर्माण किया था ॥ १५-२२ ॥

### वातरक्त में पथ्य ।

आढकयवचणका मुद्गा मसूराः समकुष्ठकाः । यूषार्थे बहुसर्पिष्काः प्रशस्ता वातशोणिते ॥ २३ ॥ पुराणा यवगोधूमनीवाराः शालिषष्टिकाः । भोजनार्थे हिता गव्यमाहिषाजपयो हितम् ॥ २४ ॥

अरहर, चना मूँग, मसूर और मोथी ( मोठ ); इनके यूष में बहुत सा घृत मिलाकर वातरक्त में देना बहुत उत्तम है । तथा पुराने जौ, गेहूँ, नीवार, शालि चावल और साँठी चावल भोजन के लिए और गौ, भैंस और बकरी का दूध पीने के लिए हितकर है ॥ २३, २४ ॥

### हड़ का प्रयोग ।

हरीतकीः प्राश्य सम गुडेन एकाऽथवा द्वे च ततो गुडूच्याः । क्वाथोऽनुपीतः शमयत्यवश्य मभिप्रमाजानुजवातरक्तम् ॥ २५ ॥

एक या दो हरड़ें गुड़ के साथ खाकर पीछे गिलोय का क्वाथ पीने से घुटनों तक पैदा हुआ वातरक्त अवश्य ही शान्त हो जाता है ॥ २५ ॥

### पटोलादि क्वाथ ।

पटोलकटुकाभीरुत्रिफलामृतसाधि-

तम्। क्वाथं पीत्वा जयेज्जन्तुः सदाहं वातशोणितम् ॥ २६ ॥

परवल के पत्ते, कुटकी, शतावरी, त्रिफला और गिलोय इनका काढ़ा पीने से दाहयुक्त वातरक्त शान्त होता है ॥ २६ ॥ यह योग पैत्तिक वातरक्त के लिए है।

शम्पाकादि क्वाथ।

शम्पाकमृतवासानामेरण्डस्नेहसंयुतम्। पीत्वा क्वाथमसृग्वातं क्रमात् सर्वाङ्गजं जयेत् ॥ २७ ॥

अमलतास, गिलोय और अडूसा; इनके काढ़े में अरण्डी का तेल मिलाकर पीने से सर्वाङ्ग का वातरक्त शान्त होता है ॥ २७ ॥

वातरक्त में प्रलेप और सेंक।

गोधूमचूर्णाजपयोघृतं च सच्छागदुग्धो रुबुबीजकल्कः। लेपो विधेयः शतधौतसर्पिः सेके पयश्चाविकमेव शस्तम् ॥ २८ ॥

गेहूँ का आटा, बकरी के दूध का घृत तथा उत्तम बकरी का दूध, अरण्ड के बीजों का कल्क और सौ बार धोया हुआ घृत; इनका लेप करने से और भेड़ के दूध से सेक देने से वातरक्त रोग नष्ट होता है ॥ २८ ॥

वातरक्त में गुडूची प्रयोग।

गुडूच्याः स्वरसं चूर्णं कल्कं वा क्वाथमेव वा। प्रभूतकालमासेव्य मुच्यते वातशोणितात् ॥ लेपे पिष्टास्तिलास्तद्वद् भृष्टाः पयसि निर्वृताः ॥ २९ ॥

गिलोय का रस, चूर्ण, कल्क और क्वाथ इनमें से किसी एक का बहुत दिन सेवन करने से वातरक्त रोग से मुक्त हो जाता है। इसी प्रकार भुने हुए तिलों को दूध में पीसकर लेप करना इस रोग में लाभदायक है ॥ २९ ॥

निम्बादिचूर्ण।

निम्बामृताभया धात्री मन्येकं च पलोन्मितम्। सोमराजीपलं शुण्ठी विडङ्गैडगजाः कणाः ॥ ३० ॥ यमानी चोग्रगन्धा च जीरकं कटुकं तथा। खदिरं सैन्धवं क्षारं द्वे हरिद्रे च मुस्तकम् ॥ ३१ ॥ देवदारु तथा कुष्ठं कर्षं कर्षं प्रदापयेत्। सर्वं संचूर्णितं कृत्वा सूक्ष्मवस्त्रेण छानयेत् ॥ ३२ ॥ माषद्वयं तु भैषज्यं छिन्नाक्वाथं पिबेदनु। मासमात्रप्रयोगेण भवेत् काञ्चनसन्निभः ॥ ३३ ॥ वातशोणितमत्युग्रं श्वित्रमौदुम्बरं तथा। कोठं चर्मदलाख्यं च सिध्मपामा च विप्लुता ॥ ३४ ॥ कण्डूविचर्चिकाकारुष्कुमण्डलकिट्टिमम्। सर्वाण्येव निहन्त्याशु वृक्षमिन्द्राशनिर्यथा ॥ ३५ ॥ आमवातकृतं शोथमुदरं सर्वरूपिणम्। प्लीहानं गुल्मरोगं च पाण्डुरोगं सकामलम् ॥ ३६ ॥ सर्वान् कण्डूव्रणांश्चैव हरते नात्र संशयः। एतन्निम्बादिकं चूर्णं प्राह नागार्जुनो मुनिः ॥ ३७ ॥

नीम की छाल, गिलोय, हड़ और आंवला ये सब चार-चार तोले, बावची ४ तोले, सोंठ, वायविडंग पवांड (चकवड़), पीपल, अजवाइन, बच, जीरा, कुटकी, खैर, सेंधा नमक, जवाखार, हल्दी, दारुहल्दी, नागरमोथा, देवदारु और कूठ ये सब एक-एक तोला। इन सबको कूट पीसकर महीन कपड़े से छान ले। दो मासे की मात्रा में इस चूर्ण को खाकर ऊपर से गिलोय का काढ़ा पीना चाहिए। एक महीने तक सेवन करने से शरीर सुवर्ण के तुल्य हो जाता है और कठिन वातरक्त, सफेद कोढ़, औदुम्बर कोढ़, कोढ़, चर्मदल, सिहुआ ( झाईं ), पामा, खाज, गुमड़ी, विचर्चिका दाद, आमवात और

कैटिभ कोढ़, इन सबको यह चूर्ण इस प्रकार नाश करता है जैसे वज्र वृक्षों को। तथा आमवात से उत्पन्न सब प्रकार की सूजन, सब प्रकार के उदररोग, प्लीहा, गुल्मरोग, पाण्डुरोग, कामला ( काँवर, पीलिया ) और सब प्रकार की खुजली तथा व्रणों को निःसंदेह नष्ट करता है। इस निम्बादि चूर्ण को नागार्जुन मुनि ने कहा है ॥ ३०-३७ ॥

### स्वल्पगुडूची तैल।

गुडूचीक्वाथकल्काभ्यां सिद्धं तैलं प्रयत्नतः । वातरक्तं निहन्त्याशु नात्र कार्या विचारणा ॥ ३८ ॥

क्वाथ के लिए गिलोय १२८ तोले, जल २२ सेर, ४८ तोले, शेष ६ सेर ३२ तोले। कल्क के लिए गुर्च ३२ तोले और तिलतैल १२८ तोले। यथाविधि तैल सिद्ध कर सेवन करने से वातरक्त शीघ्र ही नाश हो जाता है ॥ ३८ ॥

### () मध्यगुडूची तैल।

गुडूचीक्वाथकल्काभ्यां सिद्धं तैलं पयःसमम् । वातरक्तं निहन्त्याशु साध्यासाध्यमथापि वा ॥ ३९ ॥ एकजं द्वन्द्वजं चैव तथैव सान्निपातिकम् । नाशयेत्तिमिरं घोरं गुडूचीतैलमुत्तमम् ॥ ४० ॥

गिलोय का क्वाथ ८ सेर, कल्क के लिए गिलोय पाव सेर तिल का तेल २ सेर, गौ का दूध २ सेर। यथाविधि तेल सिद्ध कर मालिश करने से साध्य अथवा असाध्य सब प्रकार का वातरक्त रोग नष्ट होता है और अत्यन्त बढ़ा हुआ तिमिर रोग नष्ट होता है ॥ ३९-४० ॥

### बृहद्गुडूची तैल।

शतं छिन्नरुहायाश्च जलद्रोणे विपाचयेत् । तेन पादावशेषेण तैलप्रस्थं विपाचयेत् ॥ ४१ ॥ क्षीरं चतुर्गुणं दद्यात्कल्कानेतान् प्रयत्नतः । अश्वगन्धा विदारी च काकोल्यौ हरिचन्दनम् ॥ ४२ ॥ शतावरी चातिबला श्वदंष्ट्रा बृहतीद्वयम् । कृमिघ्नं त्रिफला रास्ना त्रायमाणा च शारिवा ॥ ४३ ॥ जीवन्ती ग्रन्थिकं व्योषं मण्डूकीभेकपर्णिका । विशाला ग्रन्थिपर्णं च मञ्जिष्ठा चन्दनं निशा ॥ ४४ ॥ शताह्वा सप्तपर्णी च कार्षिकाण्युपकल्पयेत् । पानाभ्यञ्जननस्येषु वातरक्ते प्रयोजयेत् ॥ ४५ ॥ वातरक्तमुदावर्तं कुष्ठान्यष्टादशैव तु । हनुस्तम्भं प्रमेहं च कामलां पाण्डुतां जयेत् ॥ ४६ ॥ विस्फोटं च विसर्पं च नाडीव्रणभगन्दरम् । विचर्चिकां गात्रकण्डूं पाददाहं विशेषतः ॥ ४७ ॥ एतत्तैलवरं श्रेष्ठं वलीपलितनाशनम् । आत्रेयनिर्मितं चैव बलवर्णकरं स्मृतम् ॥ ४८ ॥

२ सेर गिलोय को २५ सेर ३८ तोले जल में औटावे। जब ६ सेर ३२ तोले बाकी रहे तब उतार कर छान ले। तेल १२८ तोले, दूध ६ सेर ३२ तोले। कल्क के लिए असगन्ध, विदारीकन्द, काकोली, क्षीरकाकोली, पीला चन्दन, शतावरी, कघी, गोखुरू, छोटी कटेरी, बड़ी कटेरी, वायविडङ्ग, त्रिफला, रास्ना, त्रायमाण, शारिवा, जीवन्ती, पिपरामूल, सोंठ, मिर्च, पीपल, ब्राह्मी, मण्डूकपर्णी, इन्द्रायण, गांठिवन, मंजीठ, सफेद चन्दन, हल्दी, सोया के बीज और सतवन, ये सब एक एक तोला। यथाविधि तैल सिद्ध करे। इसके पीने से, मालिश करने से तथा नस्य लेने से वातरक्त, उदावर्त, १८ प्रकार के कोढ़, हनुस्तम्भ, प्रमेह, काँवर ( पीलिया ), पाण्डुरोग, विस्फोटक, विसर्प, नाड़ीव्रण, भगन्दर, विचर्चिका खुजली और पाददाह और वलीपलित; इन रोगों का नाश होता है। यह बल और वर्ण का देनेवाला बृहद्गुडूची तैल आत्रेयजी का बनाया हुआ है ॥ ४१-४८ ॥

### विषतिन्दुक तैल

विषतरुफलमज्जप्रस्थयुग्मं च शिग्रुस्वरसलकुचवारिप्रस्थमेकैकशश्च। कनकवरुणचित्रापत्रनिर्गुण्डिकास्नुक्स्वरसतुरगगन्धायैजयन्तीरसश्च ॥ ४६ ॥ पृथगिति परिकल्प्य प्रस्थयुग्मेन युग्मं विषतरुफलमज्जातुल्यतैलं विपक्वम्। लशुनसरलयष्टिकुष्ठसिन्धूत्थयुग्मं दहनतिमिरकृष्णाकल्कयुक्तं सुसिद्धम् ॥ ५० ॥ हरति सकलवातान् घोररूपानसाध्यान् गतिदिनमनुलेपात् सुप्रवातस्य जन्तोः ॥ ५१ ॥ कुष्ठमष्टादशविधं विविधं वातशोणितम्। वैवर्ण्यं त्वग्गतान् दोषान्नाशयत्याशु मर्दनात् ॥ ५२ ॥

कुचिले की मींगी १२८ तोले, क्वाथ के लिए जल १९ सेर १७ तोले, अवशिष्ट जल ३ सेर १६ तोले, सहिजना का रस, १२८ तोले, बड़हर का रस, १२८ तोले, धतूरा के पत्तों का रस १२८ तोले, वरना की छाल का काढ़ा १२८ तोले, चित्रक की पत्तियों का स्वरस १२८ तोले, सँभालू का काढ़ा १२८ तोले, थूहर का रस १२८ तोले, असगन्ध का काढ़ा १२८ तोले और अरणी के पत्तों का रस १२८ तोले, तिलतैल १२८ तोले। कल्क के लिए—लहसुन, सरलकाष्ठ, मुलेठी, कूट, सेंधानमक, विड़नमक, चीते की जड़, हल्दी और पीपल; ये सब चार-चार तोले। यथाविधि तैल सिद्ध कर प्रतिदिन मालिश करने से अत्यन्त कठिन तथा असाध्य सब प्रकार के वातरोग, सुप्तवात, १८ प्रकार के कोढ़, अनेक प्रकार के वातरक्त, विवर्णता और त्वचा के दोषों का नाश होता है ॥ ४६–५२ ॥

### रुद्र तैल

पुनर्नवानिशानिम्बं वार्ताकुबृहतीत्वचम्। कण्टकारी करञ्जश्च निर्गुण्डीरूपमूलकम् ॥ ५३ ॥ अपामार्गपटोलं च धुस्तूरं दाडिमीफलम्। जयन्तीमूलकं दन्ती प्रत्येकं कार्षिकद्वयम् ॥ ५४ ॥ त्रिफलायाः प्रदातव्यं द्विकर्षं च पृथक् पृथक्। दत्वा छिन्नरुहायाश्च द्वात्रिंशच्च पलानि च ॥ ५५ ॥ पाचयेद् भाजने तोयं चतुर्भागावशेषितम्। कटुतैलस्य च प्रस्थं दुग्धं च तत्समं भवेत् ॥ ५६ ॥ वासकस्वरसप्रस्थं मन्दमन्देन वह्निना। गन्धं शटी च कंकोलं चन्दनं ग्रन्थिकं नखी ॥ ५७ ॥ पूतिकं केशरं कुष्ठं हन्त्यस्थिमज्जगं पुनः। हस्तपादांगुलिसन्धिगलितं स्फुटितं तथा ॥ ५८ ॥ कृष्णं श्वेतं तथा रक्तं नानावर्णं सदाहकम्। पामां विचर्चिकां कण्डूं छायां त्वचं च कालिनीम् ॥ ५९ ॥ मसूरिकां मण्डलं च ज्वलनं च विसर्पकम्। नाडीव्रणं धर्महीनं गात्रवैवर्ण्यदद्रुकम्। निहन्ति रक्तदोषं च भास्करस्तिमिरं यथा ॥ ६० ॥

गदहपुरैना ( साँठी ) की जड़, हल्दी, नीम की छाल, बैंगन, बड़ी कटेरी, दालचीनी, छोटी कटेरी, करंजुआ, सँभालू, सहूसे की जड़, छटजोरा, परवल के पत्ते, धतूरा, अनारदाना, अरणी की जड़, जमालगोटे की जड़; ये सब दो-दो तोले। आँवला २ तोले, हड़ २ तोले, बहेड़ा दो तोले। इन सबका कल्क। गिलोय १२८ तोले, पाकार्थ जल ६ सेर ३२ तोले, अवशिष्ट १२८ तोले। कड़ुआ तैल १२८ तोले, गोदुग्ध १२८ तोले, अडूसे का रस १२८ तोले। मन्दाग्नि से यथाविधि तैल सिद्ध करके उसमें काली अगर, कपूर, कंकोल, सफेद चन्दन, गठिवन, नखी, कचूर, नागकेसर और कूट; इनका प्रक्षेप देकर तेल को सुगन्धित करे। इस रुद्रतैल के मर्दन करने से हड्डी और मज्जागत कुष्ठ तथा जिसमें हाथ और पैर की अँगुलियाँ गल गई हों अथवा फूट गई हों

महाकुष्ठ तथा काला, सफेद, लाल और अनेक वर्ण का कुष्ठ, पामा, विचर्चिका, शुक्ती, छायारोग, खाल का फटना, मसूरिका, मण्डलकुष्ठ, दाह, विसर्प, नाड़ीव्रण ( नासूर ), पसीना का न आना, शरीर की विवर्णता, शाद और रक्तदोष इस प्रकार नष्ट होते हैं जैसे सूर्योदय से अन्धकार ॥ ५३--६० ॥

## महारुद्र तैल।

पुनर्नवा निशा निम्बं वार्त्ताकुदाडिमीफलम्। बृहत्यौ पूतिकामूलं वासकं सिन्धुवारकम् ॥ ६१ ॥ पटोलपत्रं धुस्तूरमपामार्गं जयन्तिका। दन्ती वरा पृथक् सर्वं कर्षद्वयमितं पुनः ॥ ६२ ॥ विषस्य द्विपलं देयं पृथक् व्योषं पलत्रयम्। प्रस्थं च सार्षपं तैलं प्रस्थाम्बुदपपत्रजम् ॥ ६३ ॥ गुडूच्यास्तु चतुःषष्टिपलक्वाथरसेन च। वारिप्रस्थेन पक्तव्यं महारुद्रमिदं शुभम् ॥६४॥ वातरक्तं निहन्त्याशु नानादोषसमुद्भवम्। अष्टादशविधं कुष्ठं हन्ति वर्णाग्निवर्द्धनम् ॥ ६५ ॥ कृमिं दुष्टव्रणं चैव दाहं कण्डूं निहन्ति च। अस्वेदनंमहास्वेदमभ्यङ्गादेव नश्यति ॥ ६६ ॥

वासारुद्रगुडूचीतैलमित्यस्य संज्ञान्तरम्।

क्वाथ के लिए गदहपुरैना (साँठी) की जड़, हल्दी, नीम की छाल, बैंगन, अनारदाना, दोनों कटेरी, करंज की जड़, अड़से की छाल, सँभालू, परवल के पत्ते, धतूरा, लटजीरा, अरणी, जमालगोटे की जड़, त्रिफला, ( अलग-अलग ) ये सब चीजें दो-दो तोले। विष ८ तोले, सोंठ १२ तोले, मिर्च १२ तोले, पीपल १२ तोले, सरसों का तेल १२८ तोले। अड़से के पत्तों का रस १२८ तोले, गिलोय का रस ५ सेर १६ तोले, जल १२८ तोले। मंदाग्नि से यथाविधि तैल सिद्ध करे। इस महारुद्र तैल की मालिश करने से अनेक दोषों से उत्पन्न हुआ वातरक्त, अठारहों प्रकार के कुष्ठ, कृमि, दुष्टव्रण, दाह, कण्डू, अस्वेद ( पसीना न निकलना ), महास्वेद ( पसीना ज्यादा निकलना ) इन रोगों को यह तैल नाश करता है तथा वर्ण और अग्नि को बढ़ाता है। वासातैल, रुद्रतैल तथा गुडूचीतैल ये इसके नाम हैं। ॥ ६१--६६ ॥

## कैशोरगुग्गुलु।

वरमहिषलोचनोदरसन्निभवर्णस्य गुग्गुलोः प्रस्थम्। प्रक्षिप्य तोयराशौ त्रिफलां च यथोक्तपरिमाणम् ॥ ६७ ॥ द्वात्रिंशच्छिन्नरुहापलानि देयानि यत्नेन। विपचेदममत्तो दर्व्या सङ्घट्टयन् मुहुर्यावत् ॥ ६८ ॥ अर्द्धक्षयितं तोयं जातं ज्वलनस्य सम्पर्कात्। अवतार्य वस्त्रपूतं पुनरपि संसाधयेदयः पात्रे ॥ ६९ ॥ सान्द्रीभूते तस्मिन्नवतार्य हिमोपलप्रख्ये। त्रिफलाचूर्णार्द्धपलं त्रिकटोश्चूर्णं षडक्षपरिमाणम् ॥७०॥ कृमिरिपुचूर्णार्द्धपलं कर्षं कर्षं त्रिवृद्दन्त्योः। अमृतायाः पलमेकं सर्पिषश्च पलाष्टकं निपेदमलम् ॥ ७१ ॥ उपयुज्य चानुपानं यूषं क्षीरं सुगन्धिसलिलं च। इच्छाहारविहारी भेषजमुपयुज्य सर्वकालमिदम् ॥ ७२ ॥ तनुरोधिवातशोणितमेकजमथ द्वन्द्वजं चिरोत्थं च जयति स्रुतपरिशुष्कं स्फुटितञ्चाजानुजं चापि ॥ ७३ ॥ व्रणकासकुष्ठगुल्मश्वयथूदरपाण्डुमेहांश्च। मन्दाग्निं च विबन्धं प्रमेहपिडिकाश्च नाशयत्याशु ॥ ७४ ॥ सततं निषेव्यमाणः कालवशाद्धन्ति सर्वगदान्। अभिभूय जरादोषं करोति कैशोरिकं रूपम् ॥ ७५ ॥ मत्येकं त्रिफला-

मस्थो जलमत्र षडाढकम्। पाकायत्तं फलं पाके क्वाथे पाकप्रधानता। तस्मात् क्वाथविधौ नित्यं यतितव्यं चिकित्सकैः॥७६॥

पोटली में बँधा हुआ महिषाक्षगुग्गुलु (भैंसागुग्गुलु) ६४ तोले, त्रिफला मिलित २ सेर ३२ तोले, गिलोय १२८ तोले, इनको ३८ सेर ३२ तोले जल में पकावे। पकाते समय करछी से चलाता जाय। जब आधा पानी जल जाय तो उतार कर वस्त्र से छान ले और पोटली का गुग्गुलु निकालकर घी में सान ले और काढ़े में मिलाकर फिर लोहे के पात्र में अग्नि पर चढ़ाकर पाक करे। गाढ़ा होने पर उतार ले और शीतल हो जाने पर ये चीजें डाले। हड़, बहेड़ा आँवला का चूर्ण दो-दो तोले, सोंठ, मिर्च, पीपल का चूर्ण दो-दो तोले, वायविडंग का चूर्ण २ तोले, निसोथ १ तोला, जमालगोटे की जड़ २ तोले, गिलोय ४ तोले, गौ का घृत १२ तोले डालकर गुग्गुलु सिद्ध करे। इस गुग्गुलु को मूँग आदि का जूस, दूध, गुलाबजल इत्यादि के साथ खावे और इच्छानुसार भोजन करे। इस गुग्गुलु के सेवन करने से एक दोषज, द्विदोषज तथा चिरकालिक, क्षतपरिशुष्क (पककर सूखा हुआ), स्फुटित आजानुपर्यन्त फैला हुआ वातरक्त दूर होता है। व्रण, कास, कुष्ठ, गुल्म, सूजन, उदररोग, पाण्डु, मेह, मंदाग्नि, विबंध (पेट फूलना और) प्रमेहपिडिका आदि रोगों को यह नष्ट करता है। इसका निरंतर सेवन करने से सब प्रकार के रोग नाश होते हैं। यह कैशोरगुग्गुलु जरावस्था को दूर करके कैशोर अवस्था को प्राप्त कराता है। त्रिफला की प्रत्येक औषधि ६४ तोले और इसमें जल ६ आढक (३८ सेर ३२ तोले) होना चाहिए। फल पाक के ही अधीन रहता है और क्वाथ में पाक ही प्रधान है, अतः वैद्यों को चाहिए कि सदा क्वाथविधि में परिश्रम करें॥ ६७—७६॥

रसाभ्रगुग्गुलु।

कर्षद्वयं पारदस्य लौहं गन्धं च तत्समम्। लौहगन्धसमं चाभ्रं गुग्गुलुं कुडवद्वयम्॥७७॥ अमृताया रसप्रस्थे रसप्रस्थे फलत्रिके। सान्द्रीभूते रसे तस्मिन् गर्भं दत्वा विचक्षणः॥७८॥ त्रिकटु त्रिफला दन्ती गुडूची चेन्द्रवारुणी। विडङ्गं नागपुष्पं च त्रिवृता च सुचूर्णितम्॥७९॥ प्रत्येकं कर्षमादाय सर्वं मेकत्र कारयेत्। भक्षयेत् कोलमात्रं तु छिन्नाक्वाथानुपानतः॥८०॥ वातरक्तं महाघोरं स्फुटितं गलितं जयेत्। अष्टादशविधं कुष्ठं कृमिरोगाश्मरीं तथा॥८१॥ भगन्दरं गुदभ्रंशं श्वेतकुष्ठं सकामलम्। अपचीं गण्डमालां च पामां कण्डूं विचर्चिकाम्॥८२॥ चर्मकीलं महादद्रुं नाशयेदत्र संशयः। वातरक्तविनाशाय धन्वन्तरिकृतः पुरा॥८३॥ रसाभ्रगुग्गुलुः ख्यातो वातरक्तेऽमृतोपमः॥८४॥

शुद्ध पारा ६ तोले, लौहभस्म २ तोले, गन्धक २ तोले, अभ्रकभस्म ४ तोले और गुग्गुलु ३२ तोले, गिलोय का रस १२८ तोले, त्रिफला का रस १२८ तोले; इन सबको मिलाकर पाक करें। जब गाढ़ा हो जाय तब त्रिफला, त्रिकुटा, जमालगोटे की जड़ गिलोय, इन्द्रायण की जड़, वायविडंग, नागकेशर, निसोथ; इनको एक-एक तोले लेकर चूर्ण करे। इस चूर्ण को पूर्वोक्त क्वाथ में डालकर गुग्गुलु सिद्ध करे। इसकी मात्रा ६ मासे, अनुपान गुर्च का क्वाथ। इसके सेवन करने से महाघोर स्फुटित तथा गलित वातरक्त, अठारह प्रकार के कुष्ठ, कृमिरोग, पथरी, भगन्दर, गुदभ्रंश, श्वेतकुष्ठ, कामला, अपची, गण्डमाला, पामा, कण्डू, विचर्चिका, चर्मकील और दद्रु ये रोग नष्ट होते हैं। इसमें कुछ भी संशय नहीं है। यह वातरक्त को नाश करने के लिए धन्वन्तरिजी का बनाया हुआ रसाभ्रगुग्गुलु अमृत के समान है॥ ७७—८४॥

वातरक्तान्तक रस ।

पारदं गन्धकं लौहं घनं तालं मनःशिला । शिलाजतु पुरं शुद्धं समभागं विचूर्णयेत् ॥ ८५ ॥ विडङ्गं त्रिफलाव्योषमब्धिफेनं पुनर्नवा । देवदारु चित्रकं च दार्वी श्वेता पराजिता ॥ ८६ ॥ चूर्णमेषां पृथक् तुल्यं सर्वमेकत्र भावयेत् । त्रिफलाभृङ्गराजस्य रसेनैव त्रिधा त्रिधा ॥ ८७ ॥ संभाव्य भक्षयेत् पश्चान्माषमात्रं दिने दिने । कृत्वानुपानं निम्बस्य पत्रं पुष्पं त्वचं समम् ॥ ८८ ॥ माषमात्रं घृतैः कुर्यात् सर्ववातविकारनुत् । वातरक्तं महाघोरं गम्भीरं सर्वजं जयेत् ॥ ८९ ॥ सर्वोपद्रवसंयुक्तं साध्यासाध्यं निहन्त्ययम् ॥ ९० ॥

शुद्धपारा, गन्धक, लौहभस्म, अभ्रकभस्म, हरिताल, मैनशिल, शिलाजीत, शुद्ध गुग्गुल, वायविडंग, त्रिफला, त्रिकुटु, समुद्रफेन, गदहपुरैना ( सांठी ) देवदारु, चीते की जड़, दारुहल्दी, विष्णुकान्ता; इन सबको सम भाग ले चूर्ण करे और उसमें त्रिफला और भांगरे के रस की पृथक्-पृथक् तीन-तीन भावना दे। इसको उड़द के समान गोलियां बनाकर प्रतिदिन एक गोली का सेवन करे। एक-एक माशे नीम के पत्ते, फूल और छाल के साथ में घृत मिलाकर अनुपान करे। इस वातरक्तान्तक रस के सेवन से महाघोर, गम्भीर, त्रिदोषजन्य सब प्रकार के उपद्रवों से संयुक्त साध्य तथा असाध्य वातरक्त रोग दूर होता है ॥ ८५-९० ॥

पुनर्नवागुग्गुलु ।

पुनर्नवा मूलशतं विशुद्धं रुबूकमूलञ्च तथा प्रमाणम् । दत्त्वा पलं षोडशकञ्च शुण्ठ्याः सङ्कुट्य सम्यग्विपचेद् घटेऽपाम् ॥ ९१ ॥ पलानि चाष्टाथ कौशिकस्य तेनाष्टशेषेण पुनः पचेत्तु । एरण्डतैलं कुडवञ्च दद्यात् दत्त्वा त्रिवृच्चूर्णपलानि पञ्च ॥ ९२ ॥ निकुम्भचूर्णस्य पलं गुडूच्याः पलद्वयं चार्द्धपलं पलं प्रति । फलत्रयत्र्यूषणचित्रकाणि सिन्धूत्थभल्लातविडङ्गकानि ॥ ९३ ॥ कर्षं तथा माक्षिकधातुचूर्णं पुनर्नवायाः पलमेव चूर्णम् । चूर्णानि दत्त्वा अवतार्य शीते स्वादेन्नरो मासत्रयप्रमाणम् ॥ ९४ ॥ वातासृजं वृद्धिगदञ्च सप्त जयत्यथरयं त्वथ गृध्रसीञ्च । जङ्घोरुपृष्ठत्रिकबस्तिजञ्च तथामवातं प्रबलञ्च शीघ्रम् ॥ ९५ ॥

सांठी की जड़ ५ सेर, अरंडी की जड़ २ सेर, सोंठ ६४ तोले इन्हें अधकुटकर २५ सेर १८ तोले जल में पकावे, जब ३ सेर १६ तोले क्वाथ बाकी रह जाय तब उतार ले। इस क्वाथ को छानकर इसमें ३२ तोले गूगलको डाल पुनः पकावे पश्चात् अरंडी का तैल १६ तोले, निसोत २० तोले, दन्तीमूल ४ तोले, गिलोय ८ तोले, त्रिफलाचूर्ण १ तोले, त्रिकुटु २ तोले, चित्रक ४ तोले, सेंधानमक ८ तोले, शुद्ध भिलावां ८ तोले, वायविडङ्ग ८ तोले, स्वर्णमाक्षिकभस्म १ तोला, सांठी ४ तोले। इनके चूर्ण को डालकर पकावे। जब पाक भली प्रकार तैयार हो जाय तब उतारकर शीतल होने दे। मात्रा ३ माशे। इसके सेवन से वातरक्त, वृद्धिरोग, गृध्रसी तथा जङ्घा, ऊरु, पृष्ठ, त्रिकसन्धि आदि में पैदा हुआ बलवान् आमवात शीघ्र नष्ट होता है ॥ ९१—९५ ॥

विश्वेश्वररस ।

रसाद्दश विषात्पञ्च गन्धकाद्दश शोधितात् । तुत्थाद्दश पलाशस्य बीजेभ्यः पञ्च कारयेत् ॥ ९६ ॥ तुङ्गाश्वमारधुस्तूरकरहाटकनीलिजैः । दशकं दशकं कुर्याच्छोषयित्वा जटास्त्वचः ॥ ९७ ॥ दशकं दशकं दत्त्वा कुचिलाद्दश नूतनात् । भल्लातकाच्च

दशकं चूर्णयित्वा भिषक् ततः ॥ ९८ ॥ सुदिने च बलिं दत्त्वा वैद्यः पूजापरायणः। रक्तिकैकमितं दद्यात् सहते यदि वा द्वयम् ॥ ९९ ॥ वातरक्तं ज्वरं कुष्ठं खरस्पर्शमसौ व्यदम् । आजानुस्फुटितं हन्ति विपजं वास्थिनिःसृतम् ॥ १०० ॥ कुष्ठमष्टादशविधमग्निमान्द्यमरोचकम् । विश्वेश्वरो रसो नाम विश्वनाथेन भाषितः ॥ १०१ ॥

शुद्ध पारा १० भाग, शुद्ध वत्सनाग ४ भाग, शुद्ध गन्धक १० भाग, शुद्ध सोनामक्खी १० भाग, ढाक के बीज ४ भाग, छोटी कटेरी, कनेर की जड़, धतूरा, अकरकरा, चीता की जड़, जटामांसी, दालचीनी, हरएक दस-दस भाग। नूतन एवं शोधा हुआ कुचला १० भाग; शुद्ध शिलाजीत १० भाग। इनके चूर्ण को एकत्र कर मिलावे, पश्चात् शुभ दिन में बलि देकर पूजापरायण वैद्य रोगी को सेवन करावे। मात्रा १ रत्ती से २ रत्ती तक। यह रस जानुपर्यन्त स्फुटित वातरक्त, ज्वर, कुष्ठ, विषरोग, मन्दाग्नि और अरुचि आदि को नष्ट करता है ॥ ९८—१०१ ॥

लाङ्गल्याद्यं लौह ।

विशालालाङ्गलीमूलत्रिकटुत्रिफलैस्तथा । दन्ती गुग्गुलुभिस्तुल्यं लौहचूर्णं नियोजयेत् ॥ १०२ ॥ मातुलुङ्गरसेनैव त्रिफलायाः रसेन च । विमृद्य यत्नतः पश्चाद् गुटिकां वल्लसम्मिताम् ॥१०३॥ भक्षयेन्मधुना सार्द्धं शृणु कुर्वन्ति यान् गुणान् । आजानुस्फुटितं घोरं सर्वाङ्गस्फुटितं तथा ॥ तत्सर्वं नाशयत्याशु साध्यासाध्यञ्च शोणितम् ॥ १०४ ॥

शुद्ध कलिहारी की जड़, त्रिकटु, त्रिफला, दन्ती, शुद्ध गूगल, इन्द्रायण एक-एक भाग, इन मिले हुए चूर्ण के बराबर लोहभस्म, इन सबको एकत्र कर बिजौरे के रस तथा त्रिफला के क्वाथ से यत्नपूर्वक घोटकर २ रत्ती के परिमाण में गोलियाँ बनावे। अनुपान शहद। यह लौह जानुपर्यन्त स्फुटित अथवा सर्वाङ्गस्फुटित साध्यासाध्य वात रक्त को नष्ट करता है ॥ १०२—१०४ ॥

कुष्ठोक्तोऽप्यत्र दातव्यः श्रीमहातालकेश्वरः सर्वेश्वरश्च दातव्यस्तस्मिन् कुर्यादिमं विधिम् ॥ १०५ ॥

कुष्ठचिकित्सा में कहे हुए महातालकेश्वर एवं सर्वेश्वर रस भी वातरक्त में हितकर होता है ॥ १०५ ॥

रक्तरोग में शोणितमोक्षण ।

रक्ताधिक्ये रक्तमोक्षः पदे बाहौ ललाटके । कर्त्तव्यो रक्तरोगेषु कुष्ठिनाञ्च विशेषतः ॥ १०६ ॥

यदि रक्ताधिक्य अथवा रक्तरोग हो तो पाँव, बाहु अथवा ललाट से रोगी के बलाबल तथा व्याधि की अवस्था को देखकर रक्त निकालना चाहिए। कुष्ठ, वातरक्त आदि रोगों में प्रायः रक्तमोक्षण किया जाता है। इस प्रकार रक्तमोक्षण से रक्ताधिक्य में प्रवृद्ध रक्त का दबाव (Blood Pressure) घटता है तथा रक्तरोगियों के रक्त में स्थित विष (Toxins) बहुत कुछ कम हो जाता है ॥ १०६ ॥

मार्कण्डेयमुखोद्धृत गुडूचीलौह ।

गुडूचीसारसंयुक्तं त्रिफलात्रयसमायुतम् । वातरक्तं निहन्त्याशु सर्वरोगहरं शयः ॥ १०७ ॥

सर्वसमं लौहम् ।

गिलोय के सत के साथ त्रिकटु ( सोंठ, कालीमिर्च, पीपल ), त्रिफला ( हड़, बहेड़ा, आँवला ) तथा त्रिमद ( वायविडंग, चित्रक, मोथा ), इन्हें बराबर मात्रा में मिलाकर सबके बराबर लोहभस्म मिलावे, मात्रा २ रत्ती। इसके सेवन से वातरक्त नष्ट होता है ॥ १०७ ॥

पित्तान्तकलौह ।

रसं गन्धकमभ्रञ्च गुडूचीसत्त्वं तथा । उशीरं चान्दनं ताम्रसारं गदं समं समम् ॥

१०८ ॥ गृहीत्वाऽयः सर्वसमं खल्ले संस्थाप्य मर्दयेत । रक्तिद्वयमितां खादेद्वटिकाम्प्रतिवासरम् ॥ १०९ ॥ पटोलपत्रधन्याककाथेनैवानुपानतः । पाण्डुं पित्तोद्भवान् रोगानशेषान् यकृतं तथा ॥ ११० ॥ उपदंशं तथा हन्यादिकृतिं पारदोद्भवाम् । लौहः पित्तान्तको नाम वातरक्तं सुदारुणम् ॥ दाहं च हस्तपादयोर्हन्ति सूर्यो यथा तमः ॥ १११ ॥

पारा, गन्धक, अभ्रकभस्म, गिलोय, हड़, खस, सुगन्धवाला, ताम्रभस्म, सब समभाग। लौहभस्म ८ भाग, इन्हें इकट्ठा खरल में डाल घोटकर जल से दो दो रत्ती की गोलियाँ बनावे। अनुपान—पटोलपत्र तथा धनियाँ का क्वाथ। इसके प्रयोग से पाण्डु सम्पूर्ण पित्तरोग, उपदंश, पारदसेवन से उत्पन्न विकार, कठिन वातरक्त तथा हाथ पैरों की जलन नष्ट होती है ॥ १०८–१११ ॥

द्वादशायस ।

गरुत्मान् दरदस्तीक्ष्णं शर्गोल्यं वङ्गशङ्खिके । शुल्वं च गगनं फेनं रुधिरं च त्रिनेत्रकम् ॥ ११२ ॥ पातालग्रपत्तिर्वीजं वह्निमूलं सरामठम् । त्रिकटु त्रिफला शिग्रु चाजमोदा यमानिका ॥ ११३ ॥ पिप्पलीमूलं भार्गी च लशुनं जीरकद्वयम् । आर्द्रकस्य रसेनैव वटिकां कारयेद्भिषक् ॥ ११४ ॥ वातरक्तं महाकुष्ठं गलिताङ्गं त्रिदोषजम् । शोथं कण्डूं च रुधिरं सर्वमेवद् व्यपोहति ॥ ११५ ॥ मन्दानलामवातञ्च श्लेष्माणं च जलोदरम् । घ्राणश्रोत्रिकर्णजिह्वानां सर्वरोगं विनाशयेत् ११६

सुवर्णमाक्षिक, हिंगुल ( सिंगरफ ) लौह भस्म, पारा, वङ्गभस्म, गन्धक ताम्रभस्म, अभ्रकभस्म, समुद्रफेन, गेरू, सुवर्ण सीसा, बाँस की जड़, हींग, त्रिकटु, त्रिफला, सहिजन के बीज, अजमोद, अजवाइन, पिपरामूल, भारंगी, लहसुन सम भाग लेकर चूर्ण करे। पश्चात् अदरख के रस की भावना देकर गोलियाँ बनावे। इन गोलियों के सेवन करने से वातरक्त, महाकुष्ठ, गलितकुष्ठ, त्रिदोषज शोथ, खुजली, रुधिरविकार, अग्निमान्द्य, आमवात, कफरोग, जलोदर तथा कान, नाक, आँख, और जिह्वा के सब रोग दूर होते हैं ॥ ११२–११६ ॥

छिन्नोद्भवाकषायेण सेव्यं शुद्धं शिलाजतु । पञ्चकर्मविशुद्धेन वातरक्तप्रशान्तये ॥ ११७ ॥

पाँचों कर्मों ( स्नेहन, स्वेदन, वमन, विरेचन तथा बस्ति ) से शुद्ध होकर वातरक्त की शान्ति के लिए गिलोय के काढ़े के साथ शुद्ध शिलाजीत का सेवन करे ॥ ११७ ॥

कुष्ठोक्तोऽप्यत्र दातव्यः श्रीमहातालकेश्वरः । सर्वेश्वरश्च दातव्यस्तस्मिन् कुर्यादिमं विधिम् ॥ ११८ ॥ रक्ताधिक्ये रक्तमोक्षः पादे बाहौ ललाटके । कर्त्तव्यो रक्तरोगेषु कुष्ठिनां च विशेषतः ॥ ११९ ॥ बलिनो बहुदोषस्य वयःस्थस्य शरीरिणः । परं प्रमाणमिच्छन्ति प्रस्थं शोणितमोक्षणे ॥ १२० ॥

कुष्ठाधिकार में कहे हुए महातालकेश्वर और सर्वेश्वर रसों को भी वातरक्त की शान्ति के लिए देना चाहिए। रक्तविकार में विशेषकर कुष्ठरोग में रोगी के शरीर में रक्त अधिक होने पर पैर, बाहु और ललाट में रक्तमोक्षण करे। बलवान्, बहुत दोषों युक्त और युवावस्थावाले रोगी के रक्तमोक्षण में ज्यादा से ज्यादा ६४ तोले रक्त निकाले ॥ ११८–१२० ॥

तालेन निहतं ताम्रं रसगन्धकसंयुतम् । बहुधा पुटितं सम्यग् वातरक्ते महौषधम् ॥ १२१ ॥

हरिताल के संयोग से भस्म किये हुए ताम्र

में पारा और गंधक की कजली मिलाकर सेवन करने से अथवा बहुत पुट दिया हुआ हरिताल सेवन करने से वातरक्त नष्ट होता है। यह वातरक्त के लिए महौषध है ॥ १२१ ॥

### वातरक्तान्तकरस।

गन्धकं पारदं लोहं शिलां तालं घनं तथा। शिलाजतु पुरं शुद्धं सम भागं विचूर्णयेत् ॥ १२२ ॥ श्वेताऽपराजिता दार्वीवाकुची चित्रकन्तथा। पुनर्नवा देवकाष्ठं त्रिफला व्योषवेल्लके ॥ १२३ ॥ चूर्णयेषां पृथक् तुल्यं सर्वमेकत्र कारयेत्। त्रिफला भृङ्गराजस्य रसैस्तैरे त्रिधा-त्रिधा ॥ १२४ ॥ भावयेद्वर्तयेत्पश्चाच्चणमात्रं दिने दिने। ततोऽनुपान निम्बस्य पत्रं पुष्पं त्वचं समम् ॥ १२५ ॥ शाणमात्रं घृते कुर्यात्सर्व वातविकारनुत्। वातरक्तं महाघोरं गम्भीरं सर्वजं च यत् ॥ १२६ ॥ सर्वोपद्रव संयुक्तं साध्याऽसाध्यं निहन्त्यलम् ॥ १२७ ॥

शुद्ध पारा और शुद्ध गन्धक लोह भस्म शुद्ध मैनसिल और हरिताल अभ्रक भस्म शिलाजीत गूगल सब 1-1 भाग लेकर कज्जली में मिलाकर सफेद कोयल दारुहल्दी बाकुची चित्रकमूल पुनर्नवा देवदारु, त्रिफला त्रिकुटा चव्य ये सब 1-1 भाग लेकर महीन चूर्ण कर पूर्वोक्त दवा में मिलाकर त्रिफला और भांगरा के रस में ३-३ दिन घोटकर चना के समान गोलियां बना लेवें। इनमें से 1-1 गोली नीमके पत्ते फूल और छाल सम भाग के ४ माशे चूर्ण और घी के साथ लेने से सब प्रकार के वातरक्त और वात व्याधियों का नाश करता है ॥ १२२-१२७ ॥

### गुडूच्यादि लौह।

गुडूचीसारसंयुक्तं त्रिकत्रयसमायुतम्। वातरक्तं निहन्त्याशु सर्वरोगहरं श्रयः ॥ १२८ ॥

गुडूचीं कुट्टयित्वा पात्रस्थजले संमर्द्य अधः पतितसारो विशुष्को ग्राह्यः। त्रिकत्रयं त्रिफला त्रिकटु त्रिमदाः। सर्वसमं लौहम्।

गिलोय का सत, त्रिफला ( हर, बहेड़, आंवला ), त्रिकटु ( सोंठ, मिर्च, पीपल ), त्रिमद ( वायविडंग, नागरमोथा, चीता ), इनके बराबर लोहभस्म ले। यह लोहभस्म सेवन करने से वातरक्त को दूर करता है ॥ ॥ १२८ ॥

गिलोय का सत्व ( सत ) निकालने की रीति यह है कि गुर्च के छोटे-छोटे टुकड़े करके महीन कूटकर जल में भिगो दें। ४ या ६ घंटे के बाद मलकर वस्त्र से छान ले। छानने से गिलोय के थोथ ( छूंछ ) वस्त्र में रह जाते हैं और सत्वमिश्रित जल अलग हो जाता है। कुछ देर में जब सत्व नीचे बैठ जाय तब धीरे-धीरे जल को गिरा दें और अधःस्थित स्वच्छ सत्व को धाम में सुखाकर ग्रहण करें।

### शतावर्यादि तैल।

क्वाथेन शतपुष्पायाः कुष्ठस्य मधुकस्य च। एकैकं साधयेत्तैलं वातरक्तरुजापहम् ॥ १२९ ॥

सोया, कूट, मुलहठी, इनमें से किसी एक के क्वाथ से तैल सिद्धकर अभ्यङ्ग करने से वातरक्त नष्ट होता है ॥ १२९ ॥

### पिण्ड तैल।

समधूच्छिष्टमञ्जिष्ठं ससर्जरसशारिवम्। पिण्डतैलमिति ख्यातं वातरक्तरुजापहम् ॥ १३० ॥

तिलतैल ४ सेर। जल १६ सेर, कल्क के लिए—मधूच्छिष्ट ( मोम ), मजीठ, राल तथा अनन्तमूल मिलाकर १ सेर। इसे विधिपूर्वक सिद्ध कर गरम ही को कपड़े से छान ले। इस

पिण्ड तैल की मालिश करने से वातरक्त नष्ट होता है ॥ १३० ॥

### महापिण्ड तैल ।

अमृतायाः पलशतं सोमराजीतुलां तथा । प्रसारण्याः पलशतं जलद्रोणे पृथक् पचेत् ॥ १३१ ॥ पादशेषं गृहीत्वा च तैलमस्थं पचेद्भिषक् । क्षीरं चतुर्गुणं दत्त्वा मन्दमन्देन वह्निना ॥ १३२ ॥ पिण्डशालजनिर्याससिन्धुवारफलत्रयम् । विजया बृहती दन्ती काकोलीपुनर्नवाः ॥ ॥ १३३ ॥ वह्निग्रन्थिककुष्ठानि निशे द्वे चन्दनद्वयम् । पूतिपूतीकसिद्धार्थराकुचीचक्रमर्दकम् ॥ १३४ ॥ वासानिम्बपटोलीना वानरीबीजमेव च । अश्वगन्धा सरलं सर्वं प्रतिरूपमितं पचेत् ॥ १३५ ॥ एतत्तैलवरं हन्ति वातरक्तमसंशयम् । कुष्ठमष्टादशविधं ग्रन्थिपावं सुदारुणम् ॥ १३६ ॥ कायग्रहश्चामवातं भगन्दरगुदामयम् । ज्वरमष्टविधं हन्ति मर्दनान्नात्र संशयः ॥ १३७ ॥

कटु तैल १२८ तोले, क्वाथ के लिए—गिलोय ५ सेर, जल २५ सेर ४८ तोले बचा हुआ क्वाथ ६ सेर ३२ तोले । काली जीरा ५ सेर, पाक के लिए जल २५ सेर ४८ तोले । बचा हुआ क्वाथ ६ सेर ३२ तोले । दूध ६ सेर ३२ तोले । कल्क के लिए—शिखारस, राल, सम्भालू, त्रिफला भाग बड़ी कटेरी, दन्ती की जड़ शीतलचीनी, सोठी, चित्रक, पीपलामूल, कूठ हल्दी, दारुहल्दी, सफेद चन्दन, लाल चन्दन, खट्टाशी, करञ्ज, सफेद सरसों, काली जीरा, पवाँड के बीज, अडूसा, नीम की छाल, पटोलपत्र, कौंच के बीज असगन्ध, सरलकाष्ठ ( चीड़ की लकड़ी ), हर एक एक-एक तोला लेकर यथाविधि तैल पकावे । इस तैल की मालिश से वातरक्त, कुष्ठ ग्रन्थिवात, कायग्रह (सम्पूर्ण शरीर का जकड़ना), आमवात, भगन्दर, बवासीर तथा आठों प्रकार के ज्वर नष्ट होते हैं ॥ १३१–१३७ ॥

### दशपाकबला तैल ।

बलाकषायकल्काभ्यां तैलं क्षीरचतुर्गुणम् । दशपाकं भवेदेतद् वातसृग्वातपित्तजित् ॥ १३८ ॥ धन्यं पुंसवनञ्चैव नराणां शुक्रवर्द्धनम् । रेतोयोनिविकारघ्नमेतद्वातविकारनुत् ॥ १३९ ॥

तिलतैल ४ सेर, खरैटी का क्वाथ १६ सेर । दूध १६ सेर, कल्क के लिए—खरैटी १ सेर । इस तैल को इसी प्रकार दस बार पकाना चाहिए । इससे तैल में प्रकृतिसमसमवेत व्याधि के दोष नष्ट करनेवाली शक्ति बढ़ती है । यह तैल वातरक्त, एवं वातपित्तज रोगों को नष्ट करता है । यह तैल पुंसवन, वीर्यवर्द्धक तथा वीर्य एवं योनि के विकारों को नष्ट करता है ॥ १३८-१३९ ॥

### महारुद्रगुडूची तैल ।

अमृतायास्तुलां सम्यग् जलद्रोणे विपाचयेत् । पिचुमर्दत्वचं तुल्यां भाजनप्रमितां तथा ॥ १४० ॥ जलद्रोणे विनिष्क्वाथ्य ग्राह्यं पादावशेषितम् । प्रस्थं च कटुतैलस्य गोमूत्रं चापि तत् समम् ॥ १४१ ॥ अमृता नागुजी कुम्भी करवीरं फलत्रिकम् । दाडिमं निम्बबीजं च रजन्यौ बृहतीद्वयम् ॥ १४२ ॥ नागबला त्रिकटुकं पत्रं मांसी पुनर्नवा । ग्रन्थिकं त्रिरसारुवाहा शतपुष्पा च चन्दनम् ॥ १४३ ॥ शारिवे द्वे सप्तपर्णो गोमयस्य रसस्तथा । एषां कर्षमितैर्भागैः साधयेन् मृदुनाग्निना ॥ १४४ ॥ वातरक्तं निहन्त्याशु सर्वोपद्रवसंयुतम् । कुष्ठं चाष्टादशविधं विसर्पं च व्रणामयम् ॥ महारुद्र-

गुडूच्याख्यं तैलं भुवनदुर्लभम् ॥ १४५ ॥ दिवास्वप्नाग्निसन्तापं व्यायामं मैथुनं तथा । कट्‌वुष्णगुर्वभिष्यन्दिलवणाम्लानि वर्जयेत् ॥ १४७ ॥

गिलोय २ सेर, क्वाथ के लिए जल २५ सेर ४८ तोले, अवशिष्ट जल ६ सेर ३२ तोले। नीम की छाल ३ सेर १६ तोले, जल २५ सेर ४८ तोले, अवशिष्ट जल ६ सेर ३२ तोले। कडुआ तैल १२८ तोले और गोमूत्र १२८ तोले। कल्क के लिए गिलोय, बकुची, दन्ती, करंजे की जड़, त्रिफला, अमलतास, नीम के बीज, हल्दी, दारुहल्दी, दोनों कटेरी, नागबला, त्रिकटु, तेजपात, जटामांसी, गदहपुरैना, पिपरामूल, मजीठ, असगन्ध, सोया, लालचन्दन, दोनों सारिवा, सतपर्णी (छितवन) गोबर का रस ये सब एक-एक तोला ले। यथाविधि धीमी आंच से तैल सिद्ध करे। इस महारुद्र गुडूची तैल की मालिश करने से सब उपद्रवों से संयुक्त वातरक्त, अठारहों प्रकार के कुष्ठ, विसर्प, व्रण इत्यादि रोग नष्ट होते हैं। यह महारुद्रगुडूची तैल संसार में दुर्लभ है। इस तैल के मर्दन करनेवाले को दिन में सोना, अग्नि का तापना, व्यायाम करना, मैथुन करना, कटु, उष्ण, गुरु और अभिष्यन्दि पदार्थों का सेवन करना तथा अम्ल और लवण का सेवन करना वर्जित है ॥ १४०-१४६ ॥

वातरक्त में पथ्य ।

उत्तानेऽभ्यञ्जनं सेकः सोपनाहः प्रलेपनम् । गम्भीरे स्नेहपानञ्च स्थापनञ्च विरेचनम् ॥ १४७ ॥ द्वयोरस्रस्रुतिः सूचीजलौकाशृङ्गलाबुभिः । शतधौतघृताभ्यङ्गो मेषीदुग्धासेचनम् ॥ १४८ ॥ यवषष्टिकनीवारकलमारुणशालयः । गोधूमाश्चणका मुद्गास्तुवर्योऽपि मकुष्ठकाः ॥ १४९ ॥ अजानां महिषीणाञ्च गवामपि पयांसि च । लावतित्तिरिशिखिताम्रचूडादिविष्किराः ॥ १५० ॥ प्रतुदाः शुकहारीतकपोतचटकादयः । उपोदिका काकमाची वेत्राग्रं सुनिषण्णकम् ॥ १५१ ॥ वास्तुकं कारवेल्लञ्च तण्डुलीयः प्रसारणी । खर्जूरो वृद्धकूष्माण्डं सर्पिः शम्पाकपल्लवम् ॥ १५२ ॥ पटोलं रुबुतैलञ्च मृद्वीका श्वेतशर्करा । नवनीतं सोमवल्ली कस्तूरी सितचन्दनम् ॥ १५३ ॥ शिंशपागुरुदेवाह्वसरलस्नेहमर्दनम् । तिक्तञ्च पथ्यमुद्दिष्टं वातरक्तगदे नृणाम् ॥ १५४ ॥

उत्तान वातरक्त में अभ्यङ्ग, परिषेचन, पुल्टिस और प्रलेप का प्रयोग करना चाहिए। गम्भीर वातरक्त में स्नेहपान, आस्थापन बस्ति और विरेचन करना चाहिए। उत्तान तथा गम्भीर दोनों प्रकार के वातरक्त में सुई (इंजेक्शन), जोंक, सिंगी तथा तुम्बी द्वारा रक्त निकालना चाहिए। सौ बार धुले घृत की मालिश, भेड़ के दूध से परिषेचन, जौ, साठी के चावल, तीनार (धान्यविशेष), कलम (धान्यविशेष), लाल शालि चावल, गेहूँ, चने, मूँग, अरहर, मोठ (मोथी) ये अन्न; बकरी, भैंस एवं गौ का दूध; लाव, तीतर, मोर, मुर्गा आदि विष्किर तथा तोता, हारीत (पक्षिविशेष), कबूतर, चिड़िया आदि प्रतुद पक्षियों के मांस, पोई का शाक, मकोय, बेत की कोंपल, चौपतिया, बथुआ, करेला, चौलाई, प्रसारणी, खजूर, पुराना पेठा, घी, अमलतास के पत्ते, परवल, अरण्डी का तैल, किशमिश, सफेद खाँड, मक्खन, गिलोय, कस्तूरी, श्वेत चन्दन, शीशम, अगर, देवदारु और चीड़, इनके तैल की मालिश तथा तिक्त पदार्थ ये वातरक्त में पथ्य हैं ॥ १४७-१५४ ॥

अपथ्य ।

माषाः कुलत्था निष्पावाः कलायाः क्षारसेवनम् । अम्बुजानूपमांसानि विदाहीनि दधीनि च ॥ १५५ ॥ इक्षु मूलक

मद्यं पिण्याकोऽम्लानि काञ्जिकम् । दिवास्वप्नाग्निसन्तापं व्यायामं मैथुनं तथा ॥ १५६ ॥ कटूष्णगुर्वभिष्यन्दि-लवणाम्लानि वर्जयेत् ॥ १५७ ॥

इति भैषज्यरत्नावल्यां वातरक्ता-धिकारः समाप्तः ।

वातरक्त के रोगी को उड़द, कुलथी, सेम, मटर, क्षारद्रव्यों का सेवन, जलज मत्स्य आदि तथा अनूप देश के पशु पक्षियों के मांस, विरुद्ध भोजन, दही ईख, मूली, शराब, तिल-कल्क, खटाई कांजी, दिन में सोना आग सेकना, व्यायाम, मैथुन तथा कटु, उष्ण, गुरु, अभिष्यन्दी ( जैसे दही ), अत्यन्त नमक तथा खटाई छोड़ देना चाहिए ॥ १५५–१५७ ॥

इति सरयूप्रसादत्रिपाठिविरचितायां भैषज्यरत्ना-वल्यां रत्नप्रभाभिधायां व्याख्यायां वातरक्ताधिकारः समाप्तः ।

## अथ कुष्ठाधिकारः ।

वातोत्तरेषु सर्पिर्वमनं श्लेष्मोत्तरेषु कुष्ठेषु । पित्तोत्तरेषु मोक्षो रक्तस्य विरेचनं श्रेष्ठम् ॥ १ ॥

वातज कुष्ठरोग में घी पिलाना, कफज में वमन कराना और पित्तज कुष्ठ रोग में रक्तमोक्षण ( फस्त खुलवाना ) तथा विरेचन कराना श्रेष्ठ है ॥ १ ॥

कुष्ठरोग में सुपथ्य ।

पुराणधान्यानि च जाङ्गलानि मांसानि मुद्गाश्च पटोलयुक्ताः । यवादयश्चात्र हिताः पुराणा घृतानि शाकानि च तिक्तकानि ॥ २ ॥

पुराने धान्य, जांगल जीवों का मांस, मूँग, परवल, यव आदि पुराने अन्न घी और तिक्त शाक कुष्ठ रोगवाले को हितकारी हैं ॥ २ ॥

चक्रमर्दकबीजन्तु जम्बीररसमर्दितम् । लेपितं भक्षितं हन्ति दद्रु कुष्ठमशेषतः ३॥

पवांड के बीजों को जम्बीर के रस से घोट-कर लेप करने से तथा खाने से दाद और कुष्ठ नष्ट होता है ॥ ३ ॥

तन्त्रान्तर में ।

पुराणाः शालिगोधूममुद्गाद्याः कुष्ठिनो हिताः । तिक्तशाकं जाङ्गलं च पानादौ खदिरोदकम् ॥ ४ ॥

तन्त्रान्तर में कहा गया है कि पुराने चावल, गेहूँ और मूँग आदि कुष्ठरोगी को हितकर हैं । तिक्त शाक, जंगली जीवों का मांस और पीने को खैर की लकड़ी को जलाकर बुझाया हुआ पानी कुष्ठ रोगवाले को हितकारी होता है ॥ ४ ॥

ये लेपाः कुष्ठानां युज्यन्ते निर्गतास्रदोषाणाम् । संशोधिताशयानां सद्यः सिद्धिर्भवेत्तेषाम् ॥ ५ ॥

विरेचन आदि तथा रक्तमोक्षण द्वारा शुद्ध किये हुए कुष्ठरोगी के शरीर में जो लेप किया जाता है वह शीघ्र फल देनेवाला होता है ॥ ५ ॥

दद्रु चिकित्सा ।

दूर्वाभयासैन्धवचक्रमर्दकुठेरकाः काञ्जिततक्रपिष्टाः । एभिः प्रलेपैरपि बद्धमूलां कण्डूं च दद्रुं च निवारयन्ति ॥६॥

दूब, हड़, सेंधानमक, पवांड के बीज और तुलसी की पत्ती, इनको कांजी तथा तक्र में पीसकर लेप करने से बहुत दिन से उत्पन्न हुई खुजली तथा दद्रु ( दाद ) का नाश होता है ॥ ६ ॥

तुल्यो रसः स्यात्तरोस्तुपेग सचक्रमर्दो-ऽप्यभयाविमिश्रः । पानीयमक्षेन सदद्रुल-पिष्टे लेपः कृतो दद्रुगजेन्द्रसिंहः ॥ ७ ॥

राल, कूठ, पवांड़ के बीज और हड़ इनको सम भाग लेकर कांजी के साथ पीसकर किया हुआ लेप दाद को इस प्रकार नष्ट करता है जैसे कि सिंह हाथी को विनाश कर देता है ॥ ७ ॥

विडङ्गादिलेप।

विडङ्गैडगजाकुष्ठनिशासिन्धूत्थसर्षपैः। धान्याम्लपिष्टैर्लेपोऽयं दद्रुकुष्ठविनाशनः ॥ ८ ॥

वायविडंग, पवांड़ के बीज, कूट, हल्दी, सेंधा नमक, और सरसों इनको कांजी के साथ पीसकर लेप करने से दाद तथा कुष्ठ का नाश होता है ॥ ८ ॥

एडगजादिलेप।

एडगजकुष्ठसैन्धवसौवीरसर्षपैः कृमिघ्नैः। कृमिसिध्मदद्रुमण्डलकुष्ठानां नाशनो लेपः ॥ ९ ॥

पवांड़ के बीज, कूट, सेंधानमक, श्वेत सरसों, वायविडंग, इनको कांजी के साथ पीसकर लेप करने से कृमि, सिध्म (काइं), दद्रु और मण्डलकुष्ठ का नाश होता है ॥ ९ ॥

अन्य तन्त्रान्तर में

कुष्ठसैन्धवसिद्धार्थकृमिघ्नैडगजैः समैः। दद्रुमण्डलकुष्ठघ्नं लेपनं काञ्जिकान्वितम् ॥ १० ॥ इति रविगुप्तः।

कूट, सेंधानमक, श्वेत सरसों, वायविडंग, पवांड़ के बीज इनको सम भाग लेकर कांजी में पीसकर लेप करने से दाद और मण्डलकुष्ठ नष्ट होता है ॥ १० ॥ यह रविगुप्त का मत है।

पर्णानि पिष्ट्वा चतुरंगुलस्य तक्रेण पर्णान्यथ काकमाच्याः। तैलाक्तगात्रस्य नरस्य कुष्ठान्युद्वर्तयेदश्वहनस्य चैव ॥ ११ ॥

शरीर में तेल लगाकर अमलतास, कनेर और मकोय के पत्तों को मट्ठे में पीसकर उबटन लगाने से कुष्ठरोग दूर होता है ॥ ११ ॥

विडङ्गसैन्धवशिवाशशिरेखासर्षपकरञ्जरजनीभिश्च। गोजलपिष्टो लेपः कुष्ठहरो दिवसनाथसमः ॥ १२ ॥

वायविडंग, सेंधानमक, हरड़, बाकुची, बीज, सरसों, करंज और हल्दी इनको गोमूत्र में पीसकर लेप करने से कुष्ठ ऐसे नष्ट होता है जैसे सूर्य से अन्धकार नष्ट होता है ॥ १२ ॥

किट्टिमकुष्ठचिकित्सा।

कासमर्दकमूलं च काञ्जिकेन प्रपेषितम्। दद्रुकिट्टिमकुष्ठानि जयेदेतत्प्रलेपनात् ॥ १३ ॥

कसौंदी की जड़ को कांजी में पीसकर लेप करने से दाद किटिभ तथा कुष्ठरोग दूर होते हैं ॥ १३ ॥

आरग्वधस्य पत्राणि आरनालेन पेषयेत्। दद्रुकिट्टिमकुष्ठानि हन्ति सिध्मानमेव च ॥ १४ ॥

अमलतास के पत्तों को कांजी में पीसकर लेप करने से दाद, किटिभ, कुष्ठ तथा सिध्म इन रोगों का नाश होता है ॥ १४ ॥

चक्राह्वयं स्नुहीक्षीरभावितं मूत्रसंयुतम्। रविसप्तं हि किंचित्तु लेपनं किट्टिमापहम् ॥ १५ ॥

पवांड़ के बीजों के चूर्ण में थूहर के दूध की तथा गोमूत्र की भावना देकर किंचित् धूप में गर्म कर लेप करने से किटिभ रोग शान्त होता है ॥ १५ ॥

कुष्ठैर्नरोऽभिन्नं तैलं कुष्ठघ्नं चर्मदोषनुत्। तन्मला च मधूत्थेन लिप्तं गन्धाश्मना तथा ॥ कुष्ठं सर्वविधञ्च नाशं याति न संशयः ॥ १६ ॥

चौलमूगरा के तेल की मालिश करने से कुष्ठ तथा त्वचा के दोष नष्ट होते हैं अथवा चौल

भृंगरा की मज्जा, मोम, गन्धकचूर्ण इन्हें एकत्र पीसकर लेप देने से सब कुष्ठ नष्ट होते हैं ॥१६॥

कुष्ठानां विनिवृत्त्यै च गोमूत्रं परमौषधम्। अभयासहितं तद्धि ध्रुवं सिद्धिप्रदं मतम् ॥ १७ ॥

कुष्ठ के निवारण के लिये गोमूत्र अत्यन्त उत्तम औषध है। यदि गोमूत्र को हड़ के साथ सेवन करे तो निश्चय लाभ होता है ॥१७॥

चूर्णोदकेन कुष्ठघ्नतैलं कुष्ठहरं परम् १८

कुष्ठघ्न तैल (गर्जनतैल) को ८ या १० बूँद की मात्रा में चूने के जल के साथ रोगी को सेवन करावे तो शीघ्र ही कुष्ठ अच्छा हो जाता है ॥ १८ ॥

लघुमञ्जिष्ठादि क्वाथ।

मञ्जिष्ठा त्रिफला तिक्तवचा दारुनिशाभया। निम्बश्चैव कृतः क्वाथः सर्वकुष्ठं विनाशयेत् ॥ १९ ॥ वातरक्तं तथा कण्डूं पामानं रक्तमण्डलम्। दद्रुं विसर्पं विस्फोटं पानाभ्यासेन नाशयेत् ॥ २० ॥

मरिचं पिप्पली कुष्ठं सैन्धवं जीरनागरम्। वचाहिङ्गुविडङ्गानि पथ्या वह्न्यजमोदकम् ॥ ७१ ॥ एतेषां कारयेच्चूर्णं चूर्णस्य द्विगुणं गुडम्। खादेन्माषद्वयञ्चापि पिबेदुष्णजलं ततः। सर्वाण्यर्शांसि नश्यन्ति वातजानि विशेषतः ॥

कालीमिर्च, पीपल, कूठ, सेंधा नमक, श्वेत जीरा, सोंठ, बच, हींग, बायबिडङ्ग, हड़, चित्रक और अजमोद हरएक के चूर्ण को बराबर मात्रा में ले सबसे दूना पुराना गुड़, मिलाकर उसे रोगी को सेवन करावे। मात्रा--२ माशे। अनुपान गरम जल। इसके सेवन से सम्पूर्ण मस्से नष्ट होते हैं। विशेषतः यह वातज बवासीर को लाभदायक है ॥ ७१-७२ ॥

### दन्त्यरिष्ट ।

दन्तीचित्रकमूलानामुभयोः पञ्चमूलयोः। भागान् पलांशानापोथ्य जलद्रोणे विपाचयेत् ॥ ७३ ॥ त्रिपलं त्रिफलायाश्च दलानां तत्र दापयेत्। रसे चतुर्थशेषे तु पूतशीते प्रदापयेत् ॥ ७४ ॥ तुलां गुडस्य तत्तिष्ठेन्मासार्धं घृतभाजने। तन्मात्रया पिबेन्नित्यमर्शोभ्यः प्रविमुच्यते ॥ ७५ ॥ ग्रहणीपाण्डुरोगघ्नं वातवर्चोऽनुलोमनम्। दीपनं चारुचिघ्नञ्च दन्त्यरिष्टमिमं विदुः ॥ ७६ ॥ पात्रेऽरिष्टादिसन्धानं धातकीलोध्रलेपिते ॥ ७७ ॥

दन्तीमूल, चित्रकमूल, दशमूल हरएक ८ तोले। इन्हें २५ सेर ४८ तोले जल में पाक करे। उसमें त्रिफला (मिश्रित) के पत्तों के २४ तोले चूर्ण को डाल दे। जब पाक होकर ६ सेर १२ तोले शेष रहे तब उस जल को छानकर

ठण्डा होने पर उसमें १० सेर गुड़ मिलाकर मिट्टी के चिकने पात्र में, १५ दिन तक मुख बन्द करके रक्खे। फिर, छानकर मात्रा से रोगियों को सेवन करावे। इसके सेवन से मस्से, ग्रहणी तथा पाण्डु आदि रोग नष्ट होते हैं। यह वात तथा पुरीष का अनुलोमन करता है। धातकी तथा लोध्र से लिप्त पात्र में अरिष्ट का सन्धान करना चाहिए। मात्रा—१। तोला से २॥ तोले तक ॥ ७२-७७ ॥

बृहत्कासीसाद्य तैल।

कासीसं सैन्धवं कृष्णा शुण्ठी कुष्ठञ्च लाङ्गली। शिलाभिदश्वमारश्च दन्ती जन्तुघ्नचित्रकम् ॥ ७८ ॥ तालकं कुनटी स्वर्णक्षीरी चैतैः पचेद्भिषक्। तैलं स्नुह्यर्कपयसा गवां मूत्रं चतुर्गुणम् ॥ ७९ ॥ एतदभ्यङ्गतोऽर्शांसि क्षारेणेव पतन्ति हि। क्षारकर्मकरं ह्येतन्न च सन्दूषयेद्वलिम् ॥ ८० ॥

तिल्ली का तेल ४ सेर। कल्क के लिये द्रव्य—कसीस, सेंधा नमक, पीपल, सोंठ, कूठ, कलिहारी, पाषाणभेद, कनेर की जड़, दन्तीमूल, वायविडङ्ग, चित्रक, हरताल, मैनसिल, चोक, थूहर का दूध, आक का दूध मिलित १ सेर, गोमूत्र १६ सेर, इस तेल का विधिपूर्वक पाक करके इसे मस्सों पर लगाने से मस्से दूर गिर जाते हैं। इसका प्रभाव क्षार की तरह है। यह गुदा की वलि को दूषित नहीं करता है ॥ ७८-८० ॥

कासीसाद्य तैल।

कासीसं दन्तिसिन्धूत्थकरवीरामलैः पचेत्। तैलमर्कपयोमिश्रमभ्यङ्गात् पायुकीलजित् ॥ ८१ ॥

तिल्ली का तेल १ सेर, कांजी ४ सेर। कल्कार्थ—कसीस, दन्तीमूल, सेंधा नमक, कनेर, आंवला प्रत्येक ४ तोले। इसका विधिपूर्वक पाक करके थोड़ा सा मदार का दूध मिलाकर लगाने से मस्से नष्ट होते हैं ॥ ८१ ॥

पिप्पल्याद्य तैल।

पिप्पली मधुकं बिल्वं शताह्वां मदनं वचाम्। कुष्ठं शुण्ठी पुष्कराख्यं चित्रकं देवदारु च ॥ ८२ ॥ पिष्ट्वा तैलं विपक्तव्यं द्विगुणक्षीरसंयुतम्। अर्शसां मूढवातानां तच्छ्रेष्ठमनुवासनम् ॥ ८३ ॥ गुदनिःसरणं शूलं मूत्रकृच्छ्रप्रवाहिकाम्। कट्यूरुपृष्ठदौर्बल्यमानाहं वङ्क्षणाश्रयम् ॥ ८४ ॥ पिच्छास्रावं गुदे शोथं वातवर्चोविनिग्रहम्। उत्थानं बहुशो यच्च जयेच्चैवानुवासनात् ॥ ८५ ॥

तिल्ली का तेल ४ सेर, दूध ८ सेर जल १६ सेर। कल्कार्थ द्रव्य—पीपल, मुलहठी, बेल की छाल, सोया, मैनफल, बच, कूठ, सोंठ, पुष्करमूल, चित्रक तथा देवदारु मिलित १ सेर। इस तेल के अनुवासन से मस्से, मूढ़वात, गुदाभ्रंश, शूल, मूत्रकृच्छ्र, प्रवाहिका, दुर्बलता, अफरा, पिच्छास्राव, गुदा की सूजन और मलबन्ध आदि रोग नष्ट होते हैं ॥ ८२-८५ ॥

उदावर्त्तपरीता ये ये चात्यर्थं विरूक्षिताः। विलोमवाताः शूलार्त्तास्तेष्विष्टमनुवासनम् ॥ ८६ ॥

जिन्हें उदावर्त हो, जो अत्यन्त रूखे हों या जिनकी वायु नहीं खुलती हो एवं जिन्हें शूल हो उन्हें अनुवासन कराना चाहिए ॥ ८६ ॥

षट्पलक घृत।

सक्षारैः पञ्चकोलैस्तु पलिकैस्त्रिगुणोदकैः। समं क्षीरं घृतप्रस्थं ज्वरार्शःप्लीहकासनुत् ॥ ८७ ॥

गोघृत १२८ तोले, दूध १२८ तोले। कल्क द्रव्य—यवक्षार, पीपल, पीपलामूल, चव्य, चित्रक और सोंठ प्रत्येक ८ तोले। जल ४ सेर ६४ तोले। इस घृत का विधिपूर्वक पाक करके मस्से, प्लीहा तथा खांसी आदि रोगों में सेवन कराना चाहिए ॥ ८७ ॥

व्योषाद्य घृत।

व्योषगर्भं पलाशस्य त्रिगुणे भस्म वारिणि। साधितं पिबतः सर्पिः पतन्त्यर्शांस्यसंशयम् ॥ ८८ ॥

गोघृत ४ सेर, ढाक के खार का जल १२ सेर। कल्कद्रव्य--त्रिकटु मिलित १ सेर। इस घृत के सेवन से निश्चय ही मस्से गिर जाते हैं ॥ ८८ ॥

चव्यादि घृत।

चव्यं त्रिकटुकं पाठां क्षारं कुस्तुम्बुरूणि च। यमानीं पिप्पलीमूलमुभे च विडसैन्धवे ॥ ८९ ॥ चित्रकं बिल्वमभयां पिष्ट्वा सर्पिर्विपाचयेत्। शकृद्वातानुलोम्यार्थं जाते दध्नि चतुर्गुणे ॥ ९० ॥ प्रवाहिकां गुदभ्रंशं मूत्रकृच्छ्रं परिस्रवम्। गुदवङ्क्षणशूलञ्च घृतमेतद्व्यपोहति ॥ ९१ ॥

गौ का घृत ४ सेर, दही १६ सेर, जल १६ सेर। कल्क के लिये द्रव्य—चव्य, त्रिकटु, पाठा, जवाखार, धनियाँ, अजवायन, पीपलामूल, बिड़लवण, सेंधा नमक, चित्रक, बेल की छाल, हड़ मिलाकर १ सेर। विधिपूर्वक पाक करके इस घृत का सेवन करावे। इसके सेवन से पुरीष तथा वात का अनुलोमन होता है एवं प्रवाहिका, गुदभ्रंश, मूत्रकृच्छ्र, गुदा का शूल तथा वङ्क्षणशूल आदि रोग नष्ट होते हैं ॥८९-९१॥

कुटजाद्य घृत।

कुटजफलवल्ककेशरनीलोत्पललोध्रधातकीकल्कैः। सिद्धं घृतं विधेयं शूलरक्तार्शसां भिषजा ॥ ९२ ॥

गोघृत ४ सेर। कल्क के लिये द्रव्य—इन्द्रजौ, कुड़ा की छाल, नागकेसर, नीला कमल, लोध, धाय के फूल सब मिलाकर १ सेर, जल १६ सेर। विधिपूर्वक पाक करके शूल एवं खूनी बवासीर में सेवन कराना चाहिए ॥ ९२ ॥

सुनिषण्णकचाङ्गेरी घृत।

अवाक्पुष्पी बला दार्वी पृश्निपर्णी त्रिकण्टकम्। न्यग्रोधोदुम्बराश्वत्थशुङ्गाश्च द्विपलोन्मिताः ॥ ९३ ॥ कषाय एष पेष्यास्तु जीवन्ती कटुरोहिणी। पिप्पली पिप्पलीमूलं मरिचं देवदारु च ॥ ९४ ॥ कलिङ्गं शाल्मलीपुष्पं वीरा चन्दनमञ्जनम्। कट्फलं चित्रकं मुस्तं प्रियङ्ग्वतिविषे स्थिरा ॥ ९५ ॥ पद्मोत्पलानां किञ्जल्कः समङ्गा सनिदिग्धिका। बिल्वमोचरसे पाठा भागाः स्युः कार्षिकाः पृथक् ॥ ९६ ॥ चतुःप्रस्थशृतं प्रस्थं कषायमवतारयेत्। त्रिंशत्पलानि तु प्रस्थो विज्ञेयो द्विपलाधिकः ॥ ९७ ॥ सुनिषण्णकचाङ्गेर्योः प्रस्थौ द्वौ स्वरसस्य च। सर्वैरेतैर्यथोद्दिष्टैर्घृतप्रस्थं विपाचयेत् ॥ ९८ ॥ एतदर्शःस्वतीसारे त्रिदोषे रुधिरस्रुतौ। प्रवाहणे गुदभ्रंशे पिच्छासु विविधासु च ॥ ९९ ॥ उत्थाने चातिबहुशः शोथशूलगुदामये। मूत्रग्रहे मूढवाते मन्दाग्नावरुचावपि ॥ १०० ॥ प्रयोज्यं विधिवत्सर्पिर्बलवर्णाग्निवर्द्धनम्। विविधेष्वन्नपानेषु केवलं वा निरत्ययम् ॥ १०१ ॥

सोया, खरेटी, दारुहल्दी, पृश्निपर्णी, गोखरू, बड़ के अंकुर, गूलर के पेड़ की कोपलें, पीपल की कोपलें हरएक ८ तोले। पान के लिये जल ४ सेर ३२ तोले, अवशिष्ट क्वाथ १२८ तोले। कल्क द्रव्य—जीवन्ती, कुटकी, पीपल, पीपलामूल, क्षीरकाकोली, लाल चन्दन, रसौत, कट्फल, चित्रक, मोथा, प्रियङ्गु, अतीस, शालपर्णी, कमलकेशर, नील कमल की केशर, मजीठ, छोटी कटेरी, बेल, मोचरस, पाठा; हरएक दो दो तोले। चौपतिया तथा चाँगेरी हरएक का स्वरस २ सेर १६ तोले, घृत डेढ़

सेर ८ तोले। इस घी का विधिपूर्वक पाक करके सेवन करावे। बवासीर, खून बहना, प्रवाहिका, गुदभ्रंश, पित्तश्लेष्माव, सूजन, शूल, मूत्ररोध, मूढ़वात, मन्दाग्नि, अरुचि आदि रोग इसके सेवन से नष्ट होते हैं। यह बल, वर्ण तथा जठराग्नि को बढ़ाता है॥ ९३—१०१॥

## अश्वगन्धादि धूप।

अश्वगन्धाथ निर्गुण्डी बृहती पिप्पली फलम्। धूपोऽयं स्पर्शमात्रेण ह्यर्शसां शमने हितम्॥ १०२॥

अश्वगन्धा, सम्भालू, बड़ी कटेरी, पीपल इनको अंगारों पर रखकर इस धूप को गुदद्वार पर लगाने से बवासीर के मस्से अच्छे होते हैं॥ १०२॥

## अर्कमूलादि धूप।

अर्कमूलं शमीपत्रं नृकेशाः सर्पकञ्चुकाः। मार्जारचर्म चाज्यञ्च गुदधूपोऽर्शसां हितः॥ १०३॥

आक की जड़, शमी (जांट-छोंकर) के पत्ते, सांप की केंचुली, बिल्ली का चमड़ा और घृत इनकी धूप मस्सों में लाभदायक है १०३॥

रालचूर्णस्य तैलेन सार्षपेण घृतस्य च। धूपदानेन युक्त्यार्शो रक्तस्रावो निवर्त्तते॥ १०४॥ रक्तौघशान्तये देयं गुदे कर्पूरधूमकम्॥ १०५॥

सरसों का तेल तथा राल इनका विधिपूर्वक धूम देने से मस्सों से निकलनेवाला रक्त बन्द हो जाता है। अत्यन्त रक्तस्राव के लिये गुदा में कपूर का धुआं देना चाहिए॥ १०४—१०५॥

सपद्मकेशरं सार्द्रं नवनीतं नवं लिहन्। सिताकेशरसंयुक्तं रक्तार्शसि सुखीभवेत् १०६

कमल की केशर, शहद, ताजा मक्खन, खांड तथा नागकेशर के चूर्ण को मिलाकर रक्तार्श में प्रयोग करना चाहिए॥ १०६॥

## कुटजरसक्रिया।

कुटजत्वचो विपाच्यं शतपलमार्द्रं महेन्द्रसलिलेन। यावत्स्यादरसं तद् द्रव्यं स रसस्ततो ग्राह्यः॥ १०७॥ मोचरसः समङ्गफलिनीपलांशिभिस्त्रिभिस्तैश्च। वत्सकबीजं तुल्यं चूर्णीकृतमत्र दातव्यम्॥ १०८॥ पूतोत्क्वथितः सान्द्रः स रसो दर्वीप्रलेपनो ग्राह्यः। मात्रा कालोपहिता रसक्रियैषा जयत्यसृक्स्रावम्॥ १०९॥ छागलीपयसा युक्ता पेया मण्डेनाथवा यथाग्निबलम्। जीर्णौषधश्च शालीन् पयसा छागेन भुञ्जीत॥ ११०॥ रक्तगुदजातीसारं शूलं सासृग्गुजो निहन्त्याशु। बलवच्च रक्तपित्तं रसक्रियैषा ह्युभयभागम्॥ १११॥

कुड़ा की छाल १० सेर, क्वाथार्थ जल २५ सेर ४८ तोले, बाकी क्वाथ ६ सेर ३२ तोले। इस क्वाथ को छानकर पुनः पाक करे। जब गाढ़ा हो जाय तब मोचरस, मंजीठ, प्रियंगु प्रत्येक चार-चार तोले तथा इन्द्रजौ १२ तोले। इनके चूर्ण का प्रक्षेप दे और गाढ़ा कर ले। इस औषध को यथाकाल मात्रा में सेवन कराने से रुधिर का प्रवाह रुक जाता है। अग्नि तथा बल के अनुसार बकरी के दूध, पेया अथवा मांड के अनुपान से इसे सेवन कराना चाहिए। जब औषध जीर्ण हो जाय तब शालि चावल का भात तथा बकरी का दूध आहारार्थ दे। इसके सेवन से रक्तार्श, अतिसार, शूल तथा रक्तपित्त आदि रोग नष्ट होते हैं॥ १०७-१११॥

## क्षीरगुप्त रस।

मृतसूतार्कहेमाभ्रतीक्ष्णं मुण्डञ्च गन्धकम्। मण्डूरञ्च समं ताम्रं मर्द्यं कन्यार्द्रवेर्दिनम्॥ ११२॥ अन्धमूषागतं सर्वं गतः पाच्यं दृढाग्निना। चूर्णितं मितया मासं

खादेत्तथार्शसां हितम् ॥ रसस्तीक्ष्णमुखो नाम चासाध्यमपि साधयेत् ॥ ११३ ॥

रससिन्दूर, ताम्रभस्म, स्वर्णभस्म अभ्रकभस्म, तीक्ष्ण लौहभस्म, मुण्डलौहभस्म, गंधक, मण्डूरभस्म, स्वर्णमाक्षिकभस्म इनको बराबर मात्रा में। इन्हें ग्वारपाठा के रस से एक दिन घोटकर अन्धमूषा में रख तेज अग्नि से पकाकर चूर्ण करे। मात्रा—१ रत्ती। अनुपान—सोंठ। यह रस बवासीर के मस्सों के रोग में हितकर है ॥ ११२—११३ ॥

अर्शकुठार रस।

शुद्धसूतं द्विधा गन्धमूतलौहञ्च ताम्रकम्। प्रत्येकं द्विपलं दन्ती व्योषं शूरणं तथा ॥ ११४ ॥ शुभाटङ्कयवक्षारसैन्धवं पलपञ्चकम्। पलाष्टकं स्नुहीक्षीरं द्वात्रिंशच्च गवां जलैः ॥ ११५ ॥ आपिण्डितं पचेदग्नौ खादेन्माषद्वयं ततः। रसश्चार्शःकुठारोऽयं सर्वरोगकुलान्तकः ॥ ११६ ॥

पारा २ तोले गन्धक, ८ तोले, लौहभस्म ८ तोले, तांबे की भस्म ८ तोले। दन्तीमूल, सोंठ, कालीमिर्च, पीपल, जमीकन्द, बराबोचन, सुहागा, जवाखार, सेंधा नमक प्रत्येक बीस बीस तोले। थूहर का दूध १२ तोले, और गोमूत्र १२८ तोले में उपर्युक्त सम्पूर्ण द्रव्य डालकर पाक करे। जब लड्डू बनाने योग्य हो जाय तब उतार ले। मात्रा—२ माशे। यह अर्शकुठार रस बवासीर आदि सम्पूर्ण रोगों को नष्ट करता है ॥ ११४—११६ ॥

द्वितीय अर्शकुठाररस।

भागः शुद्धरसस्य भागयुगलं गन्धस्य लोहाभ्रयोः पञ्चबिल्वाग्निहलोषणाभयरजोदन्ती च भागैः पृथक्। पञ्च स्युः स्फुटटङ्कणस्य च यवक्षारस्य सिन्धूद्भवाद्भागाः पञ्चगवां जलं सुविमलं द्वात्रिंशदेतत्पचेत् ॥ ११७ ॥ स्नुग्दुग्धं च गवां जलाद्धिशनैः पिण्डीकृतं तद्भवेत् माषैकं गुदकीलकद्रुमघटाच्छेदे कुठारो रसः ॥ ११८ ॥

शुद्ध पारा १ भाग, गन्धक २ भाग, लोहभस्म ६ भाग, अभ्रकभस्म ६ भाग, बेल, चित्रक, शुद्ध कलिहारी, कालीमिरच, हड़ और दन्तीमूल भाग, सेंधानमक २ भाग, गोमूत्र ३२ भाग, थूहर का दूध ६ भाग, थूहर के दूध को छोड़कर शेष द्रव्यों को गोमूत्र में डालकर पाक करे। पाक करते समय धीरे-धीरे थूहर के दूध को डालता जाय। जब गोंठ पड़ने लगे तब उतार ले। यह रस बवासीर को जड़ से काटने के लिए कुल्हाड़ी की तरह है। मात्रा १ माशा ॥ ११७-११८ ॥

चक्राख्य रस।

मृतमृताभ्रवैक्रान्तं ताम्रं कांस्यं समं समम्। सर्वतुल्येन गन्धेन दिनं भल्लातकैर्द्रवैः ॥ ११९ ॥ मर्दयेद्यत्नतः पश्चाद् वटी कुर्याद् द्विगुञ्जिकाम्। भक्षणाद् गुदजान् हन्ति द्वन्द्वजान् सर्वजानपि ॥ १२० ॥

रससिन्दूर अभ्रकभस्म, वैक्रान्तभस्म, तांबे की भस्म, कांसे की भस्म प्रत्येक बराबर मात्रा में ले। सबके समान गंधक को मिलावे के रस से एक दिन मर्दन कर आधी २ रत्ती की गोलियाँ बनावे। इस औषध के सेवन से मस्से नष्ट हो जाते हैं। कई आचार्यों के मतानुसार भावना के बाद १ भाग मिलावाँ डाल देना चाहिए ॥ ११९-१२० ॥

चञ्चत्कुठार रस।

रसगन्धकलौहानां प्रत्येकं भागयुग्मकम् त्रिकटुदन्तिकुष्ठैकं षड्भागं लाङ्गलस्य च ॥ १२१ ॥ क्षारसैन्धवटङ्कानां प्रत्येकं भागपञ्चकम्। गोमूत्रस्य च द्वात्रिंशत्स्नुहीक्षीरं तथैव च ॥ १२२ ॥ यावच्च पिण्डितं सर्वं तावन्मृद्वग्निना

पचेत्। रक्तिद्वयं ततः खादेद्दिवास्वप्नादि वर्जयेत् ॥ १२३ ॥ रसश्चार्शःकुठारोऽय-मर्शसां कुलनाशनः ॥ १२४ ॥

पारा, गन्धक, लोहभस्म हरएक २ भाग। त्रिकटु, दन्ती हरएक ३ भाग। कलिहारी ४ भाग। जवाखार, सेंधा नमक, सुहागा हरएक २ भाग। गोमूत्र ३२ भाग, थूहर का दूध ३२ भाग। इसका मन्द अग्नि पर पाक करे। मात्रा—२ रत्ती। इसके सेवन काल में दिन में सोना मना है। यह सब प्रकार के अर्शों को नष्ट करता है ॥ १२१–१२४ ॥

जातीफलादि वटी।

जातीफलं लवङ्गञ्च पिप्पली सैन्धवं तथा। शुण्ठी धुस्तूरबीजञ्च दरदं टङ्कणं तथा ॥ १२५ ॥ समं सर्वं विचूर्ण्याथ जम्बाम्भसा विमर्दयेत्। जातीफलादि-वटिकेयमर्शोऽग्निमान्द्यनाशिनी ॥१२६॥

जायफल, लौंग, पीपल, सेंधानमक, सोंठ धतूरे के बीज, शिंगरफ, सुहागा हरएक को बराबर मात्रा में मिलाकर नींबू के रस से मर्दन कर दो-दो रत्ती की गोलियां बनावे। इनके सेवन से मन्दाग्नि तथा बवासीर नष्ट हो जाती है ॥ १२५–१२६ ॥

अष्टाङ्ग रस।

गन्धं रसेन्द्रं मृतलोहकिट्टं फलत्रयं व्यूषणवह्निभृङ्गम्। कृत्वा समं शाल्मलि-कामृदूचीरसेन यामत्रितयं विमर्द्य ॥ माष-प्रमाणं गदितानुपानैः सर्वाणि चार्शांसि हरेद्रसस्य ॥ १२७ ॥

गन्धक, पारा, मण्डूरभस्म, त्रिफला, त्रिकटु, चित्रक, भृङ्गराज इनको बराबर मात्रा में मिला-कर सेमल तथा गिलोय के रस से तीन पहर घोट कर उक्त अनुपानों से बवासीर में इस रस को सेवन कराना चाहिए। मात्रा—१ माशा ॥ १२७ ॥

पञ्चानन वटी।

मृतसूताभ्रलौहानि मृतार्कगन्धकैः सह। सर्वाणि समभागानि भल्लातं सर्व-तुल्यकम् ॥ १२८ ॥ वन्यशूरणकन्दो-त्थैर्द्रवैः पलमितैः पृथक्। मर्दयेद्दिनमेक-ञ्च माषमात्रं पिबेद्घृतैः ॥ १२९ ॥ भक्षणाद्धन्ति सर्वाणि चार्शांसि च न संशयः। असाध्येष्वपि कर्त्तव्या चिकित्सा शङ्करोदिता ॥ १३० ॥ कुष्ठरोगं निह-न्त्याशु मृत्युरोगविनाशिनी ॥ १३१ ॥

रससिन्दूर, अभ्रकभस्म, लोहभस्म, ताम्र-भस्म, गन्धक हरएक १ तोला। भिलावाँ ५ तोले। इन सबको जङ्गली जमीकन्द के ८ तोले रस से दिन भर घोटकर उड़द की बराबर गोली बनावे। अनुपान घृत। मृत्युरूप अर्श रोग को नष्ट करनेवाली यह वटी कुष्ठरोग को शीघ्र ही नष्ट करती है ॥ १२८–१३१ ॥

शिलागन्धक वटिका।

शिलागन्धकयोश्चूर्णं पृथक् भृङ्ग-रसाप्लुतम्। सप्ताहं भावयेत्सर्पिर्मधुभ्या-ञ्च विमर्दयेत् ॥ १३२ ॥ अर्शसां वातानु-लोम्यार्थं हताग्निबलवर्द्धनम्। गुञ्जाष्ट-मांशकं खादेत् कुष्ठादिरहिता नरः ॥ १३३ ॥

मैनसिल तथा गन्धक में भाँगरा के रस की सात भावना देकर घृत तथा शहद से घोटे और गोली बनावे। मात्रा—⅛ रत्ती से ½ रत्ती। बवासीर के रोगी को सेवन कराने से यह वातानुलोमन करती एवं अग्नि तथा बल को बढ़ाती है ॥ १३२–१३३ ॥

व्योषाद्यशूरण मोदक।

मरिचमहौषधचित्रकशूरणभागा यथोत्तरं द्विगुणाः। सर्वसमो गुडभागः सेव्योऽयं मोदकः प्रसिद्धफलः ॥ १३४ ॥ ज्वलनं ज्वलयति जाठरमुन्मूलयति गुल्म-

शूलगदान् । निःशेषयति श्लीपदमस्य-मर्शांसि नाशयत्याशु ॥ १३५ ॥

कालीमिर्च १ तोला, सोंठ २ तोले, चीता की जड़ ४ तोले और जमीकन्द ८ तोले। गुड़ १२ तोले। इसके लड्डू बनाकर सेवन करे। यह प्रत्यक्ष फल देनेवाला मोदक जठराग्नि को प्रदीप्त करता, गुल्म तथा शूल को निर्मूल करता और श्लीपद रोग को निःशेष करके बवासीर को अवश्य ही शीघ्र नष्ट करता है ॥ १३४–१३५ ॥

बृहच्छूरण मोदक ।

शूरणषोडशभागा वह्नेरष्टौ महौषध-स्यातः। अर्द्धेन भागयुक्तिर्मरिचस्य ततो-ऽपि चार्द्धेन त्रिफला ॥ १३६ ॥ कणा समूला तालीशारुष्करकृमिघ्नानाम् । भागा महौषधसमा दहनांशा तालमूली च ॥ १३७ ॥ भागः शूरणतुल्यो दातव्यो वृद्ध-दारकस्यापि। भृङ्गेले मरिचांशे सर्वाण्ये-कत्र सञ्चूर्ण्य ॥ १३८ ॥ द्विगुणेन गुडेन युतः सेव्योऽयं मोदकः प्रकामघनैः । गुरुवृष्यमोऽपरहितोऽपि तरे पुष्पद्वयं कुर्यात् ॥ १३९ ॥ भस्मकमनेन जनितं पूर्व-मगस्त्यस्य प्रयोगराजेन । भीमस्य मारुते-रपि येन तौ महाशनौ जातौ ॥ १४० ॥ अग्निबलवृद्धिहेतुर्न केवलं शूरणो महा-वीर्य्यः । प्रभवति शस्त्रक्षाराग्निभिर्विना ऽर्शसामेषः ॥ १४१ ॥ श्वयथुश्लीपद-गरजिद् ग्रहणीश्च तथा हिक्कामनिलजाम् । नाशयति वलीपलितं मेधां कुरुते वृष्यतरं च ॥ १४२ ॥ हिक्कां श्वासं कासं सराज-यक्ष्मप्रमेहांश्च । प्लीहानमपाथोऽशं हन्तीति रसायनं पुंसाम् ॥ १४३ ॥

जमीकन्द १६ भाग, चीता की जड़ ८ भाग, सोंठ ४ भाग, कालीमिर्च २ भाग तथा बहेड़ा, आँवला, पीपरि, पिपलामूल, तालीश पत्र, भिलावा और वायविडङ्ग, प्रत्येक चार-चार भाग। तालमूली (मुसली) ८ भाग, विधारा १६ भाग, भँगरा और छोटी इला-यची दो-दो भाग, इन सबको खूब महीन कूट पीसकर छान ले और इन सबसे दुगना गुड़ ले मोदक बनाकर सेवन करे। इसके सेवन के समय चिकने तथा भारी पदार्थ खाने चाहिए, क्योंकि ऐसे पदार्थ न खाने से यह मोदक उपद्रव पैदा कर देता है। पहले समय में इस प्रयोग-राज ने अगस्त्यजी, भीम, और हनुमान्‌जी के भी भस्मक रोग उत्पन्न कर दिया था, जिससे वे बहुत भोजन करनेवाले हो गये थे। यह महापराक्रमी शूरणमोदक केवल अग्निबल का ही बढ़ानेवाला नहीं है किन्तु बिना शस्त्र, क्षार और अग्निकर्म के भी बवासीर को नष्ट कर सकता है। यह मोदक शोथ श्लीपद (फीलपाँव) और विषदोष, ग्रहणीरोग वातज हिचकी, वली पलित, श्वास खाँसी, राजयक्ष्मा, प्रमेह और कठिन तिल्ली रोग को नष्ट करता है और बुद्धिवर्धक, वृष्य तथा रसायन है। मात्रा— १ तोला ॥ १३६–१४३ ॥

श्रीबाहुशाल गुड़ ।

त्रिवृत्तेजोवती दन्ती श्वदंष्ट्रा चित्रकं शटी । गवाक्षी मुस्तविश्वाह्वविडङ्गानि हरीतकी ॥ १४४ ॥ पलोन्मितानि चैतानि पलान्यष्टावरुष्करात् । षट्पलं वृद्धदारस्य शूरणस्य च षोडश ॥ १४५ ॥ जलद्रोण-द्वये क्वाथ्यं चतुर्भागावशेषितम् । पूतं तु तं रसं भूयः क्वाथ्येभ्यस्त्रिगुणो गुडः ॥ १४६ ॥ लेहं पचेत्तु तं तावद् यावद्दर्वी-प्रलेपनम् । अवतार्य ततः पश्चाच्चूर्णी-कृतानि दापयेत् ॥ १४७ ॥ त्रिवृत्तेजो-वतीकन्दचित्रकान् द्विपलांशिकान् । एला-त्वङ्मरिचं चापि गजाह्वा चापि षट्पलाम् ॥ १४८ ॥ द्वात्रिंशत्पलमेतत्र चूर्णं दत्वा

निधापयेत्। ततो मात्रां प्रयुञ्जीत जीर्णे क्षीररसाशनः ॥ १४९ ॥ पञ्चगुल्मान् प्रमेहांश्च पाण्डुरोगं हलीमकम्। अर्शांसि सर्वाणि तथा सर्वोदराणि च ॥ १५० ॥ दीपयेद् ग्रहणीं मन्दां यक्ष्माणमपकर्षति। पीनसे च प्रतिश्याये आढ्यवाते तथैव च ॥ १५१ ॥ अयं सर्वगदेष्वेव कल्याणो लेह उत्तमः। दुर्नामारिरयञ्चांशु दृष्टो वारसहस्रशः ॥ १५२ ॥ भवन्त्येनं प्रयुञ्जानाः शतवर्षं निरामयाः। आयुषो दैर्घ्यजननो वलीपलितनाशनः ॥ १५३ ॥ रसायनवरश्चैव मेधाजनन उत्तमः। गुडः श्रीबाहुशालोऽयं दुर्नामारिः प्रकीर्त्तितः ॥ १५४ ॥ सुखमर्दः खरस्पर्शो गन्धवर्णरसान्वितः। पीडितो भजते मुद्रां गुडः पाकमुपागतः ॥ १५५ ॥

निशोथ, सेमवल, जमालगोटे की जड़, गोखुरू, चीता की जड़, कचूर, इन्द्रायण, नागरमोथा, सोंठ, वायविडङ्ग, हड़ ये सब चार-चार तोले, भिलावें १२ तोले, विधारा २४ तोले; जमीकन्द ६४ तोले, इन सबको कूटकर 1 मन 11 सेर 16 तोले जल में पकावे। जब चौथाई भाग अवशेष रहे तब छानकर उसमें १८ सेर ३० तोले गुड़ मिलाकर पाक करे। जब कलछी में चिपकने लगे तब उतारकर उसमें ये औषधें पीसकर मिलावें— निसोथ सेमवल, जमीकन्द, चीता की जड़; प्रत्येक आठ-आठ तोले। छोटी इलायची, दालचीनी, कालीमिर्च और तेजपात; प्रत्येक ४ तोले। ये सब चीजें मिलाकर छानकर रख दें। बलानुसार मात्रा का सेवन करे। औषधि हजम हो जाने पर दूध और मांसरस का भोजन करे। इसके सेवन से पाँचों प्रकार के गुल्मरोग, प्रमेह, पाण्डुरोग, हलीमक तथा सब प्रकार की बवासीर और सब प्रकार के उदररोग अच्छे हो जाते हैं। यह मन्द ग्रहणी को दीपन करता है, यक्ष्मारोग को दूर करता है। पीनस, जुकाम, आढ्यवात और सब रोगों में लाभदायक है तथा हजारों बार का अनुभूत है। इसके सेवन करने से मनुष्य सौ वर्ष तक नीरोग रहते हैं यह आयु का बढ़ानेवाला, वलीपलित का नाशक, बुद्धिवर्धक और श्रेष्ठ रसायन है। इस श्रीबाहुशाल गुड़ को बवासीर का शत्रु कहते हैं। जब सुख से मसला जाय, छूने में खरदरा हो, गन्ध, वर्ण और रस से युक्त हो तथा दबाने से अँगुली आदि की रेखाओं के चिह्न पड़ जायें तब गुड़पाक को उत्तम समझना चाहिए ॥ १४४–१५५ ॥

## प्राणदा गुटिका।

त्रिपलं शृङ्गवेरस्य चतुर्थं मरिचस्य च। पिप्पल्या कुडवार्द्धश्च चव्याश्च पलमेव च ॥ १५६ ॥ तालीशपत्रस्य पलं पलार्द्धं केशरस्य च। द्वे पले पिप्पलीमूलादर्द्धकर्षञ्च पत्रकात् ॥ १५७ ॥ सूक्ष्मैला कर्षमेकाञ्च कर्षञ्च त्वङ्मृणालयोः। गुडात् पलानि त्रिंशच्च चूर्णमेकत्र कारयेत् ॥ १५८ ॥ कोलप्रमाणा गुटिका प्राणदेति प्रकीर्तिता। पूर्वं भक्ष्याच पश्चाच्च भोजनस्य यथाबलम् ॥ १५९ ॥ मद्यं मांसरसं यूषं क्षीरं तोयं पिबेदनु। हन्यादर्शांसि सर्वाणि सहजान्यस्रजान्यपि ॥ १६० ॥ वातपित्तकफोत्थानि सन्निपातोद्भवानि च। पानात्यये मूत्रकृच्छ्रे वातरोगे गलग्रहे ॥ १६१ ॥ विषमज्वरे च मन्देऽग्नौ पाण्डुरोगे तथैव च। कृमिहृद्रोगिणां चैव गुल्मशूलार्त्तिनां तथा ॥ १६२ ॥ श्वासकासपरीतानामेषा स्यादमृतोपमा। गुण्ठ्याः स्थानेऽभया देया विड्ग्रहे पित्तपायुजे ॥ १६३॥

भागदायां सिता देया चूर्णमानाच्चतुर्गुणा। अम्लपित्ताग्निमान्द्यादौ प्रयोज्या गुदजातुरे ॥ १६४ ॥ पक्त्वैनं गुटिकाः कार्या गुडेन सितयाथवा। परं हि वह्निसंसर्गाल्लघिमानं भजन्ति ताः ॥ १६५ ॥

सोंठ १२ तोले, कालीमिर्च १६ तोले, पीपरि ८ तोले, चव्य ४ तोले, तालीशपत्र ४ तोले, नागकेसर २ तोले, पिपरामूल ८ तोले, तेजपात आधा तोला, छोटी इलायची १ तोला, दालचीनी १ तोला और कमल की नाल १ तोला; सबको खूब पीसकर छान ले और १ ॥ सेर गुड़ की चाशनी बनाकर उसमें इस चूर्ण को मिलाकर छः छः माशे की गोलियां बना ले। इसको भागोत्तरा गुटिका कहते हैं। बलानुसार भोजन के पहले तथा पीछे इसका सेवन करे। अनुपान—मदिरा, मांसरस, यूष, दूध अथवा जल, इसके खाने से सब प्रकार की बादी और खूनी, वातिक, पैत्तिक, कफज और सन्निपातज बवासीर नष्ट होती है। वातात्यय, मूत्रकृच्छ्र, वातरोग, गलग्रह, विषमज्वर, मन्दाग्नि, पाण्डुरोग, कृमिरोग, हृद्रोग, गुल्मशूल, श्वास और खांसी; इन रोगों में यह अमृत के समान है। यदि बवासीर में कब्जियत रहती हो तो सोंठ के स्थान में हड़ देना चाहिए। पैत्तिक बवासीर में कुल चूर्ण से चौगुने मिसरी मिलाकर गुटिका बनाना चाहिए। इसको अम्लपित्त, अग्निमान्द्य तथा गुदा में उत्पन्न होनेवाले रोगों में भी देना चाहिए। गुड़ अथवा मिसरी को पकाकर ही डालना चाहिए क्योंकि अग्नि के संयोग से वे हलकी हो जाती हैं ॥ १५१-१६५ ॥

रक्तार्श की चिकित्सा

रक्तार्शांस्युपेक्षेत रक्तमादौ स्रवेद्भिषक्। दुष्टास्रे निगृहीते तु शूलानाहासृग्गदाः ॥ १६६ ॥

खूनी बवासीर का पहले रक्त बह जाने देना चाहिए, रोकना न चाहिए, क्योंकि खराब खून के रोकने से शूल, अफारा और रक्त की व्याधियां हो जाती हैं ॥ १६६ ॥

शक्रकाथः सविश्वो वा किंवा बिल्वशलाटवः। योज्या रक्तार्शसस्तद्वज्ज्योत्स्निकामूललेपनम् ॥ १६७ ॥

इंद्रजौ के काढ़े में सोंठ मिलाकर अथवा बेल की गिरी में सोंठ मिलाकर खाना रक्तार्श में हितकर है। इसी तरह कड़ुई तुरई की जड़ का लेप करना भी हितकर है ॥ १६७ ॥

नवनीततिलाभ्यासात् केशरनवनीतशर्कराभ्यासात्। दधिसरमथिताभ्यासात् गुदजाः शाम्यन्ति रक्तवहाः ॥ १६८ ॥

मक्खन और तिल या नागकेसर, मक्खन और शक्कर अथवा दही की मलाई का मठ्ठा (घोल) बनाकर सेवन करने से खूनी बवासीर शान्त होती है।

समङ्गोत्पलमोचाह्वतिरीटतिलचन्दनैः। छागक्षीरं प्रयोक्तव्यं गुदजे शोणितापहम् ॥ १६९ ॥

मँजीठ, नीलकमल, मोचरस, पठानीलोध, तिल और लाल चन्दन; इनका समभाग चूर्ण बकरी के दूध में मिलाकर पीने से बवासीर का खून बन्द हो जाता है ॥ १६९ ॥

कोमलं नलिनीपत्रं पिष्ट्वा खादेत् सशर्करम्। प्रातराजं पयः पीत्वा रक्तस्रावाद्विमुच्यते ॥ १७० ॥

कमलिनी के कोमल पत्तों को खूब महीन पीसकर और शक्कर मिलाकर बकरी के दूध से प्रातःकाल सेवन करे तो बवासीर का खून बहना बन्द हो ॥ १७० ॥

सशर्करं कृष्णतिलस्य कल्कं वस्तीपयोभिः पिबति प्रभाते। सद्यो हरत्येव गुदोत्थरक्तं योगोऽयमित्थं गिरिशप्रयुक्तः ॥ १७१ ॥

काले तिलों के कल्क में शक्कर मिलाकर प्रातःकाल बकरी के दूध के साथ पीने से बवासीर का खून शीघ्र मन्द होता है। इस प्रयोग को शिवजी ने प्रयुक्त किया है ॥ १७१ ॥

कौटजं कल्कमादाय पिष्ट्वा तक्रेण बुद्धिमान् । पीत्वा रक्तार्शसो रक्तस्रुतिमाशु नियच्छति ॥ १७२ ॥

कुड़ा की छाल के कल्क को छाछ के साथ पीसकर पीने से बवासीर का खून शीघ्र बन्द हो जाता है ॥ १७२ ॥

तण्डुलसलिलोपेतं कल्कमपामार्गजं पिबतः । क्षीरमनुपाय्य भीरोर्गुदजाः शाम्यन्ति रक्तवहाः ॥ १७३ ॥ दाडिमस्य रसः पेयः शर्करामधुरीकृतः ॥ १७४ ॥

लटजीरा के पञ्चाङ्ग के कल्क को चावल के पानी के साथ पीकर ऊपर से दूध पीने से खूनी बवासीर का खून बन्द हो जाता है। अथवा अनार के रस में शक्कर मिलाकर पीना चाहिए ॥ १७३–१७४ ॥

## चोलबद्धरस ।

गुडूचिकासत्त्व समं रसेन्द्रं गन्धं समांशं निखिलेन मर्द्दरेः । विमर्दयेच्छालमलिका भवद्भिः स्याद्बोलबद्धो मधुयुक् त्रिमाषः ॥ १७५ ॥ रक्तार्शसां नाशकृदेष सूतः पित्तार्शसां पित्तजविद्रधेश्च रक्तप्रमेहस्य-सृदरस्य चाऽपि ॥ १७६ ॥

स्त्रीणां प्रवाहस्य भगन्दरस्य ।

गिलोय का सत्त्व शुद्ध पारा और गन्धक समान भाग तथा हीरा दोखिन सबको समान ले कज्जली में सबको मिलाकर सेमल के मुसले के स्वरस अथवा छाल के काढ़े में घोट कर १-२ माशे की गोलियां बना कर रख दें इनमें से १-१ गोली रोगानुसार अनुपान के साथ देने से खूनी और पित्तज बवासीर पित्तज विद्रधि रक्त प्रमेह स्त्रियों के प्रदर और भगन्दर आदि व्याधियों को मिटाता है। विशेष अनुभूत है ॥ १७५-१७६

## कुटजलेह ।

कुटजत्वक् पलशतं जलद्रोणे विपाचयेत् । अष्टभागावशिष्टं तु कषायमवतारयेत् ॥ १७७ ॥ वस्त्रपूतं पुनः क्वाथं पचेल्लेहत्वमागतम् । भल्लातकं विडङ्गानि त्रिकटुत्रिफले तथा ॥ १७८ ॥ रसाञ्जनं चित्रकञ्च कुटजस्य फलानि च । वाचामतिविषां बिल्वं प्रत्येकञ्च पलं पलम् ॥ १७९ ॥ गुडात् पलानि त्रिंशच्च चूर्णीकृत्य विनिःक्षिपेत् । मधुनः कुडवं दद्याद् घृतस्य कुडवं तथा ॥ १८० ॥ एष लेहः शमयति अर्शो रक्तसमुद्भवम् । वातिकं पैत्तिकंचापि श्लैष्मिकं सान्निपातिकम् ॥ १८१ ॥ ये च दुर्नामजा रोगास्तान् सर्वान्नाशयत्यपि । अम्लपित्तमतीसारं पाण्डुरोगमरोचकम् ॥ १८२ ॥ ग्रहणीमार्दवं कार्श्यं श्वयथुं कामलामपि । अनुपानं घृतं दद्यान्मधु तक्रं जलं पयः ॥ रोगानीकविनाशाय कौटजो लेह उत्तमः ॥ १८३ ॥

५ सेर कुड़ा की छाल को २३ सेर ४८ तोले जल में पकावे। जब ३ सेर १६ तोले क्वाथ शेष रहे तब उतारकर कपड़े से छान ले। फिर इसमें १॥ सेर गुड़ और ३२ तोले घी डालकर पाक करे। जब पाक तैयार हो जाय तब भिलावाँ, वायबिडंग, सोंठ, मिर्च, पीपल, हड़, बहेड़ा, आँवला, रसौत, चीता की जड़, इन्द्रजौ, बच, अतीस और बेल की गिरी, प्रत्येक चार-चार तोले लेकर चूर्ण कर पाक में मिला दें। फिर ठंडा होने पर ३२ तोले शहद मिलाकर रख ले। यह कुटजावलेह खूनी बवासीर तथा वातिक, पैत्तिक, कफज और सान्निपातिक एवं सब प्रकार की बवासीर को नष्ट करता है। तथा अम्लपित्त, अतीसार, पाण्डुरोग, अरुचि, ग्रहणी, दुर्बलता, शोथ

और कामला आदि रोगों के समूहों को भी नष्ट करता है । अनुपान—घी, शहद, छाछ, जल और दूध ॥ १७७—१८३ ॥

## अग्निमुख लौह ।

त्रिवृच्चित्रकनिर्गुण्डीस्नुहीमुण्डितिका जटा । भल्यकस्तोऽप्यलिका जलद्रोणे विपाचयेत् ॥ १८४ ॥ पलत्रयं विडङ्गाच्च व्योषं कर्षत्रयं पृथक् । त्रिफलायाः पलं पञ्च शिलाजतुपलं न्यसेत् ॥ १८५ ॥ दिव्यौषधिहतस्यापि धकहतस्य वा । पलद्वादशकं देयं रुक्मलौहस्य चूर्णितम् ॥ १८६ ॥ पलैश्चतुर्विंशत्याऽथान्मधुशर्करयोरपि । घनीभूते सुशीते च दापयेद्वत-रिते ॥ १८७ ॥ एतदग्निमुखं नाम दुर्नामान्तकरं परम् । मन्दमग्निं करोत्याशु कालाग्निसमतेजसम् ॥ १८८ ॥ पर्वताश्चापि जीर्यन्ति प्राशनादस्य देहिनाम् । गुरुवृष्यान्नपानानि पयोमांसरसो हितः ॥ १८९ ॥ दुर्नामपाण्डुश्वयथुकुष्ठप्लीहोदरापहम् । अकालपलितं हन्यादामवातं गुदामयम् ॥ १९० ॥ न स रोगोऽस्ति यश्चापि न निहन्ति क्षणादिदम् । करीरकाञ्जिकादीन ककारादीनि वर्जयेत् । स्रवत्यतोऽन्यथा लौहं देहाम् किट्टञ्च दुर्जरम् ॥ १९१ ॥

निसोथ, चीता की जड़ निर्गुंडी, थूहर, गोरखमुण्डी और भूमि आँवला, ये सब पचीस बत्तीस तोले । जल २२ सेर ४८ तोले शेष काढ़ा ६ सेर ३२ तोले । इसमें शक्कर १ सेर १६ तोले और घी १ सेर १६ तोले । तथा मैनसिल अथवा कड़ाई ( कृत्रायुध ) से मारे हुए रुक्मलौह की भस्म ४८ तोले डाल कर पाक करे । जब पाक सिद्ध हो जाय तब बायविडंग १२ तोले, सोंठ ३ तोले मिर्च ३ तोले, पीपरि २ तोले, त्रिफला मिलित २० तोले, शिलाजीत ४ तोले; इनके चूर्ण का प्रक्षेप देकर गाढ़ा करके उतार ले । ठंडा हो जाने पर १ सेर १६ तोले शहद मिला दे । यह अग्निमुख नाम लौह बवासीर का नाश करने में श्रेष्ठ है । यह मन्द जठराग्नि को कालाग्नि के समान तेज करता है । इसके खाने से पत्थर भी पच जाता है । भारी पदार्थ, वृष्य ( धातुओं को बढ़ानेवाले ), अन्नपान, दूध और मांसरस खाना हितकर है । इसके सेवन से बवासीर, पाण्डु, शोथ, कुष्ठ, प्लीहा, उदररोग, बाल सफेद होना, आमवात और गुदा के रोग नष्ट होते हैं । ऐसा कोई रोग नहीं है जिसको यह क्षणमात्र में न नष्ट कर सके । इसके सेवन में करीर और कांजी आदि ककारादि वस्तुओं से परहेज करना चाहिए अन्यथा शरीर से लौह तथा लौहकिट्ट बाहर निकल जाते हैं ॥ १८४—१९१ ॥

## माणशूरणाद्य लौह ।

माणशूरणभल्लातत्रिवृद्दन्तीसमन्वितम् । त्रिकत्रयसमायुक्तमयोदुर्नामनाशनम् ॥ १९२ ॥

मानकन्द, जमीकन्द, भिलावां, निसोथ, जमालगोटा की जड़, सोंठ, मिर्च, पीपरि हड़ बहेड़ा, आँवला, बायबिडंग, नागरमोथा और चीता की जड़ इनको समभाग लेकर लोहभस्म में मिलाकर सेवन करे । इससे बवासीर नष्ट हो जाती है ॥ १९२ ॥

## बोलपर्पटी रस ।

सूतगन्धक संकज्जलिकायाः । पर्पटीसमयुता सम भागम् । बोल चूर्ण विहितं प्रतिवाप्यं । स्याद्रसोऽयम सुगामय हारी ॥ १९३ ॥ वल्लयुग्ममयुगलं प्रतिदेयं । शर्करामधु युतः किल दत्तः । रक्तपित्तगुदजस्रुति योनि स्वावमाशु विनिवारयतीशः ॥ १९४ ॥

* समभाग शुद्धपारे और गन्धक की कज्जली कर लोहे की कलछी में बेर के कोयलों पर गला कर कज्जली के बराबर हीरा दक्खिन का चूर्ण डाल कर गोबर पर रक्खे हुए केले के पत्ते पर डाल कर पर्पटी बना ले ठंडा होने पर निकाल कर रख छोड़े। अथवा कज्जली की पर्पटी बनाकर उसकी बराबर हीरा दक्खिन का चूर्ण मिलाकर रख छोड़े। इसमें से ३ रत्ती की मात्रा शक्कर और मधु के साथ देने से रक्तपित्त खूनी बवासीर वोमिनाथ इन सबको यह मिटता है विशेष अनुभूत है ॥ १९३--१९४ ॥

## नित्योदित रस।

मृतसूतार्कलौहाभ्रं विषं गन्धं समं समम् । सर्वतुल्यांशभल्लातफलमेकत्र चूर्णयेत् ॥ १९५ ॥ द्रवैः शूरणमाणोत्थैर्भाव्यं खल्वे दिनत्रयम् । माषमात्रं लिहेदाज्यै रसश्चार्शांसि नाशयेत् । रसो नित्योदितो नाम गुदोद्भवकुलान्तकः ॥ १९६ ॥

पारे की भस्म (रससिन्दूर), ताम्रभस्म, लोहभस्म, अभ्रकभस्म, मीठा तेलिया और गन्धक; ये सब समभाग ले। सबकी बराबर भिलावां का चूर्ण; इन सबको एक में मिलाकर और खरल में रखकर जमींकन्द तथा मानकन्द के रस की तीन-तीन दिन भावना देकर उड़द के बराबर गोलियां बना ले। इस रस को घृत के साथ खाने से सब प्रकार की बवासीर नष्ट हो जाती है। यह नित्योदित नामक रस गुदा के रोगों का अन्त करनेवाला है ॥ १९५--१९६ ॥

## रसगुटिका।

रसस्तुर्यादिकास्तुल्या विडङ्गमरिचाभ्रकाः । शक्रापालङ्कजरसे खल्लयित्वा पुनः पुनः ॥ १९७ ॥ रत्तिमात्रा गुदार्शोघ्नी वह्नेरत्यर्थदीपनी ॥ १९८ ॥

रससिन्दूर १ भाग तथा चौथाई से, बायबि- मिर्च और अभ्रकभस्म चार-चार भाग। सबको एकत्रकर जंगली पालक के शाक के रस में बार-बार खरल करके एक-एक रत्ती की गोलियां बना ले। इसके सेवन से गुदा का अर्शरोग नष्ट होता है और जठराग्नि का दीपन होता है ॥ १९७--१९८ ॥

कण्टकिफलान्तर्मुसलक्षारो गोरोचनाजलम् । लेपमात्रेण विस्राव्य रसान् हन्ति गुदांकुरान् ॥ १९९ ॥

कटहल के फल का मुसरा (कटहल के फल के भीतर जो दण्डा के समान होता है वह कटहल का मुसरा कहा जाता है) का क्षार और गोरोचन की जल में पीसकर लेप करने से बवासीर के मस्सों का पानी निकल जाता है और मस्से नष्ट हो जाते हैं ॥ १९९ ॥

भावितं रजनीचूर्णैः स्नुहीक्षीरे पुनः पुनः । बन्धनात् सुदृढं सूत्रं छिनत्त्यर्शो न संशयः ॥ २०० ॥

सूत (डोरा) को थूहर के दूध से युक्त हल्दी के चूर्ण में बार-बार भिगोकर मस्सों पर कसकर बांध देने से निःसंदेह मस्से कट-कट कर गिर जाते हैं ॥ २०० ॥

वेगावरोधं स्त्रीपृष्ठयानमुत्कटकासनम् । यथास्वं दोषलश्चान्नमर्शसः परिवर्जयेत् ॥ २०१ ॥

मल-मूत्रादि वेगों का रोकना, स्त्रीप्रसंग, घोड़े आदि की पीठ पर सवारी, उत्कटक आसन पर बैठना और दुष्ट (सड़े गले बासी) अन्नों का खाना बवासीर के रोगी को त्याग देना चाहिए ॥ २०१ ॥

## चन्द्रप्रभा गुटिका।

क्रिमिरिपुदहनव्योषत्रिफलामरदारुचव्यभूनिम्बम् । मागधीमूलमुस्तं सराटीवचाधातुमाक्षिकं चैव ॥२०२॥ लवण-

त्रारनिशायुगकुस्तुम्बुरुगजकणातिविषा ॥ २०३ ॥ कर्षांशकान्येव समानि कुर्यात् पलाष्टकं चाश्मजतोर्दद्यात् । निष्पत्र-शुद्धस्य पुरस्य धीमान् पलद्वयं लौहरजस्तथैव ॥ २०४ ॥ सिताचतुष्कं पलमत्र योज्यं निकुम्भकुम्भत्रिसुगन्धियुक्तम् । चन्द्रप्रभेयं गुडिका प्रयोज्या अर्शांसि निर्नाशयते यथैव ॥ २०५ ॥ भगन्दरं पाण्डुककामलां च निर्नष्टवह्नेः कुरुते च दीप्तिम् । हन्त्यामयान् पित्तकफानिलोत्थान् नाडीगते मर्मगते व्रणे च ॥ २०६ ॥ ग्रन्थ्यर्बुदे विद्रधिराजयक्ष्ममेहे भगन्दरे प्रवले च योज्या । चक्षुःक्षये चाश्मरिमूत्रकृच्छ्रे शुक्रप्रवाहेऽप्युदरामये च ॥ २०७ ॥ तक्रानुपानं त्वथ मस्तुपानं छागो रसो जाङ्गलजो रसो वा । पयोऽथवा शीतजलानुपानं बलेन नागस्तुरगो जवेन ॥ २०८ ॥ दृष्ट्या सुपर्णः श्रवणैर्वराहः कान्त्या रतीशो धिषणश्च बुद्ध्या । न पानभोज्ये परिहार्यमस्ति च शीतवातातपमैथुनेषु ॥ २०९ ॥ शम्भुं समभ्यर्च्य कृतप्रणामं प्राप्ता गुडी चन्द्रमसः प्रसादात् ॥ २१० ॥ शुक्रदोषानि-हन्त्यष्टौ प्रमेहानपि विंशतिम् । वलीपलित-निर्मुक्तो वृद्धोऽपि तरुणायते ॥ २११ ॥ वृद्धवैद्योपदेशेन पलार्द्धं रसगन्धकम् केवलं मूर्च्छितं वापि पलं वा दापयेद्रसम् ॥ २१२ ॥ अभ्रकञ्च क्षिपेत्कश्चित् पलमानं भिषग्वरः संमर्द्य मधुसर्पिर्भ्यामाटौ रक्तिचतुष्टयम् ॥ २१३ ॥ भक्ष्यं हृद्यया तथा-युक्तं यावन्मासचतुष्टयम् । त्रिफला-जातानां कर्षमात्रं पृथक्-पृथक् ॥ २१४ ॥

वायविडङ्ग, चीता की जड़, सोंठ मिर्च, पीपलि, हड़, बहेड़ा, आंवला, देवदारु, चव्य, चिरायता, पिपलामूल, नागरमोथा, कपूर, बच, स्वर्णमाक्षिक की भस्म, सेंधा नमक, कालानमक, जवाखार, सज्जीखार, हल्दी, दारुहल्दी, धनियाँ, गजपीपलि और अतीस ये सब एक एक तोला, शिलाजीत ३२ तोले, पत्ररहित शुद्ध गुग्गुल ८ तोले, लोहभस्म ८ तोले, मिसरी १६ तोले, वंशलोचन ४ तोले, दालचीनी ४ तोले, तेजपात ४ तोले और* छोटी इलायची ४ तोले इन सबको कूट पीसकर गोली बनावे। इस चन्द्रप्रभागुटिका के प्रयोग करने से छह प्रकार की बवासीर, भगन्दर, पाण्डु, कामला और वातिक पैत्तिक, तथा कफज रोग नष्ट होते हैं। नष्ट जठराग्नि को दीप्त करती है। नासूर, मर्मव्रण, ग्रन्थि, अर्बुद, विद्रधि, राजयक्ष्मा, प्रमेह और प्रबल प्रदर, अक्षिरोग, अश्मरी (पथरी), मूत्रकृच्छ्र, शुक्रप्रमेह और उदर-विकार में इसका प्रयोग करना चाहिए। अनुपान छाछ, दही का तोड़ (पानी), बकरी के मांस का रस, अथवा जंगली जीवों के मांस का रस, दूध या जल इसके खाने से बल में हाथी, वेग में घोड़े, दृष्टि में गरुड़, सुनने में वराह, शोभा में कामदेव और बुद्धि में बृहस्पति के समान होता है। खाने-पीने और शीत, हवा, घाम और मैथुन आदि का परहेज नहीं है। शिवजी का पूजन कर इसका सेवन करना चाहिए। यह चन्द्रप्रभा गुटिका चन्द्रमा की कृपा से प्राप्त हुई है। इसके सेवन से आठ प्रकार के शुक्रदोष, बीस प्रकार के प्रमेह और वलीपलित और रोगों से छूटकर वृद्ध मनुष्य भी जवान हो जाता है। वृद्ध वैद्यों के उपदेश से इस योग में पारा २ तोले

* अर्श और प्रमेह आदि में तो यह बड़ी लाभदायक है ही, परन्तु कटीली चौराई के मूल के क्वाथ अथवा खिचे हुए अर्क के साथ देने से प्रदररोग में भी इसका अद्भुत चमत्कार देखा है। [illegible] प्रयोग से [illegible] है।

और गन्धक २ तोले की कजली करके अथवा केवल रससिन्दूर ही ४ तोले छोड़ना चाहिए। कोई वैद्य इस योग में ४ तोले अभ्रकभस्म भी छोड़ते हैं। इसको घी और शहद में मिलाकर १ रत्ती की मात्रा से प्रारंभ कर बलानुसार ४ मासे तक युक्तिपूर्वक सेवन करे। इस गुटिका के खाने के पश्चात् निसोथ, इन्द्रायण की जड़, छोटी इलायची, दालचीनी और तेजपात; प्रत्येक एक-एक तोला लेकर बनाये हुए चूर्ण में से थोड़ा-थोड़ा सेवन करना चाहिए ॥२०९-२१४॥

अभयारिष्ट।

अभयायास्तुलामेकां मृद्वीकार्द्धतुलां तथा। विडङ्गस्य दशपलं मधूककुसुमस्य च ॥२१५॥ चतुर्द्रोणे जले पक्त्वा द्रोणमेवावशेषयेत्। शीतीभूते रसे तस्मिन् पूते गुडतुलां क्षिपेत् ॥ २१६ ॥ श्वदंष्ट्रां त्रिवृतां धान्यं धातकीमिन्द्रवारुणीम्। चव्यं मधुरिकां शुण्ठीं दन्तीं मोचरसं तथा ॥ २१७ ॥ पलयुग्ममितं सर्वं पात्रे महति मृण्मये। क्षिप्त्वा संरुध्य तत्पात्रं मासमात्रं निधापयेत् ॥ २१८ ॥ ततो जातरसं ज्ञात्वा परिस्राव्य रसं नयेत्। बलं कोष्ठञ्च वह्निञ्च वीक्ष्य मात्रां प्रयोजयेत् ॥ २१९ ॥ अर्शांसि नाशयेच्छीघ्रं तथाष्टावुदराणि च। वर्चोमूत्रविबन्धघ्नो वह्निं संदीपयेत् परम् ॥ २२० ॥

हड़ ५ सेर, मुनक्का २॥ सेर, वायविड़ंग ४० तोले, महुआ के फूल ४० तोले इन सबको २ मन २१ सेर १२ तोले जल में पकावे। जब २५ सेर २६ तोले अवशिष्ट रहे तब उसको ठंडा करके छान ले। इसमें ५ सेर गुड़ और आठ-आठ तोले गोखुरू, निसोथ, धनिया, धाय के फूल, इन्द्रायण, चव्य, सौंफ, सोंठ, दन्तीमूल और मोचरस मिलाकर मिट्टी के एक बड़े घड़े में डालकर और उसका मुख बन्द करके एक महीने तक धरा रहने दे। जब अरिष्ट तैयार हो जाय तब उसको छानकर रख ले। बल, कोठा और जठराग्नि की परीक्षा करके रोगानुसार मात्रा की व्यवस्था करनी चाहिए। यह अरिष्ट सब प्रकार की बवासीर, आठ प्रकार के उदररोग और मल-मूत्र का अवरोध इन सब रोगों को नष्ट कर अग्नि को दीप्त करता है ॥ २१५-२२० ॥

अर्शरोग में वर्जनीय पदार्थ।

आनूपमामिषं मत्स्यं पिण्याकं दधि पिष्टकम्। माषान् करीरं निष्पावं बिल्वं तुम्बीमुपोदिकाम् ॥ २२१ ॥ पक्वाम्रं शालुकं सर्वं विष्टम्भीनि गुरूणि च। आतपं जलपानानि वमनं वस्तिकर्म च ॥ २२२ ॥ प्रत्यग्वन्त्यपरान्तोत्थनदीनां सलिलानि च। विरुद्धानि च सर्वाणि मारुतं पूर्वदिग्भवम् ॥ २२३ ॥ वेगावरोधं स्त्रीपृष्ठयानमुत्कटकासनम्। यथास्वं दोषलञ्चान्नमर्शसः परिवर्जयेत् ॥ २२४ ॥

आनूप देश के पशु-पक्षियों का मांस, मछली, तिल की खल, दही, पिट्ठी के बने पदार्थ, उड़द, करीर, मटर, बेल, लौकी, पोई का शाक, पका आम, कमल ककड़ी आदि जलकन्द, सम्पूर्ण विष्टम्भी तथा गुरु पदार्थ, धूप में बैठना, अधिक जल पीना, वमन करना, वस्ति तथा पश्चिम की ओर बहनेवाली नदियों का जल, सब वीर्य विरुद्ध पदार्थ तथा पूर्व दिशा की पवन, मल-मूत्र, वीर्य आदि के वेगों को रोकना, मैथुन, सवारी, उत्कटासन ( घोड़े ऊँट आदि की सवारी ), अन्य वात आदि दोषों को कुपित करनेवाले सब आहार-विहार बवासीर के रोगी को छोड़ देना चाहिए ॥ २२१-२२४ ॥

अर्श में पथ्य।

विरेचनं लेपनमस्रमोक्षः क्षाराग्निशस्त्राचरितं च कर्म। पुरातना लोहितशालयश्च सषष्टिकाश्चापि यवाः कुलत्थाः

२२५ ॥ गोधाशल्लकीपाठीनमयूरकूर्म श्वाविच्छल्लिकाजखरोष्ट्रकौशाः । तरक्षुपारावतभृगालकाका येऽन्येऽपि मांसाश्मसहाश्च तेऽपि ॥ २२६ ॥ पटोलपत्रूरसोनशिग्रुपुनर्नवाशूरणवास्तुकानि । जीवन्तिका दन्तशठः सुरा च शुण्ठी वयस्था नवनीतकश्च ॥ २२७ ॥ कक्कोलधात्री रुचकं कपित्थमौष्ट्राणि मूत्राज्यपयांसि चापि । भल्लातकं सार्षपजश्च तैलं गोमूत्रसौवीरतुषोदकानि । वातापहं यच्च यदग्निकारि तदन्नपानं हितमर्शसेभ्यः ॥ २२८ ॥

विरेचन, प्रलेप, रक्तनिर्हरण (फस्द खुलाना), क्षार, अग्नि एवं शस्त्र का प्रयोग करना चाहिए। अन्नों में—पुराने लाल शालिधायल, साँठी के चावल, जौ और कुलथी श्रेष्ठ हैं। मांसों में-गोह, चूहा, लोमड़ी, मौ, ऊँट, कछुआ, सेह गुरुचक, चकरी, गदहा, बिडाल, बानर, तरक्षु, बाघ, घोड़ा, गीदड़, कौआ इनके मांस तथा अन्य भी जो प्रसह पक्षी हैं उनका मांस हितकर होता है। शाकों में—परवल; शाकिम्ब, लहसुन, चित्रक, पुनर्नवा, जमीकन्द, बथुआ, जीवन्तीशाक, आम्बीर, शराब, सोंठ, इन तथा मक्खन हितकर है। शीतलचीनी, आँवला, काकामाचक, कैथ, ऊँट का मूत्र, घी तथा दूध, भिलावाँ, सरसों का तेल, गोमूत्र, सौवीर, काँजी तथा अन्य बात को नष्ट करनेवाले तथा अग्नि-प्रदीपक अन्नपान अर्शरोगियों को लाभदायक है। २२५-२२८ ॥

खूनी बवासीर में विशेष विधि।

यत्पथ्यं यदपथ्यं च वक्ष्यते रक्तपित्तिनाम्। रक्तार्शोरोगिणां तत्तदपि विद्याद्विशेषतः ॥ २२९ ॥

रक्तपित्त के रोगियों के लिये जो पथ्यापथ्य उचित है उसी का पालन रक्तार्श के रोगियों को करना चाहिए ॥ २२९ ॥

इति श्रीसरयूप्रसादत्रिपाठिविरचितायां भैषज्यरत्नावल्या गुणप्रभाभिधायां व्याख्यायामर्शोऽधिकारः समाप्तः।

इति भैषज्यरत्नावल्यामर्शोऽधिकारः समाप्तः।

---

## अथ भगन्दराधिकारः।

गुदस्य श्वयथुं दृष्ट्वा विशोध्य शोधयेत्ततः। रक्तावसेचनं कार्यं यथा पाकं न गच्छति ॥ १ ॥

उपवासादिना संशोध्य वमनविरेचनादिना शोधयेत्। रक्तावसेचनं जलौकादिभिः।

गुदा के आसपास सूजन देखकर शोषण, शोधन और रक्तमोक्षण करना चाहिए, जिससे कि सूजन पक न सके ॥ १ ॥

उपवास आदि से शोधन करके वमन और विरेचन आदि से शोधन करना तथा जोंक आदि के द्वारा रक्त निकलवाना चाहिए।

तिला ज्योतिष्मती कुष्ठं लाङ्गली गिरिकर्णिका। शताह्वा त्रिवृतादन्त्यः शोधनाय भगन्दरे ॥ २ ॥

काले तिल, मालकांगनी, कूट, कलिहारी, अपराजिता (कोयल) की जड़, सोया, निसोत और दन्ती की जड़, इनको इकट्ठा कर भगन्दर पर शोधनार्थ लेप करना चाहिए ॥ २ ॥

रसाञ्जनादि योग।

रसाञ्जनं हरिद्रे द्वे मञ्जिष्ठा निम्बपल्लवाः। त्रिवृत्तेजोवतीदन्तीकल्को नाडीव्रणापहः ॥ ३ ॥

रसौत, हल्दी, दारुहल्दी, मँजीठ, नीम के पत्ते, निसोत, मालकांगनी की जड़ तथा दन्ती की जड़ इनके कल्क का लेप करने से भगन्दर और नाड़ीव्रण नष्ट होते हैं ॥ ३ ॥

सुमना वटपत्राणि गुडूची विश्वभेषजम्। ससैन्धवस्तक्रपिष्टो लेपो हन्ति भगन्दरम् ॥ ४ ॥

चमेली के पत्ते, बड़ के पत्ते, गिलोय, सोंठ, सेंधानमक, इन्हें एकत्र कर छाछ से पीस कर लेप देने से भगन्दर नष्ट होता है ॥ ४ ॥

कुष्ठं त्रिवृत्तिलादन्ती मागध्याः सैन्धवं मधु। रजनी त्रिफला तुत्थं हितं व्रणविशोधनम् ॥ ५ ॥

कूट, निसोत, काले तिल, दन्ती की जड़, पीपल, सेंधा नमक, शहद, हल्दी, त्रिफला और तूतिया इन्हें पीसकर लेप देने से व्रण शुद्ध होता है ॥ ५ ॥

भगन्दर में जम्बूकमांस का उपयोग।

भक्षयेज्जाम्बुकं मांसं प्रकारैर्व्यञ्जनादिभिः। अजीर्णवर्जी मासेन मुच्यते तु भगन्दरात् ॥ ६ ॥

जिस भगन्दर के रोगी को अजीर्ण न हो उसे नाना प्रकार के व्यञ्जनों के साथ एक मास तक गीदड़ का मांस सेवन कराने से भगन्दर रोग से मुक्ति होती है ॥ ६ ॥

खदिरादि क्वाथ।

खदिरत्रिफलाक्वाथो महिषीघृतसंयुतः। विडङ्गचूर्णसंयुक्तो भगन्दरविनाशनः ॥ ७ ॥

खादिरकाष्ठ और त्रिफला इनका एकत्र विधिपूर्वक क्वाथ कर भैंस का घी और वायविडङ्ग का चूर्ण डालकर पीने से भगन्दर नष्ट होता है ॥ ७ ॥

वटपत्रेष्टकाशुण्ठीगुडूच्यः सपुनर्नवा। सुपिष्टाः पिडिकावस्थे लेपः शस्तो भगन्दरे ॥ ८ ॥

बरगद के कोमल पत्ते, ईंट का चूर्ण, सोंठ, गिलोय और गदहपुरैना (सांठी) को खूब पीसकर भगन्दर के फोड़े पर लेप करना उत्तम होता है ॥ ८ ॥

स्नुह्यादि वर्ति।

स्नुह्यर्कदुग्धदार्वीभिर्वर्तिं कृत्वा विचक्षणः। भगन्दरगतिं ज्ञात्वा पूरयेत् तां प्रयत्नतः ॥ ९ ॥ एषा सर्वशरीरस्थां नाडीं हन्यान्न संशयः ॥ १० ॥

थूहर का दूध, आक का दूध और दारुहल्दी; इनको एक में घोटकर बत्ती बनावे। इस बत्ती को भगन्दर में रक्खे। यह बत्ती सब शरीर के नाड़ीव्रणों (नासूरों) को नष्ट करती है ॥ ९-१० ॥

तिलादि और निशादि लेप।

तिलाभयालोध्रमरिष्टपत्रं निशे वचालोध्रमगारधूमम्। भगन्दरे नाड्युपदंशयोश्च दुष्टव्रणे शोधनरोपणोऽयम् ॥११॥ समभागपिष्टलेपद्वयम्।

तिल, हड़, लोध और नीम के पत्ते अथवा हल्दी, दारुहल्दी, बच, लोध और गृहधूम; इनका लेप करने से भगन्दर, नासूर, उपदंश के घाव और दुष्ट घाव को शोधन और रोपण होता है ॥ ११ ॥

दोनों लेपों की ओषधियाँ समभाग लेना चाहिए।

त्रिफलारससंपिष्टविडालास्थिप्रलेपनात्। भगन्दरं निहन्त्याशु दुष्टव्रणहरं परम् ॥ १२ ॥

त्रिफला के रस में बिडाल (बिलार) की हड्डी पीसकर लेप करे तो भगन्दर और दुष्ट घाव शीघ्र अच्छे हो जाते हैं ॥ १२ ॥

भगन्दरं प्रत्यहं तु सुधौतं त्रिफलाम्बुना। त्रिफलारसपिष्टेन मार्जारास्थ्ना च लेपयेत् ॥ १३ ॥

प्रतिदिन भगन्दर को त्रिफला के क्वाथ से धोकर त्रिफला के रस से पिसी हुई बिलार की हड्डी का लेप करना चाहिए ॥ १३ ॥

खरास्रपक्वभूरोहचूर्णलेपो भगन्दरम्।

हन्ति दन्त्यग्निमूलत्रिफलालेपस्तद्वच्छुनोऽस्थि वा ॥ १४ ॥

गदहे के मूत्र में कँगुओं को पकाकर और पीसकर लेप करने से अथवा जमालगोटे की जड़, चीता की जड़ और त्रिफला को त्रिफला के रस में कुत्ते की हड्डी को पीसकर लेप करने से भगन्दर रोग नष्ट होता है ॥ १४ ॥

नवकार्षिक गुग्गुलु।

त्रिफलापुरकृष्णानां त्रिपञ्चैकांशयोजिता। गुटिका शोथगुल्मार्शोभगन्दरहिता स्मृता ॥ १५ ॥

सम्मिलित त्रिफला ३ तोले, शुद्ध गूगुल ५ तोले और छोटी पीपल १ तोला; इनको जल में पीसकर गोली बनावे। यह गोली शोथ, गुल्म, बवासीर और भगन्दर के लिए लाभदायक है ॥ १५ ॥

सप्तविंशति गुग्गुलु।

त्रिकटुत्रिफलामुस्तविडङ्गामृतचित्रकम्। शट्येलापिप्पलीमूलं हपुषा सुरदारु च ॥ १६ ॥ तुम्बुरुः पुष्करं चव्यं विशाला रजनीद्वयम्। विड्सौवर्चले क्षारौ सैन्धवं गजपिप्पली ॥ १७ ॥ यावन्त्येतानि चूर्णानि तावद् द्विगुणगुग्गुलुः। कोलमात्रां गुटिकां भक्षयेन्मधुना सह ॥१८॥ कासं श्वासं तथा शोथमर्शांसि च भगन्दरम्। हृच्छूलं पार्श्वशूलञ्च कुक्षिबस्तिगुदे रुजम् ॥ १९ ॥ अश्मरीं मूत्रकृच्छ्रञ्च अन्त्रवृद्धिं तथा कृमीन्। चिरज्वरोपसृष्टानां क्षयोपहतचेतसाम् ॥ २० ॥ आनाहञ्च तथोन्मादं कुष्ठानि चोदराणि च। नाडीदुष्टव्रणान् सर्वान् प्रमेहं श्लीपदं तथा ॥ २१ ॥ सप्तविंशतिको ह्येष सर्वरोगनिषूदनः ॥ २२ ॥

सोंठ, कालीमिर्च, पीपल, हड़, बहेड़ा, आँवला, नागरमोथा, वायविडङ्ग, गिलोय, चीता की जड़, कचूर, छोटी इलायची, पीपलामूल, हाऊबेर, देवदारु, धनियाँ, चिरायता, चव्य, इन्द्रायण की जड़, हल्दी, दारुहल्दी, बिड्नमक, काला नमक, जवाखार, सज्जीखार, सेंधा नमक, गजपीपल; ये सब समभाग ले और इन सबके चूर्ण से दुगुना गूगुल ले। इसकी बेर के बराबर गोलियाँ बनाकर शहद के साथ सेवन करे। खाँसी, श्वास, शोथ, बवासीर, भगन्दर, हृदयशूल, पसली का शूल, तथा कुक्षि, बस्ति और गुदा की पीड़ा, अश्मरी, मूत्रकृच्छ्र, अन्त्रवृद्धि, कृमिरोग, पुराना बुखार, क्षय, आनाह, उन्माद, कुष्ठ, उदरविकार, नासूर, दुष्टव्रण, सब प्रकार के प्रमेह और श्लीपद; इन रोगों को यह सप्तविंशति गूगुल नष्ट करता है ॥ १६-२२ ॥

भगन्दरहर रस।

सूतस्य द्विगुणेन शुद्धबलिना कन्यापयोभिस्त्र्यहं शुद्धं ताम्रमयःसमस्ततुलितं पात्रे निधायोपरि ॥ स्वेद्यं यामयुगञ्च भस्मपिठरे निम्बूफलैः सप्तधा पाकं तत्पुटयेद्भगन्दरहरो गुञ्जोन्मितः स्यादिति ॥ २३ ॥

पारा १ भाग, शुद्ध गन्धक २ भाग इनकी कज्जली कर घीकुवार के रस में ३ दिन घोटे। इस कज्जली में ताम्रभस्म और लोहभस्म मिलाकर भस्मयन्त्र में दो प्रहर स्वेदन करे, पश्चात् स्वाङ्ग शीतल होने पर नींबू के रस से सात भावना देकर पुटपाक करना चाहिए। मात्रा—१ रत्ती। यह भगन्दर को हरता है ॥ २३ ॥

विष्यन्दन तैल।

चित्रकार्कौ त्रिवृत्पाठे मलपूहयमारकौ। सुधां वचां लाङ्गलिकीं हरितालं सुवर्चिकाम् ॥ २४ ॥ ज्योतिष्मतीञ्च संहृत्य तैलं धीरो विपाचयेत्। एतद्विष्यन्दनं नाम तैलं दद्याद् भगन्दरे ॥ शोधनं रोपणञ्चैव सावर्ण्यकरणं परम् ॥ २५ ॥

चित्रकादीनां कल्कः जलेन चतुर्गुणेन पाकः। विष्यन्दयति विशोधयतीति विष्यन्दनम्।

चीता की जड़, मदार की जड़, निसोत, पाढ़ी, कठगूलर, कनेर, थूहर, वच कलिहारी, हरताल, सज्जीखार, मालकांगुनी सब मिलाकर ३२ तोले, तेल १२८ तोले। उपर्युक्त ओषधियों के कल्क में तेल और ६ सेर ३२ तोले पानी डालकर तेल सिद्ध करे। यह विष्यन्दन नाम तैल लगाने से भगन्दर का शोधन और रोपण होता है तथा भगन्दरपीड़ित स्थान का वर्ण शरीर के तुल्य हो जाता है॥ २४-२५॥

चित्रक आदि के कल्क से चतुर्गुण जल में पाक करना चाहिए। विष्यन्दन का अर्थ शोधन करना है।

### करवीराद्य तैल।

करवीरनिशादन्तीलाङ्गलीलवणाग्निभिः। मातुलुङ्गार्कवत्साह्वैः पचेत्तैलं भगन्दरे॥ २६॥

कनेर, हल्दी, जमालगोटे की जड़, कलिहारी, सेंधानमक, चीता की जड़, बिजौरा नीबू की जड़, आक की जड़ और कुड़ा की छाल; इनको चार-चार तोले लेकर कल्क बनावे। इस कल्क में २ सेर तैल और ८ सेर जल डालकर यथाविधि तैल सिद्धकर भगन्दर में लगाने से भगन्दर अच्छा हो जाता है॥ २६॥

### निशाद्य तैल।

निशार्कक्षीरसिन्धूग्निपुरारवहनवत्सकैः। सिद्धमभ्यञ्जने तैलं भगन्दरविनाशनम्॥ २७॥

कल्क के लिए हल्दी, आक का दूध, सेंधानमक, चीता की जड़, गूगुल, कनेर की जड़ और कुरैया की छाल, प्रत्येक पाँच-पाँच तोले। तैल २ सेर, पाकार्थ जल ८ सेर। यथाविधि तैल सिद्ध कर भगन्दर पर लगाने से भगन्दर अच्छा हो जाता है॥ २७॥

### सैन्धवाद्य तैल।

सैन्धवं चित्रकं दन्ती पलाशश्चेन्द्रवारुणी। गोमूत्रेऽष्टगुणे पक्त्वा ग्राह्यमष्टावशेषितम्॥ २८॥ क्वाथपादं पचेत्तैलं कल्कः कृष्णायसं मृतम्। पचेत्तैलावशेषश्च तेन लेप्यं भगन्दरम्॥ २९॥ असाध्यं साधयत्याशु पक्वं कृमिकुलान्वितम्॥ ३०॥

सेंधा नमक चीता की जड़, जमालगोटे की जड़, ढाक के बीज और इन्द्रायण की जड़; सब औषधियाँ मिलाकर ४ सेर, गोमूत्र ३२ सेर, अवशिष्ट क्वाथ ४ सेर, कड़ुआ तेल १ सेर, लोहभस्म १६ तोले। विधिपूर्वक तेल सिद्ध कर भगन्दर पर लेप करने से कृमियों से युक्त असाध्य भगन्दर भी अच्छा होता है॥ २८-३०॥

### नारायण रस।

दरदं पार्वतीपुष्पं कुनटा पुरुषो रसः। शोणितं गन्धको दैत्यः सैन्धवातिविषा वचौ॥ ३१॥ शरपुङ्खा विडङ्गश्च यमानी गजपिप्पली। मरिचार्कौ च वरुणो धूनकश्च हरीतकी॥ ३२॥ संमर्द्य कटुतैलेन गुटिकां कारयेद्भिषक्। नाडीव्रणं व्रणाढ्यं गण्डमालां विचर्चिकाम्॥ ३३॥ चिरदुष्टव्रणं दद्रुपूतिकर्णं शिरोगदम्। हस्तपादपरिस्फोटं दुःसाध्यश्च भगन्दरम्॥ एतान् रोगान् निहन्त्याशु मत्तिभमिव केशरी॥ ३४॥

ग्रन्थान्तरे अस्यैव व्रणगजांकुश इति संज्ञा।

सिंगरफ, सौराष्ट्रमृत्तिका, रसौत, शुद्ध मैनसिल, सुवर्णभस्म, पारा, ताम्रभस्म, गन्धक, लोहभस्म, सेंधानमक, अतीस, वच, सरफोंका, वायविडङ्ग, अजवायन, गजपीपल, कालीमिर्च,

आक की जड़, बरना की छाल, दास और हर; इन सबको समभाग लेकर कड़ुए तेल में घोटकर गोलियाँ बनावे। यह रस नासूर, भयानक गण्डमाला, विचर्चिका, पुराना दुष्ट घाव, दाद, पूतिकर्ण, शिरोरोग, हाथ और पैरों को फूटन और दुःसाध्य भगन्दर, इन रोगों को शीघ्र ही इस प्रकार नष्ट करता है जैसे सिंह हाथी को ॥ ३१-३४ ॥

ग्रन्थान्तर में इसको भगन्दरांकुश कहते हैं। मात्रा ½ रत्ती से १ रत्ती तक।

चित्रविभाण्डक रस।

शुद्धसूतं द्विधा गन्धं कुमारीरसमर्दितम्। त्र्यहान्ते गोलकं कृत्वा ताम्रं तेन प्रलेपयेत् ॥ ३५ ॥ द्वयोस्समं भस्मपूर्णे भाण्डे रुद्ध्वा विपाचयेत्। द्वियामान्ते समुद्धृत्य स्वाङ्गशीतं विचूर्णयेत् ॥ ३६ ॥ जम्बीरस्य द्रवैः पिष्ट्वा रुद्ध्वा सप्तपुटे पचेत्। गुञ्जार्द्धं मधुनाज्येन लिह्याद्धन्ति भगन्दरम् ॥ ३७ ॥ मुषलीलशुनं चानु धारनालयुतं पिबेत्। कर्त्तव्यो मधुराहारो दिवास्वप्नञ्च मैथुनम् ॥ ३८ ॥ वर्जयेच्छीतलाहारं रसे चित्रविभाण्डके ॥ ३९ ॥

शुद्ध पारा १ तोला और गन्धक २ तोले की कजली करे और घीकुवार के रस में तीन दिन घोटकर इसका गोला बनावे। ३ तोले शुद्ध ताम्र के पत्रों पर उसका लेप करे। इन पत्रों को शरावसंपुट में बन्द कर एक हाँडी में रक्खे और ऊपर-नीचे मुक्ति कंडों की भस्म भरकर दोपहर तक अग्नि में पकावे। फिर ठंढा होने पर इसका चूर्ण कर जम्बीरी नींबू के रस में घोटकर शरावसंपुट में बन्दकर गजपुट में पकावे। इस प्रकार सात पुट दे। मात्रा ½ रत्ती। अनुपान—शहद और घी। इस रस के सेवन करने से भगन्दर नष्ट होता है। इसके खाने के बाद मुसली और लहसुन के चूर्ण को काँजी में मिलाकर पीना चाहिए। इस चित्रविभाण्डक रस के सेवन करनेवाले मनुष्य को मीठा आहार करना चाहिए और दिन में सोना, मैथुन तथा ठंढे पदार्थों का सेवन त्याग देना चाहिए ॥ ३२-३९ ॥

ताम्रप्रयोग।

ताम्रपत्रं रविक्षीरे निर्गुण्डीस्वरसे तथा। त्रिकण्टजे स्नुहीरसे ताम्रं दग्ध्वा सिञ्चेत्त्रिधा ॥ ४० ॥ रसस्यार्द्धपलं शुद्धं गन्धकस्य पलं तथा। कज्जल्यर्द्धेन जम्बीरप्लुतेन ताम्रतः पलम् ॥ ४१ ॥ परिलिप्यान्धमूषायां दद्यात् पञ्चपुटान् लघून्। संमर्द्य मधुसर्पिभ्यां लिहेद् गुञ्जार्द्धसम्मितम्। भगन्दरे सर्वभयं कार्य्यं सर्वव्रणेषु च ॥ ४२ ॥

४ तोले ताँबे के पत्रों को खूब गरम करके क्रम से मदार के दूध, सिन्दुवारी के रस, गोखरू के क्वाथ और थूहर के दूध में बुझावे। फिर शुद्ध पारा २ तोले और गन्धक ४ तोले लेकर कजली करे। इस कजली में १ तोले नींबू का रस मिलाकर ताँबे के पत्रों पर लेप करे। अन्धमूषा में बन्द करके पाँच लघुपुट देवे। इसको मधु और घी में मिलाकर ½ रत्ती की मात्रा में चाटने से यह भगन्दर और सब प्रकार के व्रणों को नष्ट करता है ॥ ४०-४२ ॥

भगन्दर में पथ्य।

सर्वत्र शालयो मुद्गा विलेपी जाङ्गलो रसः। पटोलं शिग्रुवेत्राग्रं पचुरो बालमूलकम् ॥ ४३ ॥ तिलसर्षपयोस्तैलं तिक्तवर्गो घृतं मधु। एतत्पथ्यं नरैः सेव्यं यथादोषं भगन्दरे ॥ ४४ ॥ आमेसंशोधनं लेपो लङ्घनं रक्तमोक्षणम्। पक्वे पुनः शस्त्रविधिस्तथा क्षाराग्निकर्म च ॥ ४५ ॥

शालि चावल, मूँग, विलेपी ( यवागू भेद ), अगस्ति पौधों के साग का रस, परवल, सहिजन, बेत की कोंपल, शालिञ्च. कच्ची मूली, तिल तैल सरसों का तेल, हिंगुपत्री, घी और शहद इनका दोषानुसार भगन्दर में सेवन करना चाहिए ॥ ४३-४५ ॥ भगन्दर की आमावस्था में संशोधन औषध लेप तरुण रक्तमोक्षण तथा पक्वावस्था में शस्त्र क्रिया क्षार कर्म अग्नि दाह विधि पूर्वक कराना हितकर है।

भगन्दर में अपथ्य ।

विरुद्धान्यन्नपानानि विषमाशन मात्तपम् । व्यायामं मैथुनं युद्धं पृष्ठयानं गुरूणि च । संवत्सरं परिहरेदवरूढव्रणो नरः ॥ ४६ ॥

इति भैषज्यरत्नावल्यां भगन्दराधिकारः समाप्तः ।

---

विरुद्ध अन्नपान विषमभोजन धूप व्यायाम, मैथुन, कुश्ती, घोड़े आदि की पीठ पर सवारी और गुरु भोजन, इनका घाव भर जाने के बाद भी रोगी को एक वर्ष तक सेवन न करना चाहिए ॥ ४६ ॥

इति श्रीसरयूप्रसादत्रिपाठिविरचितायां भैषज्यरत्नावल्यां रत्नप्रभाभिधायां व्याख्यायां भगन्दराधिकार समाप्त ।

---

## अथ विद्रध्यधिकारः ।

विद्रधि पर सामान्य चिकित्सा ।

जलौकापातनं शस्तं सर्वस्मिन्नेव विद्रधौ। मृदुर्विरेको लघ्वन्नं स्वेदः पित्तोद्भवं विना ॥ १ ॥

सब प्रकार के विद्रधिरोग में जोंक लगाना, हलकी जुलाब, लघु भोजन और स्वेदन हितकर है, किन्तु पित्तविद्रधि में स्वेदन न करना चाहिए ॥ १ ॥

स्रुतेऽप्यूर्ध्वमधश्चैव मैरेयाम्लसुरासवैः । पेयो वरुणकादिस्तु मधुशिग्रुरसोऽथवा ॥ २ ॥

ऊर्ध्वमार्ग अथवा अधोमार्ग से प्रवृत्त पूय में अन्तर्विद्रधि के नाश के लिये मैरेय, काँजी, सुरा, आसव, वरुणादिगण का क्वाथ तथा मधुशिग्रु ( मीठे सहिंजन ) का रस पीना चाहिए ॥ २ ॥

कज्जली योग ।

वरुणादिकषायेण रसगन्धककज्जली । भुक्ता निहन्ति मापैका बाह्यमन्तश्च विद्रधिम् ॥ ३ ॥

वरुणादि गण के क्वाथ के साथ पारा तथा गन्धक की कज्जली का सेवन करने से बाह्य तथा अन्तर्विद्रधि नष्ट होती है । मात्रा—२ रत्ती से ८ रत्ती तक ॥ ३ ॥

वरुणादि घृत ।

सिद्धं वरुणादिगणे विधिना तत्कल्के पाचितं सर्पिः । अन्तर्विद्रधिमुग्रं मस्तकशूलं हुताशमान्द्यञ्च ॥ ४ ॥ गुल्मानपि पञ्चविधान् नाशयतीदं यथाम्बु मारुसरम् । एतत्प्रातः प्रपिबेद् भोजनसमये निशास्येऽपि ॥ ५ ॥

वरुणादिगण के कल्क से विधिपूर्वक घृत पकाकर प्रातःकाल भोजन के समय और सन्ध्याकाल में सेवन कराने से अन्तर्विद्रधि, शिरोवेदना, मन्दाग्नि तथा पाँचों गुल्म नष्ट होते हैं । मात्रा—आधा तोला ॥ ४-५ ॥

प्रियङ्ग्वाद्य तैल ।

प्रियङ्गुधातकी लोध्रकट्फलं तिनिशत्वचम् । एतैस्तैलं विपक्तव्यं विद्रधौ व्रणरोपणम् ॥ ६ ॥

प्रियङ्गु, धाय के फूल, लोध, कट्फल जलवेतस की छाल, इनके कल्क से विधिपूर्वक तिल का तैल पकावे । यह तैल विद्रधि में व्रण का रोपण करता है ॥ ६ ॥

वातविद्रधि की चिकित्सा ।

वातघ्नमूलकल्कैस्तु वसातैलघृतान्वितैः । सुखोष्णो बहुलो लेपः प्रयोज्यो वातविद्रधौ ॥ ७ ॥

मांसक्वाथे यत्तैलं निःसरति सा वसा इति भानुः ।

वात की विद्रधि में वातनाशक दशमूलादि के कल्क में वसा, तेल या घी मिलाकर सुखोष्ण ( सुहाता गरम ) मोटा लेप करना चाहिए ॥ ७ ॥

मांस के क्वाथ में तेल निकलता है उसको वसा कहते हैं, यह भानुजी का मत है ।

स्वेदोपनाहाः कर्त्तव्याः शिग्रु मूल समन्विताः । यवगोधूममुद्गैश्च सिद्धपिष्टैश्च लेपयेत् ॥ विलीयते क्षणेनैवमपक्वश्चैव विद्रधिः ॥ ८ ॥

यवादिस्विन्नं कृत्वा पिष्ट्वा पुनरपि मनागुष्णं कृत्वा लेपनम् ।

सहिंजन के मूल की छाल से स्वेदन और उपनाह करना चाहिए । और जौ, गेहूँ और मूँगों को उबालकर पानी में पीसकर गरम करके लेप करने से क्षणमात्र में कच्ची विद्रधि बैठ जाती है । उबाले हुए जौ आदि को पीस कर फिर किञ्चित् उष्ण करके लेप करना चाहिए ॥ ८ ॥

पुनर्नवादारुविश्वदशमूलाभयाम्भसा । गुग्गुलं रुबुतैलं वा पिबेन्मारुतविद्रधौ ॥ ९ ॥

गदहपूरना, देवदारु, सोंठ, दशमूल और हड़ के काढ़े में गूगुल या एरण्ड का तेल मिलाकर वातविद्रधि में पीना चाहिए ॥ ९ ॥

पित्तविद्रधि की चिकित्सा ।

पैत्तिके शर्करालाजमधुकैः शारिवायुतैः । प्रदिह्यात् क्षीरपिष्टैर्वा पयस्योशीरचन्दनैः ॥ १० ॥

पैत्तिक विद्रधि में शक्कर, धान की खील, मुलेठी और अनन्तमूल का अथवा क्षीरकाकोली, खस और सफ़ेद चन्दन को दूध में पीसकर लेप करना चाहिए ॥ १० ॥

पञ्चवल्कलकल्केन घृतमिश्रेण लेपनम् । यष्ट्याह्वशारिवादूर्वानलमूलैः सचन्दनैः ॥ क्षीरपिष्टैः प्रलेपस्तु पित्तविद्रधिनाशनः ॥ ११ ॥

पीपल, बरगद, पाकड़, गूलर और बेंत की छाल के कल्क में घी मिलाकर लेप करना तथा मुलहटी, अनन्तमूल, दूब, नरसल की जड़ और लालचन्दन को दूध में पीसकर लेप करना पित्तविद्रधि को नष्ट करता है ॥ ११ ॥

श्लेष्मविद्रधि की चिकित्सा ।

इष्टकासिकतालोहगोशकृत्तुषपांशुभिः । मूत्रपिष्टैश्च सततं स्वेदयेत् श्लेष्मविद्रधिम् ॥ १२ ॥

गोमूत्रपिष्टमिष्टकादिकमुत्स्विद्य एरण्डादिपत्रैर्बद्ध्वा स्वेदः ।

ईंट, बालू, लोहचूर्ण, गौ का गोबर और धानों का तुष ; इनको मूत्र में पीसकर और गरम करके कफविद्रधि का बार-बार स्वेदन करना चाहिए । अर्थात् ईंट के चूर्ण आदिकों को गोमूत्र में पीसकर, और गरम करके एरण्ड के पत्तों से लपेटकर विद्रधि के ऊपर बाँधना चाहिए ॥ १२ ॥

रक्तज और आगन्तुक विद्रधि की चिकित्सा ।

पित्तविद्रधिवत् सर्वां क्रियां निरवशेषतः । विद्रध्योः कुशलः कुर्याद्रक्तागन्तुनिमित्तयोः ॥ १३ ॥

रक्तज और आगन्तुक विद्रधियों में चतुर वैद्य को पित्तविद्रधि की-सी ही संपूर्ण क्रिया करनी चाहिए ॥ १३ ॥

सामान्यविद्रधि की चिकित्सा ।

शोभाञ्जननिर्यूहो हिङ्गुसैन्धवसंयुतः । अचिराद्विद्रधिं हन्ति प्रातः प्रातर्निषेवितः ॥ १४ ॥

सहिजने के गोंद में हींग और सेंधानमक मिलाकर प्रतिदिन प्रातःकाल सेवन करने से शीघ्र ही विद्रधि का नाश हो जाता है ॥ १४ ॥

अन्तर्विद्रधि की चिकित्सा ।

शिग्रुमूलं जले धौतं दरपिष्टं प्रगालयेत् । तद्रसं मधुना पीत्वा हन्त्यन्तर्विद्रधिं नरः ॥ १५ ॥

सहिजने की जड़ को जल में धोकर पीस ले और वस्त्र में डालकर उसका रस निचोड़ ले फिर उसमें शहद मिलाकर पीने से अन्तर्विद्रधि नष्ट हो जाती है ॥ १५ ॥

अपक्वविद्रधि की चिकित्सा ।

श्वेतवर्षाभुवो मूलं मूलं वरुणकस्य च । जलेन क्वथितं पीतमपक्वं विद्रधिं जयेत् ॥ १६ ॥

सफेद साँठी की जड़ और वरना की जड़ का क्वाथ पीने से अपक्व विद्रधि नष्ट होती है ॥ १६ ॥

शमयति पाठामूलं क्षौद्रयुतं तण्डुलाम्भसा पीतम् । अन्तर्भूतं विद्रधिमुद्धतमाश्वेव मनुजस्य ॥ १७ ॥ अपक्वे त्वेतदुद्दिष्टं पक्वे तु व्रणवत् क्रिया ॥ १८ ॥

पाढ़ी की जड़ के चूर्ण में शहद मिलाकर चावल के धोवन के साथ पीने से अन्तर्विद्रधि शीघ्र नष्ट होती है । अपक्व विद्रधि में उपर्युक्त चिकित्सा करनी चाहिए और पकी हुई विद्रधि की व्रणवत् चिकित्सा करनी चाहिए ॥ १७-१८ ॥

विद्रधि में पथ्य ।

आमावस्थे रेचनानि लेपः स्वेदोऽस्रमोक्षणम् जीर्णश्यामाककलमकुलत्थलशुनानि च । घृतं तैलं मुद्गरसो विलेपी धन्वजा रसाः ॥ १९ ॥ रक्तशिग्रु कारवेल्लं पटोलं हिमवालुका । चन्दनं तप्तशीताम्बु सर्वत्रापि व्रणोदितम् ॥ २० ॥ नराणां विद्रधि व्याधौ यथास्वस्थं यथाक्रमम् । पथ्यान्येतानि सर्वाणि निर्दिष्टानि विपश्चिभिः ।

विरेचन लेप स्वेदन रक्तमोक्षण पुराने श्यामाक ( साँवाँ ), कलम, कुलथी आदि धान्य, लहसुन, घी, तैल, मूँग का यूष, विलेपी, जांगल मांसरस, लाल सहिजना, करेला, परवल, कपूर, चन्दन, उबालकर ठण्डा किया हुआ जल तथा व्रण में कहा हुआ पथ्य विद्रधि में हितकारक है ॥ १९-२० ॥

विद्रधि में अपथ्य ।

शोथिनां यान्यपथ्यानि व्रणिनामहितानि च । क्रमादामे च पक्वे च विद्रधौ वर्जयेन्नरः ॥ २१ ॥

इति भैषज्यरत्नावल्यां विद्रध्यधिकारः समाप्तः ।

---

शोथ एवं व्रण के रोगियों के लिये जो अपथ्य है वही क्रमशः आमविद्रधि एवं पक्वविद्रधि में अपथ्य है अर्थात् शोथ में जो अपथ्य है वह आम ( कच्ची ) विद्रधि में अपथ्य है । और जो व्रण में हानिकारक है वह पक्व विद्रधि के लिये भी अपथ्य है ॥ २१ ॥

इति श्रीसरयूप्रसादत्रिपाठिविरचितायां भैषज्यरत्नावल्या रत्नप्रभाभिधायां व्याख्यायां विद्रध्यधिकारः समाप्तः ।

---

## अथ ऊरुस्तम्भाधिकारः ।

ऊरुस्तम्भ में क्रियाक्रम ।

श्लेष्मणः क्षपणं यत्स्याच्च मारुतकोपनम् । तत्सर्वं सर्वदा कार्य्यमूरुस्तम्भस्य भेषजम् ॥ १ ॥

जिससे कफ नष्ट हो और वायु कुपित न हो ऐसी समस्त चिकित्साएँ ऊरुस्तम्भ रोग में करनी चाहिए ॥ १ ॥

रूक्षणाद्वातकोपश्चेन्निद्रानाशार्त्तिपूर्वकः । स्नेहस्वेदक्रमस्तत्र कार्यो वातामयापहः ॥ २ ॥

यदि रूक्षक्रिया से निद्रानाश आदि लक्षणयुक्त वात कुपित हो तो वातरोगनाशक स्नेह स्वेद आदि द्वारा चिकित्सा करनी चाहिए ॥ २ ॥

प्रतारयेत् प्रतिस्रोतो नदीं शीतजलां शिवाम् । सरश्च विमलं शीतं स्थिरतोयं पुनः पुनः ॥ ३ ॥

ऊरुस्तम्भ के रोगी को शीतल जलवाली नदी में प्रवाह के विरुद्ध तैरने का अथवा जिस तालाब का जल स्वच्छ, शीतल तथा स्थिर हो उसमें बारम्बार तैरने की अनुमति देनी चाहिए ॥ ३ ॥

तस्य न स्नेहनं कार्य्यं न बस्तिर्न विरेचनम् । सर्वो रूक्षक्रमः कार्य्यस्तत्रादौ कफनाशनः ॥ पश्चाद्वातविनाशाय कृत्स्नः कार्य्यः क्रियाक्रमः ॥ ४ ॥

ऊरुस्तम्भ के रोगी को स्नेहन, बस्तिकर्म और विरेचन वर्जित है । पहले कफनाशक रूक्ष चिकित्सा करके फिर अन्य वातविनाशक सब प्रकार की चिकित्सा करनी चाहिए ॥ ४ ॥

शिलाजतुं गुग्गुलं वा पिप्पलीमथ नागरम् । ऊरुस्तम्भे पिबेन्मूत्रैर्दशमूलीरसेन वा ॥ ५ ॥

ऊरुस्तम्भ रोग में शिलाजीत, गूगुल, पीपरि अथवा सोंठ को गोमूत्र या दशमूल के काढ़े के साथ पीना चाहिए ॥ ५ ॥

भल्लातकामृताशुण्ठीदारुपथ्यापुनर्नवाः । पञ्चमूलीद्वयोन्मिश्रा ऊरुस्तम्भनिबर्हणः ॥ ६ ॥

भिलावाँ, गिलोय, सोंठ, देवदारु, हड़, गदहपुर्ना, मांडी और दोनों पञ्चमूल ( अर्थात् दशमूल ) ; इनका क्वाथ पीने से ऊरुस्तम्भ रोग नष्ट होता है ॥ ६ ॥

पिप्पली पिप्पलीमूलभल्लातकक्वाथ एव वा । कल्को वा समधुर्हन्त्य ऊरुस्तम्भविनाशनः ॥ ७ ॥

पीपरि, पीपलामूल और भिलावाँ, इनके क्वाथ अथवा कल्क को शहद के साथ सेवन करने से ऊरुस्तम्भ रोग का नाश होता है ॥ ७ ॥

त्रिफला चव्यकटुकं ग्रन्थिकं मधुना लिहेत् । ऊरुस्तम्भविनाशाय पुरं मूत्रेण वा पिबेत् ॥ ८ ॥ अत्र कटुकं त्रिकटु ।

हड़, बहेड़ा, आँवला, चव्य, सोंठ, मिर्च, पीपरि और पीपलामूल ; इनको समभाग ले चूर्णकर शहद के साथ चाटे अथवा गोमूत्र के साथ गूगुल का सेवन करे तो ऊरुस्तम्भ रोग नष्ट हो ॥ ८ ॥

लिह्यात्त्रिफलाचूर्णं क्षौद्रेण कटुकायुतम् सुखाम्बुना पिबेद्वापि चूर्णं षड्धरणं नरः ॥ ९ ॥

षड्धरणो योग उक्त एव वातव्याधौ अत्र दशमूलीरसेन गुग्गुलुः सिद्धफल ।

त्रिफला और कुटकी का चूर्ण शहद के साथ चाटे अथवा सुखोष्ण जल के साथ षड्धरण चूर्ण का पान करे । षड्धरण योग वातरोग में कहा ही है । ऊरुस्तम्भ में दशमूल के क्वाथ के साथ गुगुल का सेवन करना लाभदायक सिद्ध हुआ है ॥ ९ ॥

पिप्पलीवर्द्धमानो वा माक्षिकेण गुडेन वा। स्नेहवर्जी पिबेदत्र चूर्णं षड्‌षणं नरः ॥ १० ॥

वर्धमान[1] पीपरि का शहद या गुड के साथ सेवन करे अथवा षड्षण ( सोंठ, मिर्च, पीपरि, पीपलामूल, चीता की जड़ और चव्य ) के चूर्ण का सेवन करे। इस योग में घृत, तैल आदि पदार्थों का सेवन निषिद्ध है ॥ १० ॥

हितमुष्णाम्बु वा तद्वत् पिप्पल्यादिगणैः कृतम्। ऊरुस्तम्भे प्रशंसन्ति गण्डीरारिष्टमेव वा ॥ ११ ॥

ऊरुस्तम्भरोग में पिप्पल्यादिगण का चूर्ण उष्ण जल के साथ तथा गण्डीरारिष्ट अथवा मँजीठ और नीम का सेवन करना हितकर है ॥ ११ ॥

क्षौद्रसर्षपवल्मीकमृत्तिकासंयुतं भिषक्। गाढमुत्सादनं कुर्यादूरुस्तम्भे प्रलेपनम् ॥ १२ ॥

धुस्तूरपत्ररसेन स्नुहीपत्ररसेन वा सर्वं पिष्ट्वा गाढं प्रलिप्य वस्त्रादिनावेष्ट्य बध्नीयात्।

शहद, सरसों और वल्मीकमृत्तिका ( बाँबी की मिट्टी ); इनको धतूरे के पत्तों के रस में या थूहर के पत्तों के रस में पीसकर ऊरुस्तम्भ में गाढ़ा-गाढ़ा लेप करके ऊपर से पट्टी बाँध देनी चाहिए ॥ १२ ॥

रास्नादि क्वाथ।

रास्ना श्यामाकपथ्या मरिचमिसिशिवा बिल्वमज्जाश्वगन्धा वासच्छिन्नाजमोदाः सुरसमतिविषाद्वृद्धदारो बृहत्यौ। शुण्ठी तिक्ता यमानी सहचरचविकैरण्डदार्वीभकृष्णा ऊरुस्तम्भामवातकफपवनरुजं दण्डकांश्चाशु हन्यात् ॥ १३ ॥

रास्ना, श्यामालता ( कालीसर ), हड़, कालीमिर्च, सौंफ, आंवला, बेलगिरी, असगन्ध, अवासा, गिलोय, अजमोदा, तुलसी, अतीस, विधारा की जड़, छोटी कटेरी, बड़ी कटेरी, सोंठ, कुटकी, अजवायन, कटसरैया की जड़, चव्य, अरण्डी की जड़, दारहल्दी और गजपीपल, सब मिलाकर १ तोले। पाक के लिये जल ३२ तोले, बचा हुआ क्वाथ ८ तोले। इस क्वाथ के पीने से ऊरुस्तम्भ, आमवात, कफरोग, वातरोग तथा दण्डक रोग नष्ट होता है ॥ १३ ॥

कृष्णधुस्तूरमूलञ्च फलञ्च खाखसाभिधम्। रसोनमरिचाजाजीजयन्तीशिग्रुसर्षपाः ॥ १४ ॥ सर्वाण्येतानि मूत्रेण पिष्टाण्युष्णीकृतानि च। गाढं प्रलेपयेद् वैद्य आढ्यवाते भयावहे ॥ १५ ॥

काले धतूरे की जड़, पोस्त के ढोंडे, लहसुन, कालीमिर्च, काला जीरा, जयन्ती के पत्ते, सहिजने की छाल, सरसों, इन्हें गोमूत्र में अच्छी तरह पीसकर गरम कर ऊरुस्तम्भ में गाढ़ा लेप करना चाहिए ॥ १४—१५ ॥

अष्टकट्वरतैल।

पलाभ्यां पिप्पलीमूलनागरादष्टकट्वरः। तैलप्रस्थः समो दध्ना गृध्रस्यूरुग्रहापहः। अष्टकट्वरतैलेऽस्मिन् तैलं सार्षपमिष्यते ॥ १६ ॥

सरसों का तेल १२८ तोले, दही १२८ तोले, कट्वर ( घृतयुक्त दही की छाछ ) १२ सेर ६४ तोले। कल्क के लिये—पीपलामूल तथा सोंठ मिलाकर ८ तोले ( निरवस के मत से प्रत्येक ८ तोले ) विधिपूर्वक तैल सिद्ध कर प्रयोग करने से गृध्रसी तथा ऊरुस्तम्भ दोनों नष्ट होते हैं ॥ १६ ॥

कुष्ठादि तैल।

कुष्ठश्रीवेष्टकोदीच्यं सरलं दारु-

[1] प्रतिदिन एक-एक बढ़ाकर पीपरि का सेवन करना।

फेशरम् । अजगन्धाऽश्वगन्धा च तैलं तैः सार्षपं पचेत् ॥ १७ ॥ सक्षौद्रं मात्रया तस्मादूरुस्तम्भार्दितः पिबेत् ॥ १८ ॥

सरसों का तेल ४ सेर, जल १६ सेर। कल्क के लिये—कूट, श्रीवेष्टक ( तवनीत खोटी गन्धाबिरोजा ), गन्धपाला, चीड़ की लकड़ी, देवदारु, नागकेशर, अजमोदा, असगन्ध—प्रत्येक दो २ छटांक। इसे विधिपूर्वक सिद्ध कर शहद के साथ योग्य मात्रा में उरुस्तम्भ के रोगी को पीना चाहिए। मात्रा ३ माशे से ६ माशे तक ॥ १७—१८ ॥

सैन्धवादि तैल।

द्वे पले सैन्धवात् पञ्च शुण्ठ्या ग्रन्थिकचित्रकात्। द्वे द्वे भल्लातकास्थीनि विंशतिर्द्वे तथाढके ॥ १९ ॥ आरनालात् पचेत् प्रस्थं तैलमेतैरपत्यदम्। गृध्रस्यूरुग्रहार्शोऽर्दितसर्ववातविकारनुत् ॥ २० ॥

तिलतैल १२८ तोले, काँजी १० सेर ६४ तोले। कल्क के लिये—सेंधानमक ८ तोले, सोंठ २० तोले, पीपलामूल ८ तोले, भिलावे के बीज २० नग। विधिपूर्वक पकाकर मालिश करने से गृध्रसी, उरुस्तम्भ, बवासीर तथा अन्य वातव्याधि नष्ट होती हैं ॥ १९—२० ॥

षड्धरण चूर्ण।

चित्रकेन्द्रयवाः पाठा कटुकातिविषाभयाः। महाव्याधिप्रशमनो योगः षड्धरणः स्मृतः ॥ २१ ॥

चित्रक ( चीता ), इन्द्रजौ, पाढ़, कुटकी, अतीस, हरड़, हरएक तीन-तीन माशे। इस चूर्ण को वातरक्त में प्रयुक्त कराने से लाभ होता है ॥ २१ ॥

गुञ्जाभद्र रस।

निष्कत्रयं शुद्धसूतं निष्कद्वादशगन्धकम्। गुञ्जाबीजञ्च षड्निष्कं निष्कं जैपालबीजकम् ॥ २२ ॥ जयन्तीरसुस्तूरकाकमाचीद्रवैर्दिनम्। भावयित्वा वटीं कुर्याद्घृतैर्वल्लकसम्मिताम् ॥ २३ ॥ गुञ्जाभद्रो रसो नाम्ना पिंगुसैन्धवसंयुतः। शमयत्येव नो चित्रमूरुस्तम्भं सुदुर्जयम् ॥ २४ ॥

शुद्ध पारा ३ तोले, गन्धक १२ तोले, घुँघुची ६ तोले, जमालगोटे के बीज १ तोला; इन सबको एकत्र कर क्रम से एक-एक दिन जयन्ती, नींबू, धतूरा और मकोय के रस में पृथक्-पृथक् घोटे। फिर घी की भावना देकर दो-दो रत्ती की गोलियाँ बनावे। इस गुञ्जाभद्र रस को हींग और सेंधानमक के साथ सेवन करे तो यह कठिन से कठिन ऊरुस्तम्भ रोग को नष्ट करता है। इसमें आश्चर्य नहीं है ॥ २२—२४ ॥

ऊरुस्तम्भ में पथ्य।

रूक्षः सर्वो विधिः स्वेदः कोद्रवा रक्तशालयः। यवाः कुलत्थाः श्यामाका उद्दालाश्च पुरातनाः ॥ २५ ॥ शोभाञ्जनं कारवेल्लं पटोलं लशुनानि च। सुनिषण्णः काकमाची वेत्राग्रं निम्बपल्लवम् ॥ २६ ॥ पचूरो वास्तुकं पथ्यासार्ता कुलत्थवारि च शम्पाकशाकं पिण्याकस्तक्रारिष्टमधूनि च ॥ २७ ॥ कटुतिक्तकषायाणि क्षारसेवा गवाञ्जलम्। व्यायामं च यथाशक्ति स्थलस्याक्रमणानि च ॥ २८ ॥ स्वच्छे ह्रदे सन्तरणं प्रतिस्रोतोनदीषु च। तत्पथ्यं नरैः सेव्यमूरुस्तम्भविकारिभिः ॥ २९ ॥

सब रूक्ष क्रियाएँ, स्वेदन, पुराने कोदों, लाल शालिचावल, जौ, कुलथी, श्यामाक धान्य ( सावाँ ), उद्दालक धान्य, सहिजना, करेला, परवल, लहसुन, चौपतियाँ, मकोय, बेत का कोंपल, नीम के पत्ते, वास्तुकशाक

बथुआ, दूध, बैंगन, गरम जल, अमलतास के पत्तों का शाक, तिलकल्क, छाछ, अरिष्ट, शहद, चरपरे, कटुपे एवं कषाय द्रव्य, क्षार-द्रव्यों का सेवन, गोमूत्र, व्यायाम, यथाशक्ति स्थल पर चलना, स्वच्छ तालाब में तैरना, नदी में उसके बहाव के विरुद्ध तैरना, ये ऊरुस्तम्भ के रोगियों के लिये पथ्य हैं ॥ २४–२९ ॥

अपथ्य।

गुरुशीतद्रवस्निग्धविरुद्धासात्म्यभोजनम्। विरेचनं स्नेहनं च वमनं रक्तमोक्षणम् ॥ ३० ॥ वस्तिं च न हितं प्राहुरूरुस्तम्भविकारिणाम् ॥ ३१ ॥

इति भैषज्यरत्नावल्यामूरुस्तम्भाधिकारः समाप्तः।

---

गुरु, शीत, द्रव, अत्यन्त चिकना, विरुद्ध एवं असात्म्य (विपरीत) भोजन, विरेचन, स्नेहन, रक्तनिर्हरण (फस्द), और वस्तिकर्म ये ऊरुस्तम्भ में हानिकारक हैं ॥ ३०–३१ ॥

इति श्रीसरयूप्रसादत्रिपाठिविरचितायां भैषज्यरत्नावल्या रत्नप्रभाभिधायां व्याख्याया-मूरुस्तम्भाधिकारः समाप्तः।

---

## अथ भग्नाधिकारः।

आदौ भग्नं विदित्वा तु सेचयेच्छीतलाम्बुना। पङ्कनालेपनं कार्य्यं बन्धनञ्च कुशान्वितम् ॥ १ ॥ सुश्रुतोक्तं तु भग्नेषु वीक्ष्य बन्धादिमाचरेत्। अवनामितमुन्नद्धं दुन्नतञ्चावपीडयेत् ॥ २ ॥ अञ्छेदतिक्षिप्तमधोगतञ्चोपरि वर्त्तयेत्। आलेपनार्थं मञ्जिष्ठा मधुकं चाम्लपेषितम् ॥ ३ ॥

पहले टूटे हुये अंग को पहचानकर शीतल जल का सेवन करे और कीचड़ का लेप करके कदम्ब, गूलर आदि की छाल को भग्नस्थान पर रखकर पट्टी से बाँध दे। भग्नाधिकार में सुश्रुत के कहे हुए बन्धनविधान का अवलोकन करके उसका प्रयोग करे। जो हड्डी आदि झुक गई हो उसे ऊपर उठाना और जो ऊपर को उठ आई हो उसे नीचे बैठा देना चाहिए। जो हड्डी इधर उधर हट गई हो उसे खींचकर ठिकाने बैठा दे और जो नीचे को हट गई हो उसे ऊपर उठा दे तथा मँजीठ और मुलैठी को काँजी में पीसकर उसपर लेप कर दे ॥ १-३ ॥

शतधौतघृतोन्मिश्रं शालिपिष्टं च लेपनम्। सप्तरात्रात् सप्तरात्रात् सौम्येष्वृतुषु मोक्षणम् ॥ ४ ॥ कर्तव्यं स्यात् त्रिरात्राच्च तत्राग्नेयेषु जानता। काले च समशीतोष्णे पञ्चरात्राद्विमोक्षयेत् ॥ ५ ॥

चाँवलों के चूर्ण (आटा) में सौ बार का धोया हुआ घी मिलाकर टूटे हुए पर लेप करना चाहिए। सात-सात दिन के बाद सौम्य (शरद्) ऋतु में पट्टी खोलनी चाहिए। ग्रीष्म ऋतु में ३ दिन के पश्चात् और समशीतोष्ण ऋतु में पाँच दिन के पश्चात् पट्टी आदि खोलनी चाहिए ॥ ४-५ ॥

न्यग्रोधादिकषायञ्च सुशीतं परिषेचने। पञ्चमूलीविपक्वन्तु क्षीरं दद्यात् सवेदने ॥ ६ ॥

न्यग्रोधादिगण के काढ़े को ठंडा करके टूटे स्थान पर सींचना चाहिए, अथवा अधिक पीड़ा हो तो पंचमूल डालकर पकाये हुए दूध से सींचना चाहिए ॥ ६ ॥

भग्न में पथ्य।

सुखोष्णमवचार्य्यं वा चक्रतैलं विजानता। मांसं मांसरसः सर्पिः क्षीरं यूषः

---

१ कदम्बोदुम्बराश्वत्थसर्जार्जुनपलाशजैः। पुरलम्बैः सुमसृणैर्वंशकलैः सकलैरपि। कुशाद्यैः सम बन्धं पादस्योपरि योजयेत्॥

सतीनजः॥ बृंहणं चान्नपानं स्याद्देयं भग्नाय जानता॥ ७॥

कोल्हू के तैल (कच्ची धानी के तेल) को किंचित् गरम करके सेवन करे अथवा मांस मांसरस, घी, दूध और मटर का यूष तथा अन्य बृंहण अन्न-पान भग्नरोगी को सेवन करावे॥ ७॥

गृष्टिक्षीरं ससर्पिष्कं मधुरौषधसाधितम्। शीतलं लाक्षया युक्तं प्रातर्भग्नः पिबेन्नरः॥ ८॥

एक बार की व्याई हुई गौ के दूध में घी मिलाकर मधुरादि गण की ओषधियों से सिद्ध करे और ठंडा करके उसमें लाख का चूर्ण मिलाकर प्रातःकाल पीवे तो भग्नरोग दूर हो॥ ८॥

सघृतेनास्थिसंहारं लाक्षागोधूममर्जुनम्। सन्धिमुक्तेऽस्थिभग्ने च पिबेत् क्षीरेण मानवः॥ ९॥

सन्धि के पास हुए अस्थिभंग में हड़जोड़, लाख, गेहूँ और अर्जुन की छाल; इनके चूर्ण में घी मिलाकर पीना चाहिए॥ ९॥

रसोनादि योग।

रसोनमधुलाक्षाज्यसिताकल्कं समश्नताम्। छिन्नभिन्नच्युतास्थीनां सन्धानमचिराद्भवेत्॥ १०॥

लहसुन, शहद, लाख, घी और शकर के कल्क का सेवन करने से छिन्न-भिन्न और टूटी हुई हड्डी शीघ्र ही जुड़ जाती है॥ १०॥

पीतवराटिकाचूर्णं द्विगुञ्जं वा त्रिगुञ्जकम्। अपक्वक्षीरपीतं स्यादस्थिभग्नप्ररोहणम्॥ ११॥

पीली कौड़ी की भस्म को २ या ४ रत्ती की मात्रा में कच्चे दूध के साथ पीने से टूटी हुई हड्डी जुड़ जाती है॥ ११॥

क्षीरं सलाक्षामधुकं ससर्पिः स्याज्जीवनीयश्च सुखावहश्च। भग्नः पिबेत् त्वक् पयसार्जुनस्य गोधूमचूर्णं सघृतेन वाथ॥ १२॥

लाख और मुलैठी को दूध के साथ और जीवनीयगण की ओषधियों को घी के साथ सेवन करने से अथवा अर्जुन की छाल को दूध के साथ और गेहूँ के चूर्ण को घी के साथ सेवन करने से भग्नरोग दूर हो जाता है॥ १२॥

लाक्षागुग्गुलु।

लाक्षास्थिसंहृत्ककुभाश्वगन्धाश्चूर्णीकृता नागबला पुरश्च। सम्भग्नमुक्तास्थिरुजं निहन्यादङ्गानि कुर्यात् कुलिशोपमानि॥ १३॥

अतोऽन्यत्रोपदिष्टत्वात्तुल्यश्चूर्णैश्च गुग्गुलुः।

लाख, हड़जोड़, अर्जुन की छाल, असगन्ध, गुलशकरी और गूगुल; इनकी गोली बनाकर सेवन करे तो भग्न और मुक्तास्थि (मोच आना) की पीड़ा दूर हो तथा अङ्ग वज्र के समान दृढ़ हों॥ १३॥

ग्रन्थान्तर में उपदिष्ट होने के कारण चूर्ण के समभाग गूगुल डालना चाहिए।

आभागुग्गुलु।

आभाफलत्रिकव्योषैः सर्वैरेभिः समीकृतैः। तुल्यो गुग्गुलुरायोज्यो भग्नसन्धिप्रसाधकः॥ १४॥

बबूल की छाल, हड़, बहेड़ा, आँवला, सोंठ, पीपरि और काली मिर्च; इनके समभाग चूर्ण के बराबर गूगुल मिलाकर गोली बनावे। इसके सेवन करने से टूटी हुई हड्डी जुड़ जाती है॥ १४॥

सव्रणस्य तु भग्नस्य व्रणं सर्पिर्मधूत्तरैः। प्रतिसार्य्य कषायैश्च शेषं भग्नवदाचरेत्॥ १५॥ भग्नं नैति यथा पाकं

प्रयतेत् तथा भिषक् । वातव्याधिविनिर्दिष्टान् स्नेहांश्च प्रयोजयेत् ॥ १६ ॥

यावत्पुत्र भग्नवाले रोगी के घाव को घी और शहद मिले हुए क्वाथों से धोकर पश्चात् भग्न की चिकित्सा करें। जिस उपाय से टूटा हुआ पके नहीं वही उपाय वैद्य को करना चाहिए । वात-व्याधि में कहे हुए तेल आदि का भी भग्नरोग में प्रयोग करना चाहिए ॥१५-१६॥

गन्धतैल ।

रात्रौ रात्रौ तिलान् कृष्णान् वासयेदस्थिरे जले । दिवादिवं संशोष्य क्षीरेण परिभावयेत् ॥ १७ ॥ तृतीयं सप्तरात्रं तु भावयेन्मधुकाम्बुना । ततः क्षीरं पुनः पीतान्छुष्कान् सूक्ष्मान् विचूर्णयेत् ॥ १८ ॥ काकोल्यादिं सयष्ट्याह्वं मञ्जिष्ठां सारिवां तथा । कुष्ठं सर्जरसं मांसीं सुरदारु सचन्दनम् ॥ १९ ॥ शतपुष्पाञ्च संचूर्ण्य तिलचूर्णानि योजयेत् । पीडनार्थं च कर्त्तव्यं सर्वगन्धैः शृतं पयः ॥ २० ॥ चतुर्गुणेन पयसा तत्तैलं पाचयेत् पुनः । एलामंशुमतीं पत्रं जीवन्तीं तुरगं तथा ॥ २१ ॥ लोध्रं प्रपौण्डरीकञ्च तथा कालानुसारिवाम् । शैलेयकं क्षीरशुक्लामनन्तां समधूलिकाम् ॥ २२ ॥ पिष्ट्वा शृङ्गाटकञ्चैव मागुरुकान्यौषधानि च । एभिस्तद्विपचेत् तैलं शास्त्रविन्मृदुनाग्निना ॥ २३ ॥ एतत् तैलं सदा पथ्यं भग्नानां सर्वकर्मसु । आक्षेपके पक्षघाते तालुशोषे तथार्दिते ॥ २४ ॥ मन्यास्तम्भे शिरोरोगे कर्णशूले हनुग्रहे । बाधिर्य्ये तिमिरे चैव ये च स्त्रीषु क्षयंगताः ॥ २५ ॥ पथ्यं पाने तथाभ्यङ्गे नस्ये वस्तिषु भोजने । ग्रीवास्कन्धोरसां वृद्धिरनेनैवोपजायते ॥ २६ ॥ मुखञ्च पद्मप्रतिमं ससुगन्धिसमीरणम् । गन्धतैलमिदं नाम्ना सर्ववातविकारनुत् ॥ २७ ॥ राजार्हमेतत् कर्त्तव्यं राज्ञामेव विचक्षणैः । तिलचूर्णसमं तत्र मिलितं चूर्णमिष्यते ॥ २८ ॥

तिलों को वस्त्र की पोटली में बाँधकर बहते हुए नदी आदि के जल में रात्रि भर रक्खे और प्रातःकाल निकालकर धूप में सुखावे। इस प्रकार सात दिन करे । पश्चात् रात्रि में दूध में भिगोवे और दिन में धूप में सुखावे। यह क्रिया भी सात दिन करे। तदनन्तर मुलहठी के क्वाथ में रात भर भिगोकर दिन में धूप में सुखावे। इस प्रकार सात दिन तक करे। फिर एक रात्रि दूध में भिगोकर सुखा ले और तुष अलग करके उनका महीन चूर्ण कर ले। काकोल्यादिगण, मुलहठी, मजीठ, अनन्तमूल, कूट, राल, जटामांसी, देवदारु, लालचन्दन और सौंफ; इनका चूर्ण बनाकर पूर्व किये हुए तिलों के चूर्ण में मिलावे। पश्चात् सब गन्धों के द्वारा सिद्ध किये हुए दूध में उस चूर्ण को गीला करके कोल्हूयन्त्र द्वारा तेल निकलवा ले। यह तेल २ सेर । पाकार्थ जल ८ सेर। कल्कार्थ द्रव्य—छोटी इलायची, शालिपर्णी, तेजपात, जीवन्ती, असगन्ध, लोध्र, पुंडरिया, तगर, भूरिछरीला, क्षीरविदारी, अनन्तमूल, मूर्वा, सिंघाड़े तथा पूर्वोक्त काकोल्यादिगण से लेकर सौंफ तक की सब औषधियाँ मिलाकर आध सेर ; इनके कल्क द्वारा मन्द अग्नि से तेल सिद्ध करे। यह तेल भग्नरोगी के लिए सब कामों में पथ्य है । आक्षेपवायु, पक्षाघात, तालुशोष, अर्दित, मन्यास्तम्भ, शिरोरोग, कर्णशूल, हनुग्रह, बधिरता, तिमिर और क्षीणता आदि रोगवालों को यह तेल पीने में, मालिश में, नस्य और बस्तिक्रिया में तथा भोजन में देना हितकर है। इसके सेवन से गला, छाती और कन्धों की बढ़ती होती है और मुख कमल के तुल्य सुगन्धिवाला हो जाता है। यह गन्ध-

तेल सब प्रकार के वायुरोगों को नष्ट करता है। यह तेल राजाओं के योग्य है। तिलचूर्ण के बराबर काकोल्यादि का चूर्ण होना चाहिए॥ १७–२८॥

भग्नरोग में निषिद्ध।

लवणं कटुकं क्षारमम्लं मैथुनमातपम्। व्यायामञ्च न सेवेत भग्नो रूक्षान्नमेव च॥ २९॥

इति भैषज्यरत्नावल्यां भग्नाधिकारः समाप्तः।

नमकीन, कडुई और खट्टी वस्तुएं, क्षार, स्त्रीप्रसङ्ग, धूप, कसरत और रूखा अन्न; इनका भग्नरोगी सेवन न करे॥ २९॥

इति श्रीसरयूप्रसादत्रिपाठिविरचितायां भैषज्यरत्नावल्या रत्नप्रभाभिधायां व्याख्यायां भग्नाधिकार समाप्त।

## अथ व्रणशोथाधिकारः।

व्रणशोथ में क्रियाक्रम।

आदौ विम्लापनं कुर्य्याद् द्वितीयमवसेचनम्। तृतीयमुपनाहं तु चतुर्थीं पाटनक्रियाम्॥ १॥ पञ्चमं शोधनं कुर्य्यात् षष्ठं रोपणमिष्यते। एते क्रमा व्रणस्योक्ताः सप्तमो वैकृतापहः॥ २॥

विम्लापयतीति विम्लापनं कर्त्तव्यमिह एतेन लङ्घनस्वेदप्रलेपादीनां ग्रहणमिति भानुदासः।

पहले व्रणशोथ में विम्लापन कर्म अर्थात् शोथ को मिटानेवाले लेप, परिषेकादि क्रियाओं को करना चाहिए। इसका दूसरा अर्थ यह भी है कि पहले अंगुष्ठ आदि से मर्दन कर शोथ को मुलायम कर दे जिससे रक्त निकालने में सुविधा हो पश्चात् रक्त निकालना, पुल्टिस बांधना, चीरफाड़ करना, शोधन और रोपण कर्म करना; यह छह कर्म व्रण के लिए हैं। इनके अतिरिक्त सातवीं वैकृतापह (जिससे विकार उत्पन्न हुआ है उसका शमन करना) भूतनाशन (Antiseptic) कर्म करना चाहिए। भानुदासजी के मत में विम्लापन से लंघन, स्वेदन और प्रलेपन आदि का ग्रहण करना चाहिए॥ १–२॥

व्रणे श्वयथुरायासात्स च रागश्च जागरात्। तौ च रुक् च दिवास्वप्नात्ताश्च मृत्युश्च मैथुनात्॥ ३॥

परिश्रम करने से व्रण में सूजन, रात्रि में जागने से सूजन और लाली, दिन में सोने से सूजन, लाली और पीड़ा तथा मैथुन करने से सूजन, मोह, पीड़ा और मृत्यु होती है। इसलिए व्रणरोगी को परिश्रम, रात्रि जागरण, दिन का सोना और मैथुन त्याग देना चाहिए॥ ३॥

मातुलुङ्गादि लेप।

मातुलुङ्गाग्निमन्थौ च भद्रदारुमहौषधम्। अहिंस्रा चैव रास्ना च प्रलेपो वातशोथहा॥ ४॥

बिजौरे की जड़, अरणी की छाल, देवदार, सोंठ, अहिंस्रा, रास्ना, इन्हें एकत्र पीसकर लेप देने से वातशोथ नष्ट होता है॥ ४॥

आगन्तौ शोणितोत्थे च एष एव क्रियाक्रमः॥ ५॥

आगन्तु एवं रक्तज व्रणशोथ में भी, पैत्तिक व्रणशोथ की सी चिकित्सा करनी चाहिए॥ ५॥

श्लेष्मशोथ में अजगन्धादि लेप।

अजगन्धाऽश्वगन्धा च काला सरलया सह। एकैशिका च शृङ्गी च प्रलेपः श्लेष्मशोथहा॥ ६॥

अजवाइन, असगन्ध, काला (दिया),

चीड़ की लकड़ी, निशोथ तथा काकादासिनी इन्हें एकत्र पीसकर लेप कर धूपे से कफजन्य शोथ नष्ट होता है ॥ ६ ॥

कफवातज में पुनर्नवादि लेप।

पुनर्नवादारुशिग्रु दशमूलमहौषधैः । कफवातकृते शोथे लेपः कोष्णो विधीयते ॥ ७ ॥

साँठी, देवदारु, सहिजना, दशमूल, सोंठ इन्हें एकत्र पीसकर कफवातज शोथ पर गुनगुना लेप लगाना चाहिए ॥ ७ ॥

स्थिरान् मन्दरुजान् शोथान् स्नेहैर्वातकफापहैः । अभ्यज्य स्वेदयित्वा च वेणुनाड्या ततः शनैः ॥८॥ विम्लापनार्थं मृद्नीयात् तलेनाङ्गुष्ठकेन वा ॥ ९ ॥

कठिन, मन्दवेदनायुक्त शोथ में पहिले वातकफ हरनेवाले स्नेह का मर्दन कर स्वेदन करे। इस प्रकार मृदु हो जाने पर शोथ के दूर करने के लिये वंशनाली अथवा अगूठे के तलभाग से शनैः-शनैः मर्दन करना चाहिए ॥ ८-९ ॥

क्षारद्रव्यस्तथा क्षारो दारणः परिकीर्तितः ॥ १० ॥

क्षार प्रधान औषधि (अपामार्ग) आदि तथा क्षार दोनों ही व्रणों को दारण करते हैं ॥ १० ॥

दारण द्रव्य।

चिरबिल्वाग्निको दन्ती चित्रको हयमारकः । कपोतकङ्कगृध्राणां पुरीषाणि च दारणम् ॥ ११ ॥

करंजुआ, भिलावाँ, दन्ती, चित्रक, कनेर, तथा कबूतर, कङ्क एवं गिद्ध आदि पक्षियों का पुरीष भी दारण करता है ॥ ११ ॥

पाचनार्थ उपनाह द्रव्य।

शणमूलकशिग्रूणां फलानि तिलसर्षपाः । अतसीशक्तवो किण्वमुष्णद्रव्यञ्च पाचनम् ॥ १२ ॥

सन के बीज, मूली के बीज सहिजने के बीज, तिल, सरसों, अलसी, सत्तू, सुराबीज तथा अन्य उष्णवीर्य द्रव्यों को पाचनार्थ उपनाहन आदि में व्यवहार करना चाहिए ॥ १२ ॥

तैलेन सर्पिषा वापि ताभ्यां वा शक्तुपिण्डिका । सुखोष्णःसुखपाकार्थमुपनाहः प्रशस्यते ॥ १३ ॥

तैल अथवा घी अथवा दोनों से ही सत्तू की पिण्डिका को गरम करके उपनाहन करने से शोथ पक जाता है ॥ १३ ॥

सतिला सातसीबीजा दध्यम्ला शक्तुपिण्डिका । सकिण्वकुष्ठलवणा शस्ता स्यादुपनाहने ॥ १४ ॥

तिल, अलसी के बीज, खट्टा दही, सुराबीज, कूठ, सेंधानमक, इन्हें सत्तू के साथ मिला गर्म कर उपनाहन करना चाहिए ॥ १४ ॥

त्रिफला खदिरो दार्वी न्यग्रोधादिबला कुशाः । निम्बकोलकपत्राणि कषायः शोधने हितः ॥ १५ ॥

त्रिफला, खदिरकाष्ठ, दारुहल्दी, न्यग्रोधादिगण, खरैटी, कपूर नीम के पत्ते, बेरी के पत्ते, इनमें से हरएक का क्वाथ व्रणशोधक है ॥ १५ ॥

वातिके दशमूलानां क्षीरिणां पैत्तिके व्रणे । आरग्वधादेः कफजे कषायः शोधने हितः ॥ १६ ॥

वातिक व्रण में दशमूल का क्वाथ, पैत्तिक व्रण में वट आदि दूधवाले वृक्षों का क्वाथ, कफज में आरग्वधादिगण का क्वाथ व्रणशोधन के लिये श्रेष्ठ है ॥ १६ ॥

व्रणस्य त्वविशुद्धस्य क्वाथः शुद्धिकरः परः । पटोलनिम्बपत्रोत्थः सर्वत्रैव प्रयुज्यते ॥ १७ ॥

दूषित व्रण के शोधन के लिये पटोलपत्र तथा नीम के पत्तों का क्वाथ सब जगह व्यवहार में आता है ॥ १७ ॥

### व्रणरोपण ।

अपेतपूतिमांसानां मांसस्थानामरोहताम् । कल्कः संरोपणं कार्यस्तिलजो मधुसंयुतः ॥ १८ ॥

जो व्रण दुष्ट मांसरहित हो अथवा मांस में स्थित व्रण यदि भरता हो तो तिलकल्क और शहद मिलाकर लगाना चाहिए इससे शीघ्र घाव भर जाता है ॥ १८ ॥

निम्बपत्रघृतक्षौद्रदार्वीमधुकसंयुता । वर्तिस्तिलानां कल्को वा शोधयेद् रोपयेद् व्रणान् ॥ १९ ॥

नीम के पत्ते, घी, शहद, दारुहल्दी तथा मुलेठी इनके मिले हुए कल्क को कपड़े के टुकड़े पर लेप कर बत्ती तैयार करे। इस बत्ती को व्रणमुख में देने से रोपण होता है अथवा तिलकल्क द्वारा बनी हुई बत्ती से भी घाव भर जाता है ॥ १९ ॥

अश्वगन्धारुहालोध्रं कट्फलं मधुयष्टिका । समङ्गा धातकीपुष्पं परमं व्रणरोपणम् ॥ २० ॥

असगन्ध, कुटकी, लोध, कटफल, मुलहठी, मँजीठ, धाय के फूल, इनका लेप व्रणरोपण में अत्यन्त लाभदायक है ॥ २० ॥

करञ्जारिष्टनिर्गुण्डीलेपो हन्याद् व्रणक्रमीन् । लशुनस्याथवा लेपो हिङ्गुनिम्बकृतोऽथवा ॥ २१ ॥

करंजुआ, नीम तथा सँभालू के पत्तों का लेप व्रणस्थित कृमियों को नष्ट करता है। अथवा लहसुन या हींग और नीम के पत्तों का लेप भी व्रणकृमियों को नष्ट करता है ॥ २१ ॥

निम्बपत्रवचाहिङ्गुसर्पिर्लवणसर्षपैः । धूपनं स्याद् व्रणे रौक्ष्यकृमिकण्डूरुजापहम् ॥ २२ ॥

नीम के पत्ते, बच, हींग, घी, सेंधानमक, सरसों इनका धूपन करने से व्रण की रूक्षता, कृमि, कण्डू (खुजली) तथा वेदना नष्ट होती है ॥ २२ ॥

### दूर्वाद्य तैल और घृत ।

दूर्वास्वरससिद्धं वा तैलं कम्पिल्लकेन च । दार्वीत्वकश्च कल्केन प्रधानं व्रणरोपणम् ॥ २३ ॥ येनैव विधिना तैलं घृतं तेनैव साधयेत् । रक्तपित्तोत्तरं ज्ञात्वा सर्पिरेवावचारयेत् ॥ २४ ॥

दूब का रस तथा कमीला एवं दारुहल्दी की छाल के कल्क से विधिपूर्वक तैल पकाकर मालिश करें। इसकी मालिश से व्रण का शीघ्र ही रोपण होता है। जिस विधि से तैल पकाते हैं उसी प्रकार घृत का भी पाक करना चाहिए। रक्तपित्त प्रधान व्रण में घृत का ही प्रयोग करना चाहिए ॥ २३-२४ ॥

### करंजाद्य घृत ।

नक्तमालस्य पत्राणि तरुणानि फलानि च । सुमनायाश्च पत्राणि पटोलारिष्टके तथा ॥ २५ ॥ द्वे हरिद्रे मधूच्छिष्टं मधुकं तिक्तरोहिणी । मञ्जिष्ठा चन्दनोशीरमुत्पलं सारिवे त्रिवृत् ॥ २६ ॥ एतेषां कार्षिकैर्भागैर्घृतप्रस्थं विपाचयेत् । दुष्टव्रणप्रशमनं तथा नाडीविशोधनम् ॥ सद्यश्छिन्नव्रणानाञ्च करञ्जाद्यमिदं शुभम् ॥ २७ ॥

गोघृत १२८ तोले। कल्क के लिये—करंजुए के पत्ते तथा कच्चे फल, मालतीपत्र, परवल के पत्ते, नीम के पत्ते, हल्दी, दारुहल्दी, मोम, मुलहठी, कुटकी, मँजीठ, लालचन्दन, खस, नील, कमल, अनन्तमूल, श्वेतसारिवा, निसोत, हरएक ८ तोले। विधिपूर्वक पकाकर घृत प्रयोग करें। इसके प्रयोग से दुष्टव्रण, नाडीव्रण तथा सद्यःव्रण (हथियार के घाव) नष्ट होते हैं ॥२५-२७॥

तिक्ताद्य घृत।

तिक्तासिक्थनिशायष्टिनक्ताह्वफल-पल्लवैः। पटोलमालतीनिम्बपत्रैर्हन्ति व्रणं घृतम् ॥ २८ ॥

गोघृत १२८ तोले। कल्क के लिये—कुटकी, मोम, हल्दी, मुलहठी, करंजुए के पत्ते तथा कच्चे फल, पटोलपत्र, मालतीपत्र, नीम के पत्ते मिलाकर १६ तोले। विधिपूर्वक घृत पकावें। इसके बाह्यप्रयोग से व्रण नष्ट होता है ॥ २८ ॥

प्रपौण्डरीकाद्य घृत।

प्रपौण्डरीकमञ्जिष्ठामधुकोशीरपद्मकैः। सहरिद्रैः शृतं सर्पिः सक्षीरं व्रण रोपणम् ॥ २९ ॥

गोघृत १२८ तोले, दूध ६ सेर ३२ तोले। कल्क के लिये—पुण्डरिया, मजीठ, मुलेठी, खस, पद्माख, हल्दी मिलाकर १६ तोले। विधिपूर्वक पकावे। यह घृत व्रणरोपक है ॥ २९ ॥

व्रणशोथहरलेप।

धुस्तूरमूलं सलवणमुष्णं व्रणस्थित्यारम्भे। दत्तं लेपान्नियतं व्रणशोथं हरति यद्दुष्टम्। धुस्तूरमूलं पिष्ट्वा ससैन्धवं कृत्वा कोष्णो लेपः कार्यः ॥ ३० ॥

व्रणशोथ की पहली अवस्था में धतूरे की जड़ और नमक का गरम-गरम लेप करने से दुष्ट व्रणशोथ नष्ट होता है ॥ ३० ॥

वातजव्रणशोथ में लेप।

कल्कः काञ्जिकसंपिष्टः स्निग्ध शाखोटकत्वचः। सुपर्ण इव नागानां वातशोथविनाशनः ॥ ३१ ॥

सिहोरा की चीकनी छाल को काँजी में पीसकर लेप करे तो वातशोथ का इस प्रकार नाश होता है जैसे गरुड़ से सर्पों का नाश होता है ॥ ३१ ॥

न्यग्रोधोदुम्बराश्वत्थप्लक्षवेतसवल्कलैः। ससर्पिष्कैः प्रलेपः स्यात् शोथनिर्वापणः परः ॥ ३२ ॥

समभागपिष्टैर्घृतमिश्रैर्लेपः।

बरगद, गूलर, पीपल, पकड़िया और बेंत की समभाग छाल के कल्क में घी मिलाकर लेप करने से व्रणशोथ नष्ट होता है ॥ ३२ ॥

न रात्रौ लेपनं दद्याद्दत्तश्च पतितं तथा। न च पर्युषितं शुष्यमाणं नैवावधारयेत् ॥ ३३ ॥ शुष्यमाणमुपेक्षेत प्रदेहं पीडनं प्रति। न चापि मुखमालिम्पेत् तेन दोषः प्रसिच्यते ॥ ३४ ॥

रात्रि में लेप न करना चाहिए। एक बार लगाया लेप यदि उतर जाय तो फिर उसे नहीं लगाना चाहिए। बासी पड़ा हुआ लेप न लगाना चाहिए और लगाया हुआ यदि सूख जावे तो उसे लगा हुआ न रक्खे, किन्तु फौरन ही उतार दे। यदि सूजन को पकाकर पीब आदि निकालने के लिए लेप लगाया हो तो उसके सूख जाने पर न उतारा जाय, क्योंकि वह सूखकर अच्छी तरह पीड़न करता है और अन्तःस्थित पूय को बाहर निकालता है। व्रण के मुख पर लेप नहीं लगाना चाहिए, क्योंकि मुख के द्वारा ही दोष बाहर निकलते हैं ॥ ३३-३४ ॥

रक्तावसेचनं कुर्यादादावेव विचक्षणः। शोथे महति संरब्धे वेदनावति वा व्रणे। निवारणाय पाकस्य वेदनोपशमाय च ॥ ३५ ॥ यो न याति शमं लेपस्वेदसेकापतर्पणैः। सोऽपि नाशं व्रजत्याशु शोथः शोणितमोक्षणात् ॥ ३६ ॥ एकतश्च क्रियाः सर्वा रक्तमोक्षणमेकतः। रक्तं हि व्यम्लतां याति तेष नास्ति न चास्ति रुक् ॥ ३७ ॥

यदि सूजन बहुत बढ़ जाय तथा उसमें अधिक पीड़ा होने लगे तो बुद्धिमान् मनुष्य को पाक निवारण और वेदनाशान्ति के लिये पहले ही रक्तमोक्षण करना चाहिए। क्योंकि जो सूजन लेप स्वेद, सेक और अपतर्पण आदि से नष्ट नहीं होती है वह रक्तमोक्षण कराने से शीघ्र ही नष्ट हो जाती है। शोथहर सब उपाय एक ओर तथा केवल रक्तमोक्षण एक ओर; क्योंकि रुधिर के बिगड़ने से ही पीड़ा होती है। अस्तु, जब बिगड़ा हुआ रुधिर निकल जाता है तब वेदना शान्त हो ही जाती है॥ ३२-३७॥

स चेदेवमुपक्रान्तः शोथो न प्रशमं व्रजेत्। तस्योपनाहैः पक्वस्य पाटनं हितमुच्यते॥ ३८॥ बालवृद्धासहक्षीणभीरूणां योषितामपि। मर्मोपरि च जाते च पक्वे शोथे च दारणम्॥ ३९॥

यदि इस प्रकार चिकित्सा करने पर सूजन शान्त न हो तो उपनाह (पुलटिस) द्वारा उसे पकाकर चिरा देना हितकर है। बाल, वृद्ध, क्षीण, डरपोक, असहनशील तथा स्त्रियों के व्रण को तथा मर्मस्थान के व्रण को न चिराना चाहिए। यदि शोथ अच्छे प्रकार पक जाये तो चीरा लगवाना उचित है॥ ३८-३९॥

गवां दन्तं जले घृष्टं बिन्दुमात्रं प्रलेपनात्। अत्यन्तकठिने चापि शोथे पाचनभेदनम्। क्षारद्रव्यस्तथा क्षारो दारणः परिकीर्तितः॥ ४०॥

गौ के दाँत को जल से घिस कर एक बूँद मात्र लेप करने से अत्यन्त कठिन शोथ पक कर फूट जाता है। क्षार-प्रधान औषध तथा क्षार दोनों ही व्रण को फोड़ देते हैं॥ ४०॥

कटुतैलान्वितैर्लेपात् सर्पनिर्मोकभस्मभिः। व्रणः शाम्यति गण्डस्य पक्वोऽपि स्फुटति द्रुतम्। कपोतगृध्रकङ्कानां पुरीषमपि दारणम्॥ ४१॥

साँप की केंचुली की भस्म कड़ुए तेल में मिलाकर लेप करने से कच्चा शोथ शान्त हो जाता है और पका हुआ शीघ्र ही फूट जाता है। कबूतर, गिद्ध और कंकपक्षी की विष्ठा का लेप भी सूजन को फोड़ देता है॥ ४१॥

तिलकल्कः सलवणो द्वे हरिद्रे त्रिवृद् घृतम्। मधुकं निम्बपत्रञ्च लेपः स्याद् व्रणशोधनः॥ ४२॥

तिल, सेंधानमक, हल्दी, दारुहल्दी, निशोथ, घी, मुलेठी और नीम के पत्तों का लेप व्रण को शुद्ध करता है॥ ४२॥

व्रणशोधनकेशरी लेप।

निम्बपत्रं तिला दन्ती त्रिवृत् सैन्धवमाक्षिकम्। दुष्टव्रणप्रशमनो लेपः शोधनकेशरी॥ ४३॥ एकं वा सारिवामूलं सर्वव्रणविशोधनम्॥ ४४॥

नीम के पत्ते, तिल, जमालगोटे की जड़, निशोथ, सेंधानमक और शहद; इनका लेप दुष्टव्रण को शान्त करता है तथा व्रणशोधन के लिए सिंहरूप है॥ ४३-४४॥

सप्तदलदुग्धकल्कः शमयति दुष्टव्रणं लेपात्। मधुयुक्ता शरपुङ्खा दुष्टव्रणरोपणी कथिता॥ ४५॥

सतवन का दूध कुछ देर रखने पर जब कल्क के समान गाढ़ा हो जावे तो उसका लेप करने से दुष्टव्रण शान्त होता है तथा शरफोंका की जड़ को शहद के साथ लेप करने से दुष्टव्रण का रोपण होता है॥ ४५॥

मानुषशिरःकपालं तदस्थिलेपनं मूत्रेण। रोपणमिदं व्रणानां योगशतैरप्यसाध्यानाम्॥ ४६॥

मनुष्य के कपाल की हड्डी को गोमूत्र में घिसकर लेप करने से सैकड़ों उपाय करने पर भी जो साध्य नहीं हुआ हो उस व्रण का रोपण होता है॥ ४६॥

सुपर्णीपत्रपत्तूरकर्णमोटकुबेरकाः । पृथग्लेपे भलेपेन गम्भीरव्रणरोपणाः ॥ ४७ ॥

वनकरैला के पत्ते, पत्तूर ( शालिंच ) की छाँल, कर्णमोटा ( बर्बर, बबूल, ) वनतुलसी; इनका पृथक्-पृथक् लेप देने से गम्भीर व्रणों को रोपण होता है ॥ ४७ ॥

लौहकुदालके घृष्ट्वा लिम्पाकफलवारिणा । श्वेतार्कसम्भवं मूलं लेपं दद्यात् क्षतोपरि ॥ अपि योगशतासाध्यं क्षतं हन्ति न संशयः ॥ ४८ ॥

सफेद आक की जड़ को नींबू के रस से लोहे की कुदाल पर रगड़कर घाव पर लेप करने से सैकड़ों योगों से असाध्य भी व्रण नष्ट होता है । इसमें संशय नहीं है ॥ ४८ ॥

श्वेतकारवीरमूलस्वरसं द्विपलोन्मितम् । पलाष्टकमिदं गव्यक्षीरमेकत्र मिश्रयेत् ॥ ४९ ॥ दधि कृत्वा तदावश्यं निर्मथ्य नवनीतकम् । गृहीत्वा तेन लेपेन क्षतं हन्ति चिरोत्थितम् ॥ ५० ॥

सफेद कनेर की जड़ का रस ८ तोले और गौ का दूध ३२ तोले, इन दोनों को मिलाकर दही जमावे । फिर उसको मथकर मक्खन निकालकर उसका लेप करने से पुराना घाव अच्छा हो जाता है ४९ ५० ॥

आस्फोतोद्भवनिर्यासः क्षतं हन्ति चिरोत्थितम् ॥ ५१ ॥

हरफमाली के दूध का लेप करने से पुराना घाव अच्छा हो जाता है ॥ ५१ ॥

ये क्लेदपाकस्रुतिगन्धयन्तो व्रणा महान्तः सरुजः सशोथाः । प्रयान्ति ते गुग्गुलुमिश्रितेन पीतेन शान्तिं त्रिफलारसेन ॥ ५२ ॥

त्रिफला के काढ़े में गुग्गुल मिलाकर पीने से क्लेद, पाक, स्राव, दुर्गन्ध, पीड़ा और शोथयुक्त बड़े-बड़े घाव भी शान्त हो जाते हैं ॥ ५२ ॥

सप्ताङ्गगुग्गुलु ।

विडङ्गत्रिफलाव्योषचूर्णं गुग्गुलुना समम् । सर्पिषा वटिकां कृत्वा खादेद्वा हितभोजनः । दुष्टव्रणापचीमेहकुष्ठनाडीविशोधनः ॥ ५३ ॥

वायविड़ंग, हड़, बहेड़ा, आँवला, सोंठ मिर्च और पीपरि; इन सबको समभाग लेकर एकत्र चूर्ण करे । चूर्ण के समान गुग्गुल डालकर और घी में मिलाकर एक एक मासे की गोली बनावे । इसको खानेवाला पथ्य पदार्थ का भोजन करे तो यह सप्ताङ्गगुग्गुल दुष्टव्रण, अपची, प्रमेह, कुष्ठ और नासूर आदि रोगों को शान्त करती है ॥ ५३ ॥

जात्याद्य घृत और तैल ।

जातीनिम्बपटोलपत्रकटुकादार्वीनिशासारिवामञ्जिष्ठाभयसिक्थतुत्थमधुकैर्नक्ताह्वबीजैः समैः । सर्पिः सिद्धमनेन सूक्ष्मवदना मर्माश्रिताः स्राविणो गम्भीराः सरुजो व्रणाः सगतिकाः शुष्यन्ति रोहन्ति च ॥ ५४ ॥

एवम् तैलमपि ।

चमेली के पत्ते, नीम के पत्ते, परवल के पत्ते, कुटकी, दारुहल्दी, हल्दी, सारिवा, मँजीठ, हड़, मोम, नीलाथोथा, मुलेठी और करंज के बीज आधी-आधी छटाक लेकर कल्क बनावे । घी अथवा कडुआ तेल ४ सेर । पाकार्थ जल ८ सेर । विधिपूर्वक घी या तैल को सिद्ध कर व्रण पर लगाने से छोटे मुख के तथा मर्मस्थान के बहनेवाले, गहरे, पीड़ाकारक और नाड़ीयुक्त व्रण सूख जाते हैं और भर जाते हैं ॥ ५४ ॥

गौराद्य घृत और तैल ।

गौरा हरिद्रा मञ्जिष्ठा मांसी मधुकमेव च । प्रपौण्डरीकं ह्रीबेरं भद्रमुस्तं सचन्दनम् ॥ ५५ ॥ जातीनिम्बपटोलञ्च करञ्जं कटुरोहिणी । मधूच्छिष्टं समधुकं महामेदा

वर्धेत्र च ॥ ५६ ॥ पञ्चवल्कलतोयेन घृतमस्थं विपाचयेत् । एष गौरो महायोगः सर्वव्रणविशोधनः ॥ ५७ ॥ आगन्तुसहजाश्चैव सुचिरोत्थाश्च ये व्रणाः । विषमामपि नाडीं तु शोधयेच्छीघ्रमेव तु ॥ ५८ ॥ गौराद्यं जातिकाद्यञ्च तैलमेवं मसाध्यते । तैलं सूक्ष्मानने दुष्टे व्रणे गम्भीर एव च ॥ ५६ ॥

हल्दी, दारुहल्दी, मँजीठ, जटामांसी, मुलेठी, पुंडरिया, सुगन्धवाला, नागरमोथा, लालचन्दन, चमेली के पत्ते, नीम के पत्ते परवल के पत्ते, कंजा, कुटकी, मोम, मुलेठी और महामेदा ; ये सब मिश्रित पाव सेर लेकर इनका कल्क बनावे । पंचवल्कल का काढ़ा ८ सेर, घी अथवा तेल २ सेर । यथाविधि सिद्ध कर प्रयोग में लावे । इस गौराद्य तेल के लगाने से सब प्रकार के व्रण शुद्ध होते हैं । यह महायोग आगन्तुक, सहज, पुराने, विषम और नाड़ीव्रणों को शीघ्र ही शुद्ध करता है । गौराद्य और जात्याद्य तेल छोटे मुखवाले, दुष्ट और गंभीर व्रणों को शुद्ध करते हैं । अत्यन्त सूक्ष्म मुखवाले नाडीव्रण आदि घावों में इस तेल Probepointed Hypodermic Syrisge से अंतःप्रविष्ट ( इंजेक्शन ) किया जा सकता है ॥ ५२—५६ ॥

### बृहज्जात्यादि तैल ।

जातीनिम्बपटोलानां नक्तमालस्य पल्लवाः । सिक्थकं मधुकं कुष्ठं द्वे निशे कटुरोहिणी ॥ ६० ॥ मञ्जिष्ठा पद्मकं लोध्रमभया पद्मकेशरम् । तुत्थकं सारिवाबीजं नक्तमालस्य दापयेत् ॥ ६१ ॥ एतानि समभागानि पिष्ट्वा तैलं विपाचयेत् । विषव्रणे समुत्पन्ने स्फोटके कुष्ठरोगिषु ॥ ६२ ॥ दद्रुवीसर्परोगेषु कीटरोगेषु सर्वशः । सद्यः शस्त्रप्रहारेषु दंष्ट्राविद्धेषु चैव हि ॥ ६३ ॥ नखदन्तक्षते देहे दुष्टमांसापकर्षणम् । म्रक्षणार्थमिदं तैलं हितं शोधनरोपणम् ६४

कल्क के लिए चमेली के पत्ते, नीम के पत्ते, परवल के पत्ते, कंजा के पत्ते, मोम, मुलेठी, कूट, हल्दी, [दारुहल्दी, कुटकी], मँजीठ, पद्मकाठ, लोध, हड़, कमलकेशर, नीलाथोथा, अनन्तमूल और कंजे के बीज; सब मिश्रित पावसेर । तेल २ सेर । पाकार्थ जल ८ सेर । यथाविधि तैल सिद्ध करके प्रयोग में लावे । यह तेल विषदोष से उत्पन्न हुए फोड़े, घाव, कुष्ठ रोग, दद्रु, विसर्प, कृमिरोग, शस्त्र का घाव, दाँत अथवा दाढ़ का घाव और नखक्षत को अच्छा करता है तथा शरीर के घाव से दुष्ट मांस को निकालकर शोधन और रोपण करता है ॥ ६०—६४ ॥

### विपरीतमल्ल तैल ।

सिन्दूरकुष्ठविषहिंगुरसोनचित्रबाला-ग्निलाङ्गलिककल्कविपक्वतैलम् । मासार्द्धमन्त्रयुतफूत्कृतलूनफेनं किल्मव्रणप्रशमने विपरीतमल्लः ॥ ६५ ॥ खड्गाभिघातगुरुगण्ड महोपदंशनाडीव्रणव्रणविचर्चिककुष्ठपामाः । एतान्निहन्ति विपरीतकमल्लनाम तैलं यथेष्टशयनासनभोजनस्य ६६ "ॐ हां हीं हूं हौं शिवाय स्वाहा" इति पठित्वा फूत्कारेण फेनावलोडनं कार्यम् ।

कल्क के वास्ते सिन्दूर, कूट, मीठा विष, हींग, लहसुन, चीता की जड़, सुगन्धवाला, बटजटा और कलिहारी चार-चार तोले । सरसों का तेल २ सेर, पाकार्थ जल ८ सेर । पाक करते समय यदि तेल में फेना आवे तो "ॐ हां हीं हूं हौं शिवाय स्वाहा" । यह मंत्र पढ़कर फूँक मारकर उसको शान्त करना चाहिए इस विपरीतमल्ल तेल के लगाने से गीला रहनेवाला व्रण, तलवार का घाव, गण्डरोग, उपदंश, नासूर, घाव, विचर्चिका, कुष्ठ और पामा; इन रोगों को यह तेल नष्ट करता है । इसका सेवन-

रुग्णी इच्छानुसार शयन, आसन और भोजन का सेवन कर सकता है ॥ ६२–६६ ॥

### बृहत् व्रणराक्षस तैल ।

कुडवं सार्षपं तैलं तदर्द्धं गोघृतस्य च । एकीकृत्य पचेत्तत्तु सूर्य्यावर्तरसेन तु ६७ चित्रपत्रपलं कल्कं दत्वा तत्र विपाचयेत् । तत् कल्कं स्रावयित्वा तु चूर्णमेषां विनिक्षिपेत् ॥ ६८ ॥ गन्धकं शुद्धसिन्दूरं हरितालं मनःशिला । हरिद्रागैरिकं राजी कर्षार्द्धं प्रतिभागिकम् ॥ ६९ ॥ भागार्द्धं पारदं चापि कज्जलीकृत्य मिश्रयेत् । सुतप्तं मिश्रयित्वा तु तप्तं कृत्वा प्रलेपयेत् ७० कण्डूं विचर्चिकां पामां क्लेदं कुष्ठं सुदुस्तरम् । वातरक्तं व्रणान् सर्वान् विषविस्फोटदद्रुकम् । निहन्त्याशु महारिष्रं तैलं तु व्रणराक्षसम् ॥ ७१ ॥

चित्रपत्रपलं कल्कमित्यत्र तस्य पत्रपलं कल्कमिति क्वचित् पाठः तस्येति अर्कस्य।

कड़वा तेल १६ तोले, गौ का घृत ८ तोले, मदार के पत्तों का रस १ सेर १६ तोले, कल्क के लिये चीता की पत्तियाँ १ छटाँक। सबको एकत्र कर पाक करे। जब सिद्ध हो जाय तब उतारकर छान ले। फिर उस गरम तेल में शुद्ध सिन्दूर, हरताल, मैनसिल, हल्दी, गेरू और राई आधा-आधा तोला तथा गन्धक आधा तोला और पाव तोला पारे की कज्जली करके मिलाना चाहिए। गरम करके इसके लेप लगाने से खुजली, विचर्चिका, पामा, क्लेद, कुष्ठ, वातरक्त, सब प्रकार के व्रण, विषदोष, फोड़े और दाद शीघ्र नष्ट होते हैं। यह बृहद्व्रणराक्षस तैल महारिष्ट्र कुष्ठ को नष्ट करता है। यहाँ "चित्रपत्रपलं कल्कम्" के स्थान में "तस्य पत्रपलं कल्कम्" ऐसा कहीं-कहीं पाठ है। यहाँ 'तस्य' का अर्थ मदार है ॥ ६७–७१ ॥

### तन्त्रान्तरोक्त व्रणराक्षस तैल।

सूतकं गन्धकं तालं सिन्दूरञ्च मनःशिला । रसोनं च विषं ताम्रं प्रत्येकं कर्षं माहरेत् ॥ ७२ ॥ कुडवं सार्षपं तैलं साधयेत् सूर्य्यतापतः । नाडीव्रणं च विस्फोटं मांसवृद्धिं विचर्चिकाम् ॥ ७३ ॥ दद्रुकुष्ठापचीकण्डूमण्डलानि व्रणांस्तथा । व्रणराक्षसनामेदं तैलं हन्ति गदान् बहून् ७४

पारा, गन्धक, हरताल, सिन्दूर, मैनसिल, लहसुन, मीठा विष और ताम्रभस्म; प्रत्येक एक-एक तोला। कड़वा तेल १६ तोले। सबको इकट्ठा कर धूप में रक्खे। जब खूब गरम हो जाय और सब द्रव्य एक में मिल जायँ तब इसे सिद्ध समझे। यह व्रणराक्षस तैल नासूर, फोड़े, मांसवृद्धि, विचर्चिका, दाद, कोढ़, अपची, खुजली, चकत्ते पड़ना, घाव तथा अन्य बहुत से रोगों को नष्ट करता है ॥ ७२—७४ ॥

### विडङ्गारिष्ट ।

विडङ्गं ग्रन्थिकं रास्ना कुटजत्वक्फलानि च । पाठैलवालुकं धात्री भागान् पंचपलान् पृथक् ॥७५॥ अष्टद्रोणेऽम्भसः पक्त्वा कुर्य्याद् द्रोणावशेषितम् । पूतशीते क्षिपेत्तत्र क्षौद्रं पलशतत्रयम् ॥७६॥ धातकीविंशतिपलं त्रिजातं द्विपलं तथा । प्रियंगुकांचनाराणां सलोध्राणां पलं पलम्॥ ७७ ॥ व्योषस्य च पलान्यष्टौ चूर्णीकृत्य प्रदापयेत् । घृतभाण्डे विनिक्षिप्य मासमेकं विधारयेत् ॥ ७८ ॥ ततः पिबेद्यथाग्नि तु जयेद्विद्रधिमुत्थितम् । ऊरुस्तम्भाश्मरीमेहान् प्रत्यष्ठीलाभगन्दरान् । गण्डमालां हनुस्तम्भं विडङ्गारिष्टसंज्ञकः ॥ ७९ ॥

वायविडङ्ग, पीपलामूल, रास्ना, कुड़े की छाल, इन्द्रजौ, पाढ़ी, एलुवा और आंवला,

प्रत्येक बीस-बीस तोले। इन सबको कूटकर २ मन ४ सेर १५ तोले जल में पकावे। ३२ सेर ६८ तोले जल बाकी रहे तब इसे ठंडा कर छान ले। इस काढ़े में शहद १२ सेर, धाय के फूल १ सेर, त्रिजात (इलायची, दालचीनी और तेजपात) प्रत्येक ८ तोले। प्रियंगु, कचनार की छाल और लोध चार-चार तोले। त्रिकुटु (सोंठ, मिर्च और पीपरि) १२ तोले। इन सबका चूर्ण करके मिलावे। इसको घी के चिकने बर्तन में भरकर और मुख बन्द करके एक महीने भर धरा रहने दे। पश्चात् छानकर सेवन करने से विद्रधि, ऊरुस्तम्भ, पथरी, प्रमेह, प्रत्यष्ठीला, भगन्दर, गण्डमाला और हनुस्तम्भ आदि रोगों को यह विडङ्गारिष्ट शान्त करता है। मात्रा—१ तोले से २॥ तोले तक ॥७२-७६॥

व्रण में निषिद्ध पदार्थ।

नवं धान्यं माषास्तिलगुडकुलत्थाम्ल-कुशराः सतीना निष्पावा हरिणकमजानूप-पिशितम्। हिमाम्भो मस्त्वूरं लवणकटुकं पिष्टविकृतिर्दधिक्षीरं तक्रं व्रणिषु सकलं दोषजननम् ॥ ८० ॥

इति भैषज्यरत्नावल्यां व्रणशोथा-धिकारः समाप्तः।

---

नये अन्न, उड़द, तिल, गुड़, कुलथी, खटाई, खिचड़ी, मटर, भटवांस, हरिण का मांस, बकरे का मांस, आनूप देश के जीवों का मांस, ठंडा जल, सूखा मांस, नमक, कड़ुआ पदार्थ, पीठी के पदार्थ, दही, दूध, और माठा ये सब पदार्थ व्रणरोगी को हानिप्रद हैं ॥ ८० ॥

इति श्रीसरयूप्रसादत्रिपाठिविरचितायां भैषज्य-रत्नावल्या रत्नप्रभाभिधायां व्याख्यायां व्रणशोथाधिकारः समाप्तः।

---

# अथ सद्योव्रणाधिकारः।

सद्यःक्षतं व्रणं वैद्यः सशूलं परिषेचयेत्। यष्टिमधुकयुक्तेन किंचिदुष्णेन सर्पिषा ॥ १ ॥

तत्काल के घाव को और शूलयुक्त व्रण को मुलेठी के कल्क से सिद्ध किये हुए किंचित् गरम घी से सेंकना चाहिए ॥ १ ॥

अपामार्गस्य संसिक्तं पत्रोत्थेन रसेन तु। सद्योव्रणेषु रक्तं तु प्रवृत्तं परितिष्ठति ॥ २ ॥

लटजीरा के पत्तों के रस का सिंचन करने से तत्काल के घाव का रक्त बहना बन्द हो जाता है ॥ २ ॥

कर्पूरपूरितं बद्धं सघृतं संप्ररोहति। सद्यःशस्त्रक्षतं पुंसां व्यथापाकविवर्जितः ॥ ३ ॥

तलवार आदि के घाव में तत्काल कपूर का चूर्ण सौबार के धोये हुए घी में मिलाकर भर दे और वस्त्र से बाँध दे, इससे घाव भर जाता है और पीड़ा दूर हो जाती है एवं घाव पकता नहीं है ॥ ३ ॥

शुनो जिह्वाकृतश्चूर्णः सद्यःक्षतविरोहणः। इति साप्ताहिकः कार्यः सद्योव्रणहितो विधिः ॥ ४ ॥ सप्ताहात् परतः कुर्याच्छारीरव्रणवत् क्रियाम् ॥ ५ ॥

कुत्ते की जीभ का चूर्ण शीघ्र ही घाव को पूरित करता है। इस प्रकार सद्योव्रण के हितकारी उपाय सात दिन तक करे। सात दिन के पश्चात् शारीरव्रण के समान चिकित्सा करनी चाहिए ॥ ४-५ ॥

प्रसङ्गवश यहाँ अग्निदग्धव्रण की चिकित्सा लिखते हैं।

पित्तविद्रधिवीसर्पशमनं लेपनादिकम्।

अग्निदग्धव्रणे सम्यक् प्रयुञ्जीत चिकित्सकः ॥ ६ ॥

वैद्य को चाहिए कि अग्नि से जले हुए घाव में पित्तविद्रधि और पित्तविसर्प आदि में लिखे हुए लेप आदि का प्रयोग करे ॥ ६ ॥

तिलस्त्वैवाग्निना दग्धं यवभस्मसमन्वितम्। अग्निदग्धव्रणं नश्येदनेनैवानुलेपनात् ॥ ७ ॥

तिल और जौ की भस्मों को मिलाकर जले हुए घाव में लगाने से घाव अच्छा हो जाता है ॥ ७ ॥

तिलतैलैर्यवान् दग्ध्वा समं कृत्वा तु लेपयेत्। तेनैव लेपनादाशु वह्निदग्धः सुखी भवेत् ॥ ८ ॥

जौ की भस्म को समभाग तिल के तेल में मिलाकर लेप करने से अग्नि का जला हुआ सुखी होता है ॥ ८ ॥

सद्यो दग्धश्च मधुना लेपं कृत्वा भिषग्वरः। सतृणं यवचूर्णेन लेपः स्याद्दाहशान्तये ॥ ९ ॥

तत्काल के जले हुए में शहद का लेप करके ऊपर से जौ के चूर्ण का लेप करने से दाह की शान्ति होती है ॥ ९ ॥

महिषीनवनीतेन क्षीरेण पेषयेत्तिलम्। तेन लेपेन दग्धाङ्गं सदाहं सुखमश्नुते ॥ १० ॥

भैंस के मक्खन और दूध में तिलों को पीसकर लेप करने से जले हुए अङ्ग का दाह शान्त हो जाता है, जिससे दग्ध मनुष्य सुखी होता है ॥ १० ॥

महाराष्ट्रीजटालेपाद्दग्धपृष्ठावचूर्णनम्। जीर्णगृहतृणाच्चूर्णं दग्धव्रणहरं परम् ११

जले हुए घाव पर जलपीपरि की जड़ का लेप करने से अथवा पुराने छप्पर के फूस का चूर्ण घाव पर लगाने से दग्धव्रण शान्त होता है ॥ ११ ॥

अन्तर्दग्धकुठेरको दहनजं लेपान्निहन्ति व्रणं, ह्यश्वत्थस्य विशुष्कवल्कलकृतं चूर्णं तथा गुग्गुलोः। अभ्यङ्गाद्विनिहन्ति तैलमखिलं मधूच्छिष्टैः साधितं, पिष्ट्वा शाल्मलितूलकैर्जलगता लेपात्तथा वालुकाः ॥ १२ ॥

वनतुलसी की अन्तर्धूम भस्म, पीपल की सूखी हुई छाल का चूर्ण और गूगुल का चूर्ण इनमें से किसी एक को घाव पर छिड़कने से जला हुआ घाव अच्छा होता है। मैनुमों से सिद्ध किये हुए तेल की मालिश करने से तथा सेमर की रुई और जल के भीतर की बालू को पीसकर लेप करने से अग्निदग्ध व्रण अच्छा होता है ॥ १२ ॥

जीरक घृत।

जीरकपक्वं पश्चात्सिक्थकसर्जरसमिश्रितं हरति। घृतमभ्यङ्गात् पावकदग्धजदुःखं क्षणार्द्धेन ॥ १३ ॥

जीरा १ पाव, घी १ सेर, पाकार्थ जल ४ सेर। विधि से घृत पकाकर छान ले। इसमें एक छटांक मोम और एक छटांक राल के चूर्ण का प्रक्षेप करके मिला दे। इस तैल को जले हुए घाव पर लगाने से क्षणमात्र में घाव की जलन शान्त होती है ॥ १३ ॥

पाटली तैल।

सिद्धं कल्ककषायाभ्यां पाटल्याः कटुतैलकम्। दग्धव्रणरुजास्रावदाहविस्फोटनाशनम् ॥ १४ ॥

पाढ़ल के कल्क और काढ़े से सिद्ध किया हुआ कड़ुआ तेल जले हुए घाव पर लगाने से घाव की पीड़ा, पूय का बहना, जलन और फफोलों को नष्ट करता है ॥ १४ ॥

मञ्जिष्ठाद्य तैल ।

मञ्जिष्ठां चन्दनं मूर्वां पिष्ट्वा तैलं विपाचयेत । सर्वेषामग्निदग्धानामेतद्रोपणमिष्यते ॥ १५ ॥

मँजीठ, लालचन्दन और मूर्वा, इनके कल्क के साथ कडुए तेल को सिद्ध करे । यह तैल सब प्रकार के अग्निदग्ध व्रणों को रोपण करता है ॥ १५ ॥

सवर्णकर लेप ।

मनःशिला समञ्जिष्ठा सलाक्षा रजनीद्वयम् । प्रलेपः सघृतक्षौद्रस्त्वचः सावर्ण्यकृत्परः ॥ १६ ॥

मैनशिल, मँजीठ लाख, हल्दी, दारुहल्दी, इन्हें घृत और शहद के साथ मिलाकर लेप लगाने से त्वचा का वर्ण स्वाभाविक हो जाता है ॥ १६ ॥

कालीयकलताम्रास्थिहेमकालारसोत्तमैः । लेपः सगोमयरसः सवर्णीकरणः परः ॥ १७ ॥

काली अगर, प्रियगु, आम की गुठली, धतूरा और नील के स्वरस में गोबर का रस मिलाकर लेप करने से व्रणस्थान का वर्ण शरीर के वर्ण के तुल्य हो जाता है ॥ १७ ॥

चतुष्पदां हि लोमत्वक्खुरशृङ्गास्थिभस्मना । तैलाक्ता लेपिता भूमिर्भवेद्रोमवती पुनः ॥ १८ ॥

इति भैषज्यरत्नावल्यां सद्योव्रणाधिकारः समाप्तः ।

---

चौपायों के बाल, खाल खुर, सींग और हड्डी की भस्म में तैल मिलाकर लेप करने से घाव के स्थान में बाल उत्पन्न हो जाते हैं ॥ १८ ॥

इति श्रीसरयूप्रसादत्रिपाठिविरचितायां भैषज्यरत्नावल्या रत्नप्रभाभिधायां व्याख्यायां सद्योव्रणाधिकार समाप्त

---

## अथ नाडीव्रणाधिकारः ।

नाडीनां गतिमन्विष्य शस्त्रेणापाट्य कर्मवित् । सर्वव्रणक्रमं कुर्याच्छोधनं रोपणादिकम् ॥ १ ॥

नाडीव्रण ( नासूर के घाव ) की गति का जानकर अर्थात् नाडी किस तरफ कितनी दूर तक विकृत हो गई है, इसका पूर्ण निश्चय करने के पश्चात् जहाँ तक वह विकृत हुई हो वहाँ तक शस्त्र द्वारा चीरकर निकाल दे। पश्चात् शोधन और रोपण आदि व्रणों के समान चिकित्सा करनी चाहिए ॥ १ ॥

श्वेतैरण्डस्य निर्यासः खदिरेण समायुतम् । हन्ति नाडीव्रणान् सर्वान् मृगान् मृगपतिर्यथा ॥ २ ॥

सफेद अरण्ड के गोंद और कत्थे को एकत्र मिलाकर लगाने से सम्पूर्ण नाडीव्रण नष्ट होते हैं ॥ २ ॥

आस्फोताक्षीरसंयोगो नाडीं नाशयति द्रुतम् ॥ ३ ॥

हाफरमाली के दूध को लगाने से नाडी व्रण शीघ्र ही नष्ट होता है ॥ ३ ॥

विडङ्गादि चूर्ण ।

विडङ्गत्रिफलाकृष्णाचूर्णं लीढं समाक्षिकम् । हन्ति कुष्ठकृमीन् मेहनाडीव्रणभगन्दरान् ॥ ४ ॥

वायविडङ्ग, त्रिफला, पीपल, इनके चूर्ण को शहद के साथ चाटने से कुष्ठ, कृमिरोग, नाडीव्रण तथा भगन्दर नष्ट होता है ॥ ४ ॥

सैन्धवाद्य तैल ।

सैन्धवार्कमरिचव्यसनाकर्पमार्कवेण रजनीद्वयसिद्धम् । तैलमेतदचिरेण निहन्याद् दूरगामपि कफानिलनाडीम् ॥ ५ ॥

तैल १२८ तोले, कल्क के लिये सेंधा नमक, आक की जड़, कालीमिर्च, चित्रक,

भांगरा, हल्दी, दारुहल्दी, मिलाकर ३२ तोले। पाक के लिये जल ९ सेर ३२ तोले। विधिपूर्वक तैल पकाकर इसकी मालिश करने से अत्यन्त गम्भीर कफ वातज नाडीव्रण नष्ट होता है ॥ ५ ॥

हिंस्राद्य तैल।

हिंस्रां हरिद्रां कटुकां वचाञ्च गोजिह्विकाञ्चापि सबिल्वमूलम्। संहृत्य तैलं विपचेद् व्रणस्य संशोधनं पूरणरोपणञ्च ॥ ६ ॥

हींस, हल्दी, कुटकी, वच, गोभी, बेल की जड़, इनके कल्क से विधिपूर्वक साधित तैल व्रण को शुद्ध करता है तथा उसे भरकर पुराता है ॥ ६ ॥

कर्पूर तैल।

कर्पूरकस्य स्वरसे कटुतैलं विमिश्रयेत्। सिन्दूरकलितं नाडीदुष्टव्रणविसर्पनुत् ॥ ७ ॥

सरसों के तैल को कपूर के क्वाथ से विधिपूर्वक सिद्ध कर सिन्दूर मिलावे। यह तैल नाडीव्रण, दुष्टव्रण तथा विसर्प को नष्ट करता है ॥ ७ ॥

वातनाड़ी की चिकित्सा।

नाडीं वातकृतां साधुपाटितां लेपयेद्भिषक्। प्रत्यकपुष्पीफलयुतैस्तिलैः पिष्टैः प्रलेपयेत् ॥ ८ ॥

वातज नासूर को अच्छे प्रकार चीरकर उस पर अरजोरा के बीज और तिलों को पीस कर लेप करना चाहिए ॥ ८ ॥

पित्त और कफनाड़ी की चिकित्सा।

पैत्तिकीं तिलमञ्जिष्ठानागदन्तीनिशायुगैः। श्लैष्मिकीं तिलयष्ट्याह्वनिकुम्भारिष्टसैन्धवैः ॥ ९ ॥

पित्तज नासूर पर तिल, मँजीठ, नागदन्ती, (हाथीशुण्डा), हल्दी और दारुहल्दी को पीस कर लेप करना चाहिए। कफज नासूर पर तिल, मुलेठी, जमालगोटे की जड़, नीम के पत्ते और सेंधानमक को पीसकर लेप करना चाहिए ॥ ९ ॥

शल्यज नाड़ी की चिकित्सा।

शल्यजां तिलमध्वाज्यैर्लिप्त्वा बन्धनमाचरेत्। आरग्वधनिशाकालाचूर्णाज्यक्षौद्रसंयुता॥ सूत्रवर्त्तिर्व्रणे योज्या शोधनी गतिनाशिनी ॥ १० ॥

शल्यज नासूर को चीर कर उस पर तिल, शहद और घी का लेप करके बांध देना चाहिए अमलतास, हल्दी और कौआठोड़ी के चूर्ण में घी और शहद मिलाकर सूत की बत्ती भिगोवे और उस बत्ती को नासूर में रक्खे तो नासूर शुद्ध होकर भर जाता है ॥ १० ॥

घोण्टाफलादि वर्ति।

घोण्टाफलत्वङ्मदनात् फलानि पूगस्य च त्वग्लवणञ्च मुख्यम्। स्नुह्यर्कदुग्धेन सहैव कल्को वर्त्तीकृतो हन्त्यचिरेण नाडीम् ॥ ११ ॥

कँटाली बेर का छिलका, मैनफल; सुपारी की छाल और सेंधानमक; इनको समभाग लेकर थूहर और मदार के दूध में घोट कर बत्ती बना ले इस बत्ती को नासूर में रखने से नासूर शीघ्र ही भर जाता है ॥ ११ ॥

वर्त्तीकृतं माक्षिकसम्प्रयुक्तं नाडीघ्नमुक्तं लवणोत्तमं वा। दुष्टव्रणे यद्विहितञ्च तैलं तत्सेव्यमानं गतिमाशु हन्ति ॥ १२ ॥

सेंधानमक और शहद की बत्ती बनाकर नासूर में रखने से नासूर नष्ट होता है अथवा दुष्ट व्रण के लिए जो तैल कहे हैं, उनका सेवन करने से नासूर नष्ट होता है ॥ १२ ॥

जात्यादि वर्ति।

जात्यर्कशम्पाककरञ्जदन्तीसिन्धूत्थ-

सौवर्चलयावशूकैः। वर्त्तिः कृता हन्त्यचिरेण नाडीं स्नुक्क्षीरपिष्टा सह चित्रकेण॥ १३॥

चमेली के पत्ते, मदार के पत्ते, अमलतास, करंजुआ, दन्ती, सेंधानमक, काचानमक, जवाखार और चीता की जड़ को समभाग लेकर थूहर के दूध में घोटे। पश्चात् बत्ती बनाकर नासूर में रक्खे तो घाव शीघ्र अच्छा हो जाता है॥ १३॥

माहिषं दधि कोद्रवभक्तमिश्रितं हरति चिरविरूढाञ्च। भक्तं कंगुनिकामवमतिदारुणां नाडीं शमयेत्॥ १४॥

कोदों के भात में अथवा कांगनी के भात में भैंस का दही मिलाकर खाने से बहुत पुराना अत्यन्त कठिन नासूर अच्छा होता है॥ १४॥

क्षारसूत्र प्रयोग।

कृशदुर्बलभीरूणां गतिर्मर्माश्रिता च या। क्षारसूत्रेण तां छिन्द्यान्न शस्त्रेण कदाचन॥ १५॥

कृश, दुर्बल और डरपोक पुरुषों के नाड़ीव्रण को तथा मर्मस्थान के नाड़ीव्रण को क्षारसूत्र से काटना चाहिए, शस्त्र से कभी न काटना चाहिए॥ १५॥

एषण्या गतिमन्विष्य क्षारसूत्रानुसारिणीम्। सूचीं निदध्याद्गत्यन्ते चोन्नम्याशु च निर्हरेत्॥१६॥ सूत्रास्यान्तं समानीय गाढबन्धनमाचरेत्। ततः क्षारबलं वीक्ष्य सूत्रमन्यत् प्रवेशयेत्॥ १७॥ क्षारोक्तं मतिमान् वैद्यो यावन्न भिद्यते गतिः। भगन्दरेऽप्ययं विधिः कार्यो वैद्येन जानता॥ १८॥

एषणीयंत्र से नाड़ीव्रण की गति को जान कर फिर सुई में क्षारसूत्र पिरोकर नाड़ी के छेद में उसे प्रविष्ट करके दूसरी ओर निकाल ले। पश्चात् सुई को अलग करके सूत्र के दोनों किनारों को मिलाकर मजबूत गांठ लगा दे। जब क्षार का बल कम हो जाय तब उस डोरे को निकाल पूर्वोक्त रीति से फिर दूसरा क्षारसूत्र प्रवेश करके बांध दे। इसी प्रकार क्षारसूत्र का प्रयोग तब तक करे जब तक नाड़ी की गति (छिद्र) विदीर्ण[1] न हो जाय। भगन्दर में भी चतुर वैद्य को यह विधान करना चाहिए १६-१८

अर्बुदादिषु चोत्क्षिप्य मूले सूत्रं निधापयेत्। सूचीभिर्यववक्त्राभिराचितं वा समन्ततः॥ मूलं सूत्रेण बध्नीयाच्छिन्ने चोपचरेद् व्रणम्॥ १९॥

अर्बुद आदि को ऊँचा उठाकर उसके मूल में क्षारसूत्र बाँध दे अथवा यवमुखी सुई से चारों ओर अर्बुद को विद्ध करके उसके मूल में क्षारसूत्र बाँधे। जब अर्बुद कट जाय तब व्रण की सी चिकित्सा करनी चाहिए॥ १९॥

सप्ताङ्ग गुग्गुल।

गुग्गुलुस्त्रिफलाव्योषैः समांशैराज्ययोजितः। नाडीदुष्टव्रणशूलभगन्दरविनाशनः॥ २०॥

गूगुल, हड़, बहेड़ा, आँवला, सोंठ, मिर्च और पीपरि; इनको समभाग लेकर खूब महीन पीसकर घी में मिला ले। इसका सेवन करने से नासूर, दुष्टव्रण, शूल और भगन्दर नष्ट होता है। मात्रा २ मासे से ४ मासे तक॥ २०॥

स्वर्जिकाद्यतैल।

स्वर्जिकासिन्धुदन्त्यग्निरूपिकानलनीलिकाः। खरमञ्जरिबीजानि तैलं गोमूत्रपाचितम्॥ दुष्टव्रणप्रशमनं कफनाडीव्रणापहम्॥ २१॥

कल्क के लिए सज्जीखार, सेंधानमक, जमालगोटे की जड़, चीता की जड़, सफेद आक

---

[1] नासूर विदीर्ण हो जाने पर यथावत् उपचार करने से बहुत शीघ्र अच्छा हो जाता है।

की जड़, गरसल की जड़, नील की जड़ और खदजीरा के बीज; सब मिलित आध सेर। तेल ४ सेर। गौमूत्र ८ सेर। तैलपाक की विधि से तैल सिद्ध कर लगाने से दुष्ट नाड़ीव्रण तथा कफज नाड़ीव्रण का नाश होता है ॥ २१ ॥

कुम्भीकाद्यतैल।

कुम्भीकखर्जूरकपित्थबिल्ववनस्पतीनां तु शलाटुवर्गैः। कृत्वा कषायं विपचेत्तु तैलमावाप्य मुस्तासरजप्रियंगुम् ॥ २२ ॥ सौगन्धिकामोचरसाहिपुष्पा लोध्राग्नियुक्ता खलु धातकी च। एतेन शल्यप्रभवा हि नाडी रोहेद्व्रणो वै सुखमाशु चैव २३

पुन्नागवृक्ष, खजूर, कैथा और बेल; इन वनस्पतियों के कच्चे फलों के काढ़े से और नागरमोथा, चीड़ की लकड़ी, प्रियंगु, रोहिषतृण, मोचरस, नागकेशर, लोध, चीता की जड़ और धाय के फूल; इनके कल्क से विधिपूर्वक तैल सिद्ध करके व्रण पर लगाने से शल्यज व्रण सुखपूर्वक शीघ्र ही अच्छा हो जाता है ॥२२-२३॥

भल्लातकाद्य तैल।

भल्लातकार्कमरिचैर्लवणोत्तमेन सिद्धं विडङ्गरजनीद्वयचित्रकैश्च। स्यान्मार्कवस्य च रसेन निहन्ति तैलं नाडीं कफानिलकृतामपचीं व्रणांश्च ॥ २४ ॥

कल्क के लिए भिलावाँ, मदार की जड़, कालीमिर्च, सेंधानमक, वायविडंग, हल्दी, दारुहल्दी और चीता की जड़; सब मिलाकर आध सेर। कडुआ तैल ४ सेर भँगरे का रस ८ सेर, इनके कल्क और स्वरस के साथ सिद्ध किया हुआ तैल वायु और कफ के नाड़ीव्रण, अपची और व्रणों को नष्ट करता है ॥ २४ ॥

निर्गुण्डी तैल।

समूलपत्रां निर्गुण्डीं पीडयित्वा रसेन तु। तेन सिद्धं समं तैलं नाडीव्रणविशोधनम् ॥ २५ ॥ हितं पामापचीनां तु पानाभ्यञ्जननावनैः। विविधेषु च रोगेषु तथा सर्वव्रणेषु च ॥ २६ ॥

निर्गुण्डी की जड़ और पत्तों के रस में समान भाग कडुआ तेल मिलाकर यथाविधि तैल सिद्ध करे। यह तेल मालिश, पान अथवा नस्यकर्म में प्रयोग करने से नाड़ीव्रण को शुद्ध करता है एवं पामा, अपची, सब प्रकार के व्रण तथा अन्यान्य रोगों को नष्ट करता है ॥ २५-२६ ॥

हंसपादी तैल।

हंसपाद्यरिष्टपत्रं जातीपत्रं ततो रसैः। तत्कल्कैश्च पचेत्तैलं नाडीव्रणविशोधनम् ॥ २७ ॥

हंसपदी, नीम के पत्ते और चमेली के पत्ते इनके रस से तथा इन्हीं पूर्वोक्त तीनों औषधों के कल्क से सिद्ध किया हुआ तेल नाड़ीव्रण को शुद्ध करता है ॥ २७ ॥

सर्वव्रणों में पथ्य।

यवषष्टिकगोधूमाः पुराणाः सितशालयः। मसूरी तुवरीमुद्गयूषश्च मधु शर्करा ॥ २८ ॥ विलेपी लाजमण्डश्च जाङ्गला मृगपक्षिणः। घृतं तैलं पटोलञ्च वेत्राग्रं बालमूलकम् ॥ २९ ॥ एतत्पथ्यं नरैः सेव्यं यथावस्थं यथामलम् व्रणशोथे व्रणे सद्योव्रणे नाडीव्रणेऽपि च ॥ ३० ॥

जौ, साँठी के चावल, गेहूँ, पुराने सफेद और लाल शालि चावल तथा मसूर, अरहर, मूँग इनका यूष। शहद, शर्करा, विलेपी, धान की खीलों का माँड, जाङ्गल पशु-पक्षियों का मांस, घी तेल, परवल, बेत की कोंपल, कच्ची मूली; इस पथ्य को व्रणशोथ, व्रण, सद्योव्रण एवं नाड़ीव्रण में अवस्था और दोष के अनुसार सेवन करना चाहिए ॥ २८-३० ॥

सर्वव्रणों में अपथ्य।

रूक्षाम्लशीतं लवणं व्यवायमाया-

सघुर्च्चैः परिभाषणञ्च । प्रियासमालोकनमह्नि निद्रां प्रजागरं चङ्क्रमणं नितान्तम् ॥ ३१ ॥ शोकं विरुद्धाशनमम्बुपानं ताम्बूलसेवाऽखिलपत्रशाकम् । अजाङ्गलं मांसमसात्म्यमन्नं विवर्जयेत् सन्ततमप्रमत्तः ॥ ३२ ॥

इति भैषज्यरत्नावल्यां नाडीव्रणाधिकारः समाप्तः ।

———

रूप, खट्टा, शीतल, नमक, मैथुन, श्रम, ऊँचा बोलना, स्त्रीदर्शन, दिन में सोना, रात को जागना, अधिक चलना, शोक, विरुद्ध भोजन, अति जलपान, पान खाना, सम्पूर्ण पत्र शाक, आनूप एवं जाङ्गल मांस, असात्म्य भोजन, इनका व्रण के रोगी को सर्वथा त्याग करना चाहिए ॥ ३१-३२ ॥

इति श्रीसरयूप्रसादत्रिपाठिविरचितायां भैषज्यरत्नावल्यां रत्नप्रभाऽभिधायां व्याख्यायां नाडीव्रणाधिकारः समाप्तः ।

———

## अथ शिरोरोगाधिकारः ।

### वातिक शिरोरोग की चिकित्सा।

वातिके शिरसो रोगे स्नेहस्वेदान् सनावनान् । पानान्नमुपनाहांश्च कुर्याद्वातामयापहान् ॥ १ ॥

वातज शिरोरोग में वातहर स्नेह, स्वेद, नस्य, अन्न पान तथा उपनाह का प्रयोग करना चाहिए ॥ १ ॥

कुष्ठमेरण्डमूलञ्च लेपात् काञ्जिकयोजितम् । शिरोऽर्त्तिं नाशयत्याशु चूर्णं वा मुचुकुन्दजम् ॥ २ ॥

कूट और एरण्ड की जड़ को काँजी से पीसकर शिर पर लेप करने से तथा मुचुकुन्द के फूलों को पीसकर लेप करने से शिर का दर्द नष्ट होता है ॥ २ ॥

### शिरोवस्ति ।

आशिरो व्यायतं चर्म्म कृत्वाष्टांगुलमुच्छ्रितम् । तेनावेष्ट्यो शिरोऽधस्तात् माषकल्केन लेपयेत् ॥ ३ ॥ निश्चलस्योपविष्टस्य तैलैरुष्णैः प्रपूरयेत् । धारयेदारुजः शान्तेर्यामं यामार्द्धमेव वा ॥ ४ ॥ शिरोवस्तिर्जयत्येष शिरोरोगं मरुद्भवम् । हनुमन्याक्षिकर्णार्त्तिमर्दितं मस्तकम्पनम् ॥ ५ ॥

रोगी के शिर की गोलाई के बराबर लंबा और आठ अंगुल चौड़ा चमड़ा लेकर शिर पर लपेट दे और उसके नीचे उड़द की पीठी लगा कर चपका दे, जिसमें तेल बहने न पावे। फिर रोगी को निश्चल बैठाकर उसमें गरम तेल भर दे, इस तेल को १ पहर या आधा पहर अथवा जब तक रोग की शान्ति न हो तब तक धारण करे। यह शिरोवस्ति वातज शिरोरोग को जीत लेती है तथा हनुस्तम्भ, मन्यास्तम्भ, आँख और कान की पीड़ा, अर्दित और शिरःकंपरोग को नष्ट करती है ॥ ३-५ ॥

### पैत्तिक शिरोरोग की चिकित्सा ।

पैत्ते घृतं पयः सेकाः शीतलेपाः सनावनाः । जीवनीयानि सर्पींषि पानान्नञ्चापि पित्तनुत् ॥ ६ ॥

पित्तज शिरोरोग में घी और दूध का सेवन, सेंक, ठंडा लेप और नस्य, जीवनीय गण से सिद्ध किया हुआ घी और पित्तनाशक अन्न-पानों का सेवन पित्तज शिरोरोगों को नष्ट करता है ॥ ६ ॥

शतधौतघृताभ्यङ्गशीतवातादिसेवनम् । शीतस्पर्शाश्च संसेव्याः सदा दाहार्त्तिशान्तये ॥ ७ ॥

पैत्तिक शिरोरोग में दाह तथा वेदना की शान्ति के लिये सौ बार शीतल जल से धोया हुआ घी का अभ्यङ्ग, शीतल वायु का सेवन तथा शीतल अर्थात् कुमुद, नील कमल, श्वेत कमल आदि के पत्तों को शिर पर रखना चाहिए ॥ ७ ॥

चन्दनोशीरयष्ट्याह्वबलाव्याघ्रनखोत्पलैः। क्षीरपिष्टैः प्रदेहः स्यात्तच्छृतैर्वा परिषेचनम् ॥ ८ ॥

लाल चन्दन, खस, मुलेठी, खरैटी, नखी, नील कमल, इन्हें एकत्र दूध से पीसकर पैत्तिक शिरोरोग की शान्ति के लिये लेप करना चाहिए। अथवा इन्हीं द्रव्यों के क्वाथ से परिषेचन करना चाहिए ॥ ८ ॥

कफज शिरोरोग की चिकित्सा।

कफजे लंघनं स्वेदो रूक्षोष्णैः पाचनात्मकैः। तीक्ष्णावपीडधूमाश्च तीक्ष्णाश्च कवलग्रहाः ॥ ९ ॥

कफज शिरोरोग में लंघन तथा रूक्ष, गरम और पाचन ओषधियों से पसीना लेना, तीक्ष्ण ओषधियों के रस से अवपीडनस्य[1], धूम्रपान और तीक्ष्ण ओषधियों का कवल धारण करना हितकर है ॥ ९ ॥

कृष्णाब्दशुण्ठीमधुकशताह्वोत्पलपाकलैः। जलपिष्टैः शिरोलेपः सद्यः शूलनिवारणः ॥ १० ॥

पीपल, मोथा, सोंठ, मुलेठी, सोया, नील कमल, कूट; इन्हें एकत्र जल से पीसकर लेप देने से शीघ्र ही कफज शिरोवेदना नष्ट होती है ॥ १० ॥

देवदारु नतं कुष्ठं नलदं विश्वभेषजम्। लेपः काञ्जिकसम्पिष्टस्तैलयुक्तः शिरोर्त्तिनुत् ॥ ११ ॥

देवदारु, तगर, कूट, जटामांसी, सोंठ इन्हें एकत्र कर काँजी से पीस, तैल में मिलाकर लेप करने से शिरःशूल नष्ट होता है ॥ ११ ॥

प्रयोज्यं दारुणरलमर्द्धभेदप्रशान्तये। विरतौ तत्प्रयोक्तव्यं न प्रकोपे कदाचन ॥ १२ ॥

अर्द्धावभेदक (अरधकपारी) की शान्ति के लिये उचित मात्रा में संखिये का प्रयोग करना चाहिए। जब अर्द्धावभेदक की वेदना शान्त हुई हो, उसी समय ही आनेवाले दौरे को रोकने के लिये इसका प्रयोग कराना चाहिए। जब वेदना हो रही हो उस समय कदापि प्रयोग न करावे। मात्रा—$\frac{1}{16}$ से $\frac{1}{8}$ रत्ती तक ॥ १२ ॥

सारिवादि लेप।

सारिवोत्पलकुष्ठानि मधुकं चाम्लपेषितम्। सर्पिस्तैलयुतो लेपः सूर्य्यावर्त्तार्द्धभेदयोः ॥ १३ ॥

सारिवादिभिः समभागैः काञ्जिकपिष्टैः सतैलेन सहितैर्लेपः।

सारिवा (अनन्तमूल), नीलकमल, कूट, मुलेठी इनको समभाग ले काँजी में पीसे पश्चात् घी और तेल मिलाकर लेप करने से सूर्यावर्त[2] और आधाशीशी शान्त होती हैं ॥ १३ ॥

नागरकल्कविमिश्रं क्षीरं नस्येन योजितं पुंसाम्। नानादोषोद्भूतां शिरोरुजां हन्ति तीव्रतराम् ॥ १४ ॥

दूध में चतुर्थांश सोंठ का कल्क मिला नस्य लेने से नाना दोषों से उत्पन्न तीव्र शिरोवेदना नष्ट होती है ॥ १४ ॥

हंसराजस्य सुधायाश्च चूर्णमेकत्रयोजि-

---

1 तीक्ष्ण ओषधियों को पीसकर कल्क करके निचोड़ ले। उस निचुड़े हुए रस को अवपीड कहते हैं। उस रस से जो नस्य लिया जाता है वह अवपीड नस्य कहा जाता है।

तम्। सार्द्रं कृत्वास्य गन्धेन विनश्यति शिरोव्यथा ॥१५॥

नौसादर के चूर्ण तथा चूने को इकट्ठा मिलाकर किंचित् जल से गीला करके सुँघाने से, इसकी गन्ध से, शिरो वेदना नष्ट होती है। इसे किसी शीशी में रक्खें उसकी डाट सर्वदा अच्छी प्रकार बन्द करके रखना चाहिए। अन्यथा औषध गुणहीन हो जाती है ॥ १५ ॥

अथ योग कहते हैं।

सूर्यावर्त्तभवं बीजं तद्रसेन सुपेषितम्। वेदनानाशनो लेपः सूर्यावर्त्तार्द्धभेदयोः ॥ १६ ॥

सूरजमुखी के बीजों को सूरजमुखी के रस में पीसकर लेप करने से सूर्यावर्त्त[1] और आधा शीशी की पीड़ा शान्त होती है। १६ ॥

सूर्यावर्त्ते विधातव्यं नस्यकर्मादिभेषजम्। पाययेत् सगुडं सर्पिर्घृतपूरांश्च भोजयेत् ॥ १७ ॥

सूर्यावर्त्त रोग में नस्य आदि औषधियों का प्रयोग करना चाहिए तथा घी और गुड़ का पान एवं घेवर का भोजन देना चाहिए ॥ १७ ॥

सूर्यावर्त्ते शिरावेधो नावनं क्षीरसर्पिषा। हितः क्षारघृताभ्यासस्ताभ्याञ्चैव विरेचनम् ॥ १८ ॥

सूर्यावर्त्त रोग में नस का वेधन कराकर रक्त निकालना तथा दूध और घी की नस्य लेना, क्षारघृत और घी का सेवन करना तथा क्षार और घी से ही जुलाब लेना हितकर है ॥ १८ ॥

कृतमालपल्लवरसे क्षरमञ्जरीकल्कसिद्धनवनीतम्। नस्येन जयति नियतं सूर्यावर्त्तं सुदुर्वारम् ॥ १९ ॥

मक्खन आधसेर, अमलतास के पत्तों का रस २ सेर और कल्कार्थ लटजीरा आधपाव लेकर यथाविधि पाक करें। इस मक्खन के नस्य लेने से अत्यन्त कठिन सूर्यावर्त्त रोग शान्त होता है ॥ १९ ॥

दशमूलीकषायन्तु सर्पिः सैन्धवसंयुतम्। नस्यमर्द्धावभेदघ्नं सूर्यावर्त्तं शिरोर्त्तिजित् ॥ २० ॥

दशमूल के काढ़े में घी और सेंधानमक मिलाकर सूँघने से आधाशीशी, सूर्यावर्त्त और शिरपीड़ा नष्ट होती है ॥ २० ॥

शिरःशूलहर नस्य।

शिरोऽर्त्तिं हन्ति नस्येन स्फटिकीघनसारजम्। चूर्णं तुल्यं रुणद्धीह रक्तं नासास्रुतं भृशम् ॥ २१ ॥

फिटकिरी तथा कपूर; इनके चूर्ण को बराबर मात्रा में मिलाकर नस्य लेने से शिरोवेदना एवं नाक से प्रवृत्त रक्त (नकसीर) तत्काल बन्द होता है ॥ २१ ॥

शिरीषमूलकबीजैरवपीडश्च योजयेत्। अवपीडो हितो वा स्याद्वचापिप्पलिभिः कृतः ॥ २२ ॥

सिरस और मूली के बीजों के रस की नास लेने से अथवा बच और पीपरि के स्वरस की नास लेने से सूर्यावर्त्त नष्ट होता है ॥ २२ ॥

जाङ्गलानि च मांसानि कारयेदुपनाहकम्। तेनास्य शाम्यते व्याधिः सूर्यावर्त्तः सुदारुणः ॥ २३ ॥

जंगली जीवों के मांस का लेप करने से परम दारुण सूर्यावर्त्त रोग शान्त होता है ॥ २३ ॥

---

१ सूर्यावर्त्त रोग में सूर्योदय से पीड़ा प्रारंभ होती है और मध्याह्न तक उत्तरोत्तर बढ़ती जाती है तथा मध्याह्न के पश्चात् धीरे-धीरे कम होती जाती है और सूर्यास्त के समय बिलकुल शान्त हो जाती है।

भृङ्गराजरसश्छागक्षीरान्तश्चार्कतापितः । सूर्य्यावर्त्तं निहन्त्याशु नस्येनैव प्रयोगराट् ॥ २४ ॥ एष एव विधिः कृत्स्नः कार्य्यश्चार्द्धावभेदके ॥ २५ ॥

भाँगरे के रस में समान भाग बकरी का दूध मिलाकर धूप में गरम करके नस्य लेने से सूर्यावर्त शीघ्र ही नष्ट होता है । यह प्रयोगों का राजा है । यही पूर्वोक्त संपूर्ण विधि आधासीसी रोग में करनी चाहिए ॥ २४-२५ ॥

पिबेत् सशर्करं क्षीरं वा नारिकेलजम् । सुशीतं वापि पानीयं सर्पिर्वा नस्यमस्तयोः ॥ २६ ॥

नासिका के द्वारा शक्कर मिला हुआ दूध या नारियल का जल या ठंढा जल अथवा घी पीने से सूर्यावर्त और अर्धावभेदक (आधासीसी); इन दोनों रोगों में लाभ होता है ॥ २६ ॥

तिलात् कल्कं समलदं सक्षौद्रलवणान्वितम् । नेनास्य लेपयेच्छीर्षमर्द्धभेदं व्यपोहति ॥ २७ ॥

तिल और जटामांसी के कल्क में नमक और शहद मिलाकर शिर पर लेप करने से आधासीसी रोग नष्ट होता है ॥ २७ ॥

सविडङ्गं तिलं कृष्णं समं कृत्वा प्रपेषयेत् । नस्यकर्म्मणि दातव्यमर्द्धभेदं विनाशयेत् ॥ २८ ॥

समभागं पिष्ट्वा उष्णोदकेन घोलयित्वा नस्यम् ।

काले तिल और वायविडंग समभाग लेकर खूब महीन पीस ले और उसे उष्ण जल में घोलकर उसकी नास लेने से आधासीसी नष्ट होती है ॥ २८ ॥

दग्धचुल्लीमृदश्चूर्णं तथा मरिचचूर्णकम् । समांशं मिलितं कृत्वा नस्यं देयं प्रयत्नतः ॥ २९ ॥

चूल्हे की जली हुई मिट्टी और कालीमिर्च का चूर्ण समभाग मिलाकर नस्य देने से आधासीसी शान्त होती है ॥ २९ ॥

अनन्तवात की चिकित्सा

अनन्तवाते कर्त्तव्यः सूर्य्यावर्तहितो विधिः । शिरावेधश्च कर्त्तव्योऽनन्तवातप्रशान्तये ॥ ३० ॥ आहारश्च विधातव्यो वातपित्तविनाशनः । मधुमस्तकसंयावघृतपूरैश्च यः क्रमः ॥ ३१ ॥

सूर्यावर्त में जो चिकित्सा हितकर हो वही अनन्तवात रोग में भी करनी चाहिए तथा अनन्तवात की शान्ति के लिए शिरावेध भी करना चाहिए । आहार-वात-पित्तनाशक एवम् मधुमस्तक, संयाव तथा घेवर का सेवन करना चाहिए ॥ ३०--३१ ॥

शंखक रोग की चिकित्सा ।

सूर्य्यावर्ते हितं यच्च शङ्खके स्वेदवर्जितम् । क्षीरसर्पिः प्रशंसन्ति नस्तः पानञ्च शङ्खके ॥ ३२ ॥

सूर्यावर्त में जो चिकित्सा हितकर है, स्वेद के अतिरिक्त वही चिकित्सा शंखक रोग में लाभदायक होती है । दूध और घी पीना और नस्य लेना भी शंखक रोग में प्रशस्त है ॥ ३२ ॥

शतावरीं कृष्णतिलान् मधुकं नील-

---

१ मधुतैलघृतैर्मध्ये वेष्टिताः समितायच याः । मधुमस्तकमुद्दिष्ट तस्याख्या परिमार्जनमिति—शब्दचन्द्रिका ।

२ पर्पटाः लावयमिता निर्मिता शुभमर्दिताः । कुट्टिताश्चालिताः शुद्धाः शर्करामिश्रमर्दिताः । तच्चूर्णं प्रक्षिपेद्दत्वा लवङ्गमरिचानि च । नारिकेलं समर्दं च कर्पूरोऽश्मभेदकः । घृताक्तमसिता पूर्वोक्तिया रचिता ततः । गस्पा तत्पूरयामास कुर्यान्मुद्रां दृढां सुधीः । तद्विधि प्रसुरे तावत् सुपर्वेविमुणो गणः । प्रकारो यः प्रकारोऽयं संयाव इति कीर्तितः ।

मुत्पलम् दूर्वां पुनर्नवाञ्चापि। लेपं साध्ववतारयेत् ॥ ३३ ॥

शतावरी, काले तिल, मुलेठी, नील कमल, दूब और सोंठी इनका लेप करने से शंखक रोग शान्त होता है ॥ ३३ ॥

शीततोयावसेकांश्च क्षीरसेकांश्च शीतलान्। कल्कैश्च क्षीरवृक्षाणां शङ्खकस्य प्रलेपनम् ॥ ३४ ॥

ठंढे जल से तथा ठंढे दूध से शिर का सींचना अथवा बरगद आदि दूधवाले वृक्षों के कल्क का लेप करना शंखक रोग में हितकर है ॥ ३४ ॥

क्रौञ्चकादम्बहंसानां शराट्याः कच्छपस्य च। रसैः संबृंहणस्याथ तस्य शङ्खकसन्धिजाः ॥ ३५ ॥ ऊर्ध्वास्तिस्रः शिराः प्राज्ञो भिन्द्यादेव न ताडयेत् ॥ ३६ ॥

क्रौञ्च, कलहंस, हंस, टिटिहरी और कछुआ; इनके मांस-रसों से रोगी का बृंहण कर्म करके शङ्ख की सन्धि के ऊपर की तीन शिराओं का वेधन करे, ताडन करे, क्योंकि यह मर्म स्थल है और सन्धि भग होने का भय है ॥ ३५,३६ ॥

गिरिकर्णीफलरसं मूलञ्च नस्यमाचरेत्। मूलं वा बन्धयेत् कर्णे शीघ्रं हन्ति शिरोव्यथाम् ॥ ३७ ॥

कोयली ( विष्णुकान्ता ) के फल के रस का अथवा इसकी जड़ के चूर्ण का नस्य लेने से तथा उसके मूल को कान में बाँधने से शिर की पीड़ा शीघ्र शान्त होती है ॥ ३७ ॥

गुञ्जाकरञ्जबीजञ्च तयोः कल्को जले कृतः। मरिचैर्भृङ्गराजैश्च शीघ्रं हन्ति शिरोव्यथाम् ॥ ३८ ॥

घुँघुची और कंजा के बीजों को जल में पीसकर अथवा कालीमिर्च और भाँगरे को पीसकर नस्य लेने से शिर की पीड़ा नष्ट होती है ॥ ३८ ॥

क्षुद्रतीक्ष्णां तथा तीक्ष्णां स्नुहीक्षीरेण पेषयेत्। लेपनाद्दाशु नश्यन्ति वेदनाः सर्वसम्भवाः ॥ ३९ ॥

छोटी लालमिर्च और बड़ी लालमिर्च को थूहर के दूध में पीसकर शिर पर लेप करने से सब प्रकार की शिर पीड़ाएँ नष्ट होती हैं ॥ ३९ ॥

षड्बिन्दु तैल।

एरण्डमूलं तगरं शताह्वा जीवन्तिरास्ना सहसैन्धवञ्च। भृङ्गं विडङ्गं मधुयष्टिका च विश्वौषधं कृष्णतिलस्य तैलम् ॥ ४० ॥ आजं पयस्तैलविमिश्रितञ्च चतुर्गुणे भृङ्गरसे विपक्वम्। षड्बिन्दवो नासिकया विधेया निहन्ति शीघ्रं शिरसो विकारान् ॥ ४१ ॥ च्युतांश्च केशांश्चलितांश्च दन्तान् दुर्बन्धमूलांश्च दृढीकरोति। सुपर्णदृष्टिप्रतिमञ्च चक्षुर्बाह्वोर्बलञ्चाप्यधिकं ददाति ॥ ४२ ॥

कल्क के लिए अरण्ड की जड़, तगर, सौंफ, जीवन्ती, रासना, सेंधा नमक, भँगरा वायविड़ंग, मुलेठी और सोंठ; सब मिलाकर आध सेर। काले तिल का तेल २ सेर, बकरी का दूध २ सेर, भँगरे का रस ८ सेर। विधिपूर्वक तेल सिद्ध करे। इस तेल को छह-छह बूँद की मात्रा में प्रत्येक नासिका छिद्र में छोड़ने से शिर के कुल विकार शीघ्र नष्ट होते हैं तथा यह षड्बिन्दु तैल गिरते हुए केशों को तथा जड़ से हिले हुए दाँतों को जमा देता है एवं नेत्रों में गरुड़ की-सी दृष्टि और बाहुओं में अधिक बल देता है ॥ ४०-४२ ॥

मायूराद्य घृत।

दशमूलीपलाशरास्नामधुकैस्त्रिपलैः सह।

मयूरं पक्षपित्तान्त्रशकृत्पादास्यवर्जितम्[1] ॥ ४३ ॥ जले पक्त्वा घृतप्रस्थं तस्मिन् क्षीरसमं पचेत् । मधुरैः कार्षिकैः कल्कैः शिरोरोगार्दितापहम् ॥ ४४ ॥ कर्णनासाक्षिजिह्वास्यगलरोगविनाशनम् । मयूराद्यमिदं सर्पिरूर्ध्वजत्रुगदापहम् ॥ ४५ ॥ आखुभिः कुक्कुटैर्हंसैः शशैश्चापि हि बुद्धिमान् । कल्केनानेन विपचेत् सर्पिरूर्ध्वगदापहम् ॥ ४६ ॥ दशमूलादिना तुल्यो मयूर इह गृह्यते । अन्ये त्वाकृतिमानेन मयूरग्रहणं विदुः ॥ ४७ ॥

काथ के लिये दशमूल का प्रत्येक द्रव्य बारह-बारह तोले, खरेटी १२ तोले, रास्ना १२ तोले और मुलेठी १२ तोले । पंख, पित्ता, आँत, बीट, और चोंच से रहित मोर का मांस १२ तोले । जल २५ सेर ४८ तोले । अवशिष्ट काथ ६ सेर ३२ तोले । घी १२८ तोले । दूध १२८ तोले । कल्क के लिए मधुर द्रव्य ( काकोल्यादि गण—काकोली, क्षीरकाकोली, जीवक, ऋषभक, मुँगवन, मषवन, मेदा, महामेदा, गिलोय, काकड़ासिंगी, वंशलोचन, पद्माख, पुंडरिया, ऋद्धि, वृद्धि, मुनक्का, जीवन्ती, मुलेठी—की प्रत्येक औषधि ) एक-एक तोला । विधि से घृत सिद्ध कर पान करने से शिर के रोग तथा कान, नाक, आँख, जीभ, मुख, गला और जत्रुसन्धि से ऊपर होनेवाले रोगों को यह मयूराद्य घृत नष्ट करता है ।

इसी प्रकार पूर्वोक्त काथ और कल्क के साथ चूहा, मुर्गा, हंस और खरगोश के मांस को मिश्रित कर घृत सिद्ध करके सेवन करने से जत्रुसन्धि से ऊपर होनेवाले रोग नष्ट होते हैं । यहाँ दशमूल आदि के तुल्य मयूर मांस का ग्रहण करना बताते हैं ॥ ४३-४७ ॥

## बृहन्मयूराद्य घृत ।

शतं मयूरमांसस्य दशमूलं बलां तुलाम् । द्रोणेऽम्भसः पचेत् शृत्वा तस्मिन् पादस्थिते ततः ॥ ४८ ॥ निषिच्य पयसो द्रोणं पचेत्तत्र घृताढकम् । प्रपौण्डरीकं वर्गोक्तैर्जीवनीयैश्च भेषजैः ॥ ४९ ॥ मेधाबुद्धिस्मृतिकरमूर्ध्वजत्रुगदापहम् । मायूरमेतन्निर्दिष्टं सर्वानिलहरं परम् ॥ ५० ॥ मन्याकर्णशिरोनेत्ररुजापस्मारनाशनम् । विषवातामयश्वासविषमज्वरकासनुत् ॥ ५१ ॥

क्वाथार्थ जवान मयूरों का मांस ५ सेर । जल २५ सेर ४८ तोले । अवशेष क्वाथ ६ सेर ३२ तोले और दशमूल तथा खरेंटी मिलित ५ सेर, काथार्थ जल २५ सेर ४८ तोले । अवशेष क्वाथ ६ सेर ३२ तोले । दूध २५ सेर ४८ तोला । घृत ६ सेर ३२ तोला । कल्क के लिए पुण्डरिया और जीवनीयगण ( जीवक, ऋषभक, मेदा, महामेदा, काकोली, क्षीरकाकोली, जीवन्ती, मुलेठी, माषपर्णी, मुद्गपर्णी ) की ओषधियाँ मिलित १२८ तोले । विधिवत् घृत सिद्ध करके सेवन करने से मेधा, बुद्धि और स्मरणशक्ति को बढ़ाता है और जत्रुसन्धि से ऊपर के रोगों को नाश करता है । यह बृहन्मयूराद्य घृत सब प्रकार के वातरोग, गर्दन के रोग तथा कान, शिर और आँख की पीड़ा, अपस्मार, विषदोष, वातरोग, श्वास, विषमज्वर और कासरोग को नष्ट करता है ॥ ४८-५१ ॥

## गुञ्जातैल ।

विशुद्धं तिलतैलञ्च तत्समं काञ्जिकं भवेत् । आरनालसमं भृङ्गद्रवं कृत्वा प्रदापयेत् ॥ ५२ ॥ मन्दाग्निना ततः पाच्यं यावत्तैलं स्थितं भवेत् । तैलमध्ये प्रदातव्यं पिष्ट्वा गुञ्जापलद्वयम् ॥ ५३ ॥ उत्तार्य तैलशेषं तु दिनैकं तत्तु रक्षयेत् । शिरोरोगेषु दुष्टेषु चार्द्धशीर्षे सुदारुणे ॥ ५४ ॥ भ्रू शङ्खकर्णपीडाश्च नश्यन्ति

[1] 'पक्षमूत्रपादास्यवाससतम्' इत्यपि पाठः ।

नात्र संशयः। गुञ्जातैलमिति ख्यातं दत्तं हन्ति शिरोव्यथाम् ॥ ५५ ॥

तिल तैल ३२ तोले। काँजी ३२ तोले। भाँगरे का रस ३२ तोले। कल्क के लिए घुँघची ८ तोले। मन्दाग्नि से तेल सिद्ध करे। जब केवल तैल बाकी रहे तब छान कर एक दिन भरा रहने दे। इस तेल का नस्य लेने से शिरोरोग, आधासीसी, भौं, शंख और कान की पीड़ा नष्ट होती है। यह गुञ्जातैल शिर की पीड़ा को नष्ट करता है ॥ ५३-५५ ॥

पञ्च पञ्च पलं नीत्वा पञ्चमूलीयुगात् पृथक्। विपाचयेज्जलद्रोणे चाष्टभागावशेषितम् ॥ ५६ ॥ आर्द्रकस्य रसमस्थं निर्गुण्ड्यास्तत्समं भवेत्। स्नूपर्णं पञ्चकोलं च जीरकद्वयसर्षपम् ॥ ५७ ॥ सैन्धवञ्च यवक्षारं त्रिवृता च निशाद्वयम्। तोयञ्च द्विगुणं दत्त्वा कल्कमत्तसमं विदुः ॥ ५८ ॥ सर्वैरेभिः पचेत्तैलं शिरोरोगं व्यपोहति। ऊर्ध्वजत्रु जरोघ्नं वातश्लेष्मगदापहम् ॥ ५९ ॥ एकजे द्वन्द्वजे चैव सर्वेर सान्निपातिके। अर्द्धावभेदकेचैव सूर्यावर्ते प्रशस्यते ॥ ६१ ॥ सिद्धफलमिदम्।

दशमूल की प्रत्येक ओषधि बीस-बीस तोले लेकर २५ सेर ४८ तोले जल में औटावे जब ३ सेर १६ तोले बाकी रहे तब उतार कर छान ले। अदरख का रस १२८ तोले, संभालू की पत्तियों का रस १२८ तोले, कडुआ तेल १२८ तोले। कल्क के लिए सोंठ, मिर्च, पीपरि, पीपरामूल, चव्य, चीता की जड़, सोंठ, सफेद जीरा, कालाजीरा, सरसों, सेंधानमक, जवाखार, निशोथ, हल्दी और दारुहल्दी, प्रत्येक एक-एक तोला। जल ३ सेर १६ तोले। विधि से तेल का पाक करना चाहिए। इस तेल के पीने, मालिश करने और सूँघने से शिरोरोग, जत्रुभाग के ऊपर के रोग, वायु और कफ के रोग तथा एकदोषज, द्वन्द्वज और सान्निपातिक, आधासीसी, सूर्यावर्त और कर्णरोग नष्ट होते हैं। यह सिद्धफल (अनुभूत) है ॥ ५६-६१ ॥

महादशमूलतैल।

दशमूलं पलशतं जलद्रोणे विपाचयेत्। तेन पादावशेषेण कटुतैलाढकं पचेत् ॥ ६२ ॥ जम्बीरार्द्रकधुस्तूरस्वरसं तैलतुल्यतः। कल्कः कणामृता दार्वी शतपुष्पा पुनर्नवा ॥ ६३ ॥ शिग्रुपिप्पलिका तिक्ता करञ्जं कृष्णजीरकम्। सिद्धार्थकं वचा शुण्ठी पिप्पली चित्रकं शटी ॥ ६४ ॥ देवदारु बला रास्ना सूर्यावर्त्तकटफलम्। निर्गुण्डी धविका गैरी ग्रन्थिकं शुष्कमूलकम् ॥ ६५ ॥ यमानी जीरकं कुष्ठमजमोदा च साढकम्। एतेषां पलिकैर्भागैर्विपचेन्मतिमान् भिषक् ॥ ६६ ॥ हन्ति श्लेष्माणमभ्यङ्गात् पानात् कासं व्यपोहति। निहन्ति विविधान् व्याधीन् कफवातसमुद्भवान् ॥ ६७ ॥ शिरोमध्यगतान् रोगान् शोधान् हन्ति व्रणानपि ॥ ६८ ॥

दशमूल ५ सेर लेकर २५ सेर ४८ तोले जल में औटावे, जब ६ सेर ३२ तोले बाकी रहे तब उतार कर छान ले। कड़ुआ तेल ६ सेर ३२ तोले, जंबीरी नींबू का रस ६ सेर ३२ तोले, अदरख का रस ६ सेर ३२ तोले और धतूरे का रस ६ सेर ३२ तोले। कल्क के लिए पीपरि, गिलोय, दारुहल्दी, सौंफ, सांठी की जड़, सहिजन की छाल, पीपरि, कुटकी, करञ्जुआ, कालाजीरा, सफेद सरसों, बच, सोंठ, पीपरि, चीता की जड़, कचूर, देवदारु, खरैटी, रास्ना, सूर्यमुखी, कायफल, संभालू की जड़, धाय, गेरू, पीपरामूल, सूखी मूली, अजवायन, जीरा, कूट, अजमोदा और देवदाली; प्रत्येक चार-चार तोले यथाविधि तैल सिद्ध कर पान

करने अथवा सूँघने से कफरोग, खाँसी, अनेक प्रकार की कफवातज व्याधियाँ, शिरोरोग, सूजन और मन्यारोग नष्ट होते हैं ॥ ६१--६८ ॥

तन्त्रान्तरोक्त बृहद्दशमूल तैल।

दशमूलीशतं ग्राह्यं तथा धुस्तूरकस्य च। शतं पुनर्नवायाश्च निर्गुण्ड्याश्च शतं तथा ॥ ६९ ॥ एतैः कषायैर्विपचेत् कटुतैलाढकं भिषक्। वासा वचा देवदारु शटी रास्ना सयष्टिका ॥ ७० ॥ मरिचं पिप्पली शुण्ठी कारवी कट्फलं तथा। करञ्जं शिग्रुकुष्ठञ्च चिञ्चा च वनशिम्बिका ॥ ७१ ॥ चित्रकञ्च पृथग्भागान् दद्या चैषां पलोन्मितान्। श्लैष्मिकं सन्निपातोत्थं वातश्लेष्मोद्भवं तथा ॥७२॥ कर्णशूलं शिरःशूलं नेत्रशूलञ्च दारुणम्। निहन्ति दशमूलाख्यं तैलमेतन्न संशयः ॥ ७३ ॥

दशमूल २ सेर, जल २५ सेर ४८ तोले, अवशिष्ट क्वाथ ६ सेर ३२ तोले। धतूरा २ सेर, जल २५ सेर ४८ तोले, अवशिष्ट क्वाथ ६ सेर ३२ तोले। सोंठी २ सेर, जल २५ सेर ४८ तोले, अवशिष्ट क्वाथ ६ सेर ३२ तोले, तैल कडुआ ६ सेर ३२ तोले। कल्क के लिए अडूसा, बच, देवदारु, कचूर, रास्ना, मुलेठी, मिर्च, पीपरि, सोंठ, सोया, कायफल, कांजुआ की जड़, कूट, इमली की छाल, वनसेम और चीता की जड़; प्रत्येक चार-चार तोले। विधि से तेल सिद्ध कर सेवन करने से यह दशमूल नामक तेल कफज, सन्निपातज तथा वात कफज कर्णशूल, शिरःशूल और कठिन नेत्रशूलों को निःसंदेह नष्ट करता है ॥ ६९-७३ ॥

तन्त्रान्तरोक्त दशमूल तैल।

दशमूलकाथकल्काभ्यां निर्गुण्डीरससंयुतम्। कटुतैलं समादाय पचेत् भस्थं भिषग्वरः ॥७४॥ सन्निपातं हरेदेतच्छिरोरोगं तथैव च। अस्थिसन्धिकफमायान् रोगान् हन्ति न संशयः ॥ ७५ ॥

दशमूल का क्वाथ ६ सेर ३२ तोले, सँभालू की पत्तियों का रस ६ सेर ३२ तोले, कडुआ तेल १२८ तोले। कल्क के लिए दशमूल ३२ तोले। विधि से तेल सिद्ध कर सेवन करने से सन्निपात, सिर के रोग तथा कफजन्य हड्डी और सन्धि के रोग नष्ट होते हैं ॥ ७४-७५ ॥

विशेषदशमूल तैल।

दशमूलकाथकल्काभ्यां तैलप्रस्थं विपाचयेत्। चतुर्गुणं पयो दत्त्वा शनैर्मृद्वग्निना भिषक् ॥ ७६ ॥ दशमूलमिति ख्यातं शोथं हन्ति सुदारुणम्। नस्येनाकालपलितं ज्वरारोचकनाशनम्। अभ्यङ्गेन सर्वञ्च शिरःशूलं विनाशयेत् ॥७७॥

दशमूल का क्वाथ ६ सेर ३२ तोले। तेल १२८ तोले। दूध ६ सेर ३२ तोले। कल्क के लिए दशमूल ३२ तोले। इन सबको एकत्र कर मन्द-मन्द अग्नि में पकावे। यह दशमूल तेल कठिन से कठिन सूजन को नष्ट करता है। इसका नस्य लेने से कुसमय बालों का पकना, ज्वर और अरुचि तथा मालिश करने से सब प्रकार के शिरःशूल नष्ट होते हैं ॥ ७६-७७ ॥

अपरदशमूल तैल।

दशमूलीकषायेण अष्टाङ्गकल्कसंयुतम्। क्षीरञ्च द्विगुणं दत्त्वा तैलमस्थं विपाचयेत् ॥ ७८ ॥ शिरोर्त्तिं नाशयेदेतद् भास्करस्तिमिरं तथा। वातशूलं पित्तशूलं कफशूलं त्रिदोषजम् ॥ ७९ ॥ सूर्यावर्त्तमभिष्यन्दं जलदोषञ्च नाशयेत्। दशमूलमिदं तैलं शिरोरोगनिसूदनम् ॥ ८० ॥

दशमूल का क्वाथ ६ सेर ३२ तोले। तेल १२८ तोले। दूध ३ सेर १६ तोले। कल्क के लिए अष्टवर्ग ३२ तोले। विधि से तेल सिद्ध

करे। यह तैल शिर की पीड़ा को इस प्रकार नष्ट करता है जिस प्रकार सूर्य अन्धकार को तथा वातशूल, पित्तशूल, कफशूल, सान्निपातिक शूल, सूर्यावर्त, अभिष्यन्द, अक्षदोष और शिरोरोगों को नष्ट करता है ॥ ७८-८० ॥

अपर स्वल्पदशमूल तैल।

दशमूलकाथकल्काभ्यां कटुतैलं विपाचयेत्। सन्निपातज्वरश्वासकासान् हन्ति सुदारुणान् ॥ ८१ ॥

दशमूल के काथ और कल्क के साथ कडुआ तैल को यथाविधि सिद्ध करे। यह तैल दारुण सन्निपातज्वर, श्वास और खाँसी को नष्ट करता है ॥ ८१ ॥

धुस्तूर तैल।

धुस्तूरकाथकल्काभ्यां कटुतैलं विपाचयेत्। सन्निपातज्वरश्लेष्मशोथशीर्षार्त्तिदाहनुत् ॥ कर्णग्रहहरं चास्थिसन्धिग्रहविनाशनम् ॥ ८२ ॥

धतूरे का काथ ४ सेर, कडुआ तेल १ सेर। कल्क के लिए धतूरा ¼ सेर। यथाविधि तैल सिद्धकर मालिश करने से सन्निपातज्वर, कफ सूजन और शिरोरोग, दाह, कानों की पीड़ा, हड्डी और सन्धियों की पीड़ा को यह धुस्तूर तैल नष्ट करता है ॥ ८२ ॥

मध्यमदशमूल तैल।

दशमूली करञ्जश्च निर्गुण्डी च जयन्तिका। धुस्तूरः षट्पलान् भागान् जलद्रोणे विपाचयेत् ॥ ८३ ॥ पादशेषे रसे तैलं कटुप्रस्थं विपाचयेत्। कल्कार्थं दापयेत् तत्र भागान् षट्तोलकान् पृथक् ॥ ८४ ॥ वातश्लेष्मसमुद्भूतं शिरोरोगं व्यपोहति। कासं पञ्चविधं शोथं जीर्णज्वरमपोहति ॥ ८५ ॥ दशमूलमिदं तैलं शिरःकर्णाक्षिरोगनुत्। मन्याहनुग्रहं मन्यावृद्धिं श्लीपदञ्च विनाशयेत्। दशमूलमिदं तैलमश्विभ्यां निर्मितं पुरा ॥ ८६ ॥

दशमूल, करञ्जुआ, सँभालू, जयन्ती के पत्ते और धतूरे के पत्ते, प्रत्येक चौबीस चौबीस तोले। जल २५ सेर ४८ तोले। अवशिष्ट काथ ६ सेर ३२ तोले। कडुआ तेल १२८ तोले। कल्क के लिए दशमूल, करञ्जुआ, सँभालू, जयन्ती के पत्ते और सम्भालू के पत्ते; प्रत्येक छह छह तोले। यथाविधि तेल सिद्ध कर मालिश करने से यह दशमूल तैल वात कफज शिरोरोग, पाँचों प्रकार के कास, शोथ और जीर्णज्वर को नष्ट करता है। एवं शिर, कान और आँखों के रोग, गर्दन का रुक जाना, मन्यावृद्धि, श्लीपद (फीलपा) आदि रोगों को नष्ट करता है। इस दशमूल तैल को पहले अश्विनीकुमारों ने बनाया था ॥ ८३-८६ ॥

कनक तैल।

कनकार्कोरला दूर्वा वासको वैजयन्तिका। निर्गुण्डी पुत्रिका भार्गी शाखोटकपुनर्नवे ॥ ८७ ॥ बदरीविजयापत्रं श्रीफलं बृहती तथा। चित्रकञ्च स्नुहीमूलमग्निमन्थो ऽश्वगन्धकम् ॥ ८८ ॥ निर्गुण्डी गोमठी च पत्रमारग्वधस्य च। प्रत्येकं द्विपलं चैषां षट्त्रीधावत् तत्त्वणादपि ॥ ८९ ॥ जलद्रोणे विपक्तव्यं यावत् पादावशेषितम्। प्रस्थञ्च कटुतैलस्य पाचयेत् तीव्रवह्निना ॥ ९० ॥ द्रव्याण्येतानि सर्वाणि कल्कितानि प्रदापयेत्। पक्षशूलं शिरःशूलं प्लीहानं मांसवर्द्धनम् ॥ ९१ ॥ आमवातञ्च हृच्छूलं वृद्धिञ्च गलगण्डकम्। शोथं व्याधिसमुद्रं वातं हन्ति न संशयः ॥ ९२ ॥ दूर्वायां पतिते बिन्दौ नाश्नन्ति यानि सत्त्वजानि। कनकाख्यमिदं तैलं सर्वरोगकुलान्तकम् ॥ ९३ ॥

धतूरा, आक की जड़, कटेरी, दूब, अड़ूसा, अपामार्ग, निर्गुण्डी, करंजुआ के बीज, भारंगी, सिहोरा की छाल, सोंठी, बेर के पत्ते, भांग के पत्ते, बेलगिरी, कटेरी, चीता की जड़, थूहर की जड़, अरणी, एरण्ड की जड़, निसोथ, मँजीठ, वनभांटा और अमलतास के पत्ते; प्रत्येक आठ-आठ तोले। क्वाथ के लिए जल २२ सेर ४८ तोले। अवशिष्ट क्वाथ ५ सेर ३२ तोले। कड़ुआ तेल १२८ तोले। कल्क के लिए पूर्वोक्त क्वाथ की संपूर्ण औषधियाँ मिश्रित ३२ तोले लेकर विधिपूर्वक तेल अग्नि द्वारा तेल सिद्ध करे। इस तेल की मालिश करने से नेत्रशूल, शिरःशूल, रक्तज और मांसज श्लीपद, आमवात, हृदय-शूल, अपचवृद्धि, गलगण्ड, शोथ, अपतानक, उदर-विकार, खांसी और सब प्रकार के कफ-रोगों को यह कनक तेल नष्ट करता है। हरी दूब पर यदि इसकी बूंद गिर जाय तो उसी समय दूब सूख जाती है॥ ८७-९३॥

महाकनक तैल।

कनकस्य रसप्रस्थं प्रस्थं नृपाक्षुवस्तथा। निर्गुण्डीस्वरसप्रस्थं दशमूलरसस्य च॥ ९४॥ पारिभद्ररसप्रस्थं प्रस्थं वरुणकस्य च। तैलप्रस्थं समादाय भिषग्यत्नाद्विपाचयेत्॥ ९५॥ कल्कैरर्द्धपलैरेतैः शुण्ठीमरिचसैन्धवैः। पुनर्नवाकर्कटकशैलुत्वक्पिप्पलीयुगैः॥ ९६॥ तत्साधुसिद्धं विज्ञाय शुभे पात्रे निधापयेत्। वातश्लेष्मकृतं सर्वमामवातं भगन्दरम्॥ ९७॥ सन्निपातभवं रोगं शोथकाशु विनाशयेत्। ये केचिद्व्याधयः सन्ति श्लैष्मिकाः सान्निपातिकाः॥ ९८॥ तान् सर्वान्नाशयत्याशु सूर्य्यस्तम इवोदितः॥ ९९॥

धतूरे का रस १२८ तोले। सोंठी का रस १२८ तोले। निर्गुण्डी के पत्तों का रस १२८ तोले। दशमूल का काढ़ा १२८ तोले। नीम के पत्तों का रस १२८ तोले। वरना की छाल का काढ़ा १२८ तोले। तेल १२८ तोले। कल्क के लिए सोंठ, मिर्च, सेंधानमक, सांठी, काकड़ासिंगी, लसोड़े की छाल, पीपरि और गजपीपरि, प्रत्येक दो-दो तोले। जब तेल अच्छे प्रकार सिद्ध हो जाय तब वस्त्र से छानकर अच्छे साफ बरतन में रक्खे। यह तैल वातकफ के विकार, सब प्रकार के आमवात, भगन्दर, सन्निपात के रोग और शोथ को तत्काल नष्ट करता है। तथा अन्यान्य कुल श्लैष्मिक और सान्निपातिक रोगों को इस प्रकार नष्ट करता है जैसे उदित सूर्य अन्धकार को नष्ट करता है॥ ९४-९९॥

रुद्र तैल।

जैपालद्रोणधुस्तूरशिग्रुशक्राशनस्य च। सूर्य्यावर्त्तस्य सूर्य्यस्य पत्राणां स्वरसं पृथक्॥ १००॥ जम्बीरमृङ्गवेरस्य रसं दत्त्वा समं समम्। कटुतैलस्य पात्रं तु शोधयित्वा पचेद्भिषक्॥ १०१॥ रजनीद्वयमञ्जिष्ठा कट्फलं कृष्णजीरकम्। त्रिकटु पिप्पलीमूलं सारिवे द्वे विडङ्गकम्॥ १०२॥ रास्ना दारु वला निम्बं मुस्तकं चन्दनं तथा। परशू द्वौ स्नुहीमूलं सूर्य्यापामार्गमूलकम्॥ १०३॥ स्वरसद्रव्यमेतेषां कल्कं दद्यात्तु पादिकम्। मृत्पात्रे सुदृढे चैव पाचयेत् तीव्रवह्निना॥ १०४॥ बलासमूर्च्छागन्धैव नाशयेत् त्रिदिनाद् ध्रुवम्। मुखनासाशिरोरोगांश्च कफशोणितसंस्रवान्॥ १०५॥ शिरोरोगं सन्निपातं श्लीपदं गलगण्डकम्। अभ्यङ्गाच्चापदेतान् पानात् कासं व्यपोहति॥ कालाग्निरुद्रेण प्रोक्तं रुद्रतैलमिदं पुरा॥ १०६॥

जमालगोटा, गोमा, धतूरा, सहिंजन, भांग, सूरजमुखी और आक के पत्तों का रस प्रत्येक १ सेर ३२ तोले। जंबीरी नींबू का रस १ सेर

३२ तोले। भंगरैया का रस ६ सेर ३२ तोले। कड़ुआ तेल ६ सेर ३२ तोले। कल्क के लिए हल्दी, दारुहल्दी, मँजीठ, कायफल कालाजीरा, सोंठ, मिर्च, पीपरि, पीपरामूल, सफेद सारिवा (अनन्तमूल), काली सारिवा (कालीसर), वायविडंग, रासना, देवदारु, खरेंटी, नीम की छाल, नागरमोथा, लाल चन्दन, दोनों प्रकार के बच्छ (कोदाखियर, कुकालिया), थूहर की जड़, मरोरफली, लटजीरा की जड़, अमलतगोटा, गोमा, धतूरा, सहिजन, भाँग, सूरजमुखी और आक की जड़; ये सब मिलित १२८ तोले। इस तेल का पाक मिट्टी के दृढ़ पात्र में हल्की आँच से करना चाहिए। यह तेल मालिश करने से कफरोग और जत्रु से ऊपर होनेवाले रोगों को तीन दिन में नाश करता है। तथा मुख, नाक और नेत्र के रोग, कफस्राव, रक्तस्राव, सिर के रोग, सन्निपात, श्लीपद और गलगण्ड; इन रोगों को मालिश करने से और खाँसी को पान करने से नष्ट करता है। पहले इस रुद्रतैल को कालाग्निरुद्र ने कहा था॥ १००-१०६॥

सप्तराजतैल।

सप्तलीनां रसप्रस्थं शिग्रुपुस्तुरयो-स्तथा। वासकस्य रसप्रस्थं तथा निर्गुण्डि-काकयोः ॥ १०७॥ दशमूलरसप्रस्थं करञ्जनलयोस्तथा। पृथगेभिः पचेद्धीमान् तैलप्रस्थञ्च सार्षपम् ॥ १०८॥ कल्कः कणा चला शुण्ठी पिप्पलीमूलचित्रकम्। कट्फलं कनकं चव्यं जीरकं शतपुष्पिका ॥ १०९॥ पुनर्नवा हरिद्रा च देवदारु च लाङ्गली। शुष्कमूलककुष्ठञ्च यामकं कृष्ण-जीरकम् ॥ ११०॥ स्नुग्दुग्धं क्षीरं पिप्पल-मूलं नागदलं तथा। विडङ्गं सैन्धवं क्षारं चन्दनं शिग्रुपुष्पलम् ॥ १११॥ मरिचं मधुकं रास्ना मूर्वा व्याघ्री बरूणत्वम्। प्रलेपं कार्षिकैः कल्कैर्विपचेत् पाकविञ्चि-पक् ॥ ११२॥ अभ्यङ्गात् श्लैष्मिकं हन्ति पानात् कासं व्यपोहति। श्वयथुञ्चो-दरं शूलं शिरोरोगं सुदुस्तरम् ॥ ११३॥ शिरःशूलं नेत्रशूलं कर्णशूलञ्च दारुणम्। त्रयोदशसन्निपातान् वातश्लेष्मगल-ग्रहान् ॥ ११४॥ एकजं द्वन्द्वजं चैव तथैव सान्निपातिकम्। सर्वं शोथं निहन्त्येव ज्वरं प्लीहानमेव च ॥ ११५॥ श्लेष्म-रोगं निहन्त्याशु भास्करस्तिमिरं यथा। सप्तराजमिदं तैलमूर्ध्वजत्रुगदापहम् ११६

हरफारेवड़ी, सहिजन, धतूरा, अडूसा, निर्गुण्डी, मदार, दशमूल, करञ्ज और नरसल, प्रत्येक का रस या काढ़ा १२८ तोले। कड़ुआ तेल १२८ तोले। कल्क के लिए पीपरि, खरेंटी, सोंठ, पीपलामूल, चीता की जड़, कायफल, धतूरा के पत्ते, चव्य, जीरा, सौंफ, साँठी, हल्दी, देवदारु, कलिहारी, सूखी मूली, कूट, अजवायन, काला जीरा, थूहर का दूध, आक का दूध, अमलतगोटे की जड़, नागकेसर, वाय-विडंग, सेंधानमक, जवाखार, लालचन्दन, सहि-जने की छाल, मोस्ताफर काली मिर्च, मुलेठी, रासना, काकड़ासिंगी, करेरी और बरना की छाल; प्रत्येक एक-एक तोला। विधिपूर्वक तेल सिद्ध करे। मालिश करने से यह तेल कफरोगों को और पान करने से कासरोगों को नष्ट करता है। शोथ, उदररोग, शूल, कठिन से कठिन सिर के रोग, सिरशूल, नेत्रशूल, भयंकर कर्णशूल, तेरह प्रकार के सन्निपात, वात-कफ के रोग, गलग्रहरोग, एकदोषज, द्विदो-षज, और सान्निपातज शोथ, ज्वर, तिल्ली और कफज रोग तथा जत्रुसन्धि से ऊपर के रोगों को यह सप्तराज तैल इस प्रकार नष्ट करता है जैसे सूर्य अन्धकार को नष्ट करता है॥ १०७-११६॥

सम्बाश्मरोक्त सप्तराज तैल।

पुस्तूरं पूतिकं चीना नपत्नी शिग्रु-

धारकम् । शिरीषं हिज्जलं शिग्रु दशमूलं समं भवेत् ॥ ११७ ॥ प्रस्थं प्रस्थं समादाय कटुतैलं समांशकम् । जलद्रोणे विपक्कव्यं ग्राह्यं पादावशेषितम् ॥ ११८ ॥ गोमूत्रं चाढकं दत्त्वा शनैर्मृद्वग्निना पचेत्। मदनं त्र्यूषणं कुष्ठमजाजीमिश्रमेषमम् ॥ ११६ ॥ कट्फलं वरुणं मुस्तं हिज्जलं बिल्वमेव च । हरितालं जवापुष्पममृतं कुनटी तथा ॥ १२० ॥ कर्कटं चन्दनं शिग्रुयमानी व्याघ्रपाद्पि । एतेषां कार्षिकैर्भागैः समभागं प्रकल्पयेत् ॥ १२१ ॥ सप्तराजमिति ख्यातं महादेवेन निर्मितम् । सन्निपातं महाघोरं शिरोरोगं महत्तरम् ॥ १२२ ॥ शिरःशूलं नेत्ररोगं कर्णशूलञ्च दारुणम् । ज्वरं दाहं महाघोरं स्वेदञ्चैव महत्तरम् ॥ १२३ ॥ कामलां पाण्डुरोगञ्च सहलीमकपीनसम् । त्रयोदशसन्निपातान् हन्ति सद्यो न संशयः ॥ १२४ ॥

धतूरा, करंज, हल्दी, जयन्ती, सँभालू, सिरस की छाल, समुद्रफल, सहिजना की छाल और समभाग मिश्रित दशमूल, प्रत्येक ६४-६४ तोले। क्वाथ के लिए जल २५ सेर ४८ तोले। अवशिष्ट क्वाथ ६ सेर ३२ तोले। कडुआ तेल १२८ तोले। गोमूत्र ६ सेर ३२ तोले। कल्क के लिए मैनफल, सोंठ, मिर्च, पीपरि, कूट, जीरा, सौंफ, कायफल, बरना की छाल, नागरमोथा, समुद्रफल, बेलगिरी, हरताल, गुड़हल के फूल, मीठा विष, मैनशिल, काकड़ासिंगी, लाल चन्दन, सहिजन, अजवायन और कटाई की छाल; प्रत्येक एक-एक तोला। इस तेल को धीरे-धीरे मन्द अग्नि से पकावे। यह महादेवजी का बनाया हुआ सप्तराज तैल मालिश करने से महाघोर सन्निपात, महान् शिरोरोग, शिरःशूल, नेत्ररोग, कर्णशूल, ज्वर दाह, पसीने की अधिकता, कामला, पाण्डु-रोग, हलीमक, पीनस और तेरह प्रकार के सान्निपातों को शीघ्र नष्ट करता है ॥ ११७-१२४ ॥

## बृहत्किङ्किणी तैल।

किङ्किणीप्रस्थमेकञ्च प्रस्थं सहचरस्य च । कृष्णधुस्तूरकप्रस्थं प्रस्थञ्च सिन्धुवारकम् ॥ १२५ ॥ पचेत्पात्रे जलं दत्त्वा पादशेषं समुद्धरेत् । तैलप्रस्थं विपक्कव्यं द्रव्याणीमानि दापयेत् ॥ १२६ ॥ यष्टी कणा पयोदश्च गन्धकं कुष्ठमेव च । समुद्रान्ता तथा शृङ्गी किङ्किणीबीजमेहकम् ॥ १२७ ॥ रास्ना मधुरिका भिण्टीमूलमीश्वरमेव च । विषमाक्षुकमञ्जिष्ठाशोभाञ्जनत्वचं तथा ॥ १२८ ॥ एषां कर्षद्वयञ्चैव पिष्ट्वा चात्र समावपेत् । निहन्ति पूतिकर्णञ्च कर्णस्रावं सकण्डुकम्॥१२६॥ कर्णनादं कर्णशोथं बाधिर्यं दारुणं तथा। शिरोरोगं नेत्ररोगं मन्यास्तम्भं गलग्रहम्॥ एतान् रोगान् निहन्त्याशु वृत्रमिन्द्राशनिर्यथा ॥ १३१ ॥

हुलहुल ६४ तोले। चिरायता ६४ तोले। काला धतूरा ६४ तोले। सँभालू ६४ तोले। प्रत्येक को अलग-अलग ६ सेर ३२ तोले जल में पकाकर चौथाई जल अवशिष्ट रक्खे। कडुआ तेल १२८ तोले कल्क के लिए मुलेठी, पीपरि, नागरमोथा, गन्धक, कूट, असगन्ध, काकड़ासिंगी, सूर्यमुखी के बीज, काला धतूरा, रास्ना, सौंफ, चिरायता की जड़, पारा, मीठाविष, मुलेठी, मँजीठ और सहिजना की छाल; प्रत्येक दो-दो तोले। विधि से तेल सिद्ध कर कान में छोड़े तो कर्णनाद, कर्णशोथ और दारुण बधिरता को नष्ट करे और मालिश करने से शिरोरोग, नेत्ररोग, गर्दन के ऊपर की नाड़ी का रुकना और गलग्रह; इन रोगों को इस प्रकार नष्ट करता

है जैसे इन्द्र का वज्र वृक्षों को नष्ट करता है॥ १२२-१३१॥

### श्लेष्मशैलेन्द्र रस।

ज्वराधिकार उक्तो यच्छ्लेष्मशैलेन्द्रको रसः। स चाप्यत्र प्रयोक्तव्यः शिरोरोगनिसूदनः॥ १३२॥

ज्वराधिकार में जो हम श्लेष्मशैलेन्द्र रस कह आये हैं वह भी शिरोरोग को नाश करने के लिये प्रयुक्त करना चाहिए॥ १३२॥

### रसचन्द्रिका वटी।

त्रैलोक्यविजयाबीजं बीजमुन्मत्तकस्य च। कण्टकारीबीजकञ्च बीजं ईन्द्रलमेव च॥ १३३॥ बीजञ्च वृद्धदारस्य समौ गन्धकपारदौ। आर्द्रकैर्वटिका कार्या गुञ्जाद्वितयसम्मिता॥ १३४॥ एषा तोयानुपानेन प्रातः खाद्या हिताशिना। चिरजं सर्वरोगञ्च सन्निपातं सुदारुणम्॥ १३५॥ आमवातं शिरोरोगं मन्यास्तम्भं गलग्रहम्। ग्रहणीं श्लीपदं हन्ति त्वन्त्रवृद्धिं भगन्दरम्॥ १३६॥ कामलां शोथपाण्डुत्वं पीनसार्शोगुदामयान्। वटिका चन्द्रिका नाम वासुदेवेन भाषिता॥ १३७॥

भांग के बीज, काले धतूरे के बीज, छोटी कटेरी के बीज, समुद्रफल के बीज, विधारा के बीज, पारा और गन्धक इन्हें विधिपूर्वक बराबर मात्रा में मिलाकर अदरख के रस में घोट कर दो-दो रत्ती की गोलियाँ बनावे। अनुपान—जल। यह वटी पथ्य आहार सेवन करनेवाले रोगी को प्रातःकाल सेवन करानी चाहिए। यह चन्द्रिका वटी आमवात, शिरोरोग, मन्यास्तम्भ, गलग्रह, ग्रहणी, श्लीपद, अन्त्रवृद्धि, भगन्दर, कामला, शोथ, पाण्डु, पीनस, बवासीर तथा गुदज रोगों को नष्ट करती है॥ १३३-१३७॥

### चन्द्रकान्त रस।

मृतसूताभ्रकं तीक्ष्णं ताम्रं गन्धं समं समम्। स्नुहीक्षीरैर्दिनं मर्द्यं भक्षयेद्रक्तिकोन्मितम्॥ १३८॥ मधुना मर्दितं सेव्यं लोहपात्रे दिने दिने। सप्ताहात्सूर्यावर्त्तादीन् शिरोरोगान् विनाशयेत्॥ १३९॥

पारदभस्म, (अभाव में रससिन्दूर), अभ्रकभस्म, तीक्ष्ण, लोहभस्म, ताम्रभस्म और गन्धक इन्हें थूहर के दूध से घोटकर गोली बनावे। मात्रा आधी रत्ती से १ रत्ती तक। प्रयोग काल में १ वटी को शहद के साथ लोह पात्र में घोटकर सेवन करावे। एक सप्ताह के प्रयोग से यह सूर्यावर्त्त आदि शिरोरोगों को नष्ट करता है॥ १३८-१३९॥

### महालक्ष्मी विलास।

लोहमभ्रं विषं मुस्तं फलत्रयकटुत्रयम्। धुस्तूरं वृद्धदारञ्च बीजमिन्द्राशनस्य च॥ १४०॥ गोक्षुरकद्वयञ्चैव पिप्पलीमूलमेव च। एतत्सर्वं समं ग्राह्यं रसे धुस्तूरकस्य च॥ १४१॥ भावयित्वा वटी कार्या द्विगुञ्जाफलमानतः। महालक्ष्मीविलासोऽयं शिरोरोगविनाशकः॥ १४२॥

लोहभस्म, अभ्रकभस्म, वत्सनाग, मोथा, त्रिफला, त्रिकुटा, धतूरे के बीज, विधारे के बीज, भांग के बीज, छोटा गोखरू, बड़ा गोखरू, पीपलामूल, इन्हें बराबर मात्रा में एकत्र मिलाकर धतूरे के रस से भावना दे और दो रत्ती की गोलियाँ बनावे। यह शिरोरोग को नष्ट करता है॥ १४०-१४२॥

### शिरोरोगहर रस।

रसंगन्धकमभ्रञ्च लौहं कर्षमितं पृथक्। स्वर्णं शाणमितं चैव दार्वाख्यं च विषं तथा॥ १४३॥ भृङ्गराजाम्भसा सम्यङ् मर्दयित्वा विचक्षणः। सर्षपप्रमिताः

कुर्याद्वटीश्चण्डांशुशोषिताः ॥ १४४ ॥ शिरोरोगहरो नाम रसोऽयं हरनिर्मितः। हरेत् सर्वशिरोरोगान् विरामे यदि सेवितः ॥ १४५ ॥

पारा, गन्धक, अभ्रकभस्म, लौहभस्म, हरएक दो तोले, स्वर्णभस्म आधा तोला, शुद्ध संखिया आधा तोला इन्हें एकत्र मोंगरे के रस में घोटकर सरसों के बराबर गोलियाँ बनावे और छाया में सुखा ले। इससे जब शिरोवेदना शान्त हो तब सेवन करने से शिरोरोग का आक्रमण रुक जाता है ॥ १४३–१४५ ॥

अर्द्धनाड़ीनाटेश्वर।

वराटं टङ्कनं शुद्धं पञ्चभागसमन्वितम्। नवभागं मरीचस्य विषं भागत्रयं मतम् ॥ १४६ ॥ स्तन्येन वटिकां कृत्वा नस्यं दद्याद्विचक्षणः। शिरोविकारान् विविधान् हन्ति श्लेष्मोत्तरानपि॥१४७॥

कौड़ी की भस्म ५ भाग, भुना सुहागा ५ भाग, कालीमिर्च ९ भाग, मीठा विष ३ भाग; इनको स्त्री के दूध में घोटकर गोली बनावे। इस गोली को घीसकर नस्य लेने से अनेक प्रकार के कफप्रधान सिर के समस्त रोग नष्ट होते हैं ॥ १४६–१४७ ॥

शिरःशूलाद्रिवज्ररस।

पलं रसं पलं गन्धं पलं लौहं पलं त्रिवृत्। गुग्गुलोः पलचत्वारि तदर्द्धं त्रिफलारजः ॥ १४८ ॥ कुष्ठं मधु कणा शुण्ठी गोक्षुरं कृमिनाशनम्। दशमूलञ्च प्रत्येकं तोलकं पलगोधितम् ॥ १४९ ॥ क्वाथेन दशमूल्याश्च यथास्वं परिभावयेत्। घृतयोगात्प्रकर्त्तव्या वेदगुञ्जामिता वटी ॥ १५० ॥ छागीदुग्धानुपानेन पयसा मधुनाथवा। शिरःशूलाद्रिवज्रोऽयं चण्डनाथेन भाषितः ॥ १५१ ॥ एकजं द्वन्द्वजं चैव त्रिदोषजनितं तथा। वातिकं पैत्तिकं सर्वं शिरोरोगं विनाशयेत् ॥ १५२ ॥

शुद्ध पारा ४ तोले, गन्धक ४ तोले, लोहभस्म ४ तोले, निसोथ ४ तोले गूगुल १६ तोले, त्रिफला का चूर्ण ८ तोले तथा कूट, मुलेठी, पीपरि, सोंठ, गोखरू बायबिडंग और दशमूल; प्रत्येक एक-एक तोला। इन सबको कूट-पीसकर वस्त्र से छान ले, पश्चात् दशमूल के क्वाथ की भावना देकर घी के संयोग से चार-चार रत्ती की गोलियाँ बनावे। इसको बकरी के दूध, जल अथवा शहद के साथ सेवन करना चाहिए। यह चण्डनाथ का कहा हुआ शिरःशूलाद्रिवज्र रस एकदोषज, द्विदोषज, त्रिदोषज तथा वातिक, पैत्तिक सब प्रकार के शिरोरोगों को नष्ट करता है ॥ १४८--१५२ ॥

शिरोरोग में भोजन।

आमिषं जाङ्गलं पथ्यं तत्र शाल्यादयोऽपि च। मुद्गान् माषान् कुलत्थांश्च खादेद्वा निशि केवलान् ॥ कटुकोष्णान् ससर्पिष्कानुष्णं क्षीरं पिबेत्तथा ॥ १५३ ॥

जाङ्गल मांस, शालि आदि धान्य तथा केवल मूँग, उड़द, कुलथी, इनमें से किसी एक को पकाकर अधिक मात्रा में तथा कालीमिर्च, घी आदि डालकर रात्रि में भोजन के समय गरम २ खावे अथवा गरम दूध पीवे ॥ १५३ ॥

शिररोग में पथ्य।

स्वेदो नस्यं धूमपानं विरेको लेपश्छर्दिर्लङ्घनं शीर्षे बस्तिः। रक्तोन्मुक्तिर्वह्निकर्मोपनाहो, जीर्णं सर्पिः शालयः षष्टिकाश्च ॥ १५४ ॥ यूषो दुग्धं धन्वमांसं पटोलं शिग्रुद्राक्षा वास्तुकं कारवेल्लम्। आम्रं धात्री दाडिमं मातुलुङ्गं तैलक्तं काञ्जिकं नारिकेलम् ॥ १५५ ॥ पथ्या कुष्ठं भृङ्गराजः कुमारी मुस्तो क्षीरं चन्द्रिका गन्धसारः। कर्पूरश्चाल्यानि गानेप वर्गः

सेव्यो मर्त्यैः शीर्ष रोगे यथास्वम् ॥ १५६ ॥

स्वेदन, नस्यकर्म, धूमपान, विरेचन, लेपन, लङ्घन, शिरो बस्ति, रक्त निकलवाना, दागना, उपनाहन, पुराना घी, शालि चावल, साठी चावल का यूष, दूध, जाङ्गल जीवों का मांस, परवल, सोहिजना, दाख, बथुआ, करेला, आम, आंवला, अनार, बिजौरा, नीबू, तैल, मट्ठा, कांजी, नारियल, हरड़, कूट, भांगरा घृतकुमारी, नागर मोथा, खस, चांदनी रात, सुगन्धित वस्तु 'इत्र (पुष्प) आदि कपूर यह सब शिरोरोग में हितकर हैं ॥ १५४--१५६ ॥

शिरोरोग में अपथ्य।

क्षवजृम्भामूत्रवाष्पनिद्राविड्वेगभञ्जनम्। दुष्टनीरं विरुद्धान्नं सह्यविन्ध्यसरिज्जलम् ॥ दन्तकाष्ठदिवानिद्रां शिरोरोगी परित्यजेत् ॥ १५७ ॥

इति भैषज्यरत्नावल्यां शिरोरोगाधिकारः समाप्तः।

छींक, जँभाई मूत्र, आंसू, निद्रा, पुरीष इनके वेगों को रोकना, दुष्ट जल, विरुद्ध भोजन; सह्याद्रि एवं विन्ध्य पर्वत की नदियों के जल, दातौन करना और दिन में सोना इनका शिरोरोगी को परित्याग करना चाहिए ॥ १५७ ॥

इति श्रीसरयूप्रसादत्रिपाठिविरचितायां भैषज्यरत्नावल्याः रत्नप्रभाभिधायां व्याख्यायां शिरोरोगाधिकारः समाप्तः।

## शीर्षाम्बुरोगाधिकारः।

शीर्षाम्बुरोग का निदान और सम्प्राप्ति

मद्यातिपानादतिशैत्ययोगाद् विरुद्धभोज्यादनिलप्रदोषात्। दुष्टाम्बुपानादभिघाततश्च तथान्त्रमध्ये कृमिसम्भवाच्च ॥ १ ॥ शिरोगतस्नेहरुती-क्रमेण सञ्चीयते तोयमशिममूलम्। शीर्षाम्बुनामा गद एष पूर्वैः प्रकीर्तितः कृच्छ्रतरो भिषग्भिः ॥२॥ प्रायशः शैशवे व्याधिर्विविधाहितसेवनात्। तथा दन्तोद्गतेरेव बाहुल्येनाभिजायते ॥ ३ ॥

अधिक मद्यपान से, अधिक शीत के संयोग से, विरुद्ध भोजन से, वात के दोष से, दूषित जल पीने से, अभिघात (चोट धक्का आदि) से, आंत में कृमिसंग्रह होने से और शिरोगतस्नेह की विपरीतता से मस्तक में अधिक जल संचय हो जाता है। इसको शीर्षाम्बु नामक रोग बतलाया है। प्रायः बचपन में अनेक प्रकार की अपथ्य वस्तुओं के सेवन से बच्चों को हो जाया करता है। विशेषतः दांत निकलते समय अधिक हुआ करता है ॥ १--३ ॥

शीर्षाम्बु रोग का पूर्वरूप।

जिह्वालिप्तातिनिद्रत्वं दौर्बल्यं श्वासपूतिता। गाढविट्कता च तस्मिंस्तु भविष्यति भविष्यति ॥ ४ ॥

जीभ लिसी-सी रहती है, नींद अधिक आती है, शरीर दुबला हो जाता है, श्वास में से गन्ध आती है, मल गाढ़ा (कड़ा) हो जाता है। इस प्रकार के लक्षण जिसके हों, समझना चाहिए इसे शीर्षाम्बु होनेवाला है ॥ ४ ॥

लक्षण।

शिरसो वेदना घोरा थूत्कारैश्च पीडनम्। मृणालपत्वं कृष्णविट्त्वं धमनी वेगवाहिनी ॥ ५ ॥ त्वग्रूक्षोष्णा तथा दृष्टिर्विषमा च कनीनिका। कोपित्वं मुखवैवर्ण्यं निद्रायां दन्तघर्षणम् ॥ ६ ॥ कदाचिदूर्ध्वता नासाया आक्षेपो रक्तनेत्रता। पक्षाघातः प्रलापश्च शीर्षाम्बुगदलक्षणम् ॥ ७ ॥

शिर में भयानक वेदना होती है, उसमें

और देखने की शक्ति क्षीण हो जाती है, मूत्र कम मात्रा में आता है, मल का रंग काला हो जाता है, नाड़ी की गति बढ़ जाती है। त्वचा रूक्ष और गरम रहती है, उलटी होती है, आँख की पुतली विषम हो जाती है, मुख का रंग विवर्ण हो जाता है, नींद में दाँत घिसता है ओठ और नाक में खुजली चलती है, आक्षेपक ( झटके ) आते हैं, आँखें लाल हो जाती हैं, पक्षाघात और प्रलाप भी होते हैं। ये लक्षण शीर्षाम्बु रोग के हैं॥ ५-७॥

शीर्षाम्बु रोग की चिकित्सा।

भेषजं रेचनं यच्च यन्मूत्रस्य प्रवर्त्तनम्। रक्तदोषहरं यच्च तच्छीर्षाम्बुगदे शुभम्॥ ८॥ मुण्डयित्वा शिरस्तच्च च्छादयेदुष्णवाससा। पाययेन्नारिकेलस्य स्नेहञ्चापि निरन्तरम्॥ ९॥ सेवयेद्रसचूर्णञ्च स्तोकमात्रं विचक्षणः। पीतमूलीं त्रिवृच्छ्यामे पथ्यामामलकीं शटीम्॥ १०॥ अनन्तां मधुकं मुस्तां धन्याकं कटुरोहिणीम्। हरिद्रे द्वे त्रिजातञ्च क्वाथयित्वा यथाविधि॥ यवक्षारेण सहितं पाययेद्रस्य शान्तये॥ ११॥

शीर्षाम्बु रोग में दस्तावर, मूत्र को प्रवृत्त करनेवाली तथा रुधिर को शुद्ध करनेवाली औषध लाभदायक होती है। सिर को मुँड़ाकर गरम कपड़े से ढकना चाहिए। नारियल का तेल बराबर पिलाते रहना चाहिए। रसचूर्ण ( रससिन्दूर ) थोड़ा सेवन कराते रहना चाहिए। गाजर, निशोथ, सारिवा, हड़, आँवला, कचूर, गिलोय, मुलेठी, मोथा, धनियाँ, कुटकी, हल्दी, दारुहल्दी, त्रिजात ( दालचीनी, इलायची, तेजपात ) सबको समान भाग लेकर क्वाथ करके यवक्षार के साथ सेवन करने से शीर्षाम्बु रोग शान्त होता है॥ ८-११॥

सलिलशोषण चूर्ण।

रसचूर्णं यवक्षारं पीतमूलीं त्रिजातकम्। भार्गीमेलां तथा लक्ष्मीमभयामिन्द्रवारुणीम्॥ १२॥ समांशेन प्रगृह्याथ प्रयुञ्ज्यात् पयसा सह। शीर्षाम्बुनेतन्निरः कुर्याच्चूर्णं सलिलशोषणम्॥१३॥

रससिन्दूर, यवक्षार, गाजर, त्रिजात ( दालचीनी, तेजपात, इलायची ), भारंगी, इलायची, शमपत्री, हड़, इन्द्रायण सबको समान भाग लेकर दूध के साथ प्रयुक्त करना चाहिए। यह सलिलशोषण चूर्ण शीर्षाम्बु रोग को अच्छा करता है॥ १२--१३॥

कुङ्कुमाद्य घृत।

कुङ्कुमं सारिवां द्राक्षां जीवन्तीमभयां विडम्। पत्रं पटोलमूलञ्च सर्पिषा पाचयेद्भिषक्॥ १४॥ अस्य मात्रां प्रयुञ्जीत वीक्ष्य व्याधेर्बलाबलम्॥ सर्वान् शीर्षगदान् हन्यात् कुङ्कुमाद्याभिधं घृतम्॥ १५॥

केसर, सारिवा, दाख, जीवन्ती, हड़, विड नमक, तेजपात, परवल की जड़ और घी इनको घृतपाक करने की विधि के अनुकूल मात्रा में लेकर और विधिपूर्वक घृत बनाकर रोगी के बलाबल को विचारकर उचित मात्रा में सेवन करने से यह कुङ्कुमाद्य घृत सब प्रकार शिरोरोगों को नष्ट करता है॥ १४-१५॥

रस तैल।

धुस्तूरं धातकीं मूर्व्वां मधुकं मधुकं विडम्। नागरं नीलिनीं कृष्णां कट्फलं कटुकं जलम्॥ १६॥ शाणमानेन निःक्षिप्य कटुतैलशरावके। संवृते मृण्मये भाण्डे निशाः सप्त च यापयेत्॥ १७॥ ततः तस्मात् विनिर्दिश्य कज्जलीमर्द्दकापिषीम्। तत्र संमिश्य शिरसि मुण्डिते तत् प्रयोजयेत्॥ १८॥ रसतैलमिदं हन्यात् शीर्षाम्बुरोगं न संशयः। व्या-

भितानां हितार्थाय हरेणैतत् समीरितम् ॥ १९ ॥

धतूरा, धाय, मूर्वा, मुलेठी, महुआ, बिड्नमक, सोंठ, नील की जड़, पीपल, कायफल, कुटकी और सुगन्धबाला इन सबका तीन तीन माशे लेकर कल्क बना १४ तोले सरसों के तैल में डालकर मिट्टी के पात्र में ७ दिन तक रक्खा रहने दे, बाद में खोलकर उस कल्क को निकालकर ६ माशे कज्जली डालकर अच्छी तरह मिलाकर मुँडे हुए सिर पर लेप करना चाहिए। यह रस वेग शीर्षाम्बु रोग को शीघ्र ही अच्छा करता है। इसे रोगियों के लाभ के लिए श्रीशिवजी ने कहा है ॥ १८–१९ ॥

वह्निभास्कर रस।

सुवर्णमभ्रं वैक्रान्तं रजतं शाणमानकम् । लौहं रसं गन्धकञ्च माक्षिकं कर्षसम्मितम् ॥ २० ॥ रक्तचित्रकतोयेन तथा ब्राह्मया रसेन च । त्रिःसप्तकृत्वः सम्भाव्य कुर्य्याद्द्वलमिता वटीः ॥ २१ ॥ रसोऽयं सर्व्वथा हन्ति मस्तिष्कोदकमाशु च । अन्यांश्च शिरसो रोगान् वह्निस्तृणगणानिव ॥ २२ ॥ वह्निवद्भासते यस्माद्वीर्य्येणैव रसोत्तमः । ख्यातः पृथ्वीतले तस्मादाख्यया वह्निभास्करः ॥ २३ ॥

सुवर्ण, अभ्रक, वैक्रान्त और चाँदी की भस्म प्रत्येक तीन-तीन माशे । लौहभस्म, पारद, गन्धक और स्वर्णमाक्षिक की भस्म प्रत्येक एक-एक तोला । लाल चित्रक के रस से तथा ब्राह्मी के रस से २१ भावना देकर दो-दो रत्ती की गोलियाँ बनानी चाहिए । यह रस शीर्षाम्बु रोग को सदैव ही नष्ट करता है एवम् और भी दूसरे शिरोरोगों को इस प्रकार नष्ट करता है जैसे अग्नि तिनकों को नष्ट करता है । यह रस वीर्य और वर्ण से अग्नि के समान प्रतीत होता है, इसी से इसे वह्निभास्कर कहते हैं ॥ २०—२३ ॥

नैवं शान्तिंगते व्याधौ मस्तिष्कात् सलिलं हरेत् । त्रिकूर्चकेन लघुना यत्नतः कुशलो भिषक् ॥ २४ ॥

यदि रोग शान्त न हो तो चतुर वैद्य को हलके हाथ से त्रिकूर्चक यंत्र द्वारा मस्तिष्क में से जल निकालना चाहिए ॥ २४ ॥

लघुपुष्टिकरं सर्व्वं पानमन्नं रसञ्च यत् । मस्तिष्काम्बुनि तत्पथ्यं विपरीतं हिताय न ॥ २५ ॥

इति श्रीभैषज्यरत्नावल्यां शीर्षाम्बुरोगाधिकारः समाप्तः ।

---

शीर्षाम्बु रोग में हलका, पौष्टिक अन्न-पान और रस पथ्य है । इससे विपरीत अपथ्य है ॥ २५ ॥

इति भैषज्यरत्नावल्या भाषाटीकायां शीर्षाम्बुरोगाधिकारः समाप्त. ।

---

## अथ मूर्च्छाधिकारः ।

सेकावगाहौ मणयः सहाराः शीताः प्रदेहा व्यजनानिलाश्च । शीतानि पानानि च गन्धवन्ति सर्व्वासु मूर्च्छास्वनिवारितानि ॥ १ ॥

सब प्रकार की मूर्च्छाओं में शीतल जल का सेक नदी आदि का स्नान, मणियुक्त हार पहनना, ठंढे लेप, पंखे की हवा और सुगन्धित ठंढे शर्बत आदि का पीना लाभदायक है ॥ १ ॥

रक्तजायां तु मूर्च्छायां हितः शीतक्रियाविधिः । मद्यजायां पिबेन्मद्यं निद्रां सेवेद् यथासुखम् ॥ विषजायां विषघ्नानि भेषजानि प्रयोजयेत् ॥ २ ॥

रक्तज मूर्च्छा में शीत उपचार हितकर है।

मदिरा की मूर्च्छा में वमन करना और सुखपूर्वक शयन करना हितकर है। विषजन्य मूर्च्छा में विषनाशक प्रयोग करना उचित है ॥ २ ॥

कोलमज्जोषणोशीरकेशरं शीतवारिणा । पीतं मूर्च्छां जयेल्लीढ्वा कृष्णां वा मधुसंयुताम् ॥ ३ ॥

बेर की गुठली की मींगी, कालीमिर्च, खस और नागकेसर; इनके चूर्ण को जल के साथ पीने से अथवा पीपरि और शहद मिलाकर चाटने से मूर्च्छा नष्ट होती है ॥ ३ ॥

पिबेद्दुरालभाक्वाथं सघृतं भ्रमशान्तये ॥ ४ ॥

जवासा के काढ़े में घी मिलाकर पीने से भ्रमरोग की शान्ति होती है ॥ ४ ॥

त्रिफलायाः प्रयोगो वा प्रयोगः पयसोऽपि वा । रसायनानां कौम्भस्य सर्पिषो वा प्रशस्यते ॥ ५ ॥

रसायनानां शिलाजत्वादिरसायनप्रयोगाणाम् । कौम्भं सर्पिर्दशाब्दिकम् ।

त्रिफला, दूध अथवा शिलाजीत आदि रसायन या दशवर्ष के पुराने घृत का सेवन करना मूर्च्छारोग में हितकर है ॥ ५ ॥

मधुना हन्त्युपयुक्ता त्रिफला रात्रौ गुडार्द्रकं प्रातः । सप्ताहात् पथ्यभुजो मदमूर्च्छाकामलोन्मादान् ॥ ६ ॥

प्रतिदिन रात्रि के समय शहद के साथ त्रिफला का और प्रातःसमय अदरख और गुड़ का सेवन करने से पथ्य वस्तु का सेवन करनेवाले रोगी के सात दिन में मद, मूर्च्छा, कामला और उन्माद रोग नष्ट होते हैं ॥ ६ ॥

अञ्जनान्यवपीडश्च धूमः प्रधमनानि च । सूचिभिस्तोदनं शस्तं दाहः पीडा नखान्तरे ॥ ७ ॥ लुञ्चनं केशलोम्नाञ्च दन्तैर्दशनमेव च । आत्मगुप्तावघर्षश्च हितस्तस्यावबोधने ॥ ८ ॥

तेज अंजन लगाने से, निर्गुण्डी आदि के नस्य लेने से, धूम्रपान करने से, सोंठ-मिर्च आदि का चूर्ण सूँघने से, सुई चुभोने से, लोह की सलाई आदि से दागने से, नखों के मांस में पीड़ा करने से, बाल और रोमों के उखाड़ने से, दाँत से काटने से और कौंच की फली को शरीर पर रगड़ने से मूर्च्छित रोगी होश में आ जाता है ॥ ७–८ ॥

गुडं पिप्पलीमूलस्य चूर्णेनातिचितं लिहन् । चिरादपि च संनष्टां निद्रामाप्नोत्यसंशयम् ॥ ९ ॥

पीपरामूल के चूर्ण में गुड़ मिलाकर खाने से बहुत दिन की नष्ट हुई निद्रा भी शीघ्र आ जाती है। इसमें संशय नहीं है ॥ ९ ॥

इक्षवः पोतको माषाः सुरा मांसं घृतं पयः । गोधूमगुडमत्स्याश्च निद्रां कुर्वन्ति देहिनाम् ॥ शक्राशनमजाक्षीरं पादलेपाच्च दर्पकृत् ॥ १० ॥

ईख, पोई का साग, उड़द, मदिरा, मांस, घी, दूध, गेहूँ, गुड़ और मछली के खाने से रोगी को नींद आ जाती है तथा भाँग को बकरी के दूध में पीसकर पैरों पर लेप करने से भी नींद आ जाती है ॥ १० ॥

अश्वगन्धारिष्ट ।

तुलार्द्धं चाश्वगन्धाया मुशल्याः पलविंशतिः । मञ्जिष्ठाया हरीतक्या रजन्योर्मधुकस्य च ॥ ११ ॥ रास्नाविदारीपार्थानां मुस्तकत्रिवृतोरपि । भागान् दशपलान् दद्यादनन्ताश्यामयोस्तथा ॥ १२ ॥ चन्दनद्वितयस्यापि वचायाश्चित्रकस्य च । भागानष्टपलान् क्षुण्णानष्टद्रोणेऽम्भसः पचेत् ॥ १३ ॥ द्रोणशेषे कषायेऽस्मिन् पूते शीते प्रदापयेत् । धातक्याः षोडशपलं माक्षिकस्य तुलात्रयम् ॥ १४ ॥

व्योषस्य द्विपलञ्चापि त्रिजातकचतुःपलम्। चतुःपलं प्रियङ्गोश्च द्विपलं नागकेशरम्॥ १५॥ मासादूर्ध्वं पिबेदेनं पलार्द्धपरिमाणतः। मूर्च्छामपस्मृतिं शोषमुन्मादमपि दारुणम्॥ १६॥ कार्श्यमर्शांसि मन्दत्वमग्नेर्वातभवान् गदान्। अश्वगन्धाधरिष्टोऽयं पीतो हन्यादसंशयम्॥ १७॥

नागौरी असगन्ध २॥ सेर, मुसली १ सेर, मँजीठ, हड़, हल्दी, दारुहल्दी, मुलेठी, रास्ना, विदारीकन्द, अर्जुन की छाल, नागरमोथा और निसोथ, प्रत्येक आध आध सेर। अनन्तमूल, कालीसर, लालचन्दन, सफेद चन्दन, बच, चीता की जड़, प्रत्येक ३२-३२ तोले। सबको कूटकर ४ मन ४ सेर ४८ तोले जल में पकावे। जब २५ सेर ४८ तोला क्वाथ बाकी रहे तब उतारकर कपड़े से छान ले। क्वाथ ठंडा होने पर धाय के फूल ६४ तोले; शहद १५ सेर; सोंठ, मिर्च और पीपर चार तोले, दालचीनी, तेजपात और छोटी इलायची १६ तोले; प्रियंगु के फूल १६ तोले और नागकेशर ८ तोले, इनको कूटकर उस क्वाथ में मिलाकर एक महीना भर धरा रहने दे। एक महीने पश्चात् २ तोले की मात्रा में इसका सेवन करे। मूर्च्छा, अपस्मार, शोष, कठिन उन्माद, कृशता, बवासीर, अग्निमान्द्य और वातज रोगों को यह अश्वगन्धारिष्ट निःसन्देह नष्ट करता है॥११-१७॥

### सुधानिधि रस।

फणा मधुयुतं सूतं मूर्च्छायामनुशीलयेत्। शीतसेकावगाहादि सर्वं वा शीतलं भजेत्॥ सुधानिधिरसो नाम मदमूर्च्छाविनाशनः॥ १८॥

रससिन्दूर को पीपल के चूर्ण तथा शहद के साथ मूर्च्छा रोग में सेवन कराना चाहिए। ठंडे जल से परिषेक तथा स्नान आदि एवम् शीतल वस्तुओं का सेवन कराना चाहिए। यह रस मद तथा मूर्च्छा को नष्ट करता है॥ १८॥

### मूर्च्छान्तक रस।

सिन्दूरं माक्षिकं हेम शिलाजत्वयसी तथा। शतमूल्या विदार्याश्च स्वरसेन विभावयेत्॥ १९॥ रक्तवर्णं पिष्ट्वा ततः कुर्याद् वटिका वल्लसम्मिताः। रसो मूर्च्छान्तको हन्यादसौ मूर्च्छां शिवोदितः॥ २०॥

रस सिन्दूर, स्वर्णभस्म, स्वर्णमाक्षिक भस्म, शिलाजीत, लोहभस्म, इन्हें बराबर मात्रा में मिलाकर शतावरी तथा विदारीकन्द के रस से भावना देकर दो-दो रत्ती की गोलियाँ बनावे। यह शिवजी का कहा हुआ मूर्च्छान्तक रस मूर्च्छा रोग को नष्ट करता है॥ १९-२०॥

### मूर्च्छारोग में पथ्य।

छाया नमोऽम्भः शतधौतसर्पिर्मृदूनि तिक्तानि च लाजमण्डः। जीर्णा यवा लोहितशालयश्च कौर्म्मं हविर्मुद्गमसूरयूषाः॥ २१॥ धन्वोद्भवा मांसरसाश्च रागाः सषाडवा गव्यपयः सिता च। पुराणकूष्माण्डपटोलमोचहरीतकीदाडिमनारिकेलम्॥ २२॥ अत्युच्चशब्दोऽद्भुतदर्शनञ्च गीतानि वाद्यानि च चोत्कटानि। श्रमः स्मृतिश्चिन्तनमात्मबोधो धैर्यञ्च मूर्च्छास्विति पथ्यवर्गः॥ २३॥

छाया, वर्षा का पानी, सौ बार धोया हुआ घृत, मृदु तथा तिक्त पदार्थ, खील से बने हुए मण्ड, पुराने जौ, लालशालि चावल, दश वर्ष का पुराना घृत, मूँग तथा मसूर का यूष, जाङ्गली जीवों के मांस का रस, राग षाडव, गौ का दूध, मिश्री, पुराना पेठा, परवल, केला, हड़, अनार, नारियल, अत्यन्त ऊँचा शब्द, अद्भुत पदार्थों का दिखाना, ऊँचा गाना, बजाना, श्रम, पूर्वस्मरण, चिन्तन, आत्मज्ञान और धैर्य; ये मूर्च्छा रोगी के लिए पथ्य हैं॥ २१-२३॥

मूर्च्छारोग में अपथ्य।

ताम्बूलं पत्रशाकञ्च दन्तघर्षणमातपम्। विरुद्धान्यन्नपानानि व्यवायं स्वेदनं कटु॥ तृण्निद्रयोर्वेगरोधं तक्रं मूर्च्छामयी त्यजेत्॥ २४॥

इति भैषज्यरत्नावल्यां मूर्च्छाधिकारः समाप्तः।

---

पान, सरसों आदि के पत्ता का शाक, दातुन करना, धूप, विरुद्ध अन्न-पान, मैथुन, स्वेद, चरपरे पदार्थ, प्यास एवं निद्रा के वेग को रोकना तथा तक्र; ये मूर्च्छा रोगी के लिए अपथ्य हैं॥ २४॥

इति श्रीसरयूप्रसादत्रिपाठिविरचितायांभैषज्यरत्नावल्या रत्नप्रभाभिधायां व्याख्यायां मूर्च्छाधिकारः समाप्तः।

---

## अथ उन्मादाधिकारः।

उन्मादे वातिके पूर्वं स्नेहपानं विरेचनम्। पित्तजे कफजे वान्तिः परो बस्त्यादिकः क्रमः॥ १॥

वातज उन्माद में पहले स्नेहपान, पित्तज में विरेचन और कफज में वमन कराकर पश्चात् बस्ति आदि क्रिया करनी चाहिए॥ १॥

यच्चोपदेक्ष्यते किञ्चिदपस्मारचिकित्सिते। उन्मादे तच्च कर्त्तव्यं सामान्याद्दोषदूष्ययोः॥ २॥

दोष और दूष्य की समानता होने से जो कुछ अपस्मार रोग की चिकित्सा में कहा जायगा वह सब उन्माद रोग में भी करना चाहिए॥ २॥

ब्राह्मी कूष्माण्डफलं षड्ग्रन्था शङ्खपुष्पिकास्वरसाः। उन्मादहृतो दृष्टाः पृथगेते कुष्ठमधुमिश्राः॥ ३॥

ब्राह्मी, पेठा, बच और शङ्खपुष्पी; इनमें से प्रत्येक के रस में कूठ और शहद मिलाकर पीने से उन्माद रोग नष्ट होता है॥ ३॥

सम्भोज्य पिकमांसं वा निवाते स्वापयेत् सुखम्। त्यक्त्वा स्मृतिमतिभ्रंशं संज्ञां लब्ध्वा प्रबुध्यते॥ अपक्वचटकक्षीरपानमुन्मादनाशनम्॥ ४॥

तरुणचटकमांसं शुष्कीकृत्य तच्चूर्णं दुग्धेन सह पातव्यम्।

उन्मादी को कोयल का मांस खिलाकर वायु-रहित स्थान में सुला देने से मतिभ्रंश और स्मृतिभ्रंश आदि विकारों से रहित होकर वह चेतनता को पाकर जाग उठता है।

गौरैया चिड़िया के जवान बच्चे के मांस को सुखाकर, चूर्ण सा करके दूध के साथ पीने से उन्माद रोग नष्ट होता है॥ ४॥

कूष्माण्डकबीजकल्कः पीतो विनाशयत्यपि। उन्मादरोगमत्युग्रं मधुना दिवसत्रयम्॥ ५॥

पेठे के बीजों के चूर्ण को शहद के साथ चाटने से तीन दिन में अत्यन्त प्रबल उन्माद रोग नष्ट होता है॥ ५॥

उन्मादे समधुः पेयः शुद्धो वा तालशाखजः। रसो नस्येऽभ्यञ्जने च सार्षपं तैलमिष्यते॥ ६॥ बद्धं सार्षपतैलाक्तमुत्तानञ्चातपे न्यसेत्। पुराणमथवा सर्पिः पिबेत् प्रातरतन्द्रितः॥ ७॥

ताड़ की शाखा के रस में शहद मिलाकर अथवा केवल रस ही उन्माद के रोगी को पिलावे अथवा सरसों के तेल की नस्य दे और मालिश करे। या रोगी के शरीर में कड़ुआ तेल लगाकर धूप में चित्त लेटा दे और रस्सी आदि से बांध दे अथवा प्रातःकाल निरन्तर पुराना घी पिलावे तो उन्माद रोग नष्ट होता है॥ ६-७॥

शुद्धस्याचारविभ्रंशे तीक्ष्णं नावन-

मञ्जनम् । ताडनञ्च मनोबुद्धिस्मृतिसंवेदनं हितम् ॥ ८ ॥ तर्जनं त्रासनं दानं सान्त्वनं हर्षणं भयम् । विस्मयो विस्मृतेर्हेतोर्नयन्ति प्रकृतिं मनः ॥ ९ ॥

आचार-विचार को नष्ट करनेवाले उन्माद रोग में रोगी को वमन-विरेचन आदि से शुद्ध करके फिर तेज नस्य और अंजन से तथा ताडन, भयप्रदर्शन, इच्छित दान, सान्त्वना हर्षोत्पादन और विस्मयजनन से तथा मन, बुद्धि और स्मृति के प्रकृतिस्थ होने से उन्माद रोग दूर हो जाता है ॥ ८-९ ॥

कामशोकभयक्रोधहर्षेर्ष्यालोभसम्भवान् । परस्परप्रतिद्वन्द्वैरेभिरेव शमं नयेत् ॥ १० ॥

काम, शोक, भय, क्रोध, हर्ष, ईर्ष्या और लोभ से उत्पन्न हुए उन्मादों को परस्पर प्रतिद्वन्द्वी उपायों द्वारा शान्त करना चाहिए ॥ १० ॥

इष्टद्रव्यविनाशात्तु मनो यस्योपहन्यते । तस्य तत्सदृशप्राप्त्या सान्त्वाश्वासैश्च तं जयेत् ॥ ११ ॥

प्रिय वस्तु के विनाश से जिसके मन को चोट लगी हो उसको वैसी ही वस्तु की प्राप्ति से, सान्त्वना और आश्वासन से स्वस्थ करना चाहिए ॥ ११ ॥

सर्पिःपानादिरागन्तौ मन्त्रादिश्चेष्यते विधिः । पूजाबल्युपहारेष्टिहोममन्त्राञ्जनादिभिः ॥ जयेदागन्तुमुन्मादं यथाविधि शुचिर्भिषक् ॥ १२ ॥

आगन्तुक उन्माद रोग में घृतपान आदि से तथा चतुर वैद्य शुद्ध होकर मन्त्र-जप, पूजा, बलि, भेंट, यज्ञ, होम, मन्त्र-तन्त्र और अञ्जन आदि से उन्मादी को प्रकृतिस्थ करे ॥ १२ ॥

देवर्षिपितृगन्धर्वैरुन्मत्तस्य च बुद्धिमान् । वर्जयेदञ्जनादीनि तीक्ष्णानि क्रूरमेव च ॥ १३ ॥

देवर्षि, पितर और गन्धर्वों के आवेश से उत्पन्न उन्माद रोग में [बुद्धिमान् वैद्य तीक्ष्ण अंजन आदि तथा क्लेशजनक अन्यान्य कर्मों का परित्याग कर दे ॥ १३ ॥

पानीयकल्याणक घृत ।

विशाला त्रिफला कौन्ती देवदार्वेलवालुकम् । स्थिरा नतं हरिद्रे द्वे सारिवे द्वे प्रियंगुकम् ॥ १४ ॥ नीलोत्पलैला मञ्जिष्ठा दन्ती दाडिमकेशरम् । तालीशपत्रं बृहती मालत्याः कुसुमं नवम् ॥ १५ ॥ विडङ्गं पृश्निपर्णी च कुष्ठं चन्दनपद्मकौ । अष्टाविंशतिभिः कल्कैरेतैरक्षसमन्वितैः ॥ १६ ॥ चतुर्गुणं जलं दत्त्वा घृतप्रस्थं विपाचयेत् । अपस्मारे ज्वरे कासे शोषे मन्दानले क्षये ॥ १७ ॥ वातरक्ते प्रतिश्याये तृतीयकचतुर्थके । वम्यर्शोमूत्रकृच्छ्रेषु विसर्पोपहतेषु च ॥ १८ ॥ कण्डूपाण्ड्वामयोन्मादविषमेहगरेषु च । दोषोपहतचित्तानां गद्गदानामरेतसाम् ॥१९॥ शस्तं स्त्रीणाञ्च वन्ध्यानां वर्णायुर्बलवर्द्धनम् । अलक्ष्मीपापरक्षोघ्नं सर्वग्रहनिवारणम् । कल्याणकमिदं सर्पिः श्रेष्ठं पुंसवनेषु च ॥ २० ॥

इन्द्रायण, त्रिफला सँभालू के बीज, देवदार, एलवालुक, ( सुगन्ध द्रव्य ), शालपर्णी, तगर, हल्दी, दारुहल्दी, अनन्तमूल, कालीसर, प्रियंगु के फूल, नीलकमल, छोटी इलायची, मँजीठ, दन्ती की जड़, अनारदाना, नागकेसर, तालीसपत्र, बड़ी कटेरी, मालती के नवीन फूल, वायविडंग, पिठवन, कूठ लाल चन्दन और पद्माख, प्रत्येक एक-एक तोला लेकर कल्क बनावे। गौ का घृत १२८ तोले । पाकार्थ जल ६ सेर ८८ तोले । विधिपूर्वक घृत सिद्ध कर रोगी को पान कराना चाहिए। यह कल्याणक

घृत अपस्मार, ज्वर, खाँसी, शोष, मन्दाग्नि, क्षय, वातरक्त, प्रतिश्याय, तृतीयक और चातुर्थिक ज्वर, वमन, बवासीर, मूत्रकृच्छ्र, विसर्प, खुजली, पाण्डुरोग, उन्माद, विषदोष और प्रमेह आदि रोगों को नष्ट करता है। गद्गद बोलनेवाले तथा क्षीणवीर्य एवं दोषों से नष्ट चित्तवाले पुरुषों के लिए और बाँझ स्त्रियों के लिए हितकारी है। बल, वर्ण और आयु का बढ़ानेवाला तथा दरिद्रता, पाप, राक्षस तथा सब ग्रहों के अरिष्टों को नष्ट करनेवाला और पुत्रकारक योगों में उत्तम है। मात्रा–आधा तोला से २ तोले तक ॥ १४-२० ॥

## क्षीरकल्याणक घृत।

द्विजलं तु चतुःक्षीरं क्षीरकल्याणकं त्विदम् ॥ २१ ॥

क्षीरकल्याणक घृत में दुगुना जल और चौगुना दूध लेना चाहिए। अन्य सब औषध और विधि पूर्वोक्त कल्याणक घृत के समान ही है ॥ २१ ॥

## स्वल्पचैतस घृत।

पञ्चमूल्याबकाश्मर्य्या रास्नैरण्डत्रिवृद्बलाः। मूर्वा शतावरी चेति क्वाथैर्द्विपलिकैरिमैः ॥ २२ ॥ कल्याणकस्य चाङ्गेन तद्घृतं चैतसं स्मृतम्। सर्वचेतोविकाराणां शमनं परमं मतम् ॥ २३ ॥ घृतमस्थोऽत्र कर्त्तव्याः क्वाथो द्रोणाम्भसा घृतात्। चतुर्गुणोऽत्र सम्पाद्यः कल्कः कल्याणकेरितः ॥ २४ ॥

काश्मरी (गंभारी) रहित दोनों पञ्चमूल अर्थात् दशमूल, रास्ना, अरण्ड की जड़, निशोथ, खरैटी, मूर्वा और शतावरी; प्रत्येक आठ-आठ तोले लेकर २५ सेर ४८ तोले जल में क्वाथ करे। जब ६ सेर ३२ तोले शेष रहे तब उतार कर छान ले। घी १२८ तोले। दूध ६ सेर ३२ तोले। कल्याणक घृत में कहे हुए कल्कद्रव्य से चौगुना यहीं कल्कद्रव्य लेना चाहिए। इस घृत को स्वल्पचैतस घृत कहते हैं। यह सब प्रकार के मन-सम्बन्धी विकारों को शान्त करने में श्रेष्ठ माना गया है ॥ २२-२४ ॥

## हिङ्ग्वाद्य घृत।

हिंगुसौवर्चलव्योषैर्द्विपलांशैर्घृताढकम्। चतुर्गुणे गवां मूत्रे सिद्धमुन्मादनाशनम् ॥ अपस्मारं महाघोरं सुचिरोत्थं जयेद् ध्रुवम् ॥ २५ ॥

कल्क के लिए हींग, काला नमक, सोंठ, मिर्च और पीपर; प्रत्येक आठ-आठ तोले। घी ६ सेर ३२ तोले। गोमूत्र २५ सेर ४८ तोले। विधिपूर्वक घृत सिद्धकर इसका पान करे तो उन्माद तथा महाघोर बहुत दिन का अपस्माररोग नष्ट होता है ॥ २६ ॥

## महापैशाचिक घृत।

जटिला पूतना केशी चारटी मर्कटी वचा। त्रायमाणा जया वीरा चोरकं कटुरोहिणी ॥ २६ ॥ कायस्था शूकरी छात्रा सातिच्छत्रा पलङ्कषा। महापुरुषदन्ता च वयःस्था नाकुलीद्वयम् ॥ २७ ॥ कटम्भरा वृश्चिकाली स्थिरा चैव भृतं घृतम्। चातुर्थकज्वरोन्मादग्रहापस्मारनाशनम् ॥ २८ ॥ महापैशाचिकं नाम घृतमेतद्यथामृतम्। मेधाबुद्धिस्मृतिकरं बालानां चाङ्गवर्द्धनम् ॥ २९ ॥

कल्क के लिए जटामांसी, हड़, श्वेत तुलसी, स्थलकमल (पद्मचारिणी), कौंच के बीज, वच, त्रायमाणा, अरणी, काकोली पृश्निपर्णी (पिठवन) पुढकी, छोटी इलायची, वाराहीकन्द, मौल, मोया, गूगुल, शतावरी, गिलोय, रास्ना, गन्धरास्ना, कड़भी (अथवा गन्धप्रसारणी), वृश्चिकाली (बिछुवा घास) और शालपर्णी; सब मिलित ३२ तोले। घृत १२८ तोले। जल ६ सेर ३२ तोले। विधि-

पुमंक घृत सिद्ध कर सेवन करने से चातुर्थिक ज्वर, उन्माद, ग्रह और अपस्मार का नाश होता है। यह महापैशाचिक घृत अमृत के तुल्य है और मेधा, बुद्धि स्मृति और बालकों के अंगों को बढ़ानेवाला है ॥ २१-२६ ॥

कृष्णामरिचसिन्धूत्थमधुगोपित्तनिर्मितम् । अञ्जनं सर्वभूतोत्थमहोन्मादविनाशनम् ॥ ३० ॥

पीपरि, कालीमिर्च, सेंधानमक शहद और गोरोचन; इनको महीन पीसकर आँखों में आँजने से सब प्रकार के भूतोत्थ उन्माद रोग नष्ट होते हैं ॥ ३० ॥

निम्बपत्रवचाहिंगुसर्पनिर्मोकसर्षपैः । डाकिन्यादिहरो धूपो भूतोन्मादविनाशनः ॥ ३१ ॥

नीम के पत्ते, बच, हींग, साँप की केंचुल और सरसों, इनको एकत्र कर धूप देने से डाकिनी-पिशाचिनी आदि के आवेश तथा भूतोन्माद नष्ट होते हैं ॥ ३१ ॥

कार्पासास्थिमयूरपिच्छबृहतीनिर्माल्यपिण्डीतकैस्त्वग्वांशीवृषदंशविट्तुषवचाकेशाहिनिर्मोककैः । गोशृङ्गद्विपदन्तहिंगुमरिचैस्तुल्यैस्तु धूपः कृतः स्कन्दोन्मादपिशाचराक्षससुरावेशज्वरघ्नः स्मृतः ॥ ३२ ॥

बिनौले मोरपंख, बड़ी कटेरी, शिवनिर्माल्य, मैनफल, दालचीनी, वंशलोचन, बिल्ली की विष्ठा, जौ की भूसी, बच, बाल, साँप की केंचुल, गौ का सींग, हाथीदाँत, हींग और काली मिर्च, इनको सम भाग लेकर धूप बनावे। यह धूप स्कन्द के आवेशजन्य उन्माद तथा पिशाच, राक्षस और देवों के आवेश तथा ज्वर को नष्ट करता है ॥ ३२ ॥

शिवा घृत

शिवायास्तु सुपुष्टायाः पञ्चाशत्पललात्पलम् । पञ्च पञ्च समादाय पञ्चमूलीयुगात् पृथक् ॥ ३३ ॥ कुट्टयित्वा चतुःषष्टिशरावैरम्भसः पचेत् । ज्ञात्वा पादावशेषेण तेन क्वाथोदकेन च ॥ ३४ ॥ क्षीरस्याष्टाभिराज्यस्य शरावाणां चतुष्टयम् । यष्टीमधुकमञ्जिष्ठा कुष्ठचन्दनपद्मकैः ॥ ३५ ॥ विभीतकशिवाधात्रीबृहतीतगरपादिकैः । त्रिवृद्दाडिमीदेवदारुदन्तीहरेणुभिः ॥ ३६ ॥ तालीशकेशरश्यामाविशालाशालपर्णिभिः । प्रियंगुमालतीपुष्पकाकोलीयुगलोत्पलैः ॥ ३७ ॥ हरिद्रायुगलानन्तामेदैलाहरिवालुकैः । सपृश्निपर्ण्येकैरेभिः कल्कैरक्षसमन्वितैः ॥ ३८ ॥ सिद्धमेतद् घृतं यच्च तन्मे निगदतः शृणु । देवासुरग्रहग्रस्ते मानसे राक्षसक्षते ॥ ३९ ॥ गन्धर्वधर्षिते चैव पितृग्रहनिपीडिते । भूतैरप्यभिभूते च पिशाचैश्च परिप्लुते ॥ ४० ॥ भुजङ्गमगृहीते च तथा जाङ्गलभक्षिते । यक्षैरपि परिक्षिप्ते भयैरप्यर्दिते भृशम् ॥ ४१ ॥ शस्यते सर्ववाते च सर्वापस्मार एव च । शोषे सोरःक्षते कासे पीनसे च महात्यये ॥ ४२ ॥ मेहे मूत्रग्रहे चैव ज्वरे जीर्णे च शस्यते । हृद्यं पुनर्नवकरं वन्ध्यानामपि पुत्रदम् ॥ ४३ ॥ श्रीविन्ध्यवासिपादेन सिद्धिदं समुदीरितम् । शिवाघृतमिदं नाम्ना शिवश्योन्मादिनां सदा । शृगालवर्हिणोः पाके पुमांसं तत्र दापयेत् ॥ ४४ ॥

गीदड़ का मांस २॥ सेर और दशमूल की प्रत्येक औषध बीस-बीस तोले । सबको कूटकर १६ सेर १८ तोले जल में पकावे । जब ४ सेर ३२ तोले बाकी रहे तब उतारकर छान

1—"गोरोचनाकृतम्" इत्यपि पाठः ।

ले । दूध १२८ तोले, घृत १२८ तोले । कल्क के लिए मुलेठी, मँजीठ, कूट, लाल चन्दन, पद्माख, बहेड़ा, हड़, आंवला, बड़ी कटेरी, तगर, वायविडंग, अनारदाना, देवदारु, दन्तीमूल, सँभालू के बीज, तालीशपत्र, नागकेसर, कालीसर, इन्द्रायण की जड़, शालपर्णी, प्रियंगु के फूल, मालती के फूल, काकोली, क्षीरकाकोली, नील कमल, हल्दी, दारुहल्दी, अनन्तमूल, मेदा, इलायची, एलुआ, और पृश्निपर्णी, प्रत्येक एक-एक तोला । इनसे विधिपूर्वक सिद्ध किये हुए घृत का गुण कहता हूँ, सुनिए । इस घृत को देव, असुर, ग्रह, राक्षस, गन्धर्व, पितृग्रह, भूत, पिशाच, नाग और यक्ष आदि से पीड़ित रोगी को सेवन कराना चाहिए । सब प्रकार के वातरोग, अपस्मार, शोष, उरःक्षत, खाँसी, पीनस, मदात्यय, प्रमेह, मूत्रकृच्छ्र और जीर्णज्वर में हितकर है । वृष्य, बलवर्द्धक और बाँझ स्त्रियों को पुत्र देनेवाला है, उन्माद रोगवालों के कल्याण के लिए सिद्धिदाता शिवाघृत को शिवजी ने कहा था । मीठा और मोर के पाक में नर मोर और नर मोर लेना चाहिए ॥ ३१-४४ ॥

तैलं नारायणं वापि महानारायणं तथा । हितमत्र मयोक्तव्यमिति चक्रेण भाषितम् ॥ ४५ ॥

नारायण तैल अथवा महानारायण तैल का प्रयोग करना भी उन्मादरोग में हितकर है । यह चक्रदत्त ने कहा है ॥ ४५ ॥

सारस्वत चूर्ण ।

कुष्ठाश्वगन्धे लवणाजमोदे द्वे जीरके त्रीणि कटूनि पाठा । माङ्गल्यपुष्पी च समान्यमूनि सर्वैः समानाश्च वचां विचूर्ण्य ॥ ४६ ॥ ब्राह्मीरसेनाखिलमेव भाव्यं वारत्रयं शुष्कमिदं हि चूर्णम् माषप्रमाणं मधुना घृतेन लिह्यान्नरः सप्तदिनानि चूर्णम् ॥ ४७ ॥ सारस्वतमिदं चूर्णं ब्रह्मणा निर्मितं पुरा । हिताय सर्वलोकानां दुर्मेधसां विचेतसाम् ॥ ४८ ॥ एतस्याभ्यासतः पुंसां बुद्धिर्मेधा धृतिः स्मृतिः । सम्पत्तिः कविताशक्तिः प्रवर्धतोत्तरोत्तरम् ॥ ४९ ॥

कूट, असगन्ध, सेंधानमक, अजवायन, जीरा, कालाजीरा, त्रिकटु ( सोंठ मिर्च, पीपरि ), पाढ़, शंखपुष्पी हरएक १ तोला, बच ११ तोले, इन्हें इकट्ठा मिलाकर ब्राह्मी के रस से तीन बार भावना दे और सुखाकर चूर्ण कर ले । इस चूर्ण को १ मासा लेकर शहद तथा घृत के, सात दिन तक सेवन करे । इसके सेवन से मनुष्यों की बुद्धि, मेधा, स्मृति, धृति, सम्पत्ति तथा कविताशक्ति बढ़ती है ॥४६-४९ ॥

उन्माद गजकेसरी ।

शुद्धं सूतं वचाक्काथैस्त्रिदिनं मर्दयेत्ततः शङ्खपुष्पा रसैस्तद्वद्गन्धकं मर्दितं क्षिपेत् ॥ ५० ॥ गोमूत्रमर्दितं गोलं कृत्वा मूषया निरोधयेत् सन्धाऽऽलेप्य मृद्वस्त्रैः पुटितं स्वाङ्गशीतलम् ॥ ५१ ॥ चूर्णीकृतं चतुर्वल्लं समसर्षप चूर्णकम् जीर्णघृतानुपानञ्च नस्ये स्नेहं तु सार्षपम् ॥ ५२ ॥ कारयेत्तेन चाभ्यङ्गं दिनानामेकविंशतिम् उन्मादापस्मृती हन्ति ह्युन्मादं गजकेसरी ॥ ५३ ॥

शुद्ध पारे को बच के क्वाथ के साथ ३ दिन तक घोटे और इसी प्रकार इतने ही गन्धक को शंखपुष्पी के रस में घोटकर दोनों को मिला गोमूत्र में घोट गोला बनाकर रखे फिर इसे मूषा में बन्द कर सात कपड़मिट्टी का लेप देकर भूधर यन्त्र में लघु पुट देवे ठंढा हो जाने पर महीन पीस कर १२ रत्ती की मात्रा लेकर उसके समान पीली सरसों का चूर्ण मिलाकर पुराने घी के साथ देवे । सरसों के तेल से नस्य देवे । इसी से शरीर में मालिश करावे । ऐसा २१ दिन तक करते रहने से उन्माद और अपस्मार को नष्ट कर देता है । विशेष अनुभूत है ॥ ५०-५३ ॥

उन्मादभञ्जन रस।

त्रिकटु त्रिफला चैव गजपिप्पलिका तथा। देवदारु विडङ्गञ्च किरातं कटुकी तथा॥ ५४॥ कण्टकारी च यष्टीन्द्रयवं चित्रकमेव च। मला च पिप्पलीमूलं मूलञ्च वीरणस्य च॥ ५५॥ शोभाञ्जनस्य बीजानि त्रिवृता चेन्द्रवारुणी। वङ्गं रूप्यमभ्रकञ्च प्रवालं समभागिकम्॥५६॥ सर्वचूर्णसमं लौहं सलिलेन विमर्दयेत्। उन्मादमपि भूतोत्थमुन्मादं वातजं तथा॥ ५७॥ अपस्मारं तथा कार्श्यं रक्तपित्तं सुदारुणम्। नाशयेदविकल्पेन रसश्चोन्मादभञ्जनः॥ ५८॥

त्रिकुटा, त्रिफला, गजपीपरि, देवदारु वायविडङ्ग, चिरायता, कुटकी, छोटी कटेरी, मुलेठी, इन्द्रजौ चित्रक, खरेटी, पीपलामूल, खस सहिजना के बीज, निसोत इन्द्रायण, वङ्गभस्म, चाँदी की भस्म। अभ्रकभस्म, मूँगाभस्म, हरएक १ तोला। लोहभस्म २२ तोले। इन्हें एकत्र जल से घोटकर दो दो रत्ती की गोलियाँ बनावे। यह रस भूतोन्माद, वातज उन्माद, अपस्मार, कृशता तथा रक्तपित्त आदि रोगों को नष्ट करता है॥ ५४-५८॥

चतुर्भुज रस।

मृतसूतस्य भागौ द्वौ भागैकं हेमभस्मकम्। शिला कस्तूरिका तालं प्रत्येकं हेमतुल्यकम्॥ ५९॥ सर्वं खल्लतले क्षिप्त्वा कन्यायाः मर्दयेद्रसैः। एरंडपत्रै रवेष्ट्य धान्यराशौ दिनत्रयम्॥ ६०॥ संस्थाप्य च तदुद्धृत्य सर्वरोगेषु योजयेत्। एतद्रसायनं श्रेष्ठं त्रिफला मधुमर्दितम्॥ ६१॥ सर्वथाग्निबलं खादेद् वलीपलितनाशनम्। अपस्मारे ज्वरे कासे शोषे मन्दानले क्षये॥ ६२॥ हस्तकम्पे शिरःकम्पे गात्रकम्पे विशेषतः। वातपित्तसमुत्थांश्च कफजान्नाशयेद् ध्रुवम्॥ चतुर्भुजरसो नाम महेशेन प्रकाशितः॥ ६३॥

पारदभस्म, ( रससिन्दूर ) २ भाग, स्वर्णभस्म १ भाग, मैनसिल १ भाग, कस्तूरी १ भाग हरिताल १ भाग, इन्हें एकत्र खरल में डालकर ग्वारपाठे के रस से घोटें फिर इसे अरण्डी के पत्तों में लपेटकर धान्यराशि में ३ दिन पड़ा रहने दे। पश्चात् निकालकर अग्नि तथा बल के अनुसार सेवन करावे। मात्रा—१ रत्ती। अनुपान—त्रिफला तथा शहद। इसके सेवन से वलीपलित, अपस्मार, उन्माद, ज्वर, खाँसी, शोष, मन्दाग्नि, क्षय, हस्तकम्प, शिरःकम्प, गात्रकम्प आदि रोग नष्ट होते हैं॥ ५९-६३॥

उन्मादगजाङ्कुश।

त्रिदिनं कनकद्रावैर्महाराष्ट्रीरसैः पुनः। विषमुष्टिद्रवैः सूतं समुत्थाप्यार्कचक्रिकाम्॥ ६४॥ कृत्वा तस्यां सगन्धायां युक्त्या बन्धनमाचरेत्। तत्समं कानकं बीजमभ्रकं गन्धकं विषम्॥ ६५॥ मर्दयेत्त्रिदिनं सर्वं गुञ्जार्द्धं च प्रयोजयेत्। दोषोन्मादं द्रुतं हन्ति भूतोन्मादं विशेषतः॥ ६६॥

१ तोले पारद को धतूरा, गजपीपरि और कुचिला के रस में अलग-अलग तीन-तीन दिन घोटे। पश्चात् ऊर्ध्वपातन करके उसमें १ तोले गन्धक मिलाकर सूर्य के समान गोल टिकिया बना ले। फिर उस टिकिया को स्वल्पपुट में पकाकर उसमें धतूरे के बीज १ तोले, अभ्रक १ तोले गन्धक १ तोले और मीठा विष १ तोले मिलाकर ३ दिन खरल कर आधी आधी रत्ती की गोली बना ले। यह उन्मादगजाङ्कुश रस दोषोन्माद को शीघ्र नष्ट करता है। विशेष

कर भूतोन्माद में अधिक लाभदायक होता है॥ ६५-६६॥

### कामदुधा।

मौक्तिकस्य प्रवालस्य मुक्ताशुक्तिभवस्य च। वराटिकायाः शङ्खस्य भस्मानि गैरिकं तथा॥ ६७॥ गुडूचिकोद्भवं सत्वं समभागानि कारयेत् अजाजिका सिताभ्यां च गृह्णीयाद्रक्तिकाद्वयम्॥ ६८॥ जीर्णज्वर भ्रमोन्माद पित्तरोगेषु शस्यते। अम्लपित्ते सोमरोगे योऽयं कामदुधारसः॥ ६९॥

मोती प्रवाल मोती की सीप कौड़ी इन सबकी भस्में सोनागेरू और गुडूची सत्व ये समान भाग लेकर सबको मिला घोट कर रक्खे और फिर इसमें से २ रत्ती की मात्रा में २ माशे जीरा, २ माशे शक्कर के साथ देने से पुराना ज्वर, भ्रम, उन्माद, पित्तरोग, अम्लपित्त, सोमरोग ये सब दूर हो जाते हैं। विशेष अनुभूत॥ ६७-६९॥

### भूताङ्कुश रस।

सूतायस्तारताम्रञ्च मुक्ता चापि समं समम्। सूतपादं तथा वज्रं तालं गन्धं मनःशिला॥ ७०॥ तुत्थं तिलाञ्जनं शुद्धमब्धिफेनं रसाञ्जनम्। पञ्चानां लवणानाञ्च प्रतिभागं रसोन्मितम्॥ ७१॥ भृङ्गराजचित्रकक्षीरदुग्धेनापि विमर्दयेत्। दिनान्ते पिण्डितं कृत्वा रुद्ध्वा गजपुटे पचेत्॥ ७२॥ भूतांकुशो रसो नाम नित्यं गुञ्जाद्वयं लिहेत्। आर्द्रकस्य रसेनापि चोन्मादे भूतजिद्रसः॥ ७३॥ माहिषञ्च घृतं क्षीरं गुर्वन्नमपि भोजयेत्। अभ्यङ्गं कटुतैलेन हितो भूतांकुशे रसे॥ ७४॥

शुद्ध पारा १ तोला, लोहभस्म १ तोला, चाँदी की भस्म १ तोला, ताम्रभस्म १ तोला, मोतीभस्म १ तोला, हीरे की भस्म ३ माशे, शुद्ध हरताल १ तोला, शुद्ध गन्धक १ तोला, शुद्ध मैनशिल १ तोला, शुद्ध तूतिया १ तोला, काला सुरमा १ तोला, समुद्रफेन १ तोला, रसौत १ तोला तथा पाँचों नमक एक-एक तोला। सबको एकत्र कर भँगरा के रस, चीता के काढ़ा और थूहर के दूध में १ दिन घोटकर गोला बना ले और उस गोले को संपुट में बन्दकर गजपुट में फूँक दे। मात्रा—२ रत्ती। अनुपान—अदरख का रस। यह उन्माद और भूतोन्माद को जीतता है। भूतांकुश रस इसका नाम है। इसके सेवन करनेवाले को भैंस का दूध, दही और गुरु पदार्थ भोजन करना चाहिए तथा कड़ुए तेल से मालिश करनी चाहिए॥ ७०-७४॥

### उन्माद में पथ्य।

गोधूममुद्गारुणशालयश्च धारोष्णदुग्धं शतधौतसर्पिः। घृतं नवीनं च पुरातनं च कूर्मामिषं धन्वरसाः रसालम्॥ ७५॥ पुराणकूष्माण्डफलं पटोलं ब्राह्मीदलं वास्तुकतण्डुलीयम्। खराश्वमूत्रं गगनाम्बु पथ्या सुवर्णचूर्णानि च नारिकेलम्। द्राक्षा कपित्थं पनसं च यैर्यैर्विधेयमुन्मादगदेषु पथ्यम्॥ ७६॥

गेहूँ, मूँग, लाल शालि चावल, धारोष्ण दूध, सौ बार का धोया हुआ घृत, ताजा घी, पुराना घी, कछुए का मांस, जंगली पशु-पक्षियों के मांस का रस, आम, पुराना पेठा, परवल, ब्राह्मी, बथुआ, चौलाई गदहे तथा घोड़े का मूत्र वर्षा का जल, हड़, सुवर्णभस्म, नारियल, अंगूर, कैथ, कटहल ये उन्माद में पथ्य हैं॥ ७५-७६॥

### अपथ्य।

मद्यं विरुद्धाशनमुष्णभोजनं निद्राक्षुधातृड्मलवेगधारणम्। व्यायाम-

माषाढफलं कठिल्लकं शाकानि पत्रभवानि सर्वशः ॥ ७७ ॥

इति भैषज्यरत्नावल्यामुन्मादाधिकारः समाप्तः।

नारस, विरुद्ध भोजन, उष्ण भोजन, निद्रा, भूख तथा प्यास के वेग को रोकना, व्यायाम, माषाढ़ फल, (खीरा, आरिया आदि) करेला तथा सम्पूर्ण पत्रशाक अपथ्य हैं ॥ ७७ ॥

इति श्रीसरयूप्रसादत्रिपाठिविरचितायां भैषज्यरत्नावल्या रत्नप्रभाभिधायां व्याख्यायामुन्मादाधिकारः समाप्तः।

## अपस्माराधिकारः।

वातिकं वस्तिभिः प्रायः पैत्तं प्रायो विरेचनैः। श्लैष्मिकं वमनप्रायैरपस्मारमुपाचरेत् ॥ १ ॥

वातज अपस्मार की वस्ति से, पित्तज की विरेचन से और कफज अपस्मार की वमनकारक ओषधियों से चिकित्सा करनी चाहिए ॥ १ ॥

पुष्योद्धृतं शुनः पित्तमपस्मारघ्नमञ्जनम्। तदेव सर्पिषा युक्तं धूपनं परमं स्मृतम् ॥ २ ॥

पुष्य नक्षत्र में निकाले हुए कुत्ते के पित्त का अञ्जन तथा उसी में घी मिलाकर धूप देने से अपस्मार का नाश होता है ॥ २ ॥

नकुलोलूकमार्जारगृध्रकीटाहिकाकजैः। तुण्डैः पक्षैः पुरीषैश्च धूपनं कारयेद्भिषक् ॥ ३ ॥

नेवला, उल्लू, बिल्ली, गीध, कीट, साँप और कौआ; इनकी चोंच, पंख और विष्ठा की धूप देने से अपस्मार नष्ट होता है ॥ ३ ॥

मनोह्वातार्क्ष्यजञ्चैव शकृत्पारावतस्य च। अञ्जनं हन्त्यपस्मारमुन्मादञ्च विशेषतः ॥ ४ ॥

मैनसिल, रसौत और कबूतर की बीट का अञ्जन अपस्मार और विशेषकर उन्माद को नष्ट करता है ॥ ४ ॥

अपेतराक्षसीकुष्ठपूतनाकेशचोरकैः। उत्सादनं मूत्रपिष्टैर्मूत्रैरेवावसेचनम् ॥ ५ ॥

सफेद तुलसी, कूट, हड़, सुगन्धबाला, गठिवन (भटेउर); इन सबको गोमूत्र में पीसकर शरीर पर उबटन लगाने से और शरीर पर गोमूत्र का सिञ्चन करने से अपस्मार रोग नष्ट होता है ॥ ५ ॥

जतुकाशकृता तद्वद्दग्धैर्वा बस्तलोमभिः। अपस्मारहरो लेपो मूत्रसिद्धार्थशिग्रुभिः ॥ ६ ॥

जतुका चर्मचटका।

चिमगादड़ की विष्ठा का अथवा बकरे के बालों की भस्म का अथवा गोमूत्र में पिसी हुई सरसों और सहिजन की छाल का लेप करने से अपस्मार रोग नष्ट होता है ॥ ६ ॥

यः खादेत् क्षीरभक्ताशी माक्षिकेण वचारजः। अपस्मारं महाघोरं स चिरोत्थं जयेद् ध्रुवम् ॥ ७ ॥

जो अपस्मार का रोगी प्रतिदिन वच के चूर्ण को शहद के साथ खाता है और दूध-भात का भोजन करता है वह महाघोर पुराने अपस्मार रोग को जीत लेता है ॥ ७ ॥

उल्लम्बितनरग्रीवापाशं दग्ध्वा कृता मसी। शीताम्बुना समं पीता हन्त्यपस्मारमुद्धतम् ॥ ८ ॥

फाँसी की रस्सी को जलाकर उसकी भस्म को ठंडे जल में घोलकर पीने से घोर अपस्मार नष्ट होता है ॥ ८ ॥

प्रयोज्यं तैललशुनं पयसा वा शतावरी। ब्राह्मीरसश्च मधुना सर्वापस्मारभेषजम् ॥ ९ ॥

तेल में मिलाकर लहसुन, दूध में मिलाकर शतावरी का चूर्ण तथा शहद मिलाकर ब्राह्मी के रस का सेवन करना सब प्रकार के अपस्मार को नष्ट करता है ॥ ९ ॥

निर्दुह्य निर्द्रवां कृत्वा छागिकामरनाडिकाम्। तामम्लसाधितां खादेदपस्मारमुदस्यति ॥ १० ॥

बकरी के बच्चे के नाभिनाल को अच्छी प्रकार से निचोड़कर, सुखा कर, अम्लरस से सिद्ध कर खाने से अपस्मार नष्ट होता है ॥ १० ॥

हृत्कम्पोऽक्षिरुजा यस्य स्वेदो हस्तादिशीतता। दशमूलीजलं तस्य कल्याणाज्यं च योजयेत् ॥ ११ ॥

जिस अपस्मार के रोगी के हृत्कप, आँख में दर्द, पसीना, हाथ-पाँव का ठण्डा होना आदि लक्षण हों तो उसे दशमूल का क्वाथ तथा कल्याणघृत का सेवन करना चाहिए ॥ ११ ॥

स्वल्पपञ्चगव्य घृत।

गोशकृद्रसदध्यम्लक्षीरमूत्रैः समैर्घृतम्। सिद्धं चातुर्थकोन्मादग्रहापस्मारनाशनम् ॥ १२ ॥

गोबर का रस १२८ तोले। खट्टा दही १२८ तोले। दूध २२८ तोले, गोमूत्र १२८ तोले तथा गोघृत १२८ तोले। यथाविधि घृत सिद्ध कर पान करने से चातुर्थिक ज्वर, उन्माद, ग्रहदोष और अपस्मार (मृगी) आदि नष्ट होते हैं ॥ १२ ॥

बृहत्पञ्चगव्य घृत।

द्वे पञ्चमूले त्रिफलां रजन्यौ कुटजत्वचम्। सप्तपर्णमपामार्गं नीलिनीं कटुरोहिणीम् ॥ १३ ॥ शम्पाकं फल्गुमूलञ्च पौष्करं सदुरालभम्। द्विपलानि जलद्रोणे पक्त्वा पादावशेषिते ॥ १४ ॥ भार्गी पाठा त्रिकटुकं त्रिवृतानिचुलानि च। श्रेयसी चाढकी मूर्वा दन्ती भूनिम्बचित्रकौ ॥ १५ ॥ द्वे सारिवे रोहितकं भूतिकां मदयन्तिकाम्। क्षिपेत् पिष्ट्वाक्षमात्राणि तैः प्रस्थं सर्पिषः पचेत् ॥ १६ ॥ गोशकृद्रसदध्यम्लक्षीरमूत्रैश्च तत्समैः। पञ्चगव्यमिदं ख्यातं महत्तदमृतोपमम् ॥ १७ ॥ अपस्मारे ज्वरे कासे श्वयथावुदरे तथा। गुल्मार्शःपार्श्वरोगेषु कामलायां हलीमके ॥ १८ ॥ अलक्ष्मीग्रहरक्षोघ्नं चातुर्थकविनाशनम् ॥ १९ ॥

क्वाथ के लिए दशमूल, त्रिफला, हल्दी, दारुहल्दी, कुड़े की छाल, छतौना, चिरचिटा, नील, कुटकी, अमलतास, कठूमर की जड़, पोहकरमूल और जवासा; प्रत्येक आठ-आठ तोले। क्वाथार्थ जल २५ सेर ४८ तोले। अवशिष्ट ६ सेर ३२ तोले। गोघृत १२८ तोले, गोबर का रस १२८ तोले। खट्टा दही १२८ तोले। दूध १२८ तोले। गोमूत्र १२८ तोले। कल्क के लिए भारङ्गी, पाढ़ी, सोंठ, मिर्च, पीपरि, निसोथ, हिज्जल (समुद्र-फल) गजपीपरि, अरहर की जड़, मरोरफली, दन्तीमूल, चिरायता, चीता की जड़, दोनों सारिवा (अनन्तमूल और कालीसर), रोहिड़ा की छाल, अजवाइन और मोतिया (बेला) के फूल; प्रत्येक एक-एक तोला। यथाविधि घृत सिद्ध करे। अमृत के तुल्य गुणकारी यह पञ्चगव्य घृत अपस्मार, ज्वर, खाँसी, सोथ, उदरविकार, गुल्म, बवासीर, पसली का रोग, कामला, हलीमक और चातुर्थिकज्वर को नष्ट करता है तथा अलक्ष्मी, ग्रह, राक्षसावेश आदि को दूर करता है ॥ १३-१९ ॥

महाचैतस घृत।

शणत्रिवृत्सथैरण्डो दशमूली शतावरी। रास्ना मागधिका शिग्रु: क्वाथ्यं द्विपलिकं भवेत् ॥ २० ॥ विदारी मधुकं मेदे द्वे काकोल्यौ सिता तथा। एभिः खर्जूरमृद्वीकाभीरुयुञ्जातगोक्षुरैः ॥ २१ ॥ चैतसस्य घृतस्याङ्गैः पक्तव्यं सर्पिरुत्तमम्। महाचैतससंज्ञं तु सर्वापस्मारनाशनम् ॥ २२ ॥ गरोन्मादप्रतिश्यायतृतीयकचतुर्थकान्। पापालक्ष्मीजयेदेतत् सर्वग्रहनिवारकम् ॥ २३ ॥ श्वासकासहरञ्चैव शुक्रार्त्तवविशोधनम्। घृतमानं क्वाथविधिरिह चैतसवन्मतः ॥ २४ ॥ कल्कश्चैतसकल्कोक्तद्रव्यैः सार्द्धञ्च पादिकः। नित्यं युञ्जीतकामाप्तौ तालमस्तकमिष्यते ॥ २५ ॥

काढ़ा के लिए सन के बीज, निसोथ, एरण्ड की जड़, दशमूल, शतावरी, रास्ना, पीपरि और सहिजन की छाल; प्रत्येक आठ आठ तोले। पाक के लिए जल २१ सेर ४८ तोले। अवशिष्ट ६ सेर ३२ तोले। घृत १२८ तोले। कल्क के लिए विदारीकन्द, मुलेठी, मेदा, महामेदा, काकोली, क्षीरकाकोली, मिश्री, पिण्डखजूर, मुनक्का, शतावरी, मुञ्जातक (कन्द विशेष), गोखुरू और स्वल्पचैतस घृत के सम्पूर्ण कल्कद्रव्य (इन्द्रायन, त्रिफला, सँभालू के बीज, देवदारु, एलुआ, शालपर्णी, तगर, हल्दी, दारुहल्दी, सफेद और काली सारिवा, प्रियङ्गु के फूल, नीलकमल, इलायची, मँजीठ, दन्ती, अनार, केसर, तालीसपत्र, बड़ी कटेरी, चमेली के ताज़े फूल, वायविडङ्ग, पृश्निपर्णी, कूट, सफेद चन्दन और पद्माख) सब मिलाकर ६४ तोले। विधिपूर्वक घृत का पाक करे। यह महाचैतस घृत सब प्रकार के अपस्मारों का नाशक है तथा विषदोष, उन्माद, प्रतिश्याय, तृतीयक और चातुर्थिक ज्वर, पाप, अलक्ष्मी, सर्वग्रह, श्वास और खाँसी आदि रोगों को नष्ट करता है। शुक्र और रज का शोधन करनेवाला है। मुञ्जातक की प्राप्ति न होने पर तालमस्तक ग्रहण करना चाहिए॥ २०–२५ ॥

कूष्माण्ड घृत।

कूष्माण्डकरसे सर्पिरष्टादशगुणे पचेत्। यष्टयाह्वकल्कं तत्पानमपस्मारविनाशनम् ॥ २६ ॥

गौ का घी २ सेर, पेठे का रस ३६ सेर। मुलेठी का कल्क आध सेर। यथाविधि घृत सिद्ध कर पान करने से अपस्मार का नाश होता है॥ २६ ॥

पलङ्कषाद्य तैल।

पलङ्कषावचापथ्यावृश्चिकाल्यर्कसर्षपैः। जटिलापूतनाकेशीलाङ्गलीहिङ्गुचोरकैः ॥ २७ ॥ लशुनातिविषाचित्राकुष्ठैर्विड्भिश्च पक्षिणाम्। मांसाशिनां यथालाभं वस्तमूत्रे चतुर्गुणे। सिद्धमभ्यञ्जनात्तैलमपस्मारविनाशनम् ॥ २८ ॥ अभ्यङ्गे सार्षपं तैलं वस्तमूत्रे चतुर्गुणे। सिद्धं स्याद्गोशकृन्मूत्रैः स्नानोत्सादनमेव च ॥ २९ ॥

गूगुल, वच, हड़, वृश्चिकाली (बिछाटी), आक की जड़, सरसों, जटामासी, हड़, भूतकेशी (गन्धमांसी), कलिहारी, हींग, अग्निपर्णी (अड़तर), लहसुन, अतीस, चीता की जड़, कूट और जितनी मिल सके उतनी मांसभक्षी पक्षियों की बीटें, सब मिश्रित आध सेर लेकर कल्क बनावे। तेल कडुआ १ सेर। बकरी का मूत्र ८ सेर। यथाविधि तैल का पाक कर मालिश करे तो अपस्मार को नष्ट करे। सरसों के तेल को चौगुने बकरी के मूत्र में सिद्ध करके मालिश करे और गोबर का उबटन लगावे तथा गोमूत्र से स्नान करने से अपस्मार रोग नष्ट होता है॥ २७–२९ ॥

कल्याण चूर्ण

पञ्चकोलं समरिचं त्रिफला विडसैन्धवम् । कृष्णाविडङ्गपूतीकयमानीधान्यजीरकम् ॥ ३० ॥ पीतमुष्णाम्बुना चूर्णं वातश्लेष्मामयापहम् । अपस्मारे तथोन्मादेऽप्यर्शसां ग्रहणीगदे ॥ एतत्कल्याणकं चूर्णं नष्टस्याग्नेश्च दीपनम् ॥ ३१ ॥

पीपल, पीपलामूल, चव्य, चित्रक, सोंठ, कालीमिर्च, त्रिफला, विडनमक, सेंधानमक पीपल, वायविडङ्ग, करंज, अजवायन, धनियाँ, जीरा इनके चूर्ण को गरम जल के साथ पीने से वातकफजन्य रोग, अपस्मार, उन्माद, बवासीर तथा ग्रहणी आदि रोग नष्ट होते हैं। यह चूर्ण अग्नि को प्रदीप्त करता है। मात्रा—१ माशा ॥ ३०—३१ ॥

स्मृति सागर रस।

रसगन्धकतालानां साशिलातात्म्रभस्वताम् । शुद्धानां मूर्छितानां च चूर्णं भाव्यं वचाम्बुभिः ॥३२॥ एकविंशतिधा पश्चाद्ब्राह्मीधारा तथैव च । कटभी बीजतैलेन भावयेदेकवारकम् ॥ ३३ ॥ स्मृतिसागर नामाऽयं रसोऽपस्मार नाशनः । सर्पिषा-मापमात्रोऽयं भुक्तो हन्यादपस्मृतिम् ॥३४॥

शुद्ध पारा गन्धक हरिताल और मैनसिल सोना माखी और ताम्रभस्म सब बराबर लेकर कज्जली कर वच और ब्राह्मी के स्वरसों से २१-२१ बार घोटकर माल कांगनी के तैल में १ बार घोटकर रखे। इसमें १-१ माशा घी के साथ देने से अपस्मार का नाश करता है तथा याद रखने की शक्ति (स्मृति को) तेज करती है ॥ ३२-३४ ॥

चण्डभैरव।

मृतसूतार्कलौहञ्च तालं गन्धं मनःशिला । रसाञ्जनञ्च तुल्यांशं गोमूत्रेणापि मर्दयेत् ॥ ३५ ॥ तं गोलं द्विगुणं गन्धं लोहपात्रे क्षणं पचेत् । गुञ्जैकमितं भक्ष्यमपस्मारहरं परम् ॥ ३६ ॥ हिङ्गु सौवर्चलं कुष्ठं गवां मूत्रेण सर्पिषा । चतुर्गुञ्जं पिबेच्चानु रसेऽस्मिंश्चण्ड-भैरवे ॥ ३७ ॥

रससिन्दूर, ताम्रभस्म, लोहभस्म, हरताल, गन्धक, मैनशिल और रसौत, इन सबको सम भाग लेकर गोमूत्र में घोटें फिर उसका गोला बनावे। उससे दुगुनी गन्धक मिलाकर लोहे की कड़ाही में थोड़ी देर उसे पकावे। इसकी मात्रा १ रत्ती की है। इस चण्डभैरव रस को खाकर हींग १ रत्ती, काला नमक १ रत्ती और कूट २ रत्ती के चूर्ण को एक तोला घी और गोमूत्र के साथ पीना चाहिए ॥ ३५-३७ ॥

सूतभस्म प्रयोग।

शङ्खपुष्पीवचाब्राह्मीकुष्ठकैलासरसैः सह । सूतभस्मप्रयोगोऽयं रक्तिकैकप्रमाणतः ॥ ३८ ॥ सर्वापस्मारनाशाय महादेवेन भाषितः ॥ ३९ ॥

शंखाहुली, वच, ब्राह्मी, कूट तथा इलायची इनके क्वाथ के साथ १ रत्ती पारदभस्म या रससिन्दूर खाने से अपस्मार रोग नष्ट होता है ॥ ३८-३९ ॥

वातकुलान्तक।

मृगनाभिः शिला नागकेशरं कलिद्रुमजम् । पारदं गन्धकं जातीफलमेलालवङ्गकम् ॥ ४० ॥ प्रत्येकं कार्षिकञ्चैव श्लक्ष्णचूर्णञ्च कारयेत् । जलेन मर्दयित्वा तु वटीं गुञ्जार्धसम्मिताम् ॥ ४१ ॥ यथा व्याध्यनुपानेन योजयेच्च चिकित्सकः। अपस्मारे महाघोरे मूर्च्छारोगे च शस्यते ॥ ४२ ॥ वातजान् सर्वरोगांश्च हन्यादचिरसेवनात् । नातः परतरं श्रेष्ठमपस्मारेषु

वर्तते ॥ ब्रह्मणा निर्मितः पूर्वं नाम्ना वातकुलान्तकः ॥ ४३ ॥

कस्तूरी, मैनसिल, नागकेशर, बहेड़ा, पारा, गन्धक, जायफल, छोटी इलायची, लौंग हरएक २ तोले, इन्हें जल में घोटकर आधी रत्ती की गोली बनावे। इसके सेवन से अपस्मार, मूर्च्छा, वातव्याधि आदि रोग नष्ट होते हैं। अपस्मार (मृगी) में इससे बढ़कर और कोई रस नहीं है॥ ४०--४३॥

अपस्मार में पथ्य।

नस्यं शिराव्यधो दानं त्रासनं बन्धनं भयम्। तर्जनं ताडनं हर्षो धूमपानश्च विस्मयः ॥ ४४ ॥ धीधैर्यात्मादिविज्ञानं स्नानमभ्यञ्जनानि च। लोहिताः शालयो मुद्गा गोधूमाः सततं हविः ॥ ४५ ॥ कूर्मामिषं धन्वरसाः दुग्धं ब्राह्मीदलं यवा। पटोलं वृद्धकूष्माण्डं वास्तूकं स्वादु दाडिमम् ॥ ४६ ॥ शोभाञ्जनं पयःपेटी द्राक्षा धात्री परूषकम्। तैलं खराश्वमूत्रञ्च गगनाम्बु हरीतकी ॥ अपस्मारगदे नृणां पथ्यमेतदुदीरितम् ॥ ४७ ॥

नस्य, शिरावेध, दान, धमकाना, बाँधना, डराना, झिड़कना, ताड़न, हर्ष, धूमपान, आश्चर्यजनक दृश्य आदि, बुद्धि, धृति, आत्मादि ज्ञान, स्नान, अभ्यङ्ग, लाल शालि, चावल, मूँग, गेहूँ, पुराना घी, कछुए का मांस जांगल पशु-पक्षियों के मांस का रस, दूध, ब्राह्मीपत्र, यव, परवल, पुराना पेठा, बथुआ, मीठा अनार, सहिजना, नारियल, अंगूर, आँवला, फालसा, तिल तैल, गदहा और घोड़े का मूत्र, वर्षा का जल और हड़ ये अपस्मार रोग में पथ्य हैं॥ ४४--४७॥

अपथ्य।

चिन्तां शोकं भयं क्रोधमशुचीन्यशनानि च। मद्यं मत्स्यं विरुद्धान्नं तीक्ष्णोष्णगुरुभोजनम् ॥ ४८ ॥ अतिव्यवायमायासंपूज्यं पूजाव्यतिक्रमम्। पत्रशाकानि सर्वाणि बिम्बीमापाढकं फलम् ॥ ४९ ॥ तृषा निद्रा क्षुधा वेगमपस्मारी परित्यजेत् ॥ ५० ॥

इति भैषज्यरत्नावल्यामपस्माराधिकारः समाप्तः।

---

चिन्ता, शोक, भय, क्रोध, अपवित्र भोजन, शराब, मछली, विरुद्ध भोजन, तीक्ष्ण-उष्ण एवं गुरु भोजन, अति मैथुन, परिश्रम, पूज्य पुरुष, देवता आदि की पूजा न करना, सम्पूर्ण पत्रशाक, कुँदरू, आषाढ फल (खीरा, खीरिया), प्यास निद्रा, भूख इनके वेगों को रोकना; ये अपथ्य हैं। इनका अपस्मारी को त्याग करना चाहिए॥ ४८--५०॥

इति श्रीसरयूप्रसादत्रिपाठिविरचितायां भैषज्यरत्नावल्या रत्नप्रभाभिधायां व्याख्यायामपस्माराधिकारः समाप्तः।

---

## तत्त्वोन्मादाधिकारः।

तत्त्वोन्माद का स्वरूप।

अहो मम महद्भाग्यं लब्धा यद् ब्रह्मणः कृपा। इत्येवं भ्रमजो मोहस्तत्त्वोन्माद इतीरितः ॥ १ ॥ तत्त्वोन्मादो हर्षमौढ्यं ब्रह्ममोहश्च स स्मृतः। तथा धीभ्रमजो व्याधिरयं सद्भिर्निरूपितः ॥ २ ॥ किं रूपं कुत्र वा ब्रह्म नैतज्जानाति कोऽप्यहो। पुरार्द्धदर्शनैर्वा न लब्धं यद् ब्रह्मदर्शनम् ॥ ३ ॥ एकैकशकलैकं विश्वं यदन्यदन्यो निरीक्षणम्। ब्रह्माण्डं ब्रह्मतर्केण व्याकुलं बहुधा यथा ॥ ४ ॥ मानं दुरूहं सतायामास्तां

दूरे दयादिकम् । अनिर्णीतमनिर्णेयं तदेवमवधारय ॥ ५ ॥ मदर्थं ब्रह्म कुर्वेतज्जहीनं मम वैरिणम् । धनं देहि यशो देहि देहि राज्यमकण्टकम् ॥६॥ विशालनेत्रां सुदतीं पीनोन्नतपयोधराम् । नितम्बिनीं क्षीणमध्यां स्मरकेलिकलाविदम् ७ नित्यं नर्मप्रियां तन्वीं रम्भोरुं रसिकेश्वरीम् । मद्रतां नित्यसन्तुष्टां सुन्दरीं देहि कामिनीम् ॥ ८ ॥ इत्थमर्थनमार्गेण ब्रह्मभीतं ससम्भ्रमम् । भ्रान्तबुद्धेन मन्यस्व प्रार्थितं साधयिष्यति ॥ ९ ॥ कदाचित् प्रार्थना कापि यदि ते सफला भवेत् । विद्धि तत् काकतालीयं तत्र ब्रह्म न कारणम् ॥ १० ॥ न स्तवैर्हृष्यति ब्रह्म नापि द्वेष्टि च निन्दया । अस्तिवादी प्रियो नास्य नास्तिवादी न चाप्रियः ॥ ११ ॥ न मूर्खेऽनादरस्तस्य बहुमानो न पण्डिते । धनिनोऽस्य भयं नास्य न दरिद्रे च ताडनम् ॥ १२ ॥ श्वपाके यवने चापि ब्राह्मणे वेदपारगे । मद्यपे गणिकासक्ते मालातिलकधारिणि ॥ १३ ॥ शुचावप्यशुचौ साध्व्यां वेश्यायां बालवृद्धयोः । सर्वत्रैव समं ब्रह्म चिद्रूपं सनातनम् ॥ १४ ॥ एवं भूतस्य सर्वेयमिति मत्प्रीतये कृतिः । तत्त्वोन्मादति यस्तस्य व्याधिरुन्माद एव हि ॥ १५ ॥ प्रायशो बुद्धिहीनानामसतां नीचचेतसाम् । व्याधिरेषोऽभिजायेत कदाचिन्महतामपि ॥ १६ ॥ तत्त्वोन्माद इत्यत्र उन्मादशब्दो भावकृता निष्पन्नः ।

'अहो मेरा महान् भाग्य है जो मैंने ब्रह्म की कृपा से पाया है' ऐसा भ्रमजन्य मोद तत्त्वोन्माद कहलाता है। लक्षणों में तत्त्वोन्माद, हर्षमौख्य, ब्रह्ममोह नाम रोग मिथ्या बुद्धि से उत्पन्न कहा है। ब्रह्म का क्या रूप है ? कहाँ है, इसे कोई भी नहीं जानता। पुराण और दर्शनशास्त्रों से भी उस ब्रह्म के दर्शन प्राप्त नहीं होते हैं। एक कहता है, संसार का रचयिता ब्रह्म है। दूसरा कहता है, ईश्वर है ही नहीं। बहुधा ब्रह्मवाद और ब्रह्म के तर्क से व्यर्थ ही व्याकुल रहता है, कठिनता से प्राप्त मानसता में आसक्ति जो निश्चय नहीं हुआ है और न निश्चय किया जा सकता है, उसका निश्चय हे ब्रह्म ! मेरे लिये उन्नत कर, मेरे वैरियों को नष्ट कर, धन दे, यश दे, निष्कण्टक ( एकछत्र ) राज्य दे। विशाल नेत्रवाली, पुष्ट और उठे स्तनोंवाली, मोटे नितम्ब ( चूतड़ ) और पतली कमरवाली, कामक्रियाओं में चतुर, सदैव हास्यप्रिय ( हँसमुख ), छरहरी, केला के खंभ सी ( चिकनी ) जांघवाली, रसिकों की स्वामिनी, मेरे प्रति प्रेम रखनेवाली और सदैव सन्तुष्ट रहनेवाली कामिनी दे। इस प्रकार की इच्छा करनेमात्र से ब्रह्म में भ्रमित बुद्धिवाला व्यक्ति प्रार्थना को नहीं मानता हुआ साधना करता है। कदाचित् किसी की कोई प्रार्थना सफल भी हो जाय तो उसे काकतालीय न्याय से अकस्मात् ही समझिये, उसका कारण ब्रह्म नहीं है। ब्रह्म ( ईश्वर ) प्रार्थना से प्रसन्न नहीं होता है, निन्दा से नाराज नहीं होता है, मूर्ख का अनादर नहीं करता है, पण्डितों का विशेष सम्मान नहीं करता है, आस्तिक प्रिय नहीं है, नास्तिक अप्रिय नहीं है, धनिकों का भय नहीं है, निर्धनों की दरिद्रता में ताड़ना नहीं है, चाण्डाल, यवन, वेदपाठी ब्राह्मण, शराबी, रंडीबाज, व्यभिचारी और माला-तिलकधारी, पवित्र और अपवित्र, स्त्री पतिव्रता और वेश्या तथा बालक और वृद्ध में सर्वत्र ही समान चिद्रूप सनातन ब्रह्म है। इस प्रकार के उस ब्रह्म ने मेरे लिए ही यह किया है। उन्माद नामक रोग के समान ही यह तत्त्वोन्माद ही है। प्रायः यह रोग बुद्धिहीन, दुर्जन, नीच विचारवाले व्यक्तियों के ही होता है, कभी-कभी महान् व्यक्तियों को भी हो जाता है ॥ १-१६ ॥

तत्त्वोन्माद का निदान।

अतिप्रगाढचित्तस्य धर्म्माद्यभिनिवेशनात् । व्याधिस्तत्त्वोन्मादो नाम जायते वातकोपतः ॥ १७ ॥

चित्त की कठोरता से और धर्म आदि के अभिनिवेश ( कठोरपूर्वक पालन ) से वात कुपित होकर तत्त्वोन्माद नाम की यह बीमारी पैदा करता है ॥ १७ ॥

तत्त्वोन्माद के लक्षण।

महामोहे प्रमूढत्वं स्थिरास्पन्दा कनीनिका । चक्षुरुन्मीलितं सुप्तिर्गतिरोधोऽथ वाग्मिता ॥ १८ ॥ दम्भोग्रभावौ विक्षेपो हास्यं चौक्ष्यञ्च रोदनम् । एवम्भूतानि लिङ्गानि तत्त्वोन्मादे भवन्ति हि ॥ १९ ॥

महामोह में मूढ़ावस्था, पुतलियों का स्थिर रह जाना, पलकों का टिमटिमाना, और कम खाना, कम चलना फिरना, बातें करना, दम्भ, विचारों की तीव्रता, विक्षेप, हँसी, उग्रता, रोना; इस प्रकार के लक्षण तत्त्वोन्माद में होते हैं ॥ १८-१९ ॥

वातनाडीस्थैर्यकरं तथा वातानुलोमनम् । भेषजं पानमन्नञ्च भिषगत्र प्रयोजयेत् ॥ २० ॥

तत्त्वोन्माद में वातनाड़ियों ( Nerves ) की स्थिरता करनेवाली, वात को अनुलोमन करनेवाली औषधि, पेय तथा अन्न का प्रयोग करना चाहिए ॥ २० ॥

प्रहारैस्ताडनाद्यैश्च गदं त्वमकृतं नयेत् ॥ २१ ॥

इति भैषज्यरत्नावल्यां तत्त्वोन्मादाधिकारः समाप्तः।

---

प्रहार एवं ताडन आदि द्वारा कृत्रिम तत्त्वोन्माद को जीतना चाहिए ॥ २१ ॥

इति श्रीभैषज्यरत्नावल्या भाषाटीकायां तत्त्वोन्मादाधिकारः समाप्तः।

---

## योषापस्माराधिकारः।

योषापस्मार का निदान।

शोणितस्य क्षयाद्वापि तथाधिक्यादजीर्णतः । कोष्ठरोधान्मनोभङ्गादत्युद्वेगाच्च शोकतः ॥ १ ॥ रजोऽभावाच्च योषाणां जरायुविकृतेस्तथा । अशक्तेरपि नैष्ठुर्यात् पत्युरस्नेहतस्तथा ॥ २ ॥ वैधव्यजन्याद्वाधेश्च योषापस्मारसंज्ञकः । गदः सञ्जायते कृच्छ्रो मनोदेहप्रतापनः ॥ ३ ॥ योषितामेव बाहुल्याद् यत एष भवेद् गदः । अपस्मारप्रकृतिकस्तेनास्यैषाभिधा मता ॥ ४ ॥ कालोऽस्य यौवनं व्याधेर्नार्वाग् द्वादशवर्षतः । परं पञ्चाशतो वापि व्याधिरेषः प्रजायते ॥ ५ ॥

रुधिर के क्षय और अधिकता से, अजीर्ण से, कोष्ठावरोध ( मलावरोध-कब्ज ) से, उद्वेग से, शोक से, मासिक स्राव के अभाव से, गर्भाशय के विकार से, अशक्ति से, पति के प्रेम की कमी से और उनकी कठोरता से, वैधव्यजन्य दुःख से और उनकी कठोरता से, वैधव्यजन्य दुःख से मन और देह को तपानेवाला कष्टदायक स्त्रियों के योषापस्मार नामक रोग उत्पन्न होता है। यह रोग प्रायः स्त्रियों को अधिकता से होने से योषापस्मार नाम रक्खा है। इसके उत्पन्न होने का समय भी यौवनावस्था ही है। न तो बारह वर्ष की आयु से पहिले होता है और न पचास वर्ष के बाद होता है ॥ १-५ ॥

योषापस्मार का पूर्वरूप।

हृद्रुजा जृम्भणं सादो धर्म्मणो मनसोऽपि च । भवेद्भविष्यति गदे योषापस्मारसंज्ञके ॥ ६ ॥

जिस स्त्री के योषापस्मार नामक रोग होनेवाला होता है उसके हृदय में पीड़ा, जँभाई, शरीर और मन का दुःखित होना आदि अवश्य होते हैं ॥ ६ ॥

योषापस्मार के लक्षण।

वैचित्त्यं बुद्धिविभ्रान्तिर्हास्यं क्रन्दनमेव च। उच्चैः क्रोशः प्रलपनं ज्योतिर्दर्पस्तथा भ्रमः॥ ७॥ औद्धत्यं श्वासकृच्छ्रं च कण्ठामाशयवेदना। भावल्यं स्पर्शशक्तेश्च कचिदङ्गे सदा व्यथा॥ ८॥ अष्ठीलवर्तुलोत्थानमाकण्ठमुदरादपि। सदल्पबुद्धिर्मूर्च्छा च व्याधावस्मिन् प्रजायते॥ ९॥

चित्त की विकलता, बुद्धिभ्रम, हँसना, रोना ऊँची आवाज़ से पुकारना, अंट संट बकना, उजाले से अरुचि, भ्रम, ऊधम मचाना, श्वास में कष्ट, कण्ठ और आमाशय में वेदना, स्पर्शशक्ति की प्रबलता, किसी-किसी अवयव में सदैव ही कष्ट रहना, पेट में कण्ठ तक एक गोला-सा उठना, अल्प बुद्धि और मूर्च्छा होना आदि लक्षण इस रोग के उत्पन्न होने पर होते हैं॥ ७-९॥

योषापस्मार की चिकित्सा।

यत्धातुपोषकं पानमन्नमौषधमेव च। कोष्ठशुद्धिकरञ्चापि तत्तदत्र प्रयोजयेत्॥ १०॥ मूर्च्छायां शीततोयेन सेकः शिरसि चक्षुषोः। शिरोविरेचनं चापि प्रयोज्यं तन्निवृत्तये॥ ११॥ अत्र प्रयोजयेत् सर्वं मूर्च्छापस्मारभेषजम्। जरायुदोषं निखिलं प्रतिकुर्याद् यथाविधि। योषापस्मरणं सान्त्वैः प्रियदानाच्च शाम्यति॥ १२॥

जो औषध और अन्नपान धातुओं को पुष्ट करते हैं और कोष्ठ को शुद्ध करते हैं वे सब अपस्मार के रोगियों को देने चाहिए। मूर्च्छा होने पर शीतल जल से सिर और आँखों पर सेचन अथवा नस्य आदि से शिरोविरेचन करना चाहिए। यहाँ मूर्च्छा और अपस्मारनाशक औषधें ही प्रयुक्त करनी चाहिए। गर्भाशय के समस्त दोषों को दूर करनेवाला उपचार भी करना चाहिए। योषापस्मार के रोगी को सान्त्वना देने से और उसकी प्रिय वस्तु देने से भी रोग शमन हो जाता है॥ १०-१२॥

बृहत् भूतभैरव रस।

द्विगुणं स्वर्णसिन्दूरं तत्समं हेमभस्मकम्। मुक्ताप्रवालकान्तायोराजपट्टं समं मतम्॥ १३॥ कन्यानीरेण संमर्द्य भेकपर्ण्या रसेन च। पत्रैरेरण्डकैर्बद्ध्वा धान्यराशौ निधापयेत्॥ १४॥ त्रिदिनान्ते समुद्धृत्य वल्लमात्रां वटीं चरेत्। एकैकां वटिकां खादेत् त्रिफलाशर्करायुताम्॥ १५॥ अथवा पयसा सार्धं भूतोन्मादविनाशिनीम्। अपस्मारं महाघोरं योषापस्मारमेव च॥ १६॥ हन्त्यपस्मारं मदं मूर्च्छां विविधा वातवेदनाः॥ १७॥

इति श्रीभैषज्यरत्नावल्यां योषापस्माराधिकारः समाप्तः।

---

दो भाग स्वर्णसिन्दूर, २ भाग स्वर्ण-भस्म तथा मोती, प्रवाल, कान्तलौह और राजपट्ट मणि की भस्में सब एक-एक भाग। इन्हें ग्वारपाठे के रस और मण्डूकपर्णी के रस से पृथक्-पृथक् घोटकर गोला बना अरण्डी के पत्तों से लपेटकर धनाज के ढेर के भीतर रख दें। तीन दिन रखे रहने के बाद दो-दो रत्ती की गोलियाँ बनावें। एक-एक गोली को मात्रा त्रिफला और खाँड मिलाकर खाने या दूध के साथ खाने से भूतोन्माद, महाभयानक अपस्मार, योषापस्मार, मद, मूर्च्छा और अनेक प्रकार की वातवेदनाएँ नष्ट होती हैं॥ १३-१७॥

इति श्रीभैषज्यरत्नावल्यां भाषाटीकायां योषापस्माराधिकारः समाप्तः

## अथ मदात्ययाधिकारः ।

मन्थः खर्जूरमृद्वीकावृक्षाम्लाम्लीक-दाडिमैः । परूषकैः सामलकैर्युक्तो मदविकारनुत् ॥ १ ॥

द्रवालोडितलाजसक्तुः खर्जूरादिभिर्युक्तो मन्थ इत्यर्थः । खर्जूरादीनां द्रवो ग्राह्य इति भानुः ।

मन्थ में खजूर, मुनक्का, इमली, अमलवेत, अनार, फालसे और आँवले ; इनका रस मिलाकर पीने से मद्यविकार दूर होता है। खील (लावा) के सत्तुओं में घी और जल मिलाकर सानने से मन्थ[1] संज्ञा होती है ॥ १ ॥

मद्यं सौवर्चलव्योषयुक्तं किञ्चिज्जलान्वितम् । जीर्णमद्याय दातव्यं वातपानात्ययापहम् ॥ २ ॥

पी हुई मदिरा जब हजम हो जाय तब सोंठ, मिर्च, पीपरि और काला नमक मिलाकर किञ्चित् जलयुक्त मदिरा[2] पीने से वातज मदात्यय रोग नष्ट होता है ॥ २ ॥

मुद्गयूषः सितायुक्तः स्वादुर्वा पैशितो रसः । पित्तपानात्यये योज्याः सर्वतश्च क्रिया हिमाः ॥ ३ ॥

मिसरीयुक्त मूँग का जूस अथवा मधुररसयुक्त मांसरस का पान और सब प्रकार की ठंडी चिकित्सा पित्तज पानात्यय रोग में हितकर है ॥ ३ ॥

पानात्यये कफोद्भूते लङ्घनञ्च यथाबलम् । दीपनीयौषधोपेतं पिबेन्मद्यं समाहितः ॥ ४ ॥

कफज पानात्यय रोग में बलानुसार लंघन करना और सावधान होकर दीपन औषध मिलाकर मदिरा का पीना हितकर है ॥ ४ ॥

सर्वजे सर्वमेवेदं प्रयोक्तव्यं चिकित्सितम् । आभि क्रियाभिः सिद्धाभिः शमं याति मदात्ययः ॥ ५ ॥

सान्निपातज पानात्यय रोग में उपर्युक्त तीनों दोषों की सी चिकित्सा करनी चाहिए। इन सिद्ध क्रियाओं से मदात्यय शान्त हो जाता है ॥ ५ ॥

सच्छर्दिमूर्च्छातिसारं मद्यं पूगफलोद्भवम् । सद्यः प्रशमयेत् पीतमातृप्त वारिशीतलम् ॥ ६ ॥

वमन, मूर्च्छा और अतीसार से युक्त सुपारी के मद में तृप्तिपर्यन्त शीतल जल पीना शीघ्र ही मद को शान्त करता है ॥ ६ ॥

वन्यकरीषघ्राणाज्जलपानाल्लवणभक्षणाद्वापि । शाम्यति पूगफलमदश्चूर्णजां शर्कराकवलात् ॥ ७ ॥

वन के सूखे कंडों के सूँघने से, जल पीने से और नमक खाने से सुपारी का मद शान्त होता है। शर्करा का कवल धारण करने से चूना से उत्पन्न मुखव्याधि नष्ट होती है ॥ ७ ॥

कूष्माण्डरसः सगुडः शमयति मदमाशु मदनकोद्रवजम् । धुस्तूरजञ्च दुग्धं सशर्करं पानयोगेन ॥ ८ ॥

गुड मिलाकर पेठे का रस पीने से मैनफल और कोदों का मद शीघ्र शान्त होता है। खाँडयुक्त दूध पीने से धतूरा का मद शान्त होता है ॥ ८ ॥

मद्यं पीत्वा यदि ना तत्क्षणमवलेढि शर्करां सघृताम् । जातु न मदयति मद्यं मनागपि प्रपितनीयमपि ॥ ९ ॥

मद्य पीकर उसी समय खाँड में घी मिलाकर चाटने से तेज से तेज मदिरा भी मद नहीं कर सकती है ॥ ९ ॥

---

१ "सक्तवः सर्पिषाऽभ्यक्ताः शीतोदकपरिप्लुताः । नातिद्रवा नातिसान्द्रा मन्थ इत्यभिधीयते" इति धन्वन्तरीयनिघण्टुः ।

२—"मद्योत्थानां च रोगाणां मद्यमेव हि भेषजम् । यथा दहनदग्धानां दहनं स्वेदनं हितम् ॥ मिथ्यातिहीनमद्येन यो व्याधिरुपजायते । समेनैव निपीतेन मद्येन स हि शाम्यति" इति भावमिश्रः ।

### एलाद्य मोदक ।

एलां मधुकमग्निञ्च रजन्यौ द्वे फलत्रयम् । रक्तशालिं कणां द्राक्षां खर्जूरञ्च तिलं यवान् ॥ १० ॥ विदारीं गोक्षुरं बीजं त्रिवृताञ्च शतावरीम् । सञ्चूर्ण्य मोदकं कुर्यात् सितया द्विगुणया ॥११॥ धारोष्णेनापि पयसा मुद्गयूषेण वा समम् । पिबेदक्षमात्रं तु प्रातर्नत्वाम्बिकां सदी ॥ १२ ॥ मद्यपानसमुत्थाना विकारा निखिला अपि । सेवनादस्य नश्यन्ति व्याधयोऽन्ये च दारुणाः ॥ १३ ॥

छोटी इलायची, मुलैठी, चीता की जड़, हल्दी, दारुहल्दी, त्रिफला, लाल साँठी के चावल, पीपरि, मुनक्का, पिण्डखजूर, तिल, जौ, विदारीकन्द, गोखरू के बीज, निसोथ, शतावरी; इन सब को सम भाग लेकर कूट पीस ले। पश्चात् सब चूर्ण से दूनी मिसरी का पाक कर लड्डू बना ले। मात्रा १ तोला। अनुपान धारोष्ण दूध या मूँग का यूष। प्रातःकाल भगवती को प्रणाम कर सेवन करना चाहिए । यह मोदक मद्यपान से उत्पन्न हुए सब प्रकार के विकार और व्याधियों को नष्ट करता है ॥ १०-१३ ॥

### फलत्रिकाद्य चूर्ण ।

फलत्रिकं त्रिविश्वच्यामा देवदारु महौषधम् । अजमोदा यमानी च दार्वी लवणपञ्चकम् ॥ १४ ॥ शतपुष्पा वचा कुष्ठं त्रिसुगन्ध्येलवालुकम् । सर्वाण्येतानि सञ्चूर्ण्य पिबेच्छीतेन वारिणा ॥ १५ ॥ पानात्ययादिरोगाणां हरणेऽग्नेश्च दीपने । संग्रहग्रहणीध्वंसेऽप्येतद्‌द्यौषधं क्षमम् १६

आँवला, बहेड़ा, हड़, निसोथ, कालीसर, देवदारु, सोंठ, अजमोद, अजवाइन, दारुहल्दी, पाँचो नमक, सौंफ, बच, कूट, दालचीनी, तेजपात, इलायची और एलुआ; इन सबको सम-भाग ले कूट पीसकर चूर्ण बनावे। ठंढे जल से इसका सेवन करने से पानात्यय आदि रोग, मन्दाग्नि और संग्रहणी आदि उदरविकार नष्ट होते हैं ॥ १४–१६ ॥

### महाकल्याण वटी ।

हेमाभ्रञ्च रसं गन्धमयो मौक्तिकमेव च । धात्रीरसेन संमर्द्य गुञ्जामात्रां वटीं चरेत् ॥ १७ ॥ भक्षयेत् प्रातरुत्थाय तिलक्षौद्रमधुप्लुताम् । सिताक्षौद्रयुतां वापि नवनीतेन वा सह ॥ १८ ॥ अयथापानजा रोगा वातजाः कफपित्तजाः । गदाः सर्वे विनश्यन्ति ध्रुवमस्य निषेवणात् ॥ १९ ॥

सुवर्णभस्म, अभ्रकभस्म, पारा, गन्धक, लोहभस्म और मोती की भस्म को आँवले के रस में खूब घोटकर एक-एक रत्ती की गोलियाँ बनावे। प्रातःकाल उठाकर इसका भक्षण करे। अनुपान तिल का चूर्ण और शहद अथवा मिसरी और शहद अथवा मक्खन। इसके सेवन से निस्संदेह वातज, पित्तज और कफज मदात्यय रोग नष्ट होते हैं ॥ १७-१९ ॥

### बृहद्धात्री तैल ।

धात्रीफलरसमर्थं शतपुलीरसं तथा । विदारीस्वरसमर्थं प्रस्थं प्रस्तपयः पृथक् ॥ २० ॥ बलायाश्चाश्वगन्धायाः कुलत्थस्य यवस्य च । पृथक् कषायांश्च माषस्य तैलप्रस्थेन संपचेत् ॥ २१ ॥ जीवनीयो गणो मांसी मञ्जिष्ठा चेन्द्रवारुणी । शारिवाद्वयशैलेयशतपुष्पाः पुनर्नवा ॥ २२ ॥ चन्दनद्वयमेलात्वक् कमलं कदलीफलम् । धचागुर्वभयाधात्रीत्येतान् कल्कान् पचेत्तथा ॥ २३ ॥ मर्दनादस्य तैलस्य गदाः पानात्ययादयः । पलायन्ते सुदूरं हि सिंहग्रस्ता मृगा इव ॥ २४ ॥

आँवलों का रस १२८ तोले, शतावरी का रस १२८ तोले विदारीकन्द का रस १२८ तोले, बकरी का दूध १२८ तोले। खरैटी, असगन्ध, कुम्भी, जौ और अर्द के क्वाथ १२८-१२८ तोले। तैल १२८ तोले। कल्क के लिए—जीवनीयगण की सब ओषधियाँ, जटामांसी, मंजीठ, इन्द्रायण, अनन्तमूल काकोली, भूरिछरीला, सौंफ, सोंठी, लालचन्दन सफेद चन्दन, छोटी इलायची, तज, कमल, केले की फली, मध, अगर, हड़ और आँवला सब मिलित ३२ तोले। विधि से तैल सिद्ध कर मालिश करने से पानात्ययसम्बन्धी सब रोग इस प्रकार दूर भाग जाते हैं जैसे सिंह से डरे हुए मृग भाग जाते हैं॥ २०-२४॥

श्रीखण्डासव।

श्रीखण्डं मरिचं मांसीं रजन्यौ चित्रकं घनम्। उशीरं तगरं द्राक्षां चन्दनं नागकेशरम् ॥ २५॥ पाठां धात्रीं कणां चव्यं लवङ्गञ्चैलवालुकम्। लोध्रञ्चार्द्धपलोन्मानं जलद्रोणद्वये क्षिपेत् ॥ २६॥ द्राक्षां षष्टिपलां तत्र गुडस्य च तुलात्रयम्। धातकीं द्वादशपलां चैकत्र परियोजयेत् ॥ २७॥ मासं संस्थाप्य मृद्भाण्डे वस्त्रपूतं रसं नयेत्। पाययेन्मात्रया वैद्यो वयोबलाद्यपेक्षया ॥ २८॥ पानात्ययं परमदं पानाजीर्णञ्च नाशयेत्। पानविभ्रममत्युग्रं श्रीखण्डासवमाशु च ॥ २९॥

मलयागिरिचन्दन, मिर्च, जटामांसी, हल्दी, दारुहल्दी, चीता की जड़, नागरमोथा, खस, तगर, दाख, लालचन्दन, नागकेशर, पाढ़ी, आँवला, पीपरि, चव्य, लौंग, एलुवा और लोध; प्रत्येक दो-दो तोले लेकर १ मन ११ सेर १६ तोले जल में डाल दें। इसी में ६ सेर मुनक्का, १५ सेर गुड़ और ४८ तोले धाय के फूल मिलाकर मिट्टी के पात्र में भरकर रख दें। एक महीने के बाद वस्त्र से छानकर रख ले रोगी के अग्निबल और आयु के अनुसार वैद्य मात्रा निर्धारित कर इसका पान करावे। इस श्रीखण्डासव के सेवन से पानात्यय, परमद, पानाजीर्ण और अत्यन्त प्रचण्ड पानविभ्रम रोग नष्ट होते हैं। मात्रा १। तोला से २॥ तोले तक॥ २५--२९॥

मदात्यय में पथ्य।

संशोधनं संशमनं स्वपनं लङ्घनं श्रमः। संवत्सरसमुत्पन्नाः शालयः षष्टिकैः सह ॥ ३०॥ मुद्गा माषाश्च गोधूमाः सतीना रागषाडवौ। एणतित्तिरलावाजदक्षबर्हिशशामिषम् ॥ ३१॥ वेशवारो विविधशाक्तं हृद्यं मद्यं पयः सिता। तण्डुलीयं पटोलञ्च मातुलुङ्गं परूषकम् ॥ ३२॥ धारागृहं चन्द्रपादा मणयो मित्रसङ्गमः। क्षौमाम्बरं प्रियाश्लेषो गीतं वादित्रयुद्धतम् ॥ ३३॥ शीताम्बु चन्दनं स्नानं सेव्यमेतन्मदात्यये ॥ ३४॥

संशोधन, संशमन, सोना, लङ्घन, परिश्रम, एक वर्ष के पुराने लाल शालिचावल तथा साठी के चावल, मूँग, उड़द, गेहूँ, मटर, राग, षाडव (मुरब्बे), हिरण, तीतर लावा, बकरा, मुर्गा, मोर और शशक इनका मांस; वेशवार, विविध प्रकार के रुचिकर अन्न, मद्य, दूध, खाँड, चौलाई, परवल, बिजौरा, फालसा, धारागृह (जिस घर में पानी के फव्वारे छूटते हों), चाँदनी, मणियाँ, मित्रमण्डली में बैठना, रेशमी वस्त्र, प्रिया का आलिङ्गन, गाना-बजाना, शीतल जल चन्दन का अनुलेपन और स्नान इनका मदात्यय में सेवन करना चाहिए॥ ३०--३४॥

मदात्यय में अपथ्य।

स्वेदोऽञ्जनं धूमपानं नस्यं दन्तघर्ष-

णाम् । ताम्बूलं चेत्यपथ्यं स्यान्मदात्ययविकारिणाम् ॥ २५ ॥

इति भैषज्यरत्नावल्यां मदात्ययाधिकारः समाप्तः ।

---

स्वेदन, अञ्जन, धूमपान, दातौन करना और पान चबाना ये मदात्यय रोगियों के लिए अपथ्य हैं ॥ २५ ॥

इति श्रीसरयूप्रसादत्रिपाठिविरचितायां भैषज्यरत्नावल्या रत्नप्रभाभिधायां व्याख्यायां मदात्ययाधिकारः समाप्तः ।

---

## अथ नेत्ररोगाधिकारः ।

लङ्घनालेपनस्वेदशिराव्यधविरेचनैः । उपाचरेदभिष्यन्दानञ्जनाश्च्योतनादिभिः ॥ १ ॥

अभिष्यन्द रोग की लंघन, लेप, स्वेदन, शिरावेधन, विरेचन ( जुलाब और शिरोविरेचन ), अंजन और आश्च्योतन आदि से चिकित्सा करनी चाहिए ॥ १ ॥

श्रीवासातिविषालोध्रैश्चूर्णितैरल्पसैन्धवैः । अव्यक्तेऽक्षिगदे कार्यं मोतस्थैर्गुण्ठनं बहिः ॥ २ ॥

गन्धाविरोजा, अतीस और लोध तथा थोड़ा सा सेंधा नमक; इनका चूर्ण कर कपड़े की पोटली में बांध कर अप्रकट नेत्ररोग में ( रोग के प्रारंभिक रूप में ) नेत्रों के बाहर अवगुण्ठन करे। रोगी की आँखें बन्द करके पोटली फेरनी चाहिए ॥ २ ॥

अक्षिकुक्षिभवा रोगाः प्रतिश्यायव्रणज्वराः । पञ्चैते पञ्चरात्रेण प्रशमं यान्ति लङ्घनात् ॥ ३ ॥

आँख तथा कुक्षि के रोग, जुकाम, व्रण और ज्वर; ये पाँच रोग लंघन करने से पाँच दिन में शान्त होते हैं ॥ ३ ॥

स्वेदः प्रलेपस्तिक्ताश्नं सेको दिनचतुष्टयम् । लङ्घनञ्चाक्षिरोगाणामामानां पाचनानि षट् । अञ्जनं पूरणं क्वाथपानमामे न शस्यते ॥ ४ ॥

स्वेदन, लेप, तिक्त अन्न, सेंक तथा लंघन से और चार दिन बीतने पर नेत्र के रोग पक जाते हैं। कच्चे नेत्ररोग में अञ्जन, आश्च्योतन और काढ़े का पीना ठीक नहीं है ॥ ४ ॥

धात्रीफलनिर्यासो नवदृक्कोपं निहन्ति पूरणतः । सक्षौद्रसैन्धवो वापि शिग्रुपत्ररससेकः ॥ ५ ॥

आंवले का रस आँखों में डालने से या शहद और सेंधानमकयुक्त सहिजन का रस आँखों में डालने से अभिष्यन्द ( आँखें दुखना ) रोग नष्ट होता है ॥ ५ ॥

दार्वीरसाञ्जनं वापि स्तन्ययुक्तं प्रपूरणम् । निहन्ति शीघ्रं दाहाश्रुवेदनाः स्यन्दसम्भवाः ॥ ६ ॥

दारुहल्दी और रसौत को खूब महीन पीसकर स्त्री के दूध में मिलाकर आँखों में डालने से अभिष्यन्द से उत्पन्न दाह, अश्रुपात और पीड़ा शीघ्र नष्ट होती है ॥ ६ ॥

करवीरतरुणकिसलयच्छेदोद्भवसलिलसम्पूर्णम् । नयनयुगं भवति दृढं सद्यः सत् तत्क्षणात् कुपितम् ॥ ७ ॥

कनेर के नये-नये कोमल पत्तों का रस निकालकर नेत्र में डालने से कुपित नेत्ररोग शान्त होता है और नेत्र दृढ़ हो जाते हैं ॥ ७ ॥

शिखरिमूलं ताम्रभाजनके स्तोकमैन्धवोन्मिथम् । मस्तुनिघृष्टं हरणांद्धरति च नयनलोचनात् कोपम् ॥ ८ ॥

चिरचिटा की जड़ और सेंधा का चूर्ण

नमक मिला कर तांबे के पात्र में दही के तोड़ से घिस कर नेत्रों में डालने से नवीन नेत्रकोप नष्ट होता है ॥ ८ ॥

लेप।

सैन्धवदारुहरिद्रागैरिकपथ्यारसाञ्जनैः पिष्टैः। दत्तो बहिः प्रलेपो नयनस्यशेषाक्षिरोगहरः ॥ ९ ॥

सेंधानमक, दारुहल्दी, गेरू, हड़ और रसौत; इनको समभाग एकत्र पीस कर नेत्रों के बाहर लेप करने से संपूर्ण नेत्ररोग नष्ट होते हैं ॥ ९ ॥

तथा सावरकं लोध्रं घृतभृष्टं बिडालकः। कार्या हरीतकी तद्वद् घृतभृष्टा बिडालकः ॥ शालाक्येऽक्ष्णोर्बहिर्लेपो बिडालक उदाहृतः ॥ १० ॥

सफेद लोध को अथवा हड़ को घी में भून कर बिडालक नाम लेप करना चाहिए। सुश्रुत ने नेत्रों के बाहर चारों ओर लेप करने को बिडालक कहा है ॥ १० ॥

गिरिमृच्चन्दननागरखटिकावचयोजितो बहिर्लेपः। कुरुते अथवा मिश्रो लोचनमगदं न सन्देहः ॥ ११ ॥

गेरू, लालचन्दन, सोंठ, खड़िया और वच; इनका आँखों के बाहर लेप करने से निःसन्देह आँखें रोगरहित हो जाती हैं ॥ ११ ॥

भूम्यामलकी घृष्टा सैन्धवयुग्वारियोजिता ताम्रे। शस्ता घनतरमक्ष्णोर्जयति बहिर्लेपतः पीडाम् ॥ १२ ॥

साम्रामाभिष्यन्दे भूम्यामलकीमूलं ताम्रभाजने काञ्जिकसैन्धवयोगेन घृष्टं घनीभूतं चक्षुषि लेपात् पीडां हरति।

भुईआँवला की जड़ और सेंधानमक को तांबे के पात्र में कांजी से घिसे, जब गाढ़ा हो जाय तब आँखों के बाहर उसका लेप करने से आँखों की पीड़ा शान्त हो जाती है ॥ १२ ॥

आश्च्योतन।

आश्च्योतनं मारुतजे क्वाथो बिल्वादिभिर्हितः। कोष्णः सैरण्डबृहतीतर्कारीमधुशिग्रुभिः ॥ १३ ॥

वातज अभिष्यन्द में बिल्वादि पंचमूल के क्वाथ की किंचित् गरम-गरम बूँदें आँख में टपकावे अथवा अरण्डमूल, बड़ी कटेरी, अरणी और लाल सहिंजन की जड़ के क्वाथ की गरम-गरम बूँदें टपकावे तो हितकर है। अथवा बिल्वादि और अरण्डमूलादि के मिश्रित क्वाथ का आश्च्योतन[1] करना चाहिए ॥ १३ ॥

एरण्डपल्लवे मूले त्वचि वाजपयःशृतम्। कण्टकार्याश्च मूलेषु सुखोष्णं सेचने हितम् ॥ १४ ॥

अरण्ड के पत्ते, जड़ और छाल तथा कटेरी की जड़ को बकरी के दूध में पकाकर सुहाते हुए गरम-गरम दूध की बूँदें आँखों में डालने से अभिष्यन्दरोग शान्त होता है ॥ १४ ॥

अञ्जन

सम्पक्वेऽक्षिगदे कार्यमञ्जनादिकमिष्यते। प्रशस्तवर्त्मता चाक्ष्णोः संरम्भाश्रुप्रशान्तता ॥ १५ ॥ मन्दवेदनता कण्डूः पक्वाक्षिगदलक्षणम्। अञ्जनादिविधिश्चाग्रे निखिलेनाभिधास्यते ॥ १६ ॥

जब नेत्ररोग अच्छी तरह पक जाय तब अंजन आदिक क्रिया करनी चाहिए। नेत्ररोग की परिपक्वावस्था में पलकों में कीचड़ आदि नहीं रहता है, सूजन और आँसू बहना शान्त हो जाता है, पीड़ा कम हो जाती है तथा खुजली

1—'क्षाणविवृतस्याक्षिबिन्दूनां पातनम् द्व्यङ्गुलोन्मीलिते नेत्रे प्रोक्तमाश्च्योतनं हि तत्॥ बिन्दवोऽष्टौ लेखनेषु रोपणे दश बिन्दवः। स्नेहने द्वादश प्रोक्तास्ते शीते कोष्णरूपिणः॥ उष्णे तु शीतरूपाः स्युः सर्वत्रैवं विनिश्चयः। आश्च्योतनमात्रां सर्वेषां मात्रा स्याद्वाक्शतोन्मिता॥" इति भावमिश्रः

चलने लगती है। ये पक्ष्मशिरोग के लक्षण हैं। अब अञ्जन आदि की विधि आगे कहेंगे ॥ १२-१६ ॥

बृहत्येरण्डमूलत्वक् शिग्रोर्मूलं ससैन्धवम्। अजाक्षीरेण पिष्टं स्याद्वर्त्तिर्वाताक्षिरोगनुत् ॥ १७ ॥

बड़ी कटेरी की जड़, अरण्ड के मूल की छाल, सहिजन की जड़ और सेंधानमक, इनको बकरी के दूध में पीसकर बत्ती बनाकर आँखों में अंजन लगाना वातज नेत्र रोग को दूर करता है ॥ १७ ॥

हरिद्रे मधुकं द्राक्षां देवदारु च पेषयेत्। आजेन पयसा श्रेष्ठमभिष्यन्दे तदञ्जनम् ॥ १८ ॥

हल्दी, दारुहल्दी, मुलैठी, मुनक्का और देवदारु; इनको बकरी के दूध में पीसकर बत्ती बनाकर अंजन लगाने से अभिष्यन्द रोग में लाभ होता है ॥ १८ ॥

कज्जल।

संशुष्कोपरसान्वितक्रकरसेनाभूष्य गण्डूपदान्, लाक्षारञ्जिततूलवर्त्तिनिहितान् यष्टीमधून्मिश्रितान्। प्रज्वाल्योत्तमसर्पिषानलशिखासन्तानजं कज्जलं, दूरासन्ननिशान्ध्यकाचतिमिरप्रध्वंसकृच्चोदितम् ॥ १९ ॥

मरे हुए गण्डूपदी (केंचुओं) को इकट्ठा करके भंगरैया (लाक्षारस) से भावना दे। पश्चात् इस चूर्ण में समपरिमाण मुलहटी का चूर्ण मिला लाक्षारस से रंगी हुई रुई में इन बत्ती बनावे। इस बत्ती को गाय के घृत से अच्छी तरह भिगोकर एक किनारे आग लगावे; इसकी अग्निशिखा से उत्पन्न काजल को काँच के पात्र में इकट्ठा करे। इस काजल को आँख में लगाने से दूरान्ध्य (दूर की वस्तु न दीखना), आसन्नान्ध्य (समीप की वस्तु न दीखना), रतौंधी, काचरोग तथा तिमिर आदि रोग नष्ट होते हैं ॥ १९ ॥

पूर्ववर्त्ति।

गैरिकं सैन्धवं कृष्णा नागरञ्च यथोत्तरम्। पिष्टं द्विरंशतोऽद्भिर्वा गुडिकाञ्जनमिष्यते ॥ २० ॥

गेरू १ तोला, सेंधानमक २ तोले, पीपरि ४ तोले और नागर ८ तोले; इनको जल में घोटकर गोली बना ले। इसका अंजन करने से अभिष्यन्द रोग अच्छा होता है ॥ २० ॥

प्रपौण्डरीकयष्ट्याह्वनिशामलकपद्मकैः। शीतैर्मधुसमायुक्तैः सेकः पित्ताक्षिरोगनुत् ॥ २१ ॥

पुंडरिया, मुलेठी, हल्दी, आँवला और पद्माख, इनके काढ़े में शहद मिलाकर ठंढा होने पर आश्च्योतन करने से पित्तज नेत्ररोग नष्ट होता है ॥ २१ ॥

पचेत्तु गौधं हि यकृत् प्रकल्पितं सुपूरितं मागधिकाभिरम्बुना। निषेवितं तद्यकृदञ्जनेन निहन्ति नक्तान्ध्यमसंशयं खलु ॥ २२ ॥

गोह के यकृत् को फाड़कर भीतर में पिप्पली भर जल में पकावे। ठीक तरह से स्वेदित हो जाने पर पिप्पली की पहले की तरह बत्ती बनावे। इस बत्ती के अंजन से तथा उबाले हुए यकृत् के खाने से रात्र्यन्ध (रतौंधी) अच्छी हो जाती है ॥ २२ ॥

दध्ना निघृष्टं मरिचं रात्र्यन्धाञ्जनमुत्तमम्। ताम्बूलयुक्तं खद्योतभक्षणञ्च तदर्थकृत् ॥ २३ ॥

दही में कालीमिर्च को घिसकर अञ्जन करने से रात्र्यन्ध नष्ट होता है। पान के पत्ते के साथ खद्योत (जुगनू) को खाने से भी रात्र्यन्ध्य नष्ट होता है ॥ २३ ॥

शफरीमत्स्यप्रकारो नक्तान्ध्यमञ्जनाद्विनिहन्ति। तद्वद्गोमयरसगैरिकमलज्यैर्वा कृतो मधुना ॥ २४ ॥

शफरी नामक मछली को अन्तर्धूम दग्ध कर शहद के साथ अञ्जन करने से, तथा हींग, सुहागा, कर्णमल ( कान की मैल ) इनमें से किसी एक को शहद के साथ आँजने से नक्तान्ध्य ( रतौंधी रोग ) दूर होता है ॥ २४ ॥

केशराजान्वितं सिद्धं मत्स्याण्डं हन्ति भक्षितम्। नक्तान्ध्यं नियतं नृणां सप्ताहात्पथ्यसेविनाम् ॥ २५ ॥

केशराज तथा रोहू मछली के अण्डों को एकत्र कर काँजी में सिद्धकर खाने से तथा इसके साथ ही यथावत् पथ्य के सेवन से सात दिन में ही रतौंधी नष्ट होती है ॥ २५ ॥

द्राक्षामधुकमञ्जिष्ठाजीवनीयैः शृतं पयः। प्रातराश्च्योतनं शस्तं शोथशूलाक्षिरोगिणाम् ॥ २६ ॥

मुनक्का, मुलेठी, मंजीठ और जीवनीयगण की समस्त ओषधियों से सिद्ध दूध का प्रातःकाल आश्च्योतन करने से शोथ, शूल और नेत्ररोग नष्ट होते हैं ॥ २६ ॥

निम्बस्य पत्रैः परिलिप्य लोध्रं स्वेदाग्निना चूर्णमथापि कल्कम्। आश्च्योतनं मानुषदुग्धयुक्तं पित्तास्रवातापहमग्र्यमुक्तम् ॥ २७ ॥

लोध के चूर्ण या कल्क को पिसे हुए नीम के पत्तों के गोले में रखकर अग्नि पर पकावे। फिर इसको निकालकर स्त्री के दूध में मिला वस्त्र से छान कर इसकी बूँदें आँख में छोड़े तो पित्तज, रक्तज और वातज अभिष्यन्द रोग नष्ट हों ॥ २७ ॥

कफजे लङ्घनं स्वेदो नस्यं तिक्तान्नभोजनम्। तीक्ष्णैः प्रधमनं कुर्यात् तीक्ष्णैश्चैवोपनाहनम् ॥ २८ ॥

कफज अभिष्यन्द में लङ्घन, स्वेदन, नस्य, तिक्त अन्नों का भोजन तथा तीक्ष्ण ओषधों से नस्य एवं प्रलेप करना चाहिए ॥ २८ ॥

फणिज्झकास्फोतकपित्थबिल्वपत्तूरपीलुसुरसार्जकपत्रैः। स्वेदं विदध्यादथवा प्रलेपं बर्हिष्ठशुण्ठीसुरदारुकुष्ठैः ॥ २९ ॥

पलाश की छाल, कोयल, कैथ, बेल, पतंग, पीलू, ( जाल नामक वृक्ष ), काली तुलसी, सँभालू और भाँग, इनके पत्ते गर्म-गर्म बाँध कर पसीना दे अथवा सुगन्धबाला, सोंठ, देवदारु और कूट; इनका लेप करे तो कफज नेत्र रोग नष्ट हो ॥ २९ ॥

शुण्ठीनिम्बदलैः पिण्डः सुखोष्णैः स्वल्पसैन्धवैः। धार्यश्चक्षुषि संक्षेपाच्छोथकण्डूव्यथापहः ॥ ३० ॥

सोंठ, नीम के पत्ते और थोड़ा-सा सेंधानमक इनको महीन पीसकर गरम करके टिकिया बनावे और आँख पर बाँधे; इससे शोथ, खुजली और पीड़ा दूर हो जाती है ॥ ३० ॥

वल्कलं पारिजातस्य तैलकाञ्जिकसैन्धवम्। कफोद्भूताक्षिशूलघ्नं तरुघ्नं कुलिशं यथा ॥ ३१ ॥

पारिजात ( फरहद ) की छाल, तेल, काँजी और सेंधानमक; इनकी पिण्डी बनाकर आँख पर बाँधे तो कफज नेत्ररोग इस प्रकार नष्ट होता है जैसे वज्र के प्रहार से वृक्ष ॥ ३१ ॥

ससैन्धवं लोध्रमथाज्यभृष्टं सौवीरपिष्टं सितवस्त्रबद्धम्। आश्च्योतनं तन्नयनस्य कार्यं कण्डूञ्च दाहञ्च रुजाञ्च हन्यात् ॥

सेंधानमक और लोध को घी में भूनकर काँजी में पीस के फिर सफेद कपड़े में बाँध कर आँखों में निचोड़ने से खुजली, जलन और पीड़ा नष्ट होती है ॥ ३२ ॥

स्निग्धैरुष्णैश्च वातोत्थः पित्तजो मृदुशीतलैः। तीक्ष्णरूक्षोष्णविशदैः प्रशाम्यति कफात्मकः। तीक्ष्णोष्णमृदुशीतानां व्यत्यासात् सान्निपातिकः ॥ ३३ ॥

वातज नेत्ररोग, स्निग्ध और उष्ण क्रिया

द्वारा, पित्तज नेत्ररोग कोमल और शीतल क्रिया द्वारा तथा कफज नेत्ररोग तीक्ष्ण, उष्ण और स्वच्छ क्रिया द्वारा शान्त होता है। एवं सान्निपातज नेत्ररोग तीक्ष्ण, उष्ण, कोमल और शीतल क्रियाओं के उलट फेर करने से अर्थात् तीक्ष्ण के पश्चात् तद्विपरीत मृदु क्रिया और उष्ण के पश्चात् तद्विपरीत शीतल क्रिया करने से शान्त होता है ॥ ३३ ॥

तिरीटत्रिफलायष्टीशर्करामद्रमुस्तकैः। पिष्टै शीताम्बुना सेको रक्ताभिष्यन्दनाशनः ॥ ३४ ॥

लोध, त्रिफला, मुलेठी, खाँड और नागरमोथा; इनको समभाग ले पीसकर शीतल जल में मिलाकर आँखों का सिंचन करने से रक्ताभिष्यन्द नष्ट होता है ॥ ३४ ॥

कशेरुमधुकानाञ्च चूर्णमम्बरसंवृतम्। न्यस्तमप्स्वन्तरीक्षासु हितमाश्च्योतने भवेत् ॥ ३५ ॥

कसेरु और मुलेठी के चूर्ण को कपड़े की पोटली में बाँधकर वर्षा के जल में रक्खे। पश्चात् इस जल का आश्च्योतन करना हितकर होता है ॥ ३५ ॥

दार्वी पटोलं मधुकं सनिम्बं पद्मकोत्पलम्। प्रपौण्डरीकं चैतानि पचेत्तोये चतुर्गुणे ॥ ३६ ॥ विपाच्य पादशेषं तु तत् पुनः कुडवं पचेत्। शीतीभूते तत्र मधु दद्यात् पादांशिकं ततः। रसक्रियैषा दाहाश्रुरागशोथरुजापहा ॥ ३७ ॥

दारुहल्दी, परवल के पत्ते, मुलेठी, नीम की छाल, पद्माख, नीलकमल और पुंडरिया; इनको चौगुने जल में पकावे। जब चतुर्थांश जल बाकी रहे तब उतारकर छान ले। फिर अग्नि पर पकाकर गाढ़ा करे। पश्चात् ठंढा होने पर उसका चतुर्थांश शहद मिलाकर इस रसक्रिया का लेप करे। यह दाह, अश्रुपात, लाली, शोथ और पीड़ा को नष्ट करती है ॥ ३६-३७ ॥

तिक्तस्य सर्पिषः पानं बहुशश्च विरेचनम् ॥ ३८ ॥ अक्ष्णोरपि समन्ताच्च पातनं तु जलौकसः। पित्ताभिष्यन्दशमनो विधिश्चाप्युपपादितः ॥ ३९ ॥

पटोलादि तिक्त घृत का पान, बार-बार विरेचन लेना और आँखों के चारों ओर जोंक लगवाना; यह विधि पित्ताभिष्यन्द को शान्त करनेवाली है ॥ ३८-३९ ॥

शिग्रुपल्लवनिर्यासः सुघृष्टस्ताम्रसम्पुटे। घृतेन धूपितो हन्ति शोथघर्षाश्रुवेदनाः ॥ ४० ॥

सहचरपुष्करवेतसमूलं विकङ्कतदारुकुलत्थसमम् । जलमत्र ससैन्धवहिंगुयुतं सद्यो ज्वरसूतिकशूलहरम् ॥ ३६४ ॥

पियाबांसा की जड़, पोहकरमूल, बेंत की जड़, विकंकत (कंटाई) की जड़, देवदारु और कुलथी; सब मिलित २ तोले लेकर ३२ तोले जल में औटावे । जब ८ तोले क्वाथ शेष रहे तब छानकर उसमें अन्दाज से थोड़ा सा सेंधा नमक और हींग मिलाकर पीने से सूतिका के ज्वर और शूल शीघ्र नष्ट होते हैं ॥ ३६४ ॥

दशमूलीकृतः क्वाथः साज्यः सूतिरुजापहः ॥ ३६५ ॥

दशमूल के क्वाथ में घृत डालकर पीने से सूतिकारोग नष्ट होता है ॥ ३६५ ॥

सूतिकादशमूल ।

शालपर्णी पृश्निपर्णी बृहतीद्वयगोक्षुरम् । दासी प्रसारणी विश्वं गुडूचीमुस्तकं तथा ॥ निहन्ति सूतिकारोगं ज्वरं दाहसमन्वितम् ॥ ३६६ ॥

शालपर्णी, पृश्निपर्णी, छोटी कटेरी, बड़ी कटेरी, गोखरू, नीली कटसरैया, प्रसारणी, सोंठ, गिलोय और नागरमोथा; इनका क्वाथ पीने

से ज्वर और दाहयुक्त सूतिकारोग नष्ट होता है ॥ २६६ ॥

सहचरादि क्वाथ ।

सहचरमुस्तगुडूचीभद्रोत्कटविश्वपालकैः क्वथितम् । पेयमिदं मधुमिश्रं सद्यो ज्वरशूलनुत् सूत्याः ॥ ३६७ ॥

पियाबासा, नागरमोथा, गिलोय, प्रसारणी, सोंठ और सुगन्धबाला ; इनके क्वाथ में शहद मिलाकर पीने से प्रसूतिका का ज्वर और शूल शीघ्र नष्ट होता है ॥ ३६७ ॥

सहचरकृतः क्वाथः पिप्पलीचूर्णसंयुतः । दीपनो ज्वरदोषामसूतिकारोगनाशनः ॥ ३६८ ॥

पियाबासा की जड़ के क्वाथ में पीपल का चूर्ण मिलाकर पीने से अग्नि प्रदीप्त तथा ज्वर, आमदोष और सूतिकारोग नष्ट होता है ॥ ३६८ ॥

पीतकुरण्टकथितं रजनीपर्युषितं पीतमपहरति । सूतिरोगान् सहस्रं तन्मूलं चर्वितं तद्वत् ॥ ३६९ ॥

पियाबासा की जड़ के क्वाथ को रात भर बासा रक्खे, फिर प्रातःकाल ही उसका पान करे तो सूतिका के हजारों रोग नष्ट हों । इसकी जड़ को चबाने से भी यही फल होता है ॥ ३६९ ॥

पञ्चकाञ्जिक ।

पिप्पली पिप्पलीमूलं चव्यं शुण्ठी यमानिका । जीरके द्वे हरिद्रे द्वे विडं सौवर्चलं तथा ॥ ३७० ॥ एतैरेवौषधैः पिष्टैरारनालं विपाचयेत् । एतदामहरं वृष्यं कफघ्नं वह्निदीपनम् ॥ ३७१ ॥ काञ्जिकं पञ्चकं नाम स्त्रीणामग्निविवर्द्धनम् । मक्कल्लशूलशमनं परं क्षीराभिवर्द्धनम् ॥ क्षीरपाकविधानेन काञ्जिकस्यापि साधनम् ॥ ३७२ ॥

पीपल, पीपलामूल, चव्य, सोंठ, अजवायन, सफेद जीरा, काला जीरा, हल्दी, दारुहल्दी, विड नमक और कालानमक, मिलित २ तोले । काँजी ८ तोले और जल ३२ तोले । सबको एकत्र कर पकावे । जब काँजीमात्र अवशेष रह जाय तब उतारकर छान ले । सेवन करने से यह पञ्चकाञ्जिक आमदोष तथा कफ को नष्ट करता एवं वृष्य और अग्नि को दीप्त करनेवाला है । यह स्त्रियों की अग्नि को दीपन कर मक्कल्लशूल ( अर्थात् प्रसूता के हृदय, शिर और बस्ति के शूल ) को शान्त करता और दूध को बढ़ाता है । क्षीरपाक की विधि से काँजी को सिद्ध कर लेना चाहिए ॥ ३७०-३७२ ॥

भद्रोत्कटाद्यवलेह ।

भद्रोत्कटतुलाक्वाथे पादशेषे विनिक्षिपेत् । शर्करायाः पलं त्रिंशत् चूर्णानीमानि दापयेत् ॥ ३७३ ॥ वत्सकं धान्यकं मुस्तमुशीरं बिल्वमेव च । शाल्मलीवेष्टकं चैव पिप्पलीमरिचानि च ॥३७४॥ बला चातिविषा मांसी ह्रीबेरं सदुरालभम् । एषां च पलिकैर्भागैश्चूर्णैरेनं समाचरेत् ॥ ३७५ ॥ संग्रहग्रहणीं हन्ति सूतिकां च सुदुस्तराम् । वह्निं च कुरुते दीप्तं शूलानाहविबन्धनुत् ॥ ३७६ ॥

भद्रोत्कट ( प्रसारिणी, खीप ) ५ सेर, जल २५ सेर ४८ तोले मिलाकर क्वाथ करे । ६ सेर ३२ तोले क्वाथ अवशिष्ट रहने पर शक्कर डालकर पकावे । जब गाढ़ा होने लगे तब इन्द्रजव, धनियाँ, नागरमोथा, खस, बेलगिरी, मोचरस, पीपल, कालीमिर्च, खरैटी, अतीस, जटामांसी, सुगन्धबाला और जवासा; प्रत्येक चार-चार तोले लेकर कूट-पीसकर उसमें छोड़ दे और अच्छी तरह करछी से मिला दे । जब अवलेह सिद्ध हो जाय तब उतारकर रख ले । यह अवलेह संग्रहणी, कठिनतर सूतिका रोग, शूल, आनाह, मलबन्ध आदि रोगों को नष्ट तथा अग्नि को दीप्त करता है ॥ ३७३-३७६ ॥

भद्रोत्कटाद्यघृत।

समूलपत्रशाखं तु शतं भद्रोत्कटस्य च। वारिद्रोणेन संसाध्यं स्थाप्यं पादावशेषितम् ॥ ३७७ ॥ घृतप्रस्थं विपक्तव्यं गर्भं दत्वा तु कार्षिकम्। सव्योषं पिप्पलीमूलं चित्रकं जीरकं तथा ॥ ३७८ ॥ पञ्चमूलं कनिष्ठं च रास्नैरण्डसमन्वितम्। यवानी सिन्धु यवक्षारं स्वर्जिका कृष्णजीरकम् ॥ ३७९ ॥ सिद्धमेतद्घृतं सद्यो निहन्यात् सूतिकामयान्। ग्रहणीं पाण्डुरोगं च अर्शांसि विविधानि च। अग्निं च कुरुते दीप्तं स्त्रीणां स्तन्यविशोधनम् ॥ ३८० ॥

जड़, पत्ते और शाखासहित भद्रोत्कट (प्रसारिणी) ४ सेर, क्वाथार्थ जल १२ सेर ४८ तोले। अवशिष्ट क्वाथ ६ सेर ३२ तोले। घृत १२८ तोले। कल्क के लिए—सोंठ, मिर्च, पीपल, पीपलामूल, चीता की जड़, जीरा, लघु पंचमूल, रास्ना, अरण्ड की जड़, खरैंटी, सेंधा नमक, जवाखार, सज्जीखार और काला जीरा; प्रत्येक एक-एक तोला। विधि से घृत सिद्ध कर सेवन करने से शीघ्र ही सूतिकारोग नष्ट होते हैं। यह भद्रोत्कटघृत ग्रहणी, पाण्डुरोग और सब प्रकार की बवासीरों को नष्ट कर अग्नि को दीप्त एवं स्त्रियों के दूध को शुद्ध करता है ॥ ३७७-३८० ॥

सौभाग्यशुण्ठीमोदक

कशेरुशृङ्गाटकपद्मकमुस्तं द्विजीरकं जातिफलं सकोषम्। लवङ्गशैलेयसनागपुष्पं पत्रं वराङ्गं शटि धातकी च ॥ ३८१ ॥ एला शताह्वा धनिकेभपिप्पली सपिप्पली शोषणका शतावरी। प्रत्येकमेषामिह कर्षयुग्मं लौहं तथाभ्रं पलभागयुक्तम् ॥ ३८२॥ महौषधाच्चूर्णपलानि चाष्टौ पलानि त्रिंशत्सितशर्करायाः। पलानि चाष्टावपि सर्पिषश्च प्रस्थद्वयं क्षीरमिह प्रयुक्तम् ॥ ३८३॥ पचेद्विधिज्ञः परमादरेण खादेदिदं शाणमथापि कोलम। कर्षान्वितं वापि समीक्ष्य शस्तं सौभाग्यशुण्ठी कथिता भिषग्भिः ॥ अग्निप्रदा सूतिगदापहा च सर्वातिसारग्रहणीहरा च ॥ ३८४ ॥

सोंठ का चूर्ण ३२ तोले लेकर ३ सेर १६ तोले दूध में पकावे, जब खोवा तैयार हो जावे तब उसको ३२ तोले घृत में भून ले। पश्चात् १२० तोले शक्कर की चाशनी में डाल कर पकावे। जब पाक तैयार हो जावे तब कसेरू, सिंघाड़ा, कमलगट्टा, नागरमोथा, काला जीरा, सफेद जीरा, जायफल, जावित्री, लवङ्ग, छरछरीला, नागकेशर, तेजपात, दालचीनी, कचूर, धाय के फूल, छोटी इलायची, सौंफ, धनिया, गजपीपरि, कालीमिर्च और शतावरी; प्रत्येक दो-दो तोला तथा अभ्रकभस्म और लौह भस्म प्रत्येक दो-दो तोले उसमें मिलाकर उतार ले। इसकी मात्रा आधे तोले से २ तोले तक बलानुसार खानी चाहिए। वैद्यवरों की कही हुई यह सौभाग्यशुण्ठी जठराग्नि को प्रबल कर सूतिकारोगों, सब प्रकार के अतिसार और संग्रहणी रोगों को नष्ट करती है ॥ ३८१-३८४ ॥

सौभाग्यशुण्ठीमोदक।

त्रिकटुत्रिफलाजाजी चातुर्जातकमुस्तकम्। जातीकोषफलं धान्यं लवङ्गं शतपुष्पिका ॥ ३८५ ॥ नलिकामादनफलं यमानीद्वयधातकी। शतावरी तालमूली लोध्रं वारणपिप्पली ॥ ३८६ ॥ पियालबीजममृता कर्पूरं चन्दनद्वयम्। कर्षप्रमाणान्येतेषां श्लक्ष्णचूर्णानि कारयेत् ॥ ३८७ ॥ नागरस्य च चूर्णस्य प्रस्थद्वयमितं क्षिपेत्। दृढे च मृण्मये पात्रे पाचयेन्मृदुनाग्निना ॥ ३८८ ॥ यत्नतः पाकविद्वैद्यो गुडिकां कारयेत्ततः। घृतमष्टपलं दद्यात् क्षीरप्रस्थ-

द्वयं तथा ॥ ३८९ ॥ सार्द्धप्रस्थद्वयञ्चात्र शर्करायास्ततः क्षिपेद् । भक्षयेत्प्रातरुत्थाय अजाक्षीरं पिबेदनु ॥ ३९० ॥ आमवातं निहन्त्याशु कासं श्वासं सपीनसम् । ग्रहणीमम्लपित्तं च रक्तपित्तं क्षयं क्षतम् ॥ ३९१ ॥ स्त्रीरोगान् विंशतिं चैव तत्क्षणादेव नाशयेत् । अहन्यहनि च स्त्रीणां स्तनदार्ढ्यकरं परम् ॥ सौभाग्यजननं तासां पुष्टिदं धातुवर्द्धनम् ॥ ३९२ ॥

त्रिकटु ( सोंठ, मिर्च, पीपरि ), त्रिफला ( हड़, बहेड़ा, आँवला ), जीरा, चातुर्जात ( छोटी इलायची, दालचीनी, नागकेशर, तेजपात ), नागरमोथा, जायफल, जावित्री, धनिया, लवंग, सोये के बीज, नखिका ( सुगन्धिद्रव्य ), मैनफल, अजवायन, अजमोद, धाय के फूल, शतावरी, मूसली पठानी लोध, गजपीपल, चिरौंजी, गिलोय, कपूर, लालचन्दन और सफेद-चन्दन ; प्रत्येक एक-एक तोला लेकर इसका महीन चूर्ण कर ले । फिर १२८ तोले सोंठ के चूर्ण को ३ सेर १६ तोले दूध में डालकर मजबूत मिट्टी के पात्र में मन्दाग्नि से पकावे । जब पककर खोवे के तुल्य हो जाय तब १२ तोले घी का पुट डालकर भून ले । पश्चात् २ सेर शक्कर की चाशनी में इसको डालकर पकावे । जब पाक सिद्ध हो जाय तब उपर्युक्त चूर्ण डालकर करछी से अच्छी तरह मिला दें और ठंडा करके लड्डू बना ले । मात्रा–आधे तोले से २ तोले । प्रातःकाल इसका सेवन कर ऊपर से बकरी का दूध पीना चाहिए । यह आमवात, श्वास, खाँसी, पीनस, ग्रहणी, अम्लपित्त, रक्तपित्त, क्षय, उरःक्षत तथा स्त्रियों के २० प्रकार के रोगों को शीघ्र ही नष्ट करता है । यह सौभाग्यशुंठीमोदक दिन-दिन स्त्रियों के स्तनों को दृढ़, शरीर को पुष्ट करता तथा सौभाग्य और धातुओं को बढ़ाता है ॥३८४-३९२॥

## बृहत्सौभाग्य शुण्ठी ।

महौषधं समादाय चूर्णयित्वा विधानतः । पलषोडशिकं नीत्वा क्षीरे दशगुणे पचेत् ॥ ३९३ ॥ क्रमेण पाकशुद्धिः स्याद् घृतप्रस्थे च भर्जयेत् । लघुपाकः प्रकर्तव्यो न खरो मोदकेष्वपि ॥ ३९४ ॥ शतावरी विदारी च मूशली गोक्षुरो बला । त्रिक्षारस्त्वं शताह्वा च जीरकौ व्योषचित्रकौ ॥ ३९५ ॥ त्रिसुगन्धियमानी च तालीशं कारवी शिशिः । रास्ना पुष्करमूलं च वांशी दारु शताह्वयम् ॥ ३९६ ॥ शटी मांसी वचा मोचत्वक्पत्रं नागकेशरम् । जीवन्ती मेथिका यष्टी चन्दनं रक्तचन्दनम् ॥ ३९७ ॥ कृमिघ्नं तोयसिंहास्यधन्याकं कट्फलं घनम् । कर्षद्वयमितं भागं प्रत्येकं पटघर्षितम् ॥ ३९८ ॥ सर्वचूर्णाद् द्विगुणिता प्रदेया सितशर्करा । युक्त्या पाकविधानज्ञो मोदकं परिकल्पयेत् ॥ ३९९ ॥ शुद्धे भाण्डे निधापाथ खादेन्नित्यं यथाबलम् । वीर्याग्निबलकोऽप्यञ्च नारीणाञ्च विशेषतः ॥ ४०० ॥ क्षौद्राद्युपानतः प्रातः गुरुदेवान् समर्चयेत् । तद्वयर्यं बल्यमायुष्यं वलीपलितनाशनम् ॥ ४०१ ॥ वयसः स्थापनं मोक्षमग्निदीपकरं परम् । तृष्याग्रामतितृष्यञ्च रसायनमिदं शुभम् ॥ ४०२ ॥ विशेषात् स्त्रीगदे मोक्षं ममृतानां यथामृतम् । विंशतिर्व्यापदो योनेः प्रदरं पञ्चधापि च ॥ ४०३ ॥ योनिदोषहरं स्त्रीणां रजोदोषहरं तथा । पापसंसर्गजं दोषं नाशयेदत्र संशयः ॥ ४०४ ॥ आमवातहरञ्चैव शिरःशूलनिवारणम् । सर्वशूलहरञ्चैव विशेषात् कटिशूलनुत् ॥

४०५ ॥ वीर्यवृद्धिकरं पुंसां सूतिकातङ्कनाशनम् । वातपित्तकफोद्भूतान् द्वन्द्वजान् सन्निपातजान् ॥ ४०६ ॥ हन्ति सर्वगदानेषा शुण्ठी सौभाग्यदायिनी । सौभाग्यदायिनी स्त्रीणामतः सौभाग्यशुण्ठिका ॥ ४०७ ॥

सोंठ का चूर्ण १४ तोले ८ सेर दूध में पकावे। पक जाने की तरह गाढ़ा हो जाय तब १२८ तोले घी में भून ले, पश्चात् २ सेर १२ तोले खाँड की चाशनी में पकावे। जब लगभग पक चुके तब शतावर, विदारीकन्द, मूसली, गोखरू, तरेंटी, गिलोय का सत, लोधा, सफेद जीरा, काला जीरा, त्रिफला, चित्रक, तुगाक्षीरी, छोटी इलायची, तेजपात, नागकेशर, तालीशपत्र, अजमोदा, सौंफ, रास्ना, पोहकरमूल, गजपीपल, देवदारु, लोधा, कपूर, जटामांसी, बच, मोचरस, शालपर्णी, तेजपात, नागकेशर, जीवन्ती, मेथीबीज, मुलेठी, सफेद चन्दन, लाल चन्दन, वायविडङ्ग, गन्धबाला पहुआ की छाल धनिया, कट्फल, मोथा; हर एक के ४ तोले चूर्ण को उसमें डाल दे और अच्छी प्रकार मिला नीचे उतार ले। इसमें पाक मृदु करना चाहिए। मोदक आदि के पाक में खरपाक नहीं करना चाहिए। पाक करने के पश्चात् लड्डू बना ले और शुद्ध बर्तन में रक्खे। मात्रा—आधे तोले से २ तोले तक गुरु और देवताओं की पूजा करके उपयुक्त मात्रा में शहद के साथ सेवन करना चाहिए। यह वर्णकारक, बलकारक, आयुर्वर्धक, वीर्यवर्धक, वय स्थापक तथा अग्नि की वृद्धि करता है। यह विशेषतः सूतिकारोग में अत्यन्त लाभदायक है। इसके सेवन से योनिरोग, प्रदर, योनिदोष, आर्त्तवदोष, आमवात, शिरोवेदना सम्पूर्ण शूल, कमर का दर्द आदि रोग नष्ट होते हैं। सम्पूर्ण वातजन्य, पित्तजन्य, कफजन्य द्वन्द्वज तथा सन्निपातजन्य रोगों को नाश करता है। यह सुन्दरसौभाग्यशुण्ठी स्त्रियों के सौभाग्य को बढ़ाती है॥ ३९२-४०७॥

### प्रताप लङ्केश्वर।

एकेन्दुचन्द्राऽनलशर्वाधि काष्ठा, फलैकभागैः क्रमशो विमिश्रम्। सूताऽभ्रगन्धोषण लोह शङ्ख वन्योत्पला भस्म विषं सुपिष्टम् ॥ ४०८ ॥ प्रसूति वाताऽनिल दन्त बन्ध मार्द्राम्बुना घोर सुसन्निपातान् पुराघृताऽऽर्द्रत्रिफला युतोऽयं गुदाऽङ्कुरान् वल्लमितो निहन्ति ॥४०९॥ निजानुपानैर्निजपथ्य युक्त्या सर्वाऽतिसार ग्रहणी गदांश्च प्रताप लङ्केश्वर नामधेयः सूतः प्रयुक्तो गिरिराज पुत्र्या ॥ ४१० ॥

शुद्ध पारा १ भाग अभ्रकभस्म १ भाग शुद्ध गन्धक १ भाग मरिच ३ भाग लोहभस्म ४ भाग शङ्खभस्म ८ भाग जंगली आरनों की राख १६ भाग शुद्ध विष मा लेकर सबको महीन पीसकर कज्जली में मिलाकर रख दे। इनमें से २-३ रत्ती अदरख के रस के साथ देने से प्रसूतिवात धनुर्वात दाँती भिंच जाना कठिन सन्निपात आदि रोगों का विनाश करता है। यही रस शुद्ध गूगल गिलोय अदरक त्रिफला के साथ देने से बवासीर को नाश करता है। रोगानुसार अनुपान और पथ्यों के साथ लेने से सब अतिसार और ग्रहणी प्रभृति रोग मिट जाते हैं विशेष अनुभूत है॥ ४०८-४१० ॥

### सूतिकारि रस।

टङ्कणं मूर्च्छितं सूतं गन्धकं हेमसारकम्। जातीफलं तथा कोषं लवङ्गैला च धातकी ॥ ४११ ॥ वत्सकेन्द्रयवः पाठा भृङ्गी त्रियाजमोदिका। प्रसारणीरसैः कार्या गुडी गुञ्जाद्वयोन्मिता ॥ ४१२ ॥ भक्षयेत्तद्रसैः प्रातः सूतिकातङ्कशान्तये। जीर्णज्वरं हन्ति शोथं ग्रहणीरोगकासयुक् ॥ ४१३ ॥

सुहागा, मूर्च्छित पारा ( रससिन्दूर ), गन्धक, स्वर्णभस्म, चाँदी की भस्म, जायफल, जावित्री, लौंग, छोटी इलायची, धाय के फूल, कुड़ा की छाल, इन्द्रजौ, पाठ, काकड़ासिंगी, सोंठ, अजमोदा; इन्हें एकत्रकर प्रसारणी के रस में घोटकर दो-दो रत्ती की गोलियाँ बनावे। सूतिकारोग की शान्ति के लिये। गोली प्रसारणीरस के अनुपान से प्रातःकाल सेवन करावे। यह रस जीर्णज्वर, शोथ, ग्रहणी, प्लीहा तथा खाँसी को नष्ट करता है ॥ ४११-४१३ ॥

सूतिकाघ्न रस।

रसगन्धकलौहाभ्रं जातीकोषं सुवर्चलम्। समांशं मर्दयेत् खल्ले छागीदुग्धेन पेषयेत् ॥ ४१४ ॥ गुञ्जाद्वयममाणेन सूतिकातङ्कनाशनः। ज्वरातिसाररोगघ्नः कासश्वासातिसारनुत् ॥ ४१५ ॥ सूतिकाघ्नो रसो नाम ब्रह्मणा परिकीर्त्तितः ॥ ४१८ ॥

पारा, गन्धक, लोहभस्म, अभ्रकभस्म, जावित्री, सौंचल नमक; इन्हें बराबर मात्रा में मिलाकर बकरी के दूध से खरल में पीसकर दो-दो रत्ती की गोलियाँ बनावे। यह सूतिकारोग, ज्वरातिसार, खाँसी, श्वास तथा अतिसार रोग को नष्ट करता है ॥ ४१४-४१६ ॥

सूतिकान्तक रस।

रसाभ्रं गन्धकं व्योषं सुवर्णमाक्षिकं विषम्। सर्वमेकीकृतं चूर्णं खादेद् गुञ्जैकसम्मितम् ॥ ४१७ ॥ सूतिकाग्रहणीरोगं वह्निमान्द्यञ्च नाशयेत्। अतीसारञ्च शमयेदपि वैद्यविवर्जितम् ॥ ४१८ ॥ कासश्वासातिसारघ्नो वाजीकरण उत्तमः ॥

पारा, अभ्रकभस्म, गन्धक, त्रिकुटा, स्वर्णमाक्षिकभस्म, वत्सनाग; इन्हें बराबर मात्रा में एकत्र मिला ले। मात्रा—१ रत्ती। यह रस सूतिकारोग, ग्रहणी, मन्दाग्नि, दुःसाध्य अतीसार, खाँसी, श्वास आदि रोगों को नष्ट करता तथा वाजीकरण है ॥ ४१७-४१८ ॥

रसशार्दूल।

अभ्रं ताम्रं तथा लौहं राजपट्टं रसस्तथा। गन्धटङ्कमरीचञ्च यवक्षारं समांशकम् ॥ ४१९ ॥ तथात्र तालकञ्चैव त्रिफलायाश्च तोलकम्। तोलकञ्चामृतञ्चैव गुञ्जाद्वयमिता वटी ॥ ४२० ॥ ग्रीष्मसुन्दरकस्यापि नागवल्लीरसेन च। भावयेत् सप्तधा हन्ति ज्वरकासाद्यसंग्रहम् ॥ सूतिकातङ्कशोथादि स्त्रीरोगञ्च विनाशयेत् ॥ ४२१ ॥

अभ्रकभस्म, ताम्रभस्म, लोहभस्म, राजपट्ट ( कान्तपाषाण, चुम्बक पत्थर ), पारा, गन्धक सुहागा, कालीमिर्च, जवाखार, हरताल, त्रिफला, वत्सनाग, हर एक १ तोला। इन्हें एकत्र मिलाकर ग्रीष्मसुन्दर तथा पान के रस से पृथक्-पृथक् सात-सात भावना देकर दो-दो रत्ती की गोलियाँ बनावे। यह रस ज्वर, खाँसी, सूतिकारोग, शोथ तथा स्त्री रोगों को नष्ट करता है ४१९-४२१ ॥

महारस शार्दूल।

अभ्रकंपुटितं ताम्रं स्वर्णं गन्धञ्च पारदम्। शिला टङ्कं यवक्षारं त्रिफलायाः पलं पलम् ॥ ४२२ ॥ गरलस्य तथा ग्राह्यमर्द्धतोलकसम्मितम्। स्वगेलापत्रकञ्चैव जातीकोषलवङ्गकम् ॥ ४२३ ॥ मांसी तालीशपत्रञ्च माक्षिकञ्च रसाञ्जनम्। एषां द्विकार्षिकं भागं देयञ्चापि विचक्षणैः ॥ ४२४ ॥ द्रवे किञ्चित् स्थिते चूर्णे मरिचस्य पलं क्षिपेत्। भावना च प्रदातव्या पूर्वोक्तेन रसेन च ॥ ४२५ ॥ निहन्ति विविधान् रोगान् ज्वरान् दाहान् वमिं भ्रमिम्।

तथातिसारकञ्चैव वह्निमान्द्यमरोचकम् ॥ विशेषाद् गर्भिणीरोगं नाशयेदचिरेण च ॥ ४२६ ॥

अभ्रकभस्म, ताम्रभस्म, स्वर्णभस्म, गन्धक, पारा, मैनसिल, सुहागा, जवाखार, त्रिफला (मिश्रित), हरएक ४ तोले, वत्सनाभ आधा तोला; दालचीनी, इलायची, तेजपात, जावित्री, लौंग, जटामांसी, तालीसपत्र, स्वर्णमाक्षिकभस्म, रसौत हरएक २ तोले, इन्हें इकट्ठा मिला ले, फिर इसमें ग्रीष्मसुन्दर तथा पान के रस की अलग २ सात भावना दे। अन्त में जब चूर्ण कुछ गीला हो तब कालीमिर्च का चूर्ण ४ तोले डाल दे। मात्रा—२ रत्ती। यह ज्वर, दाह वमन, भ्रम, अतिसार, मंदाग्नि, अरुचि तथा गर्भिणीरोग को नष्ट करता है ॥ ४२२-४२६ ॥

महाभ्रवटी।

शतमभ्रञ्च लौहञ्च कुनटी ताम्रकं तथा। रसगन्धकटङ्कञ्च यवक्षारफलत्रिकम् ॥ ४२७ ॥ प्रत्येकं तोलकं ग्राह्यमूषणं पञ्चतोलकम्। सर्वमेकीकृतं चूर्णं प्रत्येकेन विभावयेत् ॥ ४२८ ॥ ग्रीष्मसुन्दरसिंहास्यनागवल्ल्या रसेन च। रक्तिकैकप्रमाणेन वटिकां कारयेद्भिषक् ॥ योजयेत्सर्वथा वैद्यः सूतिकारोगशान्तये ॥ ४२९ ॥

अभ्रकभस्म, लौहभस्म, मैनसिल, ताम्रभस्म, पारा, गन्धक, सुहागा, जवाखार, त्रिफला; हरएक १ तोला, कालीमिर्च ५ तोले; इन्हें एकत्र मिलाकर ग्रीष्मसुन्दर, अडूसा तथा पान के रस से घोटकर एक-एक रत्ती की गोलियाँ बनावे। यह गोली सूतिकारोग नष्ट करती है ॥ ४२७-४२९ ॥

सूतिकाभरण रस।

सुवर्णं रजतं ताम्रं प्रवालं पारदं समम्। गन्धकं चाभ्रकं तालं शिला त्रिकटु रोहिणी ॥ ४३० ॥ एतानि समभागानि रविक्षीरेण मर्दयेत्। चित्रमूलकषायेण पौनर्णवरसेन च ॥ ४३१ ॥ ततो लघुपुटे पाच्यं मूषायां धारयेत्पृथक्। अनुपानविशेषेण देयं गुञ्जार्द्धकं च तत् ॥ ४३२ ॥ सूतिकारोगमतुलं धनुर्वातं विशेषतः। त्रिदोषोत्थान् हरेद् व्याधीनिच्छापथ्यं प्रदापयेत् ॥ सूतिकाभरणं नाम सर्वरोगहरश्च तत् ॥ ४३३ ॥

सुवर्णभस्म, चाँदी की भस्म, ताम्रभस्म, मूँगाभस्म, पारा, गन्धक, अभ्रकभस्म, शुद्ध हरताल, शुद्ध मैनसिल, त्रिकुटा, कुटकी, इन्हें बराबर मात्रा में मिलाकर आक के दूध, चीता की जड़ के क्वाथ तथा साँठी के रस से क्रमशः घोटकर मूषा में बन्दकर लघुपुट दे। मात्रा—आधी रत्ती। इसमें दोष के अनुसार अनुपान की व्यवस्था देनी चाहिए। यह रस सूतिकारोग धनुर्वात तथा अन्य त्रिदोषजन्य रोगों को नष्ट करता है। पथ्य—इच्छानुसार भोजन ॥ ४३०-४३३ ॥

लक्ष्मीनारायण रस।

शुद्धगन्धकमेतञ्च टङ्कणं विषहिङ्गुलम्। रोहिण्यतिविषा कृष्णा वत्सकाभ्रकसैन्धवम् ॥ ४३४ ॥ एतानि समभागानि खल्लमध्ये विनिक्षिपेत्। दन्तिद्रावैः फलद्रावैर्मर्दयेच्च दिनत्रयम् ॥ ४३५ ॥ गुञ्जामितां वटीं कृत्वा आर्द्रकस्य जलैर्देत्। दोषज्वरे सन्निपाते विसूच्यां विषमज्वरे ॥ ४३६ ॥ अतिसारे ग्रहण्यां च रक्तामे मेहशूलजित्। सूतिकावातदोषघ्नो लङ्केशमिव राघवः ॥ ४३७ ॥ इष्टाशं भोजयेत्पथ्यमभ्यङ्गं स्नानमाचरेत्। कर्पूरमिश्रताम्बूलं प्रसूनं हरिचन्दनम् ॥ ४३८ ॥ नारिकेलोदकं पीत्वा नारीणां सङ्गमेव च। लक्ष्मीनारायणो नाम रसानामुत्तमो रसः ॥ ४३९ ॥

शुद्ध गन्धक, सुहागा, वत्सनाग, शुद्ध सिंगरफ़, कुटकी, अतीस, पीपल, इन्द्रजौ, अभ्रक-भस्म, सेंधानमक, इन्हें बराबर मात्रा में मिलाकर वन्सीमूल तथा मदनफल के क्वाथ से अलग-अलग तीन दिन घोटकर एक-एक रत्ती की गोलियाँ बनावे। अनुपान—अदरख का रस। यह वात आदि दोषों से पैदा हुए ज्वर, अतिसार ग्रहणी, रक्तातीसार, आमातीसार, प्रमेह, शूल, प्रसूतवात आदि रोगों को नष्ट करता है। पथ्य—इच्छानुसार तृप्तिदायक भोजन, स्नान, तैल की मालिश, घनसार-कपूर-युक्त पान का सेवन, पुष्पमाला का धारण, हरिचन्दन का लेप तथा नारियल का जल पीकर कीसहवास करना चाहिए। यह लक्ष्मीनारायण नामक रस सब रसों से उत्तम है ॥ ४३४-४३६ ॥

जीरकाद्यमोदक।

जीरकस्य पलान्यष्टौ शुण्ठीधान्यं फलत्रयम्। शतपुष्पा यमानी च कृष्णजीरं पलं पलम् ॥ ४४० ॥ क्षीरद्विप्रस्थसंयुक्तं खण्डस्यार्द्धशतं पलम्। घृतस्यापि पलान्यष्टौ शनैर्मृद्वग्निना पचेत् ॥ ४४१ ॥ व्योषं त्रिजातकं चैव विडङ्गं चव्यचित्रकम्। मुस्तकं च लवङ्गं च पलांशं संप्रकल्पयेत् ॥ ४४२ ॥ मन्देन वह्निना पक्त्वा मोदकं कारयेद्भिषक्। सर्वयोषिद्विकाराणां नाशनं वह्निदीपनम्। सूतिकारोगशमनं विशेषाद् ग्रहणीहरम् ॥ ४४३ ॥

जीरा ३२ तोले, सोंठ ३२ तोले, धनिया १२ तोले तथा सौंफ, अजवायन और काला जीरा चार-चार तोले; इनको सबको महीन पीस कर ६ सेर १६ तोले दूध में डालकर मन्दाग्नि से पकावे। जब खोया के तुल्य हो जाय तब ३२ तोले घृत में भून ले। पश्चात् २॥ सेर शक्कर की चाशनी बनाकर उसमें डालकर पकावे। जब पाक सिद्ध हो जाय तब सोंठ, मिर्च, पीपल, छोटी इलायची, दालचीनी, तेजपात, वायविडङ्ग, के चार-चार तोले चूर्ण को उसमें डालकर लड्डू बना ले। मात्रा—आधे तोले से २ तोले तक। यह स्त्रियों के सब प्रकार के रोगों को नष्ट कर अग्नि को प्रचण्ड तथा सूतिकारोग और ग्रहणीरोग को नष्ट करता है ॥ ४४०-४४३ ॥

सूतिकारिरस।

रसं गन्धं मृताभ्रं च मृतताम्रं च तुल्यकम्। चूर्णितं मर्दयेद्यत्नात् भेकपर्णीरसेन च ॥ ४४४ ॥ छायाशुष्कां गुटी कार्या गुञ्जार्द्धमिता ततः। मात्रया कटुना देया सूतिकातङ्कनाशिनी ॥ ज्वरतृष्णारुचिहरी शोथघ्नीवह्निदीपिनी॥४४५

शुद्ध पारा, गन्धक, अभ्रकभस्म और ताम्र-भस्म; इनको सम भाग ले। पहले पारा और गन्धक की कज्जली करे, पश्चात् सबको मिलाकर मण्डूकपर्णी के रस से घोटकर आधी-आधी रत्ती की गोलियाँ बनाकर छाया में सुखा ले। अनुपान—अदरख का रस। यह सूतिकारस सूतिकारोग, ज्वर, तृषा, अरुचि और शोथरोगों को नष्ट तथा जठराग्नि को दीप्त करता है ॥ ४४४-४४५ ॥

बृहत्सूतिकाविनोद रस।

शुण्ठ्या भागो भवेदेको द्वौ भागौ मरिचस्य च। पिप्पल्याश्च त्रिभागं स्यादर्द्धभागं च रोमकम् ॥ ४४६ ॥ जातीकोषस्य भागौ द्वौ द्वौ भागौ तुत्थकस्य च। सिन्धुवाररसेनैव मर्दयेदेकयामतः ॥ ४४७ ॥ मधुना सह सेवेत सूतिकातङ्कनाशनम् ॥ ४४८ ॥

सोंठ, १ भाग, कालीमिर्च २ भाग, पीपल ३ भाग; साँभर नमक आधा भाग, जावित्री २ भाग और नीलाथोथा २ भाग; इन सबको एकत्र कर सँभालू के रस से एक पहर तक घोट कर मटर के समान गोली बना ले।

अनुपान—शहद । यह रस सूतकारोगों को नष्ट करता है ॥ ४४६-४४८ ॥

स्तन्यवृद्धिचिकित्सा ।

वनकार्पासकेक्षूणां मूलं सौवीरकेण वा । विदारीकन्दं सुरया पिबेद्वा स्तन्यवर्द्धनम् ॥ ४४९ ॥

वनकपास और ईख की जड़ के चूर्ण को काँजी के साथ अथवा विदारीकन्द को मदिरा के साथ सेवन करने से स्त्रियों के दुग्ध की वृद्धि होती है ॥ ४४९ ॥

दुग्धेन शालितण्डुलचूर्णपानं विवर्द्धयेत् । स्तन्यं सप्ताहतः क्षीरसेविन्यास्तु न संशयः ॥ ४५० ॥

दूध का सेवन करनेवाली स्त्री यदि दूध के साथ शालि चावलों के चूर्ण का पान करे तो एक सप्ताह में निस्सन्देह दूध की वृद्धि होती है ॥ ४५० ॥

हरिद्रादिं वचादिं वा पिबेत् स्तन्यविवृद्धये । तत्र वाताधिके स्तन्ये दशमूलीजलं पिबेत् ॥ ४५१ ॥

हरिद्रादिगण[1] अथवा वचादिगण[2] का क्वाथ पीने से दूध की वृद्धि होती है । यदि वात से दूध दूषित हो गया हो, तो दशमूल का क्वाथ पीना चाहिए ॥ ४५१ ॥

पित्तदुष्टेऽमृता भीरु पटोलं निम्बचन्दनम् । धात्रीकुमारश्च पिबेत् क्वाथयित्वा सशारिवम् ॥ ४५२ ॥

पित्त से दूध दूषित हो तो गिलोय, शतावरी परवल के पत्ते, नीम की छाल, लालचन्दन और अनन्तमूल; इनका क्वाथ बनाकर धाय अथवा बच्चे की माता को पिलाना चाहिए । यदि पित्त-दूषित दूध से बच्चे को हानि पहुँची हो, तो बच्चे को भी यह क्वाथ पिलाना हितकर होता है ॥ ४५२ ॥

धात्रीस्तन्यविवृद्ध्यर्थं मुद्गयूषरसाशना । भार्गीदारुवचापाठाः पिबेत्सातिविषाः शृताः ॥ ४५३ ॥

दूध बढ़ाने के लिए धाय को चाहिए कि मूँग का यूष और मांसरस का भोजन करे तथा भारंगी, देवदारु, वच, पाढ़ और अतीस का काढ़ा पीवे ॥ ४५३ ॥

कुक्कुरमेच्चुकमूलं चर्वितमास्येन धारितं जयति । सप्ताहात् स्तनकीलं स्तन्यं चैकान्ततः कुरुते ॥ ४५४ ॥

कुकरमेन्चुक ( नागफनी ) की जड़ को चबाकर मुख में रखने से एक सप्ताह में स्तनकीलरोग दूर होता है और दूध भी बढ़ता है ॥ ४५४ ॥

शोथं स्तनोत्थितमवेक्ष्य भिषग्विदध्याद् विद्रधावभिहितं बहुधा विधानम् । आमे विदह्यति तथैव गते च पक्वं तस्याः स्तनौ सततमेव हि निर्दुहीत ॥ ४५५ ॥

स्तनों पर सूजन हो जावे तो वैद्य को उस सूजन की कच्ची, पच्यमान और पक्कावस्था को विचार कर विद्रधिरोग के समान उसकी चिकित्सा करनी चाहिए, परन्तु सब अवस्थाओं में स्तन का दूध अवश्य ही निकलवा देना चाहिए ॥ ४५५ ॥

विशालामूललेपस्तु हन्ति पीडां स्तनोत्थिताम् । निशाकनकमूलाभ्यां लेपश्चापि स्तनार्तिहा ॥ ४५६ ॥

इन्द्रायण की जड़ का अथवा हल्दी और धतूरे की जड़ का लेप करने से स्तन की पीड़ा नष्ट होती है ॥ ४५६ ॥

मूषिकरसया शौकरमाहिषगजमांस-

---

१ हरिद्रादिगण—"हरिद्राद्वयपट्यष्ट्याह्वकलशीकुटजोद्भवम् ।" हल्दी, दारुहल्दी, मुलेठी, पृष्ठपर्णी, कटेरी और इन्द्रजौ ।

२ वचादिगण—"वचामुस्ताभ्दशुण्ठीनागरातिविषाभयाः ।" वच, नागरमोथा, देवदारु, सोंठ, अतीस ।

चूर्णयुतया। अभ्यङ्गमर्दनाभ्यां सुकठिनपीनौ स्तनौ भवतः ॥ ४५७ ॥

चूहे की चर्बी में सूअर, भैंस और हाथी के मांस का चूर्ण मिलाकर स्तनों पर लगाने से अथवा मर्दन करने से स्तन कठिन और मोटे हो जाते हैं ॥ ४५७ ॥

महिषीभवनवनीतं व्याधिवलोग्रा तथैव नागवला। पिष्ट्वा मर्दनयोगात् पीनं कठिनं स्तनं कुरुते ॥ ४५८ ॥

कूट, खरेटी, वच और गंगेरन; इनको महीन पीस कर भैंस के मक्खन में मिलाकर मालिश करने से स्तन पुष्ट (मोटे) और कठिन हो जाते हैं ॥ ४५८ ॥

श्रीपर्णी तैल।

श्रीपर्णीरसकल्काभ्यां तैलं सिद्धं तिलोद्भवम्। तत्तैलं तुलकेनैव स्तनस्योपरि धारयेत् ॥ पतितावुत्थितौ स्त्रीणां भवेतां च पयोधरौ ॥ ४५९ ॥

खंभारी के रस और कल्क से तिल का तेल सिद्ध करके उसमें रुई का फाहा भिगोकर स्तन पर रखने से स्त्रियों के पड़े हुए भी स्तन उठ जाते हैं, अर्थात् ढीले हुए स्तन कठिन हो जाते हैं ॥ ४५९ ॥

कासीसतुरगगन्धाशावरगजपिप्पलीविपक्वेन। तैलेन यान्ति वृद्धिं स्तनकर्णवराङ्गलिङ्गानि ॥ ४६० ॥

कसीस, असगन्ध, लोध और गजपीपरि; इनके कल्क से तिल का तेल सिद्धकर मालिश करने से स्तन, कान, योनि और लिङ्ग की वृद्धि होती है ॥ ४६० ॥

प्रथमर्त्तौ तण्डुलाम्भो नस्यं कुर्यात् स्तनौ स्थिरौ। गोमहिषीघृतसहितं तैलं द्याामाकताञ्जलिवचाभिः ॥ सत्र्यूषनिशाभिः सिद्धं नस्यं स्तनवर्द्धनं परम् ॥ ४६१ ॥

प्रथम रजोदर्शन के समय में चावल के जल का नस्य लेने से स्तन स्थिर हो जाते हैं। गौ का घृत ४ छटाँक, भैंस का घृत ४ छटाँक और तिल का तेल ८ छटाँक। कल्क के लिए असगन्धमूल, लज्जावन्ती, वच, त्रिकटु (सोंठ, मिर्च, पीपरि) और हल्दी सब मिलित २ छटाँक। यथाविधि तैल सिद्ध कर नस्य लेने से यह स्तनों को बढ़ाता है ॥ ४६१ ॥

सुतनूकरोति मध्यं पीतं मथितेन मागधीमूलम् ॥ ४६२ ॥

पीपलामूल के चूर्ण को मट्ठे के साथ सेवन करने से स्त्रियों का कटिभाग पतला हो जाता है ॥ ४६२ ॥

वेतसस्य तु मूलानि क्वाथयेन्मृदुनाग्निना। भगं प्रक्षालितं तेन गाढं सम्प्रजायते ॥ ४६३ ॥

मन्दाग्नि से बेत की जड़ का काढ़ा बनाकर योनि धोने से संकुचित हो जाती है ॥ ४६३ ॥

सूतिकाहर रस।

हिंगुलं हरितालं च शङ्खभस्मायसो रजः। खर्परं धूर्त्तबीजं च यवक्षारं च टङ्कनम् ॥ ४६४ ॥ विभीतककषायेण भावयित्वा विधानतः। मर्दयित्वा विदध्याच्च गुञ्जैकमिता वटीः ॥ ४६५ ॥ यथादोषानुपानेन प्रयुक्तोऽयं रसोत्तमः। निहन्यात् सूतिकातङ्कान् वह्निस्तृणगणानिव ॥ ४६६ ॥

शुद्ध हिंगुल, शुद्ध हरताल, शङ्ख की भस्म, लोहभस्म, शुद्ध खपरिया, धतूरे के बीज, जवाखार और सुहागा; इनको बहेड़े के काढ़े से घोटकर एक-एक रत्ती की गोलियाँ बना ले। दोष का विचार कर उपयुक्त अनुपान के साथ सेवन करने से यह उत्तम रस सूतिकारोग को इस प्रकार नष्ट करता है जैसे अग्नि तृणसमूह को नष्ट करती है ॥ ४६४-४६६ ॥

बृहत्सूतिकावल्लभ रस।

सूतं गन्धं माक्षिकं च व्योमेन्दुं हेमतालकम्। रजतं फणिफेनं च जातीकोषफले तथा ॥ ४६७ ॥ मुस्तकस्य बलामूलस्य शाल्मल्याः स्वरसेन च। भावयित्वा वटीः कुर्याद् द्विगुञ्जापरिमाणतः ॥ ४६८ ॥ सूतिकावल्लभो नाम प्रयुक्तोऽयं महान् रसः। निहन्यात् सूतिकारोगान् दुर्वारं ग्रहणीगदम् ॥ ४६९ ॥ अतीसारं सुघोरं च दौर्बल्यं वह्निमन्दताम्। जनयेदाशु पुष्टिं च कान्तिं मेधां धृतिं तथा ॥ ४७० ॥

शुद्ध पारा, गन्धक, सोनामक्खी की भस्म, अभ्रकभस्म, कपूर, सोने की भस्म, शुद्ध हरताल, चाँदी की भस्म, अफीम, जावित्री, जायफल, नागरमोथा और खरेंटी; इनको सम भाग लेकर सेमर के रस से घोटकर दो-दो रत्ती की गोलियाँ बना ले। इस सूतिकावल्लभ रस के सेवन करने से सब प्रकार के सूतिकारोग, घोर संग्रहणी, अतीसार, दुर्बलता और अग्निमान्द्य आदि रोग नष्ट होते हैं। यह पुष्टि, कान्ति, बुद्धि और स्मरणशक्ति को बढ़ानेवाला है ॥ ४६७-४७० ॥

धातक्यादि तैल।

धातकीधवधन्याकधात्रीधुस्तूरधूपनैः। नीलीनीपनतैर्निम्बुनीरदनागरैः ॥ ४७१ ॥ पथ्यापद्मपृथापुष्पैः पत्रपत्रोर्णपूतिकैः। कणिभ्भकफलेन्द्राभ्यां फञ्जिकाफेनफेनिलैः ॥ ४७२ ॥ कल्कैः कोलकपित्थाभ्यां कुष्माण्डकन्याकशेरुभिः। पिष्टैः पचेत् पयस्विन्याः पयसा पाकपण्डितः ॥ ४७३ ॥ तैलं तिलमवं सिध्यै सिध्यतोयेन तन्मनाः। पूजयित्वा परानन्दां प्रयतः परमेश्वरीम् ॥ ४७४ ॥ सूरसूनूदितमिदं सूतिकामयसूदनम्। सेवेत सततं सूता सुखदं सुखसेविनी ॥ ४७५ ॥

सुखसेविनी पथ्यसेविनी।

आँवले का रस ६ सेर ३२ तोले, गोदुग्ध ६ सेर ३२ तोले, तिल का तेल १२८ तोले, कल्क के लिए धाय के फूल, धव की छाल, धनियाँ, आँवला, धतूरा, राल, नील की जड़, कदम्ब की छाल, तगर, नीम की छाल, नींबू की जड़, नागरमोथा, सोंठ, हड़, कमल की जड़, अर्जुन की छाल, तेजपात, सरलू की छाल, कटभीज, महुआ, करेंदा (बड़ी जामुन) की छाल, भारंगी, समुद्रफेन, रीठा, बेर, कैथ, पीपरि, घीकुवार और कसेरू; मिलित १२ तोले। पुष्य नक्षत्र में यथाविधि तैल सिद्ध करे। परमानन्ददायी भगवती की पूजा करके सूरसूनु के कहे हुए इस सूतिकारोगनाशक धातक्यादि तैल का प्रसूता स्त्री को नियमित सेवन करना चाहिए और पथ्य से रहना चाहिए ॥ ४७१-४७५ ॥

जीरकाद्यरिष्ट।

जीरकस्य तुलाद्वन्द्वं चतुर्द्रोणजले पचेत्। द्रोणशेषे क्षिपेत् तत्र तुलात्रयमितं गुडम् ॥४७६॥ धातकीं षोडशपलां शुण्ठीं च द्विपलोन्मिताम्। जातीफलं मुस्तकं च चातुर्जातं यमानिकाम् ॥ ४७७ ॥ कक्कोलं देवपुष्पं च पलमानेन निक्षिपेत्। मासं संस्थापयेद् भाण्डे मृत्तिकापरिनिर्मिते ॥ ४७८ ॥ ततः कल्कान् विनिर्हृत्य पाययेत् कर्षमात्रया। अरिष्टो जीरकाद्योऽयं निहन्यात् सूतिकामयान् ॥ ग्रहणीमतिसारं च तथा वह्नेश्च वैकृतम् ॥ ४७९ ॥

१० सेर जीरा को ४ मन २१ सेर ११ तोले जल में पकावे। जब २५ सेर ४८ तोले जल बाकी रहे तब उसमें १५ सेर गुड़, धाय के फूल ६४ तोले, सोंठ आठ तोले, तथा जाय-

फल, नागरमोथा, चातुर्जात ( छोटी इलायची, दालचीनी, नागकेसर, तेजपात ), अजवायन, कंकोल और लवङ्ग, चार-चार तोले चूर्ण करके डाल दे। इनको मिट्टी के पात्र में रखकर और उसका मुख बन्द करके एक महीने तक धरा रक्खे। फिर छानकर शीशे अथवा चीनी के बर्त्तन में रक्खे। मात्रा ११ तोले से २॥ तोले तक। यह जीरकाद्यरिष्ट सूतिकारोग, संग्रहणी, अतिसार और अग्नि की मन्दता को नष्ट करता है॥ ४७६-४७९ ॥

गर्भिण्याः पथ्यानि।

शालयः षष्ठिकामुद्गगोधूमालाज शक्तवः। नवनीतं घृतं क्षीरं रसालां मधुशर्करा॥ ४८०॥ पनसं कदलं धात्री द्राक्षाऽम्ल-स्वादुशीतलम्। कस्तूरी चन्दनं माला कर्पूरमनुलेपनम्॥ ४८१॥ चन्द्रिका स्नानमभ्यङ्गो मृदुशय्या हिमानिलः सन्तर्पणं प्रिया वाचो विहाराश्च मनोरमाः। प्रियङ्करं चान्नपानं गर्भिणीभ्यो हितं भवेत्॥ ४८२॥

शालि और साठी चावल मूँग गेहूँ धान के खील का सत्तू मक्खन घृत दुग्ध रसाला ( सिखरन ) मधु शर्करा कटहर केला आँवला दाख तथा आम के पके फल मधुर तथा शीतल द्रव्य कस्तूरी श्वेतचन्दन सुगन्धित माला कर्पूर का लेप चाँदनी रात में रहना स्नान तैल मालिश कोमल शय्या ठण्ढी वायु सन्तर्पण क्रियायें प्रिय-वचन मनोरम विहार प्रिय रुचिकर अन्नपान ये सब गर्भिणी के लिये लाभदायक हैं॥४८०-४८२॥

गर्भिण्या अपथ्यानि।

स्वेदनं वमनं क्षारं कलहं विषमाशनम्। असात्म्यं नक्तसंचारं चौर्यचाप्रिय दर्शनम्॥ ४८३॥ अतिव्यवायमायासं भारं प्रावरणं गुरु। अकाल जागरस्वप्नं कठि-नोत्कटकासनम्॥ ४८४॥ शोक क्रोध-भयोद्वेगवेग श्रद्धाविधारणम्। उपवासध्-तीक्ष्णोष्णं गुर्वविष्टम्भिभोजनम्॥४८५॥ नक्तं निरशनं श्वभ्रकूपेक्षां मद्यमामिषम्। उत्तानशयनं यच्च स्त्रियो नेच्छन्ति तत्त्यजेत्॥ ४८६॥ पथारक्तस्रुतिं शुद्धिं वस्तिमामासतोऽष्टमात्। एभिर्गर्भः स्रवे-दामः कुक्षौशुष्येन्म्रियेतवा॥ ४८७॥ भजेच्च नित्यं तिक्ताम्लकटूष्ण कषाय-कान्। वातलैश्च भवेद् गर्भः कुब्जान्धजड-वामनः॥ ४८८॥ पित्तलैः खलितीपिङ्गः श्वित्री पाण्डुःकफात्मनः। अपथ्यमिदमु-द्दिष्टं गर्भिणीनां महर्षिभिः॥ ४८९॥

स्वेदन वमन क्षार पदार्थ कलह विषम भोजन असात्म्य आहार विहार रात में घूमना अप्रिय वस्तु देखना ज्यादा मैथुन परिश्रम बोझ उठाना भारी वस्त्र ओढ़ना असमय में जागना और सोना। कठिन आसन पर तथा उकड़ू बैठना शोक क्रोध भय तथा उद्वेग मल मूत्रादि वेग एवं श्रद्धा को रोकना उपवास मार्ग चलना। तीक्ष्ण उष्ण गुरुपाकी अजीर्ण कारक भोजन रात में भोजन करना गहरे गड्ढे अथवा कुएँ में झांकना मद्य मांस सेवन सीधा लेटना और जो अपने को पसन्द न हो ये सब विषय, गर्भिणी स्त्रियों को त्याग देना चाहिए और अष्टम मास से रक्तस्राव कराना वमनादि द्वारा शरीर का शोधन और वस्ति कर्म त्याग देना चाहिये। इन सबों को करने से कभी दशा असमय में ही गर्भ स्राव या उदर में ही गर्भ सूखना या मृत्यु हो जाती है, गर्भिणी को तिक्त अम्ल कटु चरपरा तथा कसैला पदार्थ का सेवन अधिक न करे। वातकारक पदार्थों के खाने से गर्भ कुबड़ा अन्धा जड़ और बौना होता है। पित्तकारक पदार्थों से गञ्जा पिङ्गल वर्ण-वाला श्वेत कुष्ठी तथा कफकारक पदार्थों से पाण्डुवर्णवाला गर्भ हो जाता है। ये सब बातें गर्भिणी को अपथ्य हैं॥ ४८३--४८९॥

सूतिकारोगे पथ्यानि।

लङ्घनानि मृदुस्वेदो गर्भे कोष्ठ विशोधनम्। अभ्यञ्जनं तैलपानं कटुतीक्ष्णोष्ण सेवनम् ॥ ४६० ॥ दीपनं पाचनं मद्यं पुराणाः शालिषष्टिकाः कुलत्थो लशुनं शिग्रुवार्ताकु बालमूलकम् ॥४६१॥ पटोलं मातुलुङ्गं च ताम्बूलं दाडिमद्वयम्। यानि श्लेष्मानिलघ्नानि विधातव्यानि तानिच ॥ ४६२ ॥ सप्ताहाद् बृंहणं किञ्चिद् द्वादशाहात् तथामिषम्। सार्द्धमासे व्यतिक्रान्ते त्याज्याऽऽहारादियन्त्रणा ॥ ४६३ ॥

इति भैषज्यरत्नावल्यां स्त्रीरोगा-धिकारः समाप्तः।

---

लङ्घन मृदुस्वेद गर्भ कोष्ठ की शुद्धि मालिश तैलपान चरपरा तेज गर्म पदार्थों का सेवन दीपन पाचन पदार्थ मद्य पुराने शालि तथा साठी चावल कुलथी लहसन सहजन की फली बैंगन छोटी मूली परवल बिजौरा, नीबू, ताम्बूल खट्टे मीठे अनार कफ तथा वायुनाशक पदार्थ इन का सेवन करना चाहिये। ७ दिन के बाद कुछ पौष्टिक पदार्थ १२ दिन के बाद मांस ये सब पदार्थ सूतिका रोग में पथ्य हैं। और डेढ़ महिने के बाद आहार विहार का परहेज त्याग देना चाहिये ॥ ४६०-४६३ ॥

इति श्रीसरयूप्रसादत्रिपाठिविरचितायां भैषज्यरत्नावल्या रत्नप्रभाभिधायां व्याख्यायांस्त्रीरोगाधि-कारः समाप्तः।

---

# अथ बालरोगाधिकारः।

त्रिविधः कथितो बालः क्षीरान्नोभयवर्त्तकः। स्वास्थ्यं ताभ्यामदुष्टाभ्यां दुष्टाभ्यां रोगसम्भवः ॥ १ ॥

बालक तीन प्रकार के कहे हैं। एक माता का दूध पीने वाले, दूसरे दूध और अन्न खानेवाले और तीसरे केवल अन्न खानेवाले। जब दूध और अन्न शुद्ध होते हैं तो बालक नीरोग रहता है और जब दूध या अन्न दूषित होते हैं तो बालक रोगी हो जाता है ॥ १ ॥

क्षीरपस्यौषधं धात्र्याः क्षीरान्नादस्य चोभयो। अन्नेन वा शिशौ देयं भेषजं भिषजा सदा ॥ २ ॥

दूध पीनेवाले बालक के रोगी होने पर दूध पिलानेवाली धाय या माता को औषधि सेवन कराना चाहिए। जो बालक दूध और अन्न का सेवन करनेवाला हो तो धाय और बालक दोनों को औषधि देना चाहिए और जो केवल अन्न ही खाता हो तो बालक को ही औषधि देना चाहिए ॥ २ ॥

मात्रया लङ्घयेद्धात्रीं शिशोर्नैव विशोषणम्। सर्वं निवार्यते बाले स्तन्यं तु न निवार्यते ॥ ३ ॥

दूध पिलानेवाली माता या धाय को आवश्यकतानुसार लंघन कराया जा सकता है किन्तु बालक को लंघन कराना उचित नहीं है। बालक के लिए सब कुछ रोका जा सकता है; परन्तु माता या धाय का दूध नहीं रोकना चाहिए ॥ ३ ॥

यो बालोऽचिरजातः स्तन्यं न गृह्णाति तस्य सहसैव। धात्रीमधुघृतपथ्याकल्केनाघर्षयेज्जिह्वाम् ॥ ४ ॥

यदि थोड़े दिन का पैदा हुआ बालक एकाएकी माता का दूध न पीवे तो आंवला और

हड के चूर्ण में शहद और घृत मिलाकर बालक की जीभ पर घिसना चाहिए ॥ ४ ॥

कुष्ठं वचाभया ब्राह्मी कनकं क्षौद्रसर्पिषा। वर्णायुःकान्तिजननं लेहं बालस्य दापयेत् ॥ ५ ॥

कूट, वच, हड, ब्राह्मी और सुवर्णभस्म; इनको शहद और घृत में मिलाकर बालक को चाटने से कान्ति, आयु और उत्तम वर्ण की वृद्धि होती है। मात्रा $\frac{1}{8}$ रत्ती से $\frac{1}{2}$ रत्ती तक इसे जन्म के बाद ही सेवन कराया जा सकता है ॥ ५ ॥

स्तन्याभावे पयश्छागं गव्यं वा तद्गुणं पिबेत्।

माता के दूध न होने पर उसी के समान गुणकारी बकरी या गौ का दूध पिलाना चाहिए।

मृत्पिण्डेनाग्नितप्तेन क्षीरसिक्तेन सोष्मणा। स्वेदयेदुत्थितां नाभिं शोथस्तेनोपशाम्यति ॥ ६ ॥

यदि बालक की नाभि में सूजन हो जावे तो मिट्टी के ढेले को आग में तपाकर दूध से बुझावे और उससे नाभि पर सेंक दे तो सूजन शान्त हो जाती है ॥ ६ ॥

नाभिपाक की चिकित्सा।

नाभिपाके निशालोध्रप्रियङ्गुमधुकैः शृतम्। तैलमभ्यञ्जने शस्तमेभिर्वाप्यवचूर्णनम् ॥ ७ ॥

बालकों की नाभि पक जाने पर हल्दी, पठानीलोध, प्रियंगु और मुलेठी के कल्क से सिद्ध का तैल सिद्ध कर लगाने से अथवा उपर्युक्त औषधियों का चूर्ण नाभिपाक पर बुरकने से नाभिपाक अच्छा होता है ॥ ७ ॥

तप्तलौहो गुडिकां तप्तां निर्वाप्य कटुतैलके। तत्तैलं पानतो हन्ति बालानामुल्बणं ज्वरम् ॥ ८ ॥

लोहे की तपी हुई तकु (तकुआ) के नीचे की गुडिका को तपाकर कडुए तेल में बुझावे। बच्चे को इस तेल के पिलाने से दारुण ज्वर (कठगत श्लेष्मा) नष्ट होता है ॥ ८ ॥

आहरिण्डका की चिकित्सा।

सोमग्रहणे विधिवत् केकिशिखामूलमुद्धृतं। जंघनेऽथ कन्धरायां सपपस्याहरिण्डकां नियतम् ॥ ९ ॥

चन्द्रमा के ग्रहण में मोरशिखा की जड़ उखाड़कर जाँघ अथवा कंधे पर बाँधने से आहरिण्डका रोग नष्ट होता है ॥ ९ ॥

सप्तदलपुष्पमरिचं पिष्टं गोरोचनासहितम्। पीतं तद्वत्तण्डुलभक्तकृतो दग्धपिण्डकाशः ॥ १० ॥

सतवन के फूल, कालीमिर्च और गोरोचन, इनको पीसकर बालक को पिलाने से अथवा चावल के भात का पिण्ड पुटपाक की विधि से पकाकर सेवन कराने से आहरिण्डकारोग नष्ट होता है ॥ १० ॥

बालज्वरचिकित्सा।

भेषजं पूर्वमुद्दिष्टं नराणां यज्ज्वरादिषु। कार्यं तदेव बालानां मात्रा चात्र कनीयसी ॥ ११ ॥

मनुष्यों के ज्वर आदि रोगों में जो पहले औषधियाँ कह आये हैं वे ही बालकों को भी दी जाती हैं, किन्तु मात्रा अवस्थानुसार कम दी जाती है ॥ ११ ॥

भद्रमुस्ताभयानिम्बपटोलमधुकैः कृतः। क्वाथः कोष्णस्तु बालानामशेषज्वरनाशनः ॥ १२ ॥

नागरमोथा, हड, नीम की छाल, पटोलपत्र, मुलेठी; इनके क्वाथ को उचित मात्रा में गुनगुना गुनगुना पिलाने से बालकों के सम्पूर्ण ज्वर नष्ट होते हैं ॥ १२ ॥

निमन्त्र्य पूर्वं तु हरिप्रियाया मूलं

समुद्धृत्य दिनेरवेश्च। बद्धं शिखाया-मनुरक्रमेण . ज्वरघ्न इत्यादभिमन्त्रि-तेन ॥ १३ ॥

ॐ कुरु वन्दे अमुकस्य ज्वरं नाशय नाशय ह्रीं स्वाहा। अनेन अष्टोत्तरशत-वारानभिमन्त्र्य बालस्य शिरसि बन्ध-नीयम् ॥

तुलसी को पहले दिन निमन्त्रण देकर रविवार के दिन उसकी जड़ को उखाड़, लाल डोरा में लपेटकर "ॐ कुरु बन्दे" इत्यादि मन्त्र से १०८ बार अभिमन्त्रित कर बालक की चोटी में बाँध दें। इससे बालक का ज्वर नष्ट हो जाता है। यहाँ पर मन्त्र में अमुक शब्द की जगह बीमार बालक का नाम लेना चाहिए ॥ १३ ॥

ॐ ब्रह्मरुद्रप्रभस्कन्दो विष्णुर्देवो हुता-शनः। रक्षन्तु ज्वरितं बालं मुञ्च मुञ्च इमं स्वाहा ॥ १४ ॥

"ॐ ब्रह्मरुद्र०" इत्यादि मन्त्र से सफेद सरसों को अभिमन्त्रित कर बालक पर फेंके ॥ १४ ॥

इति सर्षपमन्त्रः।

ज्वर में रक्षामन्त्र यथा—

यथा वज्रं यथा शूलं यथा चक्रं यथा हलम्। यथा च शक्तिः स्कन्दस्य रक्षा क्षेपा तथास्तु मे ॥ १५ ॥

स्वस्ति ते षण्मुखो देवो महाभागा च रेवती। दिशः सूर्योऽन्तरिक्षञ्च स्वस्ति कुर्वन्तु सर्वदा ॥ १६ ॥ तेजसा ब्रह्मणश्चैव विष्णोरिन्द्रस्य तेजसा। सिद्धानां तेजसा चैव रक्षितोऽसि सुखीभव ॥ १७ ॥

"यथा वज्रं० यथा शूलं" इत्यादि मन्त्रों द्वारा परिमार्जन करे अर्थात् बालक के देह पर अभि-मन्त्रित जल छिड़के ॥ १५-१७ ॥

बालक के लिए मात्रा का प्रमाण।

प्रथमे मासि जातस्य शिशोर्भेषजर-क्तिका। अवलेह्या तु कर्त्तव्या मधुक्षीर-सिताघृतैः ॥ १८ ॥ एकैकां वर्द्धयेत्तावद्या-वत् संवत्सरो भवेत्। तदूर्ध्वं माषवृद्धिः स्याद् यावदाषोडशाब्दिकः ॥ १९ ॥

एक महीने के बालक को १ रत्ती औषधि देना चाहिए। वह शहद, दूध, मिश्री अथवा घी में मिलाकर चटाना चाहिए। जब तक बालक एक वर्ष का न हो जाय तब तक एक-एक रत्ती प्रतिमास औषधि की मात्रा बढ़ाना चाहिए। एक वर्ष की आयु से १६ वर्ष की आयु तक एक-एक माशा औषधि प्रतिवर्ष बढ़ाना चाहिए। यह काष्ठादि द्रव्य की मात्रा है। यह मात्रा का प्रमाण प्राचीन है। इस समय बलानुसार मात्रा का प्रयोग करना चाहिए ॥ १८-१९ ॥

बालकों के ज्वरातीसार की चिकित्सा।

हरिद्रादि कषाय।

हरिद्राद्वययष्ट्याह्वसिंहीशक्रयवैः कृतः। शिशोर्ज्वरातिसारघ्नः कषायः स्तन्यदोष-जित् ॥ २० ॥

हल्दी, दारुहल्दी, मुलेठी, बड़ी कटेरी और इन्द्रजौ; इनका काढ़ा करके बालक को पिलाने से ज्वरातिसार नष्ट होता है। यदि दूध पीनेवाला बालक इसको न पी सके तो दूध पिलानेवाली माता या धाय को पिलाना चाहिए। इससे दूध शुद्ध होकर ज्वरातीसार दूर हो जायगा ॥ २० ॥

कर्कटादि चूर्ण।

कर्कटातिविषा शुण्ठी धातकी बिल्व-शलकम्। मुस्तं मज्जा च कोलस्य मधुना सह लेहयेत् ॥ २१ ॥ हन्ति ज्वरमतीसारं दुर्वारं ग्रहणीगदम्। छर्दि रक्तस्रुतिं कासं श्वासं पश्चाद्रुजं तथा ॥ २२ ॥

काकड़ासिंगी, अतीस, सोंठ, धाय के फूल, बेलगिरी, सुगन्धबाला, नागरमोथा और बेर की मींगी; इनके समभाग चूर्ण को शहद में बालक को चटाने से ज्वर, अतीसार, कठिन ग्रहणीरोग, वमन, रक्तस्राव, खाँसी, श्वास और पश्चात् रुज

नाम का ग्रहणीदोष नष्ट होता है। चूर्ण मात्रा—२ माशे से ४ माशे तक ॥ २१-२२ ॥

### बालचतुर्भद्रिका ।

घनकृष्णारुणाशृङ्गीचूर्णं क्षौद्रेण संयुतम् । शिशोर्ज्वरातिसारघ्नं श्वासकासवमीहरम् ॥ २३ ॥

मोथा, पीपरि, अतीस और काकड़ासिंगी; इनके चूर्ण में शहद मिलाकर बालक को चटाने से ज्वरातीसार, श्वास, खाँसी और वमनरोग नष्ट होता है। चूर्ण मात्रा—१ माशा ॥ २३ ॥

### धातक्यादि चूर्ण ।

धातकीबिल्वधन्याकलोध्रेन्द्रयववालकैः । लेहः क्षौद्रेण बालानां ज्वरातीसारशान्तिजित् ॥ २४ ॥

एषां समभाग चूर्णं मधुना लेह्यम् ।

धाय के फूल, बेलगिरी, धनियाँ, पठानी लोध, इन्द्रयव और सुगन्धबाला; इनके समभाग चूर्ण को शहद में मिलाकर चटाने से बालकों का ज्वरातीसार और वमनरोग नष्ट होता है। चूर्णमात्रा—२ माशे ॥ २४ ॥

### रजन्यादि चूर्ण ।

रजनी सरलं दारु श्रेयसी बृहतीद्वयम् । पृश्निपर्णी शताह्वा च लीढं माक्षिकसर्पिषा ॥ २५ ॥ ग्रहणीदीपनं हन्ति मारुतार्त्तिं सकामलाम् । ज्वरातीसारपाण्डुघ्नं बालानां सर्वरोगजित् ॥ २६ ॥

हल्दी, चीड़ की लकड़ी, देवदारु, गजपीपरि, बड़ी कटेरी, छोटी कटेरी, पृश्निपर्णी और सौंफ, इनके चूर्ण को शहद और घृत में मिलाकर चटाने से बालकों की ग्रहणी में अग्नि प्रदीप्त होती है तथा वातरोग, कामला, ज्वरातीसार और पाण्डु आदि सब रोगों को यह रजन्यादि चूर्ण नष्ट करता है। चूर्ण मात्रा—२ माशे ॥ २५-२६ ॥

### छर्द्यादि की चिकित्सा ।

मिशि कृष्णाञ्जनं लाजाशृङ्गीमरिचमाक्षिकैः । लेहः शिशोर्विधातव्यश्छर्दिकासज्वरापहः ॥ २७ ॥

सौंफ, पीपरि, रसौत, धान की खील, काकड़ासिंगी और काली मिर्च; इनके चूर्ण में शहद मिलाकर बालक को चटाने से वमन, खाँसी और ज्वर नष्ट होते हैं। चूर्ण मात्रा—२ माशे ॥ २७ ॥

### शृङ्ग्यादि चूर्ण ।

शृङ्गीसमुस्तातिविषां विचूर्ण्य लेहं विदध्यान्मधुना शिशूनाम् । कासज्वरच्छर्दिभिरर्दितानां समाक्षिकां चातिविषामथैकाम् ॥ २८ ॥

काकड़ासिंगी, नागरमोथा और अतीस; इनके चूर्ण में शहद मिलाकर खाँसी, ज्वर तथा वमन से पीड़ित बालकों को चटाना चाहिए। अथवा केवल अतीस के चूर्ण में शहद मिलाकर बालकों को चटाने से खाँसी, ज्वर और वमनरोग शान्त होते हैं। चूर्ण मात्रा—शृङ्ग्यादि चूर्ण ॥-१॥ माशे, केवल अतीस चूर्ण १ माशा ॥ २८ ॥

पीतं पीतं वमेद्यस्तु स्तन्यं तन्मधुसर्पिषा । द्विवार्त्ताकीफलरसं पञ्चकोलञ्च लेहयेत् ॥ २९ ॥

जो बालक पिये हुए दूध को बार-बार वमन कर देता हो उसको छोटी और बड़ी कटेरी के फल के रस में शहद मिलाकर अथवा पञ्चकोल ( पीपरि, पीपलामूल, चव्य, चित्रक और सोंठ ) के चूर्ण में शहद मिलाकर चटाना चाहिए। चूर्णमात्रा—दोनों कटेरी के फलों का स्वरस ॥-१॥ तोले, पंचकोल का चूर्ण २ रत्ती ॥ २९ ॥

आम्रास्थिलाजसिन्धूत्थैर्लेहः क्षौद्रेण छर्दिनुत् । पिप्पलीमरिचानां च चूर्णं मधुराप्लुतम् ॥ रसेन मातुलुङ्गस्य हिक्काछर्दिनिवारणम् ॥ ३० ॥

आम की गुठली की गिरी, आम की खील और सेंधा नमक; इनके चूर्ण को शहद में मिलाकर बालकों को चटाने से वमन होना बन्द हो जाता है। पीपरि और काली मिर्च के चूर्ण में शहद, शक्कर और बिजौरा नींबू का रस मिलाकर चटाने से हिक्का और वमन दूर होती है। पूर्ण मात्रा—४ रत्ती से १ माशा तक ॥ ३० ॥

## अतिसारचिकित्सा।

पेटीपाठापूलाम्राम्रत्वक्भ्याः सहकारवल्कलः कल्कः। इत्येकशश्च पिण्डी विधितो हृन्नाभितालुवादौ ॥ ३१ ॥ छर्दतिसारज वेगं प्रबलं धत्ते सदैव नियमेन ॥ ३२ ॥

पेटारी की जड़, पाढ़ की जड़, आमुन की छाल और आम की छाल; इनमें से किसी एक को पीस कर पिण्ड (गोला) बना ले। इस पिण्ड को हृदय, नाभि और तालु आदि पर धारण कराने से वमन और अतीसार का प्रबल वेग शान्त हो जाता है ॥ ३१-३२ ॥

पत्रैर्बदरधाङ्गेरीकाकमाचीकपित्थजैः। शिशोरुग्वम्यतीसारनाशनं मूर्द्धलेपनम् ॥ ३३ ॥

बेर, चांगेरी, मकोय और कैथे के पत्तों को पीसकर मस्तक पर लेप करने से शिरपीड़ा, वमन और अतीसार नष्ट होता है ॥ ३३ ॥

## आमातीसार चिकित्सा।

क्षीरादस्य शिशोरामं शुष्कं दृष्ट्वा तु दारुणम्। मापयूपं पिबेद्धात्री पिप्पलीचूर्णसंयुतम् ॥ ३४ ॥

दूध पीनेवाले बालक को सूखा आंव गिरने लगे, अर्थात् आंव के साथ मल न निकलता हो तो इस कष्टकर रोग को देखकर धाय या माता को उड़द के यूष में पीपरि का चूर्ण मिलाकर पिलाना चाहिए ॥ ३४ ॥

स्तन्यपस्य कुमारस्य सर्वस्यामातिसारिणः। धात्री विलङ्घयेद्धीमान् देह-दोषाद्यपेक्षया। पञ्चकोलकसिद्धं वा पेयादि च प्रयोजयेत् ॥ ३५ ॥

दूध पीनेवाले बालक के यदि आमातीसार रोग हो जाय तो देह और दोष का विचार करके दूध पिलानेवाली को लंघन कराना चाहिए अथवा पञ्चकोल से सिद्ध की हुई पेया आदि का सेवन कराना चाहिए ॥ ३५ ॥

वचा मुस्तं भद्रदारु नागराति विषागणः। हरिद्राद्वयमष्ट्याहसिंहीशक्रयवैः कृतः ॥ ३६ ॥ इमौ वचाहरिद्रादिगणौ स्तन्यविशोधनौ। आमातिसारशमनौ कफमेदोविशोषणौ ॥ ३७ ॥ क्वाथमलं मात्रा पेयं बालेऽपि किञ्चिद्देयम्।

बच, नागरमोथा, देवदार, सोंठ और अतीस; यह वचादिगण है तथा हल्दी, दारुहल्दी, मुलेठी, बड़ी कटेरी और इन्द्रजौ; यह हरिद्रादिगण है। इन दोनों का क्वाथ दूध को शुद्ध और आमातीसार को शान्त करनेवाला तथा कफ एवं मेद का शोषण करनेवाला है। यह माता और बच्चे को भी देना चाहिए ॥ ३६-३७ ॥

## यमानीपञ्चक।

यमानी जीरकं देवपुष्पं जातीफलं त्रिडम्। भर्जितं चूर्णमेतेषां समांशं वारिपाचितम् ॥ ३८ ॥ रक्तद्वयमितं बाल्ये यूनि मापकसम्मितम्। यमानीपञ्चकं नाम वारिणा सह योजयेत् ॥ अग्निमान्द्यमतीसारं ग्रहणीं हन्ति दुस्तराम् ॥ ३९ ॥

अजवाइन, सफेद जीरा, लौंग, जायफल, बिड़नमक, इन्हें किञ्चित् भूनकर अलग-अलग चूर्ण कर ले। इनके चूर्णों को बराबर मात्रा में मिलावें। पश्चात् थोड़ा सा जल डालकर अग्नि में पकावे। जब गोली बनाने के योग्य हो जाय तब उतार ले। मात्रा—बालक के लिये २ रत्ती। युवा के लिये १ माशा। अनुपान—जल। इसके प्रयोग से मन्दाग्नि, अतिसार एवं घोर ग्रहणी नष्ट होती है ॥ ३८-३९ ॥

मुस्तकादिक्वाथ।

मुस्तकातिविषाशुण्ठीबालकेन्द्रयवैः कृतम्। क्वाथं शिशुः पिबेत् प्रातः सर्वातीसारनाशनम्॥ ४०॥ क्वाथजलं मात्रा पेयं बालेऽपि किञ्चिद्देयम्।

नागरमोथा, अतीस, सोंठ, सुगन्धबाला और इन्द्रजौ; इनका काढ़ा बनाकर प्रातःकाल बालक को पिलाने से सब प्रकार के अतीसार नष्ट होते हैं। यह माता को भी पिलाना चाहिए॥ ४०॥

बिल्वं च पुष्पाणि च धातकीनां जलं सलोध्रं गजपिप्पली च। क्वाथावलेहौ मधुना विमिश्रौ बालेषु योज्यावतिसारितेषु॥ ४१॥

बेलगिरी, धाय के फूल, सुगन्धबाला, पठानी लोध और गजपीपर; इनके क्वाथ में शहद मिलाकर पिलाने से अथवा इनके चूर्ण में शहद मिलाकर चटाने से बालकों का अतीसार नष्ट होता है। चूर्ण की पूर्ण मात्रा २ माशे॥ ४१॥

आम्रातकाम्रजम्बूनां त्वचमादाय चूर्णयेत्। मधुना लेहयेद्बालमतीसारविनाशनम्॥ ४२॥

अम्बाड़ा, और आम जामुन; इनकी छाल के चूर्ण में शहद मिलाकर बालक को चटाने से अतीसार रोग नष्ट होता है। पूर्ण मात्रा २ माशे॥ ४२॥

सितजीरकसर्जचूर्णं बिल्वदलोत्थाम्बुमिश्रितं पीतम्। हन्त्यामरक्तशूलं गुडसहितः सर्जरसोऽथवा॥ ४३॥

सफेद जीरा और राल का चूर्ण बेलपत्र के जल में मिलाकर पीने से अथवा सफेद राल और गुड़ का सेवन करने से शूलयुक्त आम और रक्तस्राव रोग नष्ट होते हैं। पूर्ण मात्रा—राल और जीरा दोनों मिलाकर २ रत्ती से ४ रत्ती। केवल राल चूर्ण की मात्रा १–२ रत्ती॥ ४३॥

समङ्गाधातकीलोध्रसारिवाभिः शृतं जलम्। दुर्धरेऽपि शिशोर्देयमतीसारे समाक्षिकम्॥ ४४॥

मँजीठ, धाय के फूल, पठानी लोध और अनन्तमूल के काढ़े में शहद मिलाकर बालक को पिलाने से कठिनतर अतीसार नष्ट होता है॥ ४४॥

नागरातिविषामुस्तबालकेन्द्रयवैः शृतम्। कुमारं पाययेत् प्रातः सर्वातीसारनाशनम्॥ ४५॥

सोंठ, अतीस, नागरमोथा, सुगन्धबाला और इन्द्रजौ का क्वाथ प्रातःकाल बालक को पिलाने से सब प्रकार के अतीसार नष्ट होते हैं॥ ४५॥

समङ्गा धातकी पद्मं यवासश्च कसेरुका तथा। पिष्टैरेतैर्यवागूः स्यादतीसारविनाशिनी॥ ४६॥

मंजीठ (या लज्जालु), धाय के फूल, कमल, धाँवला और धमासा, इनके कल्क से यथाविधि यवागू बनाकर पिलाने से अतीसार नष्ट होता है॥ ४६॥

बिल्वमूलकषायेण लाजां चैव सशर्कराम्। आलोड्य पाययेद् बालं छर्द्यतीसारनाशनम्॥ ४७॥

बेल की जड़ के काढ़े में धान की खील और शक्कर मिलाकर तथा मथकर बालक को पिलाने से वमन और अतीसार नष्ट होते हैं॥ ४७॥

कल्कः प्रियंगुकोलास्थिमध्यमुस्तरसाञ्जनैः। क्षौद्रलीढः कुमारस्य छर्दितृष्णातिसारनुत्॥ ४८॥

प्रियंगु, बेर की मींगी, नागरमोथा और रसौत; इनके कल्क में शहद मिलाकर बालक को चटाने से वमन, तृष्णा और अतीसार का नाश होता है। मात्रा पूर्ण—४ रत्ती से १ माशा तक॥ ४८॥

मोचरसः समङ्गा च धातकी पद्मकेशरम् । पिष्टैरेतैर्यवागूः स्याद्रक्तातीसारनाशिनी ॥ ४९ ॥

मोचरस, मजीठ ( या लज्जालू ), धाय के फूल और कमल की केशर, इनके कल्क से विधिपूर्वक यवागू सिद्ध कर बालक को पिलाने से रक्तातीसार नाश होता है ॥ ४९ ॥

प्रवाहिका चिकित्सा।

लेहस्तैलसिताक्षौद्रतिलयष्ट्याह्वकल्कितः । बालस्य हन्त्याशु यतं रक्तस्रावं प्रवाहिकाम् ॥ ५० ॥

तिल का तेल, मिश्री और शहद में तिल और मुलेठी का कल्क मिलाकर बालक को चटाने से रक्तस्राव तथा प्रवाहिका अवश्य नष्ट हो जाती है ॥ ५० ॥

लाजासयष्टीमधुकशर्कराः क्षौद्रमेव च । तण्डुलोदकसंयुक्तं क्षिप्रं हन्ति प्रवाहिकाम् ॥ ५१ ॥

धान की खील और मुलेठी के कल्क में शक्कर, शहद तथा तण्डुलोदक मिलाकर पिलाने से शीघ्र ही प्रवाहिका ( पेचिश ) नष्ट होती है ॥ ५१ ॥

ग्रहणी चिकित्सा।

अङ्कोटमूलमथवा तण्डुलसलिलेन कुटजमूलं वा । पीतं हन्त्यतिसारं ग्रहणीरोगं च दुर्वारम् ॥ ५२ ॥

अङ्कोट ( ढेरा ) की जड़ अथवा कुरैया की जड़ को तण्डुलोदक के साथ पीने से अतीसार और कठिनतर ग्रहणी नष्ट होती है । चूर्ण मात्रा—२ माशा ॥ ५२ ॥

मरिचमहौषधकुटजद्विगुणीकृतपूर्वोत्तरं क्रमशः । गुडतक्रयुक्तमेतद् ग्रहणीरोगं निहन्त्याशु ॥ ५३ ॥

काली मिर्च १ भाग, सोंठ, २ भाग तथा कुड़ा की छाल ४ भाग, इनके चूर्ण में गुड़ और मट्ठा ( छाछ ) मिलाकर बालक को पिलाने से शीघ्र ही ग्रहणी रोग नष्ट होता है । चूर्ण मात्रा-१॥ माशा ॥ ५३ ॥

बिल्वशक्राम्बुमोचाब्दसिद्धमाजं पयः शिशोः । सामां सरक्तां ग्रहणीं पीतं हन्यात् त्रिरात्रतः ॥ तद्वदजाक्षीरसमो जम्बूत्वक्सम्भवो रसः ॥ ५४ ॥

बिल्व, इन्द्रजौ सुगन्धबाला, मोचरस और नागरमोथा, इनके कल्क से विधिपूर्वक बकरी का दूध सिद्ध कर बालक को पिलाने से तीन दिन में आंव और रक्तयुक्त संग्रहणी रोग नष्ट होता है। इसी प्रकार जामुन की छाल का रस और बकरी के दूध सम भाग लेकर पीने से ग्रहणी रोग नष्ट होता है । पूर्ण मात्रा—स्वरस की १ तोला है ॥ ५४ ॥

गुदपाकचिकित्सा।

गुदपाके तु बालानां पित्तघ्नीं कारयेत् क्रियाम् । रसाञ्जनं विशेषेण पानालेपनयोर्हितम् ॥ ५५ ॥

बालकों की गुदा पक जाने पर पित्तनाशक चिकित्सा करनी चाहिए । अधिकतर रसौत का पीना और लेप करना हितकर होता है ॥ ५५ ॥

पश्चाद्रुज के लक्षण।

दुष्टमन्नादिभिर्मातुः स्तन्यं संपिबतः शिशोः । यदा प्रकुपितं पित्तं गुदं समभिधावति ॥ ५६ ॥ तदा संजायते तत्र मलौकोदरसन्निभः । व्रणः सदाहो व्यक्तोष्माः तदास्य स्याज्ज्वरः पर ॥५७॥ हरितं पीतकं वापि वर्चस्तेन भवेद्ध्रुवम् । व्रणः पश्चाद्रुजो नाम व्याधिः परमदारुणः ॥ ५८ ॥

दुष्ट अन्न पानादिकों से दूषित हुआ माता

का दूध पीने से बालक का पित्त कुपित होकर गुदा की ओर आता है, तब वहाँ जोंक के उदर से तुल्य व्रण हो जाता है। उसमें जलन तथा गरमी रहती है और ज्वर का बुखार हो जाता है। बालक के हरे और पीले दस्त होने लगते हैं। इस व्रण-व्याधि का नाम परचाड्गुज है। यह अत्यन्त कष्टदायक रोग है॥ ५६--५८॥

चन्दनं शारिवे द्वे च शङ्खिनीसिसमायुतैः। परचाङ्गुजे प्रलेपोऽयमवलेहस्तु शस्यते॥ ५९॥

लाल चन्दन, अनन्तमूल, कालीसर और शंखपुष्पी; इनका परचाड्गुज पर लेप करना तथा इन्हीं के चूर्ण में शहद मिलाकर चटाना हितकर होता है। मात्रा--एक वर्ष की आयु के बालक को १ रत्ती॥ ५९॥

मूत्रग्रह में कणादिलेह।

कणोपणसिताक्षौद्रसूक्ष्मैलासैन्धवैः कृतः। मूत्रग्रहे प्रयोक्तव्यः शिशूनां लेह उत्तमः॥ ६०॥

पीपरि, कालीमिर्च, शक्कर, छोटी इलायची और सेंधा नमक; इनके चूर्ण में शहद मिलाकर चटाने से बालकों का मूत्रावरोध नष्ट होता है। मात्रा-एक वर्ष के बालक को १ रत्ती॥ ६०॥

आनाहशूलचिकित्सा।

घृतेन सिन्धुविश्वैलाहिंगुभार्गीरजो लिहन्। आनाहं वातिकं शूलं जयेत्तोयेन वा शिशुः॥ ६१॥

सेंधानमक, सोंठ, छोटी इलायची, हींग और भारंगी; इनका चूर्ण घृत या जल के साथ चाटने से बालक का आनाहरोग और वातिक शूल नष्ट होता है। मात्रा-एक वर्ष के बालक के लिये ½ रत्ती॥ ६१॥

तालुपातचिकित्सा।

हरीतकीवचाकुष्ठकल्कं माक्षिकसंयुतम्। पीत्वा कुमारः स्तन्येन मुच्यते तालुपातनात्॥ ६२॥

हड़, वच और कूठ के कल्क में शहद मिलाकर माता के दूध के साथ पीने से तालुआ का गिरना अच्छा होता है। मात्रा-एक वर्ष के बच्चे के लिये आधी रत्ती॥ ६२॥

मुखपाकचिकित्सा।

मुखपाके तु बालानां साभ्रसारमयोरजः। गैरिकक्षौद्रसंयुक्तं भेषजं सरसाञ्जनम्॥ ६३॥

बालकों के मुखपाक में अभ्रकभस्म, लोहभस्म, गेरू और रसौत; इनके चूर्ण में शहद मिलाकर लगाना चाहिए॥ ६३॥

अश्वत्थत्वग्दलैः क्षौद्रैर्मुखपाके प्रलेपनम्। दार्वीयष्ट्यभयाजातीपत्रक्षौद्रैस्तथापरम्॥ ६४॥

मुखपाक में पीपल की छाल तथा पत्ता को पीसकर और उसमें शहद मिलाकर लेप करने से अथवा दारुहल्दी मुलेठी हड़ और चमेली के पत्ते; इनके कल्क में शहद मिलाकर लेप करने से मुखपाक शान्त होता है॥ ६४॥

सह जम्बीररसेन स्नुग्दलरसघर्षणं सद्यः। कृतमुपहन्ति हि पाकं मुखजं बालस्य चाश्वेव॥ ६५॥

जंबीरी नींबू का रस और सेहुँड के पत्तों का रस मिलाकर घिसने से बालकों का मुखपाक शीघ्र ही नष्ट होता है॥ ६५॥

लावतित्तिरिवल्लूररसःपुष्परसान्वितः। द्रुतं करोति बालानां मुखरोगारहन्मुखम्॥ ६६॥

लवा और तीतर के मांस का रस शहद में मिलाकर पिलाने से बालकों का मुख मुखरोगों से मुक्त हो जाता है। तात्पर्य यह है कि इनके सेवन करने से मुखपाक रोग शीघ्र ही नष्ट हो जाता है॥ ६६॥

दन्तोद्भवेषु रोगेषु न बालमतियन्त्रयेत् । स्वयमेवोपशाम्यन्ति जातदन्तस्य ते गदाः ॥ ६७ ॥

दाँत निकलने के कारण उत्पन्न हुए रोगों में बालक को औषधि आदि से अधिक पीड़ित न करना चाहिए; क्योंकि दाँत निकल आने पर वे रोग आप ही शान्त हो जाते हैं ॥ ६७ ॥

पूतिकर्ण चिकित्सा ।

बिभीतकफलं कुष्ठं हरितालं मनःशिला । एभिस्तैलं विपक्तव्यं बालानां पूतिकर्णके ॥ ६८ ॥

बहेड़ा, कूट, हरताल और मैनशिल के कल्क द्वारा पकाया हुआ तेल बालकों के कान में डालने से पूतिकर्ण रोग शान्त होता है ॥ ६८ ॥

हिक्काचिकित्सा ।

पञ्चमूलीकषायेण सघृतेन पयः शृतम् । सशृङ्गवेरं सगुडं शीतं हिक्कार्दितः पिबेत् ॥ ६९ ॥

स्वल्पपञ्चमूल के काढ़े में ( अष्टमांश ) घृत और ( चतुर्थांश ) दूध डालकर पकावे । जब जलमात्र जल जाय तब गुड़ और सोंठ का चूर्ण डालकर ठंडा करके हिचकी से पीड़ित बालक को पिलाना चाहिए ॥ ६९ ॥

सुवर्णगैरिकस्यापि चूर्णानि मधुना सह । लीढं सुखमवाप्नोति क्षिप्रं हिक्कार्दितः शिशुः ॥ ७० ॥

सुनहले गेरू के चूर्ण में शहद मिलाकर चटाने से हिचकी से पीड़ित बालक शीघ्र ही सुखी हो जाता है । मात्रा-एक वर्ष के बालक के लिये १/२ रत्ती से १/४ रत्ती तक ॥ ७० ॥

चित्रकं शृङ्गवेरञ्च तथा दन्ती गवाक्ष्यपि । चूर्णं कृत्वा तु सर्वेषां सुखोष्णेनाम्बुना पिबेत् ॥ कासं श्वासमथो हिक्कां कुमाराणां प्रणाशयेत् ॥ ७१ ॥

चीता की जड़, सोंठ, दन्ती और इन्द्रायण इनका चूर्ण बनाकर किञ्चित् गरम जल के साथ पीने से बालकों की खाँसी, श्वास और हिचकी नष्ट होती है । मात्रा-एक वर्ष के बालक के लिये १/२ रत्ती से १/४ रत्ती तक ॥ ७१ ॥

कासश्वास चिकित्सा ।

द्राक्षायासाभयाकृष्णाचूर्णं सक्षौद्रसर्पिषा । लीढं कासं निहन्त्याशु श्वासं च तमकं तथा ॥ ७२ ॥

दाख, जवासा, हड़ और पीपरि ; इनके चूर्ण में शहद और घृत मिलाकर चटाने से खाँसी, श्वास और तमकश्वास नष्ट होता है ॥ ७२ ॥

पुष्करादि चूर्ण ।

पुष्करातिविषाशृङ्गीमागधीधन्वयासकैः । तच्चूर्णं मधुना लीढं शिशूनां पञ्चकासनुत् ॥ ७३ ॥

पोहकरमूल, अतीस, काकड़ासिंगी, पीपरि और जवासा; इनके चूर्ण में शहद मिलाकर चटाने से बालकों के पाँचों प्रकार के कास नष्ट होते हैं । मात्रा—एक वर्ष के बालक को १ रत्ती ॥ ७३ ॥

तृष्णा में दाडिमादि चूर्ण ।

दाडिमस्य च बीजानि जीरकं नागकेशरम् । चूर्णितं शर्कराक्षौद्रलीढं तृष्णानिवारणम् ॥ ७४ ॥

अनारदाना, जीरा और नागकेशर के चूर्ण में शक्कर तथा शहद मिलाकर चटाने से तृष्णा ( प्यास ) शान्त होती है । मात्रा—एक वर्ष के बालक को २ रत्ती ॥ ७४ ॥

मयूरपक्षभस्माम्बुपितजलं तेन भावितं पेयम् । तृष्णाघ्नं वटकाम्रजम्बूजलं वक्त्रशोषजिद्वक्त्रे ॥ ७५ ॥

मयूरपंख की भस्म को जल में मिलाकर रख छोड़े, दूसरे दिन छानकर पिलावे तो बालकों की तृष्णा शान्त होती है । इसी

प्रकार बरगद की छाल की भस्म को जल में घोलकर रख दे। दूसरे दिन छानकर पिलावे तो इससे भी बालकों की तृष्णा शान्त होती है ॥ ७५ ॥

नेत्ररोग चिकित्सा।

पिष्टैश्छागेन पयसा दार्वीमुस्तकगैरिकैः। बहिरालेपनं शस्तं शिशोर्नेत्रामयार्त्तिजित् ॥ ७६ ॥

दारुहल्दी, नागरमोथा और गेरू; इनको बकरी के दूध में पीसकर आँखों के बाहर लेप करने से बालक के नेत्ररोग नष्ट होते हैं ॥ ७६ ॥

मनःशिला शङ्खनाभिः पिप्पल्योऽथ रसाञ्जनम्। वर्त्तिः क्षौद्रेण संयुक्ता बाले सर्वाक्षिरोगनुत् ॥ ७७ ॥

मैनशिल, शंखनाभि, पीपरि और रसौत; इनको जल में घोटकर बत्ती बना ले। इसको शहद में घिसकर लगाने से बालकों की आँखों के सब रोग शान्त होते हैं ॥ ७७ ॥

मातुस्तन्यकटुस्नेहकाञ्जिकैर्भावितो जयेत्। स्वेदाद्दीपशिखातप्तो नेत्रामयमलक्तकः ॥ ७८ ॥

माता का दूध, कड़ुआ तेल और काँजी से लाक्षारसयुक्त रुई को भावित करके दीपक की शिखा पर गरम कर आँखों को स्वेदित करने से नेत्र रोग नष्ट होते हैं ॥ ७८ ॥

कुकूणक रोग में आश्च्योतन।

शुण्ठीभृङ्गनिशाकल्कः पुटपक्वः ससैन्धवः। कुकूणकेऽक्षिरोगेषु तद्रसाश्च्योतनं हितम् ॥ ७९ ॥

सोंठ, भँगरा, हल्दी और सैंधानमक इनके कल्क को पुटपाक की विधि से पकाकर रस निचोड़ ले और नेत्रों में टपकावे तो कुकूणक तथा अन्य नेत्ररोग शान्त होते हैं ॥ ७९ ॥

कृमिघ्नालशिलादार्वीलाक्षाचन्दनगैरिकैः। चूर्णाञ्जनं कुकूणे स्यात् शिशूनां पोथकीषु च ॥ सुदर्शनामूलचूर्णाञ्जनं स्याच्च कुकूणके ॥ ८० ॥

वायविडंग, हरताल, मैनशिल, दारुहल्दी, लाख, लालचन्दन और गेरू; इनके चूर्ण का अंजन करना कुकूणक और पोथकी ( Granular lids ) रोग को नष्ट करता है। तथा सुदर्शन की जड़ के चूर्ण का अंजन करना कुकूणक रोग में हितकारी होता है ॥ ८० ॥

सिध्मादि चिकित्सा।

गृहधूमनिशाकुष्ठराजिकेन्द्रयवैः शिशोः। लेपस्तक्रेण हन्त्याशु सिध्मपामाविचर्चिकाः ॥ ८१ ॥

गृहधूम ( घर का धुआँ ), हल्दी, कूट, राई और इन्द्रजौ, इनको छाछ के साथ पीसकर लेप करने से सेंहुआ, पामा और विचर्चिका रोग शीघ्र नष्ट होते हैं ॥ ८१ ॥

अश्वगन्धा घृत।

पादकल्केऽश्वगन्धायाः क्षीरे दशगुणे पचेत्। घृतं पेयं कुमाराणां पुष्टिकृद्बलवर्द्धनम् ॥ ८२ ॥

घृत १ सेर, कल्क के लिए असगंध १ पाव और दूध १० सेर। विधि से घृत सिद्ध कर बालकों को पिलाने से पुष्ट करता है तथा बल को बढ़ाता है। मात्रा—एक वर्ष के बालक के लिये ३-४ बूँद ॥ ८२ ॥

बालचाङ्गेरी घृत।

चाङ्गेरीस्वरसे सर्पिश्छागक्षीरसमं पचेत्। कपित्थव्योषसिन्धूत्थसमङ्गोत्पलवालकैः ॥ ८३ ॥ सबिल्वधातकीमोचैः सिद्धं सर्वातिसारनुत्। ग्रहणीं दुस्तरां हन्ति बालानां तु विशेषतः ॥ ८४ ॥

चांगेरी का स्वरस ८ सेर, बकरी का दूध २ सेर, घृत १ सेर। कल्क के लिए—कैथ, त्रिकुटा ( सोंठ, मिर्च, पीपरि ), सेंधानमक

मँजीठ, नीलकमल, सुगन्धबाला, बेलगिरी, धाय के फूल और मोचरस; सब मिलाकर आध सेर। विधि से घृत सिद्धकर बालकों को पिलाने से यह बालचाङ्गेरी घृत सब प्रकार के अतीसार और कठिनतर संग्रहणी रोगों को नष्ट करता है। मात्रा—एक वर्ष के बालक के लिये ३-४ बूँद ॥ ८३-८४ ॥

कुमारकल्याण घृत।

शङ्खपुष्पी वचा ब्राह्मी कुष्ठं त्रिफलया सह। द्राक्षा सशर्करा शुण्ठी जीवन्ती जीरकं बला ॥ ८५ ॥ शटी दुरालभा बिल्वं दाडिमं सुरसा स्थिरा। मुस्तं पुष्करमूलं च सूक्ष्मैला गजपिप्पली ॥ ८६ ॥ एषां कर्षसमैर्भागैर्घृतप्रस्थं विपाचयेत्। कषाये कण्टकार्याश्च क्षीरे तस्मिंश्चतुर्गुणे ॥ ८७ ॥ एतत् कुमारकल्याणं घृतरत्नं सुखप्रदम्। बलवर्णकरं धन्यं पुष्ट्यग्निरुचिवर्द्धनम् ॥ ८८ ॥ छाया-सर्वग्रहालक्ष्मीकृमिदन्तगदापहम्। सर्व-बालामयं हन्ति दन्तोद्भेदं विशेषतः ८९

अष्टमङ्गल घृत।

कल्क के लिए शंखपुष्पी (शंखाहुली), वच, ब्राह्मी, कूट, त्रिफला, दाख, शक्कर, सोंठ, जीवन्ती, जीरा, खरेंटी, कचूर, जवासा, बेलगिरी, अनारदाना, तुलसी, शालपर्णी, नागरमोथा, पोहकरमूल, छोटी इलायची और गजपीपरि; प्रत्येक एक एक तोला, कटेरी का काढ़ा ६ सेर ३२ तोले, दूध ६ सेर ३२ तोले, घृत १२८ तोले। विधि से घृत सिद्ध करना चाहिए। रत्नरूपी यह कुमारकल्याण घृत बालकों को सुख देनेवाला, वर्ण, पुष्टि, जठराग्नि और रुचि को बढ़ानेवाला है तथा छाया, सब ग्रहों की पीड़ा, अलक्ष्मी, कृमि-दन्त, दन्तोद्भव एवं सब प्रकार के बालरोगों को नष्ट करता है। मात्रा—एक वर्ष के बालक के लिये ३-४ बूँद ॥ ८५-८९ ॥

अष्टमङ्गल घृत।

वचा कुष्ठं तथा ब्राह्मी सिद्धार्थकमथापि च। शारिवा सैन्धवं चैव पिप्पली घृतमष्टमम् ॥ ९० ॥ मेध्यं घृतमिदं सिद्धं पातव्यं च दिने दिने। दृढस्मृतिः क्षिप्रमेधाः कुमारो बुद्धिमान् भवेत् ॥ ९१ ॥ न पिशाचा न रक्षांसि न भूता न च मातरः। प्रभवन्ति कुमाराणां पिबतामष्टमङ्गलम् ॥ ९२ ॥

कल्क के लिए वच, कूट, ब्राह्मी, श्वेत सरसों, अनन्तमूल, सेंधानमक और पीपरि; सब मिलाकर आध सेर। घृत २ सेर। पाकार्थ जल ८ सेर। यथाविधि घृत सिद्ध करना चाहिए। इस घृत को प्रतिदिन मात्रानुसार पिलाना चाहिए। इसके सेवन से बालक की स्मरणशक्ति, मेधा और बुद्धि की वृद्धि होती है। इस अष्टमंगल घृत के पिलाने से बालकों को पिशाच, राक्षस, भूत और मातृकाएँ नहीं सता सकती हैं। मात्रा—एक वर्ष के बालक के लिये ३-४ बूँद ॥ ९०-९२ ॥

लाक्षादि तैल।

लाक्षारससमं सिद्धं तैलं मस्तु चतुर्गुणम्। रास्नाचन्दनकुष्ठाब्दवाजिगन्धानिशायुगैः ॥ ९३ ॥ शताह्वादारुयष्ट्याह्वमूर्वातिक्ताहरेणुभिः। बालानां ज्वररक्षोघ्नमभ्यङ्गाद्बलवर्णकृत् ॥ ९४ ॥

लाख का रस २ सेर, तिल का तेल २ सेर, दही का तोड़ ८ सेर। कल्क के लिये रासना, लाल चन्दन, कूट, नागरमोथा, असगन्ध, हल्दी, दारुहल्दी, सौंफ, देवदारु, मुलैठी, मूर्वा (मरोरफली), कुटकी और रेणुका; सब मिलाकर आध सेर। यथाविधि तैल सिद्ध कर मालिश करने से यह ज्वर तथा राक्षसबाधा को नष्ट कर बल और वर्ण को बढ़ाता है ॥ ९३-९४ ॥

सर्पत्वक् लशुनं मूर्वा सर्षपारिष्ट-

पल्लवाः । विडाल विड्जालोममेषश्रृङ्गीवचा मधु ॥ धूपः शिशोर्ज्वरघ्नोऽयमशेषग्रह-नाशनः ॥ ६५ ॥

सांप की केंचुल, लहसुन, मूर्वा, सरसों, नीम के पत्ते, बिल्ली की विष्ठा, बकरी के बाल, मेढ़ासिंगी, बच और शहद, इनकी धूप बालक के ज्वर, राक्षस-बाधा और सब ग्रहों की पीड़ा को नष्ट करती है ॥ ९५ ॥

### बालरोगान्तक रस ।

शाणं सूतस्य शुद्धस्य गन्धकस्य च तत्समम् । सुवर्णमाक्षिकस्यापि चार्द्धभागं विनिःक्षिपेत् ॥ ९६ ॥ ततः कज्जलिकां कृत्वा लौहपात्रे दृढे नवे । केशराजस्य भृङ्गस्य निर्गुण्ड्याः पत्रसम्भवम् ॥ ९७ ॥ स्वरसं काकमाच्याश्च ग्रीष्मसुन्दरकस्य च । मूर्यावर्तकशालिञ्च भेकपर्णीरसस्तथा ॥ ९८ ॥ श्वेतापराजितायाश्च मूलं दद्याद्विचक्षणः । देयं रसार्द्धभागेन चूर्णं मरिचसम्भवम् ॥ ९९ ॥ शुभे शिलामये पात्रे लौहदण्डेन मर्दयेत् । शुष्कमातपसंयोगाद् वटिकां कारयेद्भिषक् ॥ १०० ॥ प्रमाणं सर्षपस्येव बालानां विनियोजयेत् । हन्ति त्रिदोषकं चैव ज्वरमामं सुदारुणम् ॥ १०१ ॥ कासं पञ्चविधं चापि सर्वरोगं निहन्ति च । शिशूनां रोगनाशाय निर्मितोऽयं महारसः ॥ १०२ ॥

शुद्ध पारा ३ माशे, गन्धक ३ माशे और स्वर्णमाक्षिक ३ माशे । नये लोहपात्र में पारा और गन्धक की कज्जली करके उसमें स्वर्णमाक्षिक मिलाना चाहिए । फिर भृंगराज (पीला भँगरा), भँगरा और सँभालू के पत्ते, मकोय, ग्रीष्मसुन्दर, सूर्यमुखी, शालिञ्च, मंडूकपर्णी और सफेद अपराजिता की जड़; इन सब के रस की भावना देकर 10 माशे कालीमिर्च डालकर पत्थर के खरल में लोहे की मूसली से घोटकर सरसों के बराबर गोलियाँ बना ले और धूप में सुखा ले । यह सन्निपात, आमज्वर, पाँचों प्रकार की खाँसी और सब रोगों को नष्ट करता है । बालकों के रोगों को नष्ट करने के लिए यह महारस बनाया गया है ॥ ९६-१०२ ॥

### कुमारकल्याण रस ।

सिन्दूरं मौक्तिकं हेम व्योमयो हेममाक्षिकम् । कन्यातोयेन संमर्द्य कुर्यान्मुद्गमिता वटीः ॥ १०३ ॥ वटिकां वटिकार्द्धं वा वयोऽवस्थां विविच्य च । क्षीरेण सितया सार्द्धं बालेषु विनियोजयेत् ॥ १०४ ॥ कुमाराणां ज्वरं श्वासं वमनं पारिगर्भिकम् । ग्रहदोषांश्च निखिलान् स्तन्याग्रहणं तथा ॥ १०५ ॥ कामलामतिसारं च कृशतां वह्निवैकृतम् । रसः कुमारकल्याणो नाशयेन्नात्र संशयः १०६॥

रससिन्दूर, मोती की भस्म, स्वर्णभस्म, अभ्रकभस्म, लोहभस्म और स्वर्णमाक्षिकभस्म; इनको घीकुवार के रस में घोटकर मूँग के बराबर (आधी रत्ती) गोलियाँ बना ले । एक गोली अथवा आधी गोली, आयु और अवस्था का विचार करके, दूध और मिश्री के साथ बालकों को सेवन कराना चाहिए । यह कुमारकल्याण-रस ज्वर, श्वास, वमन, पारिगर्भिक रोग, सब प्रकार के ग्रहदोष, दूध न पीना, कामला, अतीसार और जठराग्नि के विकार को नष्ट करता है ॥ १०३-१०६ ॥

### दन्तोद्भेदगदान्तक ।

पिप्पलीपिप्पलीमूलचव्यचित्रकनागरैः ॥ अजमोदायमानीभ्यां निशया मधुकेन च ॥ ॥ १०७ ॥ दारुदार्वीविडङ्गैलानागकेशरनीरदैः । शठीभृङ्गीविडङ्गव्योम्ना शङ्खयोर्हेममाक्षिकैः ॥ १०८ ॥ विधाय पयसा पिष्टैर्वटिका मुद्गसम्मिता । दन्त-

पर्येऽभ्यवहृतौ योजयेच प्रयोगवित् ॥ १०९ ॥ प्रयोगादस्य दन्तानां स्वरयोद्गमतो गदाः । ज्वराक्षेपातिसाराद्या निवर्तन्ते न संशयः ॥ ११० ॥

पीपरि, पीपरामूल, चव्य, चीता की जड़, सोंठ, अजमोद, अजवाइन, हल्दी, मुलेठी, देवदारु, दारुहल्दी, वायविडंग, छोटी इलायची, नागकेसर, नागरमोथा, कपूर, काकड़ासिंगी, पिप्पलमूल, अभ्रकभस्म, शंखभस्म, लोहभस्म और स्वर्णमाक्षिक की भस्म; इन सबको सम भाग ले दूध में घोटकर तीन-तीन रत्ती की गोलियाँ बना ले। प्रयोग का जाननेवाला वैद्य बालकों के मसूड़ों पर इसको घिसे तथा अवस्थानुसार मात्रा में सेवन करावे। इसके प्रयोग से दाँत बहुत शीघ्र निकल आते हैं तथा दाँत निकलने के कारण से उत्पन्न हुए ज्वर, आक्षेप तथा अतीसार आदि रोग निःसन्देह निवृत्त हो जाते हैं ॥ १०७-११० ॥

लवङ्गचतुःसम।

जातीफलं त्रिदशपुष्पसमन्वितं च जीरं च टङ्कनयुतं चरकैः प्रयुक्तम्। चूर्णानि माक्षिकसितासहितानि लीढ्वा सामातिसारमखिलं गुरु हन्ति शूलम् ॥ १११ ॥

जायफल, लवङ्ग, जीरा और सोहागा; इनके समभाग चूर्ण में शहद और मिश्री मिलाकर चटाने से सब प्रकार का आमातीसार और भयंकर शूलरोग नष्ट होता है। मात्रा-एक वर्ष के बालक के लिये ½ रत्ती से एक रत्ती तक ॥ १११ ॥

दाडिमचतुःसम।

एतद्द्रव्यचतुष्कं चेद् दाडिमीफलमध्यगम्। पुटपकं पयःपिष्टं तद्दाडिमचतुःसमम् ॥ ११२ ॥

पयोऽत्र छाग्याः, तस्यातिसारहरत्वात्। पयःशब्दोऽत्र जलवाचकमिति केचित्।

उपर्युक्त चारों औषधियों को बीज निकले हुए अनार के भीतर भरकर पुटपाक की विधि से पका लें, पश्चात् बकरी के दूध में अथवा जल में पीसना चाहिए। यह दाडिमचतुःसम योग है। यहाँ बकरी का दूध इसलिए ग्रहण किया है कि वह अतीसार को नष्ट करनेवाला है। कोई आचार्य तो यहाँ पयःशब्द से जल ही ग्रहण करना बताते हैं। मात्रा-½ रत्ती से १ रत्ती तक ॥ ११२ ॥

पिप्पल्याद्य घृत।

पिप्पलीधातकीपुष्पधात्रीफलकशेरुभिः ध्वाङ्क्षर्यमृताषाढाकटुकातिविषाघनैः ॥ ११३ ॥ जीवनीयैर्घृतं सिद्धं शस्तं दशनजन्मनि। सुखोष्णेन यथामात्रं पयसैतत् प्रपाययेत् ॥ ११४ ॥

पीपरि, धाय के फूल, आँवला, कसेरू, वच, मूर्वा, गिलोय, पाढ़, कुटकी अतीस, नागरमोथा और जीवनीयगण की सब औषधियाँ आध सेर लेकर कल्क बनावे। घृत २ सेर, पाकार्थ जल ८ सेर। विधि से घृत सिद्ध करे। इसको उचित मात्रा में किंचित् गर्म दूध के साथ दाँत निकलने के समय बालक को पिलाना बहुत हितकर होता है ॥ ११३-११४ ॥

शिवमोदक।

शिवा तामलकी मूर्वा शतपुष्पा निशाद्वयम्। आत्मगुप्ता बला निम्बं देवपुष्पं शतावरी ॥ ११५ ॥ मुरा मधुरिका मांसी विदारी विश्वभेषजम्। अनन्तामलकी श्यामा भार्गी करिकणा कणा ॥ ११६ ॥ चातुर्जातं चतुर्बीजं चन्दनं रक्तचन्दनम्। मुशली वाजिगन्धा च बीजं गोक्षुरसम्भवम् ॥ ११७ ॥ सर्वाण्येतानि तुल्यानि द्राक्षा सर्वसमा मता। सिता द्राक्षासमा

चैवेत्येतानि मधुना सह ॥ ११८ ॥ संमर्द्य मोदकान् कृत्वा माषकप्रमितान् भिषक् । एकैकमेषां पयसा प्रातः प्रातः प्रयोजयेत् ॥ ११९॥ बालानां सर्वरोगघ्नं पुष्टिकृद्बलवर्द्धनम् । परं वह्निकरं मेध्यमायुष्यं ग्रहदोषहृत् ॥ १२० ॥ भगमत्यै समुदितं शिवायै लोकमङ्गलम् । एतन्मोदकमीशेन युगे भगवता कृते ॥ १२१ ॥

दूब, भुई आंवला, मूर्वा, सोया के बीज, हल्दी, दारुहल्दी, कौंच के बीज, एरंडी, बेलगिरी, वायड़, शतावरी, मुरामांसी, सौंफ, जटामांसी, विदारीकन्द, सोंठ, अनन्तमूल, आंवला, कालीसर, भारंगी, गजपीपरि, पीपरि, चातुर्जात, ( दालचीनी, छोटी इलायची, तेजपात, नागकेशर ), चतुर्बीज ( मेथी, चमसुर, काला जीरा, अजवायन ) सफेद चन्दन, लाल चन्दन, मुसली, असगन्ध और गोखुरू के बीज, सब समान भाग । सबके बराबर मुनक्का और मुनक्का के बराबर खाँड, इन सबको शहद के साथ घोटकर एक-एक माशा के लड्डू बनाकर प्रातः काल दूध के साथ एक-एक लड्डू खावे । यह मोदक सब रोगों को नष्ट करके बालकों को पुष्ट कर देता है तथा बल को बढ़ाता, जठराग्नि को दीप्त करता, पवित्र, आयु बढ़ानेवाला और ग्रहदोषों को दूर करनेवाला है । शंकरजी ने सतयुग में इस लोकमंगल मोदक को भगवती पार्वतीजी से कहा था ॥ ११२-१२१ ॥

### सर्वौषधिस्नान ।

मुरामांसी वचा कुष्ठं शैलेयं रजनीद्वयम् । शटी चम्पकमुस्तं च सर्वौषधिगणः स्मृतः ॥ १२२ ॥ सर्वौषध्यम्बुना स्नानं बालानां गदनाशनम् । ग्रहरक्षा भगमलमायुष्यं कान्तिवर्द्धनम् ॥ १२३ ॥

मुरामांसी, वच, कूट, भारछरीला, हल्दी, दारुहल्दी, कचूर, चम्पा और मोथा, यह सर्वौषधिगण कहाता है । इन ओषधियों के जल से बालकों को स्नान कराने से सब रोग नष्ट होते हैं । तथा ग्रह और राक्षसभय शान्त होते हैं और आयु तथा कीर्ति की वृद्धि होती है ॥ १२२-१२३ ॥

### कण्टकारी घृत ।

कण्टकार्या बृहत्याश्च भार्गीवासकयोरपि । स्वरसेन तथा छागक्षीरेण विपचेद्घृतम् ॥ १२४ ॥ कल्कैः करिकणाकृष्णामरिचैर्मधुकेन च । वचाग्रन्थिकमांसीभिरचव्यचित्रकचन्दनम् ॥१२५॥मुस्तामृतामलयजैर्यमान्या जीरकेण च । पलाविश्वौषधाभ्यां च द्राक्षादाडिमदारुभिः ॥ १२६ ॥ सिद्धमेतद्घृतं सद्यः शिशूनां श्वासकासहृत् । ज्वरारोचकशूलघ्नं कफनुद्बलवह्निकृत् ॥ १२७ ॥

कटेरी का रस ४ सेर, बड़ी कटेरी का रस ४ सेर, भारंगी का रस ४ सेर, अडूसे का रस ४ सेर और बकरी का दूध ४ सेर, गोघृत २ सेर । कल्क के लिए गजपीपरि, पीपरि, मिर्च, मुलेठी, वच, पीपलामूल, जटामांसी, चव्य, चित्रक, लाल चन्दन, मोथा, गिलोय; सफेद चन्दन, अजवाइन, जीरा, खरैटी, सोंठ, मुनक्का, अनारदाना और देवदारु; सब मिलाकर पाव सेर । यथाविधि घृत सिद्धकर बालकों को उचित मात्रा में सेवन कराने से यह श्वास, खाँसी, ज्वर, अरुचि, शूल और कफरोग को नष्ट करता तथा बल और अग्नि को दीप्त करता है । मात्रा १-८ वर्ष के बच्चे को ४-५ बूँद ॥ १२४-१२७ ॥

### व्याघ्रीतैल ।

व्याघ्रीशामककपित्थानां नैगरागजस्य चाम्बुना । काञ्जिकेन तथा कल्कैर्मुस्तमोचरसाञ्जनैः ॥ १२८ ॥ समाहारप्याद्वसारास्नानिशामुग्रैः । चन्दनद्वयमञ्जिष्ठामिषद्ग्रुत्पलकेशरैः ॥१२९॥शान-

पर्णीपृश्निपर्णीचातुर्जातकबालकैः। मृदः पात्रे पचेत्तैलमरिष्टेन्धनवह्निना ॥ १३० ॥ श्वासं कासं च बालानां ज्वरं वन्हेश्च वैकृतम् ॥ व्याघ्रीतैलमिदं हन्यात्सर्वगदान् निखिलानपि ॥ १३१ ॥

छोटी कटेरी, अरूसा, बेल की छाल, भँगरा; इनका चार-चार सेर रस, काँजी ४ सेर। तैल २ सेर। कल्क के लिए नागरमोथा, मोचरस, रसौत, सोवा के बीज, देवदारु, मुलेठी, खरेंटी, रास्ना, हल्दी, दारुहल्दी, लाल चन्दन, सफेद चन्दन, मँजीठ, प्रियंगु, कमल की केशर, शालपर्णी, पृश्निपर्णी, चातुर्जात (दालचीनी, छोटी-इलायची, तेजपात, नागकेशर) और सुगन्धबाला; ये सब मिलाकर आध सेर। इस तैल को मिट्टी के पात्र में नीम की लकड़ी की अग्नि से विधिपूर्वक सिद्ध करना चाहिए। इस व्याघ्री तैल की मालिश करने से बालकों के श्वास, कास, ज्वर, अग्निविकार और संपूर्ण सर्वरोग नष्ट होते हैं ॥ १२८-१३१ ॥

## शंखपुष्पी तैल।

शङ्खपुष्पीमहानिम्बवासानामर्जुनस्य च। स्वरसेनारनालेन लाक्षातोयेन मस्तुना ॥ १३२ ॥ कल्कैश्च दाडिमीदारुनिशायुगफलत्रिकैः। चन्दनोशीरमलैश्च श्रीखण्डमधुकाम्बुदैः ॥ १३३ ॥ श्यामाशैवालशेफालीरक्तोत्पलरसाञ्जनैः। गन्धद्रव्यैश्च निखिलैः पचेत्तैलं तिलोद्भवम् ॥ १३४ ॥ मर्योगादस्य नश्यन्ति बालानामखिला गदाः। कान्तिर्मेधा धृतिः पुष्टिर्वर्द्धते नात्र संशयः ॥ १३५ ॥ कल्याणाय कुमाराणां कपर्दी करुणाकरः। ससर्जेदं शङ्खपुष्पीतैलं भुवनमङ्गलम् ॥ १३६ ॥

शंखाहुली, बकायन की छाल, अरूसा और अर्जुन की छाल, प्रत्येक का स्वरस अथवा काढ़ा चार-चार सेर। काँजी ४ सेर, लाख का काढ़ा ४ सेर। और दही का तोड़ ४ सेर। तिलतैल ४ सेर। कल्क के लिए अनारदाना, देवदारु, हल्दी, दारुहल्दी, त्रिफला, लाल चन्दन, खस, सुगन्धबाला, सफेद चन्दन, मुलेठी, मोथा, कालीसारिवा, सिवाल, हरसिंगार की छाल, लाल कमल, रसौत, सब मिलाकर १ सेर। तथा संपूर्ण गन्धद्रव्य डालकर तैल सिद्ध करे। यह तैल मालिश करने से बालकों के संपूर्ण रोगों को नष्ट करता है। तथा कान्ति, मेधा, धारणाशक्ति और पुष्टि की वृद्धि करता है, इसमें संशय नहीं है। बालकों के कल्याण के लिए शिवशंकरजी ने इस भुवन-मंगलप्रद शंखपुष्पी तैल को रचा था ॥ १३२-१३६ ॥

## अरविन्दासव।

अरविन्दमुशीरं च काश्मरीं नीलमुत्पलम्। मञ्जिष्ठैलाबलामांसीरम्बुदं सारिवां शिवाम् ॥ १३७ ॥ विभीतकवचाधात्रीः शटीं श्यामां सनीलिनीम्। पटोलं पर्पटं पार्थं मधूकं मधुकं मुराम् ॥ १३८ ॥ पलमानेन संगृह्य द्राक्षायाः पलविंशतिम्। धातकीं षोडशपलां जलद्रोणद्वये क्षिपेत् ॥ १३९ ॥ शर्करायास्तुलां तत्र तुलार्द्धं माक्षिकस्य च। मासं संस्थापयेद्भाण्डे मृत्तिकापरिनिर्मिते ॥ १४० ॥ बालानां सर्वरोगघ्नो बलपुष्ट्यग्निवर्द्धनः। अरविन्दासवः प्रोक्त आयुष्यो ग्रहदोषहृत् ॥ १४१ ॥

कमल, खस, खम्भारि, नीलकमल, मँजीठ, इलायची, खरेंटी, जटामांसी नागरमोथा, अनन्तमूल, हरड़, बहेड़ा, बच, आँवला, कचूर, कालीसारिवा, नील की जड़, परवल के पत्ते, पित्तपापड़ा, अर्जुन की छाल, महुआ के फूल, मुलेठी और मुरामांसी; प्रत्येक चार-चार तोले। मुनक्का १ सेर। धाय के फूल ६४ तोले। जल २५ सेर ४८ तोले। शक्कर ५ सेर। शहद २॥ सेर; इन सबको एकत्र कर मिट्टी के पात्र में भरकर १ महीने तक धरा रहने दे, फिर छान-

कर उपयुक्त मात्रा में बालकों को सेवन कराने से यह अरविन्दासव सब रोगों को नष्ट करता है तथा आयुवृद्धि और ग्रहदोषों को नष्ट करता है। पूर्ण मात्रा ॥ तोला से २॥ तोले तक ॥ १३७-१४१ ॥

बालकुटजावलेहः

मूलत्वचं वत्सकस्य पलमेकं सुकुट्टितम्। अष्टभागं जलं दत्त्वा चतुर्भागावशेषितम् ॥ १४२ ॥ अतिविषा च पाठा च जीरकं बिल्वमेव च। आम्रास्थिशतपुष्पा च धातकी मुस्तकं तथा ॥ १४३ ॥ जातीफलं च सञ्चूर्ण्य निक्षिपेत्तत्र यत्नतः। बालानामामशूलघ्नं रक्तस्रावं सुदारुणम् ॥ १४४ ॥ अपि वैद्यशतैस्त्यक्तं जयेदेतन्न संशयः ॥ १४५ ॥

कुड़ा की जड़ की छाल ४ तोले कूटकर ३२ तोले जल में पकावे। जब ८ तोले जल बाकी रहे तब छानकर उसमें अतीस, पाढ़ी, जीरा सफेद, बेलगिरी, आम की गुठली की मींगी, सोया के बीज, धाय के फूल, नागरमोथा और जायफल सब मिलाकर ४ तोले पीसकर मिलावे। इसके सेवन से बालकों के आमशूल और कठिनतर रक्तस्राव रोग नष्ट होते हैं, चाहे सैकड़ों वैद्य उसे त्याग चुके हों ॥ १४२-१४५ ॥

रामेश्वररसः।

शाणं सूतस्य गन्धस्य सुवर्णमाक्षिकस्य च। यत्नतः कज्जलीं कृत्वा लौहपात्रे विमर्दयेत् ॥ १४६ ॥ केशराजस्य भृङ्गस्य निर्गुण्ड्याः पर्णसम्भवैः। स्वरसैः काकमाच्याश्च ग्रीष्मसुन्दरकस्य च ॥ १४७ ॥ सूर्यावर्त्तकशालिञ्च भेकपर्णीरसैस्तथा। देयं रसार्द्धभागेन चूर्णं मरिचसम्भवम् ॥ १४८ ॥ श्वेतापराजितायाश्च मूलं दद्याद्विचक्षणः। शुष्कामातपसंसर्गाद् गुटिकां कारयेद् भिषक् ॥ १४९ ॥ प्रमाणं सर्षपाकारं बालानां चैव योजयेत्। हन्ति त्रिदोषसंभूतं ज्वरं घोरं सुदारुणम् ॥ शिशूनां रोगनाशाय विश्वनाथेन निर्मितम् ॥ १५० ॥

शुद्ध पारा ३ माशे, गन्धक ३ माशे और सुवर्णमाक्षिक भस्म ३ माशे। पारा और गन्धक की कज्जली करके सुवर्णमाक्षिक की भस्म डालकर लोह के पात्र में घोटे। इसमें क्रम से केशराज, भँगरा, सँभालू के पत्ते, मकोय, ग्रीष्मसुन्दर, सूर्यमुखी, शालिञ्च और मण्डूकपर्णी इनके रस की भावना दे। इसमें १॥ माशे कालीमिर्च का चूर्ण और १॥ माशे श्वेत अपराजिता की जड़ का चूर्ण मिलाकर सरसों के बराबर गोलियाँ बनाकर धूप में सुखा ले। इसके सेवन करने से बालकों का कठिनतर सान्निपातिक ज्वर नष्ट होता है। बालकों के रोगों को नष्ट करने के लिए विश्वनाथ ने इसको बनाया था ॥ १४६-१५० ॥

भैषज्यं पूर्वमुद्दिष्टं नराणां यज्ज्वरादिषु। कार्यं तदेव बालानां मात्रा तत्र कनीयसी ॥ १५१ ॥

ज्वर आदि रोगों में जो औषधि मनुष्यों के वास्ते कही गई है, वही औषधि बालकों को भी देनी चाहिए। परन्तु मात्रा अवस्थानुसार अवश्य छोटी देनी चाहिए ॥ १५१ ॥

भूतप्रदर्चिकित्सा।

हिङ्गुव्योपालनेपालीलशुनार्कजटाजटाः। अजलोमीसगोलोमीभूतकेशीवचालताः ॥ १५२ ॥ कुक्कुटी सर्पगन्धाख्या तिलाः काणविकाणिके ॥ वज्रप्रोक्ता वयःस्था च शृङ्गी मोहनवल्ल्यपि ॥ १५३ ॥ स्रोतोजाञ्जनरक्तोन्मारक्तोघ्नं चास्यदीपधम्। खराभस्मापिदृष्टचर्म्मगोधानकुलशल्यकान् ॥ १५४ ॥ द्वीपिमार्जारगोसिंह्या-

प्तसामुद्रसत्वतः। चर्मपित्तद्विजनखावर्गेऽस्मिन् साधयेद्घृतम् ॥ १५५ ॥ पुराणमथवा तैलं नवं तत्पाननस्ययोः। अभ्यङ्गे च प्रयोक्तव्यमेतेषां चूर्णश्च धूपने ॥ १५६ ॥ एभिश्च गुटिकां युञ्ज्यादञ्जने सावपीडने। प्रलेपे कल्कमेतेषां क्वाथश्च परिषेचने ॥ प्रयोगोऽयं ग्रहोन्मादान् सापस्मारं शमं नयेत् ॥ १५७ ॥

हींग, त्रिकुटा, हरिताल, मैनशिल, लहसुन, आक की जड़, जटामासी, मेढ़ासिंगी, दूब की जड़, भूतकेशी, बच, प्रियंगु, सेमर, रास्ना, तिल, काकोली, क्षीरकाकोली, थूहर दूध, काकड़ासिंगी, ब्राह्मी, सुरमा, रक्षोघ्न, (सरसों अथवा गूगल) तथा अन्य यथालाभ रक्षोघ्न द्रव्य; गदहा, घोड़ा, भेड़, ऊँट, रीछ, गोह, नकुल, शल्यक, चीता, बिल्ली, गौ, सिंह, व्याघ्र तथा सामुद्रिक जन्तुओं के चर्म, पित्त, दाँत तथा नख; इनका क्वाथ, कल्क आदि द्वारा पुराने घृत अथवा नवीन तैल को विधिपूर्वक सिद्ध करे। इसका पान, नस्य एवं अभ्यङ्ग द्वारा प्रयोग करना चाहिए। धूपनार्थ इन्हीं हींग आदि द्रव्यों के चूर्ण का प्रयोग करना चाहिए। अञ्जनार्थ इन्हीं द्रव्यों से गोली बनावे और जल में घिसकर अञ्जन करे। अवपीडन तथा प्रलेपार्थ इन्हीं द्रव्यों का कल्क बनावे। परिषेचन अथवा स्नानार्थ इन्हीं द्रव्यों का क्वाथ लाभदायक है। ये ग्रह-उन्माद तथा अपस्मार को नष्ट करते हैं॥ १५२-१५७ ॥

भूतरावं घृत।

त्रिकटुकदलकुङ्कुमग्रन्थिककारसिंहीनिशादारुसिद्धार्थयुग्माम्बुशक्राह्वयैः ॥ सितलशुनफलत्रयोशीरतिक्तावचा तुत्थयष्टी बलालोहितैलाशिलापद्मकैः ॥ १५८ ॥ दधितगरमधूकसारप्रियालप्रियालोपाधिपाताक्ष्यशैलैः सवन्यामयैः कल्कितैः। घृतमनलमशेषमूत्रांशसिद्धं मतं भूतरावाह्वयं पानतस्तद् ग्रहघ्नं परम् ॥ १५९ ॥

पुराना घी १२८ तोले, आठों मूत्र (मिलित) ६ सेर ३२ तोले। कल्क के लिये—त्रिकुटा, तेजपात, केशर, पीपलामूल, यवाखार, कटेरी हल्दी, देवदारु, सफेद सरसों, लाल सरसों, गन्धबाला, इंद्रजौ सफेद चन्दन, लहसुन, त्रिफला, खस, कुटकी, बच, तूतिया, मुलेठी, खरेंटी, मँजीठ, इलायची, मैनशिल, पद्माख, दाभ (थोबास चीड़ की लकड़ी अथवा गन्धाबिरोजा), तगर, महुए की लकड़ी, प्रियंगु कलिहारी, अतीस, रसौत, धायपरीवा, कमल, कूट, सब मिलाकर ३२ तोले। विधिपूर्वक घृत पकावे। मात्रा चौथाई तोला। इस घृत के पान से ग्रह नष्ट होते हैं॥ १५८-१५९ ॥

महाभूतरावं घृत।

नतमधुककरञ्जलाक्षापटोलीसमङ्गावचापाटलीहिङ्गुसिद्धार्थसिंहीनिशायुगलरोहिणीः। बदरकटुफलत्रिकाकाशदारुकृमिघ्नाजगन्धामराह्वोलकोशातकीशिग्रुनिम्बाम्बुदेन्द्राह्वयैः ॥ १६० ॥ मदशुकतरुपुष्पबीजोग्रयष्ट्यद्रिकर्णीनिकुम्भाग्निविल्वैः समैः कल्कितैः मूत्रवर्गेण सिद्धं घृतम्। विधिविनिहितमाशु सर्वैः क्रमैर्योजितं हन्ति सर्वग्रहोन्मादकुष्ठज्वरास्तन्महाभूतरावं स्मृतम् ॥ १६१ ॥

गोघृत १२८ तोले, आठों मूत्र मिलाकर ६ सेर ३२ तोले। कल्क के लिये—तगर, मुलैठी, करञ्ज, लाख, पटोल, मँजीठ, बच, पाढ़ल, हींग, सफेद सरसों, बड़ी कटेरी, हल्दी, दारुहल्दी, प्रियंगु, कुटकी, बेर कालीमिर्च, त्रिफला काबद, (चिरायता, अथवा नार) देवदारु, वायविडङ्ग, अजवाईं, गिलोय, अकोल, कड़वी तोरई, सहिजना की छाल, नीम की छाल, मोथा, इन्द्रजौ, कूट, सिरस के फूल और बीज, बचा, (अथवा बीजोग यदि एक पद लिया जाय तो

घास), मुलेठी, गिरिकर्णी, दन्ती, चित्रक और मैल सब मिलाकर ३२ तोले। इनसे विधिपूर्वक घृत सिद्धकर सेवन करने से यह सम्पूर्ण ग्रह, उन्माद, कुष्ठ तथा ज्वर आदि रोगों को नष्ट करता है॥ १६०-१६१॥

सहामुण्डितिकोदीच्यक्काथस्नानं ग्रहापहम्। सप्तच्छदनिशाकुष्ठचन्दनैश्चानुलेपनम्॥ १६२॥

सहा (माषपर्णी), मुण्डी, गन्धबाला; इनके अर्द्धावशिष्ट (आधे बचे हुए) क्वाथ द्वारा स्नान कराने से अथवा सतौना, हल्दी कूठ तथा सफ़ेद चन्दन; इनके लेप करने से सम्पूर्ण ग्रह नष्ट होते हैं॥ १६२॥

महागन्धक।

रसगन्धकयोः कर्षं ग्राह्यमेकं सुशोधितम्। ततः कज्जलिकां कृत्वा मृदुपाकेन साधयेत्॥ १६३॥ जातीफलं तथा कोषं लवङ्गारिष्टपत्रके। सिन्धुवारदलं चैव एलाबीजं तथैव च॥ १६४॥ एषाञ्च कर्षमात्रेण तोयेनाथ विमर्दयेत्। शुक्तागृहे पुनः स्थाप्यं पुटपाकेन साधयेत्॥ १६५॥ घनपङ्कं बहिर्लिप्त्वा पुटमध्ये निधापयेत्। गुञ्जाषट्कप्रमाणेन मत्यहं भक्षयेन्नरः॥ १६६॥ एतत्प्रोक्तं कुमाराणां रक्षणाय महौषधम्। ज्वरघ्नं दीपनं चैव बलवर्णप्रसाधनम्॥ १६७॥ दुर्वारं ग्रहणीरोगं जयत्येव प्रवाहिकाम्। सूतिकाञ्च जयेदेतद्रक्तार्शो रक्तसम्भवम्॥ १६८॥ पिशाचा दानवा दैत्या बालानां विघ्नकारकाः। यत्रौषधवरस्तिष्ठेत्तत्र सीमां न यान्ति ते॥१६९॥ बालानां गदयुक्तानां स्त्रीणाञ्चैव विशेषतः। महागन्धकमेतद्धि सर्वव्याधिनिषूदनम्॥ १७०॥

शुद्ध पारा १ तोला तथा शुद्ध गन्धक १ तोला; इनकी कज्जली करके विधिपूर्वक मृदुपाक द्वारा पर्पटी बनाये। पश्चात् पर्पटी को अच्छे प्रकार पीसकर उसमें जायफल, जावित्री, लौंग, नीम के पत्ते, सँभालू के पत्ते, छोटी इलायची; हरएक का चूर्ण १ तोला मिला दे और थोड़ा सा जल देकर अच्छे प्रकार घोट करके पिण्डाकार कर ले और सीपियों में डालकर सुखा ले, फिर अन्य सीपियों द्वारा बन्द कर दे। पश्चात् बाहर मिट्टी का मोटा घना लेप करके धूप में सुखा ले। तदनन्तर लघुपुट दे। जब गन्धक की गन्ध आने लगे तत्काल बाहर निकाल ले और शीतल होने पर सीपियों को अलग कर औषध चूर्णित कर ले और यदि गोली बनानी हों तो जल में घोटकर गोली बना ले। पूर्णमात्रा—२ रत्ती से ६ रत्ती तक। ग्रहणी रोग में भी इस औषध का वर्णन है; किन्तु वहाँ इसका पाक भिन्न प्रकार से लिखा गया है। कुछ वैद्य पहले पाक के अनुसार ही इसका पाक करते हैं। परन्तु वह इतना लाभदायक नहीं होता जितना कि इस नई विधि के पाक से होता है। इसमें "सिन्धुवारदलं चैव एलाबीजं तथैव च" इत्यादि पाठ अधिक है। यह दोनों द्रव्य भी इस रस की शक्ति को बढ़ाते हैं। बालकों को रोगों से मुक्त करने के लिये यह अत्यन्त उत्कृष्ट औषध है। यह रस ज्वर, ग्रहणी, प्रवाहिका, सूतिकारोग, रक्तज रक्तार्श आदि रोगों को नष्ट करता है। इससे अग्नि उद्दीप्त होती है तथा बल एवं वर्ण की वृद्धि होती है। इस औषध के प्रयोग से पिशाच, दानव तथा दैत्य आदि बालकों के पास नहीं आते। बीमार बालकों तथा स्त्रियों के सम्पूर्ण रोगों को यह महागन्धक नाश करता है॥ १६३-१७०॥

बाल रस।

पलं शुद्धस्य सूतस्य गन्धकस्य पलं तथा। सुवर्णमाक्षिकस्यापि भागार्द्धं सम्प्रकल्पयेत्॥ १७१॥ ततः कज्जलिकां कृत्वा लौहपात्रमये दृढे। केशराजस्य

मृद्गस्य निर्गुण्ड्याः स्वरसेन च ॥ १७२ ॥ शुभे शिलामये पात्रे लौहदण्डेन मर्दयेत् । राजिकासदृशीश्चैव वटिकां कारयेद्भिषक ॥ १७३ ॥ एकैकां वटिकां खादेन्नागवल्लीदल-द्रवैः । हन्ति त्रिदोषसम्भूतं ज्वरञ्चैव सुदारुणम् ॥ १७४ ॥ चिरज्वरञ्च कासञ्च शूलं सर्व-भयं तथा । शिशूनां रोगनाशाय शिवेन परिकीर्त्तितः ॥ १७५ ॥

शुद्ध पारा तथा गन्धक को अलग-अलग ४ तोले की मात्रा में लेकर लोहपात्र में घोटकर कज्जली करके उसमें सुवर्णमाक्षिक भस्म ४ तोले मिलावे पश्चात् पत्थर की खरल में इस औषध् को काल केशराज, भंगरा तथा सँभालू के रस से लौहदण्ड द्वारा घोटकर राई के परिमाण की गोलियाँ बनावे । अनुपान—पान के पत्तों का रस । शिवजी द्वारा कहा हुआ यह रस त्रिदोष ज्वर, जीर्णज्वर, खाँसी, शूल आदि बालकों के रोगों के लिए अत्यन्त लाभदायक है ॥ १७१।७२ ॥

बलिशान्तीष्टकर्माणि कार्याणि ग्रह-शान्तये । मन्त्रस्यार्थं प्रयोक्तव्यस्तत्रादौ सर्वकामिकः ॥ १७६ ॥

मन्त्रो यथा । "ॐ नमो भगवते गरुडाय त्र्यम्बकाय स्वस्त्यस्तु स्वाहा ॐ कं टं यं शं वैनतेयाय ॐ ह्रां ह्रीं क्षः ।"

ग्रहों की शान्ति के लिए बलि, शान्ति और इष्टदेव की पूजा आदि कर्म करना चाहिए, किन्तु सब कामों के आदि में आगे कहे हुए मन्त्र का प्रयोग करना चाहिए ॥ १७६ ॥

मन्त्र जैसे—ॐ नमो भगवते गरुडाय त्र्यम्बकाय स्वस्त्यस्तु स्वाहा । ॐ क ट य श वैनतेयाय ॐ ह्रां ह्रीं क्षः ॥

बालदेहप्रमाणेन पुष्पमालां तु सर्वतः । प्रगृह्य मृच्छिकाभक्तं बलिर्देयस्तु शान्तिकः ॥ १७७ ॥

"ॐकारः स्वर्णपक्षीश बालकं रक्ष रक्ष स्वाहा ।"

बालक की देह के बराबर लंबी पुष्पों की माला ले और मिट्टी के सकोरे ( सराव ) में भात रखकर उसके चारों ओर माला रख दे और "ॐकारः स्वर्णपक्षीश बालकं रक्ष रक्ष स्वाहा" इस मन्त्र को पढ़कर चौराहे पर गरुड़ के लिए बलि दे ॥ १७७ ॥

## अथ रावणकृत

## कुमारतन्त्र ।

ॐ नारायणाय स्वाहा । प्रथमे दिवसे मासि वर्षे वा गृह्णाति नन्दा नाम मातृका । तया गृहीतमात्रेण प्रथमं भवति ज्वरः । अशुभशब्दं मुञ्चति आत्कारं च करोति स्तन्यं न गृह्णाति । बलिं तस्याः प्रवक्ष्यामि येन सम्पद्यते शुभम् ।

नद्युभयतटमृत्तिकां गृहीत्वा पुत्तलिकां कृत्वा शुक्लौदनं शुक्लपुष्पं सप्तध्वजाः सप्त प्रदीपाः सप्त वटकाः सप्त स्वस्तिकाः सप्त शष्कुलिकाः जम्बुडिका गन्धपुष्पं ताम्बूलं मत्स्यं मांसं सुरा अग्रभक्तं च पूर्वस्यां दिशि चतुष्पथे मध्याह्ने बलिर्दातव्यः । अश्वत्थ-पत्रं कुम्भे निःक्षिप्य शान्त्युदकेन स्नाप-येत् । रसोनसिद्धार्थकमेषशृङ्गनिम्बपत्रशिव-निर्माल्यैर्बालकं धूपयेत् ।

"ॐ नमो रावणाय अमुकस्य व्याधिं हन हन मुञ्च मुञ्च ह्रीं फट् स्वाहा ।"

एवं दिनत्रयं बलिं दत्त्वा चतुर्थे दिवसे ब्राह्मणान् भोजयेत् । ततः सम्पद्यते शुभम् ॥ १ ॥

पहले दिन अथवा पहले महीने या पहले वर्ष में नन्दा नाम मातृका बालक को ग्रहण करती

है तब बालक को पहले ज्वर हो जाता है, वह अशुभ शब्द बोलता है अर्थात् बुरी तरह रोता है, आ-आ करता है, दूध नहीं पीता है। उसके निवारण के लिए बलि कहता हूँ, जिससे कल्याण होता है।

"नदी के दोनों किनारों की मिट्टी लेकर एक पुतली अर्थात् मूर्ति बनावे और सफेद भात, सफेद फूल, ७ ध्वजाएँ, ७ दीपक, ७ बरे ( उड़द के बड़े ), ७ स्वस्तिक ( अर्थात् चावलों को पीसकर कुछ मीठा डालकर बनाये हुए ७ तिकोने जो घी में पकाये गये हों ), ७ सुहाली ( छोटी-छोटी पूरियाँ ), उबाले हुए उर्द, रोली, चन्दन, फूल, पान, मछली, मांस, मदिरा और भात ( पके हुए चावल जो पात्र में से सबसे पहिले निकाले जायँ ); इन सब चीजों को इकट्ठा कर पूर्व दिशा में चौराहे पर मध्याह्न के समय बलि ( उतारा ) देना चाहिए। फिर कलश में पीपल का पत्ता छोड़कर शान्तिजल से स्नान कराना चाहिए। और लहसुन, सफेद सरसों, मेढ़े का सींग, नीम के पत्ते और बिल्वपत्र इन सबकी बत्तियों को धूप देना चाहिए। बलि ( उतारा ) देते समय—

" ॐ नमो रावणाय अमुकस्य [1] व्याधिं हन हन मुञ्च मुञ्च ह्रीं फट् स्वाहा।" इस मन्त्र को पढ़ना चाहिए। इस प्रकार तीन दिन बलि देकर चौथे दिन ब्राह्मणों को भोजन कराना चाहिए। इससे बच्चा स्वस्थ हो जाता है ॥ १ ॥

द्वितीये दिवसे मासि वर्षे वा गृह्णाति सुनन्दा नाम मातृका। तया गृहीतमात्रस्य प्रथमं भवति ज्वरः। चक्षुरुन्मीलयति गात्रमुद्वेजयति न शेते क्रन्दति स्तन्यं न गृह्णाति आत्कारं च करोति। बलिं तस्याः प्रवक्ष्यामि येन सम्पद्यते शुभम्।

तण्डुलं हस्तमुष्ट्यैकं गृहीत्वा दधिगुडघृतमिश्रितं कृत्वा शरावैकं गन्धं ताम्बूलं पीतपुष्पं पीतसप्तध्वजाः चत्वारः प्रदीपाः दश स्वस्तिकाः मत्स्यमांससुराग्रभक्ततिलचूर्णानि पश्चिमायां दिशि चतुष्पथे दिवा बलिर्दातव्यः। दिनानि त्रीणि सन्ध्या च। ततः शान्त्युदकेन स्नापयेत्। शिवनिर्माल्यसिद्धार्थकमार्जाररोमोशीरवालकघृतैर्धूपं दद्यात्।

"ॐ नमो रावणाय अमुकस्य व्याधिं हन हन मुञ्च मुञ्च ह्रीं फट् स्वाहा।"

चतुर्थे दिवसे ब्राह्मणान् भोजयेत् ततः सम्पद्यते शुभम् ॥ २ ॥

दूसरे दिन, दूसरे महीने अथवा दूसरे वर्ष में

सुनन्दा नाम मातृका बालक को पकड़ लेती है तब बालक को उसी समय पहले ज्वर हो आता है, आँखें बन्द कर लेता है, अँगड़ाई लेता है, सोता नहीं है, रोता है, दूध नहीं पीता है और आ-आ करता ( उबकाई आती ) है। उसके लिए बलि कहता हूँ, जिससे कल्याण होता है।

एक मुट्ठी चावल लेकर उसमें दही, गुड़ और घृत मिलाकर एक सकोरे में रख ले तथा रोली, चन्दन, पान, पीले फूल, पीली ७ ध्वजाएँ, ४ दीपक, १० घी के पके चावलों के तिकोने, मछली, मांस, मदिरा, भात (भात के पात्र में से पहिले निकाला भाग) और तिल का चूर्ण उसमें रखकर पश्चिम दिशा में चौराहे पर सायंकाल के समय दिन में तीन दिन तक बलि ( उतारा ) देना चाहिए। फिर शान्ति जल से स्नान कराना चाहिए। बिल्वपत्र, सफेद सरसों, बिल्ली के बाल, खस, सुगन्धबाला और घृत मिलाकर धूप देना चाहिए। बलि ( उतारा ) देते समय—

"ॐ नमो रावणाय अमुकस्य व्याधिं हन हन मुञ्च मुञ्च ह्रीं फट् स्वाहा" इस मन्त्र को पढ़ना चाहिए। चौथे दिन ब्राह्मणों को भोजन

१—मंत्र में अमुकस्य के स्थान पर सर्वत्र पकड़ग्रस्त बालक का नाम लेना चाहिए।

कराना चाहिए। इससे बच्चा अच्छा हो जाता है ॥ २ ॥

तृतीये दिवसे मासि वर्षे वा गृह्णाति पूतना नाम मातृका। तया गृहीतमात्रस्य प्रथमं भवति ज्वरः। गात्रमुद्वेजयति स्तन्यं न गृह्णाति मुष्टिं बध्नाति क्रन्दति ऊर्ध्वं निरीक्षते। बलिं तस्याः प्रवक्ष्यामि येन सम्पद्यते शुभम्।

नद्युभयतटमृत्तिकां गृहीत्वा पुत्तलिकां कृत्वा रक्तचन्दनं गन्धं ताम्बूलं रक्तपुष्पं रक्तचन्दनं रक्तसप्तध्वजाः सप्तप्रदीपाः सप्तस्वस्तिकाः पक्षिमांसं सुरा अग्रभक्तं च दक्षिणस्यां दिशि अपराह्णे चतुष्पथे बलिर्दातव्यः। शिवनिर्माल्यगुग्गुलुसर्षपनिम्बपत्रमेषशृङ्गैर्दिनत्रयं धूपयेत्।

"ॐ नमो रावणाय अमुकस्य व्याधिं हन हन मुञ्च मुञ्च हासय हासय स्वाहा।"

चतुर्थे दिवसे ब्राह्मणान् भोजयेत्ततः सम्पद्यते शुभम् ॥ ३ ॥

तीसरे दिन, तीसरे महीने अथवा तीसरे वर्ष पूतना नाम मातृका बालक को पकड़ लेती है तब बालक को उसी समय पहले ज्वर हो जाता है, शरीर को ऐंठने लगता है, दूध नहीं पीता है, मुट्ठी बन्द करके रोता है और ऊपर को देखने लगता है। उसके लिए बलि कहता हूँ, जिससे कल्याण होता है।

नदी के दोनों किनारों की मिट्टी लेकर पुतली ( मूर्ति ) बनावे और लाल चन्दन, रोली, पान, लाल फूल, लाल वर्ण की ७ ध्वजाएँ, ७ दीपक, ७ चावल के तिकोने, पक्षी का मांस, मदिरा और पहला भात ( पात्र के पहिले चावल ); इन सबको एक सकोरे में रखकर दक्षिण दिशा में अपराह्ण के समय चौराहे पर बलि ( उतारा ) दे। फिर बिल्वपत्र, गूगुल, सरसों, नीम के पत्ते और भेड़ा का सींग, इनकी तीन दिन धूप दे। बलि का मन्त्र—

"ॐ नमो रावणाय अमुकस्य व्याधिं हन हन मुञ्च मुञ्च हासयहासय स्वाहा।" चौथे दिन ब्राह्मणों को भोजन करावे तो बालक सुखी होता है ॥ ३ ॥

चतुर्थे दिवसे मासि वर्षे वा गृह्णाति मुखमुण्डितिका नाम मातृका। तया गृहीतमात्रस्य प्रथमं भवति ज्वरः। ग्रीवां नमयति चक्षुरुन्मीलयति स्तन्यं न गृह्णाति रोदिति स्वपिति मुष्टिं बध्नाति बलिं तस्याः प्रवक्ष्यामि येन सम्पद्यते शुभम्।

नद्युभयकूलमृत्तिकां गृहीत्वा पुत्तलिकां कृत्वा उत्पलपुष्पं गन्धं ताम्बूलं दश शुक्लध्वजाः चत्वारः प्रदीपास्त्रयोदश स्वस्तिकाः मत्स्यमांससुरा अग्रभक्तं च उत्तरस्यां दिशि अपराह्णे चतुष्पथे बलिर्देयः।

"ॐ नमो रावणाय अमुकस्य व्याधिं हन हन मुञ्च मुञ्च स्वाहा।"

चतुर्थे दिवसे ब्राह्मणान् भोजयेत् ततः सम्पद्यते शुभम् ॥ ४ ॥

चौथे दिन, चौथे महीने अथवा चौथे वर्ष में मुखमुण्डितिका नाम मातृका बालक को पकड़ लेती है तब उसी समय बालक को पहले ज्वर हो जाता है, गर्दन झुका देता है, आँखें बन्द कर लेता है, दूध नहीं पीता है, रोता है, सोया करता है और मुट्ठी बन्द कर लेता है। उसके बलि कहता हूँ, जिससे कल्याण होता है।

नदी के दोनों किनारों की मिट्टी लेकर मूर्ति ( पुतली ) बनाकर कमल के फूल, रोली, चन्दन, पान, १० सफेद ध्वजाएँ, ४ दीपक, १३ तिकोने, मछली, मांस, मदिरा और पहिला भात; इन सबको सकोरे में रखकर उत्तर दिशा में अपराह्ण के समय चौराहे पर बलि दे। बलि का मन्त्र—

"ॐ नमो रावणाय अमुकस्य व्याधिं ...

हन मुञ्च मुञ्च स्वाहा।" इस प्रकार ३ दिन बलि दे। चौथे दिन ब्राह्मणों को भोजन करावे तो बालक सुखी होता है ॥ ४ ॥

पञ्चमे दिवसे मासि वर्षे वा गृह्णाति कटपूतना नाम मातृका। तया गृहीतमात्रस्य प्रथमं भवति ज्वरः। गात्रमुद्वेजयति मुष्टिं बध्नाति स्तन्यं न गृह्णाति। बलिं तस्याः प्रवक्ष्यामि येन सम्पद्यते शुभम्।

कुम्भकारस्य चक्रमृत्तिकां गृहीत्वा पुत्तलिकां कृत्वा गन्धं ताम्बूलं शुक्लौदनं शुक्लपुष्पं पञ्चध्वजाः पञ्च वटकाः सप्त प्रदीपाः ऐशान्यां दिशि बलिर्दातव्यः। ततः शान्त्युदकेन स्नापयेत्। शिवनिर्माल्यसर्पनिर्मोकगुग्गुलुनिम्बपत्रवालकघृतैर्धूपं दद्यात्।

"ॐ नमो रावणाय अमुकस्य व्याधिं चूर्णय चूर्णय हन हन स्वाहा।"

चतुर्थे दिवसे ब्राह्मणान् भोजयेत् ततः सम्पद्यते शुभम् ॥ ५ ॥

पाँचवें दिन, पाँचवें महीने अथवा पाँचवें वर्ष में कटपूतना नाम मातृका बालक को पकड़ लेती है तब बालक को उसी समय पहले ज्वर हो जाता है, शरीर ऐंठने लगता है, मुट्ठी बन्द कर लेता है तथा दूध नहीं पीता है। उसके लिए बलि कहता हूँ, जिससे कल्याण होता है।

कुम्हार के चाक की मिट्टी लेकर मूर्ति (पुतली) बनाकर रोली चन्दन, पान, सफेद चावल का भात, सफेद फूल, पाँच ध्वजाएँ, पाँच उर्द के बरे, सात दीपक; इन सबको एक सकोरे में रखकर ईशान दिशा में (चौराहे पर) बलि दे। पश्चात् शान्ति के जल से स्नान करावे और शिवपत्र, साँप की केंचुली, गुगुल, नीम के पत्ते, सुगन्धवाला और घृत मिलाकर धूप दे।

बलि का मन्त्र—"ॐ नमो रावणाय अमुकस्य व्याधिं चूर्णय चूर्णय हन हन स्वाहा।" इस प्रकार ३ दिन बलि दे। चौथे दिन ब्राह्मणों को भोजन करावे तो बालक सुखी होता है ॥ ५ ॥

षष्ठे दिवसे मासि वर्षे वा गृह्णाति शकुनिका नाम मातृका। तया गृहीतमात्रस्य प्रथमं भवति ज्वरः। गात्रभेदं दर्शयति दिवारात्रौ उत्तानो भवति ऊर्ध्वं निरीक्षते। बलिं तस्याः प्रवक्ष्यामि येन सम्पद्यते शुभम्।

पिष्टकेन पुत्तलिकां कृत्वा शुक्लौदनं रक्तपुष्पं पीतपुष्पं गन्धं ताम्बूलं दश प्रदीपाः दश पीतध्वजाः दश स्वस्तिकाः दश वटकाः क्षीरजम्बुडिका मत्स्यमांससुरा आग्नेय्यां दिशि निष्क्रान्ते मध्याह्ने बलिर्दातव्यः। शान्त्युदकेन स्नापयेत्। शिवनिर्माल्यरसोनगुग्गुलुसर्पनिर्मोकनिम्बपत्रघृतैर्धूपं दद्यात्।

"ॐ नमो रावणाय अमुकस्य व्याधिं चूर्णय चूर्णय हन हन स्वाहा।"

चतुर्थे दिवसे ब्राह्मणान् भोजयेत्। ततः सम्पद्यते शुभम् ॥ ६ ॥

छठे दिन, छठे महीने अथवा छठे वर्ष में शकुनिका नाम मातृका बालक को पकड़ लेती है तब उसी समय बालक को पहले ज्वर हो जाता है, देह टूटने लग जाती है, दिन-रात चित्त पड़ा रहता है, ऊपर को देखा करता है। इसके लिए बलि कहता हूँ, जिससे कल्याण होता है।

पीठी का पुतला बनाकर सफेद चावलों के भात, लाल फूल, पीले फूल, रोली, चन्दन, पान, १० दीपक, १० पीली ध्वजाएँ, १० तिकोने, १० बरे (उड़द के बड़े), दूध में

उबाले हुए उरद, मछली, मांस और मदिरा ; इनको सैनक ( मिट्टी की तस्तरी ) में रखकर अग्निकोण में, चौराहे पर, मध्याह्न के समय बलि दे। पश्चात् शान्तिजल से स्नान कराकर बिल्वपत्र, लहसुन, गूगुल, सर्प की केंचुल, नीम के पत्ते और घृत की धूप दें।

बलि का मन्त्र—"ॐ नमो रावणाय अमुकस्य व्याधिं चूर्णय चूर्णय हन हन स्वाहा।" इस प्रकार ३ दिन बलि देकर चौथे दिन ब्राह्मणों को भोजन करावे तो बालक सुखी होता है। अमुकस्य के स्थान पर बालक का षष्ठ्यन्त नाम रखना चाहिए ॥ ६ ॥

सप्तमे दिवसे मासि वर्षे वा गृह्णाति शुष्करेवती नाम मातृका। तया गृहीतमात्रस्य प्रथमं भवति ज्वरः। गात्रमुद्वेजयति मुष्टिं बध्नाति रोदिति। बलिं तस्याः प्रवक्ष्यामि येन सम्पद्यते शुभम्।

रक्तपुष्पं शुक्लपुष्पं गन्धं ताम्बूलं रक्तौदनं कृशराः त्रयोदश स्वस्तिकास्त्रयोदश शष्कुलिका जम्बुडिका मत्स्यमांससुराः त्रयोदश ध्वजाः पञ्च प्रदीपाः पश्चिमे दिग्भागे ग्रामनिष्क्रान्ते अपराह्णे वृक्षमाश्रित्य बलिं दद्यात् ततः शान्त्युदकेन स्नापयेत्। गुग्गुलुमेषशृङ्गसर्षपोशीरबालकघृतैर्धूपयेत्।

"ॐ नमो रावणाय दीप्तदेहाय अमुकस्य व्याधिं हन हन मुञ्च मुञ्च स्वाहा।"

चतुर्थे दिवसे ब्राह्मणान् भोजयेत् ततः सम्पद्यते शुभम् ॥ ७ ॥

सातवें दिन, सातवें महीने अथवा सातवें वर्ष में शुष्करेवती नाम मातृका बालक को पकड़ लेती है तब उसी समय बालक को पहले ज्वर हो जाता है, शरीर ऐंठता है और मुट्ठी बांधकर रोता है। उसके लिए बलि कहता हूँ, जिससे कल्याण होता है।

लाल फूल, सफेद फूल, रोली, चन्दन, पान, लाल भात, तिल और चावल की खिचड़ी, १३ तिकोने, १३ पूड़ियाँ, उबाले हुए उर्द, मछली, मांस, मदिरा, १३ ध्वजाएँ, ५ दीपक ; इन सबको सकोरे में रखकर पश्चिम दिशा में गाँव के बाहर अपराह्न के समय वृक्ष की जड़ में बलि दे। फिर शान्तिजल से स्नान कराकर गूगुल, मेढ़ा की सींग, सरसों, खस, नेत्रबाला और घृत की धूप दे।

बलि का मन्त्र—"ॐ नमो रावणाय दीप्तदेहाय अमुकस्य व्याधिं हन हन मुञ्च मुञ्च स्वाहा।" इस प्रकार ३ दिन करे, फिर चौथे दिन ब्राह्मणों को भोजन करावे तो बालक सुखी होता है ॥ ७ ॥

अष्टमे दिवसे मासि वर्षे वा गृह्णाति अर्यमा नाम मातृका। तया गृहीतमात्रस्य प्रथमं भवति ज्वरः। शुभ्रगन्धः पूतिगन्धं च जायते आहारं च न गृह्णाति उद्वेजयति गात्राणि। बलिं तस्याः प्रवक्ष्यामि येन सम्पद्यते शुभम्।

रक्तपीतध्वजाश्चन्दनं पुष्पं शष्कुल्यः पर्पटिका मत्स्यमांससुरा जम्बुविकाः मत्स्यूपे बलिर्दातव्यः सदैव मन्त्रः पाठ्यः।

ॐ नमो रावणाय त्रैलोक्यविद्रावणाय चतुर्दिशां मोक्षणाय अमुकस्य व्याधिं हन हन मुञ्च मुञ्च ज्वल ज्वल दह दह ॐ ह्रीं फट् स्वाहा।"

चतुर्थे दिवसे ब्राह्मणान् भोजयेत्। ततः सम्पद्यते शुभम् ॥ ८ ॥

आठवें दिन, आठवें महीने अथवा आठवें वर्ष में अर्यमा नाम मातृका पकड़ लेती है तब उसी समय बालक को पहले ज्वर हो जाता है। बालक में गीध की-सी तथा सड़ी हुई गन्ध आने लगती है, कुछ खाता-पीता नहीं है तथा शरीर को ऐंठने लगता है। उसके लिए बलि कहता हूँ, जिससे कल्याण होता है।

लाल और पीली ध्वजाएँ, चन्दन, फूल, पूरियाँ, पापड़, मछली, मांस, मदिरा और उबाले हुए उर्द; इनको एक मिट्टी की तश्तरी में रखकर प्रातःकाल ( उषः काल ) चौराहे पर बलि दे और उसी समय यह मन्त्र पढ़े।

"ॐ नमो रावणाय त्रैलोक्यविद्रावणाय चतुर्दिशां मोक्षणाय अमुकस्य व्याधिं हन हन मुञ्च मुञ्च ज्वल ज्वल दह दह ॐ ह्रीं फट् स्वाहा।" इस प्रकार तीन दिन बलि देकर चौथे दिन ब्राह्मणों को भोजन कराने से बालक सुखी होता है ॥ ८ ॥

नवमे दिवसे मासि वर्षे वा गृह्णाति सूतिका नाम मातृका। तया गृहीतमात्रस्य प्रथमं भवति ज्वरः। नित्यं छर्दिर्भवति गात्रभेदं दर्शयति मुष्टिं बध्नाति निद्रातितरां स्यात्। बलिं तस्याः प्रवक्ष्यामि येन सम्पद्यते शुभम्।

नद्युभयकूलमृत्तिकां गृहीत्वा पुत्तलिकां कृत्वा शुक्लवस्त्रेण वेष्टयेत्। शुक्लपुष्पं गन्धं ताम्बूलं शुक्लौदनं त्रयोदश ध्वजास्त्रयोदश प्रदीपास्त्रयोदश स्वस्तिकास्त्रयोदश पूपिका मत्स्यमांससुरा उत्तरस्यां ग्रामनिष्काशे बलिं दापयेत्ततः शान्त्युदकेन स्नापयेत्। गुग्गुलुनिम्बपत्र गोधूमगोशृङ्गश्वेतसर्षपघृतैर्धूपयेत्।

"ॐ नमो रावणाय चतुर्विंशतिभुजाय अमुकस्य व्याधिं मुञ्च मुञ्च हन हन स्वाहा।"

चतुर्थे दिवसे ब्राह्मणान् भोजयेत्। ततः स्वस्थो भवति बालकः ॥ ९ ॥

नवें दिन, नवें महीने अथवा नवें वर्ष में सूतिका नाम मातृका बालक को पकड़ लेती है तब उसी समय बालक को पहले ज्वर हो जाता है, नित्य ही वमन होती है, अंग टूटा करते हैं, मुट्ठी बांध लेता है तथा सोया करता है। उसके लिए बलि कहता हूँ, जिससे कल्याण होता है।

नदी के दोनों किनारों की मिट्टी लेकर मूर्ति ( पुतली ) बनाकर उसे सफेद वस्त्र से लपेट दे। सफेद फूल, रोली, चन्दन, पान, सफेद भात, १३ ध्वजाएँ, १३ दीपक, १३ तिकोने, १३ पुआ, मछली, और मदिरा; इन सबको सकोरे में रखकर उत्तर दिशा में गांव से निकलने के रास्ते पर बलि दे। फिर शान्ति-जल से स्नान करावे और गूगुल, नीम के पत्ते, गेहूँ, गौ का सींग, सफेद सरसों और घृत की धूप दे। बलि का मन्त्र—

"ॐ नमो रावणाय चतुर्विंशतिभुजाय अमुकस्य व्याधिं मुञ्च मुञ्च हन हन स्वाहा।" इस प्रकार तीन दिन बलि देकर चौथे दिन ब्राह्मणों को भोजन करावे तो बालक स्वस्थ ( नीरोग ) हो जाता है ॥ ९ ॥

दशमे दिवसे मासि वर्षे वा यदि गृह्णाति निर्ऋतिर्नाम मातृका तया गृहीतमात्रस्य प्रथमं भवति ज्वरः। गात्रमुद्वेजयति आत्कारं च करोति रोदिति मूत्रं पुरीषं च त्यजति। बलिं तस्याः प्रवक्ष्यामि येन सम्पद्यते शुभम्।

नद्युभयकूलमृत्तिकां गृहीत्वा पुत्तलिकां कृत्वा गन्धं ताम्बूलं रक्तपुष्पं रक्तचन्दनं पञ्चवर्णपञ्चध्वजाः पञ्च प्रदीपाः पञ्च स्वस्तिकाः पञ्च पूपलिका मत्स्यमांससुरा वायव्यां दिशि बलिं दद्यात्। काकविष्ठा-गोमयगोशृङ्गरसोनमार्जाररोमनिम्बपत्रघृतैर्धूपयेत्।

"ॐ नमो रावणाय सूर्यसहस्राय अमुकस्य व्याधिं हन हन मुञ्च मुञ्च स्वाहा॥"

चतुर्थे दिवसे ब्राह्मणान् भोजयेत् । ततः स्वस्थो भवति बालकः ॥ १० ॥

दसवें दिन, दसवें महीना अथवा दसवें वर्ष में निऋति नाम मातृका बालक को पकड़ लेती है तब उसी समय बालक को पहले ज्वर हो जाता है, शरीर ऐंठता है, आध्मान करता है, रोया करता है और मूत्र तथा मल कर देता है। उसके लिए बलि कहता हूँ, जिससे कल्याण होता है।

नदी के दोनों किनारों की मिट्टी लेकर मूर्ति ( पुतली ) बनाकर रोली, चन्दन, पान, लाल फूल, चन्दन, पाँच वर्णों की पाँच ध्वजाएँ, पाँच दीपक, पाँच तिकोने, पाँच पुआ, मछली, मांस और मदिरा; इन सबको सकोरे में रखकर वायव्य दिशा में चौराहे पर बलि दे, फिर बीवा की बीट, गोबर, गौ का सींग, लहसुन, बिल्ली के बाल, नीम के पत्ते और घृत की धूप दे। बलि का मन्त्र—

"ॐ नमो रावणाय शूर्पिणहस्ताय अमुकस्य व्याधि हन हन मुञ्च मुञ्च स्वाहा।" इस प्रकार तीन दिन करके चौथे दिन ब्राह्मणों को भोजन करावे तो बालक स्वस्थ हो जाता है ॥ १० ॥

एकादशे दिवसे मासे वर्षे वा यदि गृह्णाति पिलिपिञ्जिका नाम मातृका। तया गृहीतमात्रस्य प्रथमं भवति ज्वरः। आहारं न गृह्णाति ऊर्ध्वदृष्टिर्भवति। गात्रमङ्गमात्कारं च करोति। बलिं तस्याः प्रवक्ष्यामि येन सम्पद्यते शुभम्।

पिष्टेन पुत्तलिकां कृत्वा रक्तचन्दनाक्तां तस्या मुखं दुग्धेन सेचयेत्। पीतपुष्पं गन्धं ताम्बूलं सप्त पीतध्वजाः सप्त प्रदीपाः अष्टौ वटकाः अष्टौ पूपलिका अष्टौ शष्कुलिका मत्स्यमांससुराः पूर्वस्यां दिशि बलिं दद्यात् शान्त्युदकेन स्नापयेत्। शिवनिर्माल्यगुग्गुलुगोशृङ्गसर्पनिर्मोकघृतैर्धूपयेत्।

"ॐ नमो रावणाय अमुकस्य व्याधिं मुञ्च मुञ्च स्वाहा।"

चतुर्थे दिवसे ब्राह्मणान् भोजयेत्। ततः सम्पद्यते शुभम् ॥ ११ ॥

ग्यारहवें दिन, ग्यारहवें महीने अथवा ग्यारहवें वर्ष में पिलिपिञ्जिका नाम मातृका बालक को पकड़ लेती है तब उसी समय बालक को पहले ज्वर हो जाता है, खाता-पीता नहीं है, ऊपर को देखा करता है, अंगों को तोड़ा करता है तथा चट चट किया करता है। उसके लिए बलि कहता हूँ, जिससे कल्याण होता है।

उड़द की पीठी की मूर्ति ( पुतली ) बनाकर उसके ऊपर लाल चन्दन लगावे और उसके मुँह को दूध से सींचे तथा पीला फूल, रोली, चन्दन, पान, ७ पीली ध्वजाएँ, ७ दीपक, ८ बरे, ( उड़द के बड़े ), ८ पुआ, ८ पूरियाँ, मछली, मांस और मदिरा; इनको मिट्टी की तश्तरी में रखकर पूर्व दिशा में चौराहे पर बलि दे। फिर शान्ति जल से स्नान करावे और बिल्वपत्र, गुगुल, गौ का सींग, साँप की केंचुल और घृत; इनकी धूप दे। बलि का मन्त्र—

"ॐ नमो रावणाय अमुकस्य व्याधिं मुञ्च मुञ्च स्वाहा" इस प्रकार तीन दिन करके चौथे दिन ब्राह्मणों को भोजन करावे तो बालक सुखी होता है ॥ ११ ॥

द्वादशे दिवसे मासि वर्षे वा यदि गृह्णाति कालिका नाम मातृका। तया गृहीतमात्रस्य प्रथमं भवति ज्वरः। विहस्य वादयति करेण तर्जयति गृह्णाति क्रन्दति निःश्वसिति मुहुर्मुहुरुत्कर्षयति आहारं न करोति। बलिं तस्याः प्रवक्ष्यामि येन सम्पद्यते शुभम्।

क्षीरेण पुत्तलिकां कृत्वा गन्धं ताम्बूलं शुक्लपुष्पं शुक्लसप्तध्वजाः सप्त प्रदीपाः सप्त शष्कुलिकाः करम्भकेण सर्वकर्मबलिं

दद्यात्। शान्त्युदकेन स्नापयेत्। शिवनिर्माल्यगुग्गुलुसर्षपघृतैर्धूपयेत्।

"ॐ नमो रावणाय अमुकस्य व्याधिं मुञ्च मुञ्च हन हन स्वाहा।"

चतुर्थे दिवसे ब्राह्मणान् भोजयेत्। ततः स्वस्थो भवति बालकः॥ १२॥

इति रावणकृतं कुमारतन्त्रं समाप्तम्।
इति भैषज्यरत्नावल्यां बालरोगाधिकारः समाप्तः।

---

बारहवें दिन, बारहवें महीने अथवा बारहवें वर्ष में कालिका नाम मातृका बालक को पकड़ लेती है तब उसी समय पहले ज्वर हो जाता है, हँसकर हाथ से कुछ बजाने लगता है, झिझकने लगता है, दूध नहीं पीता है, चिल्लाया करता है, बारबार जोर से श्वास लेता है, बार-बार वमन करता है और भोजन नहीं करता है। उसके लिए बलि कहता हूँ, जिससे कल्याण होता है।

खोये से मूर्ति (पुतली) बनाकर रोली, चन्दन, पान, सफेद फूल, सफेद ७ ध्वजाएँ, ७ दीपक, ७ पूरियाँ और दही में सना हुआ सत्तू; इन सबको मिट्टी की तस्तरी में रखकर चौराहे पर सब कामों के लिए बलि दे। फिर शान्ति-जल से स्नान कराये और शिवपत्र, गुग्गुल, सरसों और घृत की धूप दे। बलि का मन्त्र—

"ॐ नमो रावणाय अमुकस्य व्याधिं मुञ्च मुञ्च हन हन स्वाहा।" इस प्रकार तीन दिन करके चौथे दिन ब्राह्मणों को भोजन कराने से बालक नीरोग हो जाता है॥ १२॥

इति रावणकृत कुमारतन्त्रं समाप्तम्।
इति श्रीसरयूप्रसादत्रिपाठिविरचितायां भैषज्यरत्नावल्या रत्नप्रभाभिधायां व्याख्यायां बालरोगाधिकारः समाप्तः।

---

## अथ विषाधिकारः।

सर्वेषादितः सर्पैः शाखादष्टस्य देहिनः। दंशस्योपरि बध्नीयादरिष्टाश्चतुरंगुले॥ १॥ न गच्छति विषं देहमरिष्टाभिर्निवारितम्। दहेद्दंशमथोत्कृत्य यत्र बन्धो न जायते॥ २॥

यदि हाथ, पैर आदि में किसी प्रकार का भी सर्प डँस ले तो उसी समय डँसे हुए स्थान से ४ अंगुल ऊपर रस्सी कसकर बाँध देनी चाहिए। इसके बाँधने से, देह में विष नहीं फैलने पायेगा। जहाँ रस्सी न बाँधी जा सके वहाँ काटे हुए घाव को शस्त्र से काटकर दाग देना चाहिए॥ १-२॥

अरिष्टाबन्धनं मन्त्रप्रयोगश्च विषापहः। दंशनं दंशकस्याहेः फलस्य मृदुनोऽपि वा॥ ३॥

साँप के काटे हुए स्थान के ऊपर रस्सी अथवा पट्टी कसकर बाँध देनी चाहिए। अथवा विष नाश के लिए मन्त्रों का प्रयोग करना चाहिए। जिस साँप ने काटा हो उस साँप के मध्य देश का दंशन करने से अथवा किसी मृदुफल का दंशन करने से भी विष नष्ट होता है॥ ३॥

मूलं तण्डुलवारिणा पिबति यः प्रत्यङ्गिरासम्भवं निष्पिष्टं शुचि भद्रयोगदिवसे तस्याहिभीतिः कुतः। दर्पादेव फणी यदा दशति तं मोहान्वितो मूलपं स्थाने तत्र स एव याति नियतं यमत्रं यमस्याचिरात्॥ ४॥

जो पुरुष ज्येष्ठ मास में शुभ नक्षत्र वारादि युक्त शुभयोग में श्वेत पुनर्नवा की जड़ को जल से पीसकर तण्डुलोदक के साथ पीता है उसको कहीं भी सर्प का भय नहीं होता है। यदि गर्व से साँप मोह के वशीभूत होकर उस जड़ पीने

पाले को काट लेता है तो उसी स्थान पर वह साँप शीघ्र ही काल के मुँह में चला जाता है ॥ ४ ॥

मसूरं निम्बपत्राभ्यां योऽत्ति मेषगते रवौ । अब्दमेकं न भीतिः स्याद्विषार्त्तस्य न संशयः ॥ ५ ॥

जो मसूर के एक दाने को नीम के दो पत्तों के साथ घोटकर मेष की संक्रान्ति में पीता है उसको एक वर्ष तक विषजन्य पीड़ा नहीं होती है ॥ ५ ॥

धवलपुनर्नवजटया तण्डुलजलपीतया च पुष्यर्क्षे । अपसरति खलु विषधरोपद्रव आवत्सरं पुंसाम् ॥ ६ ॥

जो पुरुष नक्षत्र में सफेद साँठी की जड़ को तण्डुलजल से पीता है उसको एक वर्ष तक साँप का उपद्रव नहीं होता है ॥ ६ ॥

गृहधूमो हरिद्रे द्वे समूलं तण्डुलीयकम् । अपि वासुकिना दष्टः पिबेद्दधिघृताप्लुतम् ॥ ७ ॥

गृहधूम, हल्दी, दारुहल्दी और चौलाई की जड़; इनके चूर्ण को दही और घृत में मिलाकर पीने से वासुकि सर्प का काटा हुआ भी बच जाता है ॥ ७ ॥

कुलिकमूलनस्येन कालदष्टोऽपि जीवति । शिरीषपुष्पस्वरसे भावितं मरिचं सितम् । सप्ताहं सर्पदष्टानां नस्यपानाञ्जने हितम् ॥ ८ ॥

परवल की जड़ को पीसकर नस्य लेने से कालरूपी सर्प का काटा हुआ भी जीवित रहता है।

सफेद मिर्चों में सिरस के फूलों के स्वरस की भावना देकर सर्प से काटे हुए पुरुषों को सात दिन तक नस्य, पान और अंजन में इसको प्रयुक्त करना चाहिए ॥ ८ ॥

द्विपलं नतकुष्ठाभ्यां घृतक्षौद्रं चतुःपलम् । अपि तक्षकदष्टानां पानमेतत् सुखप्रदम् ॥ ९ ॥

तगर और कूट ( मिलित ८ तोले ) घृत और शहद ( मिलित १६ तोले ) इन सबको मिलाकर यदि तक्षक सर्प के काटे हुए को भी पिला दे तो वह सुखी हो जाता है ॥ ९ ॥

वन्यकर्कोटिजं मूलं छागमूत्रेण भावितम् । नस्यं काञ्जिकसंपिष्टं दोषोपहतचेतसः ॥ १० ॥

जंगली ककोड़े की जड़ को बकरी के मूत्र में भावित करके काँजी से पीस ले और विष के वेग से अचेत हुए पुरुष को उसका नस्य दे ॥ १० ॥

पीते विषे स्याद्वमनं त्वक्स्थे प्रदेहसेकादिसुशीतलं च ॥ ११ ॥

यदि किसी ने विष पी लिया हो तो उसी समय वमन कराना चाहिए। यदि विष त्वचा में व्याप्त हो गया हो तो शीतल लेप तथा प्रसेक ( ठंडे जल से स्नान ) कराना चाहिए ॥ ११ ॥

आगारधूममञ्जिष्ठारजनीलवणोत्तमैः । लेपो जयत्याखुविषं शोणितस्रावणं तथा ॥ १२ ॥

गृहधूम, मँजीठ, हल्दी और सेंधा नमक, इनका लेप करने से मूसा ( चूहा ) का विष नष्ट होता है तथा खून का बहना बन्द हो जाता है ॥ १२ ॥

श्लेष्मणः कर्णगूथस्य वामानामिकया कृतः । लेपो हन्याद्विषं घोरं नृमूत्रसेचनं तथा ॥ १३ ॥

बायें हाथ की अनामिका अँगुली से मुखस्थित श्लेष्मा का अथवा कान के मैल का दंशित स्थान पर लेप करने से अथवा नर-मूत्र का सेचन करने से विष नष्ट होता है ॥ १३ ॥

सोमवल्कोऽश्वगन्धा च गोजिह्वा

हंसपाद्यपि। रजन्यौ गैरिकं लेपो नख-दन्तविषापहः ॥ १४ ॥

श्वेत खदिर (श्वेत खैर की छाल), अश्वगन्ध, गोजी, हंसपदी (हंसराज), हल्दी, दारुहल्दी और गेरू; इनका लेप नखविष और दन्तविष को नष्ट करता है ॥ १४ ॥

यः कासमर्दनेत्रं वदने निक्षिप्य कर्णे फूत्कारम्। मनुजो ददाति शीघ्रं जयति विषं वृश्चिकानां सः ॥ १५ ॥

जो मनुष्य कसौंदी की जड़ को मुख में डालकर बिच्छू के काटे हुए प्राणी के कान में फूँक मारे तो उससे बिच्छू का विष दूर हो जाता है ॥ १५ ॥

उष्णं गव्यघृतं चापि सैन्धवेन समन्वितम्। वृश्चिकस्य विषं हन्ति लेपनात् पर्वतात्मजे ॥ १६ ॥

हे पार्वति! गौ के घृत में सेंधा नमक मिलाकर और गरम करके उसका लेप करने से बिच्छू का विष नष्ट हो जाता है ॥ १६ ॥

जीरकस्य कृतः कल्को घृतसैन्धव-संयुतः। सुखोष्णो मधुना लेपो वृश्चिकस्य विषं हरेत् ॥ १७ ॥

जीरे को भली प्रकार पीसकर घी तथा सेंधा-नमक मिलाकर किंचित् गरम करके उसमें शहद मिलाकर लेप लगाने से बिच्छू का विष नष्ट होता है ॥ १७ ॥

नवसादरहरितालौ पिष्टे तोयेन लेपनाद्दंशे। तत्क्षणमेव हि जयतो वृश्चिक-विद्धस्य दुर्धरक्ष्वेडम् ॥ १८ ॥

नौसादर, हरिताल को एकत्र जल में पीसकर दंशित स्थान पर लेप करने से उसी समय बिच्छू के विष की दारुण वेदना नष्ट हो जाती है ॥ १८ ॥

कारस्करफलं सेव्यं क्रमवृद्धं दिने दिने। सारमेयविषं हन्ति मासेन नहि संशयः ॥ १९ ॥

कुत्ते के विष को नष्ट करने के लिए कुचिले को ½ रत्ती से प्रारम्भ कर प्रतिदिन बढ़ाते हुए क्रमशः १॥ रत्ती तक बढ़ावे। इस प्रकार एक मास तक सेवन कराने से कुत्ते का विष नष्ट होता है ॥ १९ ॥

धत्तूरस्य शिफा पेया क्षीरेण परि-पोषिता। अङ्कोटस्य शिफा चापि श्वविष-घ्नी प्रकीर्तिता ॥ २० ॥

धतूरे की जड़ को पीसकर उचित मात्रा में दूध के साथ पीने से अथवा अङ्कोट की जड़ को पीस दूध के साथ पीने से कुत्ते का विष नष्ट होता है ॥ २० ॥

रजनीयुग्मपत्तङ्गमञ्जिष्ठानागकेशरैः। शीताम्बु पिष्टैरालेपः सद्यो लूताविषं हरेत् ॥ २१ ॥

हल्दी, दारुहल्दी, लालचन्दन, मँजीठ, नागकेशर; इन्हें शीतल जल से पीसकर लेपन करने से लूताविष नष्ट होता है ॥ २१ ॥

शिरीषस्य तु बीजं वै स्नुहीक्षीरेण घर्षितम्। तल्लेपेन महादेवि! नश्येत् कुक्कुरजं विषम् ॥ २२ ॥

हे महादेवि; सिरस के बीज को सेहुँड़ के दूध में घिसकर लेप करने से कुत्ता का विष नष्ट होता है ॥ २२ ॥

पिष्टतण्डुलमध्यस्थं भक्षितं मेषलोमकम्। कुक्कुरस्य विषं हन्ति नात्र कार्या विचारणा ॥ २३ ॥

पानी के साथ चावलों को पीसकर उसके मध्य में भेड़ा का बाल रख गोली बनाकर खिला दे तो पागले कुत्ता का विष नष्ट हो जाता है, इसमें विचार करने की आवश्यकता नहीं है ॥ २३ ॥

विषघ्नी वर्त्ति।

जयपालस्य मज्जानं भावयेन्निम्बुकद्रवैः। एकविंशतिवारन्तु ततो वर्त्ति प्रकल्पयेत् ॥ २४ ॥ मनुष्यलालया घृष्ट्वा ततो नेत्रे प्रदापयेत्। सर्पदष्टविषं जित्वा सञ्जीवयति मानवम् ॥ २५ ॥

जयपाल के बीज की गुठली को नींबू के रस से २१ बार भावना देकर बत्ती बनावे। इस बत्ती को मनुष्य की लार में घिसकर नेत्रों में आंजने से सांप के काटे का विष नष्ट हो जाता है और मनुष्य मरने से बच जाता है ॥ २४--२५ ॥

दशाङ्ग अगद।

वचाहिङ्गुविडङ्गानि सैन्धवं गजपिप्पली। पाठा प्रतिविषा व्योषं काश्यपेन विनिर्मितम् ॥ दशाङ्गमगदं पीत्वा सर्वकीटविषं जयेत् ॥ २६ ॥

वच, हींग, विडंग, सेंधा नमक, गजपीपरि, पाढ़ी, अतीस, सोंठ, मिर्च और पीपल; इस दशाङ्ग औषधि के पीने से सब प्रकार के कीटविष दूर होते हैं। यह काश्यपजी का कहा हुआ है। मात्रा—२ माशा ॥ २६ ॥

अजितागद।

विडङ्गपाठात्रिफलाजमोदाहिङ्गूनि वक्रं त्रिकटूनि चैव। सर्वश्च वर्गो लवणस्य सूक्ष्मः सचित्रकः क्षौद्रयुतो निधेयः ॥ २७ ॥ शृङ्गे गवां शृङ्गमयेन चैव प्रच्छादितः पक्षमुपेक्षितश्च। एषोऽगदः स्थावरजङ्गमानां जेता विषाणामजितो हि नाम्ना ॥ २८ ॥

वायविडङ्ग, पाढ़ी, त्रिफला, अजमोद, हींग, तगर, सोंठ, मिर्च, पीपरि, सेंधा नमक, काला नमक, सांभर नमक, समुद्र नमक, खारी नमक, चीता की जड़; इनको सम भाग ले और इनके चूर्ण को शहद में सानकर गौ के सींग में भरकर उसका मुख गौ के सींग से ही ढक दे। इसको १५ दिन धरा रहने दे। सेवन करने से यह अजित नामक अगद स्थावर और जंगम विषों को जीत लेता है। मात्रा—४ माशे ॥ २७—२८ ॥

तार्क्ष्यागद।

प्रपौण्डरीकं सुरदारु मुस्ता कालानुसार्यास्कटुरोहिणी च। स्थौणेयकध्यामकपद्मकानि पुन्नागतालीशसुवर्चिकाश्च ॥ २९ ॥ कुटन्नटैलासितसिन्धुवाराः शैलेयकुष्ठे तगरं प्रियंगु। लोध्रं जलं काञ्चनगैरिकं च समागधं चन्दनसैन्धवं च ॥ ३० ॥ सूक्ष्माणि चूर्णानि समानि कृत्वा शृङ्गे निदध्यान्मधुसंयुतानि। एषोऽगदस्तार्क्ष्य इति प्रदिष्टो विषं निहन्यादपि तक्षकस्य ॥ ३१ ॥

श्वेत कमल, देवदारु, मोथा, तगर, कुटकी, थुनेर, रोहित तृण, पद्मारव, नागकेसर, तालीशपत्र, सज्जीखार, श्योनाक, इलायची, छोटी पितुंडी (सफेद सँभालू), कालानुसारिवा, छड़, तगर, प्रियङ्गु, लोध, सुगन्धबाला, सुनहला गेरू, पीपर, लाल चन्दन और सेंधा नमक; ये सब समान भाग ले चूर्ण करे और शहद मिलाकर गौ के सींग में भरकर रक्खे। इसका नाम तार्क्ष्यागद है। यह तक्षक नाग के भी विष को नष्ट कर देता है। मात्रा—६ माशे से १ तोला तक ॥ २९—३१ ॥

कुलिकादिवर्त्तिका।

कुलिकं सप्तपर्णं च कुष्ठं नीलकसम्भितम्। माषमानं तथा दारु मर्दयेदर्कवारिणा ॥ ३२ ॥ सर्षपाभां वर्त्तीं कृत्वा योजयेत् पयसा सह। अपि तक्षकदष्टं च मृतकल्पं हरत्वरम् ॥ ३३ ॥ पुनः सञ्जीवयेदाशु सर्वदंष्ट्रविनाशिनी।

कुलिकादिवटी हन्ति ज्वरांश्च विषमां-स्तथा ॥ ३४ ॥

परवल की जड़, सतौना, कूट ; प्रत्येक एक-एक तोला, देवदारु १ माशा ; इन सबको भद्दार के रस से घोटकर सरसों के बराबर गोलियाँ बना लो। दूध के साथ सेवन करने से यह कुलिकादिवटी तक्षक के काटे हुए मृत-तुल्य तथा नष्ट स्वरवाले मनुष्य को शीघ्र ही पुनः जीवित कर देती है एवं सब प्रकार के विषरोगों और विषमज्वरों को नष्ट कर देती है ॥ ३२--३४ ॥

### भीमरुद्र रस ।

मनःशिलालमरिचैर्दारुणा दरदेन च । अपामार्गस्य हेम्नश्च हयमारशिरीषयोः ॥ ३५ ॥ मूलैं रुद्राक्षतोयेन विष्णुक्रान्ताम्बुना तथा । शतधा भावितैः कुर्याद् वटिका मुद्गसन्निभाः ॥ ३६ ॥ व्यालदष्टं पीत-विषं निरिन्द्रियमचेतनम् । पुनः सञ्जीव-येदेष भीमरुद्राभिधो रसः ॥ ३७ ॥

मैनशिल, हरताल, मिर्च, देवदारु, शुद्ध सिंगरफ, चटजीरा की जड़, धतूरा की जड़, कनेर की जड़ और सिरस की जड़ ; इनमें रुद्राक्ष और विष्णुकान्ता के रस की सौ-सौ भावनायें देकर मूँग के बराबर गोलियाँ बना लो। यह भीमरुद्र नामक रस साँप के काटने अथवा विष पी लेने से चेतनारहित तथा इन्द्रियों की चेष्टा से रहित प्राणी को पुनः जीवित कर देता है ॥ ३५-३७ ॥

### द्वितीय भीमरुद्र रस ।

सूतराजस्य तोलैकं गन्धकस्य तथैव च । अभ्रात् कर्षं ततो देयं तोलैकं कान्तलौह-कम् ॥ ३८ ॥ परोक्तनौषधेनैव भावयेच्च पृथक् पृथक् । विशाला बृहती ब्राह्मी सौगन्धिकसुदाडिमैः ॥३९॥ मर्कट्यश्चा-श्मगुल्माया: स्वरसेन पृथक् पृथक् । एक-रक्तिकमानेन वटिकां कारयेद्भिषक् ॥ ४० ॥ वटीमेकां भक्षयित्वा पिबेच्छीतजलं ततः । भीमरुद्रो रसो नाम ह्यसाध्यमपि साधयेत् ॥ कुक्कुरस्य शृगालस्य विषं हन्ति सुदुस्तरम् ॥ ४१ ॥

पारा १ तोला, गन्धक १ तोला, इन दोनों की कज्जली करके अभ्रक भस्म २ तोला तथा कान्त लौहभस्म १ तोला मिलावे। पश्चात् इन्द्रायण, बड़ी कटेरी, ब्राह्मी, नीलकमल, अनार, अपामार्ग, कौंच; इनके रस से पृथक्-पृथक् भावना देकर एक-एक रत्ती की गोलियाँ बनावे। इस गोली के सेवन के पश्चात् शीतल जल पीना चाहिए। इस गोली के सेवन से कुत्ते अथवा गीदड़ का विष नष्ट होता है ॥ ३८-४१ ॥

### विषवज्रपात रस ।

निशां सटङ्कां सजातिकोषं तुत्थं समांशं कुरु देवदाल्याः । रसेन पिष्ट्वा विषवज्रपातो रसो भवेत् सर्वविषापहन्ता॥ माषोऽस्य सञ्जीवयति प्रयुक्तो नृमूत्रयोगेन च कालदष्टम् ॥ ४२ ॥

हल्दी, सुहागा, जावित्री, नीलाथोथा ; इन्हें बराबर मात्रा में मिला देवदाली के रस से पीसकर गोली बनावे । मात्रा-१ माशा । अनुपान-नरमूत्र । इसके सेवन से समस्त होकर सम्पूर्ण विष नष्ट होते हैं । यह रस कालदष्ट व्यक्ति को भी जीवित कर देता है ॥ ४२ ॥

### तण्डुलीयक घृत ।

तण्डुलीयकमूलेन गृहधूमेन चैकतः । क्षीरेण च घृतं सिद्धं समस्तविषरोग-नुत् ॥ ४३ ॥

घृत १ सेर, गाय का दूध ४ सेर। कल्क के लिये चौलाई की जड़ और गृहधूम पाव भर। विधि से सिद्ध कर पीने से यह घृत सब प्रकार के विष रोगों को नष्ट करता है ॥ ४३ ॥

### मृत्युपाशच्छेदि घृत ।

अभयां रोचनां कुष्ठमर्कपत्रं तथो-

रपलम् । नलवेतसमूलानि शरलं सुरसां तथा ॥ ४४ ॥ सकलिद्रां समञ्जिष्ठामनन्तां च शतावरीम् । मुद्गाख्यं समद्रां च पद्मकेशरमित्यपि ॥ ४५ ॥ कल्कीकृत्य पचेत्सर्पिः पयो दद्याच्चतुर्गुणम् । सम्यक् पक्वेऽवतीर्णे च शीते तस्मिन् विनिक्षिपेत् ॥ ४६ ॥ सर्पिस्तुल्यं भिषक् क्षौद्रं कृतरक्षं निधापयेत् । विषाणि हन्ति दुर्गाणि गरदोषकृतानि च ॥ ४७ ॥ स्पर्शाद्धन्ति विषं सर्वं गररुपहतां त्वचम् । योगजं तमकं कण्डूं मांससादं विसंज्ञताम् ॥ ४८ ॥ नाशयत्यञ्जनाभ्यङ्गपानवस्तिषु योजितम् । सर्पकीटाखुलूतादिदष्टानां विषहृत्परम् ॥ ४९ ॥

कल्क के लिए हर्र, गोरोचन, कूट, मदार के पत्ते, नीलकमल, नरकुल की जड़, बेंत की जड़, मीठा विष, तुलसी, हल्दी, मंजीठ, अनन्तमूल, शतावरी, सिघाड़ा, मुईमुई और कमलकेशर ; सब मिलाकर आध सेर। घृत २ सेर, दूध ८ सेर। विधि से पाक कर वस्त्र से छान ले। जब ठंढा हो जाय तब इसमें दो सेर शहद मिलाकर रक्षित स्थान में रखकर रख दें। मात्रा ४ माशे से १ तोला तक। यह घृत विष, गरदोष से उत्पन्न विकार तथा विष से नष्ट त्वचा और सब प्रकार के विष विकारों एवं योगजविष, तमक, कण्डू, मांससाद, बेहोशी आदि को नष्ट करता है। इसको (अञ्जन, मालिश, पान तथा बस्ति कर्म में प्रयोग करना चाहिए। यह सर्वविष, कीटविष, चूहे और मकड़ी का विष इत्यादि को नष्ट करता है ॥ ४४-४९ ॥

जीरकस्य कृतः कल्को घृतसैन्धवसंयुतः । सुखोष्णो मधुना लेपो वृश्चिककस्य विषं हरेत् ॥ ५० ॥

जीरा के कल्क में घृत और सेंधा नमक मिलाकर सुखोष्ण लेप करें तो बिच्छू का विष शान्त हो जाता है ॥ ५० ॥

शिखरादि घृत ।

शिखरिस्वरसेनैव कल्कान् दत्त्वा च दाडिमम् । कुष्ठमेलाद्वयं भूर्जीं शिरीषममृतं यवाम् ॥ ५१ ॥ परशू पारिभद्रं च चन्दनं तगरं मुराम् । पचेत्सर्पिस्त्वसलिलं मन्दमन्देन वह्निना ॥ ५२ ॥ घृतमेतन्निहन्त्याशु निखिलान् विषजान् गदान् । सन्निपातज्वरं घोरं ज्वरांश्च विषमांस्तथा ॥ ५३ ॥

अपामार्ग का रस ४ सेर, घृत १ सेर। कल्क के लिए अनार, कूट, छोटी इलायची, बड़ी इलायची, काकड़ाशिंगी, सिरस की छाल, मीठा विष, वच, दोनों परशु ( कुड़ालिया कुदालिया ), फरहद, चन्दन, तगर और मुरामांसी सब मिलित पाव भर। इन सबको एकत्र कर बिना जल के ही मन्द-मन्द अग्नि से पकाना चाहिए। यह घृत सर्व प्रकार के विषज रोगों तथा सन्निपातज्वर, घोर ज्वर तथा विषमज्वरों को शीघ्र नष्ट करता है ॥ ५१-५३ ॥

शिरीषारिष्ट ।

पचेत्तुलार्द्धं द्विद्रोणे शिरीषस्य जले सुधीः ॥ पादशेषे कषायेऽस्मिन् क्षिपेद् गुडतुलाद्वयम् ॥ ५४ ॥ कृष्णा प्रियंगु कुष्ठैला नीलिनी नागकेशरम् । रजन्यौ पलमानेन दद्यादत्र च नागरम् ॥ ५५ ॥ मासादूर्ध्वं जातरसं यथामात्रं प्रयोजयेत् । शिरीषारिष्टमित्येतद् विषव्यापद्विनाशनम् ॥ ५६ ॥

सिरस की छाल २॥ सेर, क्वाथार्थ जल १ मन ११ सेर १६ तोले। अवशिष्ट क्वाथ १२ सेर ६४ तोला। इसमें १० सेर गुड़ तथा

पीपरि, प्रियंगु के फूल, कूट, इलायची, नील की जड़, नागकेसर, हल्दी, दारुहल्दी और सोंठ प्रत्येक चार-चार तोले ले चूर्ण करके डाले। मिट्टी के घड़े में बन्द करके १ महीने तक जमीन में गड़ा रहने दे। पश्चात् छान कर सेवन करावे। यह शिरीषारिष्ट विष के विकारों को नष्ट करनेवाला है। मात्रा-१ तोला से २॥ तोले तक ॥ ५४-५६ ॥

विष रोगे पथ्यानि।

अरिष्टा बन्धनं मन्त्रक्रिया छर्दिर्विरेचनम्। कर्षणं शोणिता कृष्टिः परिषेकोऽवगाहनम् ॥ ५७ ॥ हृदयावरणं नस्यमञ्जनं प्रतिसारणम्। उद्वर्तनं प्रधमनं प्रलेपो वह्निकर्म च। उपधानं प्रति विषं धूपः संज्ञा प्रबोधनम् ॥ ५८ ॥ शालयः षष्टिकाश्चापि कोरदूषाः प्रियङ्गवः। मुद्गा हरेणवस्तैलं सर्पिर्जीर्णनवं तथा। शिखितित्तिर लावैण गोधाखुश्वाविधामिषम् ॥ ५९ ॥ वार्त्ताकुं कुलकं धात्री निष्पावं तण्डुलीयकम् ॥ ६० ॥ मण्डूकपर्णी जीवन्ती सुनिषण्णोऽप्युपोदिका। कालशाकं सलशुनं दाडिमं च विकङ्कतम् ॥ ६१ ॥ प्राचीनामलकं पथ्यकपित्थं नागकेशरम्। गोछागनरमूत्राणि तक्रं शीताम्बु शर्करा। ॥ ६२ ॥ अविदाहीनि चान्नानि सैन्धवं मधु कुङ्कुमम्। पश्चिमोत्तर वाताश्च हरिद्रासित चन्दनम् ॥ ६३ ॥ मुस्तं शिरीषः कस्तूरी तिक्तानि मधुराणि च। हेमचूर्णं च वर्गोऽयं यथाऽवस्थं यथा विषम् ॥ ६४ ॥ विष रोगेषु सर्वेषु प्रयोक्तव्यो विजानता ॥ ६५ ॥

अरिष्टा बन्धन ( बन्धनी बन्धन ) मन्त्र तन्त्र प्रयोग वमन विरेचन, दोषों का कर्षण विरेचन रक्त का सींगी आदि से खींचना परिषेचन जलावगाहन हृदय को ढकना नस्य अञ्जन मञ्जन उबटना प्रधमन कर्म प्रलेप दाह कर्म तकिया के सहारे रहना विषघ्न दूसरा विष देना, धूपन, संज्ञा लाना शालि और चावल कोदों कांगुनी मूँग मटर तैल पुराना या नया घृत मोर तीतर बटेर हरिण गोह चूहा और सेह का मांस बैंगन परवल आंवला लोबिया चौलाई मण्डूकपर्णी जीवन्ती चिरायाई पोई का शाक कालशाक ( नाड़ी का शाक ) लहसुन अनार कटाईफल आंवला हरड़ कैथ नागकेशर तथा गाय बकरी और मनुष्य का मूत्र ठण्ढा जल शक्कर जलन न करनेवाले अन्न सेंधानमक शहद केशर पश्चिम और उत्तर दिशा की वायु हल्दी सफेद चन्दन नागरमोथा सिरस कस्तूरी कड़वे मीठे पदार्थ सुवर्णभस्म ये सब अवस्था तथा विष के अनुसार विषरोगों में प्रयोग करना लाभदायक है ॥५७-६५॥

विष रोग में अपथ्य।

क्रोधं विरुद्धाध्यशनं व्यवायं ताम्बूलमायासमपि प्रवातम्। अम्लं च सर्वं लवणं च सर्वं, स्वेदं च नानाविधि मारुतानि ॥ ६६ ॥ निद्राभयं धूम शिखिं क्षुधां च, विषातुरो नैव भजेत् कदाचित् ॥ ६७ ॥

इति भैषज्यरत्नावल्यां विषाधिकारः समाप्तः।

---

क्रोध, विरुद्ध भोजन, भोजन करने के तुरन्त बाद भोजन, मैथुन पान बीड़ा परिश्रम, तेज हवा सब प्रकार के खट्टे पदार्थ नमक के सब पदार्थ, स्वेदन सब प्रकार के प्रकार शयन ( सर्पविष में ) भय धूम्रपान, भूखा रहना, यह सब विष पीड़ित होने पर तथा अच्छा होने पर भी कुछ दिन तक सेवन नहीं करना चाहिए ॥ ६६-६७ ॥

इति श्रीनरेन्द्रनाथाद्विरचित्रविरचितायां भैषज्यरत्नावल्या रत्नप्रभाभिधायां व्याख्यायां विषाधिकारः समाप्तः।

---

## अथ वीर्यस्तम्भाधिकारः।

शरपुंखं तुलसीमूलं ताम्बूलैः सह भक्षयेत्। न मुञ्चति नरो वीर्यमर्कवेण न संशयः ॥ १ ॥

शर्पोकन्द अथवा तुलसी की जड़ को पान के साथ खाने से मनुष्य का वीर्य स्खलित नहीं होता है, इसमें संशय नहीं है ॥ १ ॥

कृष्णमार्जारसव्यांघ्रिसम्भवास्थिरतो-धमे। दक्षिणे ध्रियते येन तस्य वीर्यस्य न च्युतिः ॥ २ ॥

काली बिल्ली के बाएँ पैर की हड्डी को दाहिने भाग में धारण करके मैथुन करने से वीर्य स्खलित नहीं होता है ॥ २ ॥

चटकाण्डं तु संपिष्य नवनीतेन लेपयेत्। तेन लेपयतः पादौ शुक्रस्तम्भः प्रजायते ॥ यावन्न स्पृशते भूमिं तावद्वीर्यं न मुञ्चति ॥ ३ ॥

चिड़िया के अण्डे को मक्खन के साथ पीसकर पैरों में लेप करने से वीर्य का स्तम्भन होता है। जब तक पृथ्वी को नहीं छूता है तब तक वीर्य स्खलित नहीं होता है ॥ ३ ॥

नीलोत्पलसितपङ्कजकेशरमधुशर्करावलिप्तेन। सुरते सुचिरं रमते दृढलिङ्गो नाभिविवरेण ॥ ४ ॥

नीलकमल की केशर, सफेद कमल की केशर, शहद और शक्कर, इनका नाभि में लेप करने से लिङ्गेन्द्रिय दृढ होती है तथा बहुत देर तक रमण करता है ॥ ४ ॥

सिद्धं कुसुम्भतैलं भूमिलताचूर्णमिश्रितं कुरुते। चरणाभ्यङ्गेन रते वीर्यस्तम्भाद् दृढं लिङ्गम् ॥ ५ ॥

कुसुम का तेल १ सेर, कल्कार्थ केंचुआ का चूर्ण पाव भर, पाकार्थ जल ४ सेर। यथाविधि तैल सिद्ध करे। इस तैल का पैरों पर मर्दन करके मैथुन करने से वीर्यस्तम्भन तथा लिङ्ग दृढ होता है ॥ ५ ॥

गोरेकोन्नतशृङ्गस्तम्भनचूर्णेन धूपितं वस्त्रम्। परिधाय भजति ललनां नैकाण्डो भवति हर्षार्त्तः ॥ ६ ॥

जिस गौ का एक सींग ऊँचा हो उस सींग के छिलका की आग में धूनी देकर रात्रिकाल में पहिरे तो शिश्नेन्द्रिय हर्षयुक्त होती है। एकाण्ड[1] नहीं रहता है ॥ ६ ॥

योगजनराङ्गबन्धं मथितेन क्षालितं हन्ति। उन्नतगोशृङ्गोद्भवलेपो योगजध्वजभङ्गहरः ॥ ७ ॥

औषध आदि के योग से यदि शेफ भाग (लिङ्ग) बन्धनसहित हो गया हो तो छाछ से धोने से वह बन्धन नष्ट हो जाता है। अथवा गौ के ऊँचे सींग को जल में घिसकर लेप करने से योगज ध्वजभङ्ग नष्ट होता है ॥ ७ ॥

कृकलासस्य पुच्छाग्रमुद्रिका श्वेततन्तुभिः। वेष्ट्य धार्या कनिष्ठायां नरो वीर्यं न मुञ्चति ॥ ८ ॥

छिपकली के पूँछ के अग्रभाग की अँगूठी बना सफेद डोरा से लपेटकर कनिष्ठिका अंगुली में धारण करने से वीर्यस्तम्भन होता है ॥ ८ ॥

वनक्रोडस्य दंष्ट्रा या दक्षिणा तां समाहरेत्। कट्यामुपरि सम्बद्धा शुक्रस्तम्भः प्रजायते ॥ ९ ॥

जङ्गली शूकर की दाहिनी दाढ़ को कमर में बाँधने से वीर्यस्तम्भ होता है ॥ ९ ॥

डुण्डुभोनाम यः सर्पः कृष्णवर्णस्तमाहरेत्। तस्यास्थि धारयेत्कट्यां नरो वीर्यं

---

[1] —एकाण्ड वह रोग है जिसमें केवल एक ही स्त्री से सम्भोग करनेवाला व्यक्ति दूसरी स्त्री से सम्भोग करने पर उद्यत हो तो उसकी शिश्नेन्द्रिय शिथिल हो जाती है।

न मुञ्चति ॥ विमुञ्चति विमुक्तेन सिद्धयोग उदाहृतः ॥ १० ॥

दुण्डुभनामक कृष्णवर्ण के सर्प की हड्डी को कटि में धारण करने से वीर्यस्तम्भ होता है। धारण की हुई हड्डी को कटि से अलग कर देने से वीर्यपात हो जाता है। यह सिद्ध योग है ॥ १० ॥

सप्ताहं छागभवसलिलसंस्थितं करभवारुणीमूलम्। गाढोद्वर्त्तनविधिना लिङ्गं स्तब्धं रते कुरुते ॥ ११ ॥

ऊँटकटारे की जड़ को एक सप्ताह तक बकरी के मूत्र में रख पश्चात् पीस ले। इसके द्वारा लिङ्ग पर मालिश करने से रमणकाल में लिङ्ग दृढ़ होता है ॥ ११ ॥

अर्कादिवटिका।

मूलमर्जकशङ्खिन्योर्निर्गुण्डीकेशराजयोः जातीफलं देवपुष्पं विडङ्गं गजपिप्पलीम् ॥ १२ ॥ चातुर्जातं तुगाक्षीरीमनन्तां मुशलीं वरीम्। विदारीं गोक्षुरं बीजं चाभातोयेन मर्दयेत् ॥ १३ ॥ माषमानां वटीं कृत्वा सुरामण्डेन योजयेत्। वीर्यस्तम्भकरी वृष्या वटिकेयं प्रकीर्तिता ॥ १४ ॥

तुलसी की जड़, शङ्खपुष्पी की जड़, सँभालू की जड़, भँगरा की जड़, जायफल, लौंग, वायविडङ्ग, गजपीपल, चातुर्जात, (दालचीनी, छोटी इलायची, तेजपत्र, नागकेशर), वंशलोचन, अनन्तमूल, मुसली, शतावरी, विदारीकन्द, और गोखरू के बीज;इन सबको धतूरे की छाल के रस से घोटकर एक-एक माशे की गोलियाँ बना ले। अनुपान—सुरामण्ड। यह वटिका वीर्यस्तंभन करनेवाली तथा वृष्य है ॥ १२-१४ ॥

नागवल्ल्यादि चूर्ण।

नागवल्ली बला पूर्वा जातीकोषफले मुरा। अपामार्गस्य बीजं च काकोलीयुगलं तथा ॥ १५ ॥ कक्कोलोशीरयष्ट्याह्वचाश्चैतानि मर्दयेत्। वीर्यस्तम्भकरं वृष्यं चूर्णमेतद्रसायनम् ॥ १६ ॥

पान की जड़, खरैटी, मरोरफली, जायफल, जावित्री, मुरामांसी, लटजीरा के बीज, काकोली, क्षीरकाकोली, कंकोल, खस, मुलैठी और बच, इनका चूर्ण वीर्यस्तम्भनकर्ता तथा वृष्य है १५-१६

शुक्रवल्लभ रस।

रसगन्धकलौहाभ्ररौप्यहेमानि माक्षिकम्। शाणमानेन संगृह्य तुगाक्षीरीं च कार्षिकीम् ॥ १७ ॥ पलप्रमाणं विजयाबीजं चैकत्र मर्दयेत्। विजयावारिणा पश्चान्माषमानां वटीं चरेत् ॥ १८ ॥ एकैका भक्षणीयाथ पेयं चानुपयः पलम्। श्रीशक्रवल्लभो नाम रसो वाजीकरः परः ॥ १९ ॥ वीर्यस्तम्भकरोऽत्यर्थं प्रमदादर्पनाशनः। गतो ह्यप्सरसां शक्रो वाल्लभ्यं यत्प्रसादतः ॥ २० ॥

शुद्ध पारा, गन्धक, लोहभस्म, अभ्रकभस्म, चाँदी की भस्म, सोने की भस्म, सोनामाखी की भस्म; प्रत्येक तीन-तीन माशे, वंशलोचन १ तोला तथा भाँग के बीज ४ तोले। इनको भाँग के जल से घोटकर उड़द के समान गोलियाँ बनावे। एक गोली खाकर ४ तोले दूध पीना चाहिए। यह श्रीशक्रवल्लभ रस परम वाजीकरण- वीर्यस्तंभनकर्ता तथा कामिनियों के मान को नष्ट करनेवाला है। इसी के प्रसाद से इन्द्रदेव अप्सराओं के प्यारे हुए थे ॥ १७-२० ॥

कामिनीविद्रावण रस।

आकारकरभं शुण्ठी लवङ्गं कुंकुमं कणाम्। जातीफलं च तत्कोषं चन्दनं कार्षिकं पृथक् ॥ २१ ॥ हिंगुलं गन्धकं शाणं फणिफेनं पलोन्मितम्। गुञ्जात्रयमितां कुर्यात् संमर्घ वटिकां भिषक् ॥

२२ ॥ पयसा परिपीतोऽयं शुक्रस्तम्भकरो रसः । विद्रावणः कामिनीनां वशीकरण एव च ॥ २३ ॥

इति भैषज्यरत्नावल्यां वीर्यस्तम्भाधिकारः समाप्तः ।

---

अकरकरा, सोंठ, लौंग, केशर, पीपरि, जायफल, जावित्री, लाल चन्दन, प्रत्येक एक-एक तोला । हिंगुल और गन्धक तीन-तीन माशे तथा अफीम चार तोले । इन सबको एकत्र घोटकर तीन-तीन रत्ती की गोलियाँ बनावे । अनुपान-दूध । यह रस वीर्यस्तंभनकर्ता, कामिनियों का दर्पनाशक तथा वशीकरण है । मात्रा—एक रत्ती से तीन रत्ती तक ॥ २१–२३ ॥

इति श्रीसरयूप्रसादत्रिपाठिविरचितायां भैषज्यरत्नावल्याः रत्नप्रभाभिधायां व्याख्यायां वीर्यस्तम्भाधिकारः समाप्तः ।

---

## अथ रसायनाधिकारः ।

यज्जराव्याधिविध्वंसि भेषजं तद्रसायनम् । पूर्वे वयसि मध्ये वा शुद्धकायः समाचरेत् ॥ १ ॥ नाविशुद्धशरीरस्य युक्तो रासायनो विधिः । न भाति वाससि क्लिष्टे रङ्गयोग इवार्पितः ॥ २ ॥

जो औषधि जरा ( बुढ़ापा ) और व्याधि-नाशक हो उसको रसायन कहते हैं । अर्थात् जिस औषधि के सेवन से बुढ़ापा और रोग न हों वह रसायन है । इसका सेवन युवावस्था अथवा मध्य अवस्था में करना चाहिए । परन्तु सेवन से पहले वमन-विरेचनादि से शरीर को शुद्ध कर लेना चाहिए ; क्योंकि जैसे मलिन वस्त्र को रँगने से उस पर अच्छा रंग नहीं आता है, इसी प्रकार शरीर शुद्ध किए बिना रसायन का सेवन हितकर नहीं होता है ॥ १–२ ॥

जरणान्तेऽभयामेकां प्राग्भक्ते द्वे बिभीतके । भुक्त्वा तु मधुसर्पिभ्यां चत्वार्यामलकानि च ॥ ३ ॥ प्रयोजयेत्समामेकां त्रिफलाया रसायनम् । जीवेद्वर्षशतं पूर्णमजरोऽव्याधिरेव च ॥ ४ ॥

त्रिफ
२२न।

भोजन हजम होने पर एक हड़, भोजन करने से पहले दो बहेड़े और भोजन करने के पश्चात् चार आँवले घृत और शहद के साथ एक वर्ष तक सेवन करे तो यह त्रिफला-रसायन जरा और व्याधि को नष्ट करके सौ वर्ष की पूर्ण आयु तक जीवित रखता है ॥ ३–४ ॥

### भृङ्गराज रसायन ।

ये मासमेकं स्वरसं पिबन्ति दिने दिने भृङ्गरजः समुत्थम् । क्षीराशिनस्ते बलवर्णयुक्ताः समाः शतं जीवितमाप्नुवन्ति ॥ ५ ॥

जो मनुष्य प्रतिदिन भँगरा के रस को एक महीने तक पीते हैं और दूध का भोजन करते हैं वे बल और वर्ण से युक्त होकर १०० वर्ष तक जीवित रहते हैं ॥ ५ ॥

मण्डूकपर्ण्याः स्वरसः प्रयोज्यः क्षीरेण यष्टीमधुकस्य चूर्णम् । रसो गुडूच्यास्तु सम्मूलपुष्प्याः कल्कः प्रयोज्यः खलु शङ्खपुष्प्याः ॥ ६ ॥ आयुःप्रदान्यामयनाशनानि बलाग्निवर्णस्वरवर्द्धनानि । मेध्यानि चैतानि रसायनानि मेध्या विशेषेण तु शङ्खपुष्पी ॥ ७ ॥

मण्डूकपर्णी ( ब्रह्मीभेद ) का स्वरस, दूध के साथ मुलेठी का चूर्ण, गिलोय का रस और जड़ तथा फूलसहित शङ्खपुष्पी ( शंखाहुली ) का कल्क ये चारों योग आयुप्रद, रोगनाशक तथा बल, वर्ण और स्वरवृद्धिकर्ता, मेधाकर्ता तथा रसायन हैं । विशेष करके शंखाहुली मेधाजनक है ॥ ६–७ ॥

अश्वगन्धा रसायन

पीताश्वगन्धा पयसार्द्धमासं घृतेन तैलेन सुखाम्बुना वा। कृशस्य पुष्टिं वपुषो विधत्ते बालस्य शस्यस्य यथाम्बुवृष्टिः॥ ८॥

असगन्ध का चूर्ण दूध, घृत, तैल अथवा सुखोष्ण गर्म जल के साथ १५ दिन पीने से दुर्बल शरीर इस प्रकार पुष्ट होता है जैसे वर्षा से थोड़े दिन की खेती पुष्ट होती है॥ ८॥

धात्रीतिलान् भृङ्गरजो विमिश्रान् ये भक्षयेयुर्मनुजाः क्रमेण। ते कृष्णकेशा विमलेन्द्रियाश्च निर्व्याधयो वर्षशतं भवेयुः॥ ९॥

आँवला, तिल और भँगरा का चूर्ण: इनको मिलाकर जो मनुष्य खाते हैं उनके क्रमश बाल काले हो जाते हैं, इन्द्रियाँ शुद्ध हो जाती हैं और वे रोगरहित होकर १०० वर्ष तक जीते हैं॥ ९॥

वृद्धदारक रसायन।

वृद्धदारकमूलानि श्लक्ष्णचूर्णानि कारयेत्। शतावर्या रसेनैव सप्तवारांश्च भावयेत्॥ १०॥ माषद्वयं तु तच्चूर्णं सर्पिषा सह योजयेत्। मासमात्रोपयोगेन मतिमान् जायते नरः॥ मेधावी स्मृतिमांश्चैव वलीपलितवर्जितः॥ ११॥

बिधारा की जड़ को महीन पीसकर उसमें शतावरी के रस की ७ भावना देकर इसका २ मासे की मात्रा में घृत के साथ, एक महीना तक, सेवन करने से मनुष्य बुद्धिमान्, मेधावान्, स्मृतिमान् तथा वलीपलित से रहित हो जाता है॥ १०--११॥

हस्तिकर्णरजः खादेत् प्रातरुत्थाय सर्पिषा। यथेष्टाहारचेष्टोऽपि सहस्रायुर्भवेन्नरः॥ १२॥ मेधावी बलवान् कामी स्त्रीशतानि प्रजत्यसौ। मधुना त्वश्ववेगः स्याद् वलिष्ठः स्त्रीसहस्रगः॥ १३॥ मन्त्रश्चासौ प्रयोक्तव्यो भिषजा चाभिमन्त्रणे॥ १४॥

मन्त्रो यथा—ॐ नमो महाविनायकाय अमृतं रक्ष रक्ष मम फलसिद्धिं देहि रुद्रवचनेन स्वाहा।

हस्तिकर्ण पलाश की छाल के चूर्ण को प्रात काल उठकर घृत के साथ सेवन करे और इच्छानुसार आहार-विहार करता रहे तो भी वह दीर्घायु, मेधावान्, बलयुक्त, कामी तथा हजार स्त्रियों का सेवन करनेवाला होता है। यदि इसको शहद के साथ सेवन करे तो अश्व का सा वेग, बलिष्ठ तथा हजार स्त्रियों का सेवनकर्ता होता है। वैद्य को चाहिए कि—"ॐ नमो महावि॰" इत्यादि मंत्र से अभिमंत्रित करके औषधि का सेवन करावे॥ १२--१४॥

धात्रीरसायन।

धात्रीचूर्णस्य कंसं स्वरसपरिगतं क्षौद्रसर्पिः समांशं कृष्णामाणी सिताष्टमस्थतधुतमिदं स्थापितं भस्मराशौ। वर्षान्ते तत्समश्नन् भवति विपलितो रूपवर्णादियुक्तः निर्व्याधिर्बुद्धिमेधास्मृतिवचनबलस्थैर्यसत्त्वैरुपेतः॥ १५॥

आँवले का चूर्ण ३ सेर १६ तोले लेकर उसमें आँवले के रस की २१ भावनाएँ दे। शहद ३ सेर १६ तोले, घृत ३ सेर १६ तोले, पीपरि ३२ तोले और शक्कर ६४ तोले। इन सबको एक मिट्टी के पात्र में मुख बन्द कर राख के ढेर में गाड़ दे। एक वर्ष के बाद निकाल कर इसका सेवन करने से मनुष्य वलीपलित से रहित, रूपवान्, कान्तिमान्, व्याधिरहित तथा बुद्धि, मेधा, स्मरणशक्ति, सुन्दर वचन, बल, स्थिरता और सत्व से युक्त होता है॥ १५॥

गुडूच्यपामार्गविडङ्गशङ्खिनी वचाभया शुण्ठिशतावरी समा घृतेन लीढा प्रकरोति मानवं त्रिभिर्दिनैः श्लोकसहस्रधारिणम्॥ १६॥

गिलोय, लटजीरा, वायविडङ्ग, शंखपुष्पी, बच, हड़, सोंठ और शतावरी; इन सबको समान भाग लेकर घृत के साथ सेवन करे तो मनुष्य ३ दिन में हजार श्लोक कण्ठस्थ करनेवाला हो जाता है ॥ १६ ॥

व्यङ्गवलीपलितघ्नं पीनसवैस्वर्यकास-हरम् । रजनीक्षयेऽम्बुनस्यं रसायनं दृष्टिजननं च ॥ १७ ॥

रात्रि व्यतीत होने पर (प्रातःकाल) जल की नस्य लेना व्यङ्ग, झुर्री पड़ना, बाल सफेद होना, पीनस, स्वरविकार और खाँसी को नष्ट करता है एवं दृष्टि की शक्ति को बढ़ाता है। यह रसायन है ॥ १७ ॥

अम्भसः प्रसृतान्यष्टौ रवावनुदिते पिबन् । वातपित्तगदान् हत्वा जीवेद्वर्ष-शतं नरः ॥ १८ ॥

सूर्य उदय होने से पहले आठ प्रसृति (१६ तोले) जल पिया करे तो वातिक और पैत्तिक रोग नष्ट हो जाते हैं और १०० वर्ष की आयु होती है ॥ १८ ॥

ऋतुहरीतकी ।

सिन्धूत्थशर्कराशुण्ठीकणामधुगुडैः क्र-मात् । वर्षादिष्वभया सेव्या रसायनगुणै-षिणा ॥ १९ ॥

रसायन गुण की इच्छा रखनेवाले को हड़ का सेवन वर्षा ऋतु में सेंधा नमक के साथ, शरद् ऋतु में शक्कर के साथ, हेमन्त ऋतु में सोंठ के साथ, शिशिर ऋतु में पीपरि के साथ, वसन्त ऋतु में मधु के साथ और ग्रीष्म ऋतु में गुड़ के साथ करना चाहिए ॥ १९ ॥

मधुहरीतकी ।

दुर्नामश्वासकासज्वरवमथुतृषापाण्डु-तान्नेत्ररोगान् हिक्काकुष्ठातिसारभ्रममद-कसनाजीर्णशूलप्रमेहान् । तृष्णाशूला-स्रपित्तज्वरयकृत्जरारोचकानाहदाहान् ह-न्यादेतानवश्यं मधुनि परिगता पूतना चाम्लपित्तम् ॥ २० ॥

अत्र मधुनि परिगतेत्यनेन मधुभाविता मधुपूर्णभाण्डे चिरावस्थिता हरीतकी ग्राह्या । व्यवहारस्तु मधुपिष्टा हरीत-क्येव ।

हड़ों में मधु की भावना देकर अर्थात् मधु से भरे हुए पात्र में हड़ों को भर कर रख दे और कुछ दिन तक रक्खी रहने दे । पश्चात् मधु के साथ पीस कर हड़ का सेवन करे। यह मधुभावित हरीतकी बवासीर, श्वास, खाँसी, ज्वर, वमन, तृषा, पाण्डु, नेत्ररोग, हिचकी, कुष्ठ, अतीसार, भ्रम, मादकता, अजीर्ण, शूल, प्रमेह, तृष्णा, शूल, रक्तविकार, पित्तज्वर, बुढ़ापा, अरुचि, आनाह, दाह और अम्लपित्त को नष्ट करती है ॥ २० ॥

निर्गुण्डीकल्प ।

ॐ सिद्धपिङ्गलायोगिनीकथितम् । निर्गुण्डीमूलचूर्णमष्टपलं गृहीत्वा षोडश-पलं मधुमिश्रितं मर्दयित्वा घृतभाण्डे कृत्वा शरावेण आच्छाद्य निबिडलेपनं दत्त्वा मर्दयित्वा मासमेकं धान्यमध्ये स्थापयेत् । तन्मासमेकं भक्षितमात्रेण नरः कनकवर्णो गृध्रदृष्टिः सर्वरोगविवर्जितो वलीपलितहीनः । संवत्सरं खादिते चन्द्रार्कं यावत् जीवेत्, बद्धशुक्रः स्त्रीशतं कामयितुं क्षमो भवति । शाकाम्लं विहाय यथेच्छया भोज्यम् ।

तच्चूर्णं गोमूत्रेण सह यः पिबति हन्त्यष्टादश कुष्ठानि पामाविचर्चिकादीनि नाडीव्रणगुल्मशूलप्लीहोदराणि च ।

तच्चूर्णं तक्रेण यः पिबति स सर्व-रोगविवर्जितो गृध्रदृष्टिर्वराहबलो भवति,

वलीपलितवर्जितः दिव्यवचा पवनवेगो दिव्यमूर्त्तिर्भवति। मासद्वयमयोगेण पण्डितश्च न संशयः ॥ २१ ॥

निर्गुण्डी ( सँभालू ) की जड़ का चूर्ण ३२ तोले और शहद ६४ तोले । दोनों को मिलाकर घी के चिकने मिट्टी के पात्र में भर दे और सकोरे से मुँह बन्द करके सन्धियों पर गहरा लेप कर दे और एक महीने तक उस पात्र को धान्यराशि ( अनाज के ढेर ) में रक्खे। पश्चात् बलानुसार मात्रा में एक महीने तक सेवन करे तो मनुष्य का वर्ण सोने के तुल्य हो जाता है, गीध की सी दृष्टि हो जाती है तथा सब रोगों से और वलीपलित से मुक्त हो जाता है। एक वर्ष तक इसका सेवन करने से दीर्घायु, वीर्यसम्पन्न तथा सैकड़ों स्त्रियों से गमन करने में समर्थ हो जाता है। इसके सेवन के समय में शाक और खट्टी वस्तुओं को छोड़कर इच्छित भोजन करना चाहिए।

सँभालू की जड़ के चूर्ण को गोमूत्र के साथ पीने से अठारह प्रकार के कोढ़, पामा, विचर्चिका, नाड़ीव्रण ( नासूर ), गुल्मशूल, प्लीहा और ज्वर विकार नष्ट होते हैं।

सँभालू की जड़ के चूर्ण को तक्र ( छाछ ) के साथ जो पीता है वह सब रोगों से रहित, गीध की सी दृष्टि, वराह का सा बल, वलीपलित से रहित, उत्तम वाणीवाला, वायु के तुल्य वेगवान् और सुन्दर शरीरवाला हो जाता है। दो महीने सेवन करने से निस्सन्देह पण्डित हो जाता है ॥ २१ ॥

भृङ्गराजादि चूर्ण।

श्लक्ष्णीकृतं भृङ्गरजस्य चूर्णं तिलार्द्धकं चामलकार्द्धकं च। सशर्करं भक्षयतो गुडैर्वा न तस्य रोगा न जरा न मृत्युः ॥ २२ ॥ अन्धः पश्येद्गमनरहितो मत्तमातङ्गगामी मूको वाग्मी श्रवणरहितो दूरशब्दानुसारी। नीरुङ् मर्त्यो भवति पलितो नीलजीमूतकेशो जीर्णा दन्ताः पुनरपि नवाः क्षीरगौरा भवन्ति ॥ २३ ॥

भँगरा का चूर्ण ४ तोले, तिल २ तोले और आँवला २ तोले, इन सबको एकत्र कर उचित मात्रा में शक्कर अथवा गुड़ के साथ सेवन करने से रोग, बुढ़ापा और मृत्यु का आक्रमण नहीं होता है। अन्धा देखने लगता है, पङ्गुला चलने लगता है, गूँगा वाचाल हो जाता है, बधिर दूर का भी शब्द सुनने लगता है, रोगी नीरोग हो जाता है, सफेद बाल काले हो जाते हैं तथा खराब हुए पुराने दांत फिर दूध से से सफेद एवं नये हो जाते हैं ॥ २२-२३ ॥

श्रीमृत्युञ्जयतन्त्रोक्त अमृतवर्त्तिका।

त्रिफला त्रिकटु ब्राह्मी गुडूची रक्तचित्रकम्। नागकेशरचूर्णं च भृङ्गनेरं समार्कवम् ॥ २४ ॥ सिन्धुवारो हरिद्रे द्वे शक्राशनगुडत्वचौ। एला मधुकपर्णी च विडङ्गं चोग्रगन्धिका ॥ २५ ॥ चूर्णं प्रत्येकमेतेषां समादाय पलद्वयम्। कामरूपसमुद्भूतैर्गुडैः पञ्चाशतैः पलैः ॥ २६ ॥ सपष्टित्रिशती कार्या वर्त्तिसेन समानतः। चन्द्रताराविशुद्धौ च पूजयित्वेष्टदेवताम् ॥ २७ ॥ सुकृती श्रद्धया मौनी वर्त्तिमेकां तु भक्षयेत्। ततोऽनुपानं पानीयं सलिलं च सुशीतलम् ॥ २८ ॥ कट्वम्लं लवणं चैव नातिमात्रं कदाचन। यः प्रत्यहमिदं खादेत् वर्षमानं निरन्तरम् ॥ २९ ॥ भोजनादौ प्रदोषे वा शृणु यादृक्फलं भवेत्। नष्टवह्निस्तु दीप्ताग्निर्वडवानलसन्निभः ॥ ३० ॥ इष्टापि भास्वती कान्तिश्चन्द्रिकेव निशामुखे। काशपुष्परुचः केशाः शिखिकण्ठमनोरमाः ॥ ३१ ॥ पञ्चाशद्दत्तं चक्षुर्लक्षयोजनदर्शनम्। जरा-

निरलथदेहोऽपि जायते सु महाबलः ॥३२॥ निर्व्याधिर्निर्जरः पंगुर्वेगेनोच्चैःश्रवा इव। दिनेश इव तेजस्वी कन्दर्प इव रूपवान् ॥ ३३ ॥ सहस्रायुर्महासत्त्वो गन्धर्व इव गायनः। स्त्रीशतं रमते नित्यं नावसादं प्रजत्यसौ ॥ ३४ ॥ न भजन्त्यापदः काश्चित् कामरूपी भवेदसौ। पद्मगन्धि वपुस्तस्य सुपुष्पमिव कोमलम् ॥ ३५ ॥ जराचर्यैः सुजीर्णस्य नखकेशादयो यथा। प्रभवन्ति बलादुग्रादथ कन्दाः इवाम्बुदात् ॥३६॥ हृष्टः पुष्टश्च पापघ्नः शान्तो भवति मानवः। श्रीअमृतवर्तिका नाम मृत्युञ्जयमुखोदिता। रसायनानां श्रेष्ठेयं सर्वव्याधिनिसूदनी ॥ ३७ ॥

त्रिफला, त्रिकटु (सोंठ, मिर्च, पीपरि), मही, गिलोय, लाल चित्रक, नागकेशर, सोंठ, भँगरा, भँभालू की जड़, हल्दी, दारुहल्दी, मोथ, हाथपीपी, छोटी इलायची, लंभारी, वायबिडंग और वच, प्रत्येक का चूर्ण आठ-आठ तोले। कामरूप (आसाम देश) में उत्पन्न गुड़ २॥ सेर; इन सबको एकत्र कर घोट ले और ३६० बत्ती बना ले। जब सेवन करनेवाले के चन्द्रमा और तारा शुद्ध हों तब इष्टदेवता का पूजन कर प्रसन्नता के साथ एक एक बत्ती खावे। अनुपान—शीतल जल। कड़ुआ, खट्टा तथा नमक कम खाना चाहिए। जो मनुष्य प्रतिदिन प्रातःकाल भोजन के आदि में अथवा सायंकाल में इसका सेवन करता है उसकी मन्दाग्नि बड़वानल के तुल्य तेज हो जाती है चन्द्रमा के तुल्य कान्ति हो जाती है, कांस के फूल से सफेद बाल भौंरे की गर्दन के-से काले हो जाते हैं, मेघरोगी दूर की वस्तु देखने लग जाता है बुढ़ापा से शिथिल शरीर सबल, रोगरहित तथा जरारहित हो जाता है। पँगुला पुरुष इन्द्र के घोड़े के तुल्य वेगवान्, सूर्य-सा तेजस्वी, कामदेव का-सा रूपवाला, दीर्घायु, महाबली और गन्धर्व का-सा गानेवाला हो जाता है। सौ स्त्रियों से रमण करके भी नहीं थकता है, कोई व्याधि नहीं सताती है, कामरूपी हो जाता है, कमल की-सी सुगन्धि तथा पुष्प-सा कोमल शरीर हो जाता है। बुढ़ापे से जीर्ण हुए नख-केश आदि इस प्रकार फिर से उत्पन्न हो जाते हैं जैसे वर्षा से कन्द उत्पन्न हो जाते हैं। मनुष्य इससे हृष्ट-पुष्ट, पापघ्न और शान्त हो जाता है। यह मृत्युञ्जय के मुख से कही हुई अमृतवर्तिका रसायनों में श्रेष्ठ और सब व्याधियों को नष्ट करनेवाली है। मात्रा—आधी बत्ती प्रातःकाल भोजन से पहिले और आधी बत्ती शाम को सेवन करनी चाहिए ॥ २१--३७ ॥

### श्रीसिद्धमोदक।

त्रिकटोस्त्रिपलं चूर्णं त्रिफलायाः पलत्रयम्। गुडूच्याश्च विडङ्गानां ग्रन्थिकग्रन्थिपर्णयोः ॥३८॥ रक्तचित्राङ्घ्रिजं चूर्णं ग्राह्यं चापि पृथक् पृथक्। प्रत्येकं द्विपलं चैषां गृह्णीयान्मतिमान्नरः ॥ ३९ ॥ कामरूपोद्भवा ग्राह्या गुडस्यार्द्धतुला तथा। सर्वमेकत्र संमर्द्य सर्पिषास्त्रिंशतं शुभम् ॥ ४० ॥ मोदकं कारयेद्धीमान् समभागेन यत्नतः। प्रत्यहं प्रातरेवैतत्पानीयेनैव भक्षयेत् ॥ ४१ ॥ एवं निरन्तरं कार्यं संवत्सरमतन्द्रितः। प्रथमे मासि वायुघ्नो द्वितीये बलवर्णवान् ॥ ४२ ॥ तृतीये नाशयेत् कुष्ठं श्वासकासौ तुरीयके। पञ्चमे स्त्रीप्रियत्वं च षष्ठे च पलितक्षयः ॥ ४३ ॥ सप्तमे कान्तियुक्तश्च अष्टमे बलवान् भवेत्। नवमे च शतायुः स्याद् दशमे च स्वरान्वितः ॥ ४४ ॥ महाबलस्त्वेकादशे अदृश्यो द्वादशे भवेत्। इच्छाहारविहारी स्यात्तो दैत्यरिपोः समः ॥४५॥ षड्ऊर्मिरहितो देही प्राप्नोति

कल्पजीवितम्। युवा निरन्तरं तिष्ठेद्यावत्कालं च जीवति ॥ ४६ ॥ भवन्ति सिद्धयोऽस्याष्टौ मासवापि परिकीर्त्तिताः। श्रीसिद्धमोदको ह्येष सिद्धादिषु निषेवितः ॥ ४७ ॥

त्रिकटु का चूर्ण १२ तोले, त्रिफला का चूर्ण १२ तोले तथा गिलोय, वायविडंग, पिपरामूल, गठिवन और लाल चीता की जड़, प्रत्येक औषधों का चूर्ण आठ-आठ तोले। कामरूप (आसाम) में बना हुआ गुड़ २॥ सेर। सबको एकत्र घोट कर २६० लड्डू बना लो। प्रातःकाल एक लड्डू जल के साथ खाना चाहिए। निरन्तर एक वर्ष तक सावधानी से इसका सेवन कराना चाहिए। इसके सेवन से पहले महीने में वाणीयुक्त, दूसरे में बल और वर्णयुक्त, तीसरे में कुष्ठनाश, चौथे में श्वास-कास का नाश, पाँचवें में स्त्रियों का प्यारा, छठे मे पलित का नाश, सातवें में कान्तियुक्त, आठवें में बलवान्, नवें में शतायु, दशवें में स्वरयुक्त, ग्यारहवें में महाबली और बारहवें महीने में अवश्य हो जाता है। एवं इच्छानुसार आहार-विहार करता हुआ इन्द्र के तुल्य हो जाता है और पद्‌र्मियों से रहित शरीर कल्पजीवी होकर जब तक जीवित रहता है तब तक निरन्तर युवा बना रहता है। आठों सिद्धियाँ प्राप्त हो जाती हैं। यह श्रीसिद्धमोदक सिद्धों द्वारा सेवित किया गया था ॥ ३८—४७ ॥

श्रीनृपतिवल्लभ रस।

जातीफललवङ्गाब्दत्वगेलाटङ्करामठम्। जीरकं तेजपत्रञ्च यमानी विश्वसैन्धवाः ॥ ४८ ॥ लौहमभ्रं रसो गन्धस्ताम्रं प्रत्येकशः पलम्। मरिचं द्विपलं दत्त्वा छागीक्षीरेण पेषयेत् ॥ ४९ ॥ धात्रीरसेन वा पेष्यं वटिकाः कुरु यत्नतः। श्रीमद्गहननाथेन विचिन्त्य परिनिर्मितः ॥ ५० ॥ सूर्यतेजसा चायं रसो नृपतिवल्लभः। अष्टादशवटीं खादेत् पवित्रः सूर्यदर्शकः ॥ ५१ ॥ हन्ति मन्दानलं सर्वमामदोषं विसूचिकाम्। प्लीहगुल्मोदराष्ठीलायकृत्पाण्डुककामलाम् ॥ ५२ ॥ हृच्छूलं पृष्ठशूलं च पार्श्वशूलं तथैव च। कटीशूलं कुक्षिशूलमानाहमण्डशूलकम् ॥ ५३ ॥ कासश्वासामवातांश्च श्लीपदं शोथमर्वुदम्। गलगण्डं गण्डमालामम्लपित्तञ्च गर्दभीम् ॥ ५४ ॥ कृमिकुष्ठानि दद्रूश्च वातरक्तं भगन्दरम्। उपदंशमतीसारं ग्रहण्यर्शः प्रमेहकम् ॥ ५५ ॥ अश्मरीं मूत्रकृच्छ्रञ्च मूत्राघातं सुदारुणम्। ज्वरं जीर्णं तथा कण्डूं तन्द्रालस्यं भ्रमं क्लमम् ॥ ५६ ॥ दाहञ्च विद्रधिं हिक्कां जडगद्गदमूकताम्। मूढञ्च स्वरभेदञ्च ब्रध्नवृद्धिविसर्पकान् ॥ ५७ ॥ उरुस्तम्भं रक्तपित्तं गुदभ्रंशारुचिं तृषाम्। कर्णनासामुखोत्थांश्च दन्तरोगांश्च पीनसान् ॥ ५८ ॥ स्थौल्यञ्च शीतपित्तञ्च स्थावरादिविषाणि च। वातपित्तकफोत्थांश्च द्वन्द्वजान् सान्निपातिकान् ॥ ५९ ॥ सर्वानेव गदान् हन्ति चण्डांशुरिव पापहा। बलवर्णकरो हृद्य आयुष्यो वीर्यवर्द्धनः ॥ ६० ॥ परं वाजीकरः श्रेष्ठः पुत्रदो मन्त्रसिद्धिदः। अरोगी दीर्घजीवी स्याद् रोगी रोगाद्विमुच्यते ॥ ६१ ॥ रसस्यास्य प्रसादेन बुद्धिमान् जायते नरः ॥ ६२ ॥

जायफल, लौंग, मोथा, दारचीनी, छोटी इलायची, सुहागा, हींग, सफेद जीरा, तेजपात, अजवाइन, सोंठ, सेंधानमक, लौहभस्म, अभ्रकभस्म, पारा, गन्धक, ताम्रभस्म, प्रत्येक ४ तोले, कालीमिर्च ८ तोले; इनके चूर्णों को

एकत्र मिलाकर बकरी के दूध से अथवा आँवलों के रस से पीसकर दो-दो रत्ती की गोलियां बनावें। इसे दिन में दो बार सेवन करा सकते हैं। इस प्रकार नौ दिन तक सेवन कराने से अर्थात् १८ गोली खाने से मन्दाग्नि, सम्पूर्ण मांसदोष, विसूचिका, प्लीहा, गुल्म, उदररोग, अष्ठीला, यकृद्वृद्धि, पाण्डुरोग, कामला, हृदयशूल, पृष्ठ शूल, पार्श्वशूल, कटीशूल, कुक्षिशूल, अफरा, आठों शूल, खाँसी, श्वास, आमवात, श्लीपद, सूजन, अर्बुद, गलगण्ड, गण्डमाला, अम्लपित्त, पाषाणगर्दभ, कृमि, कुष्ठ, दद्रु, वातरक्त, भगन्दर, उपदंश, अतीसार, संग्रहणी, बवासीर, प्रमेह, अश्मरी, मूत्रकृच्छ्र, मूत्राघात, जीर्णज्वर, खुजली, तन्द्रा, आलस्य, भ्रम, क्लम, अंजन, विद्रधि, हिक्का, जिह्वा की जड़ता, गद्गद, मूकता, मूढ़ता, स्वरभेद, मस्तकरोग, अण्डवृद्धि, विसर्प, ऊरुस्तम्भ, रक्तपित्त, गुदभ्रंश, अरुचि, पिपासा, कर्णरोग, नासारोग, मुखरोग, दन्तरोग, पीनस, स्थूलता, शीतपित्त, स्थावर आदि विषदोष तथा अन्य सम्पूर्ण वातजन्य, पित्तजन्य, कफजन्य, द्वन्द्वज तथा सान्निपातिक रोग नष्ट होते हैं। यह बलकारक, वर्ण्य, हृद्य, आयुष्य, वीर्यवर्धक, वाजीकरण तथा सन्तानोत्पादक एवं सर्वार्थसिद्धिकारक है। इस रस के प्रसाद से स्वस्थ पुरुष दीर्घायु तथा बुद्धिमान् होता है और रोगी रोग से मुक्त होता है ॥ ४८-६२ ॥

## सिद्ध लक्ष्मी विलास रस।

हेमभस्म च भागैकं रौप्यभस्म द्विभागिकम् । शुल्बभस्म त्रिभागञ्च कान्त भस्म चतुर्गुणम् ॥ ६३ ॥ पंच भागं च तीक्ष्णं स्यान्मण्डूरं षड्भागिकम् । निश्चन्द्रं ह्यभ्रकंचैव भस्म स्यात्सप्त भागिकम् ॥ ६४ ॥ दशैकादशभागे च प्रवालं मौक्तिके मृते । सर्वतुल्यं निधायाऽथ तत्तुल्यं मृत भस्मकम् ॥ ६५ ॥ मर्दयेत्प्लावितं द्रव्यं भावयेज्जाति पत्रकैः । त्रिकटु त्रिफला चातुर्जातं द्रावैश्च कौङ्कुमैः ॥ ६६ ॥ मृगनाभिरसैश्चैव मुनिवारान् पृथक् पृथक् । गुञ्जामात्रं लिहेत्सम्यक् सिताऽऽज्यमधु संयुतम् ॥ ६७ ॥ राजरोगं निहन्त्याशु पाण्डुरोग विनाशनम् । द्वन्द्वजं छर्दिरोगञ्च श्वासं कासञ्च कामलाम् ॥ ६८ ॥ दीर्घवातं पंचगुल्मान् सर्वशूलं विनाशयेत् । उन्मादं च मतिभ्रंशमष्टोदर महागदान् ॥ ६९ ॥ मेहानां विंशतिश्चैव षण्ढत्वं च क्षयं नयेत् । अरोचकमग्निमान्द्यं ग्रहणीदोषनाशनम् ॥ ॥ ७० ॥ वलीपलित विध्वंसि नाशयेत्कुम्भकामलाम् । दृष्टि पुष्टिकरं बल्यं कम्पवातञ्च नाशयेत् ॥ ७१ ॥ असाध्यरोग नाशाय सिद्धोलक्ष्मी विलासकः ॥ ७२ ॥

सुवर्ण भस्म १ भाग, रजत भस्म २ भाग, ताम्रभस्म ३ भाग, कान्त भस्म ४ भाग, फौलाद भस्म ५ भाग, मण्डूर भस्म ६ भाग, निश्चन्द्र अभ्रक भस्म ७ भाग, वङ्गभस्म ८ भाग नागभस्म ९ भाग, प्रवाल १० भाग, और मोती ११ भाग लेकर सबके समान पारे की भस्म (रस सिन्दूर) मिलाकर जावित्री, त्रिकुटा, त्रिफला, चातुर्जात, केशर, कस्तूरी इन सबके द्रवों से ७-७ बार घोटकर १-१ रत्ती की गोली बना लेवें। इनमें से १ गोली से २ गोली तक बलानुसार शक्कर, घी, और मधु के साथ देने से क्षय, पाण्डु, द्वन्द्वज, छर्दि रोग, श्वास, कास, कामला, दीर्घकालीन वातरोग, पाँचों प्रकार के गुल्म, सब तरह के दर्द, उन्माद, मतिभ्रंश (विक्षिप्तता), अष्टोदरीय महारोग, २० प्रकार के प्रमेह, नपुंसकता, अरुचि, मन्दाग्नि, ग्रहणी, वली पलित दृष्टि की कमजोरी, कम्पवात इन सबको नाश करता है, विशेष अनुभूत है ॥ ६३-७२ ॥

### मकरध्वज रसायन।

स्वर्णस्य भागौ वङ्गञ्च मौक्तिकं कान्तलौहकम्। जातीकोषफले रूप्यं रससिन्दूर कांस्यकम् ॥ ७३ ॥ कस्तूरी विद्रुमश्चन्द्रमभ्रकञ्चैकभागिकम्। स्वर्णसिन्दूरतो भागाश्चत्वारः कल्पयेद् बुधः ॥ ७४ ॥ नातः परतरः श्रेष्ठः सर्वरोगनिषूदनः। सर्वलोकहितार्थाय शिवेन परिकीर्तितः ॥ ७५ ॥

सुवर्णभस्म २ भाग, वङ्गभस्म, मुक्ताभस्म, कान्तलौहभस्म, जावित्री, जायफल, चाँदीभस्म, रससिन्दूर, कांस्यभस्म, कस्तूरी, प्रवालभस्म, कपूर, अभ्रकभस्म, हरएक १ भाग; स्वर्णसिन्दूर ४ भाग, इन्हें एकत्र मिला जल से घोटकर एक-एक रत्ती की गोलियाँ बनावे। यह रसायन सम्पूर्ण रोगों को नष्ट करता है ॥ ७३-७५ ॥

### अमृतार्णव रस।

सूतभस्म चतुर्भागं लौहभस्म तथाऽष्टकम्। अभ्रभस्म च षड्भागं गन्धकस्य च पञ्चमम् ॥ ७६ ॥ भावयेत् त्रिफलाक्वाथैस्तत्सर्वं भृङ्गजैर्द्रवैः। शिग्रुवह्निकटुक्वाथैर्भावयेत् सप्तधा पृथक् ॥ ७७ ॥ सर्वतुल्या कणा योज्या गुडैर्मिश्रं पुरातनैः। गुञ्जाषट्कमितं खादेज्जरामृत्युनिवारणम् ॥ ७८ ॥ ब्रह्मायुः स्याच्चतुर्मासे रसोऽयममृतार्णवः। कौरण्टकस्य पत्राणि गुडेन भक्षयेदनु ॥ ७९ ॥

पारभस्म (अभाव में रससिन्दूर) ४ भाग, लौहभस्म ८ भाग, अभ्रक भस्म ६ भाग, गन्धक २ भाग; इन्हें त्रिफला के क्वाथ, भाँगरे के रस तथा सहिंजना, चित्रक एवं कुटकी के क्वाथ से अलग-अलग सात बार भावना देकर सम्पूर्ण चूर्ण के समान पीपल का चूर्ण तथा पुराना गुड़ मिलाकर छह-छह रत्ती की गोलियाँ बनावे। इस गोली के सेवन के पश्चात् पियाबाँसा के पत्रों को गुड़ के साथ खावे। इसके सेवन से जरा तथा मृत्यु दूर होती है। चार मास तक सेवन करने से मनुष्य ब्रह्मायु अर्थात् दीर्घायु होता है ॥ ७६-७९ ॥

### श्रीनीलकण्ठ रस।

रसस्य भागाश्चत्वारो हेम्नो भागचतुष्टयम्। अभ्रं लौहं तथा मुक्ता वैक्रान्तं युग्मभागिकम् ॥ ८० ॥ रौप्यं प्रवालं ताप्यञ्च वङ्गमेकैकभागिकम्। त्रिधा जीवन्तिलाक्षाग्निमूलक्वाथेन भावयेत् ॥ ८१ ॥ एरण्डपत्रैः संवेष्ट्य धान्यराशौ निधापयेत्। ततो दिनत्रयादूर्ध्वमुद्धृत्य रक्तिकामिताम् ॥ ८२ ॥ मधुज्ज्याद्वटिकां धीमान् यथा व्याध्यनुपानतः। नीलकण्ठं समभ्यर्च्य शुचिः संयतमानसः ॥ ८३ ॥ रसायनवरः श्रीदो वातव्याधिविनाशनः। रसः श्रीनीलकण्ठाख्यो नीलकण्ठेन भाषितः ॥ ८४ ॥ कुष्ठमष्टादशविधं प्रमेहान् विंशतिं तथा। नेत्ररोगं तथा दोषान् रजःशुक्रसमुद्भवान् ॥ ८५ ॥ सन्निपातज्वरं घोरं हृच्छ्वासामुखकर्णजान्। रोगान् बहुविधान् हन्ति भास्करस्तिमिरं यथा ॥ ८६ ॥

रससिन्दूर ४ भाग, सुवर्णभस्म ४ भाग, अभ्रकभस्म, लौहभस्म, मुक्ताभस्म, वैक्रान्तभस्म; हरएक २ भाग; चाँदी की भस्म, प्रवालभस्म, स्वर्णमाक्षिकभस्म, वङ्गभस्म, हरएक १ भाग; सबको एकत्र कर इसमें जीवन्ती, लाख तथा चित्रकमूल के क्वाथ से तीन-तीन बार भावना दे। पश्चात् गोलाकार कर अरण्डी के पत्तों में लपेट धान्यराशि में दबा रखे। तदनन्तर तीन दिन के बाद निकालकर एक-एक रत्ती की गोलियाँ

बनावे। पवित्र तथा संयमी रहकर शिव की पूजा करके १ गोली का सेवन करे। व्याधि के अनुसार अनुपान का प्रयोग करे। यह श्रीनीलकण्ठ का कहा हुआ रसायन कान्ति को बढ़ाता और वातव्याधि को नष्ट करता है। इसके सेवन से अठारह कुष्ठ, बीसों प्रमेह, नेत्ररोग, रक्तदोष, शुक्रदोष, सन्निपात, ज्वर, विविध, हृद्रोग, नासारोग, मुखरोग और कर्णरोग तथा कई प्रकार के अन्य रोग ऐसे नष्ट होते हैं जैसे सूर्य से अन्धकार ॥ ८०-८६ ॥

### शिवागुटिका।

काले तु रवितापाढ्ये कृष्णायसजं शिलाजतु प्रवरम्। त्रिफलारससंयुक्तं त्र्यहश्च शुष्कं पुनः शुष्कम् ॥ ८७ ॥ दशमूलस्य गुडूच्या रसे बलायास्तथा पटोलस्य। मधुकरसे गोमूत्रे त्र्यहं त्र्यहं भावयेत्क्रमशः ॥ ८८ ॥ एकाहं क्षीरेण तु तद् पुनर्भावयेच्छुष्कम्। सप्ताहं भाव्यं स्यात् क्वाथैरेषां यथालाभम् ॥ ८९ ॥ काकोल्यौ द्वे मेदे विदारियुग्मं शतावरी द्राक्षा। ऋद्धियुगर्षभवीरा मुण्डितिका जीरकेऽशुमत्यौ च ॥ ९० ॥ रास्नापुष्करचित्रकदन्तीभकणाकलिङ्गवच्याब्दाः। कटुका शृङ्गी पाठा तानि पलांशिकानि भाव्यानि ॥ ९१ ॥ अम्बुद्रोणे साधितानां रसेन पादांशिकेन भाव्यानि। गिरिजस्यैवं भावितशुद्धस्य पलानि दशषट् च ॥ ९२ ॥ द्विपलश्च विश्वामागधिका कटुकर्कटाख्यमरिचानाम्। चूर्णं पलं विदार्यास्तालीपलानि चत्वारि ॥ ९३ ॥ षोडशसितापलानि चत्वारि घृतस्य माक्षिकस्याष्टौ। तिलतैलस्य द्विपलं चूर्णार्द्धपलानि पञ्चानाम् ॥ ९४ ॥ त्वक्क्षीरिपत्रत्वङ्नागैलानां मिश्रयित्वा तु। गिरिजस्य षोडशपलैर्गुटिकाः कार्याः द्विमाषसमाः ॥ ९५ ॥ ताः शुष्का नवकुम्भे जातीपुष्पाधिवासिते स्थाप्याः ॥ तासामेका काले भक्ष्या पेयापि वा सततम् ॥ ९६ ॥ क्षीररसदाडिमरसाः सुरासवं मधु च शिशिरतोयानि। आलोडनानि तासामनुपाने वा प्रशस्यन्ते ॥ ९७ ॥ जीर्णे लघ्वन्नपयो जाङ्गलनिर्यूहयूषभोजी स्यात्। सप्ताहं यावदतः परं भवेत्सर्वसामान्यम् ॥ ९८ ॥ भुक्त्वापि भक्षितेयं यद्वाञ्छया नावहेद्भयं किञ्चित्। निरुपद्रवा प्रयुक्ता सुकुमारकैः कामिभिश्चैव ९९ संवत्सरं प्रयुक्ता हन्त्येषा वातशोणितं प्रबलम्। बहुवार्षिकमपि गाढं यक्ष्माणं चाढ्यवातञ्च ॥ १२० ॥ ज्वरयोनिशुक्रदोषप्लीहार्शःपाण्डुग्रहणीरोगान्। ब्रध्नाश्मरीगुल्मपीनसहिक्काकासारुचिश्वासान् ॥ १०१ ॥ जठरं श्वित्रं कुष्ठं पाण्डुत्वं क्लैब्यं गरं क्षयं शोषम्। उन्मादापस्मारौ वदनाक्षिशिरोगदान् सर्वान् ॥ १०२ ॥ आनाहमतीसारं सासृग्दरं कामलाप्रमेहांश्च। यकृदर्बुदानि विद्रधिं भगन्दरं रक्तपित्तञ्च ॥ १०३ ॥ अतिकार्श्यमतिस्थौल्यं स्वेदमथ श्लीपदञ्च विनिहन्ति। दंष्ट्राविषं समौलं गराणि जङ्गमकाराणि ॥ १०४ ॥ मन्त्रौषधियोगान् विप्रयुक्तान् भौतिकांस्तथा भावान्। पापालक्ष्मीश्चेयं शमयेद् गुटिका शिवा नाम्ना ॥ १०५ ॥ बल्या वृष्या धन्या कान्तियशःश्रीप्रजाकरी चेयम्। दद्यान्नृपवल्लभतां जयं विवादे

मुखस्था च ॥ १०६ ॥ श्रीमान् प्रकृष्टमेधाः स्मृतिबुद्धिबलान्वितोऽमुलशरीरः। पुष्टयोजोऽतिविमलेन्द्रियतेजोबलसम्पदुपेतः ॥ १०८ ॥ वलीपलितरोगरहितो जीवेच्छरदां शतद्वयं पुरुषः। संवत्सर मयोगात् द्वाभ्यां शतानि चत्वारि ॥ १०८ ॥ सर्वामयानिरकथितं मुनिगणभक्ष्यंरसायनरहस्यम् । समुद्रभूधामृतमन्थनोत्थस्वेदः शिलाभ्योऽस्रवान् गिरेः माक् ॥ १०९॥ यो मन्दरस्यात्ममुवा हिताय न्यस्तः स शैलेषु शिलाजरूपी । शिवागुडिकेति रसायनमुक्तं गिरीशेन गणपतये। शिववदनविनिर्गता यस्मात्साम्ना तस्माच्छिवा गुडिका ॥ ११० ॥

ग्रीष्मकाल में काली लौहयुक्त चट्टान से निकलनेवाली उत्तम शिलाजीत ६४ तोला लेकर उसमें त्रिफला के क्वाथ से तीन-दिन भावना दे और सुखा ले। फिर दशमूल (मिलित), गिलोय, खरेंटी परवल, मुलहठी, इनके यथा सम्भव रस अथवा क्वाथ से तथा गोमूत्र से क्रमशः अलग-अलग तीन तीन भावना दे। तदनन्तर गौ के दूध से एक भावना दे और सुखा ले। पश्चात् निम्नलिखित क्वाथ से सात भावना दे क्वाथ—काकोली, क्षीरकाकोली, मेदा, महामेदा, विदारी, क्षीरविदारी, शतावर, दाख, ऋद्धि, वृद्धि ऋषभक, जटामांसी, गोरखमुण्डी, सफेद जीरा, काला जीरा, शालपर्णी, पृश्निपर्णी, रास्ना, पोहकरमूल, चित्रक, दन्तीमूल, गजपीपल, इन्द्रयव, भव्य, मोथा, कुटकी, काकड़ासिंगी, पाठा; हर एक द्रव्य यथा लाभ (जो प्राप्त हो सके) ४-४ तोले ले और २४ सेर ४८ तोले जल में क्वाथ करे; जब ६ सेर १२ तोले जल रह जाय तब उससे भावना दे। पश्चात् सोंठ, पीपल, कुटकी, काकड़ासिंगी, कालीमिर्च; इनका चूर्ण अलग-अलग ८ तोले, विदारीकन्द का चूर्ण ४ तोले, तालीशपत्र १६ तोले, खांड ६४ तोले, गोघृत १६ तोले, शहद ३२ तोले, तिल का तैल ८ तोले, तथा तवाशीर, तेजपात, दारचीनी, नागकेशर, छोटी इलायची, पाँचों मिलाकर ९ तोले; इन्हें मिलाकर दो-दो माशे की गोलियाँ बना ले। जब ये गोलियाँ सूख जायँ तब चमेली के फूलों से सुगन्धित पात्र में इन्हें रख दे। इनमें से एक-एक गोली सेवन करनी चाहिए। अनुपान-दूध, मांसरस अनार का रस, सुरा, आसव, शहद अथवा शीतल जल। इन्हीं में घोलकर भी पिला सकते हैं। औषध के जीर्ण हो जाने पर इसका अन्न, दूध, जांगल पशु-पक्षियों का मांसरस, मूँग आदि का यूष खाना चाहिए। इस प्रकार सात दिन पथ्य रक्खे। पश्चात् साधारण नियमों पर चले। इस गोली को इच्छानुसार भोजन के बाद भी खाने से कोई नुकसान नहीं। इसे सुकुमार एवं कामी पुरुष सेवन कर सकते हैं। एक वर्ष तक निरन्तर इसके प्रयोग से प्रबल, बहुत वर्ष का तथा गम्भीर वातरक्त, यक्ष्मा, आढ्यवात, ज्वर, योनिदोष, वीर्यदोष, प्लीहा, बवासीर, पाण्डु, ग्रहणी, अफरा, वमन, गुल्म, पीनस (प्रतिश्याय), हिचकी, खाँसी, अरुचि, श्वास उदररोग, श्वित्र कुष्ठ, पंगुता, नपुंसकता, गरविष, क्षय, शोथरोग, उन्माद, अपस्मार तथा सम्पूर्ण मुख रोग, सम्पूर्ण नेत्ररोग, शिरो रोग, शर्करा, अतीसार रक्तप्रदर, कामला, प्रमेह, पक्वाश, अर्बुद, विद्रधि भगन्दर, रक्तपित्त, अतिकृशता, अतिस्थूलता, पसीना आना, श्लीपद, दंष्ट्राविष, मूलविष, विविध गर (संयोगज) विष तथा मन्त्र एवं औषध के विपरीत प्रयोग से उत्पन्न दोष, भूतबाधा, पाप और अलक्ष्मी आदि शान्त होते हैं। यह शिवागुटिका बलकारक, वीर्यवर्द्धक, धनोत्पादक, कान्ति, यश, शोभा एवं सन्तान देनेवाली है। इसे मुख में रखने से पुरुष राजा का प्रिय हो जाता है और विवाद में जयलाभ करता है। इसका एक वर्ष तक सेवन करनेवाला व्यक्ति लक्ष्मीवान्, स्मृति, बुद्धि बल, अतुल शरीर, पुष्टि ओज, तेज आदि से युक्त वली पलित से रहित तथा निर्मलेन्द्रिय एवं जरारहित होकर २०० वर्ष तक जीता है। दो

वर्ष सेवन करनेवाला ५०० वर्ष तक जीता है। यह सम्पूर्ण रोगों को नष्ट करनेवाला, मुनियों के लिये सेव्य रसायन है। प्राचीन काल में अमृत का मथन करते हुए मन्दर पर्वत की शिलाओं से अमृतयुक्त स्वेद निकला था। उस स्वेद को जगत् के कल्याण के लिये ब्रह्मा ने पर्वतों में शिलाजीत के रूप में रख दिया। शिवा गुटिका नामक रसायन का महादेवजी ने गणेशजी को उपदेश किया था। चूँकि यह रसायन शिवजी के मुख से प्रकट हुआ, अतएव इसका नाम शिवागुटिका हुआ। इस योग में, जिसमें काकोल्यादि क्वाथ से सात दिन भावना देने को कहा है, उसका निर्देश सात भावनाओं के लिये है, अतः सातो क्वाथ की भावनार्थ प्रयोग के लिये सातवें भाग का क्वाथ करना चाहिए। इस प्रकार सात बार अलग-अलग क्वाथ तैयार करना चाहिए। ८७-११०।

वसन्तकुसुमाकर रस ।

प्रवालरसमौक्तिकाभ्ररमिदं चतुर्भाग-भाक् पृथक् पृथगथ स्मृते रजतहेमनी द्वयंशके। अयोभुजङ्गकं त्रिलयकं विमर्दाखिलम् ॥ शुभेऽहनि विभावयेच्च पयोगदं धिया समशः ॥ १११ ॥ द्रवैः पनिशेक्षुजैः कमलमालतीपुष्पजैः पयः कदलिकन्दजैर्मलयजैर्णनाभ्युद्भवैः । वसन्तकुसुमाकरो रसपतिर्द्विवल्लोऽशितः समस्तगदहृद्भवेत् किल निजानुपानैरयम् ॥ ११२ ॥

मूँगाभस्म, रससिन्दूर, मोती की भस्म और अभ्रकभस्म, प्रत्येक ४ भाग, रजतभस्म २ भाग, स्वर्णभस्म २ भाग, लौहभस्म ३ भाग, सीसा की भस्म ३ भाग और रांगा की भस्म ३ भाग। इन सबको एकत्र घोट कर शुभ दिन में अडूसा, हल्दी, ईख, कमल, मालती के फूल, दूध, केला का कन्द चन्दन और कस्तूरी ; इनके स्वरस अथवा क्वाथ की अलग-अलग सात-सात भावनाएँ दे। इस वसन्तकुसुमाकर रस को चार-चार रत्ती की

गोलियाँ बनाकर रोगानुसार अनुपान से आधी घड़ी से एक घड़ी तक सेवन करे तो सब प्रकार के रोग नष्ट होते हैं ॥ १११-११२ ॥

नागसिन्दूर ।

पारदात्कुडवं सार्धकुडवं शुद्धाच्च गन्धतः। सीसकादर्धकुडवं नवसारस्तोऽपि च ॥११३॥ कज्जली कारयेदेषां भावनादापयेदिमाः पलाशमूलं नागवल्ली तथा घाऽमरवल्लिका ॥ ११४ ॥ एतेषां स्वरसैर्भाव्यं काचकुप्यं ततः क्षिपेत्। मुखं सम्मुद्य सिकतायन्त्रे वह्निं दद्दीत च ॥ ११५ ॥ चतुर्विंशतिभिर्यामैः क्रमवृद्ध्या च पाचयेत्। दीपाऽग्निदन्द्वभिर्यामैर्मध्याग्नि षड्भिरेव च ॥११६॥ हठाग्निनैत्रयामैश्च स्वाङ्गशीतं समुद्धरेत युक्त्याऽनुपानतो हन्यात्सर्वरोगान रसोत्तमः ॥ ११७ ॥

शुद्धपारा ४ पल शुद्ध गन्धक छःपल विष और नौसादर दो दो पल लेकर नाग को गला कर पारे को मिलाय गन्धक के साथ कज्जली कर नौसादर मिलाकर पलाश की जड़ नई ( नागबेल्ली गु० ) गिलोय इन सब के रसों से १-१ रोज घोट कर सुखाकर ६-७ कपड़मिट्टी की आतश शीशी में रख कर उसका मुँह खड़िया मिट्टी की डाट से बन्द कर बालुका यन्त्र में रख कर १६ प्रहर दीपाग्नि ६ प्रहर मन्दाग्नि और ४ प्रहर हठाग्नि देकर शीतल होने पर निकाल रोगानुसार अनुपान के साथ देने से समस्त रोगों को दूर करता है ॥ ११३-११७ ॥

अष्टावक्ररस ।

रसराजस्य भागैकं द्विभागं गन्धकस्य च। भागमेकं सुवर्णस्य भागार्द्धं रजतस्य च ॥ ११८ ॥ नागं ताम्रं खर्परं च वङ्गं चैव समांशकम्। प्रत्येकं रजतार्द्धं च सर्वमेकत्र मर्दयेत् ॥ ११९ ॥ वटाङ्कुररसै-

यामं यामं कन्यारसैः सह। कूप्यभ्यन्तरे संस्थाप्य त्रिदिनं पाचयेत् सुधीः १२० ॥ दाडिमीकुसुमप्रख्यं जायते ह्यविकल्पतः। वलीपलितविध्वंसि बलपुष्टिकरं महत् ॥ १२१ ॥ आरोग्यजननं मेधाकान्तिकुष्शुक्रवर्द्धनम्। महौषधवरं चैतदष्टावक्रेण निर्मितम् ॥ १२२ ॥

शुद्ध पारा १ भाग, गन्धक २ भाग, सुवर्णभस्म १ भाग, चाँदी की भस्म आधा भाग तथा सीसा की भस्म, राँगे की भस्म, खपरिया और वङ्गभस्म; प्रत्येक चाँदी से आधा भाग। इन सबको एकत्र कर बरगद के अंकुर और घीकुवार के रस में एक-एक पहर घोटकर काँच की कुप्पी में बन्दकर तीन दिन तक पकावे। जब अनार के फूल के समान लाल हो जाय तब उसको निकाल ले। इसके सेवन करने से वलीपलित नष्ट होते हैं। यह प्रयोग बल, पुष्टि तथा आरोग्यजनक है। इसके प्रयोग से बुद्धि, कान्ति तथा वीर्य की वृद्धि होती है। यह अष्टावक्रजी द्वारा निर्मित रस है ॥ ११८—१२२ ॥

त्रैलोक्यचिन्तामणि।

रसं वज्रं हेम तारं ताम्रं तीक्ष्ण मृताभ्रकम्। मौक्तिकं गन्धकं शङ्खं प्रवालं तालकं शिला ॥ १२३ ॥ शोधितं च समं सर्वं सप्ताहं मर्दयेद् दृढम्। वह्निमूलकषायेण भानुदुग्धे दिनत्रयम् ॥ १२४ ॥ निर्गुण्डीशूरणद्रावैर्वज्रीदुग्धैर्दिनत्रयम्। अनेन पूरयेद्गर्भं पीतवर्णवराटिकाम् ॥ १२५ ॥ टङ्कणं रविदुग्धेन पिष्ट्वा तस्य मुखं लिपेत्। मृद्भाण्डे मुद्रितं पाच्यं स्वाङ्गशीतं विचूर्णयेत् ॥ १२६ ॥ चूर्णतुल्यं मृतं सूतं वैक्रान्तं सूतपादिकम्। शोभाञ्जनद्रवैः मर्द्यं सप्तवारान् विभावयेत् ॥ १२७ ॥ वह्निमूलकषायेण भावनाद्वयमीहते। एवं संशुद्धसूतेन्द्रः सर्वव्याधिकुलान्तकः ॥ मासार्द्धेन निहन्त्याशु जरामृत्यू न संशयः ॥ १२८ ॥ वातं विद्रधिशूलपाण्डुग्रहणीरक्तातिसारान् जयेत् मेहप्लीहजलोदराश्मरितृषाशोथं हलीमोदरम्। मूत्राघातभगन्दरज्वरगणान् सर्वाणि कुष्ठान्यपि साध्यासाध्यभवान् गदान् बहुतरान् संसाधयेद्योगतः ॥१२९॥

शुद्ध पारा, हीरा की भस्म, सुवर्णभस्म, रौप्यभस्म, ताम्रभस्म, लौहभस्म, अभ्रकभस्म, मुक्ताभस्म, शुद्ध गन्धक, शंखभस्म, मूँगा की भस्म, शुद्ध हरताल और शुद्ध मैनशिल; इन सबको एकत्र कर चीता की जड़ के काढ़े से ७ दिन मदार (आक) के दूध से ३ दिन, सँभालू के रस से ३ दिन, जमीकन्द के रस से ३ दिन और सेहुँड के दूध से ३ दिन घोटकर पीली कौड़ियों के भीतर भर दे और सुहागा को आक के दूध से पीस कर कौड़ियों का मुख बन्द कर दे। फिर इन कौड़ियों को मिट्टी के पात्र में रखकर उसका मुख बन्दकर गजपुट में फूँक दे। स्वाङ्ग शीतल होने पर उसको पीसकर चूर्ण बना ले। चूर्ण के बराबर रससिन्दूर, रससिन्दूर की चौथाई भाग वैक्रान्तभस्म मिलाकर उसमें सहिंजन के रस की ७ और चीता की जड़ के काढ़े की २ भावनाएँ दे। इस प्रकार शुद्ध हुआ रस सब प्रकार के रोगों को समूल नष्ट करता है। १२ दिन के सेवन से जरा और मृत्यु को नष्ट करता है इसमें संशय नहीं है। यह वातरोग, विद्रधि, शूल, पाण्डु, संग्रहणी, रक्तातिसार, प्रमेह, प्लीहा, जलोदर, पथरी, तृषा, शोथ, हलीमक, उदरविकार, मूत्राघात, भगन्दर, सब प्रकार के ज्वर, सब प्रकार के कुष्ठ तथा अनेक प्रकार के साध्य-असाध्य रोगों को नष्ट करता है ॥ १२३—१२९ ॥

पूर्णचन्द्ररस।

द्विकर्षं शुद्धसूतं च गन्धकं च द्विकार्षिकम्। लौहभस्म पलं चैकं जारिताभ्रं पलांशिकम् ॥ १३० ॥ द्वितोलं रजतं चैव वङ्गभस्म द्विकार्षिकम्। सुवर्णं तोलकं चैव ताम्रं कांस्य च तत्समम् ॥ १३१ ॥ जातीफलं चेन्द्रपुष्पमेला भृङ्गं च जीरकम्। कर्पूरं वानिशांयुक्तं कर्षं दद्यात् पृथक् पृथक् ॥ १३२ ॥ सर्वं खल्वतले क्षिप्त्वा कन्यारसविमर्दितम्। भावयित्वा वरालोधैरुयूकाणां रसैस्तथा ॥ १३३ ॥ एरण्डपत्रैः संवेष्ट्य धान्यराशौ दिनत्रयम्। उद्धृत्य मर्दयित्वा तु वटिकां वल्लसम्मिताम् ॥ १३४ ॥ खादेच्च वटिकामेकां पर्णखण्डेन संयुताम्। सर्वव्याधिविनाशाय काशिराजेन निर्मितः ॥ १३५ ॥ बल्यो रसायनो वृष्यो वाजीकरण उत्तमः। अग्निमान्द्यमजीर्णं च ग्रहणीं चिरजामपि ॥ १३६ ॥ आमवातमम्लपित्तं जीर्णं ज्वरमरोचकम्। आमशूलं कटीशूलं हृच्छूलं पक्तिशूलकम् ॥ १३७ ॥ कामशोकोद्भवं रोगं प्रमेहं बहुमूत्रकम्। वायुं बहुविधं हन्ति ध्वजभङ्गं विशेषतः ॥ १३८ ॥ मेधां च लभते शान्ति तुष्टिपुष्टिसमन्विताम्। वृद्धोऽपि तरुणस्पर्द्धी स्त्रीषु चापि वृषायते ॥ १३९ ॥ दृष्टः सिद्धफलो ह्येष रसायनवरः स्मृतः ॥ १४० ॥

शुद्ध पारा २ तोले, गन्धक २ तोले, लोहभस्म ४ तोले, अभ्रकभस्म ४ तोले, चाँदी की भस्म २ तोले, वङ्गभस्म २ तोले, सुवर्णभस्म १ तोला, ताम्रभस्म १ तोला और कांस्यभस्म १ तोला। जायफल, लौंग, इलायची, भँगरा, जीरा कपूर, आलकौशी और नागरमोथा; प्रत्येक एक एक तोला। इन सबको खरल में डालकर घी कुवार के रस से घोटे। पश्चात् त्रिफला के काढ़ा और एरण्ड की जड़ के रस की भावना देकर गोला बना ले और एरण्ड के पत्तों में लपेटकर धान्यराशि में रख दे। तीन दिन के बाद धान्यराशि में से निकालकर घोट ले और दो-दो रत्ती की गोलियाँ बना ले। पान में एक गोली रखकर खाने से सब रोग नष्ट होते हैं। यह काशिराज का बनाया हुआ रस बलप्रद, रसायन, वृष्य और उत्तम वाजीकरण है। तथा मन्दाग्नि, अजीर्ण, पुरानी संग्रहणी, आमवात, अम्लपित्त, जीर्णज्वर, अरुचि, आमशूल, कटिशूल, हृदयशूल, पक्तिशूल, काम और शोक से उत्पन्न रोग प्रमेह और बहुमूत्र, अनेक प्रकार का वायुरोग और ध्वजभङ्ग; इन रोगों को नष्ट करता है। बुद्धि, तुष्टि और पुष्टि को प्राप्त करता है। इसके प्रताप से वृद्ध भी तरुण पुरुष की बराबरी करने लगता है और स्त्रियों में वृष के तुल्य रमण करता है। यह अनुभूत श्रेष्ठ रसायन है ॥ १३०-१४० ॥

श्रीमहल्लक्ष्मीविलासरस।

पलं कृष्णाभ्रचूर्णस्य तदर्द्धं गन्धपारदौ। तदर्द्धं वङ्गभस्मापि तदर्द्धं तारकं तथा ॥ १४१ ॥ तत्समं माक्षिकं चैव तदर्द्धं ताम्रभस्मकम्। रसतुल्यं च कर्पूरं जातीकोषफले तथा ॥ १४२ ॥ वृद्धदारकबीजं च बीजं स्वर्णफलस्य च। प्रत्येकं कार्षिकं भागं मृतं स्वर्णं द्विशाणकम् ॥ १४३ ॥ निष्पिष्य वटिका कार्या द्विगुञ्जाफलमानतः। निहन्ति सन्निपातोत्थान् गदान् घोरान् सुदारुणान् ॥ १४४ ॥ गलोत्थानन्त्रवृद्धिं च तथातीसारमेव च। कुष्ठमष्टादशविधं प्रमेहान् विंशतिं तथा ॥ १४५ ॥ श्लीपदं कफवातोत्थं चिरजं कुलजं तथा। नाडीव्रणं व्रणं घोरं गुदा-

मयमगन्दरम् ॥ १४६ ॥ कासपीनसयक्ष्मघ्नः स्थौल्यदौर्गन्ध्यरक्तनुत् । आमवातं सर्वरूपं जिह्वास्तम्भं गलग्रहम् ॥ १४७ ॥ उदरं कर्णनासाक्षिमुखवैजात्यमेव च । सर्वशूलं शिरःशूलं गुदं स्त्रीणां हरेद्द्रुतम् ॥ १४८ ॥ वटिकां प्रातरेकैकां खादेन्नित्यं यथाबलम् । अनुपानमिह प्रोक्तं मांसपिष्टं पयोदधि ॥ १४९ ॥ वारिभक्तसुरासीधुसेवनात् कामरूपधृक् । वृद्धोऽपि तरुणस्पर्द्धी न च शुक्रक्षयो भवेत् ॥ १५० ॥ न च लिङ्गस्य शैथिल्यं न केशानां च पक्वता । नित्यं गच्छेत् शतं स्त्रीणां मत्तवारणविक्रमः ॥ १५१ ॥ द्विलक्षयोजनी दृष्टिर्जायते पौष्टिकस्तथा । प्रोक्तः प्रयोगराजोऽयं नारदेन महात्मना ॥ १५२ ॥ रसो लक्ष्मीविलासोऽयं वासुदेवे जगत्पतौ । अभ्यासादस्य भगवान् ललनासु वल्लभः ॥ १५३ ॥

काले अभ्रक की भस्म ४ तोले, गन्धक २ तोले, शुद्ध पारा २ तोले, वंगभस्म १ तोला चाँदी की भस्म ६ माशे, सोनामाखी की भस्म ६ माशे, ताम्रभस्म ३ माशे, कपूर २ तोले, जायफल २ तोले, जावित्री २ तोले तथा विधारा के बीज और धतूरा के बीज एक-एक तोला तथा स्वर्णभस्म ६ माशे ; सबको पीसकर दो-दो रत्ती की गोलियाँ बना ले । एक-एक गोली प्रातःकाल बलानुसार खाना चाहिये । अनुपान—मांसपिष्ट, दूध, दही, जल, भात, मदिरा और सीधु । यह लक्ष्मीविलास रस अत्यन्त कठिन सन्निपात रोग, गले के रोग, अन्त्रवृद्धि, अतीसार, दारुण कुष्ठ, बीस प्रकार के प्रमेह, कफवातजन्य, चिरकालोत्पन्न अथवा कुलक्रमागत श्लीपद और नासूर, कठिन व्रण, बवासीर, भगन्दर, खाँसी, पीनस, राजयक्ष्मा, स्थूलता, दुर्गन्ध, रक्त विकार, सब प्रकार का आमवात, जिह्वास्तम्भ, गलग्रह, उदररोग, कर्णरोग, नासारोग, नेत्ररोग, मुख की विरसता, सब प्रकार के शूल, शिर:शूल और सब प्रकार के स्त्रियों के रोगों को शीघ्र नष्ट करता है । तथा इसके सेवन से मनुष्य कामरूप तथा वृद्ध भी युवा हो जाता है । इसके सेवन से न तो वीर्यपात होता है, न इन्द्रिय शिथिल होती है और न बाल ही पकते हैं । नित्य १०० स्त्रियों से गमन कर सकता है, मत्त हाथी का-सा पराक्रम हो जाता है, दृष्टिशक्ति बढ़ जाती है और शरीर पुष्ट हो जाता है । इस प्रयोगराज लक्ष्मीविलासरस को महात्मा नारदजी ने जगत्पति भगवान् से कहा था । इसके सेवन से भगवान् लाखों स्त्रियों के प्यारे हुए हैं ॥ १४१-१५३ ॥

## सारस्वतारिष्ट ।

समूलपत्रशाखाया ब्राह्म्या ब्राह्ममुहूर्त्तके । गृहीत्वा विंशतिपलं पुष्ययोगे शतावरी ॥ १५४ ॥ विदारिकाभयोशीराण्यार्द्रकं च तथा मिशिः । पञ्चपञ्चपलान्येषां जलद्रोणे पचेद्भिषक् ॥ १५५ ॥ पादावशेषे निस्राव्य रसं वस्त्रेण गालयेत् । माक्षिकस्य दशपलं सितायाः पञ्चविंशतिः ॥ १५६ ॥ धातकी पञ्चपलिका रेणुका त्रिवृता कणा । देवपुष्पं वचा कुष्ठं वाजिगन्धा विभीतकी ॥ १५७ ॥ अमृतैला विडङ्गं त्वक् प्रत्येकं कर्षसम्मितम् । क्वाथे तस्मिन् समस्तानि समाक्षिप्य प्रयत्नतः ॥ १५८ ॥ स्वर्णकुम्भे निदध्याद् वा नवे मृद्भाजनेऽपि वा । स्वर्णमत्रुपत्रं च क्षिप्त्वास्मिन् कर्षसम्मितम् ॥ १५९ ॥ मासाज्जातरसं दृष्ट्वा हैमपात्रे न्यसेत् घने । वाससा च परिस्राव्य स्थापयेद् घृतभाजने ॥ १६० ॥ सारस्वतामिधोऽरिष्ट एषोऽमृत-

समः पुरा । शिष्याणामुपकारार्थं धन्वन्तरिविनिर्मितः ॥ १६१ ॥ आयुर्वीर्यं धृतिं मेधां बलं कान्तिं विवर्द्धयेत् । वाग्विशुद्धिकरो हृद्यो रसायनवरः स्मृतः ॥ १६२ ॥ बालकानां च यूनां च वृद्धानां च हितः सदा । नरनारीहितो नित्यं परमोजस्करो मतः ॥ १६३ ॥ वारयेत् स्वरकार्कश्यं तथा चास्पष्टभाषणम् । स्वरं परमृतस्येव जनयेत् सेवनात् सदा ॥ १६४ ॥ रजोदोषेण दुष्टानां योषितां शुक्रदोषिणाम् । पुंसां चापि शुभकरः सर्वदोषहरो मतः ॥ १६५ ॥ अत्यध्ययनशीलादिक्षीणस्मृतिबला नराः लभन्ते चिरसन्तोषं स्मृतिं चास्य निषेवणात् ॥ १६६ ॥ पयसा सह पातव्योऽरिष्टोऽयं शाणमानतः । मासाभ्यां रोगहृच्चायं शरदा सर्वसिद्धिदः ॥ ६७ ॥ अकालमृत्योर्हरणे यदीच्छा नारीप्रियत्वं यदि वाञ्छितं स्यात् । वाक्शुद्धिधैर्यस्मृतिलब्धिरिष्ट निषेव्यतां तर्ह्यमृतं भवद्भिः ॥ १६८ ॥

इति भैषज्यरत्नावल्यां रसायनाधिकारः समाप्तः ।

———

पुष्य नक्षत्र और मान्य मुहूर्त में मूल, पत्र और शाखा सहित लाई हुई ब्राह्मी ८० तोले; शतावरी, विदारीकन्द, हड़, खस, अदरख और सौंफ; सोल-सोलह तोले । जल २५ सेर ४८ तोले, अवशिष्ट क्वाथ ६ सेर ३२ तोले । इसको कपड़े से छान ले और इसमें शहद ४० तोले, शक्कर १०० तोले, धाय के फूल २० तोले तथा रेणुका, निसोत, पीपर, लौंग, वच, कूट, असगन्ध, बहेड़ा, गिलोय, छोटी इलायची, वायविडंग और दालचीनी; प्रत्येक एक-एक तोला छोड़कर सोने के कलश में अथवा मिट्टी के नये पात्र में भर दे और उसमें एक तोला सोना के वर्क भी डाल दे । एक महीने के बाद जब यह रसयुक्त हो जाय तो सोने के पात्र से छानकर घृत के चिकने मृत्पात्र में रख दे । यह अमृत तुल्य सारस्वतारिष्ट शिष्यों के उपकार के लिए धन्वन्तरिजी ने बनाया था । यह आयु, वीर्य, धारणाशक्ति, मेधा, बल और कान्ति को बढ़ाता है । वाणी को शुद्ध करता है, हृदय को बल देता है तथा रसायनों में श्रेष्ठ रसायन है । यह बालक, युवा और बूढ़ों को सदा हितकर है । स्त्री और पुरुषों को नित्य ही हितकर एवं परम ओज का देनेवाला है । स्वर की कर्कशता और अस्पष्टभाषण को दूर कर कोयल का सा स्वर कर देता है । स्त्रियों के रजोदोष और पुरुषों के वीर्यदोष को दूर करता है । पढ़नेवालों, गानेवालों और क्षीणस्मृति ( जिनकी यादादास्त कम हो गई है ) तथा क्षीण बलवालों को सन्तोष देनेवाला है । तीन माशे ( अधिक आधा तोला तक ) अरिष्ट जल के साथ पीना चाहिए । यह एक महीने में सब रोगों को दूर करता है तथा एक वर्ष के सेवन से सब सिद्धियों को देता है । यदि आप लोग अकाल मृत्यु से बचने की और स्त्रियों के प्यारे होने की इच्छा करते हों तथा वाणी की शुद्धि, धैर्य और स्मरणशक्ति चाहते हों तो सारस्वतारिष्टसंज्ञक अमृत का सेवन करिए ॥ १२४-१६८ ॥

इति श्रीसरयूप्रसादत्रिपाठिविरचितायां
भैषज्यरत्नावल्या रत्नप्रभाभिधायां
व्याख्यायां रसायनाधि-
कारः समाप्तः ।

———

१ शारदा वर्णेषु ।

## अथवाजीकरणाधिकारः।

वृष्याधिकार।

चिन्तया जरया शुक्रं व्याधिभिः कर्मकर्षणात्। क्षयं गच्छत्यनशनात् स्त्रीणां चातिनिषेवणात् ॥ १ ॥

चिन्ता, बुढ़ापा और रोग से तथा वमन विरेचनादि द्वारा खिंच जाने से, अधिक उपवास करने से और अत्यधिक स्त्रीप्रसङ्ग से वीर्य क्षीण हो जाता है ॥ १ ॥

वाजं शुक्रं तदस्यास्तीति वाजी अवाजी वाजीक्रियते पुरुषोऽनेन इति वाजीकरणम्। अथवा वाजीव योगात् यदुक्तं चरके—

येन नारीषु सामर्थ्यं वाजिवल्लभते नरः। येन वाप्यधिकंवीर्यं वाजीकरणमेव तत् ॥ २ ॥

वाज नाम वीर्य का है वह जिसके हो उसको वाजी कहते हैं। जिस औषधि आदि से वीर्यहीन पुरुष वीर्ययुक्त किया जाता है। उसको वाजीकरण कहते हैं। अथवा जिस औषधि द्वारा मनुष्य स्त्रीप्रसंग में वाजी ( घोड़े ) के समान शक्ति प्राप्त कर ले उस औषधि को भी वाजीकरण कहते हैं। जैसे चरक ने कहा है—

जिस प्रयोग ( आहार-विहार आदि ) के सेवन से पुरुष स्त्रीप्रसङ्ग में घोड़ा के समान सामर्थ्य प्राप्त करता है अथवा जिस प्रयोग के द्वारा वीर्य अधिक होता है उसको वाजीकरण[1] कहते हैं ॥ २ ॥

ऐसा न करने में दोष।

ग्लानिः कम्पोऽवसादस्तदनु च कृशता क्षीणता चेन्द्रियाणां शोषोच्छ्वासोपदंशज्वरगुदजगदाः क्षीणता सर्वधातौ। जायन्ते दुर्निवाराः पवनपरिभवाः क्लीबता लिङ्गभङ्गो वामात्यर्थातियोगाद्भजत इह सदा वाजिकर्मच्युतस्य ॥ ३ ॥

वाजीकर्म के बिना जो अधिक स्त्रीप्रसङ्ग करता है उसके ग्लानि, कम्प, शरीर की शिथिलता, दुर्बलता, इन्द्रियों की क्षीणता, शोष, श्वास ( दमा ), उपदंश ( गर्मी ), ज्वर, बवासीर, सब धातुओं की क्षीणता, कठिनतर वायु के रोग, नपुंसकता और ध्वजभङ्ग आदि रोग होते हैं ॥ ३ ॥

यत्किञ्चिन्मधुरं स्निग्धं जीवनं बृंहणं गुरु। हर्षणं मनसश्चैव सर्वं तद्वृष्यमुच्यते ॥ ४ ॥

जो पदार्थ मधुर, चिकना, जीवनदाता, बृंहण, भारी और मन को प्रसन्न करनेवाले हैं, उन सब को वृष्य[1] कहते हैं ॥ ४ ॥

घृतभृष्टमाषद्विदलं दुग्धसिद्धं च शर्करामिश्रम्। भुक्त्वा सदैव कुरुते तरुणीशतमैथुनं पुरुषः ॥ ५ ॥

उड़द की दाल को घृत में भूनकर दूध में डालकर खीर बनावे और उसमें शक्कर डालकर खावे तो पुरुष १०० स्त्रियों से मैथुन कर सकता है ॥ ५ ॥

शतावरीघृतं क्षीरं प्रपिबेत् सितया युतम्। रममाणस्य विरतिं मृदुतां याति नेन्द्रियम् ॥ ६ ॥

शतावरी को दूध में क्षीरपाक की विधि से पकाकर और उसमें शक्कर डालकर पीने से रति-

1 वाज नाम मैथुन का है। अथवा वाजीकरण का अर्थ मैथुन शक्ति की वृद्धि भी होता है। आचार्य हारीत ने कहा है—'वाजो नाम प्रकाशत्वात्तु मैथुनसंज्ञितम्। वाजीकरणसंज्ञं हि पुंस्त्वमेव प्रपद्यते ॥'

1 वृष्य पदार्थ तीन प्रकार के हैं—एक वीर्य को प्रवृत्त करनेवाले जैसे स्त्री का स्पर्श, दूसरे वीर्यवर्द्धक जैसे दूध, घृत आदि, तीसरे वीर्य को प्रवृत्त करनेवाले और बढ़ानेवाले जैसे उड़द आदि।

शक्ति बढ़ती है तथा इन्द्रिय शिथिल नहीं होती है॥ ६॥

वृद्धशाल्मलिमूलस्य रसं शर्करया समम्। प्रयोगादस्य सप्ताहाज्जायते रेतसोऽम्बुधिः॥ ७॥

पुराने सेमर की जड़ का रस और शक्कर सम भाग मिलाकर खाने से ७ दिन में अत्यन्त वीर्य बढ़ जाता है॥ ७॥

लघुशाल्मलिमूलेन तालमूलीं सुचूर्णिताम्। सर्पिषा पयसा पीत्वा रतौ चटकवद्भवेत्॥ ८॥

छोटे सेमर की जड़ और सफेद मूसली के चूर्ण में घृत और दूध डालकर पीने से चिड़ा के तुल्य रतिशक्ति हो जाती है॥ ८॥

विदारीकन्दचूर्णं च घृतेन पयसा पिबेत्। उदुम्बररसेनैव वृद्धोऽपि तरुणायते॥ ९॥

विदारीकन्द के चूर्ण को घृत, दूध और गूलर के रस के साथ पीने से वृद्ध पुरुष भी युवावस्थावाले के समान रतिशक्तियुक्त हो जाता है॥ ९॥

सप्तधामलकीचूर्णमामलस्याम्बुभावितम्। घृतेन मधुना लीढ्वा पिबेत् क्षीरपलं नरः॥ वाजीकरणयोगोऽयमुत्तमः परिकीर्तितः॥ १०॥

आँवलों के चूर्ण में आवलों के ही रस की ७ भावना देकर सुखा ले। इस चूर्ण को योग्य मात्रा में लेकर घृत और शहद के साथ चाट ले और ऊपर से चार तोले दूध पी ले। यह योग वाजीकरण में उत्तम कहा गया है॥ १०॥

वाजिकर्म में अपथ्य।

अत्यन्तमुष्णकटुतिक्तकषायमम्लं क्षारं च शाकमथवा लवणाधिकं च। कामी सदैव रतिमान् वनिताभिलाषी नो भक्षयेदिति समस्तजनप्रसिद्धिः॥ ११॥

जो कामी पुरुष स्त्रियों से सदा रमण की इच्छा रखता है उसको अधिक गर्म, कडुआ तीक्ष्ण, कसैला, खट्टा, खारी, साग और अधिक लवण; इनका सेवन न करना चाहिए। ऐसी सब लोगों में प्रसिद्धि है॥ ११॥

पिप्पलीलवणोपेतौ बस्ताण्डौ क्षीरसर्पिषा। साधितौ भक्षयेद्यस्तु स गच्छेत् प्रमदाशतम्॥ १२॥

बकरे के दोनों अण्डकोषों को दूध में पकाकर और घृत में भूनकर पीपरि और नमक मिलाकर जो खाता है वह १०० स्त्रियों के साथ गमन कर सकता है॥ १२॥

बस्ताण्डसिद्धे पयसि भावितांश्च सकृत्तिलान्। यः खादेत् स नरो गच्छेत् स्त्रीणां शतमपूर्ववत्॥ १३॥

बकरे के अण्डों से सिद्ध किये दूध में तिलों को भिगोकर जो मनुष्य खाता है वह १०० स्त्रियों से गमन करने की सामर्थ्य पाता है॥ १३॥

चूर्णं विदार्याः सुकृतं तद्रसेनैव भावितम्। सर्पिः क्षौद्रयुतं कृत्वा शतं गच्छेन्नरोऽङ्गनाः॥ १४॥

भली भाँति बनाये हुए विदारीकन्द के चूर्ण में विदारीकन्द के रस की ७ भावनाएं देकर घृत और शहद के साथ चाटने से १०० स्त्रियों से गमन करने की सामर्थ्य प्राप्त होती है॥ १४॥

एवमामलकं चूर्णं स्वरसेनैव भावितम्। शर्करामधुसर्पिर्भिर्युक्तं लीढ्वा पयः पिबेत्॥ एतेनाशीतिवर्षोऽपि युवेव परिहृष्यति॥ १५॥

इसी प्रकार आँवले के चूर्ण में आँवले के रस की ७ भावनाएं देकर उसमें शक्कर, शहद तथा घृत मिलाकर चाटे और ऊपर से दूध पीवे तो अस्सी वर्ष का बूढ़ा भी

युवा अवस्थावाले के समान संभोग में प्रसन्न होता है ॥ १५ ॥

विदारीकन्दकल्कं तु घृतेन पयसा नरः । उदुम्बरसमं खादेद् वृद्धोऽपि तरुणायते ॥ १६ ॥

एक तोले ( या ६ माशे ) की मात्रा में विदारीकन्द के कल्क को घृत और दूध के साथ खाने से वृद्ध भी तरुण के तुल्य हो जाता है ॥ १६ ॥

स्वयंगुप्तेक्षुरकयोर्बीजं समधुशर्करम् । धारोष्णेन नरः पीत्वा पयसा न क्षयं व्रजेत् ॥ १७ ॥

कौंच के बीज और तालमखाने के बीजों के चूर्ण में शहद और शक्कर मिलाकर धारोष्ण दूध के साथ सेवन करने से वीर्य क्षीण नहीं होता है । मात्रा २ माशे ॥ १७ ॥

उच्चटाचूर्णमप्येवं क्षीरेणोत्तममुच्यते । शतावर्युच्चटाचूर्णं पेयमेवं सुखार्थिना ॥ १८ ॥

श्वेत घुँघुची का चूर्ण दूध के साथ पीना उत्तम है अथवा शतावरी और श्वेत घुँघुची का चूर्ण दूध के साथ पीना सुखकर होता है । मात्रा—श्वेत घुँघुची का चूर्ण १ माशा, मिले हुए दो माशे ॥ १८ ॥

माषमधुकचूर्णस्य घृतक्षौद्रसमन्वितम् । पयोऽनुपानं यो लिह्यान्नित्यवेगः स ना भवेत् ॥ १९ ॥

मुलेठी के १ तोला चूर्ण में घृत और शहद मिलाकर चाटने और अनुपान में दूध पीने से मनुष्य सदा कामवेग से युक्त होता है ॥ १९ ॥

गोक्षुरकः क्षुरकः शतमूली वानरिनागबलातिबला च । चूर्णमिदं पयसा निशि पेयं यस्य गृहे प्रमदाशतमस्ति ॥ २० ॥

गोखरू, तालमखाने के बीज, शतावरी, कौंच के बीज, गुलसकरी और कंघी ; इनके चूर्ण को रात्रि के समय दूध के साथ वह पीवे जिसके घर में १०० स्त्रियाँ हों, अर्थात् अत्यन्त कामशक्तिवर्द्धक है ॥ २० ॥

घृतभृष्टो दुग्धमाषपायसो वृष्यउत्तमः । आर्द्राणि मत्स्यमांसानि शफरीर्वा सुभर्जिताः । तप्ते सर्पिषि यः खादेत् स गच्छेत् स्त्रीषु न क्षयम् ॥ २१ ॥

घृत में भूने हुए उड़दों की दूध में खीर बनाकर खाना उत्तम वृष्य है । मछली के ताजे मांस को, विशेषकर शफरी मछली के मांस को, गर्म घी में भूनकर जो पुरुष खाता है वह स्त्रियों से संभोग करता हुआ भी क्षीण नहीं होता है ॥ २१ ॥

तापीजधातुमधुपारदलौहचूर्णपथ्याशिलाजतुविडङ्गघृतानि लिह्यात् । एकाद्विंशतिदिनानि गदार्दितोऽपि सोऽशीतिकोऽपि रमयेत् प्रमदां युवेव ॥ २२ ॥

स्वर्णमाक्षिकभस्म, पारभस्म, लौहभस्म, हरड़, शिलाजीत, वायविडङ्ग; इन्हें बराबर मात्रा में एकत्र कर दो रत्ती की मात्रा में घृत और शहद के साथ तीन सप्ताह तक सेवन करने से ८० वर्ष का वृद्ध भी युवा के समान ही स्त्रीरमण कर सकता है ॥ २२ ॥

नरसिंहचूर्णं ।

शतावरीरजः प्रस्थं प्रस्थं गोक्षुरकस्य च । वाराह्या विंशतिपलं गुडूच्याः पञ्चविंशतिः ॥ २३ ॥ भल्लातकानां द्वात्रिंशच्चित्रकस्य दशैव तु । तिलानां शोधितानां च प्रस्थं दद्यात् सुचूर्णितम् ॥ २४ ॥ त्र्यूषणस्य पलान्यष्टौ शर्करायाश्च सप्ततिः । माक्षिकं शर्करार्द्धेन माक्षिकार्द्धेन वै घृतम् ॥ २५ ॥ शतावरीसमं देयं विदारीकन्दजं रजः । एतदेकीकृतं चूर्णं

स्निग्धे भाण्डे निधापयेत् ॥ २६ ॥ कर्षार्द्धमुपयुञ्जीत यथेष्टं चास्य भोजनम् । मासैकमुपयोगेन जरां हन्ति रुजामपि ॥ २७ ॥ वलीपलितखालित्यमेहपाण्ड्वाढ्यपीनसान् । हन्त्यष्टादशकुष्ठानि तथाष्टावुदराणि च ॥ २८ ॥ भगन्दरं मूत्रकृच्छ्रं गृध्रसीं च हलीमकम् । क्षयं चैव महाव्याधिं पञ्च कासान् सुदारुणान् ॥ २९ ॥ अशीतिं वातजान् रोगांश्चत्वारिंशच्च पैत्तिकान् । विंशतिं श्लैष्मिकांश्चापि संसृष्टान् सान्निपातिकान् । सर्वानर्शोगदान् हन्ति वृक्षमिन्द्राशनिर्यथा ॥ ३० ॥ स काञ्चनाभो मृगराजविक्रमस्तुरङ्गमं चाप्यनुयाति वेगतः । स्त्रीणां शतं गच्छति सातिरेकं प्रकृष्टपुष्टश्च यथा विहङ्गः ॥ ३१ ॥ पुत्रान् सञ्जनयेद्वीरान् नरसिंहनिभांस्तथा । नरसिंहमिदं चूर्णं सर्वरोगहरं नृणाम् ॥ ३२ ॥ वाराहीकन्दसंज्ञस्तु चर्मकारालुको मतः । पश्चिमे गृष्टिशब्दाख्यो वराह इव लोमवान् ॥ ३३ ॥

शतावरी का चूर्ण ६४ तोले, गोखरू का चूर्ण ६४ तोले, वाराहीकन्द का चूर्ण १ सेर, गिलोय[1] का चूर्ण १। सेर, शुद्ध भिलावाँ का चूर्ण १२८ तोला, चीता की जड़ का चूर्ण पाव सेर, तुष ( छिलका ) रहित तिलों का चूर्ण ६४ तोले, त्रिकटु ( सोंठ, मिर्च, पीपरि ) का मिलित चूर्ण ३२ तोले, शक्कर २॥ सेर, शहद १ सेर १२ छटाँक, घृत १४ छटाँक और विदारीकन्द का चूर्ण ६४ तोले । सब को एकत्र कर चिकने वर्तन में रख दे । मात्रा ६ माशे से ८ माशे तक । इसके प्रयोग में इच्छानुसार भोजन करना चाहिए । एक महीना सेवन करने से बुढ़ापा, वलीपलित, गंजापन, प्रमेह, पाण्डु, आढ्यवात, पीनस, १८ प्रकार के कुष्ठ, ८ प्रकार के उदर-विकार, भगन्दर, मूत्रकृच्छ्र, गृध्रसी, हलीमक, क्षय, राजयक्ष्मा, पाँच प्रकार की कठिन खाँसी, अस्सी प्रकार के वातरोग, चालीस प्रकार के पित्तरोग, बीस प्रकार के कफरोग, द्वन्द्वज और सन्निपातज रोग और सब प्रकार के बवासीर के रोगों को इस प्रकार नष्ट करता है, जैसे वृक्षों को इन्द्र का वज्र । इसका सेवन करनेवाला काञ्चन वर्ण, सिंह का-सा पराक्रमी और घोड़ा के तुल्य वेगवान् होता है । पक्षी के समान सैकड़ों स्त्रियों से रति करने की सामर्थ्य होती है तथा हृष्ट-पुष्ट होता है । इसके सेवन से नरसिंह के बराबर शूरवीर पुत्र उत्पन्न होते हैं । यह नरसिंह चूर्ण मनुष्यों के सब रोगों को हरनेवाला है । चर्मकारालुक को ही[1] वाराहीकन्द कहा है । पश्चिम ( गढ़वाल जिले ) में इसे गृष्टि ( गेंठी ) कहते हैं । इसके ऊपर शूकर के से बाल होते हैं ॥ २६-३३ ॥

## अश्वगंधादि चूर्ण ।

अश्वगन्धा दशपला तस्मार्धो वृद्धदारुकः चूर्णीकृत्योभयं विद्वान् घृतभाण्डे निधापयेत् ॥ ३४ ॥ कर्षैकं पयसा पीत्वा नारीभिर्नैव तृप्यति । अगत्वा प्रमदां भूयाद्वलीपलितवर्जितः ॥ ३५ ॥

असगन्ध ४० तोले और विधारा ४० तोले इन दोनों का चूर्ण कर घी के साथ चिकने बर्तन में रख देवे । इसमें से १ तोला गौ दूध के साथ सेवन करने से बहुत सी स्त्रियों से संभोग करने पर भी पुरुष तृप्त नहीं होता है । यदि स्त्री का सेवन न करे और ब्रह्मचर्य से रहे तो चाम में गुलकट ( झुर्री )

१—कुछ वैद्य यहाँ गिलोय का चूर्ण नहीं डालते, किन्तु उसका सत्व डाला करते हैं ।

१—वास्तव में वाराहीकन्द और चर्मकारालुक पृथक्-पृथक् द्रव्य हैं, किन्तु अभाव में ले सकते हैं । चर्मकारालुक वाराहीकन्द की अपेक्षा हीन गुणवाला है, ऐसा कितने ही टीकाकारों का मत है ।

नहीं पकती हैं। और बाल सफेद नहीं होते हैं ॥ ३४-३५ ॥

बृहच्छतावरीघृत ।

शतावर्यास्तु मूलानां रसप्रस्थद्वयं मतम् । तत्समञ्च भवेत्क्षीरं घृतप्रस्थं विपाचयेत् ॥ ३६ ॥ जीवकर्षभकौ मेदा महामेदा तथैव च । काकोली क्षीरकाकोली मृद्वीका मधुकं तथा ॥ ३७ ॥ मुद्गपर्णी माषपर्णी विदारी रक्तचन्दनम् । शर्करामधुसंयुक्तं सिद्धं विस्रावयेद्भिषक् ॥ ३८ ॥ रक्तपित्तविकारेषु वातरक्तगदेषु च । क्षीणशुक्रेषु दातव्यं वाजीकरणमुत्तमम् ॥ ३९ ॥ अङ्गदाहं शिरोदाहं ज्वरं पित्तसमुद्भवम् । योनिशूलञ्च दाहञ्च मूत्रकृच्छ्रञ्च पैत्तिकम् ॥४०॥ एतान् रोगान् निहन्त्याशु छिन्नाभ्राणीव मारुतः । शतावरीसर्पिरिदं बलवर्णाभिवर्द्धनम् ॥ ४१ ॥ स्नेहपादः स्मृतः कल्कः कल्कवन्मधुशर्करे । इति वाक्यबलात् स्नेहे प्रक्षेप्यं पादिकं भवेत् ॥ ४२ ॥

गोघृत १२८ तोले, शतावर का रस २ सेर १६ तोले, दूध २ सेर १६ तोले। कल्क के लिये—जीवक, ऋषभक, मेदा, महामेदा, काकोली, क्षीरकाकोली, दाख ( मुनक्का ), मुलेठी, मुद्गपर्णी, माषपर्णी, विदारीकन्द और लालचन्दन मिलाकर ३२ तोले से विधिपूर्वक पकावे। पकाने के पश्चात् छान ले और शीतल होने पर खांड ३२ तोले तथा शहद ३२ तोले मिलावे। इस घृत के सेवन से रक्तपित्त, वातरक्त, अङ्गदाह, शिरोदाह, पैत्तिकज्वर, योनिशूल, दाह, पैत्तिक मूत्रकृच्छ्रादि रोग नष्ट होते हैं। क्षीणवीर्य पुरुषों के लिये यह घृत वाजीकरण है। यह बलकारक, वर्ण तथा जठराग्नि को बढ़ाता है ॥ ३६-४२ ॥

कामदेवघृत ।

अश्वगन्धापलशतं तदर्द्धं गोक्षुरस्य च । शतावरी विदारी च शालपर्णी बला तथा ॥ ४३ ॥ अश्वत्थस्य च शुङ्गानि पद्मबीजं तथैव च । काश्मरीफलमेतच्च माषबीजं तथैव च ॥ ४४ ॥ पृथग्दशपलान् भागांश्चतुर्द्रोणेऽम्भसः पचेत् । चतुर्भागावशेषन्तु कषायमवतारयेत् ॥४५॥ मृद्वीका पद्मकं कुष्ठं पिप्पली रक्तचन्दनम् । बालकं नागपुष्पञ्च आत्मगुप्ताफलं तथा ॥ ४६ ॥ नीलोत्पलं सारिवे द्वे जीवनीयं विशेषतः । पृथक् कर्षसमञ्चैव शर्करायाः पलद्वयम् ॥ ४७ ॥ रसस्य पौण्ड्रकेक्षूणामाढकं तत्र दापयेत् । रक्तपित्तं क्षतक्षीणं कामलां वातशोणितम् ॥ ४८ ॥ हलीमकं तथा शोथं स्वरभेदं बलक्षयम् । अरोचकं मूत्रकृच्छ्रं पार्श्वशूलञ्च नाशयेत् ॥ ४९ ॥ एतद्राज्ञां प्रयोक्तव्यं बहुस्त्रीपुरुचारिणाम् । स्त्रीणां चैवानपत्यानां दुर्बलानाञ्च देहिनाम् ॥ ५० ॥ क्लीबानामल्पशुक्राणां जीर्णानामल्परेतसाम् । श्रेष्ठं बलकरं हृद्यं वृष्यं पेयं रसायनम् ॥ ५१ ॥ ओजस्तेजस्करञ्चैव आयुःप्राणविवर्द्धनम् । संवर्द्धयति शुक्रञ्च पुरुषं दुर्बलेन्द्रियम् ॥ ५२ ॥ सर्वरोगविनिर्मुक्तस्तोयसिक्तो यथा द्रुमः । कामदेव इति ख्यातः गर्भेषु च शस्यते ॥ ५३ ॥

गोघृत १२८ तोले, क्वाथ के लिये—असगन्ध ५ सेर, गोखरू २॥ सेर, शतावर, विदारीकन्द, शालपर्णी, खरैटी, बड़ के अंकुर, कमलगट्टा, खम्भारीफल, उड़द; प्रत्येक ४० तोले, जल ५ मन ११ सेर १६ तोले, क्वाथ बनावे १२ सेर ४८ तोले। पीछे इसमें

१ सेर ३२ तोले )। कल्क के लिए—दाख, फालसा, कूठ, पीपल, लालचन्दन, गन्धबाला, नागकेशर, कौंच के बीज, नीलकमल, असगन्ध-मूल, श्यामालता, जीवक, ऋषभक, मेदा, महामेदा, काकोली, क्षीरकाकोली, मुद्गपर्णी, माषपर्णी, जीवन्ती, मुलेठी; हरएक एक-एक तोले लेकर विधिपूर्वक पकावे। सिद्ध होने के पश्चात् छानकर ८ तोले खाँड मिलावे। इसके सेवन से रक्तपित्त, क्षतक्षीण, कामला, वातरक्त, हलीमक, सूजन, स्वरभेद, क्षयरोग, अरुचि, मूत्रकृच्छ्र, पसवाड़े का दर्द आदि रोग नष्ट होते हैं। अनेक स्त्रियों में आसक्त राजाओं को, सन्तानरहित स्त्रियों को, दुर्बल, नपुंसक, क्षीणवीर्य तथा वृद्ध पुरुषों को यह घृत सेवन करना चाहिए। यह घृत बलकारक, हृद्य, वीर्यवर्धक तथा रसायन है एवं ओज, तेज, आयु, जीवनीयशक्ति तथा वीर्य को बढ़ाता है। दुर्बलेन्द्रिय पुरुष को बलवान् करता है। यह घृत सम्पूर्ण ऋतुओं में सेवन किया जा सकता है ॥ ५२–५३ ॥

कामेश्वरमोदक और श्रीकामेश्वरमोदक।

संग्रहस्यधिकारे तु ग्रन्थस्यास्य पुरोदितौ। कामेश्वरो मोदकश्च श्रीकामेश्वरमोदकः ॥ ५४ ॥ रतिशक्तिविहीनानां नराणां रतिवृद्धये। यथाबलं प्रयोक्तव्यौ पौनरुक्त्यान्न दर्शितौ ॥ ५५ ॥

ग्रहणीरोग के अधिकार में कहे हुए कामेश्वरमोदक तथा श्रीकामेश्वरमोदक भी रतिशक्तिहीन पुरुषों को रतिशक्ति की वृद्धि के लिये सेवन कराने चाहिए ॥ ५४–५५ ॥

वानरी वटिका।

बीजानि कपिकच्छूनां कुडवमितानि स्वेदयेच्छनकैः। प्रस्थे गोभवदुग्धे तावद्यावद् भवेद् गाढम् ॥ ५६ ॥ त्वग्रहितानि च कृत्वा सूक्ष्मं सम्पेषयेत्तानि। पिष्टिकया लघुवटिकाः कृत्वा गव्ये पचेदाज्ये ॥ ५७ ॥ द्विगुणितशर्करया ता वटिकाः कामं समालेप्याः। वटिका माक्षिकमध्ये मज्जनयोग्ये पृथक् स्थाप्याः ॥ ५८ ॥ कोलकमिमितास्तास्तु प्रातः सायञ्च भक्षयेत्। अनेन शीघ्रद्रावी यो यश्च स्यात्पतितध्वजः ॥ ५९ ॥ सोऽपि प्राप्नोति सुरते सामर्थ्यमतिवाजिवत्। नानेन सदृशं किञ्चिद् द्रव्यं वाजीकरं परम् ॥ ६० ॥

१६ तोला कौंच के बीजों को १२८ तोले गौ के दूध में डाल मन्द अग्नि द्वारा स्विन्न करे। जब दूध गाढ़ा हो जाय तो नीचे उतारकर बीजों का छिलका उतार दें। बाद में उन बीजों को शिला पर अतिमहीन पीस लें और खोया तथा बीजकल्क को मिला छोटी-छोटी गोलियाँ बनाकर गोघृत में भून ले। पश्चात् दूनी खाँड की गाढ़ी चाशनी बनाकर उनमें इन गोलियों को डुबोकर बाहर रख दे। इस प्रकार उन गोलियों पर खाँड चढ़ जायगी अथवा इलायचीदानों की विधि से खाँड चढ़ा ले। पश्चात् शहद में इन गोलियों को डुबोकर रख छोड़े। मात्रा—आधे तोला से एक तोले तक। इसे प्रातःकाल तथा सायंकाल सेवन करना चाहिए। इसके सेवन से जो पुरुष शीघ्र वीर्यपात होनेवाला अथवा पतितध्वज हो वह भी अश्व के समान रमणक्रिया में समर्थ होता है। इस रस से बढ़कर वाजीकर अन्य कोई औषध नहीं है ॥ ५६–६० ॥

गोधूमाद्य घृत।

गोधूमात्तु पलशतं निष्क्वाथ्य सलिलाढके। पादशेषे च पूते च द्रव्याणीमानि दापयेत् ॥ ६१ ॥ गोधूमं मुञ्जातफलं माषं द्राक्षापरूषके। काकोली क्षीरकाकोली जीवन्ती सशतावरी ॥ ६२ ॥ अश्वगन्धा सखर्जूरा मधुकं त्र्यूषणं सिता।

भल्लातकमात्मगुप्ता समभागानि कारयेत् ॥ ६३ ॥ घृतप्रस्थं पचेदेवं क्षीरं दत्त्वा चतुर्गुणम्। मृद्वग्निना च सिद्धे तु द्रव्याण्येतानि निक्षिपेत् ॥६४॥ त्वगेला पिप्पली धान्यं कर्पूरं नागकेशरम्। यथालाभं विनिक्षिप्य सिताक्षौद्रं पलाष्टकम् ॥ ६५ ॥ दत्त्वेक्षुदण्डेनालोड्य विधिवद् विनियोजयेत्। शाल्योदनेन भुञ्जीत पिबेन्मांसरसेन च ॥६६॥ केवलस्य पिबेदस्य मात्रा कोलप्रमाणतः। न चास्य लिङ्गशैथिल्यं न च शुक्रक्षयो भवेत् ॥ ६७ ॥ बल्यं परं वातहरं शुक्रसंजननं परम्। मूत्रकृच्छ्रप्रशमनं वृद्धानां चापि शस्यते ॥ ६८ ॥ कोलकं तु तदश्नीयाद् दशरात्रमतन्द्रितः। स्त्रीणां शतं च भजते पीत्वा चानुपिबेत्पयः ॥ अश्विभ्यां निर्मितं चैव गोधूमाद्यं रसायनम् ॥ ६९ ॥

जलद्रोणेऽत्र गोधूमक्वाथस्तच्छेष आढकम्। कल्कद्रव्यसमं मानं त्वगादेः साढचर्यतः ॥

२ सेर गेहूँ को २५ सेर ४८ तोले जल में औटावे जब ६ सेर ३२ तोले जल बाकी रहे तब छानकर उसमें इन द्रव्यों के कल्क को मिलावे। गेहूँ, मुञ्जातक (अभाव में ताल की मस्ती), उड़द, दाख, फालसे, काकोली, क्षीरकाकोली, जीवन्ती, शतावरी, असगन्ध, खजूर, मुलेठी, त्रिकटु, शक्कर, दूध मिलावी और कौंच के बीज समभाग सब मिलाकर ३२ तोले। घृत १२८ तोले। दूध ६ सेर ३२ तोले। विधिपूर्वक कोमल अग्नि से घृत सिद्ध कर इसमें दालचीनी, छोटी इलायची, धनियां, कपूर और नागकेशर; सब मिलाकर ३२ तोले तथा शक्कर और शहद बत्तीस-बत्तीस तोले मिलाकर ईख के डण्डे से मथकर रख ले। इसको शालि चावलों के भात के साथ अथवा मांसरस के साथ सेवन करे। मात्रा १ तोला। इसके सेवन से लिङ्गेन्द्रिय शिथिल नहीं होती और वीर्य भी क्षीण नहीं होता। यह बलकारक, वातनाशक, वीर्यवर्द्धक, मूत्रकृच्छ्रनाशक तथा वृद्धों के लिए श्रेष्ठ है। १० दिन तक एक एक तोले खाकर पश्चात् दूध पीवे तो १०० स्त्रियों से रमण करने की शक्ति पैदा होती है। इस गोधूमाद्य रसायन को अश्विनीकुमारों ने बनाया था ॥ ६१--६९ ॥

यहाँ १ द्रोण जल में काढ़ा कर १ आढक अवशिष्ट रक्खे। दालचीनी आदि सब कल्क-द्रव्य के समान ले परन्तु कपूर अन्दाज का डाले।

### खण्डकूष्माण्डक।

कूष्माण्डकात् पलशतं सुस्विन्नं निष्कुलीकृतम्। प्रस्थं च घृततैलस्य तस्मिंस्तप्ते निधापयेत् ॥ ७० ॥ त्वक्पत्रधान्यकव्योषजीरकैलाद्वयानलम्। ग्रन्थिकं चव्यमत्तङ्गपिप्पलीविश्वभेषजम् ॥७१॥ शृङ्गाटकं कशेरुं च प्रलम्बं तालमस्तकम्। चूर्णीकृतं पलांशं च गुडस्य तुलया पचेत् ॥ ७२ ॥ शीतीभूते पलान्यष्टौ मधुनः संप्रदापयेत्। कफपित्तानिलहरं मन्दाग्नीनां च शस्यते ॥ ७३ ॥ कृशानां बृंहणं श्रेष्ठं वाजीकरणमुत्तमम्। प्रमदासु प्रसक्तानां ये च स्युः क्षीणरेतसः ॥ ७४ ॥ क्षयेण तु गृहीतानां परमेतद्भिषग्जितम्। कासं श्वासं ज्वरं हिक्कां हन्तिच्छर्दिमरोचकम् ॥ ७५ ॥ गुडकूष्माण्डकं ख्यातमश्विभ्यां समुदाहृतम्। खण्डकूष्माण्डवत् पाच्यं स्विन्नकूष्माण्डकद्रवः ॥ ७६ ॥

बीज और छिलकों से रहित ५ सेर पेठे को गोदकर जल में औटा दे और निचोड़कर धूप में सुखा ले और उस

भिगुड़े हुए पेठे को १२ तोले घृत और १२ तोले तिल तेल में एक साथ भून ले । पश्चात् दालचीनी, तेजपत्र, धनियाँ, त्रिकटु, जीरा, छोटी इलायची, बड़ी इलायची, चीता की जड़, पीपलामूल, चव्य, गजपीपरि, सोंठ, सिंघाड़ा, कसेरु, ताड़ के ऊपर के अंकुर प्रत्येक का चूर्ण चार-चार तोले लेकर चूर्ण करके रक्खे । पेठे के जल में गुड़ ४ सेर और भुना हुआ पेठा डालकर पकावे । जब पाक तैयार हो जाय तब सब ओषधियों का चूर्ण डालकर करछी से खूब मिला ले, फिर नीचे उतार ठंढा करके ३२ तोले शहद मिला ले । यह कफ, पित्त और वायु को नष्ट करनेवाला है तथा मन्दाग्निवालों के लिए उत्तम है । दुर्बलों को मोटा करनेवाला तथा उत्तम वाजीकरण है । स्त्रियों में आसक्त, क्षीण-वीर्य और क्षयी रोगवालों के लिए यह उत्तम ओषधि है । अश्विनीकुमारों का बनाया हुआ गुडकूष्माण्ड खाँसी, श्वास, ज्वर, हिचकी, वमन और अरुचि को नष्ट करता है । स्वरस-कूष्माण्ड के तुल्य कूष्माण्ड को पकाकर रस निकालना चाहिए ॥ ७०—७६ ॥

योगान् संसेव्य वृष्यानमितमथ पयः शीतलं चाम्बु पीत्वा गच्छेत्नारीं रसज्ञां स्मरशरतरलां कामुकः काममाद्ये । यामेऽहृष्टः प्रहृष्टो व्यपगतसुरतस्तत्समुत्थाय सद्यः कान्तः कान्ताङ्गसङ्गादसदपि न खलु धातुवैषम्यमेति ॥ ७७ ॥

कामी पुरुष वृष्ययोगों का सेवन करने के पश्चात् मिश्री युक्त दूध अथवा ठंढा जल पीकर प्रसन्नचित्त हो कामबाण-पीड़ित, प्रसन्नचित्त-वाली और रतिरस की जाननेवाली स्त्री के साथ रात के पहले पहर में रमण करे । इस प्रकार स्त्रीप्रसंग करने से कभी धातु की विषमता नहीं होती है ॥ ७७ ॥

वृष्यतमा स्त्री ।

सुरूपा यौवनस्था च लक्षणैर्या विभूषिता । वयस्था शिक्षिता या च सा स्त्री वृष्यतमा मता ॥ ७८ ॥

सुन्दर रूपवाली, यौवनवाली, सब लक्षणों से भूषित, अपनी उमर की और शिक्षित स्त्री वृष्यतम मानी गई है ॥ ७८ ॥

वाजीकरण के योग्य पुरुष ।

स्त्रीष्वक्षयं मृगयतां वृद्धानां च रिरंसताम् । क्षीणानामल्पशुक्राणां स्त्रीषु क्षीणाश्च ये नराः ॥ ७९ ॥ विलासिनामर्थवतां रूपयौवनशालिनाम् । बहीपत्नीनां नृणां च योगा वाजीकरा हिताः ॥ ८० ॥

स्त्रीसंभोग में स्खलित न होने की इच्छा करनेवाले वृद्ध, रमण करने के इच्छुक, स्त्री संभोग से क्षीण, अल्पवीर्य, विलासी, धनवान्, रूप-यौवन से युक्त तथा बहुत सी स्त्रियों के पति ऐसे मनुष्यों को वाजीकरण योगों का सेवन हितकर होता है ॥ ७९—८० ॥

बृहच्छतावरी मोदक ।

शतावरी श्वदंष्ट्रा च बला चातिबला तथा । मर्कटीक्षुरबीजं च विदारीकन्दजं रजः ॥ ८१ ॥ एतानि समभागानि पलिकानि विचूर्णयेत् । तस्माच्चतुर्गुणं देयं त्रैलोक्यविजयारजः ॥ ८२ ॥ एतदेकीकृतं यावत्तदर्द्धं माहिषं पयः । तावन्मात्रेण दातव्यः शतावर्या रसस्तथा ॥ ८३ ॥ विदार्याः स्वरसमर्धं सितापलशतद्वयम् । गोलयित्वा सितां चैव पात्रे ताम्रमये दृढे ॥ ८४ ॥ पाचयेत् पाकविद्वैद्यो मोदकं परमं हितम् । त्र्यूषणं त्रिफला दन्ती त्रिजातं सैन्धवं शटी ॥ ८५ ॥ धान्यकं वालकं मुस्तं कस्तूरी गोस्तनी तुगा । जातकोषफलं मांसी पत्रं वारेन्द्रग्रन्थिकम् ॥ ८६ ॥ शतपुष्पा चवी दारु प्रियङ्गु सलवङ्गकम् ।

सरलं शैलजं कुम्भं जातीपुष्पं यमानिका ॥ ८७ ॥ कटफलं केशरं मेथी मधुकं सुरदारु च। मिषी तालीशपत्रं च खर्जूरं रसगन्धकौ ॥ ८८ ॥ चन्दनं तगरं क्षारं प्रत्येकं कर्षसम्मितम्। आलोड्य त्रिसुगन्धेन कर्पूरेणाधिवासयेत् ॥ ८९ ॥ काञ्चने राजते पात्रे स्थाप्यमेतद् भिषग्वरैः। कर्षप्रमाणं कर्त्तव्यं क्षीरं चानुपिबेत् पलम् ॥ ९० ॥ प्रातर्भोजनकाले वा भक्षयेत्तु विचक्षणः। प्रमदाशतं च भजते न च शुक्रक्षयो भवेत् ॥ ९१ ॥ न तस्य लिङ्गशैथिल्यं शुक्रसंजननं परम्। क्षयं चैव महाव्याधिं पञ्चकासान् सुदुस्तरान् ॥ ९२ ॥ वातजान् पैत्तिकांश्चैव कफजान् सान्निपातिकान्। हन्त्यष्टादशकुष्ठानि वातरक्तादिकानि च ॥ ९३ ॥ प्रमेहं श्लीपदं शोथं लक्ष्मीकान्तिविवर्द्धनम्। सर्वानरोगिदान् हन्ति वृक्षमिन्द्राशनिर्यथ। व्याधीन् कोष्ठगतानन्यान् जनार्दन इवासुरान् ॥ ९४ ॥ नातः परतरं श्रेष्ठं विद्यते वाजिकर्मसु। स्त्रीणां चैवानपत्यानां दुर्बलानां च देहिनाम् ॥ ९५ ॥ क्लीवानामल्पशुक्राणां जीर्णानामल्परेतसाम्। ओजस्तेजःस्वरं बुद्धिमायुः प्राणं निरर्द्दिशेत् ॥ ९६ ॥

शतावरी, गोखरू, खरैटी (खरेंटी), गुलसकरी (कची), कौंच के बीज, तालमखाना के बीज और विदारीकन्द; प्रत्येक का चूर्ण चार चार तोले। सबका चौगुना भाँग का चूर्ण (११२ तोले), भैंस का दूध ७० तोले, शतावरी का रस ७० तोले, विदारीकन्द का रस १२८ तोले और शक्कर १० सेर। शक्कर को दूध और रसों में घोल दे और उपर्युक्त ओषधियों का चूर्ण डालकर कलईदार ताँबे के पात्र में पकावे। जब पाक गाढ़ा होने लगे तब उसमें त्रिकटु, त्रिफला, दन्ती की जड़ (जमालगोटा की जड़), त्रिजात (छोटी इलायची, दालचीनी, तेजपात), सेंधा नमक, कपूर, ५ नियाँ, सुगन्धवाला, मोथा, कस्तूरी, मुनक्का, पठानीलोध्र, जावित्री, जायफल, जटामांसी, तेजपात्र, सँभालू, पीपलामूल, सोये के बीज, चव्य, दारुहल्दी, प्रियंगु, लौंग, चीड़ की लकड़ी, छारछरीला, गुग्गुल, चमेली के फूल, अजवाइन, कायफल, केशर, मेथी, मुलेठी, देवदारु, सौंफ, तालीशपत्र, खजूर, शुद्ध पारा, गन्धक (दोनों को मिलाकर कजली कर ले), लाल चन्दन तगर और जवाखार; प्रत्येक एक एक तोला लेकर मिलावे और करछी से चलाकर पाक तैयार कर ले। इसमें त्रिसुगन्ध (दालचीनी, छोटी इलायची, तेजपात) और कपूर डालकर सुगन्धित करे। इसको सुवर्ण अथवा चाँदी के पात्र में रक्खे। मात्रा १ तोला या आधा तोला। अनुपान—४ तोले दूध। प्रातःकाल अथवा भोजन के समय इसका सेवन करना चाहिए। इसके प्रयोग से सैकड़ों स्त्रियों के सेवन करने पर भी वीर्य क्षीण नहीं होता है और इन्द्रिय भी शिथिल नहीं होती है। इससे वीर्य की वृद्धि होती है। यह वृहच्छतावरी मोदक राजयक्ष्मा, कठिन पाँचों खाँसी, वातरोग, पित्तरोग, कफरोग, सन्निपातरोग १८ कोढ़, वातरक्त, प्रमेह, श्लीपद (फील पाँव) सूजन और सब प्रकार की बवासीरों को इस प्रकार नष्ट करता है जैसे इन्द्र का वज्र वृक्षों को। यह लक्ष्मी और कान्ति को बढ़ानेवाला है तथा जैसे भगवान् असुरों को नष्ट करते हैं इसी प्रकार यह कोष्ठगत रोगों को नष्ट करता है। इससे उत्तम वाजीकरण के लिए अन्य ओषधि नहीं है। सन्तानरहित स्त्रियों तथा दुर्बल शरीर, नपुंसक, अल्पवीर्य और बूढ़े पुरुषों को इसका सेवन करना चाहिए। यह ओज, आयु, तेज, स्वर, बुद्धि, वायु और जीवनशक्ति को बढ़ाता है॥ ८१-९६ ॥

रतिवल्लभ मोदक।

शमठीनस्य बीजानां चूर्णानि पल-

पञ्च च। हविषः कुडवं चैकं सितामस्थं प्रगृह्य च ॥ ९७ ॥ शतावरीरसप्रस्थं तथा शक्राशनस्य च। गव्यमाजं पयः प्रस्थं ततः प्रस्थद्वयं पचेत् ॥ ९८ ॥ धात्री द्विजीरकं मुस्तं त्वगेला पत्रकेशरम्। आत्मगुप्ता चातिबला तालाङ्कुरकशेरुकम् ॥ ९९ ॥ शृङ्गाटकं त्रिकटुकं धान्यमभ्रञ्च वङ्गकम्। पथ्या द्राक्षा च काकोल्यौ खर्जूरं चुरकं तथा ॥१००॥ कटुका मधुकं कुष्ठं लवङ्गं सारसैन्धवम्। यमानी चाजमोदा च जीवन्ती गजपिप्पली ॥१०१॥ प्रत्येकं कर्षमेकं तु चूर्णितानि शुभानि च। कुडवार्द्धं पाकशेषे मधुनः प्रक्षिपेत्ततः ॥ १०२ ॥ मृगाण्डजं सकर्पूरं यथालाभं विनिक्षिपेत्। रतिवल्लभनामायं सेव्यमानो महारसः ॥ १०३ ॥ परमोजस्करो वल्यो वातव्याधिविनाशनः। वातपित्तहरो वृष्यो दृष्टिसन्दीपनः परः। पित्तश्लेष्मास्रपित्तघ्नो विषगुल्मज्वरापहः ॥ १०४ ॥ पाचयत्येव मन्दाग्निरोगाणां क्षयहेतुकः। न भवेल्लिङ्गशैथिल्यं वृद्धानां पुष्टिवर्द्धनम् ॥ १०५ ॥

यस्य गेहे सदा बह्व्यः पत्न्यः सुमनोहरः। रसः सेव्यः सदेवायं मोदको रतिवल्लभः ॥ १०६ ॥

भाँग के बीजों का चूर्ण १० तोले। घृत १६ तोले, शक्कर ६४ तोले, शतावरी का रस १२८ तोले भाँग का रस १२८ तोले, गौ का दूध १२८ तोले, और बकरी का दूध १२८ तोले, इन सबको एकत्र कर पाक करे। जब पाक तैयार होने पर हो तब आँवला, जीरा, कालाजीरा, मोथा, दालचीनी, छोटी इलायची, तेजपात, नागकेसर, कौंच के बीज, गुलशकरी, ताड़ के अंकुर, कसेरु, सिंघाड़ा, त्रिकटु ( सोंठ, मिर्च, पीपरि ), धनियाँ, अभ्रकभस्म, वङ्गभस्म, हड़, मुनक्का, काकोली, क्षीरकाकोली, पिंड खजूर, गोखरू, कुटकी, मुलेठी, कूट, लौंग, सेंधा नमक, अजवायन, अजमोद, जीवन्ती और गजपीपरि; प्रत्येक एक एक तोला। इनका महीन चूर्ण कर उसमें मिला दे। जब पाक ठंढा हो जाय तो ८ तोले शहद मिलाकर थोड़ी-सी कस्तूरी और कपूर से सुगन्धित कर मोदक बाँध ले। यह रतिवल्लभ नामक मोदक सेवन करने से ओजधातु और बल का बढ़ानेवाला है। वातरोग तथा वातपित्त रोग को नष्ट करता है। वृष्य तथा दृष्टिशक्ति को बढ़ाता है। पित्त, कफ, रक्तपित्त, विषदोष, गुल्म, ज्वर, मन्दाग्नि और क्षयरोग को नष्ट करता है। इससे इन्द्रिय शिथिल नहीं होती है, वृद्धों को पुष्टि देनेवाला है। जिस पुरुष के घर में बहुत-सी सुन्दर रमणियाँ हों उसको यह रतिवल्लभ मोदक सदा खाना चाहिए ॥ ९७-१०६ ॥

ये केचिद् विजयायोगा लौहवङ्गाभ्रसंयुताः। युक्ताश्च रसगन्धाभ्यां रसायनवरा मताः ॥ १०७ ॥

जितने योग भाँग, लौह, वङ्ग, अभ्रक, पारा और गन्धक के सम्मिश्रण से बनते हैं; वे ही श्रेष्ठ रसायन माने गये हैं ॥ १०७ ॥

तन्त्रान्तर में कथित कामेश्वर मोदक।

चूर्णांशं गगनं घनार्द्धविमलं गन्धं च कुष्ठामृता मेथी मोचरसो विदारिमुशली गोक्षुरकं चेक्षुरः। भीरुश्चैव कशेरुकं यवनिका तालाङ्कुरं धान्यकं यष्टी नागबलातिला मधुरिका जातीफलं सैन्धवम् ॥ १०८ ॥ भार्गी कर्कटशृङ्गकं त्रिकटुकं जीरद्वयं चित्रकं चातुर्जातपुनर्नवा करिकृष्णा द्राक्षा शटी कट्फलम्। शाल्मलेश्च त्रिफलत्रिकं कपिमनं बीजं समं चूर्णयेच्चूर्णार्द्धा विजया सिता द्विगुणिता

मध्वाज्यमिश्रं तु तत् ॥ १०९ ॥ कर्पार्द्धा गुटिकाथ कर्षमथवा सेव्या सतां सर्वदा । पेयं क्षीरमनु स्ववीर्यकरणे स्तम्भेऽप्ययं कामिनाम् ॥ ११० ॥

वामावश्यकर इत्यादिगुणाः सम्यङ्मारितमभ्रकमित्यादिनोक्तस्य कामेश्वरस्य समाः । अंशश्चतुर्थो भागः । कुष्ठादिकपिबीजपर्यन्तचूर्णानामंशमभ्रकम् । अभ्रार्द्धं गन्धकं विमलं निर्मलम् । चूर्णार्द्धा सिजयेति अभ्रादिसर्वचूर्णानामर्द्धा । घृतमधुमोदककरणयोग्यम् ।

कूट से लगाकर कौंच के बीज पर्यन्त चूर्णों का चौथा हिस्सा, अभ्रकभस्म और अभ्रकभस्म से आधा भाग शुद्ध गन्धक, कूट, तिखोय, मेथी, मोचरस, विदारीकन्द, मुसली, गोखरू, तालमखाना के बीज, शतावरी, कसेरू, अजवायन, ताड का अङ्कुर, धनियाँ, मुलेठी, नागेसर की छाल, तिल, सौंफ, जायफल, सेंधा नमक, भारंगी, काकडासिंगी, त्रिकटु ( सोंठ, मिर्च, पीपरि ) जीरा, कालाजीरा, चीता की जड़, चातुर्जात ( दालचीनी, इलायची, नागकेसर, तेजपात ), गदापुर्ना ( साँटी ), गजपीपरि, मुनक्का, कपूर, कायफल, सेमर की जड़, त्रिफला और कौंच के बीज, इन सबको समभाग लेकर चूर्ण बनावे । अभ्रकादि सब चूर्ण से दुगुनी शक्कर । घृत और शहद यथुमान से डालकर ( जितने में लड्डू बन सकें ) छः-छः मासे अथवा तोले-तोले भर के लड्डू बना ले । इसको खाकर दूध पीना चाहिए । यह मोदक वीर्यवर्द्धन तथा स्तम्भन करता है । शेष गुण समझना । अधिकार में कथित कामेश्वर मोदक के तुल्य जानना चाहिए ॥ १०८-११० ॥

कामाग्निसन्दीपन मोदक ।

कर्षौ रसो गन्धकमभ्रकं च द्विक्षारचित्रे लवणानि पञ्च । शटी यमानीद्वयकीटहारितालीशपत्राण्यपरं द्विकर्षम् । ११११ ॥ जीरं चतुर्जातलवङ्गजातीफलं च कर्षत्रयमेवमन्यत् । सद्वृद्धदारं कटुकत्रयं च ततश्चतुःकर्षमिदं निबोध ॥ ११२ ॥ धन्याकयष्टीमधुरीकशेरुकर्षाः पृथक् पञ्च परी विदारी । वरेभकर्णोऽमलात्मगुप्ताबीजं तथा गोक्षुरबीजयुक्तम् ॥ ११३ ॥ सबीजधत्तेन्द्ररजः समानं समा सिता क्षौद्रघृतं च तुल्यम् । कर्षैकमिन्दोरथमोदकं तत् कामाग्निसन्दीपनमेतदुक्तम् ॥ ११४ ॥ वृष्यं स्वतः परतरं सततं न दृष्टमेनं निषेव्य मनुजः प्रमदासहस्रम् । गच्छन्न लिङ्गशिथिलत्वमवाप्नुयाच्च नागाधिपं विजयते बलतः प्रमत्तम् ॥ ११५ ॥ कान्त्या हुताशनमपि स्मरतोमयूरान् वाहंभवेननयनेनमहाविहङ्गम् । वातानशीतिमथ पित्तगदं समग्रं श्लेष्मोत्थविंशतिरुजः परमग्निमान्द्यम् ॥ ११६ ॥ दुर्नामकामलभगन्दरपाण्डुरोगमेहातिसारकृमि हृद्ग्रहणीप्रदोषान् । कासज्वरश्वसनपीनसपार्श्वशूलशूलाम्लपित्तसहितांश्चिरजान् समस्तान् ॥ ११७ ॥ हत्वा गदानपि च तत्सुमपत्यकारि सर्वर्तुपथ्यमथ सर्वसुखप्रदायि । वृष्यं वलीपलितहारि रसायनं स्यात् श्रीमूलदेवकथितं परमं प्रशस्यम् ॥ ११८ ॥

पारा, गन्धक, अभ्रकभस्म, जवाखार, सज्जीखार, चीता की जड़, पाँचों नमक, कचूर, अजवायन, खुरासानी अजवायन, बायबिडंग और तालीसपत्र, प्रत्येक एक एक तोला । जीरा, चातुर्जात ( छोटी इलायची, दालचीनी, नागकेसर, तेजपात ), लौंग तथा जायफल, प्रत्येक दो-दो तोले । विधारा, सोंठ, मिर्च, पीपरि; प्रत्येक तीन तीन तोले । धनियाँ, मुलेठी, मीठ और कसेरू, प्रत्येक चार-चार तोले । शतावरी

विदारीकन्द, त्रिफला, हस्तिकर्ण पलाश की छाल, खरैटी की जड़, कौंच के बीज, गोखरू के बीज, प्रत्येक पांच-पांच तोले लेकर चूर्ण करे। इस चूर्ण के समान भाग बीज पत्रों सहित भांग का चूर्ण और सम्पूर्ण चूर्ण के समान शक्कर लेकर यथाविधि पाक करे। शीतल होने पर शक्कर के समान घृत और शहद मिलावे। फिर सुगन्धि के लिये कपूर १ तोला मिलाकर यथाविधि मोदक बना ले। यह मोदक कामाग्नि का बढ़ानेवाला है। इससे बढ़कर कोई अन्य वृष्य प्रयोग नहीं है। इसके सेवन से मनुष्य की लिङ्गेन्द्रिय सैकड़ों स्त्रियों से गमन करके भी शिथिल नहीं होती है। तथा बल में गजेन्द्र को, कान्ति में अग्नि को, कण्ठस्वर में मयूरों को, वेग में घोड़े को और दृष्टिप्रसार में गरुड़जी को जीत लेता है। यह मोदक ८० प्रकार के वातरोग, सब पित्त-रोग, २० कफरोग, मन्दाग्नि, बवासीर, कामला (कांवर—पीलिया), भगन्दर पाण्डुरोग, प्रमेह, अतीसार, कृमिरोग, हृद्रोग, मद्यरोग, कास ज्वर, श्वास, पीनस, पार्श्वशूल, शूल, अम्ल-पित्त और सब प्रकार के पुराने रोगों को नष्ट करता है। यह पुत्र का देनेवाला है, सब ऋतुओं में पथ्य और सबको सुखदायी है। श्रीमूलदेव का कहा हुआ यह कामाग्निसंदीपन मोदक परम श्रेष्ठ, वृष्य, बलीपलितनाशक तथा रसायन है। मात्रा-एक माशा से ३ माशे तक ॥ ११३-११८ ॥

खण्डाम्रक।

पक्वचूतरसद्रोणः पात्रं स्याच्छुद्धखण्डतः। घृतमर्द्धं ततो ग्राह्यं चतुर्थांशं च नागरम् ॥ ११९ ॥ तदर्द्धं मरिचं प्रोक्तं तदर्द्धा पिप्पली मता। तोयं खण्डसमं दद्यात् सर्वमेकत्र संस्थितम् ॥ १२० ॥ विपचेन्मृण्मये पात्रे यदा दर्वीप्रलेपनम्। चूर्णान्येषां ततो दद्यात् पर्भं पलचतुष्टयम् ॥ १२१ ॥ ग्रन्थिकं चित्रकं मुस्तं धन्याकं जीरकद्वयम्। त्र्यूषणं जातितालीशं चूर्णमेषां पलं पलम् ॥ १२२ ॥ त्वगेला केशराणां च प्रत्येकं च पलं तथा। सिद्धशीते च मधुना प्रस्थं दत्त्वा विघट्टयेत् ॥ १२३ ॥ तत् सर्वमेकतः कृत्वा शुभे भाण्डे निधापयेत्। भोजनादौ ततः खादेत्तोलकद्वयमानतः ॥ १२४ ॥ गच्छेत् कन्दर्पदर्पान्धो रागवेगाकुलेन्द्रियः शतं वापि तदर्द्धं वा रमेत् स्त्रीणां पुमान्यम् ॥ १२५ ॥ संसेव्य भेषजं ह्येतदन्यायां जनयेत् सुतम्। वीरं सर्वगुणोपेतं शतायुश्च भवेदयम् ॥ १२६ ॥ मृतवत्सा च या नारी या च गर्भोपघातिनी। सापि सूते सुतं सभ्यं नारायणपरायणम् ॥ १२७ ॥ वन्ध्यापि लभते पुत्रं वृद्धोऽपि तरुणायते। तुरङ्ग इव संहृष्टो मातङ्गइव विक्रमी ॥ १२८ ॥ सदा भेषजसंसेवी भवेन्मारुतवेगवान्। हन्ति सर्वामयं घोरं कासं श्वासं क्षयं तथा ॥ १२९ ॥ दुर्नामाजीर्णकं चैव अम्लपित्तं सुदारुणम्। तृष्णां छर्दिं च मूर्च्छां च शूलमष्टविधं जयेत् ॥ १३० ॥ खण्डाम्रकमिदं प्रोक्तं भार्गवेण स्वयंभुवा। समस्तं भैषज्यमाधुर्यं सर्वपापविनाशनम् ॥ १३१ ॥ ग्रहरक्षःपिशाचघ्नमपस्मारविनाशनम्। पाण्डुरोगं प्रमेहं च मूत्रकृच्छ्रं च नाशयेत् ॥ १३२ ॥ वन्ध्या योषिद्भवेत् पुंसां पुमान् वश्यश्च योषिताम्। दृष्टं वारसहस्रं च कथमत्र विचारणा ॥ १३३ ॥

पके हुये आमों का रस ४२ सेर ४८ तोले, साफ शक्कर २ सेर १६ तोले, घृत १२८ तोले, सोंठ ६४ तोले, कालीमिर्च ३२ तोले, पीपरि १६ तोले और जल २ सेर १६ तोले। सबको एकत्रकर मिट्टी

के पात्र में पकावे । जब करछी में चिपकने लगे तब तेजपत्र १६ तोले, पिपरामूल, चीता, की जड़, मोथा, धनियाँ, जीरा कालाजीरा, सोंठ, मिर्च, पीपरि, जायफल, तालीशपत्र, दालचीनी, छोटी इलायची और नागकेशर, प्रत्येक चार-चार तोले । सबका चूर्ण कर उसमें मिला दे । जब ठंडा हो जाय तब शहद १२८ तोले डालकर खूब घोट ले और चीनी आदि के सुन्दर पात्र में भरकर रख लें । इसको भोजन के आदि में खाना चाहिए । मात्रा २ तोले से ४ तोले तक । इसके सेवन से पुरुष कामान्ध तथा स्मरवेग से व्याकुलेन्द्रिय होकर सौ या पचास स्त्रियों से रमण कर सकता है । यथा वन्ध्या ( बांझ ) स्त्री में भी सवगुण युक्त पुत्र को पैदा करता है । १०० वर्ष की आयु होती है । जिस स्त्री के बालक होकर मर जाते हैं या गर्भ में ही नष्ट हो जाते हैं वह भी सम्य तथा भगवद्भक्त पुत्र को प्राप्त करती है । इसका सेवन कर वन्ध्या भी पुत्र पैदा कर सकती है । वृद्ध भी तरुण हो जाता है । इसका सदा सेवन करनेवाला घोड़े के तुल्य प्रसन्न, हाथी के समान पराक्रमी और वायु के समान वेगवान् होता है । यह सब प्रकार के कठिन रोग, कास, श्वास, क्षय, बवासीर, अजीर्ण, दारुण अम्लपित्त, तृषा वमन, मूर्च्छा और ८ प्रकार के शूलरोगों को नष्ट करता है । भार्गव ऋषि का कहा हुआ यह सत्यात्मक वयःस्थापक, मेधावर्द्धक, आयुःप्रद सब पापों का नाशक, तथा ग्रह, राक्षस, पिशाच, अपस्मार, पाण्डुरोग, प्रमेह और मूत्रकृच्छ्र को नष्ट करता है । इसके सेवन से पुरुष स्त्री के और स्त्री पुरुष के वश में हो जाती है । यह हजारों बार का आजमाया हुआ है । अतः विचारने की आवश्यकता नहीं ॥ ११६-१३२ ॥

### पूर्णचन्द्र रस ।

मृताभ्रलौहं सशिलाजतु स्याद्विडङ्गताप्ये मधुना घृतेन । सम्मर्द्य सर्वं खलु पूर्णचन्द्रो द्विगुञ्जयुक्तोभवतीह वृष्यः १३४

रससिन्दूर, अभ्रकभस्म, लौहभस्म, शिलाजीत, वायविडङ्ग, स्वर्णमाक्षिकभस्म, इन्हें बराबर मात्रा में इकट्ठा कर मिला ले । इसे शहद एवं घृत में घोटकर सेवन करना चाहिए । मात्रा—२ रत्ती । यह वीर्यवर्द्धक है ॥ १३४ ॥

### निद्रोदय रस ।

रसभस्म तुगाक्षीरी नागफेनं पृथक्पृथक् । अर्ध कर्षाणि सङ्ग्राह्य धातकी धात्रिका भवम् ॥ १३५ ॥ चूर्णकर्षद्वयं ग्राह्यं मातुलानी द्रवैस्त्रिधा । विभाव्य द्विगुणां द्राक्षां मेलयित्वाऽथ गुञ्जिकम् ॥ १३६ ॥ भक्षयित्वा पिवेद्दुग्धं निद्राकारक मुत्तमम् रेतसस्तम्भने दक्षं बलवर्णौजः प्रवर्द्धनम् ॥ १३७ ॥

रससिन्दूर वंशलोचन अफीम ये सब ६-६ माशे धाय के फूल और आँवले २-२ तोले लेवे सब कर महीन चूर्ण कर भाँगरे के रस में ३ बार घोट कर दूनी बीज निकाली हुई मुनक्का मिला १-१ माशे की गोलियाँ बना कर रख ले । इसमें से १-१ गोली गाय के दूध के साथ देने से अच्छी नींद आती है और शुक्र का स्तम्भन होता है तथा बल और रंग तेज की वृद्धि होती है ॥ १३५-१३७ ॥

### श्रीकामदेव रस ।

कामदेवमथो सूतं कामिनां कामदं सदा । यस्य प्रसादतो वल्यो रम्यञ्च रमते स्त्रियम् ॥ १३८ ॥ पारदं पलमेकं स्याद् द्विपलं शुद्धगन्धकम् । रक्तकार्पासतोयेन घृष्ट्वा काचस्य कूप्यतः ॥ १३९ ॥ निक्षिप्य दृढ्णेनैन मुखं तस्य निरोधयेत् । वालुकायन्त्रमध्यस्थं कूप्यञ्च कुरुते दृढम् ॥ १४० ॥ दिनद्वयं पचेदग्नौ शास्त्रवित्कुशलो भिषक् । शीते चादाय पात्रस्थं कूपिकान्तरलग्नितम् ॥ १४१ ॥ दरदेन समं रक्तं सोज्ज्वलं भस्म यत्नेन । भक्षयेद्रक्तिकैकं च घृतेन मधुना सह ॥ १४२ ॥ पश्चाद् दुग्धं गुड-

आज्यं कृष्णधेनुमपि शर्कराम्। द्राक्षाखर्जूर-मधुकमभूशीनथ भक्षयेत् ॥ १४३ ॥ त्रिफला मधुना शान्तिं याति पित्तं चिरोद्भवम्। निर्गुण्डिकारसेनात्र दुर्वारवातवेदना ॥ १४४ ॥ प्रशमं याति वेगेन नूतनश्च वपुर्भवेत्। मर्द्दावर्तितदुग्धेन गृह्यते परमं रसः ॥ धन्यापि च भवत्येव जीवद्वत्सा सुपुत्रिका ॥ १४५ ॥

इस कामदेव रस के सेवन से कामुक मनुष्यों की कामशक्ति बढ़ जाती है। इस रस के प्रभाव से सेवन करनेवाला व्यक्ति बलयुक्त एवं सौन्दर्यसम्पन्न होकर स्त्री से रमण करता है। पारा ४ तोले, शुद्ध गन्धक ८ तोले इन्हें एकत्र घोटकर कज्जली बनावे। इस कज्जली को लाल कपास के वृक्षों के रस से घोटकर कामनी शीशी में डाल दे और खड़िया के बने ढक्कन (डाट) से मुख बन्द कर जोड़ों पर सुहागे का लेप कर दे। पश्चात् वालुकायन्त्र में रख दो दिन लगातार मन्दाग्नि में पकावे। स्वाङ्ग शीतल होने पर शीशी को तोड़कर शीशी के गले में लगे हुए हिंगुल के समान रक्तवर्ण औषध (रससिन्दूर) को निकाल ले। इसे आधी रत्ती से १ रत्ती की मात्रा में घी और शहद के साथ सेवन करे। औषध सेवन के पश्चात् दूध, गुड़, घी, काला गन्ना, खाँड, दाख, खजूर तथा मुलेठी आदि का सेवन करना चाहिए। बहुत दिन के बढ़े पित्त के नाश के लिये इस रस को शहद तथा त्रिफला के साथ सेवन करना चाहिए। सम्भालू के रस के साथ इसका सेवन करने से कष्टसाध्य वातवेदना नष्ट होती है और शरीर स्वस्थ हो जाता है। अधौटा दूध (औटते-औटते जब आधा शेष रह जाय) के साथ इस गोली का सेवन करने से वन्ध्या स्त्री भी जीवितपुत्रयुक्त होती है ॥१३८-१४५॥

मन्मथाभ्र रस।

रसगन्धकयोर्ग्राह्यं पलमेकं सुशोधितम्। अभ्रं निश्चन्द्रकं दद्यात् पलार्द्धं च विचक्षणः ॥ १४६ ॥ कर्पूरं तोलकं दद्याद्वङ्गं च कोलसम्मितम्। ताम्रं तोलार्द्धकं तत्र निःशेषं मारितं पुनः ॥ १४७ ॥ लौहकर्षमुभौ गौ च वृद्धदारकजीरकम्। विदारीं शतमूलीं च क्षुरबीजं बलां तथा ॥ १४८ ॥ मर्कटपविविषां चैव जातीकोषफले तथा। लवङ्गं विजयाबीजं श्वेतसर्जं यमानिकाम् ॥ १४९ ॥ शाणमात्रान् गृहीत्वैतान् एकीकृत्य विपेषयेत्। गुञ्जाद्वयं तु कर्त्तव्यं कोष्णं क्षीरं पिबेदनु ॥ १५० ॥ गृहे यस्य शतं नार्यो विद्यन्तेऽतिव्यवायिनः। न तस्य लिङ्गशैथिल्यमौषधस्यास्य सेवनात् ॥ १५१ ॥ न च शुक्रक्षयं याति न बलं ह्रासतां व्रजेत्। कामरूपी भवेन्नित्यं वृद्धः षोडशवर्षवत् ॥ १५२ ॥ रसः श्रीमन्मथाभ्रोऽयं महेशेन प्रकाशितः। अस्य भक्षणमात्रेण काष्ठं जीर्यति तत्क्षणात् ॥ नाशयेद् ध्वजभङ्गादीन रोगान् योगकृतानपि ॥ १५३ ॥

शुद्ध पारा ४ तोले, गन्धक ४ तोले, निश्चन्द्र अभ्रकभस्म २ तोले कपूर १ तोला, वङ्गभस्म ६ माशे, ताम्रभस्म आधा तोला, लौहभस्म १ तोला तथा विधारा, जीरा, विदारीकन्द, शतावरी, तालमखाना के बीज, खरैंटी, कौंच के बीज, चमीस, जावित्री, जायफल, लौंग, भांग के बीज, सफेद राल और अजवायन, प्रत्येक तीन-तीन माशे; इन सबको एकत्र कर महीन पीस के और जल से दो-दो रत्ती की गोलियाँ बनाकर खावे। अनुपान-गुनगुना दूध। इसके सेवन से सैकड़ों स्त्रियों से सहवास करने वाले की भी इन्द्रिय शिथिल नहीं होती है। और न वीर्य क्षीण होता है। तथा बल भी कम नहीं होता है। वृद्ध भी कामदेव के तुल्य रूपवाला और सोलह वर्ष का-सा हो जाता है। इस श्रीमन्मथाभ्र रस को शिवजी ने प्रकट किया था।

इसके भक्षण करने से काष्ठ भी उसी क्षण भस्म हो जाता है। यह ध्वजभंग आदि रोगों को नष्ट करता है ॥ १४६-१५३ ॥

मकरध्वज रस ।

स्वर्णादष्टगुणं सूतं मर्दयेत् त्रिकगन्धकम् । रक्तकार्पासकुसुमैः कुमार्यद्भिर्विमर्दयेत् ॥ १५४ ॥ शुष्कं काचघटीं रुद्ध्वा वालुकायन्त्रगं दहात् । भस्म कुर्याद्रसेन्द्रस्य नवार्ककिरणोपमम् ॥ १५५ ॥ भागोऽस्य भागाश्चत्वारः कर्पूरस्य सुशोभनाः । लवंगं मरिचं जातीफलं कर्पूरमात्रया ॥ १५६ ॥ मेलयेन्मृगनाभिं च गद्याणकमितं सतः । श्लक्ष्णपिष्टो रसोनाम जायते मकरध्वजः ॥ १५७ ॥ वल्लं वल्लद्वयं वाथ ताम्बूलीदलसंयुतम् । भक्षयेन्मधुरं स्निग्धं मृदुमांसमवाप्तलम् ॥ १५८ ॥ शृतशीतं सितायुक्तं दुग्धं गोभवमाध्यकम् । मध्वाद्यं पिष्टनपरं मद्यानि विविधानि च ॥१५९॥ करोत्यग्निबलं पुंसां वलीपलितनाशनः । मेधायुःकान्तिजननं कामोद्दीपनकृन्महान् ॥ १६० ॥ अभ्यासात् साधकः स्त्रीणां शतं जयति नित्यशः । रतिकाले रतान्ते पुनः सेव्यो रसोत्तमः । मानहानिं करोत्यासां प्रमदानां सुनिश्चितम् ॥१६१॥ कृत्रिमं स्थावरविषं जंगमं विषवारि च । न विकाराय भवति साधकानां च वत्सरात् ॥ १६२ ॥ मृत्युञ्जयो यथाभ्यासात् मृत्युञ्जयति देहिनाम् । तथायं साधकेन्द्रस्य जरामरणनाशनः ॥ १६३ ॥

अत्र गद्याणं षण्मापकम् । वल्लं द्विगुञ्जकम् । अत्रर्थं परिभाषामाह ।

यवद्वयेन गुञ्जा स्याद् द्विगुञ्जो वल्ल उच्यते । धरणः स्याच्चतुर्माषैः षड्भिर्गद्याणमुच्यते ॥ १६४ ॥

सुवर्ण के कण्टकवेधीपत्र या चूर्ण १ तोला, पारा ८ तोले और गन्धक २४ तोले । पहिले सोना को पारा में मिलाकर घोटे पश्चात् उसमें गन्धक डालकर कज्जली करे तत्पश्चात् लाल कपास के फूलों के रस से और घीकुवार के रस से घोटकर तथा सुखाकर काँच की कुप्पी ( आतशी शीशी ) में भर दे और उसका मुख बन्द करके वालुकायन्त्र में रस भस्म कर लें भस्म ( करने की विधि गंधकजारण के समान है ) यह प्रातः काल के सूर्य के तुल्य तरुण रंग की भस्म हो जायेगी। यह भस्म १ तोला, कपूर ४ तोले और लवङ्ग ४ तोले, कालीमिर्च ४ तोले और जायफल ४ तोले लें। कस्तूरी ६ माशे । सबको सूक्ष्म महीन पीसकर जल द्वारा गोलियाँ बना लें। मात्रा २ रत्ती से ४ रत्ती तक। इसको पान में रखकर खाना चाहिए। इसके सेवन करते हुए मधुर, चिकना कोमल मांस, औटाकर ठंडा किया हुआ खाँडयुक्त गौ का दूध मधु आदिक मीठे पदार्थ एवं अनेक प्रकार की मदिराएँ पथ्य कही हैं। यह जठराग्नि को बढ़ाता तथा वलीपलित को नष्ट करता है। मेधा, आयु और कान्ति को बढ़ानेवाला तथा कामाग्नि को उद्दीपन करनेवाला है। इसका सेवन करनेवाला सैकड़ों स्त्रियोंको विजयकर लेताहै। रतिकालमें तथा रतिकाल के अन्त में इस रसोत्तम का सेवन करना चाहिए। इसके प्रताप से कृत्रिम, स्थावर, जंगम विष तथा विष का जल विकार नहीं करता है। जैसे अभ्यास करने से मृत्युञ्जय रस प्राणियों की मृत्यु को जीत लेता है ऐसे ही यह सेवनकर्ता की जरा और मृत्यु का नाश करता है ॥ १५४-१६३ ॥

यहाँ गद्याणक ६ माशे का और वल्ल दो रत्ती का माना जाता है। इस विषय में प्रमाणरूप परिभाषा कहते हैं । दो जौ की एक रत्ती (घुँघुची), दो रत्ती का १ वल्ल, चार माशे का धरण और छः माशे का गद्याण होता है ॥ १६४ ॥

### कामिनीमदभंजन ।

शुद्धसूतं समं गन्धं दिवसं कह्लारकद्रवैः । मर्दितं वालुकायन्त्रे यामं सम्पुटके पचेत् ॥ १६५ ॥ रक्ताब्दस्य द्रवैर्भाव्यं दिनैकं तु सितायुतम् । यथेष्टं भक्षयेच्चानु कामयेत् कामिनीशतम् ॥ १६६ ॥

शुद्ध पारा और गन्धक बराबर भाग लेकर दोनों की कज्जली करे और लाल कमल के रस से १ दिन घोटकर सुखा ले और काँच की कूपी में रखकर मुँह बन्दकर दे तथा वालुकायन्त्र में रखकर एक प्रहर तक पकावे। शीतल होने पर कूपी से निकालकर एक दिन केशर के जल की भावना दे। इस रस को मिश्री के साथ सेवन करके इच्छानुसार भोजन करना चाहिए। इससे रमण करने की सामर्थ्य बढ़ती है ॥ १६५-१६६ ॥

### हरशशाङ्क ।

शाल्मल्यास्त्वचमादाय श्लक्ष्णचूर्णानि कारयेत् । शुद्धगन्धकचूर्णानि तद्रसेनैव भावयेत् ॥ १६७ ॥ मासमात्रप्रयोगेण शृणु वक्ष्यामि ये गुणाः । मकरध्वजरूपि स्त्रीशतानन्दवर्द्धनः ॥ १६८ ॥ शतायुश्च भवेदेवि ! वलीपलितवर्जितः । तेजस्वी मलसम्पन्नो वेगेन तुरगोपमः ॥ सततं भक्षयेद्यस्तु तस्य मृत्युर्न जायते ॥ १६९ ॥

सेमर की छाल का चूर्ण और शुद्ध गंधक का चूर्ण समभाग लेकर उसमें सेमर की जड़ के रस की[1] भावनाएँ दे। शुभ दिन में इसका सेवन करे मात्रा १-२ माशा अनुपान गौ का दूध। इसको रात्रि में सेवन करना चाहिए। एक महीने के सेवनसे कामदेव का-सा रूप तथा सौ स्त्रियों को आनन्दित करनेवाला हो जाता है। एवं सौ वर्ष की आयु, रिकुञ्चन और बालों की सफेदी से रहित, तेजस्वी, बलयुक्त तथा घोड़े की तुल्य वेगवाला होता है। जो इसे सदा खाया करता है उसकी मौत नहीं होती है ॥ १६७-१६९ ॥

1. शाल्मलीवल्कलचूर्णं शुद्धगन्धकचूर्णं च समं कृत्वा शाल्मलीमूलरसेन सप्त भावना देयाः घृतमधुभ्यां लीढ्वा गोदुग्धमनुपिबेदिति ।

### कामधेनु ।

गन्धमामलकं चूर्णं धात्रीरसविभावितम् । सप्तधा शाल्मलीतोयैः शर्करामधुयोजितम् ॥ १७० ॥ लीढ्वा चानुपयःपानं प्रत्यहं कुरुते तु यः । एतेनाशीतिवर्षोऽपि शतधा रमते स्त्रियः ॥ १७१ ॥

शुद्ध गन्धक और आँवले का चूर्ण समभाग लेकर उसमें आँवले के रस और सेमर की जड़ के रस से क्रमशः सात-सात भावनाएँ देकर उसको शक्कर और शहद के साथ चाटे। मात्रा १ माशा से २ माशे तक। अनुपान दूध। इसका प्रतिदिन सेवन करने से ८० वर्ष का बूढ़ा भी सौ स्त्रियों से रमण करने की सामर्थ्य पाता है ॥ १७०-१७१ ॥

### लक्ष्मणालौह ।

लक्ष्मणाहस्तिकर्णाभ्यां त्रिकत्रयसमन्वयात् । अश्वगन्धासमायोगाल्लौहं पुंसवनं मतम् ॥ १७२ ॥ पुत्रोत्पत्तिकरं श्रेष्ठं कन्याप्रसूतिनिवर्त्तकम् । कृशस्य बलदं श्रेष्ठं सर्वामयहरं परम् १७३ ॥

लक्ष्मणा की जड़, हस्तिकर्ण पलास की छाल, त्रिकटु ( सोंठ, मिर्च, पीपल ), त्रिफला, त्रिमद ( वायविडंग, चीते की जड़, नागरमोथा) और असगन्ध; प्रत्येक ओषधि समभाग और सबकी बराबर लौहभस्म ले सबको एकत्र पीसकर रख ले। इसके सेवन से पुत्र की उत्पत्ति होती है और कन्या होना बन्द हो जाता है। दुर्बल को बलवान् करनेवाला तथा सब रोगों को नष्ट करनेवाला यह लक्ष्मणालौह उत्तम होता है ॥ १७२-१७३ ॥

### गन्धामृतरस ।

भस्मसूतं द्विधा गन्धं कन्यकाक्षिरैर्वि-

मर्दयेत्। रुद्ध्वा लघुपुटे पक्त्वादुद्धृत्य मधुसर्पिषा ॥ १७४ ॥ वल्लं खादेज्जरां मृत्युं हन्ति गन्धामृतो रसः। समूलं भृङ्गराजं च छायाशुष्कं विचूर्णयेत् ॥ १७५ ॥ तत्समं त्रिफलाचूर्णं सर्वतुल्या सिता भवेत्। तोलिकं भक्षयेच्चानु सेवनाच्च जरापहः ॥ १७६ ॥

पारे की भस्म १ भाग और गन्धक दो भाग। दोनों को एकत्र कर घीकुवार के रस से घोट ले और सुखाकर लघुपुट में फूंक दे। शीतल होने पर दो रत्ती रस शहद और घृत के साथ खावे। यह गन्धामृत रस जरावस्था तथा मृत्यु को दूर करता है। इस गन्धामृत रस के खाने के पश्चात यह चूर्ण खाना चाहिए। सुखाये हुए जड़ सहित भंगरे का चूर्ण और त्रिफला का चूर्ण समभाग और दोनों के बराबर शक्कर लेकर मिलावे। मात्रा-१ तोला से ४ तोले तक ॥ १७४-१७६ ॥

स्वर्णसिन्दूर।

पलं रसेन्द्रस्य च गन्धकस्य हेम्नोऽपि कर्षं परिगृह्य सम्यक्। वटप्ररोहस्य रसेन यामं यामं विमर्द्याथ कुमारिकायाः ॥१७७॥ सत् काचकूप्यां निहितं प्रयत्नात् पचेद्विधिज्ञः सिकताख्ययन्त्रे। ततो रजस्तोर्ध्वगतं सुरम्यं प्रगृह्य यत्नादरुणप्रभं यत् ॥ १७८ ॥ तद्योजयेत् सर्वगदेषु वीक्ष्य धातुं बलं वह्निमथो वयश्च। रसायनं वृष्यतरं च बल्यं मेधाग्निकान्तिस्मरवर्द्धनं च ॥ १७९ ॥

शुद्ध पारा ४ तोले, गन्धक ४ तोले और सोना के कण्टकवेधी पत्र १ तोला। पहिले पारा में स्वर्णपत्र को मिलाकर घोटे पश्चात उसमें गन्धक डालकर कज्जली करके बरगद (बड़) की जटा के तथा घीकुवार के रस से अलग-अलग एक-एक पहर घोटकर सुखा ले और काँच की शीशी में भरकर मुख बन्द कर दे तथा बालुकायन्त्र में रखकर विधि से पकावे। जब शीशी की गर्दन में लाल-लाल रमणीय रस जम जाय तब उसको सावधानी से निकाल ले। धातु, बल, अग्नि और आयु का विचार कर सब रोगों में इसको देना चाहिए। यह स्वर्णसिन्दूर अत्यन्त वृष्य, बलप्रद एवं मेधा, अग्नि और कान्ति को बढ़ानेवाला है ॥ १७७-१७९ ॥

सुरसुन्दरी गुटिका।

अभ्रकं माणिकं वज्रं कान्तं हेम समं समम्। सर्वाणि समभागानि सूतयुक्तानि कारयेत् ॥ १८० ॥ गोलकं च ततः कृत्वा पक्वं निचुलवारिणा। ततस्तं पुटपाकेन स्तम्भयित्वा प्रयत्नतः ॥ १८१ ॥ बाह्ये चास्यापि लिप्त्वा च वक्त्रस्था गुटिकोत्तमा। स्तम्भयेच्छुक्रसंघातं विषरोगांश्च नाशयेत् ॥ १८२ ॥ अब्देनैकेन वक्त्रस्था वयःस्तम्भं करोति च। वलीपलितहन्त्रीयं गुटिका सुरसुन्दरी ॥ १८३ ॥

अभ्रकभस्म, स्वर्णमाक्षिकभस्म, हीरे की भस्म, कान्तलोह की भस्म, सोने की भस्म और रससिन्दूर; सबको सम भाग लेकर बेत की जड़ के रस से घोट गोला बना ले और बाहर कपड़मिट्टी करके लीप दे तथा पुटपाक की विधि से फूँक ले। पश्चात् जल के योग से इसकी गोलियां बना ले। मुख में धारण करने से यह गुटिका शुक्र के वेग को रोक देती है तथा विष के रोगों को नष्ट करती है। एक वर्ष तक मुख में धारण करने से आयु को स्थिर करती है। यह सुरसुन्दरी गुटिका वलीपलित को नष्ट करती है ॥ १८०-१८३ ॥

मोफरया नाम से प्रसिद्ध यवनकृत औषध

जातीपत्रलवङ्गनागकेशरकणा कक्कोलमज्जाफलं श्यामा कट्फलसारिवागुरुवचा मुस्तं शटी मस्तकी। मांसी शाल्मलिधातकी वहुलता गोक्षूरमेथी वरी बीजं वानरिकोद्भिलात्ति च गुडा धूर्त्तः परं पङ्कजम्॥

१८४ ॥ कुष्ठं चोत्पलकेशरं च मधुकं श्रीखण्डजातीफलं चूर्णं कन्दविदारिमूपलियुतारम्भा प्रियङ्गोःफलम्। जीवद्द्वन्द्वसविश्वमूषणवरा एला त्वचो धान्यकं चीनीचोपसमुद्रशोषशिखरं चाकारकरभं कचम् ॥ १८५ ॥ इन्दुं कुङ्कुमनाभिजं सगगनं चूर्णं समं कारयेद् स्वर्णं तारभुजङ्गवङ्गमयसा वज्रं तथा ताम्रकम्। मुक्ता शाम्भवतालकानि विधिना शुद्धं मृतं योजयेत् तुर्यांशं विजयादलस्य विमलं चूर्णं ततो दापयेत् ॥ १८६ ॥ तेषामर्द्धांशयुक्ता विमलतरसिता क्षौद्रमेवं सितांशं तोयं स्वल्पं प्रदेयं मृदुतरदहनैर्लेहसिद्धिर्विधेया। शीते क्षिप्त्वा तु चूर्णं घृतपरिलुलितं घट्टयेच्च दर्व्या म्लेच्छेनोक्तः सुलेहो मुफर इति मतः सेव्यतां सर्वकालम् ॥ काम्यं वामाप्रमोदं सकलगदहरं राजयोग्यं प्रदिष्टम् ॥१८७॥

अपरगुणा बृहत्कामेश्वरस्येव। मज्जाफलं माजुफलमिति प्रसिद्धं वणिग्वृन्दम्। एवं अन्तकीति रुमिमस्तकी, धूर्तो धुस्तूरबीजं, चीनीचोपः चोपचीनीति प्रसिद्धं काञ्चनमूलं सिहलादौ प्रसिद्धं, समुद्रशोषः हिज्जलबीजं, शिखरं लवङ्गं, आकारकरभं आकरकरा इति ख्यातं, कचं बालकम्, इन्दुः कर्पूरं, शाम्भवो रसः।

शरीर में स्पर्श का अनुभव न होना, क्रियानाश, मांसपेशियों की कठोरता, बिना आक्षेप के मूर्च्छा होना आदि असाधारण लक्षण अपरिवर्तक रोग की पहली स्थिति में होते हैं। कभी श्वास-संख्या बढ़ जाना, नाड़ी की क्षुद्रता आदि लक्षण भी होते हैं। साधारणतया बिना किसी पूर्वरूप के अकस्मात् ही रोग प्रकट होता है। कभी-कभी पूर्वरूप में गर्दन की कठोरता, शिर में पीड़ा और चित्त की चंचलता आदि लक्षण भी होते हैं॥ ५-७॥

यथा गदयतश्चित्तं प्रसन्नमवतिष्ठते। सर्वथा तद्विधातव्यं तद्धि मुख्यं चिकित्सितम्॥ ८॥

अचलवात रोग में जिस प्रकार रोगी का चित्त प्रसन्न रहे वही विधान करना चाहिए। यही मुख्य चिकित्सा है॥ ८॥

शीर्षेण शीताम्बुसेकश्च चन्दनादिप्रलेपनम्। तथा मेषीपयःपानं विधेयं मृदुरेचनम्॥ ९॥

सिर पर ठंढा पानी का तरेड़ा देना, चन्दन का लेप करना, भेड़ का दूध पीना और कोमल जुलाब देना अपतन्त्रवात में हितकारी है ॥ ९ ॥

हिंग्वाद्य चूर्ण।

हिंगुचन्दनशीतांशुदारुदारुनिशानिशाः। फलत्रयमुशीरं च मधूकं मधुकं मुराम् ॥१०॥ सच्चूर्णयैकत्र पयसा पिबेच्छीताम्बुना तथा। अनेनाचलवातारूयो याति नाशं गदो ध्रुवम् ॥ ११ ॥

हींग, चन्दन, कपूर, देवदारु, दारुहल्दी, हल्दी, त्रिफला, खस, मुलेठी, महुआ और मुरामांसी; इनको सम भाग ले चूर्ण बनाकर ठंढे जल के साथ सेवन करे तो यह हिंग्वादि चूर्ण अपतन्त्रवात को नष्ट करता है। मात्रा १ माशा ॥ १०-११ ॥

सिन्दूरं पयसा पीत्वा गदी स्वास्थ्यमवाप्नुयात्। वातामयहरं यच्च यद् यन्मूर्च्छाहरं तथा। तच्चद्विविच्य योक्तव्यं यथा दोषानुपानकम् ॥ १२ ॥

दूध के साथ रससिन्दूर सेवन करने से रोगी को स्वास्थ्य लाभ होता है। जो प्रयोग वातरोग तथा मूर्च्छारोग नाशक हों उनको दोषानुसार अनुपानभेद से सेवन कराना चाहिए ॥ १२ ॥

अपस्मारे च मूर्च्छायां तथा वातामयेऽपि च। यत् पथ्यं यदपथ्यं च तत्तदेवात्र सम्मतम् ॥ १३ ॥

इति भैषज्यरत्नावल्यामचलवाताधिकारः समाप्तः।

अपस्मार, मूर्च्छा और वातरोग में जो पथ्य और अपथ्य वस्तु कही हैं वे ही यहाँ भी समझनी चाहिए ॥ १३ ॥

इति श्रीसरयूप्रसादत्रिपाठिविरचितायां भैषज्यरत्नावल्या रत्नप्रभाभिधायां व्याख्यायां अचलवाताधिकारः समाप्तः।

---

## अथ खञ्जनिकाधिकारः।

खञ्जनिका का निदान।

खञ्जन्यदनसातत्यादनिलो विकृतंगतः। सक्थिखञ्जनयेद्व्याधिं घोरं खञ्जनिकाभिधम् ॥ १ ॥ खञ्जनीति द्विदलभेदः। तस्या निरन्तरभक्षणात् खञ्जनीरोगः ॥

खञ्जनी नाम की एक प्रकार की दाल होती है उसके अधिक खाने से वायु विकृत होकर ऊरुओं में खञ्जनिका नामक कष्टदायक रोग उत्पन्न करता है। ॥ १ ॥

खञ्जनी यामुने देशे बाहुल्येन प्रजायते। तस्याः समशनात् तत्र पीड्यन्ते व्याधिना जनाः ॥ २ ॥ वातामयाधिकारे या प्रोक्ता कलायखञ्जता। सैवायमिति कैश्चिद्वा कैश्चिद्वान्योऽभिमन्यते ॥ ३ ॥

खंजनी यमुनाजी के किनारे के प्रदेशों में बहुत उत्पन्न होती है। उसके खाने से मनुष्य रोग से पीड़ित हो जाता है। वातव्याधिप्रकरण में जो कलायखञ्जता नामक रोग कहा है, उसी को खञ्जनिका कहते हैं। कुछ लोग इसको अन्यरोग मानते हैं ॥ २-३ ॥

इसका अनुपशय।

शैत्येनार्द्रतया चापि व्याधिरेष विवर्द्धते। स्त्रीभ्यः पुंसामयं व्याधिर्बाहुल्येनाभिजायते ॥ ४ ॥

शीत और गीलापन (सील) में यह रोग बढ़ता है। स्त्रियों की अपेक्षा पुरुषों के ही अधिक होता है ॥ ४ ॥

खञ्जनिका के लक्षण।

सुप्तोत्थितस्योपसि जानुसन्धौ रुजा च गुर्वी च दृढा च जड्ता। ककुद्मती क्षीणबला ततो ना सोऽङ्गुष्ठमाकृष्य चलेत् मुहुर्मुहुः ॥ ५ ॥ यमस्ते जानुसन्धेश्च

जङ्घायाश्चापि शीर्णता । पादसंस्थानवैरूप्यमरतिश्चात्र संभवेत् ॥ ६ ॥

जानुओं की सन्धियाँ शून्य, भारी और दर्द युक्त रहती हैं। जाँघों में भी कठोरता, दर्द और भारीपन रहता है। मांस की गाँठ सी पड़ जाती है और बल क्षीण हो जाता है, इसलिए अँगूठे को सिकोड़कर कठिनता से चलना आता है। जानुसन्धियों में निरक्तापन, जाँघों में शिथिलता, पैरों में कुरूपता हो जाती है और बेचैनी रहती है ॥ २-६ ॥

आरोग्यमिच्छता त्याज्यं खञ्जनीद्विदलाशनम् । निदानसेविनो यस्मान्न व्याधिर्विनिवर्त्तते ॥ ७ ॥

आरोग्य की इच्छा करनेवाले को खञ्जनी (लतरी) की दाल का भोजन त्याग देना चाहिए। क्योंकि निदान (रोगोत्पत्ति के कारण-रूप अन्नपानादि) के सेवन करनेवाले के रोग निवृत्त नहीं होते हैं ॥ ७ ॥

वातघ्नं पोषणं यच्च पानमन्नं च भेषजम् । प्रयोज्यमिह तत् सर्वं विविच्य भिषजा सदा ॥ ८ ॥

खञ्जनी रोग की शान्ति के लिए वातनाशक तथा पुष्टिकारक अन्न-पान और औषधि का विचारपूर्वक प्रयोग करना चाहिए ॥ ८ ॥

बलां गन्धतृणं माषीं त्रिवृतां कटुरोहिणीम् । क्वाथयित्वा पिबेत्तोयं खञ्जन्यामयशान्तये ॥ वातामयहरं सर्पिस्तैलं चात्र प्रयोजयेत् ॥ ९ ॥

खरैंटी, गन्धतृण, माषपर्णी, निसोत और कुटकी; इनका क्वाथ बनाकर पीने से खञ्जनी रोग शान्त होता है। वातनाशक घृत और तेल भी इस रोग में प्रयोग करने चाहिए ॥ ९ ॥

खञ्जनिकारिरस ।

कुपीलुरजतायांसि संभाव्यार्जुनकारिणा । मुद्गमात्रां वटीं कृत्वा शोषयेत् सूर्यरश्मिना ॥ १० ॥ पक्षाघातं घोरतरं गदं खञ्जनिकं तथा । रसः खञ्जनिकारिराख्यो हरेदाशु न संशयः ॥ ११ ॥

इति भैषज्यरत्नावल्यां खञ्जनिकाधिकारः समाप्तः ।

---

शुद्ध कुचिला, चाँदी की भस्म और लोह की भस्म; इनको अर्जुन की छाल के जल से घोटकर मूँग के बराबर गोलियाँ बनावे और उन्हें धूप में सुखा ले। सेवन करने से यह खञ्जनारि रस पक्षाघात तथा खञ्जनिका रोग को शीघ्र हरण करता है, इसमें संशय नहीं है ॥ १०-११ ॥

इति श्रीसरयूप्रसादत्रिपाठिविरचितायां भैषज्यरत्नावल्या रत्नप्रभाभिधाया व्याख्यायां खञ्जनिकाधिकारः समाप्तः ।

---

## अथ ताण्डवरोगाधिकारः ।

ताण्डवरोग का निदान ।

अत्यासङ्गादतिक्रोधादतिहर्षाद्बलक्षयात् । कर्षणात् स्वमरोधाच्च त्रिदशन्धात् कृमिसञ्चयात् ॥ १ ॥ आशानाशादभिघातात् स्त्रीणामृतुविपर्ययात् । कशेरुकामज्जनश्चात्युग्रभावात् प्रजापते ॥ २ ॥ व्याधिस्ताण्डवनामा स प्राणिनां क्लेशकृत् परः । अङ्गानां ताण्डवादस्य ताण्डवाख्या बुधैः कृता ॥ ३ ॥ कैशोरे वयसि प्रायः स्त्रीणाञ्चापि विशेषतः । व्याधिरेषोऽजिभयेन वृद्धानाञ्च बलक्षयात् ॥ ४ ॥

अत्यन्त भय, क्रोध, हर्ष और बल के क्षय होने से तथा खींचने से, न सोने से, मलावरोध उदर में कृमि उत्पन्न होने से, आशा भङ्ग से, चोट से तथा स्त्रियों के मासिक स्राव के

गम्भनी से, करोरुका स्थित पर चोट लगने से तथा सम्प्रभाव से प्राणियों को कष्टदायक ताण्डव नाम की बीमारी उत्पन्न होती है। शरीर के अवयवों को नचाने से विद्वानों ने इसका ताण्डव नाम रक्खा है; विशेषतः स्त्रियों के किशोर अवस्था में और पुरुषों के बचपन होने पर यह बीमारी हो जाती है ॥ १-४ ॥

ताण्डवरोग का लक्षण।

वामबाहुं समारभ्य प्राय आदौ ततोऽपरम्। ततः पादौ ततोऽङ्गानि चालयेत् ताण्डवामयः ॥ ५ ॥ मुष्टिना किमपि द्रव्यं सम्यग्धारयितुं क्षमः। समर्पयितुमास्ये वाप्यद्भ्रीयं न ताण्डवी ॥ ६ ॥ नृत्यन्निव चलत्येष बीभत्सैर्मुखचेष्टितैः। अधीरः सततं तिष्ठेन्निद्रायां कम्पवर्जितः ॥ ७ ॥ बीभत्सैर्मुखचेष्टितैरुपलक्षितः ॥

ताण्डव रोगी के प्रारम्भ में बायें हाथ से प्रारम्भ करके बाद में अन्य स्थलों में, फिर पैरों में, बाद में अन्य अवयवों में चंचलता उत्पन्न होती है। किसी द्रव्य को मुष्टि से धारण नहीं कर सकता है और न अच्छी तरह मुँह में ही कोई चीज रख सकता है। नाचता हुआ सा चलता है। मुख की चेष्टा बीभत्स हो जाती है। सदैव धैर्यहीन रहता है। केवल सोते समय ही कम्प बन्द रहता है अन्यथा हर समय कांपता रहता है ॥ ५-७ ॥

बृंहणं रेचनं चैव बद्धैर्बलविवर्द्धनम्। औषधं पानमन्नं च प्रयोज्यं ताण्डवे गदे ॥ ८ ॥

ताण्डव रोग में बृंहण, रेचन और अग्नि के बल को बढ़ानेवाली औषधियों तथा अन्नपान का प्रयोग करना चाहिए ॥ ८ ॥

कृमिसञ्चयसम्भूते कार्यं कृमिविनाशनम्। रजोरोधभवे व्याधौ रजसस्तु प्रवर्त्तनम् ॥ ९ ॥

कृमियों के संचय होने से उत्पन्न ताण्डव रोग में कृमिनाशक उपाय करना चाहिए। रजोरोध के कारण हुई व्याधि में रजःप्रवर्तक औषधि देनी चाहिए ॥ ९ ॥

श्यामामनन्तां मधुकं त्रिवृतां चन्दनद्वयम्। एलाद्वयं तथा धात्रीं क्वाथयित्वा जलं पिबेत् ॥ अनेन प्रशमं याति ताण्डवाख्यो गदो ध्रुवम् ॥ १० ॥

कालीसारिवा, अनन्तमूल, मुलेठी, निसोत, सफेद चन्दन, लाल चन्दन, छोटी इलायची, बड़ी इलायची तथा आँवला; इनका काढ़ा बनाकर पीने से ताण्डव रोग निश्चय शान्त होता है ॥ १० ॥

मल्लरामठकर्पूरखर्पराद्यायो यथोत्तरम्। प्रवृद्ध चतुरादृत्या विभाव्य विजयाम्बुना ॥ ११ ॥ कुपीलुजकषायेण पार्थस्य स्वरसेन च। त्रिगुञ्जां वटिकां कृत्वा युञ्ज्यात्ताण्डवशान्तये ॥ १२ ॥

संखिया एक भाग, हींग दो भाग, कपूर तीन भाग, जसते की भस्म चार भाग और लोहभस्म पाँच भाग; इनको क्रम से भाँग के और अर्जुनवृक्ष की छाल के रस की भावना देकर तीन-तीन रत्ती की गोलियाँ बना ले। ताण्डव रोग की शान्ति के लिए इसका सेवन कराना चाहिए ॥ ११-१२ ॥

बृंहणं पानमन्नं च स्नानं स्रोतस्वती जले। शयनं क्लेशशून्यं यत् कर्म तच्चेह शर्मणे ॥ कर्णगाद्यखिलं प्रोक्तमशुभस्य पुरातनैः ॥ १३ ॥

इति भैषज्यरत्नावल्यां ताण्डवरोगाधिकारः समाप्तः।

---

इस रोग में बृंहण अन्न-पान तथा नदी में स्नान करना चाहिए। क्लेशरहित शय्या तथा

अन्य कल्याणकारी उपाय होते हैं तथा कर्षण आदि सब कार्य हानिकारक होते हैं ॥ १२ ॥

इति श्रीसरयूप्रसादत्रिपाठिविरचितायां भैषज्यरत्नावल्या रत्नप्रभाभिधायां व्याख्यायां तालुदन्तरोगाधिकारः समाप्तः ।

---

## अथ स्नायुशूलाधिकारः ।

### स्नायुशूल का स्वरूप ।

स्नायुष्वतीव या घोरा तच्छाखास्वपि वा पुनः । वेदना स्नायुशूलाख्या सा भवेत् प्राणपीडना ॥ १ ॥

शाखाओं की स्नायुओं ( नाड़ियों Nerves) में प्राणों को पीड़ा पहुँचानेवाली घोर वेदना होती है, उसे स्नायुशूल कहते हैं ॥ १ ॥

### रोग के स्थान ।

बाह्वोःशीर्ष्णस्तथा सक्थ्नोरन्यस्याङ्गस्य वा पुनः । त्वचो निम्नस्थितास्वेव वस्नसासु गदो भवेत् ॥ २ ॥ शूलोऽयं निखिलाङ्गेषु भवेत् तीव्ररुजाकरः । विशिष्टाङ्गभवस्यास्य विशिष्टाख्या च वर्तते ॥ ३ ॥ ऊर्ध्वभेदार्द्धभेदौ चाप्यधोभेदस्तथैव च । मुण्डमुण्डार्द्धकस्फिग्जगदानामभिधाः क्रमात् ॥ ४ ॥

वस्नसासु स्नायुषु

दोनों बाहु, सिर, टाँगें और दूसरे अवयवों में त्वचा के नीचे की सतह में स्थित स्नायुओं ( Nerves ) में शूल का रोग होता है। यह शूल सम्पूर्ण अवयवों में अत्यन्त कष्टदायक होता है। भिन्न-भिन्न अवयवों में होता है उन-उन अवयवों के नाम से कहा जाता है। ऊर्ध्वभेद, अर्द्धभेद, अधोभेद, मुण्डभेद, मुण्डार्द्धभेद और कटिदेशभेद से भिन्न-भिन्न नामों से प्रसिद्ध है ॥ १-४ ॥

### ऊर्ध्वभेद का निदान ।

बलरक्तक्षयाद्वापि वृक्कमस्तिष्कदोषतः । अजीर्णाद् दशनव्याधेरूर्ध्वभेदो गदो भवेत् ॥ ५ ॥

बल और रक्त के क्षय से, वृक्क और मस्तिष्क के दोष से, अजीर्ण से और दाँतों के दोष से ऊर्ध्वभेद रोग होता है ॥ ५ ॥

### ऊर्ध्वभेद के लक्षण ।

ललाटेऽक्षिपुटे निम्ने गण्डे नस्योष्ठ एव च । जिह्वापार्श्वेऽधरे दन्ते शूलवद्-दाहवच्च या ॥ ६ ॥ एकस्मिन् प्रायशः पार्श्वे वेदनामुखमण्डले । ऊर्ध्वभेदाख्यया सोक्ता गदज्ञैः क्रमर्धिनी ॥ ७ ॥

क्रमर्धिनी क्रमशोवर्द्धिनी

ललाट में, अक्षिपुटों के नीचे, गण्डस्थल में, ओष्ठ में, जिह्वा में, बगवाड़े में और दाँत में शूल और दाह की तरह वेदना होती है। एक ही पसवाड़े में, एक ही ओर मुख-मण्डल के ऊपर-नीचे के भेद से वेदना होती है, जो क्रमशः बढ़ती है ॥ ६-७ ॥

### ऊर्ध्वभेद की संप्राप्ति ।

शीतानिलस्य संस्पर्शाद् देहकम्पाच्च वर्द्धते । स्नायुभेदस्य विकृतेरङ्गभेदे भवेद् गदः ॥ ८ ॥

शीतलवायु के स्पर्श से तथा देह में कँपकँपी होने से शरीर में कोप बढ़ता है। अतः स्नायुभेद के विकृत हो जाने से विभिन्न अंगों में यह रोग होता है ॥ ८ ॥

### अर्द्धभेद का निदान ।

आर्द्रस्थानस्थितेश्चापि शीतयोगाद् गलक्षयात् । अर्द्धभेदः प्रजायेत दुष्टवाताम्बुसेचनात् ॥ ९ ॥

गीले स्थान पर रहने से, शीत के योग से, बल के क्षय से और दूषित जलवायु के सेवन

से अर्द्धभेद ( आधे अंश का शूल ) हो जाता है ॥ ९ ॥

अर्द्धभेद के लक्षण ।

यार्द्धं व्याप्य भवेत् तीव्रा वेदना मुखमण्डले । वामे च प्रायशः पार्श्वे सार्द्धभेदः प्रकीर्त्यते ॥ १० ॥ बाणेनेव शिरोविद्धं व्यथतेऽतिसुदारुणम् । कदाचित् क्रमशाल्लब्ध विरामश्चाऽत्र वा महान् ॥ ११ ॥ बाहुल्येन च नारीणां व्याधिरेष प्रजायते । प्रादुर्भावो वयःस्थस्य यौवने ह्यधिको मतः ॥ १२ ॥

अर्द्धभेद रोग से मुखमण्डल में तीव्र वेदना होती है । प्रायः बाएँ पसवाड़े में ही दर्द होता है । बाण की नोक से शिर बिंधने के समान ही अत्यन्त कष्टदायक वेदना होती है । क्रमशः यह रोग बढ़ जाता है और शान्त भी हो जाता है । विशेषरूप से यह बीमारी स्त्रियों को ही होती है । अधिकतर यौवनावस्था में ही इस रोग की उत्पत्ति होती है ॥ १०--१२ ॥

अधोभेद का निदान ।

विड् विरोधाच्छ्रमाच्छीताद् दौर्बल्यादामयाततः । आर्द्रस्थानस्थितेर्गर्भदोषात् स्यान्निम्नभेदकः ॥ १३ ॥

निम्नभेदकः अधोभेदः ।

मलावरोध से, थकावट से, शीत से, दुर्बलता से, आमवात से, आर्द्र ( गीले, नमदार ) स्थान में रहने से और गर्भ के दोष से अधोभेद रोग हो जाता है ॥ १३ ॥

अधोभेद के लक्षण ।

स्फिक्च्यूरुजानुसन्ध्योश्च पश्चिमे च क्वचित् पदे । जङ्घायां वापि यच्छूलमधोभेदः स उच्यते ॥१४॥ एकस्मिन् प्रायशः सक्थ्नि शूलोऽयं स्यान्निशाबली । बाहुल्येनैव वयसि प्रौढ एव प्रजायते ॥ १५ ॥

कमर, ऊरु, जानुसन्धि के पीछे और किसी पैर में या जाँघ में जो शूल होता है उसे अधोभेद कहते हैं । एक ही टाँग में यह शूल होता है और रात्रि में बढ़ जाता है । यह अधिकतर प्रौढ़ावस्था में ही होता है ॥ १४--१५ ॥

यदग्नेर्दीपनं किञ्चिद्यद्वा स्याद्बलवर्द्धनम् । वातानुलोमनं यच्च स्नायुशूले तदौषधम् ॥ १६ ॥

स्नायुशूल[1] (Nerves Pain ) रोग में अग्निदीपक, बलवर्द्धक और वातानुलोमक ओषधियों का सेवन कराना चाहिए ॥ १६ ॥

स्नायुशूलहरचूर्ण ।

एलाद्वयमुशीरं च चन्दनं सारिवाद्वयम् । मेदाद्वन्द्वं निशाद्वन्द्वं गुडूचीं विश्वभेषजम् ॥ १७ ॥ फलत्रयं यमानीं च रौप्यं सर्वसमं तथा । एकीकृत्य वल्लमानं पाययेद्गव्यसर्पिषा ॥ १८ ॥ स्नायुशूलहरं नाम चूर्णमेतद्धरेद्ध्रुवम् । निखिलं स्नायुशूलं च सर्वान् वातामयांस्तथा ॥१९॥

छोटी इलायची, बड़ी इलायची, खस, चन्दन, अनन्तमूल, काली सारिवा, मेदा, महामेदा, हल्दी, दारुहल्दी, गिलोय, सोंठ, त्रिफला और अजवायन तथा चाँदी की भस्म, सबको समान भाग ले एकत्र कर चूर्ण बनावे । मात्रा २ रत्ती । गौ के घृत में मिलाकर सेवन करना चाहिए । यह स्नायुशूलहर नामक चूर्ण सब प्रकार के स्नायुशूल और वातरोगों को अवश्य नष्ट करता है ॥ १७--१९ ॥

मिहिरोदय रस

माक्षिकं रजतं लौहं सिन्दूरं वह्नि-

1—Nerves का वास्तविक पर्याय वातनाड़ी है, किन्तु गलती से बंगाल में तथा उसी के अनुसार अन्य प्रान्तों में भी स्नायु शब्द प्रयुक्त लग गया है । अतः यहाँ भी स्नायुशूल नाम रक्खा है । किन्तु इसका अर्थ वातनाड़ी का विकार ( Nerves disease ) ही है ।

वारिणा । भावयित्वा विमर्द्याथ कृत्वा रक्तिमिता वटीः ॥ २० ॥ एकैकां खादयेदासां त्रिफलाम्बिरहर्मुखे । मिहिरोदयनामायं स्नायुशूलं रसो हरेत् ॥ २१ ॥

सुवर्णमाक्षिक की भस्म, चाँदी की भस्म, लोहभस्म और रससिन्दूर; इनको समभाग ले, घीकुवार के रस की भावना देकर घोट ले और एक-एक रत्ती की गोलियाँ बना ले। प्रातःकाल एक-एक गोली त्रिफला के जल से खावे। यह मिहिरोदय नाम रस स्नायुशूल को नष्ट करनेवाला है ॥ २०--२१ ॥

प्रयोज्यं दारुगरलमर्द्धभेदप्रशान्तये । विरतौ तत् प्रयोक्तव्यं न प्रकोपे कदाचन ॥ २२ ॥

देवदारु और मीठा विष का लेप करने से अर्धावभेदक ( आधाशीशी ) शान्त होती है। किन्तु लेप ऐसे समय करना चाहिए जब कि पीड़ा शान्ति पर हो। प्रकोप के समय कभी भी लेप न करना चाहिए ॥ २२ ॥

मदिरामृतसाराख्यं लौहं क्षोदः कुपीलुजः । सेव्यान्येतानि विधिना स्नायुशूलस्य शान्तये ॥ २३ ॥

मदिरा, अमृतसार लोह और शुद्ध कुचिला का चूर्ण; इनका विधिपूर्वक सेवन करने से स्नायुशूल शान्त होता है ॥ २३ ॥

स्वेदसेकप्रलेपांश्च स्नायुशूलेषु योजयेत् । तीव्रं विरेचनं चात्र विदध्यान्मलसञ्चये ॥ २४ ॥ घृततैलादिकं योज्यमनिलामयनाशनम् । स्नायुशूलेषु सर्वेषु भेषजं च रसायनम् ॥ २५ ॥

स्नायुशूल रोग में स्वेद, सेक और लेप करना चाहिए तथा मलसंचय होने पर तीव्र विरेचन देना हितकर होता है एवं वातरोगनाशक घृत और तैल स्नायुशूलों में देना चाहिए। सब स्नायुशूलों में रसायन भी देना हितकर है ॥ २४-२५ ॥

स्नायुरोग में पथ्यापथ्य ।

यत् पथ्यं यदपथ्यं च वातव्याधौ प्रकीर्त्तितम् । तथैव स्नायुशूलेषु निर्णीतं विबुधैरिति ॥ २६ ॥

वातव्याधि में जो-जो पदार्थ पथ्य तथा अपथ्य कहे गये हैं, वे ही पदार्थ स्नायुशूल में भी विद्वानों ने पथ्य और अपथ्य निश्चय किये हैं ॥ २६ ॥

कुमारीवटी ।

कुमार्यम्बुर्हेम रौप्यं हरितालं च माक्षिकम् । शतशो भावयित्वाथो गुञ्जामात्रां वटीं चरेत् ॥ २७ ॥ धात्र्यम्भसा वटी सेयं कुमारी योजिता हरेत् । स्नायुजाखिलान् रोगानग्निमान्द्यमरोचकम् ॥ २८ ॥

स्वर्णभस्म, रजतभस्म, हरतालभस्म और स्वर्णमाक्षिकभस्म; इनको समभाग ले फिर उसमें घीकुवार के रस की १०० भावना देकर एक-एक रत्ती की गोलियाँ बनावे। इसका आँवले के रस के साथ सेवन करना चाहिए। यह कुमारीवटी संपूर्ण स्नायु के रोग, अग्निमान्द्य और अरुचि को नष्ट करती है ॥ २७-२८ ॥

महारजतवटी ।

कर्षप्रमाणं रजतं मौक्तिकं स्वर्णगैरिकम् । कोलमानं तु वैक्रान्तं सिन्दूरं सशिलाजतु ॥ २९ ॥ लौहमभ्रं प्रवालं च त्रिधा चित्रकवारिणा । काकमाचीरसेनापि सप्तधा च विभावयेत् ॥ ३० ॥ गुञ्जाद्वयमितां कृत्वा वटिकां पयसा सह । प्रातः प्रातः प्रयुञ्जीत स्नायुरोगनिवृत्तये ॥ ३१ ॥

चाँदी की भस्म, मोती की भस्म और सुनहला गेरू; प्रत्येक एक-एक तोला। वैक्रान्त भस्म, रससिन्दूर, शिलाजीत, लोहभस्म, अभ्रकभस्म और मूँगा की भस्म, प्रत्येक एक-

छह मासे। सबको एकत्रकर चीता की जड़ के रस की ३ और मकोय के रस की ७ भावनाएँ देकर दो-दो रत्ती की गोलियाँ बनावे। प्रातःकाल दूध के साथ प्रतिदिन सेवन करने से स्नायुरोग विनष्ट होता है॥ २८-३१॥

स्वर्णसिन्दूर रस।

स्वर्णसिन्दूरमभ्रं च मौक्तिकं कर्षसम्मितम् । हेममाक्षिकवैक्रान्तवङ्गायांसि च पित्तलम् ॥ ३२ ॥ शिलाजतुप्रवालाब्धिफेनगुग्गुलुगन्धकान् । कोलमानेन संगृह्य भावयेद् वह्निवारिणा ॥३३॥ ततो गुञ्जाद्वयोन्मानां विधाय वटिकां भिषक् । देवदारुकषायेण प्रातः सायं च योजयेत् ॥ ३४ ॥ स्वर्णसिन्दूरसंज्ञोऽयं रसेषु प्रवरो रसः । स्नायुजान्निखिलान् रोगान् हन्ति नास्त्यत्र संशयः ॥ ३५ ॥

स्वर्णसिन्दूर, अभ्रक भस्म और मोती की भस्म एक-एक तोला, स्वर्णभस्म, स्वर्णमाक्षिक की भस्म, वैक्रान्तमणि की भस्म, वङ्गभस्म, लौहभस्म, पीतल की भस्म, शिलाजीत, प्रवालभस्म, समुद्रफेन, गुगुल और गन्धक प्रत्येक छह-छह मासे। सबको एकत्रकर चीता की जड़ के रस की भावना देकर दो-दो रत्ती की गोलियाँ बना ले। अनुपान—देवदारु का काढ़ा। रसों में श्रेष्ठ इस स्वर्णसिन्दूर रस का प्रातः और सायंकाल सेवन करने से स्नायु के सम्पूर्ण रोग निःसन्देह नष्ट होते हैं॥ ३२-३५॥

शतावरीघृत।

शतावर्या रसप्रस्थं छागीदुग्धस्य चाढकम् । घृतप्रस्थं तथैकत्र कल्कैरेभिः पचेद् भिषक् ॥ ३६ ॥ मुशाली चोरपुष्पी च विदारी चन्दनद्वयम् । शृङ्गी तामलकी द्राक्षा श्यामानन्ता निशायुगम् ॥ ३७ ॥ बलेन्द्रवारुणी रास्ना नीलिनी नीलमुत्पलम् । अभयादाडिमौ दारुनिम्बौ नागबलेति च ॥ ३८ ॥ सिद्धमेतद् घृतं हन्ति स्नायुजानखिलान् गदान् । पुष्टिं वीर्यं बलं मेधां शुभां सञ्जनयेन्मतिम् ॥ ३९ ॥

शतावरी का रस १२८ तोले, बकरी का दूध ६ सेर ३२ तोले, घृत १२८ तोले। कल्क के लिए—मुसली, चोरपुष्पी, विदारीकन्द, लाल चन्दन, सफेद चन्दन, काकड़ासिंगी, भुईं आँवला, मुनक्का, काली सारिवा, अनन्तमूल, हल्दी, दारुहल्दी, बरियारा (खरैंटी), इन्द्रायण, रास्ना, नील की जड़, नील कमल, हड़, अनार, देवदारु, नीम की छाल और गंगेरन; सब मिलित ३२ तोले। विधिपूर्वक घृत सिद्धकर सेवन करे, तो यह घृत स्नायु के सम्पूर्ण रोगों को नष्ट कर पुष्टि, वीर्य, बल और शुभ बुद्धि को देनेवाला है। मात्रा—६ मासे से १ तोला तक॥३६-३९॥

सुरवल्लभतैल।

दशमूलं कणा शुण्ठी शटी रास्ना त्रिवृत्फला । अश्वगन्धा तुगाक्षीरी त्रिफला त्रिपत्रवासकौ ॥ ४० ॥ जयन्ती हस्तिशुण्डी च मूर्वा कुटजदाडिमौ । इत्येभिर्विपचेत् कल्कैस्तैलं तिलसमुद्भवम् ॥ ४१ ॥ अश्वगन्धाकषायेण छागेन पयसा तथा । गन्धद्रव्यैश्च निखिलैर्मन्दमन्देन वह्निना ॥ ४२ ॥ सुरवल्लभनामेदं तैलं स्नायुविकारान् गदान् । वातपित्तकफोत्थांश्च निहन्त्यात्र संशयः ॥ ४३ ॥

इति भैषज्यरत्नावल्यां स्नायुरोगाधिकारः समाप्तः ।

---

दशमूल, पीपरि, सोंठ, कचूर, रास्ना, निसोथ, खरैंटी, असगन्ध, वंशलोचन, त्रिफला, बेलगिरी, अडूसा, जयन्ती, हस्तिशुंडा, मूर्वा, कुड़ा की छाल और अनार; सब मिलित काथ सेर लेकर कल्क बनावे। तिल का तेल १२८

तोले, असगन्ध का काढ़ा ५ सेर १२ तोले; बकरी का दूध ५ सेर १२ तोले। यथाविधि मन्दाग्नि से तैल का पाक करे और अनुमान से सब गन्ध द्रव्यों का प्रक्षेप देकर उतार ले और ठंढा करके छानकर रख ले। यह सुरवल्लभ नाम तैल मालिश करने से स्नायु के तथा वात, पित्त और कफ के रोगों को नष्ट करता है, इसमें सन्देह नहीं है॥ ४०—४३॥

इति श्रीसरयूप्रसादत्रिपाठिविरचितायां भैषज्यरत्नावल्या रत्नप्रभाभिधायां व्याख्यायां स्नायुशूलाधिकारः समाप्तः।

---

## अथ स्खालित्याधिकारः।

### स्खालित्य का निदान।

स्नायूनां बलनाशाच्च वातस्यातिप्रकोपणात्। कर्म्मणश्चातिसातत्यात् स्खालित्यं खनुजायते॥ १॥ स्त्रीभ्यः पुंसामयं व्याधिर्यौवनात् परतस्तथा। बाहुल्येनाभिजायेत सद्भिरेवं निरूपितम्॥ २॥

स्नायुओं (Nerves नाड़ियों) के बल नाश से, वायु के अति प्रकोप से तथा काम की अधिकता से स्खालित्य रोग उत्पन्न होता है। स्त्री और पुरुषों के यौवनावस्था के अंत आने पर ही यह रोग विशेष रूप से होता है॥१-२॥

### स्खालित्य के लक्षण।

शान्तिर्भारस्य हस्तस्य जायते तदनन्तरम्। अंगूल्याः स्खलनाद्वानिर्भवेदारब्धकर्म्मणः॥ ३॥ लेखनेऽक्षरदोषः स्याद् वाद्ये तालव्यतिक्रमः। प्रयत्नादपि दौर्ग्धा गो दौर्ग्धुं प्रभवेद् न नार्हति॥४॥ स्खालित्यं मुषिरं यस्य विद्यते व्यवसायिनः। दृढं धारयितुं द्रव्यं न मदाप्नोति मुष्टिना॥ ५॥

इस रोग में हाथ का कम्पन शान्त नहीं रहता है। अँगुलियाँ हिलती हैं और कार्य करने की शक्ति क्षीण हो जाती है। लिखने में अक्षर दूषित (असुन्दर) आते हैं तथा बाजा बजाने में ताल उलटी हो जाती है। जिस व्यवसायी के स्खालित्य पुराना हो जाता है वह स्वीय वस्तु को दृढ़तापूर्वक मुट्ठी में धारण नहीं कर सकता है॥ ३—५॥

स्वकर्मणो निवृत्तिर्हि स्खालित्ये खलु भेषजम्। कटुतिक्तकषायैः किं किं पथ्यस्य च सेवया॥ ६॥

अपने कार्य से निवृत्त हो जाना ही स्खालित्य की औषधि है। कटुए, तीखे और कषैले पदार्थों से ही क्या है और पथ्य सेवन से ही क्या है। तात्पर्य यह कि यदि रोगी अपने कार्य से निवृत्त न होगा, तो अपथ्य के परित्याग और पथ्य वस्तु के सेवनमात्र से कोई लाभ नहीं हो सकता है॥ ६॥

तिमिङ्गिलगिलस्नेहः सप्ताहं परियोजितः। स्खालित्यं नाशयेद् मक्षन् स्नेहः शौकर एव वा॥ ७॥

एक सप्ताह तिमिंगिलगिल नामक महामत्स्य की चर्बी के (आजकल Cod liver oil काड-लीवर आइल के) प्रयोग से अथवा सूकर की चर्बी के प्रयोग से स्खालित्य रोग दूर हो जाता है॥ ७॥

### आदित्यपाक तैल।

बला रास्नाश्वगन्धा च जीवकर्षभकौ धरा। जयन्ती मधुयष्टिश्च त्रिफला लवणपञ्चकम्॥ ८॥ एलाद्वयं मुरामांसी देवपुष्पं सरोरुहम्। केशरं नलिका कुष्ठं गुग्गुली चन्दनद्वयम्॥ ९॥ प्रत्येक कार्षिकं तैले क्षिप्त्वा मध्यमभाजने। मासान् षट् स्थापयेद् गूढ्वा तत्पात्रं सूर्यरश्मिषु॥ १०॥ ततः कल्कान् समुद्धृत्य तैलमेतत्

प्रयोजयेत् । अनेन प्रशमं यान्ति स्खालित्यप्रमुखा गदाः ॥ ११ ॥

खरैटी, रास्ना, असगन्ध, जीवक, ऋषभक, शतावरी, जयन्ती, मुलेठी, निसोत, पाँचों नमक, बड़ी इलायची, छोटी इलायची, जटामांसी, लौंग, कमल, नागकेशर, नालिका (सुगन्धि द्रव्य मूँगा के आकार का), कूट, मुसली, सफेद चन्दन, लाल चन्दन; प्रत्येक एक-एक तोला लेकर कल्क बनावे और १२८ तोले तिल के तैल में डालकर पात्र का मुख बन्द करके छह महीने तक सूर्य के धूप में धरा रक्खे। पश्चात् छानकर कल्क अलग कर दे और तेल को प्रयोग में लावे। इस तेल से स्खालित्य आदिक रोग शान्त हो जाते हैं ॥ ८--११ ॥

स्खालित्यारिरस ।

रौप्यमभ्रं तुत्थकं च मर्दयेत् कन्यकाम्भसा । मुद्गमात्रां वटीं कृत्वा पाययेत् सह सर्पिषा ॥ १२ ॥ स्खालित्यारी रसो नाम स्खालित्यं स्नायुजं गदम् । वातश्लेष्मोद्भवांश्चापि फिरङ्गं रोगमेव च । पेयादोषानुपानेन शीघ्रमेव निवारयेत् ॥ १३ ॥

चाँदी की भस्म, अभ्रकभस्म और तूतिया; इनको समभाग ले घीकुवार के रस में घोटकर मूँग के बराबर गोलियाँ बनावे और घृत के साथ इसका सेवन करावे। दोषानुसार अनुपान से यह स्खालित्यारि रस स्नायु से उत्पन्न स्खालित्य रोग, कफ वातजन्य रोग तथा फिरंग रोग को शीघ्र निवारण करता है ॥ १२--१३ ॥

स्खालित्य में पथ्य ।

भेषजान्यत्र योज्यानि वातव्याधिहराणि च । पथ्यमत्र विजानीयाद् द्रव्यं पुष्टिबलप्रदम् ॥ १४ ॥

इतिभैषज्यरत्नावल्यां स्खालित्याधिकारः समाप्तः ।

---

इस रोग में वातरोगनाशक औषधियों का प्रयोग करना चाहिए तथा पुष्टि और बलकारक द्रव्य पथ्य में देना चाहिए ॥ १४ ॥

इति श्रीसरयूप्रसादत्रिपाठिविरचितायां भैषज्यरत्नावल्या रत्नप्रभाभिधायां व्याख्यायां स्खालित्याधिकारः समाप्तः ।

---

## अथ हृक्कामयाधिकारः ।

हृक्कामय का पूर्वरूप ।

त्वग्रौक्ष्यं वेगवती धमनी कठिना तथा । निद्रानाशो वह्निमान्द्यं शोथोऽङ्घ्रिषु च मुखे पदे ॥ हृक्कामयस्य पूर्वाणि रूपाण्याहुर्भिषग्वराः ॥ १ ॥

वृक्करोग उत्पन्न होने से पहिले त्वचा में रूखता और उष्णता आ जाती है, नाड़ी वेगवती और कठोर हो जाती है। नींद नष्ट और अग्नि मन्द हो जाती है। आँख, मुख और पैरों में सूजन हो जाती है ॥ १ ॥

वृक्कामय का लक्षण ।

रक्ताल्पत्वान्मुखस्य स्यात् पाण्डुत्वं कटिवेदना । त्वक् शुष्का स्वेदहीना च धमनी द्रुतगामिनी ॥ २ ॥ वह्निमान्द्यमजीर्णश्च भक्तद्वेषो व्यथोदरे । अम्लोद्गारस्तथा छर्दिर्हृद्द्वेषः श्वासकृच्छ्रता ॥ ३ ॥ मूत्राल्पत्वं सदा वेगो विशेषान्निशि जायते । मूत्रकाले च शिश्नाग्रे मनाग्दाहोऽनुभूयते ॥ ४ ॥ हृक्कयोर्विकृतिश्चास्मिन् विशेषाज्जायते गदे । यकृत्प्लीहहृदाञ्चापि सा सदैव प्रजायते ॥ ५ ॥ कर्णनादो दृष्टिदोषः शिरोग्रीवांसवेदना । शाखासु गौरवं मूर्च्छा हृक्करोगस्य लक्षणम् ॥ ६ ॥

रुधिर की कमी से मुख पर पीलापन, कमर में दर्द, त्वचा सूखी और पसीना रहित, नाड़ी की तीव्र गति, अग्निमान्द्य, अजीर्ण, भोजन में अरुचि, पेट में दर्द, खट्टी-खट्टी डकारें आना,

वमन, हृत्कंप और श्वास लेने में कष्ट होता है। मूत्र कम होता है, किन्तु वेग सदैव बना रहता है। विशेषतः रात्रि के समय और पेशाब त्यागते समय शिश्नेन्द्रिय के अग्रभाग में किञ्चित् दाह होता है। इस रोग में अधिकतर गुर्दों में विकार हो जाता है तथा यकृत् प्लीहा और हृदय में भी विकार हो जाता है। कर्णनाद ( कान गूँजना ), दृष्टि विकार, शिर, ग्रीवा और कंधों में वेदना, शाखाओं ( हाथ-पैरों ) में भारीपन और मूर्छा हो जाती है। ये सब वृक्करोग के लक्षण हैं ॥ २—६ ॥

यन्मूत्रलं शोणितशोधनं च यत्पोषणं वह्निविवर्द्धनं च। वृक्कस्य रोगे परियोजयेत्तद् व्याधिर्बलं वीक्ष्य भिषग् विधिज्ञः ॥ ७ ॥ रसो विवर्द्धयेत् व्याधिमतस्तं नेह योजयेत् ॥ ८ ॥

विधि का जाननेवाला वैद्य वृक्करोग में व्याधि के बल का विचार करके मूत्रकारक, रक्तशोधक, पुष्टिकारक और जठराग्नि को बढ़ानेवाली औषधि की योजना करे। पारद व्याधि को बढ़ाता है, अतः वृक्करोग में इसका प्रयोग न करना चाहिए ॥ ७—८ ॥

सर्वतोभद्रवटी।

हेमरौप्याभ्रलौहानि जतु गन्धं च माक्षिकम्। वटीं रक्तिमितां कुर्याद्विमर्द्य वरुणाम्भसा ॥ ९ ॥ वटीयं सर्वतोभद्रा निखिलान् वृक्कजान् गदान्। हरेद्वस्तिभवांश्चापि बलं वीर्यं च वर्द्धयेत् ॥ १० ॥

स्वर्णभस्म, रजतभस्म, अभ्रकभस्म, लोहभस्म, लाख गन्धक और स्वर्णमाक्षिक भस्म, इनको समभाग एकत्र कर वरना की छाल के क्वाथ से घोटकर एक-एक रत्ती की गोलियाँ बनावे। यह सर्वतोभद्रवटी वृक्क से उत्पन्न हुए संपूर्ण रोगों को तथा वस्ति के रोगों को नष्ट कर बल और वीर्य की वृद्धि करती है ॥ ९—१० ॥

माहेश्वरवटी।

हेममुक्ताभ्रकांक्षीकक्षीरकाकोल्यांभिच। कान्तं महाबलामूलं गृहीत्वा समभागिकम् ॥ ११ ॥ शुष्कमूलकगोक्षुरौ तथा श्वेतपुनर्नवा। एषां क्वाथेन विधिवद् भावयेत् सप्तधा भिषक् ॥ १२ ॥ रक्तिद्वयमिता सेव्या वटी माहेश्वराभिधा। श्रेयं विशेषतश्चात्र शस्तं दुग्धान्नभोजनम् ॥ १३ ॥ पाण्डुं वृक्कामयं चैव शोथं सर्वाङ्गिकं तथा। जलोदरं तथा मोहं विषमज्वरमेव च ॥ अस्याः प्रयोगान्नश्यन्ति भास्करस्तिमिरं यथा ॥ १४ ॥

स्वर्णभस्म, मुक्ताभस्म, अभ्रकभस्म, कांक्षीक ( शुद्ध फिटकरी ), क्षीरकाकोली, लौहभस्म, कान्तलौहभस्म और सहदेई की जड़; इनको समभाग लेकर सूखी मूली, गोखरू और सफेद सांठी के काढ़े की पृथक्-पृथक् सात भावना देकर दो-दो रत्ती की गोलियाँ बना ले। इस माहेश्वरवटी का सेवन करते समय विशेषकर दुग्ध और चावल का भोजन कल्याणकारक होता है। इस माहेश्वरवटी के प्रयोग से पाण्डुरोग, वृक्करोग, सर्वांग शोथ, जलोदर, मोह और विषमज्वर इस प्रकार नष्ट होते हैं जैसे सूर्य से अन्धकार नष्ट होता है ॥ ११-१४ ॥

रसायनाधिकारोक्तान्यौषधान्यपि योजयेत्। न चास्ति शमने किञ्चिन्निर्दिष्टमस्य भेषजम् ॥ १५ ॥ पथ्यैर्बल्यैः सुपाच्यैश्च भिषगेनं मपाययेत् ॥ १६ ॥

इति भैषज्यरत्नावल्यां वृक्कामयाधिकारः समाप्तः।

रसायन के अधिकार में कही गई औषधियों का भी इस रोग में प्रयोग करना चाहिए। क्योंकि इस रोग को शमन करनेवाली कोई खास औषधि नहीं है। बलकारक तथा अच्छे प्रकार पचनेवाले पथ्य वृक्करोगवाले को देना चाहिए ॥ १५-१६ ॥

इति श्रीसरयूप्रसादत्रिपाठिविरचितायां भैषज्यरत्नावल्यां रत्नप्रभाभिधायां व्याख्यायां वृक्कामयाधिकारः समाप्तः।

### अण्डाधारगद का निदान ।

रमणातिशयाच्छैत्यादभिघाताद्विषादपि । अण्डाधारगदः कृच्छ्रो जायते चाहिताशनात् ॥ १ ॥

अत्यंत सम्भोग करने से, शीत से, चोट लगने से, विष से और अपथ्य के सेवन से कष्टदायक अण्डाधारगद नामक रोग हो जाता है ।

### अण्डाधारगद के लक्षण ।

उदरोरुव्यथा कृच्छ्रा मूत्रस्याल्पत्वरक्तते । ज्वरारोचनहृल्लासा अरतिर्बलसंक्षयः ॥ २ ॥ धमनी वेगिनी क्षुद्रा जिह्वा रक्तोज्ज्वला तथा । अण्डाधारगदस्यैताः प्रोक्ता आकृतयो बुधैः ॥ ३ ॥

उदर और ऊरुओं में दर्द, मूत्र का थोड़ा और कष्टसहित रुधिर मिला हुआ उतरना, ज्वर, अरुचि, हृल्लास, बेचैनी, बलक्षय, नाड़ी की गति कभी तीव्र और कभी मन्दी तथा जीभ उज्ज्वल और लाल रंग की हो जाती है । ये अण्डाधार रोग के लक्षण बुद्धिमानों ने कहे हैं ॥ २-३ ॥

### अण्डाधारगद की चिकित्सा ।

श्लेष्मवर्द्धकं यच्च पवनस्यानुलोमनम् । अण्डाधारगदे तच्च प्रयोक्तव्यं भिषग्वरैः ॥ ४ ॥

श्रेष्ठ वैद्यों को अण्डाधार रोग में वायु का अनुलोमन करने वाली तथा श्लेष्मवर्द्धक चिकित्सा करनी चाहिए ॥ ४ ॥

### पटोलादि क्वाथ ।

पटोलं मधुकं द्राक्षां धन्याकं विश्वभेषजम् । पीतमूलीं बलां रास्नां मूर्वामिन्द्रयवं विडम् ॥ ५ ॥ कणाद्वन्द्वं निशाद्वन्द्वमिन्द्रपुष्पं त्रिजातकम् । क्वाथयित्वा पिबेत्तोयमण्डाधारगदे सदा ॥ ६ ॥ विषञ्च मधुना ह्येयमण्डाधारगदे हितम् ७

परवल, मुलेठी, दाख, धनियाँ, सोंठ, गाजर, खरेटी, रास्ना, मूर्वा, इन्द्रजौ, वायविडङ्ग, पीपल, गजपीपल, हल्दी, दारुहल्दी, लौंग, और त्रिजातक, इन सबको समान भाग लेकर क्वाथ लेकर पिलाने से अण्डाधारगद में लाभ होता है । विष ( मीठा शुद्ध सिंगिया ) को शहद के साथ चाटने से भी लाभ होता है ॥ ५-७ ॥

### योषिद्वल्लभरस ।

सिन्दूरमभ्रं रौप्यञ्च वैक्रान्तं हेमटङ्कनम् । वराम्भसा भावयित्वा वल्लमात्रां वटीश्चरेत् ॥ ८ ॥ योषिद्वल्लभनामायं रसोऽण्डाधारसम्भवान् । निहन्ति निखिलान् रोगान् दर्पघ्नो हरिणानिव ६

रससिन्दूर, अभ्रक, चाँदी, वैक्रान्त और स्वर्ण की भस्म तथा सुहागा को समान भाग लेकर त्रिफला के क्वाथ से भावना देकर दो दो रत्ती की गोलियाँ बनावे । यह योषिद्वल्लभ नामक रस अण्डाधारगद से उत्पन्न समस्त विकारों को नष्ट करता है ॥ ८-९ ॥

### चन्दनाद्य चूर्ण ।

चन्दनद्वितयं मूर्वां नीलिन्येलाद्वयं मुरा । कणाद्वयं त्रिवृद्द्राक्षा मांसी मधुकमुस्तकम् ॥ १० ॥ एतत् सर्वं चूर्णयित्वा डिम्बाधारगदापहम् । उष्णेन पयसा नारी पिबेन्नित्यं सुखार्थिनी ॥ ११ ॥

दोनों चन्दन, मूर्वा, नील की जड़, दोनों इलायची, मुरामांसी, पीपल, गजपीपल, निसोथ, दाख, जटामांसी, मुलेठी और मोथा सबको चूर्ण करके गरम दूध के साथ सेवन करने से स्त्रियों का

डिम्बाधारगद (पुरुष के अण्डाधार गद के समान ही) रोग अच्छा हो जाता है ॥ १०-११ ॥

पथ्यापथ्य।

पथ्यमत्र हविर्दुग्धं शालिः मरनो यव-स्तिलः। छागमांसरसश्चैव द्रव्यमुग्रं न शर्म्मणे ॥ १२ ॥

घी, दूध, शालि चावल, पुराने यव, तिल और बकरे के मांस का रस पथ्य है तथा उग्र और (उत्तेजक) द्रव्य सुखदायक नहीं है ॥ १२ ॥

## मस्तिष्कचयापचयाधिकारे

मस्तिष्कचयापचय का निदान और लक्षण।

देहस्वभावाद् दिष्ट्या च वर्द्धते मस्तुलुङ्गकः। करोटिरपि बालानां यूनाञ्चापि कदाचन ॥ १ ॥ मस्तिष्कस्य करोटेश्च यदि वृद्धिर्द्वयोर्भवेत्। न चिह्नं दृश्यते किञ्चित् सामयशः समवर्द्धनात् ॥ २ ॥ मस्तिष्कस्यैव चेद्वृद्धिर्न करोटेस्तथा भवेत्। सदा निपीडनात् तस्य जायन्ते विविधा रुजः ॥ २ ॥ शिरसोऽतिरुजा तीव्रा दौर्बल्यं भ्रममूर्च्छने। पक्षाघातस्तथाक्षेपस्ततो मरणमेव च ॥ ३ ॥ ह्रासमायाति मस्तिष्कं देहदोषाद्दरयः। एकपार्श्वे ऽसेव तच्चेन्न शीघ्रं जीवनक्षयः ॥ समन्ताद्ध्रसनात् तस्य मारणान्तस्त्वरया भवेत् ॥ ४ ॥

शरीर के स्वभाव से ही मस्तिष्क का मस्तुलुङ्ग बढ़ता है इससे बच्चों की करोटियाँ (खोपड़ी की हड्डियाँ) भी बढ़ती हैं। कभी-कभी जवानों की भी बढ़ जाती हैं। मस्तिष्क और करोटि दोनों की वृद्धि साथ-साथ होती है तो समवर्द्धन के कारण किसी प्रकार के चिह्न मालूम नहीं देते हैं। यदि मस्तिष्क की वृद्धि न होकर करोटि (खोपड़ी की हड्डियों का ढाँचा) ही बढ़ती है तो उसके पीड़न से अनेक रोग हो जाते हैं। शिर में अत्यन्त तीव्र शूल, दुर्बलता, भ्रम, मूर्च्छा, पक्षाघात तथा आक्षेप आदि उपद्रव होकर मृत्यु भी हो जाती है। भाग्यवश देह दोष से मस्तिष्क का नाश होने लगता है। जिसका मस्तिष्क एक तरफ से ही नष्ट होने लगता है उसका जीवनक्षय शीघ्र नहीं होता है। जिसका मस्तिष्क दोनों ओर से समान रूप से क्षय होने लगता है वह रोगी शीघ्र मर जाता है ॥ १-४ ॥

मस्तिष्क वृद्धि की चिकित्सा।

मस्तुलुङ्गस्य संवृद्धिर्जायते मरणाय हि ॥ ६ ॥ नौषधं तत्र चेत् सेव्यं तथापि च रसायनम्। पेयमत्र पञ्चगव्यं घृतं मधुयुतं तथा ॥ ७ ॥

मस्तुलुङ्ग की वृद्धि रोगी की मृत्यु के लिए ही होती है, उसकी कोई औषध नहीं है तो भी रसायन औषधों का सेवन करना चाहिए। इस रोग में पञ्चगव्य तथा घृत का शहद के साथ सेवन करना लाभदायक है ॥ ६-७ ॥

मस्तिष्क ह्रास की चिकित्सा।

मस्तिष्कस्य यदि ह्रासो मरणायैव जायते। तथाप्यत्र सदा सेव्यं भेषजं परिबृंहणम् ॥ ८ ॥

मस्तिष्क का क्षय तो मृत्यु के लिए ही होता है तो भी सदैव रसरक्त आदि धातुओं की वृद्धि करनेवाली बृंहण औषधि का सेवन करना चाहिए ॥ ८ ॥

चन्दनादि क्वाथ।

चन्दनद्वितयं मूर्वा श्यामाऽनन्ता निशाद्वयम्। लाक्षा ब्राह्मी गैरिकञ्च जीवन्ती मधुकं वरी ॥ ९ ॥ वाजिगन्धा वचा कृष्णा काकोली जीवकर्षभौ। क्वाथमेषां पिबेत् मातर्मस्तिष्कह्रासशान्तये ॥ १० ॥ अत्र बालामयोक्तानि तैलानि च घृतानि

च। अपस्मारगदोक्तानि तथा सेव्यानि सर्व्वदा ॥ ११ ॥ मस्तिष्कस्य चये ह्रासे देहस्य पोषणं लघु। पानमन्नं सुखाय स्यात्तद्विपरीतं न शर्म्मणे ॥ १२ ॥

दोनों प्रकार के चन्दन, मूर्वा दोनों प्रकार की शारिवा, दोनों हलदी ( हल्दी, दारुहल्दी ), खस, वंशलोचन, गेरू, जीवन्ती, मुलेठी, शतावरी, असगन्ध, वच, पीपल, काकोली, जीवक और ऋषभक, इन सबका क्वाथ करके प्रातःकाल पीने से मस्तिष्क का ह्रास शान्त हो जाता है। यहाँ वातविकार को शान्त करनेवाले तैल और घृत तथा अपस्मारनाशक औषधियाँ प्रयुक्त करना चाहिए। मस्तिष्क की वृद्धि और ह्रास के लिए देह को पुष्ट करनेवाला, हलका आहार देना लाभदायक है। इसके विपरीत अपथ्य है ॥ ९-१२ ॥

---

## मस्तिष्कवेपनाधिकारे

मस्तिष्कवेपन का निदान और लक्षण।

शिरस्यभिहते तैस्तैर्मूर्च्छाहृल्लासवान्तयः। अङ्गत्वं स्पन्दनह्रासो दौर्बल्यं चलचित्तता ॥ १ ॥ वेपथुः कर्णनादश्च मलिनत्वं मुखस्य च। पृथुत्वं तारकायाश्च धमनी चलवर्जिता ॥ २ ॥ शीतलत्वं शरीरस्य वैकृत्यं वचनस्य च। तथा पक्षवधं स्याच्च गदोऽसौ शीर्षवेपनः ॥ ३ ॥

शिर पर चोट लगने से मूर्च्छा, उबकाई, वमन, जड़ता, स्पन्दन की कमी, दुर्बलता, चित्त की चंचलता, कम्प, कर्णनाद ( कानों में शब्द गूँजना ), मुख की मलिनता, आँख की पुतलियों का फैल जाना, नाड़ी का सीधा होना, शरीर का शीतल होना, अच्छे प्रकार बोला न जाना, तथा पक्षाघात होना आदि अनेक शीर्षवेपन रोग में होते हैं ॥ १-३ ॥

शिर काँपने की चिकित्सा।

मनःस्थैर्य्यकरं कर्म्म कार्यं मस्तिष्कवेपने। शिरस्युष्णेऽतिशीतेन तोयेन सेचनं हितम् ॥ ४ ॥ मस्तिष्कवेपनध्वंसि दन्तीस्नेहेन रेचनम्। सबला बललाभाय मृतसञ्जीवनीसुधा ॥ ५ ॥ प्रयोक्तव्या यथामात्रं बल्यमन्यच्च भेषजम्। वह्न्युष्मणा हरेच्छैत्यमङ्गानां कुशलो भिषक् ॥ ६ ॥ त्रिवृतां स्वर्णपत्रीञ्च मुस्तकं मधुकं बलाम्। हरिद्रे द्वे नागरञ्च त्रिफलां कटुरोहिणीम् ॥ ७ ॥ क्वाथयित्वा प्रयोक्तव्यं शीर्षवेपनशान्तये। बलाक्वाथेन सिन्दूरं शीर्षवेपथुनाशनम् ॥ ८ ॥ वातव्याधिहरं सर्व्वं भेषजं तस्य शान्तिकृत् ॥ ९ ॥

मस्तिष्कवेपन में मन को स्थिर करनेवाले कर्म करने चाहिए। शिर गर्म रहता हो तो शीतल जल शिर पर डालना चाहिए। मस्तिष्ककम्पन को दूर करने के लिए दन्तीस्नेह ( जमालगोटा का तैल ) से विरेचन करना चाहिए। बल देने के लिए अभ्रकयुक्त मृतसंजीवनी सुधा का सेवन कराना चाहिए। उचित मात्रा में अन्य बलदायक औषध भी देनी चाहिए। शरीर की शीतलता को दूर करने के लिए अग्नि की ऊष्मा से भी काम लेना चाहिए, अर्थात् सेंक देना चाहिए। निशोथ, सनाय, मोथा, मुलेठी, खरेटी, दोनों हल्दी, सोंठ, त्रिफला, कुटकी इन सबको समभाग मिलाकर क्वाथ करके सेवन करने से शीर्षकम्प शान्त हो जाता है। खरेटी के क्वाथ के साथ रससिन्दूर का सेवन करने से शिर-कम्प रोग नष्ट होता है वातव्याधिनाशक सम्पूर्ण औषधियाँ भी इस रोग में लाभदायक हैं ॥ ४-९ ॥

पथ्यादि व्यवस्था।

पयोमांसरसाद्यञ्च स्नायूनां बलवर्द्धनम्। अन्नपानादिकं पथ्यं मुख्यं स्यादु सारकम् ॥ १० ॥ शीर्षवेपथुरोगिभ्यो

हितं तन्निखिलं मतम्। विपरीतं विजानीयात् कदाचन न शर्म्मदम् ॥ ११ ॥

दूध, मांसरस, स्नायुओं ( Nerves ) को बलदायक, अन्नपान तथा स्वादिष्ट, दस्तावर, पाचक आहार शीर्षकम्प के रोगी को लाभदायक हैं। इसके विपरीत आहार अपथ्य हैं ॥ १०-११ ॥

## वेपथुवाताधिकारे

वेपथुवात का निदान।

वातप्रकोपिपानान्नैर्जरसा सुरयातथा।
कशेरुमज्जरोगाच्च वेपथ्वनिलसम्भवः ॥१॥

वात को कुपित करनेवाले अन्नपान से, बुढ़ापे से, शराब से, वातजन्य और कशेरुमज्जा के रोग से वातजन्य वेपथु रोग उत्पन्न होता है ॥ १ ॥

वेपथु वात के लक्षण।

आदौ हस्तं समारभ्य कदाचिद्वापि मस्तकम् भ्रमात् कृच्छ्रतरः सर्व्वं देहं व्याप्नोति वेपथुः ॥ २ ॥ स नाशक्नोति सम्यञ्च् न चलितुश्चामितः पतेत्। गच्छेच्चातिद्रुतमिव निद्रितोऽपि च वेपते ॥ ३ ॥ नाहारं भक्षयेत् सम्यग्वक्त्रकापोभवत्यपि। चिबुकञ्च समारोप्य वक्षोऽप्यन्यथतिष्ठते ॥ धृताङ्गः कम्पते चापि न शक्नोत्यपि भाषितुम्। ततो बहुप्रलापश्च चेतनापरिवर्जितः ॥ ४ ॥ स्वयं प्रवृत्तविण्मूत्रः श्वासी प्राणांस्त्यजत्यपि। अतोऽयं दारुणो व्याधिर्नोपेक्ष्यो जीवनैषिणा ॥ ६ ॥

आरम्भ में हाथ या मस्तक से शुरू होकर सम्पूर्ण देह में चक्कर-सा आकर कम्प शुरू होता है। इससे रोगी अच्छी तरह चल नहीं सकता है और गिर जाता है। चलता है तो तेज चलता, सोते समय भी काँपता रहता है। अच्छी तरह भोजन भी नहीं कर सकता, क्योंकि शरीर तिरछा हो जाता है। चिबुक छाती से टिक जाती है, तब शरीर काँपने लगता है जिससे अच्छी तरह बोल भी नहीं सकता। ज्ञानशक्ति लुप्त होने से बहुत प्रलाप करता है। मल-मूत्र की प्रवृत्ति स्वतः हो जाती है। श्वास होकर प्राणनाश हो जाता है। इसलिए जीवित रहने की इच्छा करनेवाले व्यक्ति को इस भयानक बीमारी की लापरवाही नहीं करनी चाहिए ॥ २-६ ॥

वेपथुवात की चिकित्सा।

बृंहणं भेषजं सर्व्वं ज्ञेयं वेपथुवातकृत्। वातव्याधिहरं तैलं घृतञ्च निखिलं हितम् ॥ ७ ॥ वातव्याधिषु यत्पथ्यं यदपथ्यञ्च कीर्तितम्। ज्ञेयं वेपथुवाते तत् पथ्यञ्चापथ्यमेव च ॥ ८ ॥

रसरक्तादि धातुवर्धक सब औषधें वेपथुवातनाशक हैं। सम्पूर्ण वातव्याधिनाशक तैल और घृत भी इसे नष्ट करते हैं। वातव्याधि में जो पथ्य कहा है वह तो इसके लिये पथ्य है और जो अपथ्य कहा है वह अपथ्य है ॥ ७-८ ॥

## ओजोमेहाधिकारे

ओजोमेह रोग का निदान और लक्षण।

अभिघाताग्निमान्द्यामवाताजीर्णविसूचिका। विषमज्वरशोथार्शोयक्ष्मकासादिभिस्तथा ॥ १ ॥ वृक्कयोः शोणितस्रोतो विकृतेरसदोषतः। लसिकाशुक्रपूयासृक् शुक्रे मूत्रे तथा नृणाम् ॥ २ ॥ स्त्रीणां गर्भागमे चैव वहुक्षारवर्जितैः। मधुरोजस्करद्रव्यमक्षणैरतिमात्रतः ॥ ३ ॥ गुरुपर्युषितान्नाञ्च भोजनादतिभोजनात्। नवधान्यादिगोधूमहंसडिम्बातिसेवनात् ॥

दूषिते शीतले तोये स्नानपानावगाहनात्। एभिर्निदानैरन्यैश्च दूषितादोजसो भवेत् ॥ ५ ॥ ओजोमेहः स विज्ञेय आयुर्बल-निकृन्तनः। शारीरिकश्रमवशात् तथान्येनैव हेतुना ॥ ६ ॥ द्रुतं शोणितसञ्चारात् प्रकृतेरथ विपर्ययात्। ओजोविकृतिमापन्नं हंसाण्डश्वेतभागवत् ॥ ७ ॥ पिष्टतण्डुलवद्वाथ सहमूत्रेण संस्रवेत्। मेदःक्षयो भवेत्तत्र ज्वरारोचकयोस्तथा ॥ ८ ॥ शोथेऽग्निमान्द्ये सञ्जाते गदोऽसाध्यो न संशयः। अन्यथा कृच्छ्रसाध्योऽसौ यत्नात् जीवति मानवः ॥ ९ ॥

ओज से मदात्यय, आमवात, अजीर्ण, विसूचिका, विषमज्वर, शोथ, यक्ष्मा, खाँसी आदि रोगों के कारण दोनों गुर्दों के रक्तस्रोतों की विकृति से और रक्तशोष से मनुष्यों के खासिका, वीर्य पूय और रक्तयुक्त मूत्र उतरता है। स्त्रियों के गर्भावस्था में कटुरस और क्षाररहित, मधुर और ओजकारक द्रव्यों के अत्यन्त सेवन से, भारी, बासी भोजन और अतिभोजन से यह रोग होता है। नवीन अन्न, गोधूम, हंस ( बतक ) के अण्डों के अधिक सेवन से, दूषित, शीतल जल के स्नान-पान आदि से; इन सब कारणों से ओज दूषित हो जाने से आयु और बल को नष्ट करनेवाला यह ओजोमेह रोग होता है। शारीरिक श्रम के कारण से या अन्य कारणों से, रक्तसंचार की शीघ्रता से तथा प्रकृति की विपरीतता से ओज विकृत होकर हंस के अण्डा के श्वेत भाग के समान अथवा पिसे हुए चावलों के समान पदार्थ मूत्र के साथ आने लगता है। जहाँ मेदा धातु के क्षय तथा ज्वर, अरोचक, शोथ और अग्निमान्द्य आदि उपद्रव होते हैं वहाँ पर यह रोग असाध्य हो जाता है अन्यथा कृच्छ्रसाध्य है। इस रोग में मनुष्य कठिनता से बच जाता है ॥ ५-९ ॥

ओजोमेह की चिकित्सा।

विचार्य दोषदूष्यादीन् निदानं परिवर्जयेत्। चिकित्सेत् गदाक्रान्तं दोषदूष्यानुसारतः ॥ १० ॥ अत्र प्रधानमगदं हितमत्र विशेषतः। वङ्गवीर्यं रसोद्भूतमौषधं शिवमिच्छता ॥ ओजोह्रासजदौर्बल्यं दूरीकुर्यात् प्रयत्नतः ॥ ११ ॥

दोष-दूष्य आदि का विचारकर रोग उत्पन्न करनेवाले कारणों को छोड़ देना चाहिए और दोषदूष्यानुसार चिकित्सा करनी चाहिए। वङ्ग-भस्म जिसमें प्रधान औषध हो वही औषध इस रोग में विशेषरूप से लाभदायक है। रसजन्य ( पारद से बनी ) औषध त्याज्य हैं। ओजक्षय से उत्पन्न दुर्बलता को यत्नपूर्वक दूर करना चाहिए ॥ १०-११ ॥

चन्दनादि क्वाथ।

चन्दने नलदं द्राक्षा गुडूची मधुकं स्फटी। धात्री च क्वाथ एतेषां ओजोमेहोपशान्तिकृत् ॥ १२ ॥ तथा हारिद्रमाञ्जिष्ठमेहादीनां परमौषधम्। सोपद्रवाणां कथितः कृपार्द्रेणैव शम्भुना ॥ १३ ॥

सफेद चन्दन, लालचन्दन, खस, दाख, गिलोय, मुलेठी, फिटकरी और आँवला का क्वाथ ओजोमेहनाशक है। तथा उपद्रवयुक्त हारिद्र तथा मांजिष्ठमेह आदि प्रमेहों की भी यह उत्तम औषध है।। इसे दया से युक्त श्रीशङ्करजी ने कहा है ॥ १२-१३ ॥

अजमोदादि चूर्ण।

अजमोदामृता शुण्ठी गुडूची त्रिफला त्रिवृत्। बीजं गोक्षुरजं दारु निशा श्यामनुसारकम् ॥ १४ ॥ चूर्णमेषां माषमितं सेवितं यत्नतो हरेत्। ओजपिष्टादिजान् मेहान् द्रुतं भास्वान् यथा तमः ॥ १५ ॥

अजमोद, गिलोय, सोंठ, त्रिफला, निशोथ, गोखरू के बीज, दारुहल्दी, सारिवा, नौसादर, इन सबका चूर्ण करके एक माशा की मात्रा में यत्नपूर्वक सेवन करने से ओज, पिष्ट आदि

प्रमेह इस प्रकार नष्ट होते हैं जैसे सूर्य से अन्धकार नष्ट होता है ॥ १४-१५ ॥

दाडिमाद्यं घृतं चन्द्रप्रभा नाम वटी तथा । मुक्तावङ्गेश्वरश्चैव वसन्तकुसुमाकरः ॥ १६ ॥ चन्दनाद्यासवोऽरिष्टो देवदारुसमुद्भवः । प्रमेहमिहिरं तैलं तथा मेहाधिकारिकम् ॥ अगदं चात्र युञ्जीत नित्यं कुशलमिच्छता ॥ १७ ॥

दाडिमाद्यघृत, चन्द्रप्रभावटी, मुक्तावंगेश्वर, वसन्तकुसुमाकर, चन्दनाद्य आसव, देवदार्वारिष्ट, प्रमेहमिहिर तैल तथा प्रमेहाधिकार में कहे हुए प्रयोग भी आवश्यकतानुसार इस रोग में प्रयुक्त करने चाहिए ॥ १६-१७ ॥

चन्दनासव।

चन्दने सरलं देवदारु दारुनिशा निशा। त्रिवृत् चित्रकमूलञ्चागुरु धात्री सुरभियम् ॥ १८ ॥ शतमूल्यारग्भिद् वासात्वचश्च सारिवाद्वयम् । लक्ष्मणामूलस्तथा मूलं वावरी वरुणत्वची ॥ १९ ॥ प्रत्येकं पलिकं ग्राह्यं द्राक्षायाः पलविंशकम् । धातकीपोडशपलं गुलामानां सितां तथा ॥ २० ॥ माक्षिकार्द्धपलं सर्व्वं जलद्रोणद्वये क्षिपेत् । मासमेकं भाण्डमध्ये सपिधाने निधापयेत् ॥ २१ ॥ चन्दनासव इत्येष रोगानीकनिकृन्तनः । शुक्रदोषं रजोदोषं मूत्रदोषं सुदारुणम् ॥ २२ ॥ निहन्ति त्रिविधान् मेहान् कृच्छ्रमष्टविधं तथा । चतस्रश्चाश्मरीस्तद्वन्मूत्राघातांस्त्रयोदश ॥ २३ ॥ अन्त्रवृद्धिं पाण्डुरोगं कामलाञ्च हलीमकम् । कासं श्वासं तथा कुष्ठमग्निमान्द्यमरोचकम् ॥ २४ ॥ औपसर्गिकमेहांश्चनाशयेद्विकल्पतः । मापितः श्रीमहेशेन लोकानां हितकारिणा ॥ २५ ॥

लालचन्दन, सफेद चन्दन, देवदारु, चीढ़, दारुहल्दी, हल्दी, निशोथ, चित्रक की जड़, अगर, आँवला, कवावचीनी, शतावरी, पापाणभेद, अडूसा की छाल, दोनों सारिवा, लक्ष्मणा की जड़, बबूल की छाल, वरना की छाल, प्रत्येक चार-चार तोले। दाख २ सेर, धाय के फूल ४५ तोले, खाँड़ २ सेर, स्वर्णमाक्षिक की भस्म २ तोले, इन, सबको लेकर २५ सेर ४८ तोले जल में डालकर एक मिट्टी के पात्र में भरकर उसका मुख बन्द कर के एक महीने तक रखा रहने दें। आसव बनाने की विधि से आसव तैयार करके फिर.काम ले। रोगसमूहों को नष्ट करनेवाला यह चन्दनासव वीर्यदोष, रजोदोष, कष्टदायक मूत्रदोष, अनेक प्रकार के प्रमेह, आठ प्रकार के मूत्रकृच्छ्र, चार प्रकार की अश्मरी, तेरह प्रकार के मूत्राघात, अंत्रवृद्धि, पाण्डुरोग, कामला, हलीमक, खाँसी, श्वास, कुष्ठ, अग्निमान्द्य, अरुचि और औपसर्गिकमेह (सुजाक) आदि को नष्ट करता है। श्रीमहेशजी ने मनुष्यों के हित के लिए यह चन्दनासव कहा है ॥ १८-२५ ॥

पथ्यापथ्य की व्यवस्था।

लघु बल्यं पुराणञ्च धान्यमुद्गयवादिकम् । वार्त्ताकुञ्च पटोलञ्च काकोडुम्बरकं तथा ॥ २६ ॥ कारवेल्लादिकं शस्तं वर्ज्जयेन्मधुरं गुरु । मांसं मत्स्यान् तथाऽध्वानमातपाग्निनिषेवणम् ॥ २७ ॥ दूषितातिशीततोयस्नानपानावगाहनम् ॥ २८ ॥

इस रोग में बलकारक, हलका आहार, पुराने अन्न, चावल, मूँग, जौ आदि तथा बैंगन, परवल, कठूमर करेला आदि साग श्रेष्ठ हैं। मधुर, भारी, खाद्य, मांस-मदिरा, मैथुन, धूप, अग्निसेवन तथा दूषित और अत्यन्त शीतल जल में स्नान-पान आदि त्याज्य हैं ॥ २६-२८ ॥

---

## आगन्तुजपक्षाघाताधिकारे

आगन्तुज पक्षाघात का भेद।

पक्षाघातो द्विधा ज्ञेयो दोषागन्तुज-

भेदतः । दोषजः कथितः पूर्वमधुनागन्तुजं शृणु ॥ १ ॥ आगन्तुजोऽपि द्विविधः पक्षाघातः प्रकीर्त्यते । आद्यः पारदसम्भूतो द्वितीयो नागजः स्मृतः ॥ २ ॥

नागजः सीसकजः ।

पक्षाघात दो प्रकार का होता है । १ दोषज, २ आगन्तुज । दोषज तो पहिले कह दिया गया है, आगन्तुज अब कहते हैं । आगन्तुज भी दो प्रकार का होता है । १ पारदजन्य, २ नागज (सीसकजन्य) ॥ १-२ ॥

पारदजन्य पक्षाघात का निदान

रससंस्पर्शसातत्यात् तद्धूमस्य च सेवनात् । पक्षाघातो भवेद् यस्तु स ज्ञेयः पारदोद्भवः ॥ ३ ॥

पारदजन्य पक्षाघात—पारद के स्पर्श या उसके धुएँ के सेवन से एक अंग बेकार हो जाय, उसे पारदजन्य पक्षाघात कहते हैं ॥ ३ ॥

पारदजन्य पक्षाघात के लक्षण ।

आदौ बाह्वोर्बलध्वंसस्ततः कम्पः प्रजायते । वेपने सक्थिनी चापि कायः सर्वस्ततः परम् ॥ ४ ॥ गतौ चलति नृत्यन्निव दृढं द्रव्यं न धारयेत् । स्पष्टं प्रभाषितुं चापि चर्वितुञ्च न च क्षमः ॥ ५ ॥ ततस्तस्यापि निद्रा च प्रलापो बलसंक्षयः । हृल्लासो वह्निनाशश्च दन्तध्वंसः क्वचित् स्रुतिः ॥ ६ ॥ शान्तिर्भवति कम्पस्य विधूतेऽङ्गे रसामये । नागामयस्य लिङ्गानि शृणुतातः समासतः ॥ ७ ॥

अत्र वै शब्दस्य इवार्थे प्रयोगः । स्रुतिः लालास्रावः ।

प्रारम्भ में बाहु का बल नष्ट होने से कम्प प्रारम्भ होकर दोनों काँपती हैं । बाद में सर्वांग भी काँपने लगता है । रोगी नाचता हुआ सा चलता है, किसी वस्तु को दृढ़ता से धारण नहीं कर सकता है । न तो स्पष्ट बोल ही सकता है और न अच्छी तरह चबा ही सकता है । नींद अधिक आती है; बकवाद करने लगता है और बल नष्ट हो जाता है । उबकाइयाँ, अग्निनाश, दाँत गिर जाना और कहीं-कहीं लालास्राव भी होता है । किसी-किसी अंग का कम्प शान्त भी हो जाता है । ये पारदजन्य पक्षाघात के लक्षण हैं । नागजन्यपक्षाघात के लक्षण आगे कहेंगे ॥ ४-७ ॥

पारदजन्य पक्षाघात की चिकित्सा ।

मुख्यं चिकित्सितञ्चास्य निदानपरिवर्जनम् । निदानसेविनो व्याधिर्नापयाद् विनिवर्त्तते ॥ ८ ॥ स्वेदसञ्जननं सर्वं मूत्रकृच्च विरेचनम् । रक्तदोषहरं चात्र शर्मदं भेषजं मतम् ॥ ९ ॥ गन्धकं परमं प्राहुर्भेषजं पारदामये । नेपालनिम्बतोयेन सेव्यो लोहोऽस्य शान्तये ॥ १० ॥

इसकी मुख्य चिकित्सा यही है कि जिन कारणों से उत्पन्न हुआ है उन-उन कारणों को छोड़ दिया जाय । यदि रोग-उत्पादक कारणों को सेवन करते ही रहे छोड़े नहीं, तो औषध सेवन से रोग नष्ट नहीं होता है । स्वेदन (पसीना लानेवाली), मूत्रकारक, दस्तावर, रुधिरदोषनाशक औषध यहाँ लाभदायक होती है । पारदजन्य विकारों में गन्धक श्रेष्ठ औषध है । चिरायता और नीम के क्वाथ से लोह रसायन का सेवन करना भी इसको शान्त करता है ॥ ८-१० ॥

नागजपक्षाघात का निदान

चित्रकृत् मुद्रका ये हि नागैः कर्म प्रकुर्वते । ये वा व्यवहरन्त्यस्य पात्रं तेषां ततो गदः ॥ ११ ॥

जो व्यक्ति चित्रकारी, प्रेस का काम या अन्य सीसा सम्बन्धी काम करता है उसको नागजन्य पक्षाघात होता है ॥ ११ ॥

नागजन्य पक्षाघात के लक्षण ।

अङ्गुलीषु समारभ्य मणिबन्धं ततोऽखिलम् । व्याधिराप्नोति दौर्बल्यं सर्वतः

लक्षणं महत् ॥ १२ ॥ अंसे प्रकोष्ठे तोदश्च बाह्वोश्च परिशीर्णता। नीलिमा दन्तवेष्टे च शूलं चिह्नानि चास्य वै ॥१३॥

अँगुलियों से प्रारम्भ होकर कलाई तक या अधिक भी हाथ में रोग फैलता है और दुर्बलता उसका मुख्य लक्षण है। कन्धा और प्रकोष्ठ में तोदने की पीड़ा, हाथ में शिथिलता, मसूड़ों में नीलापन और शूल होना इसके लक्षण हैं ॥ १२-१३ ॥

नागजन्यपक्षाघात की चिकित्सा।

स्वेदनं भेदनं चापि कुष्ठघ्नं यच्च भेषजम्। तत्सर्वमिह संसेव्यं कृत्वा हेतुविवर्जनम् ॥ १४ ॥

स्वेदन, भेदन और कुष्ठनाशक औषध सेवन करने से लाभ होता है। रोग उत्पन्न करनेवाले कारणों का सेवन करना बन्द कर देने से भी लाभ होता है। १४ ॥

---

## अंशुघाताधिकारः

अंशुघात का निदान और लक्षण।

चण्डांशोरंशुना शीर्ष्णि तप्ते चण्डेन जायते। अंशुघाताभिधो व्याधिः प्राणिनां प्राणपीडनः ॥ १ ॥ तृष्णातिघोरा त्वग्रूक्षा भ्रमो नेत्रस्य रक्तता। मूत्रवेगश्च मूर्च्छा च हृल्लासो विषमा धरा ॥ २ ॥ श्वासकृच्छ्रं स्पर्शहानिराक्षेपश्चात्र सम्भवेत्। प्रायः कारावरुद्धानां भटानां जायते च सः ॥३॥

स अंशुघातः सर्दीगर्मीति वङ्गभाषा।

सूर्य की तेज किरणों से मस्तक गरम हो जाता है जिससे प्राणों को पीड़ित करनेवाली अंशुघात नामक व्याधि जीवों के उत्पन्न होती है। इससे अत्यन्त तीव्र प्यास लगती है, त्वचा रूक्ष हो जाती है, भ्रम और आँखों में लाली हो जाती है, मूत्र का वेग होता है। मूत्र की प्रवृत्ति न होकर मूत्राशय भरा हुआ सा मालूम देता है। मूर्च्छा, उबकाई, विषम स्थिति, श्वास में कष्ट, स्पर्श का अनुभव न होना एवम् आक्षेप (झटके) भी आने लगते हैं। प्राय कैदी वीरों के भी यह रोग हो जाता है। बँगला भाषा में अंशुघात को सर्दी-गर्मी कहते हैं १--३

अंशुघात के अरिष्ट और लक्षण।

नीलिमा हस्तपादस्य धमन्याः क्षणलुप्तता। विक्षेपणश्च गात्राणां मरणायांशुघातिनः ॥ ४ ॥

अंशुघातिनः अंशुघातरोगिणः।

अंशुघातपीड़ित रोगी के हाथ-पैरों का नीला हो जाना, नाड़ी का क्षण में लुप्त होना, क्षण में प्रगट होना और शरीर के अवयवों का इधर-उधर फेंकना उसके मरण के चिह्न हैं ॥४॥

अंशुघात की चिकित्सा।

अङ्गावरणवासांसि दूरे निःक्षिप्य यत्नतः। प्रच्छाये मरुद्वाते गन्धाढ्ये मनसः प्रिये ॥ ५ ॥ विविक्ते व्यजनभसि विहङ्गगगनादिसे। शाययेत् सुखशय्यायामंशुघातिनमञ्जसा ॥ ६ ॥ शीताम्बुसेकं कुर्याच्च चन्दनाम्बु च पाययेत्। नाधिकं पाययेदम्बु सहसा कुशलो भिषक् ॥ ७ ॥ आच्छादयेत्सर्वमङ्गं शीततोयार्द्रवाससा। सहस्रधारया स्नानमंशुघातगदापहम् ॥८॥ दन्त्युद्भवेन तैलेन रेचनं हितमुच्यते। अत्युष्णेनाम्भसा सिक्तं वस्त्रमूर्णामयं पृथु ॥ ९ ॥ सतो निहं स्य तोयञ्च श्रीवासपृष्ठतावलम्। उष्णमेव च ग्रहायां निधायान्येन वाससा ॥ १० ॥ शुष्केण चापि कदलीदलेनातिदृढं ततः। बद्धासिदार्द्रं धारञ्च संरक्षेदिति यत्नतः ॥ ११ ॥ अनेन विधिना मूर्च्छां नश्यत्येव हि सत्वरम् ॥ अङ्गानामूष्मणो नाशे धमन्याश्च व्यतिक्रमे

स्वेदो विधेयो योज्या च मृतसञ्जीवनी सुधा ॥ १२ ॥

रोगी के शरीर के वस्त्रों को दूर करके उसके हवा करनी चाहिए तथा छाया में हवादार स्थान में रखना चाहिए जहाँ मन को प्रिय सुगन्ध आती हो। एकान्त खुले हुए स्थान में जहाँ पक्षिगण बोलते हों सुखदायक शय्या पर अंशुघातपीड़ित रोगी को सुलाना चाहिए। रोगी का शीतल जल से सेक (ठंडे जल में कपड़ा भिगोकर सिर आँख आदि पर फेरना) करना चाहिए। चन्दन का जल (अर्कचन्दन) पिलाना चाहिए, पर एक साथ अधिक जल न पिलाना चाहिए। रोगी के सब शरीर को शीतल जल से भीगे हुए वस्त्र (भिगोकर निचोड़े हुए) से ढक देना चाहिए, तथा फुवारे के जल से स्नान भी कराना चाहिए। दन्ती (जमालगोटा की जड़) के तेल से विरेचन करा देना भी आरामदायक है। अत्यन्त गरम जल में ऊन के मोटे कपड़े को डुबोकर उसके जल को निचोड़ दे और उसमें चीड़ का गोंद मिलाकर गरम-गरम ही दूसरे कपड़े पर लगाकर गर्दन के पिछले हिस्से पर लगा दे। सूख जाने पर केला के पत्तों से ढककर बाँध दे, परन्तु बहुत कसकर न बाँधे। जब तक दाह हो तब तक इसकी यत्नपूर्वक रक्षा करता रहे। इस विधि से शीघ्र ही मूर्च्छा नष्ट हो जाती है। शरीर के अवयवों की ऊष्मा नष्ट होने पर (ठंडे पड़ जाने पर) और नाड़ी के उलटे क्रम से चलने पर पसीना दिलाना चाहिए और मृतसंजीवनी सुधा का प्रयोग करना चाहिए ४–१२

रत्नेश्वर रस।

'वज्रं' वैक्रान्तमभ्रञ्च सिन्दूरमपि माक्षिकम्। मौक्तिकं हेम रौप्यञ्च सममिक्षुजवारिणा ॥ १३ ॥ शतावरी रसेनापि विदार्य्याः स्वरसेन च। विभाव्य वटिका कुर्य्याद्रक्तिकामभिता भिषक् ॥ त्रिफलाजलयोगेन रसो रत्नेश्वरो हरेत् ॥ १४ ॥ मस्तिष्कस्नायुजान् व्याधीनंशुघातं विशेषतः ॥ अंशुघाते प्रकर्त्तव्यो विधिर्मूर्च्छानिसूदनः ॥ १५ ॥

हीरा, वैक्रान्त, अभ्रक, रससिन्दूर, स्वर्णमाक्षिक, मोती, सोना और चाँदी सबकी भस्में समानभाग लेकर ईख के रस, शतावरी के रस और विदारीकन्द के स्वरस से घोटकर एक-एक रत्ती की गोलियाँ बना ले। त्रिफला के जल के साथ इस रत्नेश्वर रस का प्रयोग करने से यह मस्तिष्क और स्नायु (नाड़ी Nerves) जन्य विकारों को नष्ट करता है। विशेषतः अंशुघात के लिए अधिक लाभकारक है। अंशुघात रोग में मूर्च्छा नष्ट करनेवाले प्रयोग करना चाहिए ॥ १३–१५ ॥

महाशिशिरपानक।

